Barcode : 2990100072909
Title - dhvanyaalooka
Author - ravisheikhara pan'd'ita badariinaatha sharma
Language - sanskrit
Pages - 526
Publication Year - 1937
Barcode EAN.UCC-13
2 990100 072909

श्रीः

हरिदास-संस्कृत-ग्रन्थमाला

६६

श्रीमदानन्दवर्धनाचार्यप्रणीतो

ध्वन्यालोकः ।

मैथिलश्रोत्रियकविशेखरपण्डितश्रीबदरीनाथशर्मणा

निर्मितया 'दीधिति' विवृत्या विभूषितः ।

प्रकाशक—

चौखम्बा-संस्कृत-पुस्तकालय,

बनारस सिटी ।

THE

HARIDAS SANSKRIT SERIES

66

THE

DHVANYĀLOKA

OF

ĀNANDAVARDHANĀCHĀRYA

Edited

WITH THE DĪDHITI COMMENTARY

INTRODUCTION, INDEX ETC.,

By

Kavis'ekhara Pandit Badari Nāth S'armā

PUBLISHED BY

JAYA KRISHNA DÂS HARIDÂS GUPTA

The Chowkhambâ Sanskrit Series Office.

Benares City.

1937

[*All Rights Reserved by the Publisher*]

Registered According to Act XXV of 1867,
[*All Rights Reserved by the Publisher*]

PRINTED BY

JAYA KRISHNA DAS GUPTA,

VIDYA VILAS PRESS, BENARES CITY.

1937.

* श्रीः *

हरिदास-संस्कृत-ग्रन्थमाला

६६

श्रीमदानन्दवर्धनाचार्यप्रणीतो

ध्वन्यालोकः ।

मुजफ्फरपुरराजकीयसंस्कृतमहाविद्यालयसाहित्यप्रधानाध्यापकेन

मैथिलश्रोत्रियकविशेखरपण्डितश्रीबदरीनाथशर्मणा

निर्मितया 'दीधिति' विवृत्या विभूषितः ।

प्रकाशकः—

जयकृष्णदास हरिदास गुप्तः-

चौखम्बा संस्कृत सीरीज़ . आफिस,

बनारस सिटी ।

१९९४

राजशासनानुसारेण सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

प्राप्तिस्थानम्

चौखम्बा संस्कृत पुस्तकालय,

बनारस सिटी।

भूमिका ।

अये सुधीसहृदयधौरेयाः साहित्याम्भोधिनिष्णाताः !

कीर्तिचतुर्वर्गादिप्रयोजकस्य सहृदयहृदयाह्लादिनः शब्दार्थमयस्य (१)काव्यस्य कायस्य जीवितमिव सारभूतं व्यक्तिमात्रावलम्बेन गुणीकृताभ्यां शब्दार्थाभ्यां मध्यमानादेन शाब्दिकाङ्गीकृतं स्फोटमिव स्फुटीक्रियमाणं वस्त्वलङ्काररसादिरूपतया त्रिशाखमपि रसादिप्रधानं ध्वनिमभाववादेन, भाक्तत्वोपन्यासेन, ब्रह्मतत्त्ववदनिर्वचनीयताऽऽख्यानेन, समासोक्त्याद्यर्थालङ्कारान्तर्भावनेन, गुणवत्संघटनाऽऽत्मकरीतिलक्षणताऽङ्गीकारेण, वक्रोक्त्यन्तर्पातनेन, परामर्शप्रभवसंविद्विषयत्वव्यवस्थापनेन च विविधाभिर्भङ्गिभिः खण्डयतां प्रतिपक्षिप्राचीनविपश्चितां मतं ध्वनिस्थापनयाऽपाचिकीर्षुः सुगृहीतनामधेयो राजानकानन्दवर्धनाचार्यः साहित्याध्वन्यालोकमादधानं 'ध्वन्यालोक'समभिधानं ध्वनिग्रन्थमिमं प्रथमं प्राणैषीत् ।

इह च प्रथमोद्द्योते—ध्वनिस्वरूपनिरूपणं प्रतिज्ञाय तदभाव–भाक्तत्वानिर्वाच्यत्ववादिनां मतं निराकृतम्, ध्वनिं लक्षयित्वा समासोक्त्याद्यलङ्कारानन्तर्भावश्च दर्शितः । द्वितीयोद्द्योते—व्यङ्ग्यमुखेन ध्वनेः प्रभेदानां लक्षणोदाहरणानि प्रकाशयता रसादिध्वनि–रसवदाद्यलङ्काराणां मिथो वैलक्षण्यं परिपन्थिस्मयमन्थनपूर्वकं व्यवस्थाप्य गुणा निरूपिताः । तृतीयोद्द्योते—पुनर्व्यञ्जकमुखेन ध्वनेः प्रकारान् सपरिकरं निरूपयता रीतीर्वृत्तीश्च प्रदर्श्य भाट्ट–प्राभाकर–तार्किक–वेदान्ति–बौद्धादिनयेष्वपि व्यक्तिः स्थापिता । तुरीयोद्द्योते च—ध्वनिसम्बन्धेन प्रागुक्तानामप्यर्थानामपूर्वत्वं निदर्श्य, कविप्रतिभाऽऽनन्त्यं ध्वनिप्रयोजनान्तरं प्रकटयता शान्तादिरसानां भारतादिप्रबन्धव्यङ्ग्यतां व्यवस्थापयता सप्रबन्धनामनिर्देशमुपसंहारो विहितः ।

अत्र हि ध्वनिशब्देन बहुत्र गुणीभूतशब्दार्थनिष्ठव्यक्तिप्रयोज्यबोधविषयप्रधानीभूतार्थस्य, कुत्रापि तदर्थव्यञ्जनक्षमशब्दार्थयोः, क्वचित् तादृशार्थबोधनव्यापारस्य च परामर्शः । भक्तिपदेन शुद्धगौणलक्षणयोः, लक्षणापदेन तु गौणलक्षणामा-

---

(१) एतन्मदीयसाहित्यसारिण्यां स्फुटम् ।

त्रस्य प्रतीतिः । शब्दशक्त्युद्भवध्वनेरलङ्कारमात्ररूपतयैकविधत्वमेव । शब्दार्थोभयशक्त्युद्भवध्वनिरप्युपपत्त्यैवोहनीयः । काव्यस्य मुख्यतया ध्वनिर्गुणीभूतव्यङ्ग्यं चेति द्वावेव प्रकारौ, चित्रं तु गौणः प्रभेदः । सर्वापेक्षया ध्वनेः प्राधान्यम्, तत्रापि विशेषेण रसादिलक्षणस्य । लेखशैली च पातञ्जलमहाभाष्यादिवत् पुनः पुनरुपात्तविषयोपपादिका नितरामुत्तानप्रायाभिप्रायाऽपि गभीराशया प्रबन्धप्राचीनतरत्वं द्योतयति । ध्वनेः सर्वतः प्रथमं लक्षणस्य प्रवर्तकत्वाद् ग्रन्थकृदयं ध्वनिकारसञ्ज्ञासम्मानस्य भूमिः । लक्ष्यन्तु महर्षिवाल्मीकि–द्वैपायनादिभिरेव प्रसेधितम् । अत एव 'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः' इतिकारिकायां निगमप्ररूढानादिपारम्परिकप्रसिद्धेः सूचयिता समाम्नातशब्द उपक्रम एव प्रयुक्तः ।

ग्रन्थोऽयं कारिकारूपो ध्वनिनामा, परिकरश्लोक–सङ्ग्रहश्लोक–सङ्क्षेपश्लोकघटित–वृत्तिरूपश्चालोकनामेतिभागद्वयभाक्, ध्वन्यालोकः सहृदयालोकः काव्यालोकश्चेतिसंज्ञात्रयभाक् च । तत्र कारिकाग्रन्थस्याद्यमङ्गलराहित्येन, कारिकावृत्त्योः प्रतिपाद्यविषयैक्येन, ध्वनिग्रन्थकृन्नाम्नः पृथगनुपलम्भेन जल्हणगुम्फितायां सूक्तिमुक्तावलौ—

'ध्वनिनाऽतिगभीरेण काव्यतत्त्वनिवेशिना ।
आनन्दवर्धनः कस्य नासीदानन्दवर्धनः ? ॥' इति राजशेखरीयपद्यस्य दर्शनाद्, व्यक्तिविवेके महिमभट्टेनोभयो(१)रविभागेनैव खण्डनात्, सूरिकल्हण–हेमेन्द्र–क्षेमेन्द्र–जयरथ–विश्वनाथ–गोविन्द–कुमारस्वामिप्रभृतिनिबन्धृमतानुकूल्यात्, समुद्रबन्धस्य काव्यपञ्चकोपपादितसिद्धान्താच्च कारिकावृत्तिग्रन्थयोः प्रणेताऽऽनन्दवर्धन एवैक इति पौरस्त्या विपश्चितो निश्चिन्वन्ति ।

'जैकोबी'प्रभृतयः पाश्चात्यास्तु 'अत एव मूलकारिका तन्निराकरणार्था न श्रूयते, वृत्तिकृत्तु निराकृतमपि प्रमेयसङ्ख्यापूरणाय कण्ठेन तत्पक्षमनूद्य निराकरोति ।' इति (निर्णयसागरे पूर्वं मुद्रितस्य लोचनस्य ५९ पृष्ठे) 'तेनात्र प्रथमोद्द्योते ध्वनेः

(१) कारिकावृत्त्योः ।

सामान्यलक्षणमेव कारिकाकारेण कृतम्, द्वितीयोद्द्योते कारिकाकारोऽवान्तरविभागं विशेषलक्षणं च विदधदनुवादमुखेन मूलविभागं द्विविधं सूचितवान्। तदाशयानुसारेण तु वृत्तिकृदत्रैवोद्द्योते मूलविभागमवोचत्।' इति (५९ पृष्ठे) 'न चैतन्मयोक्तम्, अपि तु कारिकाकाराभिप्रायेणैवाह—' इति (६० पृष्ठे) 'भवति मूलतो द्विभेदत्वं कारिकाकारस्यापि सम्मतमेवेति भावः।' इति (६० पृष्ठे) 'एतत् तावत् त्रिभेदत्वं न कारिकाकारेण कृतम्, वृत्तिकारेण तु दर्शितम्।' (इति १२३ पृष्ठे) च लोचनस्य दर्शनान्मम्मटादिस्वरसानुसन्धानाच्च कारिकावृत्तिकर्त्रोर्भेदं प्रतिपादयन्ति।

एवं सति यदा कारिकावृत्तिकृतोर्भेदः, तदा कारिकाकारो ध्वनिकारातिरिक्तनाम्ना सर्वैरपरिचित एव। अत एव तदीयः समयोऽपि विशेषेण निर्धारयितुमशक्यः। सामान्यतस्तु दण्डिभामहोद्भटादिभ्यः सप्तमादिशताब्दयुद्भूतेभ्योऽर्वाचीनः नवमशताब्दीसमुत्पन्न–वृत्तिकृतश्च प्राचीनो ध्वनिकार इत्युच्यते। वृत्तिकारस्य परिचयस्त्वनुपदं वितीर्यते। यत्तु दाक्षिणात्यः शोभनकविः सहृदयमेव ध्वनिकारमुररीचकार, तन्न, 'सहृदयमनःप्रीतये' इत्यादिकारिकाघटकसहृदयशब्दस्य तदाख्यानबीजभूतस्य विदग्धपरताया एव सकलसुधीसम्मतत्वात्।

अभेदे तु राजानकोपाधिरानन्दवर्धनाचार्यः काश्मीरिक–भूसुरवंशावतंसस्य भट्टनोणस्य (१)तनयः ख्रिष्टनवमशताब्द्या उत्तरार्धे(२) तन्त्रसाहित्यरत्नखनिं कश्मीरावनिं शासतोऽवन्तिवर्मनृपतेः सभापण्डित आसीदिति राजतरङ्गिणीतो जैकोवी–वुल्नराभ्यां निर्धारितम्। तदेव काव्यप्रकाशव्याख्यातुर्वामनाचार्यस्यापि सम्मतम्। 'यस्मिन्नस्ति न वस्तु किञ्चन' इत्यादिध्वनिखण्डनपरवृत्तिघटकपद्यस्य प्रणेता मनोरथनामा कविरप्यानन्दवर्धनस्य समानकालिक एवेति तत्रत्यलोचनान्मतिगोचरीभवति। आलङ्कारिकशिरोमणिरयं निखिलेषु दर्शनेषु परमां प्रौढिं बिभ्राणोऽपि व्याकरणे निरतिशयं पक्षपातमवाक्षीदित्यपि तत्तन्मतनिराकृतिपरसन्दर्भेभ्यः(३) 'प्रथ-

(१) कचित्तु 'जोन' इति तन्नाम। (२) ख्रैष्ट ८५५ तः ८८४ वर्षं यावत्।
(३) व्यञ्जनास्थापनप्रसङ्गे।

मे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्' इति(१) वृत्तिग्रन्था-च्चावसातुं न दुश्शकम् ।

आनन्दवर्धनाचार्यविरचितप्रबन्धेषु ध्वन्यालोकः, देवीशतकम्, विषमबाण-लीला (प्राकृतभाषामयी), अर्जुनचरितम्, धर्मोत्तमानाम्न्या विनिश्चयटीकाया विवृतिः, इतिपञ्चानां नामान्याकर्ण्यन्ते । तेषु ध्वन्यालोक-देवीशतके काव्यमालायां मुद्रिते, विषमबाणलीलाऽर्जुनचरिते क्वचित् क्वचिद् ध्वन्यालोक एवोद्धृतनामनी, धर्मोत्तमाविवृतिस्तु तृतीयोद्द्योतान्त(२)वृत्तिगम्या तल्लोचनेन स्फुटीकृता ।

किञ्च ध्वन्यालोके—'अर्जुनचरितम्' 'कादम्बरी' 'कुमारसम्भवम्' 'तापसव-त्सराजम्' 'नागानन्दम्' 'भारतम्' 'मधुमथनविजयम्' 'रत्नावली' 'रामाभ्युदयम्' 'रामायणम्' 'विषमबाणलीला' 'वेणीसंहारम्' 'सेतुबन्धम्'(३) 'हरिविजयम्'(४) 'हर्षचरितम्' इत्येतेषां प्रत्नानां ग्रन्थरत्नानाम्, 'अमरुकः' 'आदिकविबाल्मीकिः' 'उद्भटः' 'कालिदासः' 'धर्मकीर्तिः' 'बाणः' 'भरतः' 'भामहः' 'व्यासः' 'सर्वसेनः' इत्यमीषां प्रबन्धॄणां च नामान्युपलभ्यन्ते । तत्र भट्टभामहः खैष्टाष्टमशताब्द्यां कश्मीरावनिमण्डलं मण्डयामास । एतदीयदेवीशतकव्याख्याऽन्ते महाभाष्यप्रदी-पकृत्कैयटश्च ग्रन्थसमाप्तिसमयं ९७७ तमं खैष्टाब्दमाख्यत् । ध्वन्यालोकलोचन-कारोऽभिनवगुप्तोऽपि स्वरचित 'प्रत्यभिज्ञाविमर्षिणी' समाप्तौ—

'इति नवतितमेऽस्मिन् वत्सरेऽन्त्ये युगांशे,

तिथिशशिजलधिस्थे मार्गशीर्षावसाने ।' इत्यादिपद्यं निगद्य खैष्टदशम-शताब्द्यवसानं स्वसमयमुल्लिलेख। दशमशताब्दीसमुद्भूतो राजशेखर एकादश्शता-ब्दीसमुद्भूतो हेमेन्द्रः क्षेमेन्द्रश्च स्वस्वप्रबन्धेषु सश्लाघं राजानकानन्दवर्धनं प्रामाणि-कत्वेन स्वीचकार। एतावताऽप्यानन्दवर्धनस्य नवमशताब्दी स्थितिकाल इति निश्चेतुं शक्यम् ।

---

(१) ध्वनिलक्षणप्रकरणे । (२) 'यत्त्वनिर्देश्यत्वम्' इत्यादिना ।
(३) प्राकृतमहाकाव्यम् । (४) सर्वसेनकृतम् ।

यत्तु भरतसूत्रटीकायाम् 'अस्मद्गुरवः' इत्यभिनवगुप्तस्यानन्दवर्धनोल्लेखिलेखमवलोक्य समसामयिकत्वमुभयोः पिशेल्महाशयेन संशयितम्; तन्न, गुरुत्वस्य परम्परया कालभेदेऽपि सारस्वतमहत्त्वख्यापनाय वक्तुं शक्यत्वात्, उभयोः समानकालिकत्व एकतरसम्बन्धिग्रन्थस्यापरेण सश्रद्धं व्याख्यातुमनौचित्याच्च।

ध्वन्यालोकस्य चन्द्रिका लोचनं चेतिटीकाद्वयं श्रूयते। तत्र चन्द्रिका नेदानीमुपलभ्यते, किन्तु—

'किं लोचनं विनाऽऽलोको भाति चन्द्रिकयाऽपि हि।
तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्॥' इति तृतीयोद्द्योतान्तलोचनश्लोकात्, 'यस्तु व्याचष्टे' इत्युपष्टभ्य 'इत्यलं निजपूर्वजसगोत्रैः(१) साकं विवादेन।' इतितृतीयोद्द्योतस्यारम्भे, 'चन्द्रिकाकारस्तु पठितमनुपठतीतिन्यायेन गजनिमीलिकया व्याचचक्षे' इत्युपक्रम्य 'इत्यलं पूर्ववंश्यैः सह विवादेन बहुना।' इति (१८५ पृष्ठे) तन्मध्ये लोचनलेखाच्च केवलमुन्नीयते।

लोचनन्तु खैष्टदशमशताब्द्यवसाने कश्मीराख्यजनपदनिवासिना भट्टतौतादि(२)गुरुत्रयीशिक्षितेन वराहगुप्तस्य पौत्रेण चुखलस्य तनुजन्मना मनोरथ(३)गुप्तस्याग्रजेन कर्मक्षेमराजादिगुरुणा महामाहेश्वराचार्याभिनवगुप्तेन विरचितं तृतीयोद्द्योतान्तं(४) मोहमयीनगरे निर्णयसागरमुद्रणागारे मुद्रितञ्च।

अथास्य ध्वन्यालोकस्य प्रथममुद्रणावसरे परिशुद्धादर्शपुस्तकानुपलब्धेस्त्रुटीरशुद्धीश्च पठन-पाठनपरायणानामरुन्तुदा नितरामाकलय्य लोचनं च प्राचीनतमक्रमनिबद्धतयाऽऽधुनिकधीगोचरतामनासादयदवधार्य कतिपयैः सुहृद्भिरन्तेवासिभिश्च समुत्साह्यमानः कामपि सरलां विवृतिं नूतनया भङ्ग्या विरचयितुं, चिराद् विचा-

---

(१) चन्द्रिकाकारोऽभिनवगुप्तस्य पूर्ववंश्य इत्यप्यतो ज्ञायते।

(२) आदिपदेन लक्ष्मणगुप्त-भट्टेन्दुराजयोः सङ्ग्रहः।

(३) आनन्दवर्धनसमकालिकमनोरथकवेरयं भिन्नः, कालभेदात्।

(४) तच्चतुर्थोद्द्योतस्तु 'कलकत्तायूनिवर्सीटीजर्नल'पत्रादुपलब्धः।

रयन् १९२८ खैष्टाब्दे साहायकसामग्रीविरहेऽपि कथञ्चन दीधितिसमभिधानां विवृतिमेतां सामि विरचय्य राजकीय–विहारोत्कलसंस्कृतसमितेः शास्त्रविचारपरिषदे निबन्धपरीक्षाप्रसङ्गेन समर्प्य प्रधानं पारितोषिकं चावाप्य किञ्चित्सफलप्रयत्नम्मन्यो दीधितिं पूरयितुमुदयंसिषम् , श्री १०८ राधागोविन्दानुग्रहेणैषमः पूर्णामकार्षं च ।

यद्यपीह लोचनप्रतिपादितानेव पदार्थान् प्रायेणोपादाम् , क्वचित्तु सन्दर्भशुद्ध्यनुरोधात् सिद्धान्ताभिनवीभावात् , तदनुपलम्भाच्च नूतनां पद्धतिमाशिश्रियम् , तथाऽपि भूयांसि स्खलितानि संशयानो महाशयांस्तान्यपोहितुमूहकुशलान् सङ्ख्यावतो विदग्धमूर्धन्यानभ्यर्थये ।

एतत्सम्बन्धे विहारोत्कलसंस्कृतसमितेर्भूतपूर्वकार्यसम्पादकानां सारस्वतमहामहिम्नां स्वर्गातिथीनां सुरेन्द्रनाथ (मजुमदार, एम्.ए,पी.आर.एस.) शास्त्रिणां, मान्यवराणां तेजनारायण (जुब्ली) महाकलाशालाप्रधानाध्यक्षाणां (डाक्टर) श्री हरिचन्द्र (आइ. ई. एस्.) शास्त्रिणां, समृद्धश्रद्धासम्मानभाजनानां महामहोपाध्यायानां कर्मकाण्डप्रधानाचार्यपण्डितश्रीमुकुन्द (झा, बख्शी) शर्मणां च प्रोत्साहनजन्यमुपकारमपारं प्रत्युपकर्तुमसमर्थः परमाचेतनं स्मरिष्यामि । अन्तेवासिषु चायुष्मतः साहित्याचार्यस्य श्रीवेचनशर्मणः, श्रीदरवारिशर्मणः, साहित्यशास्त्रिणः, श्रीश्यामानन्दशर्मणश्च पूर्वपत्रसंशोधनादिसाहाय्योपकृतिमविस्मरँस्तानाशिखं शुभाशिषां राशिना योजयामि ।

स चायं दीधितिविवृतिविशदीकृतो मुद्रणाय वितीर्णसर्वाधिकारो ध्वन्यालोकः सर्वविधसंस्कृतपुस्तकमुद्रणानवरतप्रबद्धपरिकरेण वाराणसेयचौखम्बासंस्कृतपुस्तकालयाधिपतिना श्रेष्ठिश्रीजयकृष्णदासगुप्तेन स्वकीये विद्याविलासनाम्नि मुद्रणालये सम्मुद्रय प्रकाशित इति तदीयेनाप्युपकारभरेण प्रेर्यमाणस्तस्मै शतमाशिषो वितरामीति—

कौमुदीमहोत्सवः
२—११—३७ } विनीतो निवेदयते—
श्रीबदरीनाथः ।

* श्रीः *

॥ श्रीकृष्णःशरणम् ॥

अथ ध्वन्यालोकस्य विषयानुक्रमणिका ।

प्रथमोद्द्योते-

विषयाः-	पृ०	पं०
श्रीमदानन्दवर्धनाचार्यविहितं मङ्गलाचरणम्	१	
दीधितिकारकृतं मङ्गलाचरणम्	१	९
अनुबन्धप्रदर्शनपूर्वकं ध्वनिस्वरूपनिरूपणम्	३	१
ध्वन्यभाववादिनां प्रथमः पक्षः	४	३
,, द्वितीयः पक्षः	५	४
,, तृतीयः पक्षः	६	४
ध्वनिनिरसनम्	७	२
ध्वन्यभाववादं द्रढयितुमन्यसम्मतिप्रदर्शनम्	८	३
भाक्तत्ववादिपक्षप्रकाशनम्	९	१
ध्वनेर्गुणवृत्तावन्तर्भावाभावकथनम्	९	३
कारिकोक्तध्वन्यनिर्वचनीयतावादप्रकाशनम्	१०	३
ध्वनिस्वरूपनिरूपणप्रस्तावे वाच्यादिभेदकथनरूपासङ्गतेर्निराकरणम्	१२	१
काव्यशब्दव्याख्यानम्	१२	३
वाच्यार्थविशेषनिरूपणाभावकारणम्	१२	५
व्यङ्ग्यस्य वाच्याद् वैलक्षण्यनिदर्शनम्	१३	३
वस्तुनो व्यङ्ग्यस्य भेदादिकथनम्	१४	५
क्वचिद्वाच्ये प्रतिषेधरूपे विधिरूपव्यङ्ग्योदाहरणम्	१५	३
क्वचिद्वाच्ये विधिरूपेऽनुभयरूपव्यङ्ग्योदाहरणम्	१६	२
क्वचिद्वाच्ये प्रतिषेधरूपेऽनुभयरूपव्यङ्ग्योदाहरणम्	१७	४
व्यङ्ग्यस्य क्वचिद् वाच्याद्विभिन्नविषयत्वेन व्यवस्थापनम्	१७	२३
वाच्यव्यङ्ग्ययोर्भेदकानां सङ्ख्याऽऽदीनामपि सङ्ग्रहार्थं कथनम्	१८	१२
अलङ्कारात्मकव्यङ्ग्यद्वितीयभेदस्य वाच्याद् भेदोपदेशः	१८	१९

सदीधितिध्वन्यालोकस्य-

विषयाः-	पृ०	पं०
रसादिलक्षणस्य व्यङ्ग्यतृतीयभेदस्य वाच्याद्भेदकथनम्	१८	२४
रसादीनां वाच्यत्वखण्डनाय विकल्पपक्षः	१९	४
व्यतिरेकाभावप्रदर्शनम्	१९	१०
अन्वयाभावप्रदर्शनम्	१९	२६
प्रकारत्रये यत्पर्यवसितं तत्कथनम्	२१	२
रसादिप्रतीतेरलक्ष्यक्रमत्वस्य सङ्क्षेपेण कथनम्	२१	१७
काव्यात्मत्वस्येतिहासोपन्यासेन दृढीकरणम्	२१	२४
आदिकवेः श्लोकनिर्देशः	२३	१७
शोकस्य काव्यजीवितत्वबीजभूतव्यङ्ग्यत्वस्य प्रतिपादनम्	२४	४
रसादेः काव्यात्मतायाः प्रकारान्तरेण व्यवस्थापनम्	२४	२३
प्रतिभाविशेष एव महाकवित्वस्य सम्पादक इति प्रदर्शनम्	२५	१४
वाच्यव्यङ्ग्ययोः प्रतीतिसामग्रीभेदनिबन्धनोऽपि भेदः	२५	२३
एतस्यैव भेदकस्य कारिकायामाख्यानम्	२५	२७
वाच्यव्यङ्ग्ययोर्भेदकतर्कस्य कथनम्	२६	१४
तत्र सनिदर्शनव्यतिरेकोपपादनम्	२६	१८
दीधितौ स्वरलक्षणम्	२६	२३
,, श्रुतिलक्षणम्	२६	२६
प्रतीयमानार्थस्य प्राधान्यबोधनायोपक्रमः	२७	८
ध्वनौ वाच्यवाचकयोर्बहिरङ्गत्वेऽपि प्रथमोपादानप्रयोजनोपपादनम्	२७	२५
वाच्यव्यङ्ग्यप्रतीत्योः सदृष्टान्तकार्यकारणभावप्रदर्शनम्	२८	२२
वाच्यस्य प्रथमप्रतीतत्वादपि न व्यङ्ग्यार्थस्य प्राधान्यहानिः	२९	१४
अस्य दार्ष्टान्तिकमुखेन प्रतिपादनम्	३०	२
ध्वनिलक्षणम्	३१	२
ध्वनेरलङ्कारान्तर्भावाभावकथनम्	३२	७
ध्वनिमनङ्गीकुर्वतो मतमुद्दिश्य निराकरणम्	३२	१४
अलङ्कारगुणादिष्वेव ध्वनिमन्तर्भावयतो मतमुद्दिश्य खण्डनम्	३३	३
गुणीभूतव्यङ्ग्येष्वलङ्कारविशेषेषु ध्वनेरन्तर्भावमाशङ्क्य निरसनम्	३३	२४

विषयानुक्रमणिका

विषयाः—	पृ०	पं०
दीधितौ समासोक्तेरुदाहरणम्	३४	१८
समासोक्तौ व्यङ्ग्याप्राधान्यकथनम्	३४	२२
आक्षेपालङ्कारे व्यङ्ग्याप्राधान्यम्	३५	२५
दीधितावाक्षेपस्योदाहरणम्	३६	२
वाच्यस्यैव प्राधान्ये निदर्शनम्	३७	२
व्यपदेशोऽपि प्राधान्यकृत एव भवतीत्यत्र निदर्शनम्	३७	
दीधितौ दीपकोदाहरणम्	३७	१९
दीधितावपह्नुतेरुदाहरणम्	३७	२४
दीधितावुक्तनिमित्ताचिन्त्यनिमित्तविशेषोक्तिप्रकारयोः क्रमेणोदाहरणे	३८	१८
अनुक्तनिमित्तविशेषोक्तौ व्यङ्ग्याप्राधान्यम्	३८	२३
पर्यायोक्ते ध्वनेरन्तर्भावप्रदर्शनम्	३९	९
दीधितौ पर्यायोक्तस्योदाहरणम्	३९	१३
अपह्नुतिदीपकयोर्ध्वनिप्रवेशनिरसनम्	४०	७
ध्वनेः सङ्करानन्तर्भावकथनम्	४०	११
दीधितौ सङ्करलक्षणम्	४०	१४
द्वितीयेऽपि तद्भेदे ध्वनेः प्रवेशनिरसनम्	४०	२६
'होइ ण' इत्यत्रार्थान्तरन्यासस्तावद्वाच्यत्वेन, व्यतिरेकापह्नुती तु व्यङ्ग्यत्वेन प्रधानतयाऽऽभातीति कथं न ध्वनेः प्रवेश इत्याशङ्कायां प्रतिपादनम्	४१	२०
सामान्यतया सङ्करे पुनर्ध्वनिनिरासोपपादनम्	४२	२
अप्रस्तुतप्रशंसायां संभावितध्वनेरन्तर्भावस्य निराकरणम्	४२	९
दीधितावप्रस्तुतप्रशंसायाः प्रकारपञ्चकस्य क्रमेणोदाहरणानि	४२	१५
प्रस्तुताप्रस्तुतयोस्तुल्यं प्राधान्यम्	४३	१०
पञ्चमेऽपि प्रकारे ध्वनेरप्रवेशः	४४	२
यत्र व्यङ्ग्यस्य न प्राधान्यं न तत्र ध्वनिः	४५	३
संकरोज्झितो ध्वनेर्विषयः	४५	१३
अलङ्कारादौ ध्वनेरप्रवेशस्य हेत्वन्तरोपपादनम्	४५	२२

सदीधितिध्वन्यालोकस्य-

विषयाः-	पृ०	पं०
अङ्गाङ्गिनोरलङ्कारादिध्वन्योस्तादात्म्याभावः	४६	४
अपृथग्भूतमङ्गमेवाङ्गितां लभेतेत्याशङ्काया निराकरणम्	४६	७
अप्रस्तुतप्रशंसायाः पञ्चमप्रकारादौ कथं ध्वनेस्तादात्म्यमित्यत्र समाधानम्	४६	१४
ध्वनिलक्षणकारिकाऽवयवव्याख्यानम्	४६	१८
ध्वनिसंज्ञाव्यपदेशकर्तॄणां स्तवः	४६	२४
ध्वनेः क्षोदिष्ठतानिःक्षेपः	४८	४
सामान्येन ध्वनेर्द्विविधो भेदः	४९	४
तत्राविवक्षितवाच्यध्वनेरुदाहरणम्	४९	१८
विवक्षितान्यपरवाच्यध्वनेरुदाहरणम्	५०	४
ध्वनेर्भाक्तत्वखण्डनम्	५१	४
रूपभेदप्रदर्शनाय ध्वनेः स्वरूपम्	५१	१२
भक्तेः स्वरूपम्	५१	१८
अतिव्याप्तेरव्याप्तेश्च दोषाद् भक्तिर्न ध्वनेर्लक्षणम्	५२	२
अतिव्याप्तिप्रदर्शनम्	५२	१२
स्वपक्षं द्रढयितुं भक्तेः प्रथममुदाहरणम्	५३	४
द्वितीयमुदाहरणम्	५३	२२
तृतीयमुदाहरणम्	५४	३
चतुर्थमुदाहरणम्	५४	१४
पञ्चममुदाहरणम्	५४	२६
उदाहृतविषये सप्रयोजनाया अपि लक्षणायाः सम्भवाद् व्यङ्ग्यसद्भावाद् ध्वन्यभावे हेतुनिदर्शनम्	५५	१९
रूढिहेतुकलक्षणास्थलादपि ध्वनेर्निरसनम्	५६	५
क्वचिद्रूपकादिध्वनिर्व्यपदेशो रूपकव्यञ्जकवाच्यमहिम्ना प्रवर्तते	५६	१५
लक्षणासामर्थ्यभावादपि गुणवृत्तिर्व्यङ्ग्यमवगमयितुमसमर्था	५६	२४
भक्तेर्ध्वनिलक्षणत्वस्य पुनरन्यथा खण्डनम्	५७	२१
भक्तेर्ध्वनिलक्षणत्वेऽव्याप्तिप्रदर्शनम्	५८	२
ध्वनेर्भक्तिरुपलक्षणमिति निरसनम्	५८	२४

विषयाः—	पृ०	पं०
उपलक्षणात्मकभक्तिद्वारेणैव सर्वेषां ध्वनिप्रकाराणामवगमः स्यात् किन्तल्लक्षणविधानेनेत्याक्षेपनिःक्षेपः	५९	६
ध्वनिपक्षस्य दृढीकरणम्	५९	[illegible]
ध्वनेरनिर्वचनीयतामनूद्य निराकरणम्	६०	७
अनिर्वाच्यतावादिनोऽपि स्वनये प्रवेशयन्नुद्द्योतस्योपसंहरणम्	६०	[illegible]
द्वितीयोद्द्योते—		
अविवक्षितवाच्यस्यावान्तरभेदकथनाय कारिकाऽवतारणम्	६१	२२
व्यङ्ग्यप्रकारनिरूपणप्रस्तावे वाच्यभेदनिरूपणरूपासङ्गतेः समाधानम्	६२	२
अविवक्षितवाच्यध्वनेराद्यभेदोदाहरणम्	६२	११
अत्र स्वीयपद्योदाहरणम्	६४	१०
अत्यन्ततिरस्कृतवाच्यध्वनेः पदगतमुदाहरणम्	६५	२०
अत्यन्ततिरस्कृतवाच्यध्वनेर्वाक्यगतमुदाहरणम्	६६	११
विवक्षितान्यपरवाच्यध्वनेर्विभागप्रदर्शनम्	६७	२
असंलक्ष्यक्रमध्वनेर्विभजनम्	६७	२३
दीधितौ सम्भोगशृङ्गाररसोदाहरणम्	६८	१९
,, रसाभासोदाहरणम्	६८	२५
,, भावाभासोदाहरणम्	६९	४
,, भावशान्तेरुदाहरणम्	६९	८
,, भावोदयोदाहरणम्	६९	१२
,, भावसन्धेरुदाहरणम्	६९	१६
,, शबलतोदाहरणम्	६९	२२
असंलक्ष्यक्रमत्वोपपत्तिः	७०	२
रसवदाद्यलङ्कारादलक्ष्यक्रमस्य रसादिध्वनेर्विभक्तविषयस्य कारिकाद्वितयेन प्रदर्शनम्	७०	१७
स एवालङ्कारशब्दवाच्यो भवति योऽङ्गभूत इति स्वमतस्य दार्ढ्याय निदर्शनम्	७२	६
रसाद्यलङ्कारस्य द्वैविध्यकथनम्	७२	१९

विषयाः-	पृ०	पं०
तत्र शुद्धस्योदाहरणम्	७२	२६
वस्तुप्राधान्यभाजि चाटुरूपे विषये रसान्तराणामप्यङ्गत्वमित्यस्योपपादनम्	७३	२१
अङ्गभूतरसाद्यलङ्कारे सङ्कीर्णस्योदाहरणम्	७३	२६
उदाहरणोक्तप्रकार एव रसवदलङ्कारविषयस्यौचित्यम्	७४	१४
अपूर्वतयोत्प्रेक्षितस्योदाहरणोक्तार्थस्य दार्ढ्याय प्रतिपादनम्	७५	२
रसस्यालङ्काराभावे हेतूपपादनम्	७५	११
सङ्क्षिप्यैतद्विषयस्य कारिकायां प्रदर्शनम्	७५	२०
कारिकायां पर्यवसितस्य कथनम्	७६	१३
दीधितौ प्रेयोऽलङ्कारस्योदाहरणम्	७७	४
,, ऊर्जस्विन उदाहरणम्	७७	१०
,, समाहितस्योदाहरणम्	७७	१८
,, भावोदयस्योदाहरणम्	७७	२३
,, भावसन्धेरुदाहरणम्	७७	२८
,, भावशबलताया उदाहरणम्	७८	३
'मे मतिः' इत्यनेन सूचितस्य परैकदेशिनो मतस्यानुवादपूर्वकनिराकरणम्	७८	१७
अचेतनवस्तुवृत्तान्ते चेतनवस्तुवृत्तान्तयोजनया रसवदादीनामेव साम्राज्यम्	७८	२२
चेतनवृत्तान्तारोपेऽपि जडे चैतन्यविरहेण रसादेर्बाधमाशङ्क्य दोषप्रदर्शनम्	७९	९
अचेतनवर्णनोदाहरणम्	७९	२३
अत्र पुनरुदाहरणम्	८०	११
दार्ढ्याय पुनरुदाहरणम्	८०	२५
पुनरेकदेशिमतस्यापत्तौ हेतूपपादनम्	८१	१९
विभागगर्भगुणालङ्कारस्वरूपप्रदर्शनम्	८२	१४
गुणानां रसमात्रवृत्तित्वेऽपि शब्दार्थवृत्तित्वप्रसिद्धेः कथञ्चिदुपपादनम्	८३	५

विषयानुक्रमणिका ।

विषयाः—	पृ०	पं०
गुणाः शब्दार्थयोरपि व्यङ्ग्यत्वेन तिष्ठन्त्येवेत्यस्य प्रतिपादनम्	८४	९
प्रसङ्गाद् व्यङ्ग्यव्यञ्जकभावावलम्बितस्यौजोगुणस्य व्यवस्थापनम्	८४	२४
ओजोव्यञ्जकस्य शब्दस्योपदेशः	८५	१२
तादृशशब्दस्योदाहरणम्	८५	१६
रौद्रादिव्यञ्जकस्यार्थस्योपदेशः	८५	२८
अस्योदाहरणम्	८६	७
प्रसङ्गात्प्रसादस्य निरूपणम्	८६	२५
स्वमते दोषाणां नित्यानित्यत्वविभक्तव्यवहारस्य प्रदर्शनम्	८७	१९
दोषाणां क्वाचित्कताऽनभ्युपगमे दोषकथनम्	८८	९
असंलक्ष्यक्रमव्यङ्ग्यस्य सामान्येन प्रदर्शनोपसंहारः	८८	१४
रसादेरलङ्कारादीनां च विशेषेणानुक्तेर्हेतूपपादनम्	८८	१८
रसादेः प्रकारानन्त्यस्य प्रतिपादनम्	८९	९
विशेषज्ञानां संक्षेपेणैव सकलतत्त्वावगमो भविष्यतीति कारिकायां कथनम्	८९	२६
दिङ्मात्रे वक्तव्ये पूर्वमवगमस्यावश्यकत्वम्	९०	१४
शृङ्गारे यमकादीनां सन्निवेशनस्य कवेः शक्तावपि प्रमादित्वम्	९१	७
प्रमादित्वपदकृत्यस्य प्रतिपादनम्	९१	२२
रसादिध्वनावलङ्कारयोजनोपायस्याभिधानम्	९२	१३
अपृथग्यत्ननिर्वर्त्यालङ्कारस्योदाहरणम्	९३	४
यमकादीनां रसध्वनेरङ्गत्वाभावोपपादनम्	९३	२५
तुल्यन्यायेनाशङ्कनपूर्वकं समाधानम्	९४	११
स्वोक्तेर्दार्ढ्यायोदाहरणम्	९४	२४
स्वोक्तस्य समर्थनम्	९५	४
कालिदासादीनां यमकनिबन्धेषु रसादीनामङ्गता यमकादीनां त्वङ्गितैवेति कथनम्	९५	१४
यमकादेरङ्गितायाः श्लोकत्रयेण संग्रहणम्	९५	२५
ध्वन्यात्मभूतशृङ्गारव्यञ्जकस्यालङ्कारवर्गस्य प्रतिपादनम्	९६	९

सदीधितिध्वन्यालोकस्य-

विषयाः-	पृ०	पं०
रसोपयोगित्वसमीक्षायाः कारिकाद्वयेनाभिधानम्	९६	२६
रसबन्धेषु यमलङ्कारं तदङ्गतया विवक्षतीति प्रथमांशस्योदाहरणम्	९७	१५
नाङ्गित्वेनेति द्वितीयांशस्य विवरणम्	९८	१३
तत्तृतीयांशस्योदाहरणम्	९८	२१
तच्चतुर्थपञ्चमांशयो रसाद्युपयोगावसरे उपादानस्योदाहरणम्	९९	१९
अनवसरे त्यागस्योदाहरणम्	१००	१८
उदाहरणे श्लेषव्यतिरेकयोः सङ्करमाशङ्क्य खण्डनम्	१०१	२२
तस्यैव प्रकारान्तरेण प्रदर्शनम्	१०१	२५
सङ्करस्योदाहरणम्	१०२	८
दीधितावुदाहरणान्तरम्	१०२	१९
रक्तस्त्वमित्याद्युदाहरणे सङ्करस्यान्यथाभावोपपादनम्	१०२	२२
एकविषयत्वात्सङ्करस्यास्तित्वमाशङ्क्य निराकरणम्	१०२	२८
पुनराशङ्क्य समाधानम्	१०३	१९
श्लेषोपमाव्यतिरिक्तव्यतिरेकस्योदाहरणम्	१०३	२६
पुनराशङ्क्य समाधानम्	१०४	२३
श्लेषहीनेन साम्येनापि प्रतिभासितस्य व्यतिरेकस्योदाहरणम्	१०५	१०
'नातिनिर्वहणैषिता' इत्यंशस्योदाहरणम्	१०६	२
'निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्' इत्यन्तिमांशस्योदाहरणम्	१०६	२७
उक्तसमीक्षाप्रकारातिक्रमे दोषप्रतिपादनम्	१०७	२१
असमीक्षितालङ्कारसन्निवेशं लक्ष्यं न संभवति विरलमेव वा संभवतीत्याशङ्कायां कथनम्	१०७	२५
तद्विभागस्याप्रदर्शने हेतुप्रतिपादनम्	१०८	२
समीक्षाप्रकारं दर्शितदिशोहमानस्य ध्वनिस्वरूपमुपनिबध्नतः सुकवेरात्मलाभोपपादनम्	१०८	१०
विवक्षितान्यपरवाच्यध्वनेर्द्वितीयभेदस्य संलक्ष्यक्रमस्य विभजनम्	१०९	४
अलङ्कारस्यैवाभिधामूलव्यञ्जनया प्राकाश्यकथनम्	११०	२
श्लेषस्य विषयपृथग्भावप्रदर्शनम्	११०	१८

विषयानुक्रमणिका।

विषयाः-	पृ०	पं०
श्लेषेऽर्थद्वयस्य वाच्यतां दर्शयितुमुदाहरणम्	१११	५
कारिकाघटकस्याक्षिप्तपदस्य कृत्यप्रदर्शनम्	११२	३
तस्यैव संक्षेपेण प्रतिपादनम्	११२	१३
अभिधयाऽपरालङ्कारस्य वाच्यत्वे श्लेषस्योदाहरणम्	११२	२०
कमत्र सर्वस्यापि ध्वनेरभाव एवेत्याशङ्कायां कथनम्	११३	१०
श्लाघ्याशेषेत्युदाहरणप्रदर्शनम्	११३	१८
भ्रमिमरतिमित्याद्युदाहरणम्	११४	१४
चमहिअमाणसेत्याद्युदाहरणम्	११५	२
कारिकाघटकैवकारस्याक्षिप्तशब्देन सहार्थिकान्वयफलप्रदर्शनम्	११५	२१
दृष्ट्या केशवेत्याद्युदाहरणम्	११६	६
विप्रतिपत्तिनिरासाय ध्वनेरपि विषयप्रदर्शनम्	११७	५
शब्दशक्तिमूलध्वनेरुदाहरणम्	११७	१२
उन्नतः प्रोल्लसद्धार इत्याद्युदाहरणम्	११८	३
दत्तानन्दा इत्याद्युदाहरणम्	११८	१६
उदाहरणत्रये ध्वनिप्रदर्शनम्	११९	१०
अलङ्काराणामपि ध्वनिप्रदर्शने पूर्वं विरोधाभासध्वनेरुदाहरणम्	१२०	७
विरोधस्य श्लेषस्य च प्रदर्शनम्	१२१	२६
अत्र हर्षचरितोक्तोदाहरणम्	१२२	४
उदाहरणेऽस्मिन्नरुचिदर्शनात्स्वीयोदाहरणप्रदर्शनम्	१२२	१७
शब्दशक्त्या व्यज्यमानव्यतिरेकालङ्कारस्योदाहरणम्	१२३	११
अर्थशक्त्युद्भवध्वनिनिरूपणम्	१२४	६
कुमारसम्भवोक्तमुदाहरणम्	१२४	१७
अस्यासंलक्ष्यक्रमव्यङ्ग्यलक्ष्यत्वमाशङ्क्य समाधानम्	१२५	६
स्वोक्तेर्दार्ढ्याय उदाहरणप्रदर्शनम्	१२५	२१
'उक्तिं विना' इति कारिकोक्तेः फलं दर्शयितुमुपक्रमः	१२६	१७
अत्र सङ्केतकालमनसमित्याद्युदाहरणम्	१२६	२५
शब्दार्थशक्त्याऽऽक्षिप्तस्य व्यङ्ग्यार्थस्य कवेः स्वोक्त्या प्रकाशीकरणेऽनुस्वा-		

विषयाः-	पृ०	पं०
नोपमव्यङ्ग्यत्वाद् ध्वनेरन्यस्यैवालङ्कारस्य कथनम्	१२७	१६
शब्दशक्त्या व्यङ्ग्यस्य पदान्तरेण प्रकाशनात्संलक्ष्यक्रमध्वनेरभावोदाहरणम्	१२८	८
अर्थशक्त्या व्यङ्ग्यस्य गुणीभावोदाहरणम्	१२९	३
शब्दार्थोभयशक्त्या व्यङ्ग्यस्य गुणीभावोदाहरणम्	१२९	२१
अर्थशक्त्युद्भवध्वनिमुदाहर्तुमर्थभेदप्रदर्शनम्	१२९	२६
दीधितावर्थशक्त्युद्भवध्वनेर्द्वादशधा परिगणनम्	१३०	१५
तत्र तृतीयस्योदाहरणम्	१३०	२४
चतुर्थस्य प्रतापरुद्रीयोक्तमुदाहरणम्	१३१	१
सप्तमस्य दर्पणोक्तमुदाहरणम्	१३१	३
अष्टमस्य काव्यप्रकाशोक्तमुदाहरणम्	१३१	५
एकादशस्य दर्पणोक्तमुदाहरणम्	१३१	९
द्वादशस्य च रसगङ्गाधरोक्तमुदाहरणम्	१३१	११
प्रथमप्रकारस्योदाहरणम्	१३१	२२
पञ्चमप्रकारस्योदाहरणम्	१३२	११
अस्य पुनरुदाहरणम्	१३२	१९
नवमभेदस्योदाहरणम्	१३३	१५
अस्यादाहरणान्तरम्	१३३	१९
अलङ्कारध्वनेर्निरूपणम्	१३४	७
अलङ्कारध्वनेः प्रविरलविषयत्वासम्भवप्रदर्शनम्	१३४	२२
अलङ्कारध्वनेरुपपादनम्	१३५	११
गुणीभूतव्यङ्ग्यस्य मार्गप्रदर्शनम्	१३६	२
तदुपपादनम्	१३६	१४
उदाहरणम्	१३६	२१
फलितकथनम्	१३७	१६
इत्थं प्रत्युदाहरणं प्रदर्श्यार्थशक्त्युद्भवध्वनेरुदाहरणानि दर्शयितुमाख्यानम्	१३७	२०
तस्याष्टमप्रकारोदाहरणम्	१३७	२६

विषयाः-	पृ०	पं०
स्वकीयोदाहरणान्तरम्	१३८	२४
उपमाध्वनेरुदाहरणम्	१३९	१९
उपमाध्वनेः स्वीयोदाहरणान्तरम्	१४०	१२
आक्षेपध्वनेरुदाहरणम्	१४०	२४
शब्दशक्तिमूलार्थान्तरन्यासध्वनिभेदप्रदर्शनम्	१४१	१७
शब्दशक्तिमूलार्थान्तरन्यासध्वनेरुदाहरणम्	१४१	२२
अत्रार्थान्तरन्यासध्वनिविरोधपरिहरणम्	१४२	९
द्वितीयस्यार्थशक्तिमूलार्थान्तरन्यासध्वनेरुदाहरणम्	१४२	१७
व्यतिरेकध्वनेरपि द्वैविध्यप्रदर्शनम्	१४३	८
तत्रार्थशक्तिमूलव्यतिरेकध्वनेरुदाहरणम्	१४३	१५
उत्प्रेक्षाध्वनेरुदाहरणम्	१४४	१२
अत्रोत्प्रेक्षाऽभावमाशङ्क्य समाधानम्	१४५	३
क्वान्यत्रेवादिशब्दाप्रयोगेऽप्युत्प्रेक्षाप्रतीतिरित्याकाङ्क्षायामुदाहरणम्	१४५	२४
अत्रारुचरुदाहरणान्तरम्	१४६	११
उदाहरणद्वये उत्प्रेक्षा माऽस्तु तथा च दृष्टान्तासिद्धेः कथं प्रकृते सेत्याशङ्कायामुपपादनम्	१४६	२७
श्लेषध्वनेरुदाहरणम्	१४७	५
यथासंख्यध्वनेरुदाहरणम्	१४८	११
उपसंहरणम्	१४९	४
दीधितौ दीपकध्वनेरुदाहरणम्	१४९	१२
,, अप्रस्तुतप्रशंसाध्वनेरुदाहरणम्	१४९	१५
,, अपह्नुतिध्वनेरुदाहरणम्	१४९	१८
,, अतिशयोक्तिध्वनेरुदाहरणम्	१४९	२४
अलङ्कारध्वनेः प्रयोजनवत्तां ख्यापयितुं कारिकाऽवतारणम्	१५०	५
अलङ्काराणां शोभाऽतिरेकविरहे कथनम्	१५०	१५
दीपकादावुपमाया व्यङ्ग्यत्वेन ध्वन्यङ्गत्वापतने प्रतिपादनम्	१५१	१
अलङ्काराणां व्यङ्ग्यत्वे प्राधान्येन विवक्षितत्वे च प्रकारद्वयोपदेशः	१५१	८

विषयाः-	पृ०	पं०
तत्र वस्तुव्यङ्ग्यतायामलङ्काराणां ध्वनिरूपताव्यवस्थापनम्	१५१	१४
अलङ्कारव्यङ्ग्यतायामपि व्यवस्थापनम्	१५२	१३
उक्तप्राधान्यव्यवस्थाया दृढीकरणम्	१५२	२४
वस्तुव्यङ्ग्यालङ्कारध्वनेरुदाहरणं मूले कुतो न दर्शितमित्याशङ्कायां कथनम्	१५३	२
संक्षेपेणोपसंहरणम्	१५३	७
ध्वनिगुणीभूतव्यङ्ग्यपार्थक्यप्रदर्शनकारिकाऽवतारणम्	१५३	१७
ध्वनेरविषयस्य वाच्याङ्गव्यङ्ग्यरूपगुणीभूतव्यङ्ग्यस्योदाहरणम्	१५४	९
गुणीभूतव्यङ्ग्यस्योदाहरणान्तरं दिदर्शयिषुः सामान्यव्यवस्थाकथनम्	१५५	२
तस्योदाहरणान्तरम्	१५५	१०
व्यङ्ग्यस्य पूर्वं गुणीभावेऽपि क्वचित्पश्चात्प्राधान्ये ध्वनेरेव विषय इत्युपदेशः	१५६	१२
उदाहरणम्	१५६	२५
अविवक्षितवाच्यध्वन्यविषयव्यवच्छेदप्रदर्शिकायाः स्वरूपम्	१५८	६
दीधितावनुप्रासप्रवणतया कवेर्लाक्षणिकशब्दप्रयोगात्मकमुदाहरणम्	१५८	१४
दीधितौ वृत्तपरिपूरणसामर्थ्यविरहेण यथोदाहरणम्	१५८	१८
आवश्यकत्वात्पुनर्ध्वनिस्वरूपप्रदर्शिकायाः कारिकाया निर्देशः	१५८	२६

तृतीयोद्द्योते—

पूर्वमुद्द्योतद्वयेन व्यङ्ग्यमुखेन ध्वनेः प्रकारं प्रदर्श्य प्रकारान्तरेण तन्निरूपणाय कारिकाऽवतारणम्	१५९	२३
अविवक्षितवाच्यध्वनेः पदवाक्यप्रकाशत्वम्	१६०	४
तत्रात्यन्ततिरस्कृतवाच्यभेदे पदप्रकाशतोदाहरणम्	१६०	१६
पुनरुदाहरणम्	१६१	१
पुनरुदाहरणान्तरम्	१६१	१२
उदाहरणत्रये व्यञ्जकत्वाभिप्रायेण कृतपदानामुपपादनम्	१६१	२१
अर्थान्तरसंक्रमितवाच्यद्वितीयभेदस्योदाहरणम्	१६२	२
अत्र व्यञ्जकत्वाशयेन विहितपदोपपादनम्	१६२	२३

विषयाः—	पृ०	पं०
पुनरुदाहरणान्तरम्	२६२	२७
अत्रापि व्यञ्जकत्वपदोपपादनम्	१६३	२०
अत्यन्ततिरस्कृतवाच्यप्रथमभेदस्य वाक्यप्रकाशतायामुदाहरणम्	१६३	२[illegible]
अत्र व्यञ्जकत्ववाक्योपपादनम्	१६४	१८
अर्थान्तरसंक्रमितवाच्यद्वितीयभेदस्य वाक्यप्रकाशतायामुदाहरणम्	१६४	२[illegible]
अत्र व्यञ्जकत्ववाक्योपपादनम्	१६५	
विवक्षितान्यपरवाच्यस्याप्यनुरणरूपव्यङ्ग्यस्य शब्दशक्त्युद्भवप्रभेदे पदप्रकाशतोदाहरणम्	१६६	११
अत्र व्यञ्जकत्वपदोपपादनम्	१६७	४
शब्दशक्त्युद्भवप्रथमभेदस्य वाक्यप्रकाशतोदाहरणम्	१६७	१२
अत्र व्यञ्जकवाक्योपपादनम्	१६७	२४
विवक्षितान्यपरवाच्यध्वनेः कविप्रौढोक्तिमात्रनिष्पन्नार्थशक्त्युद्भवद्वितीयभेदस्य पदप्रकाशतोदाहरणम्	१६८	२
अत्र व्यञ्जकपदोपपादनम्	१६८	१९
अस्य वाक्यप्रकाशतोदाहरणम्	१६८	२४
अत्र व्यञ्जकवाक्योपपादनम्	१६९	१२
ततःस्वतस्सम्भव्यर्थशक्त्युद्भवध्वनेस्तृतीयभेदस्य पदप्रकाशतोदाहरणम्	१६९	२२
अत्र व्यञ्जकपदोपपादनम्	१७०	८
स्वतस्सम्भव्यर्थशक्त्युद्भवध्वनेर्वाक्यप्रकाशतोदाहरणम्	१७०	१५
अत्र केवलं व्यङ्ग्यार्थप्रदर्शनम्	१७०	२०
ध्वनेः पदप्रकाशताऽसम्भवितामाशङ्क्योपपादनम्	१७१	४
समाधानम्	१७१	२०
एकस्मात्पदाद् व्यङ्ग्यप्रतीतेरदर्शनात् कथं पुनर्ध्वनेः पदप्रकाशतेत्याशङ्कया निरसनम्	१७२	८
पुनरपरथा व्यवस्थापनम्	१७२	२३
व्यञ्जकमुखेन असंलक्ष्यक्रमध्वनेरपि निरूपणम्	१७३	२१
वर्णानामनर्थकत्वाद्रसद्योतकत्वाभावनिराकरणम्	१७४	११

विषयाः-	पृ०	पं०
कारिकाद्वयतात्पर्यविवरणम्	१७५	१५
अलक्ष्यक्रमव्यङ्ग्यस्य पदानां रसद्योतकत्वोदाहरणम्	१७५	२७
दाढर्याय रसस्य पुनःपदप्रकाशतोदाहरणम्	१७६	२५
रसादिध्वनेः पदांशप्रकाशतोदाहरणम्	१७७	१२
क्रमप्राप्तं वाक्यव्यङ्ग्यरसादिध्वनिमुदाहर्तुं विभजनम्	१७८	५
तत्र शुद्धस्य प्रथमप्रकारस्योदाहरणम्	१७८	१७
द्वितीयस्यालङ्कारान्तरसङ्कीर्णस्योदाहरणम्	१७९	११
संघटनास्वरूपप्रदर्शनपूर्वकं तद्विभजनम्	१८०	१८
गुणाश्रिताया रसव्यञ्जिकायाः संघटनाया वक्तृवाच्यौचित्यानुसारेण व्यवस्थाकथनम्	१८१	७
संघटनायाः पक्षत्रयनिर्देशः	१८१	२१
तत्र प्रथमतृतीयपक्षयोः कारिकांशव्याख्यानम्	१८१	२६
द्वितीयपक्षे कारिकाऽर्थकथनम्	१८२	७
पक्षत्रयनिर्देशप्रयोजनप्रदर्शनम्	१८२	१२
गुणानामप्यनियतविषयत्वे प्रतिपादनम्	१८२	२१
संघटनाया अनियतविषयत्वे व्यवस्थोपपादनम्	१८३	१४
उदाहरणेन व्यभिचारप्रदर्शनम्	१८३	१७
व्यभिचारप्रदर्शकमुदाहरणान्तरम्	१८३	२६
पुनरन्यव्यभिचारप्रदर्शनम्	१८४	७
व्यभिचारस्थलप्रदर्शनम्	१८४	१०
उपसंहरणम्	१८४	१४
पुनराशङ्कनम्	१८४	१८
समाधानम्	१८४	२३
अविवेकिजनानुरोधेन तृतीयपक्षस्यांशतोऽभ्युपगमनम्	१८५	६
तत्रापत्तिमाशङ्क्य निराकरणम्	१८५	९
गुणानां शब्दाश्रयत्वं व्याहतवन्तं प्रति वादिन आशङ्कनम्	१८५	२५
वादिन उपपादनम्	१८६	२

विषयाः—	पृ०	पं०
निरसनम्	१८६	१३
वाच्यस्वरूपसौन्दर्यं तया विना कुत इत्याशङ्कायामाख्यानम्	१८६	२४
सङ्घटनाऽऽश्रयगुणवादिनः पुनराक्षेपः	१८७	६
प्रतिपक्षिणो निराकरणम्	१८७	१[illegible]
ओजस्यपि सङ्घटनाया अनियतत्वोपपादनम्	१८८	७
गुणानां संघटनावद् व्यभिचारस्य तादवस्थ्ये आख्यानम्	१८८	
उपसंहरणम्	१८९	१[illegible]
गुणसंघटनातादात्म्यपक्षपातिनः स्वमतस्थापनम्	१८९	२२
तादात्म्यपक्षे कृतपूर्वस्याक्षेपस्य स्मारणम्	१८९	२८
तत्खण्डनम्	१९०	३
तादृशे लक्ष्येऽचारुत्वाप्रतिभानमाशङ्क्य समाधानम्	१९०	१५
विभज्यान्वाख्यानम्	१९०	१८
दृष्टान्तप्रदर्शनेनोक्तार्थस्य दृढीकरणम्	१९१	६
कवेः प्रतिभया दोषा आच्छाद्यन्ते इति कुतोऽवगम्यते इत्याशङ्काया-माख्यानम्	१९१	१९
तत्रान्वयस्य दर्शितत्वाद् व्यतिरेकमात्रप्रदर्शनम्	१९१	२२
गुणसंघटनातादात्म्यपक्षस्यानुपपत्त्याऽस्वीकरणम्	१९१	२७
उपसंहारपूर्वककारिकोत्तरांशस्यावतारणम्	१९२	७
कारिकांशविवरणपूर्वकवक्तृभेदप्रदर्शनम्	१९२	१७
तत्र द्वितीयस्य द्वैविध्यम्	१९२	२०
तदेकदेशभेदाख्यानम्	१९२	२३
कथानायकविभागपूर्वकवक्तृभेदोपसंहरणम्	१९३	२
ततो वाच्यवैविध्यप्रदर्शनम्	१९३	९
वक्तृवाच्यौचित्यस्य संघटनानियामकत्वप्रदर्शनम्	१९३	२४
शुद्धवक्त्रौचित्यं विचार्य वाच्यौचित्येन सह तस्य प्रतिपादनम्	१९४	७
करुणविप्रलम्भध्वनौ विशेषकथनम्	१९४	१८
तत्राशङ्क्य समाधानम्	१९४	२४

विषयाः-	पृ०	पं०
तत्रोपपत्तिकथनम्	१९५	११
उपपत्तिमुक्त्वा रसान्तरे व्यवस्थाऽऽख्यानम्	१९५	२१
प्रसादगुणस्य संघटनाव्यापकत्वम्	१९६	१४
तदुपपादनम्	१९६	१७
प्रसादस्य साधारणत्वं स्थापयितुमन्वयव्यतिरेकप्रदर्शनम्	१९६	२३
सिद्धान्तकथनम्	१९७	२
एतमर्थं द्रढयितुमुपपादनम्	१९७	५
पर्यवसितपक्षत्रयसामञ्जस्येन संघटनाया रसव्यञ्जकत्व-प्रदर्शनम्	१९७	१७
संघटनाया नियामकान्तरम्	१९८	८
हेतुतया प्रसङ्गाद् विषयप्रभेदप्रदर्शनम्	१९८	२५
दीधितौ मुक्तकादीनां लक्षणम्	१९९	१८
,, दैव्यादिवागाख्यानम्	१९९	२१
,, खण्डकाव्यादिप्रतिपादनम्	१९९	२४
दीधितौ गद्यकाव्यस्य पञ्चविधत्वम्	२००	१४
,, चम्पूप्रभृतीनां लक्षणम्	२०१	४
काव्यप्रभेदप्रदर्शनप्रयोजनाख्यानम्	२०१	२४
तद्भेदानां क्रमशः प्रदर्शनम्	२०२	२
मुक्तके विभावादिसंघटना कथं? येन तदायत्तो रसः स्यादित्या-शङ्कायां कथनम्	२०२	११
विभावादिप्रतीतिप्रसिद्धिप्रदर्शनम्	२०२	१५
अत्र विशेषकथनम्	२०३	३
पर्यायबन्धे विशेषकथनम्	२०३	२५
परिकथायां विशेषकथनम्	२०४	११
खण्डकथासकलकथयोर्विशेषकथनम्	२०४	१५
महाकाव्ये नियमाख्यानम्	२०४	२३
इतिवृत्तवर्णनमात्रतात्पर्येण कृतं काव्यं न दृश्यत इत्याशङ्कायां कथनम्	२०५	२

विषयाः—	पृ०	पं०
मार्गद्वये श्रेष्ठस्याख्यानम्	२०५	८
दृश्यकाव्येषु नियमकथनम्	२०५	११
आख्यायिकाकथयोः संघटनानियमाभिधानम्	२०५	१
गद्यकाव्ये पूर्वोक्तवक्त्राद्यौचित्योपपादनम्	२०६	४
प्रबन्धौचित्यस्य प्राधान्यप्रदर्शनम्	२०६	
तदौचित्यस्य निर्वचनम्	२०६	
तत्र हेतुमुक्त्वा निमित्ताभिधानम्	२०६	१७
कथायामौचित्यकथनम्	२०६	२०
रसौचित्यपक्षस्य दृढीकरणम्	२०६	२४
विशेषकथनम्	२०७	२१
पुनर्विशेषकथनम्	२०७	२५
उपपादनम्	२०८	२
उपसंहरणम्	२०८	१०
रसादिव्यञ्जनप्रकारानभिदधत्याः कारिकाया अवतारणम्	२०८	२१
रसादिव्यञ्जनोपयोगिप्रकाराख्यानम्	२०८	२५
दीधितौ विभावलक्षणम्	२०९	१४
,, भावलक्षणम्	२०९	१७
,, अनुभावलक्षणम्	२०९	२१
,, सञ्चारिलक्षणम्	२०९	२३
तस्य पुनर्व्यष्ट्या प्रतिपादनम्	२११	१४
प्रतिकूलतया वर्णनेऽनौचित्यकथनम्	२१९	१७
तत्राशङ्क्य खण्डनम्	२१२	१५
उदाहरणम्	२१२	२४
तर्हि सातवाहनचरिते कथं सङ्गतिरित्याशङ्कायां प्रतिपादनम्	२१३	४
अनौचित्यं विना रसभङ्गस्य कारणान्तराभावकथनम्	२१३	१५
अस्य समर्थनम्	२१३	२३
दीधितौ धीरोदात्तलक्षणम्	२१४	५

विषयाः—	पृ०	पं०
अवश्यकर्तव्यतायां हेतुकथनम्	२१४	८
कल्पितेतिवृत्तादिविषयेऽभिधानम्	२१४	११
दीधितावेतस्य दृढीकरणम्	२१४	१४
सम्भोगशृङ्गारोपनिबन्धे वृत्तकल्पनायामपि क्षत्यभावाशङ्कनम्	२१४	२२
तत्खण्डनम्	२१५	२
रतौ दिव्यौचित्यपरीक्षाया अयुक्तत्वमाशङ्क्य खण्डनम्	२१५	१५
सम्भोगस्य श्रव्यकाव्येऽनिषेधात्कुतस्तद्बलेन रतिभेदकल्पनेत्याशङ्क्य निरसनम्	२१६	३
उपसंहर्तुमुक्तानुवदनम्	२१६	९
किमुत्तमप्रकृतिविषये सम्भोगशृङ्गारवर्णमनुचितमेवेत्याशङ्कायां कथनम्	२१६	१५
सिद्धान्तस्याभिधानम्	२१६	२३
कुमारसम्भवादावुमाशिवादिसुरतक्रीडावर्णनस्य दोषकथनम्	२१६	२८
तेषां स दोषः कथं न लक्ष्यत इत्याशङ्कायामाख्यानम्	२१७	३
संक्षेपेणानुभावौचित्याभिधानम्	२१७	६
समासेनोपसंहरणम्	२१७	११
उक्तार्थे कारिकाकृत्सम्मतिप्रदर्शनम्	२१७	१८
स्वकल्पिते तादृशस्खलनाद् बिभ्यता कविना नितरां सावधानेन भाव्यमित्युपदेशः	२१८	२
तत्र हेतुप्रदर्शनम्	२१८	४
तस्यैव संक्षिप्योपदेशः	२१८	९
कथाशरीरस्य रसमयत्वसंपादनोपायोपदेशः	२१८	१६
प्रसङ्गादुपदेशान्तरम्	२१८	१९
तस्यार्थस्य प्रमाणोपन्यासेन दृढीकरणम्	२१८	२९
द्वितीयकारणस्य निरूपणम्	२१९	६
उदाहरणम्	२१९	११
तस्य युक्तत्वोपपादनम्	११९	१९
स्वेच्छया तद्दूरीकरणे प्रक्रान्तेतिवृत्तभङ्ग आपद्यत इत्यतोऽभिधानम्	२१९	२५

विषयाः—	पृ०	पं०
तृतीयकारणस्य निरूपणम्	२२०	४
दीधितौ सन्धितदङ्गानां निरूपणम्	२२०	१०
उदाहरणम्	२२१	१
व्यतिरेकाख्यानम्	२२१	२६
दीधितौ सन्ध्यङ्गानां षड्विधप्रयोजनम्	२२२	
तथाऽऽचरणेऽनुपपत्तिनिदर्शनम्	२२२	
तुरीयकारणस्य निरूपणम्	२२२	१८
उचितोद्दीपनप्रशमनयोरसस्योदाहरणम्	२२३	४
तुरीयकारणावान्तरप्रकारनिरूपणम्	२२३	१३
उदारहणम्	२२३	१८
पञ्चमकारणस्य निरूपणम्	२२४	१८
एतदुक्तेः प्रयोजनकथनम्	२२४	२४
तादृशकवीनामप्युपलब्धेरप्रसिद्ध्यभावप्रतिपादनम्	२२५	४
दीधितौ तदुदाहरणम्	२२५	१२
न केवलमलक्ष्यक्रम एव प्रबन्धेन द्योत्यतेऽपि तु लक्ष्यक्रमोऽपीति प्रदर्शनम्	२२५	२०
दीधितावत्र केषाञ्चन मतस्यप्रदर्शनम्	२२६	१
उदाहरणम्	२२६	२६
पुनरुदाहरणम्	२२७	५
उदाहरणान्तरम्	२२७	१३
असंलक्ष्यक्रमस्य वस्तुद्वारा पारम्पर्येण कारिकायां व्यञ्जकवर्गाभिधानम्	२२८	२४
उदाहरणम्	२२९	२०
व्यङ्ग्यं दर्शयितुमाख्यानम्	२३०	२३
सुप्सम्बन्धवचनानामभिव्यञ्जकव्यङ्ग्यप्रदर्शनम्	२३०	२६
तद्धितनिपातयोर्व्यङ्ग्यप्रदर्शनम्	२३१	४
कृत्तद्धितसमासोपसर्गाणां व्यङ्ग्यप्रदर्शनम्	२३१	१८
एतावद्व्यङ्ग्यावभासफलाभिधानम्	२३२	१०

सदीधितिध्वन्यालोकस्य-

विषयाः	पृ०	पं०
अर्थापत्त्या दृढीकरणम्	२३२	१६
बहुव्यञ्जकघटितोदाहरणम्	२३२	२४
न्यक्कार इत्यादिपद्ये व्यङ्ग्यार्थान् समाहृत्य प्रदर्शनम्	२३२	२८
असम्भवापत्तिं वारणायाख्यानम्	२३३	६
उदाहरणम्	२३३	११
अत्र व्यञ्जककसङ्ग्रहणम्	२३३	२०
उदाहरणान्तरं दातुं भूमिकाऽऽरचनम्	२३४	४
व्यस्तसुबन्तस्योदाहरणम्	२३४	१२
व्यस्ततिङन्तस्योदाहरणम्	२३४	२८
एतस्यैवोदाहरणान्तरम्	२३५	१६
षष्ठ्यर्थसम्बन्धस्य व्यञ्जकत्वोदाहरणम्	२३६	५
समासानां व्यञ्जकताऽऽख्यानम्	२३७	७
निपातानां व्यञ्जकत्वोदाहरणम्	२३७	१८
उदाहरणान्तरम्	२३८	७
निपातानां द्योतकत्वं तु प्रसिद्धमेव, तत्कुतस्तदिदानीं समर्थ्यत इत्याशङ्कायां कथनम्	२३८	२३
उपसर्गाणां व्यञ्जकत्वोदाहरणम्	२३९	५
छन्दसो व्यञ्जकत्वोदाहरणम्	२३९	२१
उपसर्गविषये विशेषोपपादनम्	२४०	११
अनेकोपसर्गनिर्दोषत्वोदाहरणम्	२४०	१६
पुनरुदाहरणान्तरम्	२४०	२५
पुनरुदाहरणम्	२४१	५
निपातानामपि द्वित्राणामेकत्रोपनिपाते व्यञ्जकताऽपेक्षया निर्दोषत्वोदाहरणम्	२४१	१४
उदाहरणान्तरम्	२४१	२३
[illegible]पदपौनरुक्त्यस्यापि क्वचिद्दोषानावहत्वेन विच्छित्तिकारित्वमुदा-[illegible]भिधानम्	२४२	१०

विषयाः—	पृ०	पं०
दीधितौ वाक्यस्य पौनरुक्त्योदाहरणम्	२४३	६
प्रसङ्गाद् भूतादिकालस्य व्यञ्जकतोदाहरणम्	२४३	१३
प्रकृत्यंशस्य व्यञ्जकत्वमुदाहर्तुं कथनम्	२३४	१३
उदाहरणम्	२४४	१९
अपिशब्दलभ्यार्थस्य समुच्चयनम्	२४५	९
उक्तार्थस्य युक्त्या दृढीकरणम्	२४५	
उपसंहरणम्	२४६	२
पौनरुक्त्यशङ्काऽपाकरणाय कथनम्	२४६	७
उक्त्यनभिप्रेतार्थस्य व्यवच्छेदनम्	२४६	१२
तथास्वीकारे को दोष इत्यतोऽभिधानम्	२४६	१६
प्रागुक्तस्य स्मारणम्	२४६	२१
इहांशिकप्राचीनसम्मत्याख्यानम्	२४७	१०
यत्र व्यञ्जकाभावास्तत्र कथं चारुत्वमित्याशङ्कानिरसनम्	२४७	२२
व्यञ्जकतायाश्चारुत्वनियामकत्वानङ्गीकारेऽनुपपत्त्यभिधानम्	२४८	६
असंवेद्यस्तावदसौ विशेषो न युक्त इत्याशङ्काया विकल्पद्वयकल्पनया खण्डनम्	२४८	११
प्रथमविकल्पस्य दूषणम्	२४८	२०
द्वितीयविकल्पस्यानुमत्योपपादनम्	२४९	५
एवं व्यञ्जनाविरहे सर्वथा वाचकशब्दानां चारुत्वाभाव उक्तो भवतीत्याशङ्कायामभिधानम्	२४९	१८
रसादीनां विरोधिनो दर्शयितुं कारिकाऽवतारम्	२५०	४
विरोधिपरिहाररूपयत्नाकरणे का हानिरित्याशङ्कायां कथनम्	२५०	१९
परिहरणीयविरोधिविषयकजिज्ञासानिवृत्तये कारिकाऽवतारणम्	२५०	२३
तत्र विरोधिरसविभावपरिग्रहस्योदाहरणम्	२५१	२५
प्रथमविरोधिद्वितीयांशस्योदाहरणम्	२५२	१०
तत्तृतीयांशोदाहरणम्	२५२	२६
द्वितीयरसविरोधहेतूदाहरणोपपादनम्	२५३	४

विषयाः—	पृ०	पं०
तृतीयविरोधिशाखाद्वयोदाहरणम्	२५३	१७
दोषद्वितीयांशसमाधिमाशङ्क्य खण्डनम्	२५४	१४
तर्ह्यनपेक्षितत्वादितिवृत्तवर्णनमप्रयोजकमेवेत्याशङ्कायामभिधानम्	२५४	२२
उक्तस्य समर्थनपूर्वकोपसंहरणम्	२५४	२७
तुरीयरसभङ्गहेत्वाख्यानम्	२५५	१०
दृष्टान्तप्रदर्शनपूर्वकमुपपादनम्	२५५	१५
पञ्चमरसभङ्गकारणकथनम्	२५५	२०
उदाहरणम्	२५५	२६
लक्ष्यानुरोधेन वृत्तिपदार्थस्य पुनरन्यथा व्याख्यानम्	२५६	४
दीधितौ कैशिकीलक्षणम्	२५६	१०
,, सात्त्वतीलक्षणम्	२५६	१३
,, भारतीलक्षणम्	,,	१६
,, आरभटीलक्षणम्	,,	१९
,, भरतानुशासनोक्ता तासामुत्पत्तिः	,,	२२
दीधितावुपनागरिकालक्षणम्	२५६	२७
,, परुषालक्षणम्	२५६	७
,, कोमलालक्षणम्	२५७	३
,, ग्राम्यालक्षणम्	२५७	४
उपसंहारपूर्वकोपदेशः	२५७	६
रसादीनां काव्ये मुख्योद्देश्यत्वकथनम्	२५७	१२
प्रमादे दोषप्रदर्शनम्	२५७	१६
प्राचां दृष्टान्तेन न नवीनैः स्खलनं कार्यमित्यभिधानम्	२५७	२७
दार्ढ्यायादिकवीनामपि तस्य तात्पर्यगोचरीभूतार्थकथनम्	२५८	८
रसादिविरोधिनां प्रतिप्रसवाभिधानम्	२५८	१२
विरोधिरसाङ्गानां बाध्यत्वविवरणम्	२५९	२
कुतः सतामुक्तिर्निर्दोषेत्यतः कथनम्	२५९	६
अङ्गत्वेऽपि तदुक्तेर्निर्दोषत्वोपपादनम्	२५९	९
उदाहरणम्	२५९	१३

विषयाः—	पृ०	पं०
दीधितौ व्याध्यादिदशकामदशापरिगणनम्	२५९	१९
तत्र विशेषमुक्त्वा हेतूपपादनम्	२६०	१२
मरणवर्णननिषेधमाशङ्क्यसमाधानम्	२६०	१[illegible]
किं करुणस्य कुत्राप्युद्देश्यत्वं नास्त्येवेत्याशङ्कायामाख्यानम्	२६०	२५
'शृङ्गारे सर्वे एव व्यभिचारिणः' इति सिद्धान्तस्य विघटनाशङ्कायां कथनम्	२६१	
दीधितावुक्तभङ्गित्रयमन्तरेणैव मरणवर्णननिषेधस्योदाहरणेन समर्थनम्	२६१	१३
अन्यथा तु विरुद्ध एवेतिकथनम्	२६१	२६
विरोधिरसाङ्गानां बाध्यत्वेनोक्तावदोषत्वोदाहरणम्	२६२	११
अस्यैव प्रथमप्रकारस्य पुनरुदाहरणम्	२६३	९
स्वाभाविकाङ्गत्वप्राप्तावदोषत्वोदाहरणम्	२६३	२१
आरोपिताङ्गताप्राप्तावदोषत्वोदाहरणम्	२६४	२
अरुच्योदाहरणान्तरम्	२६४	१७
तृतीयामङ्गताप्राप्तिमुदाहर्तुमुपपादनम्	२६४	२२
उदाहरणम्	२६५	५
अविरोधबीजं जिज्ञासमानस्य प्रश्ने समाधानम्	२६५	१२
विरोधनिवृत्तिमाशङ्क्योत्तरणम्	२६५	१८
तदुदाहरणम्	२६५	२७
प्रकृते सङ्घटनम्	२६६	२१
रसादीनां व्यङ्ग्यत्वात्कथं तेषामुद्देश्यत्वाभ्युपगमेन प्रकृते विरोधपरिहार इत्याक्षिप्य समाधानम्	२६७	४
समर्थनम्	२६७	११
रसादीनां काव्यार्थत्वस्य सर्वसम्मतत्वाभावादुद्देश्यविधेयत्वयोरसम्भव इति कथं विरोधपरिहार इत्याशङ्क्य निरसनम्	२६७	१८
उपपादनम्	२६८	२३
उक्तार्थे प्रसिद्धिप्रदर्शनम्	२६८	७

सदीधितिध्वन्यालोकस्य-

विषयाः-	पृ०	पं०
एवं परिहारस्य सर्वत्र सम्भवाद् विरोधः कुत्र किंरूपश्च स्यादित्याशङ्कायां कथनम्	२६८	२४
श्रव्यकाव्ये विरुद्धयोरप्यर्थयोः समावेशे न दोषः, दृश्यकाव्ये गमनागमनाद्योर्विरुद्धार्थयोरभिनयः कथं स्यादित्याशङ्कायां समाधानम्	२६९	९
उपसंहरणम्	२६९	२४
विरोधपरिहारस्यापरप्रकारप्रदर्शनम्	२६९	२७
दीधितावुदाहरणम्	२७०	१३
उपसंहरणम्	२७०	२१
प्रधानरसादिविरोधिनः प्रकारान्तरेण दोषाभावपरिहरणम्	२७०	२७
हेतुप्रदर्शनपूर्वकतदभिधानम्	२७१	७
उदाहरणम्	२७१	१३
प्रकृते सङ्गमनम्	१९१	२३
क्षिप्त इत्यादिश्लोके दोषाभावनिगमनम्	२७२	२
विरोधाभावोदाहरणान्तरम्	२७२	८
अङ्गभावं वा प्राप्तानामुक्तिरच्छलेति कारिकाभागोपयोगिनिरूपितस्योपसंहरणम्	२७३	२
अवशिष्टांशं दर्शयितुं कारिकाऽवतारणम्	२७३	६
स्वसामग्रीप्राप्तपरिपोषस्य कस्यचिदप्यङ्गत्वायोगादेकस्याङ्गित्वासम्भवादित्याशङ्कां समाधातुं कारिकाऽवतारणम्	२७४	१३
दृष्टान्तप्रदर्शनेनाङ्गिताऽविघटनं स्थापयितुं कारिकाऽवतारणम्	२७५	९
दीधितौ वस्तुरूपस्येतिवृत्तस्य द्वैविध्यम्	२७५	१६
,, पञ्चार्थप्रकृतिप्रदर्शनम्	२७५	२३
विरुद्धरससमावेशप्रकारान् दर्शयितुं कारिकाया अवतरणोपपादनम्	२७६	२७
एकत्र समावेशे न विरोधः, विरोधे च नाङ्गाङ्गिभाव इत्यविरोधकथनमनुचितमित्याशङ्कां परिहर्तुं कारिकाकथनम्	२७७	२६

विषयाः-	पृ०	पं०
अङ्गरसस्य परिपोषः कथं परिहर्तव्य इत्याकांक्षायामाद्य प्रथमप्रकाराभिधानम्	२७८	१२
अत्राक्षेपनिराकरणम्	२७८	१९
साम्योदाहरणम्	२७९	२
पुनरुदाहरणम्	२७९	१९
दीधितौ वीरासनलक्षणम्	२८०	
द्वितीयपरिपोषप्रकारनिरूपणम्	२८०	१०
तृतीयप्रकारनिरूपणम्	२८०	२६
उपसंहरणम्	२८१	७
विरोधिविषये दोषपरिहारकथनम्	२८१	१४
उदाहरणम्	२८१	१८
तत्राशङ्क्य समाधानम्	२८१	२५
तदुपपादनम्	२८२	२
उक्तार्थस्य दृढीकरणपूर्वकं कारिकाचरमांशविवरणम्	२८२	७
उपसंहरणम्	२८२	२३
दीधितौ स्थायिसञ्चारिरसयोर्भेदप्रदर्शनम्	२८३	२
रसानामङ्गाङ्गिभावमस्वीकुर्वतां मते सङ्गतिप्रदर्शनम्	२८३	१६
साधारणप्रकारोपसंहरणपूर्वकविरोधिविषयकाविरोधोपायं दर्शयितुं कारिकाऽवतारणम्	२८३	२४
उदाहरणम्	२८४	२२
उपसंहरणम्	२५२	३
द्वितीयविरोधिसमावेशं दर्शयितुं कारिकाऽवतारणम्	२८५	५
उदाहरणम्	२८५	१९
वीर एवान्तर्भावयितुं शक्यत्वाच्चेत्याक्षेपपरिहरणम्	२८६	६
अस्यार्थस्य प्राचीनसम्मतिप्रदर्शनेन दृढीकरणम्	२८६	१६
सर्वैः सहृदयैः शृङ्गारादिवत्कथं न प्रतीयत इत्याशङ्कायाः समाधानम्	२८६	२३

विषयाः-	पृ०	पं०
वीरे शान्तस्यान्तर्भावखण्डनम्	२८७	२१
अन्यथाभावे दोषकथनम्	२८८	२
विशेषोपदेशपूर्वकोपसंहरणम्	२८८	८
पर्यवसितकथनम्	२८८	२०
उक्तार्थस्य दाढर्याय कारिकाऽवतारणम्	२८८	२४
एकवाक्ये तादृशरसयोर्विरोधनिवृत्त्युदाहरणम्	२८९	१३
प्रबन्धे मुक्तकादौ विशेषतः शृङ्गारे विरोधाविरोधनिरूपणार्थमुपसंहार-पूर्वकोपदेशः	२९०	१९
सत्कविः शृङ्गारेऽवधानातिशयवान् भवेदित्युपदेशः	२९१	१२
सुकुमारतैव शृङ्गारप्राधान्ये निमित्तं, यावदन्यदपीत्याशङ्कायामुपपादनम्	२९१	२३
पर्यवसितं विशेषं वक्तुं कारिकाऽवतारणम्	२९२	२
उक्तस्य समर्थनम्	२९२	१८
नाटकादिकाव्यस्य सदाचारोपदेशरूपकथनम्	२९३	२
शृङ्गाराङ्गसमावेशस्य मुख्यातिरिक्तप्रयोजनाभिधानम्	२९३	१०
उदाहरणम्	२९३	२४
उपसंहारपूर्वकपर्यवसितोपदेशः	२९४	११
रसादिव्यञ्जकवाच्यवाचकनिरूपणमपि काव्योपकारकमिति तत्प्रतिपाद-नार्थं कारिकाऽवतारणम्	२९४	२२
पर्यवसिताभिधानम्	२९५	९
प्राचीनसम्मतिप्रदर्शनपूर्वकवृत्तिव्यञ्जनानिरूपणार्थं कारिकाऽवतारणम्	२९५	२२
वृत्तीनां सप्रयोजनत्वप्रदर्शनम्	२९६	१०
रसादितात्पर्येणैव कुतः, वृत्ततात्पर्येण वृत्तीनां योजनं कथ`त्याशङ्कानि-रसनम्	२९६	१६
एकदेशिमतोपन्यसनम्	२९६	२६
तस्य खण्डनम्	२९७	९
भवेत्सर्वस्य तदनुभवस्त्वेन का हानिरित्यतोऽभिधानम्	२९७	१८
पुनराशङ्कनम्	२९७	२३

विषयाः-	पृ॰	पं॰
तत्खण्डनम्	२९८	६
रसादिविभावादीनां भेदस्य समर्थनम्	२९८	१९
पुनराशङ्कनम्	२९९	८
वाच्यव्यङ्ग्यप्रतीत्योः कार्यकारणभावएव क्रमकल्पने कथनम्	२९९	१५
आक्षेपमंशतः स्वीकृत्य खण्डनम्	२९९	१७
स क्रमः कुतो न लक्ष्यत इत्यत्र कथनम्	३००	[illegible]
काव्योद्भूतव्यङ्ग्यप्रतीतौ वाच्यप्रतीतेः कारणताव्यवस्थापनम्	३००	[illegible]
पुनः क्रमस्वीकृतेर्दाढर्याय कथनम्	३०१	१२
गीतादिशब्दजरसादिव्यङ्ग्यप्रतीतावपि क्रमोऽस्त्येवेति प्रतिपादनम्	३०१	१८
स क्रमः कुतो न प्रतीयत इति पुनर्धाष्ट्र्येनाशङ्कमानं प्रत्युत्तरम्	३०१	२५
स च क्रमो न सर्वत्रालक्ष्य एवेत्यत्राभिधानम्	३०२	१५
उभयोर्व्यङ्ग्ययोस्तुल्यत्वे, तत्क्रमयोर्लक्ष्यालक्ष्यत्वेन कुतो वैषम्यमित्याक्षिप्य तन्निरसनम्	३०२	१९
संलक्ष्यक्रमध्वनेरपरस्मिन्प्रकारेऽपि क्रमस्य व्यवस्थापनम्	३०३	१५
ततः पदप्रकाशेऽपि क्रमस्य व्यवस्थापनम्	३०४	५
एकस्या एव वैयञ्जनिकप्रतीतेरार्थत्वं शब्दशक्तिमूलत्वं चेद् विरुद्धमित्याशङ्कायामाख्यानम्	३०४	२२
ततोऽविवक्षितवाच्यध्वनौ क्रमसमर्थनम्	३०५	८
तत्र संलक्ष्यत्वेनासंलक्ष्यत्वेन वा क्रमः कथं न विचारित इत्याशङ्कायामाख्यानम्	३०५	१७
रसादीनां वाच्यातिरिक्तत्वं समर्थयितुं क्रमविचारणा कृतेति सूचनपूर्वकमुपसंहरणम्	३०५	२६
व्यञ्जकमुखेन ध्वनिनिरूपणे मीमांसकादि तिपक्षिप्रश्नोत्थापनम्	३०६	९
तद्दोषपरिहरणम्	३०६	१९
व्यञ्जकत्वस्य वाचकत्वव्यतिरिक्तत्वासङ्गतिं मन्वानस्य प्रष्टुः पुनःकथनम्	३०६	२८
आक्षेपपरिहरणाय विकल्पनम्	३०८	७
तत्र प्रथमविकल्पखण्डनम्	३०८	१३

विषयाः-	पृ०	पं०
तत्र भिन्नविषयत्वोपपादनम्	३०८	१८
अर्थभेदनिबन्धनस्य वृत्त्योर्भेदव्यवहारस्य साधनम्	३०८	२२
अर्थयोर्भेदे हेतुप्रतिपादनम्	३०८	२५
व्यङ्ग्यस्य साक्षात्सम्बन्धितास्वीकारे दोषप्रदर्शनम्	३०९	५
निगमनम्	३०९	९
तयोर्भेदस्य साधकस्वरूपभेदाख्यानम्	३०९	१२
हेतुप्रदर्शनम्	३०९	१५
अर्थसमर्थकचेष्टाव्यञ्जकत्वोदाहरणम्	३०९	२३
उपसंहरणपूर्वकप्रतिपादनम्	३१०	२
द्वितीयविकल्पस्य विशेषस्य खण्डनम्	३१०	६
परम्परयाऽभिधाबोध्यत्वं तत्राप्यस्त्येवेति कुतस्तत्त्वेन व्यपदेश इत्याशङ्कायामभिधानम्	३१०	१२
स्वोक्तिसमर्थमम्	३१०	२६
दृष्टान्तदार्ष्टान्तिकवैषम्योक्त्या व्यञ्जनायास्तात्पर्यशक्त्याऽगतार्थत्वनिरूपणम्	३११	१०
हेतुमुक्त्वा वैषम्यप्रदर्शनम्	३११	२०
तन्न्यायोपपादनम्	३११	२५
पदतदर्थानां पृथगुपलम्भे का हानिरित्याशङ्कायां कथनम्	३१२	२
प्रकृते तन्न्यायासङ्गत्युपपादनम्	३१२	१०
स्वाभिमतप्रकाशात्मकव्यञ्जनावृत्तिस्थापनानुलोमघटप्रदीपन्यायोपन्यसनम्	३१२	२१
तदुपपादनम्	३१२	२३
पदार्थवाक्यार्थन्यायं तयोः स्वीकृत्य साम्प्रतमत्र निरस्यतीत्यसमञ्जसमित्याशङ्कायां प्रतिपादनम्	३१३	३
आशङ्कनम्	३१३	१२
इष्टापत्तौ कथनम्	३१३	१४
वाक्यताविघटनहेत्वाख्यानम्	३१३	१७

विषयाः	पृ०	पं०
आपत्ति परिहृत्योपपादनम्	३१३	२७
उपसंहरणम्	३१४	४
व्यङ्ग्यस्यान्यथाऽपि तात्पर्यशक्तिबोध्यत्वेन वाच्यत्वनिराकरणम्	३१४	७
निगमगमुखेन व्यङ्ग्यस्य वाच्यत्वाभावस्थापनम्	३१४	१
उपसंहरणम्	३१४	२१
हेत्वन्तरप्रदर्शनम्	३१४	[illegible]
अन्यमते लक्षणाशब्देनैव व्यवह्रियमाणाया गुणवृत्तेर्भेदप्रदर्शनम्	३१५	[illegible]
पूर्वं स्वरूपभेदप्रदर्शनम्	३१५	१६
अन्यथा स्वरूपभेदकथनम्	३१५	२४
पुनरपरथा स्वरूपभेदाख्यानम्	३१६	६
अस्खलद्गतिकत्वेऽपि लक्षणास्वीकारे दोषप्रदर्शनम्	३१६	१७
पूर्वपक्षिप्रश्नः	३१७	४
समाधानम्	३१७	१०
भेदनियामकविषयभेदप्रतिपादनम्	३१७	२१
लक्ष्यस्य रसादिरूपत्वाभावप्रदर्शनम्	३१८	५
लक्ष्यस्य व्यङ्ग्यालङ्काररूपत्वाभावोपपादनम्	३१८	१०
लक्ष्यस्य व्यङ्ग्यवस्तुरूपत्वाभावाख्यानम्	३१८	१३
लक्षणाव्यञ्जनयोः स्वव्याख्यातविषयभेदप्रकाशनम्	३१९	६
फलितोपपादनम्	३१	१९
वाचकगुणवृत्तिभिन्नस्य व्यञ्जकस्याभिधालक्षणामूलकत्वेन प्रदर्शनम्	३१९	१३
व्यञ्जनाया अभिधालक्षणामूलत्वस्य विभज्य प्रदर्शनम्	३१९	१९
पूर्वग्रन्थसङ्गतिप्रदर्शनपूर्वकसमर्थनम्	३१९	२५
पुनर्व्यञ्जनाया अभिधालक्षणातो वैलक्षण्यव्यवस्थापनम्	३१९	२९
नेयं व्यञ्जनाऽतिरिक्तः पदार्थः किन्त्वभिधालक्षणयोर्नूतनः कश्चन प्रकारः कल्प्यत इत्युक्तवन्तं प्रति कथनम्	३२०	२०
पूर्वोपक्षिप्तध्वनिभेदद्वयोपसंहरणम्	३२१	२

विषयः	पृ०	प०
अविवक्षितवाच्यध्वनिस्थले तयोरैक्यमवधारयतामविवेकिनां मतेन शङ्कोत्थापनम्	३२१	११
अविवक्षितवाच्ये गुणवृत्तेर्वृत्तान्ताख्यानम्	३२१	२१
उक्तसमर्थनम्	३२२	१२
तत्र युक्तिप्रदर्शनम्	३२२	२९
आंशिकं व्यञ्जनाऽभ्युपगमं प्रदर्श्याक्षेपप्रदर्शनम्	३२२	२८
तत्परिहरणम्	३२३	९
हेतुकथनम्	३२३	१२
ताद्रूप्याभावे हेतुकथनम्	३२३	१९
कस्मान्न तत्र व्यञ्जनेति शङ्कायामभिधानम्	३२३	२३
पुनरपि गुणवृत्तेर्व्यञ्जनायाश्चैकीभावं निराकर्तुमादौ गौणलक्षणायाः सप्रयोजनाया उदाहरणप्रदर्शनम्	३२३	२८
शुद्धलक्षणां रूढिमूलामुदाहर्तुमाख्यानम्	३२४	१७
उदाहरणम्	३२४	२३
यत्र सप्रयोजनायां तस्यां चमत्कारिव्यङ्ग्यप्रतीतिरस्त्येव, तत्र का गतिरिति शङ्कायामभिधानम्	३२५	२
हेतुप्रदर्शनपूर्वकमुपसंहरणम्	३२५	१९
पौनरुक्त्यपरिहारपूर्वकोपसंहरणम्	३२६	१०
पुनर्हेत्वन्तरोपन्यासेनाभिधातो वैलक्षण्यसमर्थनपूर्वकव्यक्त्यौपाधिकत्वप्रतिपादनम्	३२६	१५
प्रसिद्धसम्बन्धशब्दविवरणपूर्वकव्यञ्जनौपाधिकताप्रदर्शनम्	३२६,	१९
अभिधायास्तु नियतत्वमिति ततो भेदकथनम्	३२६	२५
समर्थनम्	३२७	२
नियतत्वे हेत्वभिधानम्	३२७	६
औपाधिकत्वोपपादनम्	३२७	१४
व्यञ्जकत्वस्यानियततयाऽविवेचनीयतामाशङ्क्य समाधानम्	३७२	१८
पुनरन्यथाऽभिधाव्यञ्जनयोर्भेदोपपादनम्	३२७	२७

विषयाः-	पृ०	पं०
उक्तास्वीकारे दोषकथनम्	३२७	१५
अभिधाव्यञ्जनयोर्भेदं समर्थयितुमादौ मीमांसकानुमतत्व-स्थापनम्	३२८	२
कथमित्याशङ्कायां कथनम्	३२९	८
शब्दः प्रकाशकत्वलक्षणं स्वधर्मं न जहातीत्याशङ्कायामभिधानम्	३३०	२
निगमनम्	३३०	
तद्धर्मान्तरमभिधाऽऽद्यैवोच्यतेत्याक्षेपपरिहरणम्	३३०	२४
व्यक्तिविपक्षमाक्षिप्य समाधानम्	३३१	१६
कीदृशं तर्हि व्यङ्ग्यं प्रधानतया प्रकाशत इति प्रश्नस्योत्तरम्	३३२	२
अतिव्याप्त्यव्याप्तिपरिहरणम्	३३२	१४
निगमनम्	३३३	३
व्यञ्जनाया वैयाकरणमतानुगुणतरत्वस्य संक्षेपेणोपपादनम्	३३३	९
नैयायिकादिनयेऽपि समर्थयितुमुपक्रमणम्	३३३	१९
तदेवोक्त्वा समर्थनम्	३३४	१७
प्रकृते संयोजनम्	३३४	२७
व्यञ्जकत्वस्य प्रसिद्धिप्रदर्शनपूर्वकोपसंहरणम्	३३५	३
व्यङ्ग्यप्रतीतिमनुमितिमेव मन्वानस्य तार्किकस्य मतोपन्यसनम्	३३५	२३
प्रौढिवादतयाऽभ्युपेत्य खण्डनम्	३३६	२१
प्रौढ्याऽभ्युपगतासिद्धान्तमतनिरसनम्	३३७	८
सिंहावलोकनन्यायेनोक्ताभ्युपगसाधनखण्डनम्	३३७	१२
वाच्यव्यङ्ग्ययोरनुमेयत्वाभावोपपादनम्	३३८	१९
उक्तान्यथाऽङ्गीकारेऽनुपपत्त्यभिधानम्	३३८	२६
तत्प्रतीयमानरूपाशङ्कामपास्योपसंहरणम्	३३९	१५
प्रतिपाद्यार्थद्वयेऽपि व्यङ्ग्यस्य व्यञ्जनामात्रगम्यत्वप्रदर्शनम्	३३९	२५
तत्सम्बन्धान्तरं लिङ्गलिङ्गिभाव एव कुतो न कल्प्यत इत्याक्षेपसमाधानम्	३४०	१५
निगमनम्	३४०	१९

विषयाः-	पृ०	सं०
व्यङ्ग्यस्याप्यनुमेयत्वाङ्गीकारे उक्तापत्तिस्मारणम्	३४१	२
व्यङ्ग्यस्य प्रतीत्यनन्तरं सत्यत्वासत्यत्वनिश्चयार्थमनुमितिरेवाश्रयणीयेत्याक्षेपस्य दृष्टान्तोपन्यासेन निरसनम्	३४१	१७
वाच्यादीनामनुमेयत्वोक्तिरभ्युपगमवाद एव, न त्विह काव्येषु प्रयोजिकेति प्रदर्शनम्	३४१	२७
निगमनम्	३४२	८
माभूद्यत्र यत्र व्यञ्जकता तत्र तत्रानुमानत्वं, यत्र यत्रानुमानत्वं तत्र तत्र व्यञ्जकत्वमित्याशङ्कायामाख्यानम्	३४२	१२
अभिप्रायव्यञ्जकता यदीत्थं ध्वनित्वाप्रयोजिका, तदा तदुपादानमिह निष्फलमेव पूर्वं कुतो विहितमित्याक्षेपसमाधानम्	३४२	२२
एतस्यैव सङ्क्षेपेण निरूपणम्	३४२	२७
उपसंहरणम्	३४३	८
पुनरन्यया भङ्ग्या व्यञ्जनास्थापनम्	३४३	१२
तस्यैव समर्थनम्	३४३	२५
कारिकायामुपसंहरणम्	३४४	१०
काव्यस्य गुणीभूतव्यङ्ग्याभिधानद्वितीयप्रकारनिरूपणम्	३४४	१८
दीधितौ गुणीभूतव्यङ्ग्यस्याष्टविधत्वादस्य काव्यस्याप्यष्टविधत्वोपपादनम्	३४५	६
वस्त्वादित्रये वस्तुनो व्यङ्ग्यस्य ये भेदा उक्तास्तेषामुदाहरणार्थमाख्यानम्	३४५	१४
उदाहरणम्	३४५	२०
अतिरस्कृतवाच्यशब्दसमर्पितवस्तुरूपव्यङ्ग्यस्येतराङ्गतायां गुणीभूतव्यङ्ग्यमुदाहर्तुमभिधानम्	३४६	२४
एतदुदाहरणम्	३४६	२८
गुणीभूतव्यङ्ग्यस्य वाच्यसिद्ध्यङ्गव्यङ्ग्यनामकद्वितीयप्रकारमुदाहर्तुमभिधानम्	३४७	६
रसादिरूपव्यङ्ग्यस्य गुणीभावे रसवदाद्यलङ्काररूपगुणीभूतव्यङ्ग्यमुदाहर्तुमुपपादनम्	३४७	१४

विषयाः—	पृ०	पं०
प्रधानीभूतस्य रसादेः कथमन्याङ्गता, कथञ्चाप्राधान्येऽपि न चमत्कारविच्छेद इत्याक्षेपद्वयनिरसनम्	३४७	२१
अलङ्काररूपव्यङ्ग्यस्य गुणीभावे गुणीभूतव्यङ्ग्यमुदाहर्तुमुपपादनम्	३४८	३
गुणीभूतव्यङ्ग्यकाव्यस्य विपुलविषयताप्रदर्शनपूर्वकोपदेशः	३४८	९
योजनाशिक्षार्थमुदाहरणम्	३४८	२६
गुणीभूतव्यङ्ग्यवैशिष्टयेन सर्वत्र वाच्यालङ्कारेषु रम्यत्वं सम्पद्यत इति प्रतिपादनम्	३४९	१७
उपपाद्य समर्थनम्	३५०	१४
भामहलक्षणानुसारमतिशयोक्तिमन्यादर्शी मन्वानस्याशङ्कनम्	३५१	१
तत्समाधानम्	३५१	२०
अलङ्कारान्तरोपकारितयाऽतिशयोक्तेस्त्रिधा विभजनम्	३५२	१०
अस्या गुणीभूतालङ्कारेभ्यो व्यतिरेकाख्यानम्	३५३	२
कुत्र कीदृशं व्यङ्ग्यं वाच्यालङ्कारमुपकरोतीति प्रश्नसमाधानपूर्वकंगुणीभूतव्यङ्ग्यविषयवैपुल्यप्रदर्शनम्	३५३	११
गुणीभूतालङ्कारात्मकव्यङ्ग्यविषये विशेषकथनम्	३५४	७
द्वितीयविशेषकथनम्	३५४	१७
तृतीयविशेषकथनम्	३५४	२५
उपसंहरणम्	३५५	११
एते गुणीभूतव्यङ्ग्यप्रकाराः पृथक् कथन्न प्रदर्शिता इत्याशङ्कायामाख्यानम्	३५६	९
आक्षेपनिराकरणम्	३५६	१८
गुणीभूतव्यङ्ग्यस्य प्रशस्त्या व्यवस्थापनपूर्वकमुपसंहरणम्	३५६	२५
प्रथमोद्द्योतोक्तव्यङ्ग्यप्राशस्त्यस्यावैतथ्यं प्रथयितुमाख्यानम्	३५७	१०
तस्यैव दृष्टान्तप्रदर्शनेन समर्थनम्	३५७	१३
उदाहरणम्	३५८	१०
काक्वाक्षिप्तव्यङ्ग्यरूपस्य गुणीभूतव्यङ्ग्यप्रकारस्य निरूपणम्	३५८	२७
एतदुदाहरणम्	३५९	१२

विषयाः-	पृ०	पं०
एतस्यैवोदाहरणान्तरम्	३६०	१८
गुणीभावं दर्शयितुमादौ शब्दस्य स्पष्टतासाधनम्	३६१	७
केवलं काकुस्तादृशव्यङ्ग्यप्रतिपत्तेर्हेतुः कथन्नेत्याशङ्कायां व्याहरणम्	३६१	१५
अभिधया बोधितत्वात्काकुप्रतीयमानोऽर्थो वाच्य एवेत्याक्षेपसमाधानम्	३६१	२२
तादृशप्रतीयमानस्य गुणीभावप्रदर्शनम्	३६२	४
दीधितावगूढव्यङ्ग्योदाहरणम्	३६२	२१
,, अस्फुटव्यङ्ग्योदाहरणम्	३६२	२५
,, सन्दिग्धप्राधान्यव्यङ्ग्योदाहरणम्	३६३	२
,, तुल्यप्राधान्यव्यङ्ग्योदाहरणम्	३६३	७
,, असुन्दरव्यङ्ग्योदाहरणम्	३६३	१३
ध्वनिगुणीभूतव्यङ्ग्ययोः सङ्कीर्णविषयविभजनम्	३६३	१६
तस्यैव सङ्कीर्णविषयस्योदाहरणम्	३६४	५
द्वितीयमुदाहरणम्	३६४	१९
एतदुदाहरणद्वयस्य सहैव सङ्गमनम्	३६५	२
ध्वनिविषयस्य पृथक्करणपूर्वकं निगमनम्	३६५	१६
असंलक्ष्यक्रमव्यङ्ग्याभिप्रायेण गुणीभूतव्यङ्ग्येऽप्यत्र ध्वनित्वमस्त्येवेति कारिकया प्रकाशनम्	३६६	४
उदाहरणम्	३६६	१५
पुनरुदाहरणम्	३६६	२२
अन्यत्रापि रसाद्यपेक्षया ध्वनित्वं भवतीति प्रदर्शनम्	३६७	२२
न्यक्कार इत्यादावज्ञानादर्थान्तरसंक्रमितवाच्यध्वनित्वं स्वीकुर्वतां प्रत्युपदेशः	३६८	५
कारिकायां 'गुणीभूतव्यङ्ग्योऽपि' इत्यपिशब्दं विवरीतुमाख्यानम्	३६८	२०
सर्वत्र गुणीभूतव्यङ्ग्यस्य ध्वनिरूपता नेति कथनम्	३६८	२७
उदाहरणम्	३६९	६
विवेकश्चायं न निरुपयोग इति प्रदर्शनम्	३६९	१९
अलङ्काराणां सङ्कीर्णविषयोदाहरणम्	३७०	४

विषयाः-	पृ०	पं०
प्रकृतसङ्गतिमुक्त्वा तस्य व्यामोहं दर्शयितुं	३७०	२७
विकल्पकरणेन वाच्यस्य तदसङ्गतत्वोपपादनम्	३७१	६
द्वितीयविकल्पस्याभिधानम्	३७१	१[illegible]
प्रबन्धानुरोधादपि क्वचिदीदृशार्थस्य कल्पनं सम्भवतीत्याशङ्क्योपादनम्	३७१	२०
स्वमतोपन्यसनम्	३७१	
तादृशव्यङ्ग्याङ्गीकारे हेतुकथनम्	३७२	१७
उदाहरणम्	३७२	२६
उदाहरणप्रदर्शनप्रयोजनाख्यानम्	३७३	१२
प्रसङ्गादप्रस्तुतप्रशंसाया वाच्यविलक्षणत्रिविधप्रकारनिरूपणम्	३७३	२३
तत्र प्रथमविवक्षितत्वोदाहरणम्	३७४	३
अत्र स्वीयमुदाहरणम्	३७४	११
उदाहरणद्वयस्य सङ्गमनम्	३७४	२५
द्वितीयप्रभेदाविवक्षितत्वोदाहरणम्	३७५	१३
अत्र वाच्याविवक्षितत्वस्य हेत्वभिधानम्	३७६	४
तृतीयप्रकारविवक्षितत्वाविवक्षितत्वोदाहरणम्	३७६	१६
अत्र वाच्यस्य विवक्षिताविवक्षितत्वयोर्हेतुकथनम्	३७६	२७
दीधितौ वस्तुतस्त्वित्युक्त्वा तृतीयप्रकारस्योदाहरणान्तरम्	३७७	२
अप्रस्तुतप्रशंसायाः प्रक्रमोपसंहरणम्	३७७	११
अविवक्षितव्यङ्ग्यनिकृष्टतृतीयचित्राख्यकाव्यप्रकारनिरूपणम्	३७७	१८
चित्रपदार्थं निर्वक्तुं परीक्षमाणस्याशङ्कनम्	३७८	२८
अत्र स्वयमेव तस्योत्तरम्	३७९	३
तस्यासमीचीनताप्रदर्शनम्	३७९	६
असम्भवितताया एवोपपादनम्	३७९	१३
समाधानम्	३८०	६
उक्तार्थस्योपसङ्क्षिप्य प्रतिपादनम्	३८१	४
ईदृशनिकृष्टकाव्यस्य निरूपणं किमर्थमित्याशङ्कायामाख्यानम	३८१	१७

विषयाः-	पृ०	पं०
किमिदानीन्तनैरपि तत्र प्रवृत्तिर्विधेयेत्याशङ्कायामभिधानम्	३८१	२५
तत्र हेतुकथनम्	३८२	२२
पदार्थानां रसाङ्गताऽऽनयनस्य कविविवक्षाऽधीनताप्रदर्शनम्	३८२	१५
उपसंहरणम्	३८३	६
एतदप्रसिद्धिशङ्कानिरसनम्	३८३	१४
ध्वनेः प्राधान्यप्रदर्शनपूर्वकोपसंहरणम्	३८३	१८
गुणीभूतव्यङ्ग्यस्य का गतिरित्याकाङ्क्षायां कथनम्	३८३	२३
कदा तस्य पार्थक्यमिति पृच्छानिवर्तनम्	३८४	४
चित्रविषयकप्रश्नसमाधानपूर्वकोपसंहरणम्	३८४	१८
सर्वं संगृह्य कथनम्	३८५	४
ध्वनेः प्रकारान्तरप्रदर्शनम्	३८५	१८
दीधितौ ध्वनिभेदपरिगणनम्	३८६	१३
ध्वनेः प्रभेदेनाङ्गाङ्गिभावसङ्करोदाहरणम्	३८६	२१
ध्वनेः स्वप्रभेदेनैव सन्देहसङ्करोदाहरणम्	३८७	५
ध्वनेः स्वप्रभेदेनैकव्यञ्जकानुप्रवेशसङ्करोदाहरणम्	३८८	७
ध्वनिद्वयस्य संसृष्ट्युदाहरणम्	३८८	१५
ध्वनेर्गुणीभूतव्यङ्ग्येन सह सङ्कीर्णत्वोदाहरणम्	३८८	२५
पुनस्तस्यैवोदाहरणम्	३८९	९
व्यङ्ग्यस्यैव गुणीभूतत्वं प्राधान्यं च विरुद्धमिति पराक्षेपाविरोधसमर्थनम्	३९०	१९
उक्तसमर्थनोपपादनम्	३९०	२३
समाधानमिदमेकवाचकानुप्रवेशसङ्करे कथयितुमयोग्यं, तत्र व्यञ्जकैक्यादित्याक्षेपपरिहरणम्	३९१	५
संकराणां संसृष्टेश्च प्रसिद्धिर्व्यङ्ग्यार्थेषु नास्तीत्याशङ्कासमाधानम्	३९१	१४
ध्वनिगुणीभूतव्यङ्ग्ययोः संसृष्ट्युदाहरणम्	३९१	२०
वाच्यालङ्कारेष्वपि तेषां भेदानामुदाहरणम्	३९२	९
रसध्वनेरेव वाच्यालङ्कारेण सह सङ्करो, नान्यध्वनीनामिति प्रश्नस्य समाधानायोदाहरणम्	३९२	२७

विषयाः-	पृ०	पं०
वाच्यालङ्कारध्वनिसंसृष्टिमुदाहर्तुमुपक्रमः	३९३	२९
पदापेक्षयेत्युक्तस्य विवरणम्	३९४	१४
उदाहरणम्	३९४	[illegible]
ध्वनेः प्रथमसंसृष्टालङ्कारसङ्कीर्णत्वोदाहरणम्	३९६	२
ध्वनेर्द्वितीयसंसृष्टालङ्कारसंसृष्टत्वोदाहरणम्	३९७	४
दीधितावस्योदाहरणान्तरम्	३९७	
उपसंहरणम्	३९८	१०
ध्वनेरवश्यविवेचनीयताकथनम्	३९८	२४
ध्वनिविवेचनायाः फलोपदेशः	३९९	४
ध्वनेर्मुख्यत्वस्य रीतीनामानुषङ्गिकतायाश्च प्रदर्शनम्	३९९	८
फलिताख्यानम्	३९९	२०
द्विविधवृत्तीनामपि तादवस्थ्यव्यवस्थापनम्	४००	४
तदनङ्गीकरणे दोषप्रदर्शनम्	४०१	४
पुनर्ध्वनेरनाख्येयत्वनिरसनम्	४०१	१३
तन्निरसने हेतूपपादनम्	४०१	२३
तन्मतस्य तदुक्तदृष्टान्तदार्ष्टान्तिकवैषम्यप्रदर्शनपुरस्सरं खण्डनम्	४०२	२३
ध्वनिकाव्यरत्नविशेषाणां साम्यस्य खण्डनम्	४०३	१२
क्षणभङ्गवादे ध्वनेरप्यनिर्वचनीयताप्राप्तौ समाधानम्	४०३	२३
ध्वनेः क्षणिकत्वाभ्युपगमेऽपि पक्षान्तरालम्बनेन समाधानम्	४०४	११
अन्ते निगमनम्	४०४	१६

चतुर्थोद्द्योते—

कविप्रतिभाऽऽनन्त्यलक्षणप्रयोजनं प्रतिपादयितुं कारिकाऽवतारणम्	४०५	१६
कथं पुनः कविप्रतिभाऽऽनन्त्यमित्याकाङ्क्षायां कारिकोपपादनम्	४०६	१९
उदाहर्तुमुपक्रमः	४०७	११
अत्यन्ततिरस्कृतवाच्ययोगेनापूर्वत्वोदाहरणम्	४०७	१८
सङ्गमनम्	४०८	१७
अर्थान्तरसङ्क्रमितवाच्ययोगेनापूर्वत्वस्योदाहरणम्	४०९	५

विषयाः-	पृ०	पं०
सङ्गमनम्	४०९	२२
विवक्षितान्यपरवाच्यस्याप्यसंलक्ष्यक्रमस्योदाहर्तुमभिधानम्	४१०	३
उदाहरणम्	४१०	९
सङ्गमनम्	४११	२०
दृढीकरणार्थं पुनरुदाहरणम्	४१२	२
सामान्येनासंलक्ष्यक्रमध्वनिविषये तदतिदेशोपदेशः	४१२	११
उक्तोपपादनम्	४१३	५
कविवाणीवर्णनम्	४१३	२१
कवेः प्रतिभाया गिरश्च प्रागुक्तामानन्त्यप्राप्तिमुपपत्त्या निरूपयितुं कारिकाऽवतारणम्	४१४	६
शब्दशक्त्युद्भवध्वनिसमाश्रयणेनापूर्वत्वमुदाहर्तुं प्रतिपादनम्	४१४	१५
उदाहरणम्	४१५	२
स्वतःसम्भवव्यर्थशक्त्युद्भवध्वनियोगेनापूर्वत्वमुदाहर्तुमभिधानम्	४१६	३
उदाहरणम्	४१६	६
कविप्रौढोक्तिसिद्धार्थशक्त्युद्भवध्वनियोगेनापूर्वत्वोदाहरणम्	४१६	२०
कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नार्थशक्त्युद्भवध्वनिसम्बन्धेनापूर्वत्वमुदाहर्तुमाख्यानम्	४१७	१७
उदाहरणम्	४१७	२१
दार्ढ्याय पुनरुदाहरणम्	४१८	१२
व्यञ्जकभेदसम्बन्धेनापि काव्यानामपूर्वत्वं सम्भवतीति तदप्रतिपादनान्न्यूनताया उपसंहरणम्	४१९	१२
रसादीनां व्यङ्ग्यानां प्रागुक्तस्यापि प्राधान्यस्य मुख्योद्देश्यत्वस्य च पुनर्दार्ढ्याय पौनरुक्त्यपरिहारपूर्वककारिकाऽवतारणम्	४१९	२५
उपपादनम्	४२०	१५
उदाहरणप्रदर्शनेनोक्तार्थस्य दृढीकरणम्	४२०	२४
अर्थानामपूर्वत्वाक्षेपेऽभिधानम्	४२१	३
प्रबन्धविशेषोल्लेखेनोक्तार्थस्योदाहरणप्रदर्शनपूर्वकं समर्थनम्	४२१	९

विषयाः—	पृ०	पं०
रामायणे करुणस्य प्राधान्यमुक्त्वा तदुपपादनम्	४२१	१३
महाभारते प्रधानतया शान्तरसव्यवस्थापनम्	४२२	५
उक्तार्थे प्राचीनसम्मतिप्रदर्शनम्	४२२	१८
अत्र व्यासस्यापि सम्मतिप्रदर्शनम्	४२३	८
सिद्धान्तकथनम्	४२३	२०
रसानामङ्गाङ्गिभावाभावे भारते कुतः शान्तस्याङ्गितेत्याशङ्कायां कथनम्	४२४	
भारते वीरादिरसानां धर्मादिपुरुषार्थानामपि प्रधानतया चमत्कारिता।		
कुतोऽवगम्यत इत्याशङ्कायामाख्यानम्	४२४	२
आशङ्कनम्	४२४	२०
दीधितौ भारतस्य सर्वपुरुषार्थप्रकाशकत्वकथनम्	४२४	२५
समाधानम्	४२५	९
तत्रापि केन शब्देन कथं व्यज्यत इति जिज्ञासायामभिधानम्	४२५	१६
उक्तार्थस्य दृढीकरणम्	४२६	२०
समर्थनम्	४२७	२
भारतस्य मोक्ष एव तात्पर्यं चेत् कथं देवताऽऽदीनां माहात्म्यं वर्णितमित्याशङ्कानिरसनम्	४२७	१२
श्रीकृष्णः परब्रह्मात्मा चेद् वसुदेवापत्यार्थकवासुदेवशब्देन कथमभिधीयत इत्याशङ्कायाः समाधानम्	४२८	३
वासुदेवस्य परमेश्वरत्वे हेत्वन्तरप्रकटनम्	४२९	५
दीधितौ श्रीकृष्णस्य परमेश्वरत्वसाधकमूलवचनानि	४२९	९
पूर्वं प्रतिज्ञातस्य निगमनम्	४३०	४
मोक्षशान्तरसयोरनभिधेयत्वे निमित्ताभिधानम्	४३०	१४
स्वोक्तेर्दार्ढ्याय प्रसिद्धिप्रदर्शनम्	४३०	२०
पूर्वोक्तस्योपसंहरणम्	४३०	२७
उक्तस्य समर्थनम्	४३१	८
उदाहरणम्	४३१	२३
अत्र मत्स्यादिदर्शनरूपवाच्येन व्यज्यमानं चुलके जलधिसम्मानमेवाद्भुतरसं पुष्णाति न तु वाच्यमित्याशङ्कायां कथनम्	४३२	१३

विषयाः-	पृ०	पं०
व्यतिरेकमुखेन समर्थनम्	४३२	१९
काव्यसुषमाप्रकर्षस्य बहुरसव्यापकत्वकथनम्	४३२	२६
उदाहरणम्	४३३	४
गुणीभूतव्यङ्ग्ययोगेनापि काव्यानामपूर्वत्वं भवतीति कथनम्	४३४	२
तद्योगेनानुदाहृते हेतुकथनम्	४३४	९
तज्ज्ञानार्थमुपायाभिधानम्	४३४	१३
दीधितौ गुणीभूतव्यङ्ग्ययोगेनापूर्वत्वोदाहरणम्	४३४	१५
प्रतिभाप्राधान्यस्योपदेशपूर्वकोपसंहारः	४३५	६
अपूर्वत्वानन्तत्वसम्पादकप्रतिभागुणाभावे क्षतिप्रदर्शनम्	४३५	१५
अर्थापूर्वत्वं माऽस्तूक्तिवैचित्र्यमात्रेण बन्धच्छाया तु स्यादेव का हानिरित्याक्षेपस्य समाधानम्	४३५	२१
शब्दचारिमसम्पदैव प्रबन्धस्य चारुत्वेऽभिधानम्	४३५	२७
तत्र कारणमाशङ्क्य निरसनम्	४३६	५
पुनराक्षेपनिराकरणम्	४३६	१३
व्यङ्ग्यप्रसङ्गेन वाच्यस्याप्यर्थानन्त्यप्रयोजकत्वं ख्यापयितुं कारिकाऽवतारणम्	४३६	२६
उद्देशक्रमेणावस्थाभेदप्रयुक्तार्थानन्त्यप्रदर्शनम्	४३७	२२
उक्तार्थस्य दृढीकरणम्	४३८	९
पुनः प्रकारान्तरेणावस्थाभेदाद् वस्तुभेदप्रकाशनम्	४३८	२३
उदाहरणम्	४३९	४
चेतनाचेतनावस्थाभेदप्रयुक्तवस्तुभेदवर्णनलक्षणस्य मार्गस्य प्रसिद्धिकथनम्	४३९	११
पुनरन्यथा चेतनपदार्थानां भेदप्रदर्शनम्	४३९	१९
चेतनानामावान्तरिकभेदप्रयुक्तभेदाभिधानपुरस्सरमानन्त्यकथनम्	४३९	२२
उदाहरणम्	४४०	८
देशभेदप्रयोज्यपदार्थभेदप्रदर्शनम्	४४०	२६
उपपादनम्	४४१	११
कालभेदाद्वस्तुभेदप्रदर्शनम्	४४१	२४

विषयाः—	पृ॰	पं॰
पदार्थानां स्वरूपभेदप्रयुक्तभेदप्रदर्शनम्	४४२	२
काव्यार्थानन्त्यमनङ्गीकुर्वतां मतमपाकर्तुं तन्मतोपन्यसनम्	४४२	१०
समाधानम्	४४३	१४
मतमनूद्य खण्डनम्	४४३	[illegible]
तत्स्वीकारे क्षतिप्रदर्शनम्	४४४	२
अन्यकविकृते व्यर्थत्वापाते हेतुकथनम्	४४४	[illegible]
उक्तिवैचित्र्यान्नवीनकविकृतेश्चमत्कारिता स्यादेवेत्याशङ्कानिराकरणम्	४४४	[illegible]
पर्यवसितस्य सङ्क्षेपेण कथनम्	४४५	३
परपक्षाङ्गीकरणपूर्वकस्वपक्षस्थापनम्	४४५	१०
उक्तिवैचित्र्यस्यार्थानन्त्यहेतुतासमर्थनम्	४४५	२१
पुनरपरथा तत्प्रदर्शनम्	४४६	४
उदाहरणम्	४४६	१६
उपसंहरणम्	४४६	२९
किं तर्हि वाच्यवैचित्र्यमेव मुख्यमित्याशङ्कायां कथनम्	४४७	६
कारिकाद्वयानुषक्ताभुक्तांशस्याख्यानम्	४४८	५
कविद्वयरचनयोर्दृश्यमानः संवादः कथमुपपद्यतामित्याशङ्कायामुपपादनम्	४४८	२७
कारिकाऽनुक्तस्याप्यपेक्षितांशस्याभिधानम्	४४९	४
विशेषमभिधातुं कारिकोत्तरार्धावतारणम्	४४९	८
संवादस्वरूपप्रकारनिरूपणम्	४४९	२०
संवादविभागनिरूपणेन कुतः संवादानामैकरूप्यमिति शङ्कायामाख्यानम्	४५०	११
कारिकाऽन्तरावतारणम्	४५१	३
पदार्थसादृश्ये ग्राह्याग्राह्यत्वं वक्तुं कारिकाऽवतारणम्	४५१	२२
उपसंहरणम्	४५२	२६
प्रबन्धस्योपसंहारपूर्वकोपदेशः	४५३	२४
वृत्तिकृतः प्रक्रान्तप्रबन्धोपसंहारपूर्वकमाशीर्वादात्मकमङ्गलम्	४५५	११
प्रबन्धावसाने स्वनामसंकीर्तनम्	४५६	११
दीधितिकारकृतस्वपरिचयप्रदर्शनपुरस्सरमन्ते मङ्गलाचरणम्	४५६	२२

इति सदीधितिध्वन्यालोकस्य विषयानुक्रमणिका।

काव्यप्रकाशः नागेश्वरीव्याख्यासहितः ।

अयि ! साहित्यतत्त्वमधिजिगमिषवो विपश्चितः !

इदं नाविदितचरं भवतां, यद्—विना मम्मटाचार्यप्राप्तप्रकाशं काव्यप्रकाशं; काव्यप्रकाशं लब्धुं न प्रभवः केऽपि कदा चिदपीति, किंचात एव सर्वत्रत्यासूत्तमासु परीक्षासु तत्तत्प्रबन्धकमहोदयैः पाठ्यत्वेन निर्धारितः स साहित्यमूर्धन्यो ग्रन्थः । परन्तु सम्प्रति परीक्षाऽर्थिनां विद्याऽर्थिनां कृते स्वल्पसमयेनैव झटिति संक्षेपतो ग्रन्थाशयग्रन्थिविमोचने प्रभुतरा व्याख्या काऽपि न दृग्गोचरीभूयत इतिचिन्ताऽऽकुलितमानसेभ्यो जनेभ्यः सहर्ष "नागेश्वरी" टीकया संवलितमुक्तग्रन्थं श्रीपण्डितहरिशङ्करशर्ममैथिलमहोदयो दृक्पथमवातारयत्, नूनमनेनोक्तचरव्याख्योपेतेन ग्रन्थेन भविष्यति स्वयमेवाध्येतृणामध्यापकेन विनाऽपि परीक्षोपयोगिज्ञानमित्यत्र विदुषामनुभव इति वेदितव्यं तत्र भवद्भिः सादरमुक्त ग्रन्थं दिदृक्षुभिरिति । मूल्यम्—रू० ४)

काव्यप्रकाशः सुधासागराख्यया व्याख्यया विभूषितः

अयि ! काव्यप्रकाशं सविशेषमधिजिगांसवो विपश्चिदपश्चिमा अन्तेवासिनः सुहृज्जनाश्च !

हन्त ! महदानन्दास्पदमिदमिदानीं प्रस्तूयते; श्रोतुमपि तन्मुहुर्मुहुरनुरुध्यन्ते कयत्कालमवधाय भवन्तः,

संप्रत्यसाम्प्रतं न भविष्यतीति; वर्त्तमानास्वपि विविधासु व्याख्यासु श्रीवाग्देवताऽवतारपदलाञ्छनेन श्रीमम्मटाचार्येण प्रणीतेऽधिकाव्यप्रकाशं; श्रीभीमसेनदीक्षितमहोदयेन व्याख्यातिलकं सुधासागराख्यं तिलकमिव समुद्भासितमिति सविशेषं विशेषं विद्वद्भिर्विद्वद्भिः प्रकाशनायानुशास्यमानेन मया तद्द्रष्टृवशंवदतया प्रकाशितः ।

आशास्यते चात्रत्यवैशिष्ट्यं विशिष्टपण्डितसंमतस्य वैमत्ये सत्यखण्डनीयंखण्डनमैकमत्ये तु सङ्कलनमविकलं; सुधावदधिकं सुधीजनमनोरञ्जनमवलोकितुं-प्रयतेरन् प्रायशः प्रत्ना नूत्ना अपि सन्तः प्रशंसन्तः सौष्ठवमेतदीयमिति,

किं चात्रत्येषु दिक्परिमितेषूल्लासेषु क्रमेण समुचितनिरूपणमेषामिति संक्षेपतऊह्यं, तद् यथा—१मे—काव्यलक्षणस्य तद्भेदानां च, २ये—शब्दार्थस्वरूपनिरूपणात्मकेऽभिधाऽऽदीनाम्, ३ये—अर्थव्यञ्जकतायाः, ४ र्थे—ध्वनेः, ५मे—ध्वनिगुणीभूतव्यङ्ग्यस्य व्यञ्जनास्थापनप्रभृतेश्च; ६ष्ठे—चित्राख्यकाव्यभेदस्य, ७मे—दोषाणाम्, ८मे—गुणानाम्, ९मे—शब्दालङ्काराणाम्, १०मे—अर्थालङ्काराणामिति ।

उक्तचरविषयमवलम्ब्य यादृशी विचारशैली प्रदर्शिता टीकाकारमहोदयैर्ग्रन्थकृदाशयवर्णनपुरःसरं तत्सर्वं भवत्पुरःसरमेव प्रकटीभविष्यतीत्यलं पल्लवितेन विज्ञवरेष्विति ।

मूल्यम्—रू० ५)

श्रीमदानन्दवर्धनाचार्यप्रणीतो

ध्वन्यालोकः

मैथिलश्रोत्रियपण्डितश्रीबदरीनाथशर्मनिर्मितदीधितिविवृतिविलसितः ।

प्रथम उद्योतः ।

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।

ध्वनिवृत्तिकर्तृवाणीं, विषमां व्याख्यातुमुद्यतः सहसा ।
प्रयतः प्रणम्य वाणीं, करुणावरुणालयस्वान्ताम् ॥ १ ॥
महसाऽऽलिङ्गितमनिशं किमपि तमश्चारु चिन्तयन् कुतुकात् ।
रचयति बदरीनाथो ध्वन्यालोकस्य दीधितिं विवृतिम् ॥ २ ॥

अथ परमप्रशस्तपथाध्वनीनं ध्वनिनिबन्धं व्याचिख्यासुर्विदग्धविद्वच्चूडामणिस्तत्रभवान् राजानकानन्दवर्धनाचार्यः शिष्टाचारपरम्पराऽनुशिष्टं प्रारिप्सितप्रबन्धसमाप्तिप्रचारप्रतिबन्धकप्रत्यूहव्यूहमपोहयितुमाशीर्वादात्मकं मङ्गलं विधाय शिष्यशिक्षायै निबध्नाति—**स्वेच्छेति** । स्वेच्छया निजनैसर्गिकजगदवनसमीहया, यदृच्छया वा, न तु कृतकर्मवशेन परादेशेन वा, केसरिणः—सिंहस्य; मधुरिपोर्नारायणस्य नृहरेरितियावत् । स्वच्छया—अवदातया, स्वेषाम्—आत्मनाम्, छायया—कान्त्या, आयासितः साम्यासादनप्रयत्नं कारितः खेदितो, वा; इन्दुश्चन्द्रमा यैस्तादृशाः । प्रपन्नानां—शरणागतानां प्रह्लादप्रभृतीनाम् । अर्तिच्छिदः—पीडाहारिणः । नखाः, वो-युष्मान् व्याख्यातॄन् श्रोतॄंश्च, त्रायन्तां रक्षन्त्वित्यर्थः ।

तथाहि—'स्वेच्छा यदृच्छा स्वच्छन्दः स्वैरिता चेति ते समाः' इति केशवः । 'छायात्वनातपे कान्तौ' इति वैजयन्ती । 'आयासो यत्नः क्लेशश्च' इति कल्पद्रुमः । 'चापाग्रपीडयोरर्तिः' इति शाश्वतश्च ।

त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ॥

इह स्वेच्छाशब्दस्य विलक्षणैकार्थोपस्थापकत्वात् 'निजस्वात्मादिशब्दानां प्रधानक्रियाकर्त्रन्वयित्वम्' इति व्युत्पत्तिविरोधप्रयोज्यो नैवाभवन्मतयोगो दोषः। आतपाभाववाचित्व एव छायाशब्दस्य समासे "छाया बाहुल्ये" इति पाणिनिसूत्रेण क्लीबत्वस्य व्याख्यातृभिः सिद्धान्तितत्वान्न 'स्वच्छाये'त्यत्र तत्प्राप्तिः। सवर्णदीर्घेण स्वरूपाविपर्यासेऽपि प्रकृते क्लीबत्वमङ्गीकर्तुमसङ्गतम्, 'स्वच्छायया' इत्याचार्यव्याख्यानानुपपत्तेः। स्वच्छशब्दस्य धर्मिवाचकत्वेऽप्युक्तरीत्याऽन्वयसामञ्जस्ये धर्मपरताकल्पनं तु कस्यचिच्चिन्त्यम्। त्राणं च प्रकृतोपयोगितया ग्रन्थसमाप्तिप्रचारप्रतिभटप्रत्यवायशान्तिलक्षणं साहाय्याचरणम्। अतो नासङ्गतिः। भगवतः स्वेच्छाकेसरिता प्राकृतसिंहापेक्षिकं व्यतिरेकमलङ्कारम्, स्वाच्छन्द्यं द्वारीकृत्य परानियोज्यत्वेन परमैश्वर्यञ्च, मधुरिपुपदं खलनिग्राहकतां विक्रमविशेषञ्च, स पुनः प्रपन्नत्राणौचित्यम्, नखच्छायायाः स्वच्छता शशाङ्ककान्त्यपेक्षया वैलक्षण्यम्, तच्च तदासादनार्थमायासविधानोपपत्तिम्, इन्दुपदं स्वीययावत्सुषमासाम्राज्यशालित्वम्, तस्यापि साम्यासादनायासो नखानां शोभातिरेकस्यासौलभ्यमुखेन स्पृहणीयताम्, बहुत्वं प्रत्येकमपि त्राणसामर्थ्येऽनेकसद्भावे तदवश्यम्भावम्, एकाकिचन्द्रावधिकाधिक्यलाभस्येषत्करत्वं च, प्रपन्नत्वमुपेक्षानर्हताम्, अर्तित्वं झटित्युच्छेद्यताम्, क्विप्प्रत्ययस्तच्छेदे नखानां नित्योद्यमम्, स च भगवतो विपक्षोच्छेदोत्साहद्वारकं वीररसम्, नखानां छिदाकर्तृत्वमायुधान्तरापरिग्रहौचितीम्, तीक्ष्णतां च, सा तु रक्षादाक्ष्यम्, समस्तवाक्यार्थो भगवन्नृसिंहविषयककविनिष्ठरतिभावं च सूचयति। इत्थञ्च वस्त्वलङ्काररसादिलक्षणस्त्रिरूपोऽपि ध्वनिरिह स्फुटोऽवगन्तव्यः। **'प्रपन्नार्तिच्छिदः'** इतिविशेषणस्य साभिप्रायत्वेन परिकरोऽत्रालङ्कारः श्रुतिवृत्तिच्छेकानुप्रासैः संसृज्यते।

यत्त्वत्र 'पूर्वमेक एवासाधारणवैशद्यहृद्याकारयोगात् समस्तजनाभिलषणीयताभाजनमभवम्; अद्य पुनरेवंविधा नखा दश बालचन्द्राकाराः सन्तापार्तिच्छेदकुशलाश्चेति तानेव लोको बालेन्दुबहुमानेन पश्यति, न तु मामित्याकलयन् बालेन्दुरविरतमायासमनुभवतीत्युत्प्रेक्षाऽपह्नुतिध्वनिरपि' इति केचन व्याचक्षते। तत्र तदीयमहत्त्वमनुसन्दधतो, वयं परमुदास्महे। तथाहि—प्रतीयमानाऽप्युत्प्रेक्षाऽपह्नुतिश्च तदैवात्र स्वीकर्तुं शक्येते, यदि प्रकृतधर्मिकाप्रकृतसम्भावनायाः, प्रकृतनिराकृतिपुर-

काव्यस्यात्मा ध्वनिरिति बुधैर्य [illegible]तपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् [illegible] ॥

बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिरितिसंज्ञितः परम्परया य

स्सराप्रकृतस्थापनायाश्च तयोः सामग्र्याः कथञ्चिदिहोपलम्भः स्यात् । [illegible] न विच्छित्तिप्रसूरिति सहृदयैर्विभावनीयम् ॥ १ ॥

अथ कारिकात्मकं ध्वनिनिबन्धमारभमाणोऽनुबन्धान् दर्शयन् ध्वनिस्वरूपनिरूपणं प्रतिजानीते—**काव्यस्यात्मेति । ध्वनिरिति**—प्रसिद्धः । काव्यस्यात्मा यो बुधैः समाम्नातपूर्वः, तस्याभावमपरे जगदुः । अन्ये तं भाक्तमाहुः । केचित् तदीयं तत्त्वं वाचामविषये स्थितमूचुः । तेन सहृदयमनःप्रीतये तत्स्वरूपं ब्रूम इत्यन्वयः ।

विप्रतिपत्तीवैंशद्येन प्रकाशयितुं वृत्तिकारः कारिकां व्याचष्टे—**बुधैरिति** । काव्यस्य तत्त्वविद्भिर्मर्मज्ञैः (न तु तदनभिज्ञैः, तदुक्तेरिह स्वत एवानुपादेयत्वात्) बुधैः (न तु बुधेन, एकस्य भ्रान्तेरपि सम्भवात्) काव्यस्य सहृदयहृदयाह्लादिशब्दार्थमयस्य, आत्मा (तं विना काव्यत्वस्यैवास्वीकाराज्जीवनाधायकत्वेन) प्रधानम् , ध्वन्यते शब्दवाच्यार्थापेक्षयाऽधिकचमत्कारितया प्रतीयते योऽर्थः स ध्वनिरिति योगमर्यादया व्यङ्ग्यविशेषो ध्वनिरित्याख्याभाक् । परम्परयाऽविश्रान्तविबुधधारया यः सम्यगुचितं शासनानुसारं च, आम्नातः–आख्यातः (न तु सद्य एव येन केनचित् कल्पितः) तस्य ध्वनेः, सहृदयजनानां मनसि प्रकाशमानस्य तदनुभवगोचरस्य अपि अभावम्–असत्ताम् , अपरेऽयुक्ताभिधायित्वादनुपादेयनामानः, जगदुरित्यर्थः । 'इतिर्लोकेऽर्थपदार्थकस्य शब्दपदार्थकत्वकृत्' इत्यभियुक्तोक्तेरितिशब्देन यदि ध्वनिशब्दस्य योगः, तदा ध्वनिशब्दो विप्रतिपत्तिग्रस्ततया निश्चयविषयाभावादतात्त्विकमर्थं विहाय शब्दस्वरूपमात्रमभिदध्यात् । सहृदयानुभवगोचरतयाऽर्थात्मनो ध्वनेरिह तात्त्विकत्वेन तु तन्नोचितमिति भिन्नक्रममितिशब्दमत्रोररीकृत्य काव्यात्मेत्यनेनैव तस्यान्वयेऽङ्गीकृते, ध्वन्यर्थविवक्षाऽक्षता भवतीति दिक् । ध्वन्यभाववादस्य सम्भावनामात्रविषयतया पारमार्थिकासत्त्वेन परोक्षत्वस्य द्योतको 'जगदुः' इति लिट्

समाम्नातः तस्य सहृदयजनमनःप्रकाशमानस्याप्यभाव· मन्ये जगदुः। तदभाववादिनां चामी विकल्पाः सम्भवन्ति।

तत्र केचिदाचक्षीरन्—शब्दार्थशरीरं तावत्काव्यम्। तत्र च शब्दगता· श्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव। अर्थगताश्चोपमादयः। वर्ण·

प्रायोजीति ध्येयम्॥

असम्भवतो वस्तुनः खण्डनमप्ययुक्तमिति ध्वन्यभाववादिपक्षत्रयस्य सम्भावनामुपदिशति—**तदभाववादिनामिति**। तच्छब्दः प्रक्रान्तं ध्वनिं परामृशति। **तस्य**–ध्वनेः, अभाववादिनाम्, अमी सम्प्रति निरूप्यमाणाः, विकल्पाः 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति पातञ्जलानुशिष्टा 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च' इति हर्युक्तेर्वैयाकरणाभिमतबौद्धपदार्थवच्छाब्दबोधविषया अपि 'आचक्षीरन्' 'ब्रूयुः' 'कथयेयुः' इतिलिङुपस्थापितसम्भावनामात्रजीवनतया वस्तुतोऽसन्तः पक्षाः सम्भवन्ति; न तु सन्त्येवेत्यर्थः।

तत्र प्रथमं पक्षमुपपादयति—**तत्र केचिदिति**। तत्र ध्वन्यभाववादिषु केचित् प्रथमे, इति–इत्थम्, आचक्षीरन्नित्यन्वयः। शब्दार्थौ—चमत्कारकः शब्दस्तदर्थश्च शरीरं यस्य तादृशं, तावन्निश्चितम्, काव्यम्। (नत्वत्र कस्यापि विमतिरिति तावच्छब्दः सूचयति)। तस्य काव्यस्य (अवयवे) शब्दे–गताः–स्थिताः, चारुत्वस्य विच्छित्तिविशेषस्य, हेतवः, अनुप्रासादयः शब्दालङ्काराः प्रसिद्धा एव। (न तु ध्वनिवदभिनवाः) च पुनः, अर्थगताः–वाच्यनिष्ठाः, उपमादयोऽर्थालङ्काराः, चारुत्वहेतवः प्रसिद्धा एवेति शेषः। च तथा वर्णानां सार्थकानामनर्थकानां चाक्षराणाम्, सङ्घटनानां सन्दृब्धशब्दानां च (माधुर्यादिव्यञ्जकतया) धर्माः (व्यङ्ग्यव्यञ्जकभावेन) वृत्तिमन्तः माधुर्यौजःप्रसादाः—'राजा भोजो गुणानाह विंशतिं चतुरश्च यान्। वामनो दश तान् वाग्मी, भट्टस्त्रीनेव भामहः' इतिसरस्वतीतीर्थदर्शितबाहुविध्या ये गुणाः (चारुत्वहेतवः) सन्ति, तेऽपि प्रतीयन्ते, सर्वैरितिशेषः। (न तु ध्वनिवदप्रसिद्धा इति भावः) ताभ्यः–सङ्घटनाभ्यः, अनतिरिक्ताऽभिन्ना, 'वृत्तिर्व्यापारो यासां ताः। यद्वा–'तदनतिरिक्ताः, इतिपाठे वृत्तिविशेषणत्वे च, तदेकरूपाः, उपनागरिका–पुरुषा–ग्राम्याख्यास्तिस्रो वृत्तयोऽपि (चारुत्वहेतवः) याः कैश्चिद् भट्टोद्भटप्रभृतिभिः प्रकाशिताः, ता अपि श्रवणगोचरं गताः श्रुताः। च पुनः, वैद-

संघटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रत[illegible]द्नतिरिक्तवृत्तयोवृत्त-योऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः, ता अपि ग[illegible] श्रवणगोच-रम्। रीतयश्च वैदर्भीप्रभृतयः। तद्व्यतिरिक्तः कोऽयं ध्वनि[illegible]।

अन्ये ब्रूयुः—नास्त्येव ध्वनिः। प्रसिद्धप्रस्थानव्यति[illegible]: काव्य-प्रकारस्य काव्यत्वहानेः। सहृदयहृदयाह्लादिशब्दार्थमय[illegible] काव्यलक्ष-

र्भीगौडीपाञ्चाल्यस्तिस्रो वामनोक्ताः, 'वैदर्भी गौडी पाञ्चाली लाटी' इति [illegible] श्वनाथकथिताः, 'वैदर्भी चाथ पाञ्चाली, गौडी चावन्तिका तथा। [illegible] मा[illegible] चेति, षोढारीतिर्निगद्यते' इति भोजराजोपदिष्टाः षड्वा तत्स्थानीया [illegible]योऽपि (चा-रुत्वहेतवः) श्रुता एवेति शेषः। तेभ्योऽलङ्कारादिभ्यो व्यतिरिक्तो भिन्नः, अयं (नूतनः) केनाऽप्युच्यमानः, ध्वनिः, को नाम ? न कोऽपीत्यर्थः। 'तद्व्यतिरिक्तः' इत्यत्र तच्छब्देन गुणमात्रपरामर्शप्रकाशकः कस्यचन पक्षस्तु चिन्तनीयः, अलङ्कार-वृत्तिरीतीनामसङ्ग्रहेण प्रक्रमविरोधापत्तेः। वृत्तिरीत्योर्गुणतादात्म्यस्य कथञ्चन स्थाप-नायामप्यलङ्कारासङ्ग्रहेण तद्दोषतादवस्थ्यात्। यदि नामायं ध्वनिर्वास्तविकोऽभवि-ष्यत्, तदाऽवश्यं बुधैरलङ्कारादिवत् पर्यचेष्यत। अतः प्रसिद्ध्यभावान्नास्त्येव ध्वनिः। नहि प्रेक्षावन्तो व्यक्तिविशेषोक्तिश्रद्धाजाड्येनालीकं वस्तु मन्यन्त इति प्रथमस्य ध्वन्यभाववादस्य भावः॥

अभाववादिनां द्वितीयं पक्षमुपन्यस्यति—**अन्ये ब्रूयुरिति**। प्रसिद्धात् प्रति-ष्ठन्ते परम्परया गच्छन्त्यनेनेति प्रस्थानं प्राचीनपद्धतिस्तस्मात्, व्यतिरेकिणो भिन्नस्य काव्यप्रकारस्य ध्वन्यात्मकाव्यभेदस्य काव्यत्वहानेः काव्यत्वाभावाद्ध्वनेर-भाव इत्यर्थः। यदि ध्वनिः स्वीक्रियेत, तर्हि प्राचीनाचार्यैरननुशिष्टचरं काव्यत्वम-प्यनायत्या तत्राङ्गीकरणीयं स्यात्। अनुपदवक्ष्यमाणहेतोर्नेष्टं तु तत्। तथासति 'छिन्ने मूले, नैव शाखा न पत्रम्' इति न्यायेन ध्वनिरेव नोररीक्रियतामित्येतत् प्रघ-ट्टकस्य हृदयम्॥

ननु सति लक्षणसमन्वये प्रयत्नशतेनापि तत्त्वं लक्ष्यादपनेतुमशक्यं भवतीत्या-क्षेपमपक्षेप्तुं काव्यस्य लक्षणमुक्त्वा ध्वन्यात्मनि लक्ष्ये तस्य समन्वयमपि ब्रवीति—**सहृदयेति**। 'चिन्मयं ब्रह्म' इत्यादौ सामानाधिकरण्यरक्षार्थे "तत्प्रकृतवचने मयट्" इति सूत्रे तदिति वाक्यभेदस्य नागेशेनोक्तत्वात्तद्योगेनेहापि स्वार्थिको मयट्। सहृ-

णाम् । न चोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सम्भवति। न च तत्समयान्तःपातिनः सहृदयान्कांश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्तितोऽपि सकलविद्वन्मनोग्राहितामवलम्बते ।

पुनरपरे तस्याभावमन्यथा कथयेयुः—न संभवत्येव ध्वनिर्नामापूर्वः कश्चित् । कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावा-

---

दयहृदयाह्लादिनौ शब्दार्थावेव तन्मयं काव्यम् , तस्य भावस्तत्त्वं काव्यलक्षणं तद्वृत्तिस्तदितरव्यावर्तको धर्म्मः । उक्तप्रस्थानातिरेकिणो मार्गस्य प्रतिपादितालङ्कारगुणादिपरिष्कृतप्रकारभिन्नस्य भवदभिमतध्वन्यात्मकाव्यभेदस्य तत् काव्यलक्षणं यतो न सम्भवति नैव समन्वेति, सहृदयहृदयाह्लादकशब्दार्थाभावात् । तस्मात् काव्यत्वं तत्र नास्तीत्यर्थः । परिगणितेभ्यो गुणादिमत्प्रकारेभ्योऽन्यत्र सहृदयाह्लादकत्वं नानुभविकमिति न काव्यत्वं ध्वनावित्याकूतम् ॥

ननु ध्वनौ सहृदया ्लादजनकत्वाभाव एवासिद्धः, कियतांचित् सहृदयानां ध्वनेरप्याह्लादजननादित्यत आह—**नचेत्यादिना ।** तस्य ध्वनेः यः समयः सिद्धान्तः, तदन्तःपातिनस्तन्मध्यगामिनः—तत्स्वीकारिण इति यावत् , कांश्चिद् अयोग्यतयाऽज्ञातान् परिमितान् वा सहृदयान् परिकल्प्य वस्तुसद्वैदग्ध्यविरहेऽपि स्वपक्षपोषाय सचेतसः स्वीकृत्य भवद्भिः कथमपि प्रवर्तितयेति शेषः, तस्य ध्वनेः तेषां सहृदयानां वा प्रसिद्ध्या हेतुभूतया, ध्वनौ विलक्षणशब्दार्थयोः काव्यस्य व्यपदेशो-व्यवहारः, प्रवर्तितोऽपि (भवद्भिर्बलात्) प्रचारितोऽपि, सकलविदुषां मनोग्राहितां—हृदयङ्गमत्वं नावलम्बते—नाश्रयतीत्यर्थः । मुष्टिमेयैर्भवत्कल्पितसहृदयैः काव्यात्मतया स्वीकृतोऽपि ध्वनिः, सर्वविद्वदनुभवसिद्धो न भवतीत्यभिप्रायः । 'परिकल्पिततत्प्रसिद्ध्या' इति पाठे तु 'सहृदयान् इत्यत्र द्वितीया नोपपद्यते । इत्थं च—'भवद्भिः प्रवर्तितया' इत्यध्याहार आवश्यकः, 'परिकल्प्य' इति क्त्वाप्रत्ययोत्पत्त्यनुरोधात् । चमत्काराजनकत्वाद्ध्वनिर्नास्तीति द्वितीयाभाववादस्य सारम् ॥

ननु प्रथमेनाभाववादिना, ध्वनेः—प्रसिद्धेः, द्वितीयेन तस्य चारुत्वहेतुतायाश्च निरासे कृतेऽपि, क्वचिदेकत्रापि प्रसिद्धस्य तस्य सर्वथाऽपलापः कर्तुमशक्य एवेति शङ्कामपाकर्तुं तृतीयं पक्षमुपदिशति—**पुनरपर इत्यादिना ।** अन्यथाऽपूर्वत्वाभावरूपेण प्रकारान्तरेण । अपूर्वः पूर्वोक्तालङ्कारादिभ्यो विलक्षणः—कश्चिदनिश्चितरूपः

त् । तेषामन्यतमस्यैव वाऽपूर्वसमाख्यामा [illegible] किञ्चन कथनं स्यात् ।

किं च वाग्विकल्पानामानन्त्यात्संभव[illegible] **वा** कस्मिंश्चित्काव्य**लक्षणविधायिभिः प्रसिद्धैरदर्शिते प्रकारलेशे** ध्वनिर्ध्वनि[illegible]**नदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते** । तत्र हेतुं न विद्मः । [illegible]शो हि **महात्मभिरन्यैरलंकारप्रकाराः प्रकाशिताः** प्रकाश्यन्ते च । [illegible] च तेषामेषा

ध्वनिः नाम निश्चितम् न सम्भवति । कामनीयकं विच्छित्तिविशेषम्, [illegible]नस्यानतिक्रामतः, तस्य ध्वनेः, उक्तेष्वेवालङ्कारादिषु अन्तर्भावादित्य[illegible] अलङ्काराद्यपेक्षया चमत्कारविशेषाकरणात् ध्वनिस्तेष्वेवान्तर्भवति, ननु [illegible] विलक्षण इति ध्वनेरपूर्वत्वनिरसनमुखेन स्वरूपस्यापि निरसने तात्पर्यमिह पर्यवसातव्यम् ॥

ननु ध्वनेस्तेष्वेवान्तर्भावे प्रसिद्धाया ध्वनिसञ्ज्ञायाः का गतिरित्यत आह–**तेषामन्यतमस्यैवेत्यादिना** । वा—अथवा, (ध्वनिसञ्ज्ञाप्रसिद्ध्यनुरोधेन) तेषामलङ्कारादीनाम्, अन्यतमस्य बहूनां मध्य एकस्य कस्यचन, एव नत्वस्य नवीनस्य, अपूर्वसमाख्यामात्रकरणे ध्वनिरिति नूतननाममात्रविधाने (कृते सति) यत्किञ्चनकथनम् अविशिष्टमुपादानं स्यादित्यर्थः । ध्वनिसञ्ज्ञां प्रति श्रद्धाजाड्ये तु, अलङ्कारादीनामेवैकस्य कस्यचन यथारुचि क्रियतां ध्वनिसञ्ज्ञा, नतु तावताऽपूर्वध्वनिसिद्धिरिति तात्पर्यम् । इह 'पूर्वसमाख्यामात्रप्रकरणे' इत्यपपाठस्तु लोचनपर्यालोचनविधुरैः कल्पितः ।

ध्वनिमभ्युपगम्य निरस्यति—**किञ्चेत्यादिना** । किञ्च पुनः, प्रसिद्धैरुद्भटादिभिः काव्यलक्षणविधायिभिः, अदर्शितेऽनुपदिष्टे, कस्मिंश्चिदगण्ये ध्वनिलक्षणे, प्रकारलेशे—सूक्ष्मप्रभेदे, वक्तीति वागितिव्युत्पत्त्या वाचः शब्दस्य, उच्यत इति व्युत्पत्त्या वाचोऽर्थस्य च विकल्पानामतात्त्विकप्रकाराणाम्, आनन्त्यात्, सम्भवत्यपि—सम्भाविन्यपि, अलीकया—वितथया, सहृदयत्वस्य स्वधर्मिकवैदग्ध्यस्य, सम्भावनया, मुकुलितानि—कृतकसहृदयत्वप्रदर्शनाय कुड्मलवत् सङ्कोचितानि, लोचनानि यैः, तादृशैः, ध्वनिर्ध्वनिरिति ब्रुवाणैर्ध्वनिवादिभिः, यत्, नृत्यते, तत्र नृत्ये, हेतुं कारणविशेषं, न पश्यामः । हि यतः, अन्यैर्महात्मभिर्भामहदण्डिप्रमुखैः, सहस्रशोऽलङ्काराणां प्रकाराः पूर्वं प्रकाशिताः, साम्प्रतं चेदानीन्तनैः प्रकाश्यन्ते । तेषामलङ्कारप्रकाराणाम्, एषा दशा नितरामप्रसिद्धिः, न श्रूयते । तस्मादत्यप्रसिद्धत्वाद्धेतोः, ध्वनिः प्रवादमात्रं केवलमसारं वचनमेव । नत्वस्य ध्वनेः किञ्चिदपि,

दशा श्रूयते। तस्मात्प्रवादमात्रं ध्वनिः। न त्वस्य क्षोदक्षमं तत्त्वं किञ्चिदपि प्रकाशयितुं शक्यम्।

तथा चान्येन कृत एवात्र श्लोकः—

यस्मिन्नस्ति न वस्तु किञ्चन मनःप्रह्लादि सालंकृति,
व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत्।
काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो,
नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः॥

क्षोदक्षमं चूर्णनयोग्यं सूक्ष्मविचारार्हमिति यावत्। तत्त्वं सारं, प्रकाशयितुं शक्यमित्यर्थः। ध्वनिर्ध्वनिरितिद्विरुक्तिः सम्भ्रममादरंच सूचयति। आस्तां वाऽनन्ते जगति कुत्रचिदेकत्र ध्वनिचर्चा, नैतावता 'नैकमुदाहरणं योगारम्भं प्रयुञ्जीत' इति शाब्दिकसिद्धान्तदृष्टान्तेन ध्वनेः सर्वानुभवगोचरत्वम्। तदभावे तु नाविसंवादिनी तस्यसिद्धिरित्यभिमतम्॥

ध्वन्यभाववादं द्रढयितुमन्यसम्मतिं दर्शयति—**तथाचेत्यादिना। श्लोकः**-तथाच तदर्थप्रत्यायकश्च श्लोकः, अन्येनोदासीनेन ग्रन्थकर्तृसमसामयिकेन मनोरथ-(१)कविनेतिशेषः, कृत एवेत्यर्थः॥

यस्मिन्निति। यस्मिन् काव्ये, सालङ्कृत्यलङ्कारसहितम्, अत एव मनसः प्रह्लादि-प्रमोदकम् (अर्थालङ्कारवत्त्वात्) किञ्चन-किमपि, वस्तुतत्त्वमर्थ इति यावत् नास्ति। च तथा व्युत्पन्नैश्शब्दालङ्कारशालिभिः वचनैश्शब्दैः करणैर्यत्, न रचितम्। च पुनः वक्रोक्त्या कुन्तलाङ्गीकृतकाव्यजीवितेन, यत्, शून्यम्। तत्काव्यं ध्वनिना प्रधानीभूतव्यङ्ग्यार्थेन, समन्वितम्, इत्येवं, प्रीत्या-गतानुगतिकत्वप्रसृतप्रेम्णा, प्रशंसन्-स्तुवन्, जडोऽनुचितप्रशंसित्वेन मूर्खः, सुमतिनाऽयुक्तस्य ध्वनेरस्वीकारात् सुधिया ध्वनेः स्वरूपं पृष्टः सन्, किम्, अभिदधाति कथयति, उत्तरयतीति यावत्। तत्, नो विद्मो न जानीम इत्यर्थः। किमपि ध्वनेस्तत्त्वमुक्तिपर्यवसायि नास्तीति तात्पर्यम्। एवञ्च ध्वनेरपूर्वत्वं न वर्तत इति 'एषामन्यतमस्यैव समाख्या ध्वनिरित्यतः' इत्यग्रिमोक्तिमनुसरतस्तृतीयस्य ध्वन्यभाववादस्य सारम्॥

इत्थं ध्वन्यभाववादिमतत्रयं प्रदर्श्य, भाक्तत्ववादिपक्षप्रकाशनमुपक्षिपन् कारिका-

(१) कविरयं लोचनकर्तुरनुजान्मनोरथगुप्तादन्य एव कालभेदात्।

'भाक्तमाहुस्तमन्ये' ।

अन्ये तं ध्वनिसञ्ज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः ।

यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितः, तथाऽपि अमुख्यवृत्त्या काव्येषु व्यवहारं

ऽवयवं विवृणोति—**भाक्तमाहुरित्यादिना** । भक्तिर्नाम—"अभिधेयेन सारूप्या-त्सामीप्यात्समवायतः । वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता" ॥१॥ इत्यभिहि-तप्रकारोपचारविशेषात्मिका, सारूप्यादिना सम्बन्धेनाभिधेयसम्बन्धिनोऽर्थान्तरस्य बोधिका, लक्षणाऽपरपर्य्यायाऽभिधामूलिका, 'भज्यते सेव्यते पदार्थेनयोद्धोप्यत इतिभक्तिरितियोगवती समारोपिता गौणी शक्तिः, तस्या आगतस्तज्ज्ञानप्रयोज्यारो-पीयविषयताश्रयो भाक्तः, तं, ध्वनिसञ्ज्ञितं ध्वन्यत इति योगेन ध्वनिनामानं, काव्यात्मानं साररूपतया काव्यजीवनाधायकं व्यङ्ग्यम् । अन्ये-लक्षणापक्षपातिनो भ-ट्टोद्भटादयः, आहुरित्यर्थः । कर्मणो निपातेनेतिनाऽभिधानात् गुणवृत्तिपदान्न द्वितीया । गुणैरुक्तसामीप्यादिभिः, साम्यप्रयोजकैस्तैक्ष्ण्यादिभिर्वा वृत्तिः शब्दस्य कल्पितशक्तिर्य-त्रासौ गुणवृत्तिर्लक्ष्योऽर्थः । सामानाधिकरण्यनिर्देशानुरोधाद् व्यधिकरणबहुव्रीहिः । 'भक्त्या बिभर्त्ति नैकत्वं रूपभेदादयं ध्वनिः' इति ध्वनिभक्तितादात्म्यखण्डनस्याऽ-प्युपसंहरिष्यमाणतया गुणवृत्तिपदमिहोपचाररूपाप्रधानवृत्तिपरमप्यवगन्तव्यम् । तदा ऽऽक्षेपसामञ्जस्यं तु ध्वनिशब्दस्य भावसाधनताऽङ्गीकारेण कथञ्चन विधेयम् । अर्वाचीनैस्सादृश्यसम्बन्धेनार्थान्तरस्य बोधिका गौणी, सादृश्यभिन्नसम्बन्धेनार्थान्तरस्य बोधिका च शुद्धा लक्षणाऽऽङ्गीक्रियते । एभिस्तु तयोः स्थाने क्रमेण भक्त्यपरपर्याया गुणवृत्तिस्तथा लक्षणा व्यवह्रियत इति लक्षणाशब्देनैतन्मते, नोभयोर्ग्रहणमिति बोध्यम्। व्यङ्ग्यस्यापि गुणवृत्त्यैव बोध इत्यलं व्यञ्जनयेति भाक्तत्वपक्षाभिप्रायः ॥

ननु ध्वनेर्गुणवृत्तावन्तर्भावो गगनकुसुमप्राय एव, क्वाप्यनुपादानादित्यत आह—**यद्यपीत्यादिना** । ध्वनिशब्दस्य सङ्कीर्तनेन स्पष्टोपादानेन, गुणवृत्तिर्भक्तिः, अन्यो गुणालङ्कारादिर्वा कोऽपि प्रकारो यद्यपि काव्यलक्षणकारैर्भामहादिभिर्न प्रकाशितः, तथापि अमुख्यवृत्त्या भक्त्या, काव्येषु, व्यवहारं—वाक्यार्थबोधं, दर्शयता भट्टो-द्भटवामनादिना, ध्वनेर्मार्गः—सिद्धान्तः, मनाक् स्पृष्ट ईषदुपात्तः, इतीदम् , परिकल्प्यानुसन्धाय, 'भाक्तमाहुस्तमन्ये' इत्येवमुक्तं कारिकाकृतेत्यर्थः । तथाहि—

दर्शयता ध्वनिमार्गो मनाक्स्पृष्ट इति परिकल्प्यैवमुक्तम्—'भाक्तमाहुस्त-मन्ये' इति।

केचित्पुनर्लक्षणकरणशालीनबुद्धयो ध्वनेस्तत्त्वं गिरामगोचरं सहृदयहृदयसंवेद्यमेव समाख्यातवन्तः। तेनैवंविधासु विमतिषु स्थितासु सहृ-

---

"शब्दाश्छन्दोऽभिधानार्थां इतिहासाश्रयाः कथाः। लोको युक्तिः कलाश्चेति मन्तव्याः काव्ययैर्ह्यमी" ॥ इति भामहोक्तिं विवृण्वता, 'शब्दानामभिधानमभिधाव्यापारो गुणवृत्तिश्च' इत्युद्भटेन, 'सा सादृश्याल्लक्षणा वक्रोक्तिः' इत्यभिदधानेन वामनेन च ध्वनिभक्त्योस्तादात्म्यमिव दर्शितम्। यद्यपि नामग्राहं ध्वनिः केनापि गुणवृत्तावन्यत्र वा नान्तर्भावितः, किन्तूद्भटादिभिर्लक्षणामूलध्वनिस्थलेऽपि गुणवृत्तिमात्रमुक्तमित्य-नायत्या गुणवृत्तेस्तन्मते ध्वनिस्थानीयता कल्प्यते। वस्तुतस्तु तत्र गुणवृत्तिव्यञ्जनयोः सद्भावे क्वचिद्गुणवृत्त्युपादानं नेतरव्यावृत्तितात्पर्यकमिति तैरपि परिष्कृत एवायं पन्था इत्यवसेयम्। भाक्तत्वपक्षस्य बहुत्रोपलम्भात्सारगर्भप्रायत्वाच्च विद्यमानतां सूचयितुम् 'आहुः' इति लट्प्रयोगः ॥

"केचिदि"त्यादिना कारिकायामुक्तं ध्वनेरनिर्वचनीयतावादं दर्शयति—**केचित्पु-नरित्यादिना**। लक्षणकरणेऽव्याप्त्यतिव्याप्त्यसम्भवपरिहारेण ध्वनेर्लक्षणविधाने, शालीनाऽप्रौढा, बुद्धिर्येषां ते कोमलमतयः पुनः केचित्, ध्वनेरुत्तमकाव्यस्य व्यङ्ग्य-विशेषस्य वा, तत्त्वं व्यङ्ग्यं स्वरूपं वा, गिरामगोचरमनाख्येयं सहृदयहृदयैनैव संवेद्यं नत्वसहृदयबुद्धिगम्यं, समाख्यातवन्त ऊचिरे। इह ध्वनौ विप्रतिपन्नाः प्रथमे सतो-ऽपि तस्याभावं वदन्तो भ्रान्ताः, प्रधानस्यापि तस्य तत्त्वमपह्नुवाना मध्यमाः संश-यानाः, अनपह्नुवाना अपि तस्य स्वरूपमेव लक्षयितुमजानाना अन्तिमा अज्ञानिन इत्युत्तरोत्तरं स्फुरति वैचित्र्यमेषाम्। उपसंहरति—**तेनैवमित्यादिना**। हेतौ तृतीया, निर्धारणे सप्तमी। यत एवंविधा—एतादृश्य इहोक्ता अनुक्ताश्च विमतयो विरुद्धबुद्धयो विरुद्धयुक्तिमदुक्तय इति यावत्, स्थिताः, तेन हेतुना, तस्य ध्वनेः, स्वरूपं ब्रूमो निरूपयाम इत्यर्थः। ध्वनिस्वरूपानिरूपणे परैः पृष्टस्य सचेतसोऽपि कदाचिद् भ्रमः संशयो मौनं च सम्भवतीति तत्स्वरूपनिरूपणमावश्यकमित्याशयः। तेनेत्येकवचनेनैकैकविप्रतिपत्तिवाक्यार्थस्यापि निरूपणे हेतुत्वं सूच्यते ॥

तावताऽप्यपरितुष्यन् बुद्धिवैशद्याय शिष्याणामभिधेयप्रदर्शनाय च 'तेन ब्रूमः

द्यमनःप्रीतये तत्स्वरूपं ब्रूमः। तस्य हि [illegible] सकलसत्कविका-
व्योपनिषद्भूतमतिरमणीयमणीयसीभिश्चि[illegible]काव्यलक्षणविधायिनां बु-
द्धिभिरनुन्मीलितपूर्वम्, अथ च रामायणमहाभारत[illegible] लक्ष्ये
सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि [illegible]तिष्ठा-
मिति प्रकाश्यते।

तत्र ध्वनेरेव लक्षयितुमारब्धस्य भूमिकां रचयितुमिद[illegible]—

सहृदयमनःप्रीतये तत्स्वरूपम्' इत्यमुमंशं कारिकायाः पुनर्व्याचष्टे— [illegible] **ध्वनेरिति**। सकलानां सत्कवीनां काव्यस्योपनिषद्भूतमुपोर्ध्वं निषीद[illegible]नपदादि व्युत्पत्त्या सारत्वान्मूर्धन्यम्, 'उपनिषत्तु वेदान्ते रहस्यधर्मयोरपि' [illegible] हैमोक्ते रहस्यं वा अतिरमणीयं विच्छित्त्याधानाच्छब्दवाच्यलक्ष्यापेक्षया [illegible]नमम्, अणीयसीभिरतिसूक्ष्माभिः, चिरन्तनानां प्राचां, काव्यलक्षणविधायिनां बुद्धि-भिः, गुणादिवद्, अनुन्मीलितपूर्वं प्रागप्रकाशितम्। अथ च तथा, रामायण–महाभारतप्रभृतिनि तदादिनि, लक्ष्ये उदाहरणे, सर्वत्र, प्रसिद्धो व्यवहारो यस्य तादृशं, न तु खपुष्पवदप्रसिद्धम्, तस्य विप्रतिपत्तिपिशाचीग्रस्यमानस्य ध्वनेः, स्वरूपं लक्ष-यतां लक्षणपुरस्सरं निरूपयतां पश्यतां वा, सहृदयानां, मनसि, आनन्दो रसास्वा-दात्मा प्रमोदः स्वपक्षस्थापनोद्भूताहोपुरुषिकाप्रयुक्तः प्रसादो वा, प्रतिष्ठां शाश्वतीं स्थितिं, लभतामितिहेतोः, प्रकाश्यते ध्वनिस्वरूपं निरूप्यत' इत्यर्थः। इह सकल–सत्कविश-ब्दाभ्यां ध्वनेः प्रसिद्धता, तया 'सम्भवत्यपि वा कस्मिंश्चित्' इत्यादिनाऽऽपादितस्या-प्रसिद्धत्वस्य मृषात्वम्, उपनिषद्भूतपदेन 'अपूर्वसमाख्यामात्रकरणे' इत्यादिनोपक्षिप्त-स्यानपूर्वत्वस्य निरसनम्, अतिरमणीयत्वेन भाक्तत्वाभावः। 'अणीयसीभि' रित्या-दिना गुणाद्यनन्तर्भूतत्वद्वारा नवीनत्वम्, तेनास्य ग्रन्थस्य प्राचीनग्रन्थैरगतार्थता। रामायणादिलक्ष्यप्रसिद्धव्यवहारतया 'तत्समयान्तःपातिनः' इत्यादिदर्शितदूषणनिरा-करणम्, लक्षयतामित्यनेन तदनाख्येयत्वाभावः। आनन्दशब्देन निबन्धृनाम च प्रतीयते। समस्तेन ध्वनिस्वरूपमभिधेयम्, तज्ज्ञानेन सहृदयहृदयानन्दावाप्तिः प्रयो-जनम्, तल्लिप्सुरधिकारी, साध्यसाधनभावः सम्बन्धश्च सूच्यते॥

तत्र ध्वनेरिति। तत्रोक्तेऽनुबन्धचतुष्टये निर्णीते, ध्वनेरेव लक्षयितुमारब्धस्य लक्षणं कर्तुमुपक्रान्तस्य, निर्मातुमारब्धस्य प्रासादस्य भूमिमिव भूमिकामवतरणिकां, रचयितुं, ग्रन्थकृता, इदमधो निर्दिश्यमानमुच्यते, नत्वसम्बद्धं किमपीत्याशयः।

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥ २ ॥'

काव्यस्य हि ललितोचितसन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ ।

'तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः ।

ध्वनिस्वरूपनिरूपणे प्रतिज्ञाते, वाच्यादिभेदकथनस्यासङ्गतिं निराकर्तुं, सामान्यभेदप्रदर्शनद्वारा ध्वनिं स्थापयितुं वा वृत्तिकारः कारिकामवतारयति—**योऽर्थः सहृदयेत्यादिना** । सहृदयैः श्लाघ्योऽतिप्रशंसनीयः, काव्यस्य शब्दार्थोभयमयस्य, देहस्य जीव इव, आत्मा प्रधानमिति, योऽर्थो व्यवस्थितो निश्चितः स्थेमानं वा प्राप्तः, तस्य वाच्योऽभिधेयः प्रतीयमानो व्यङ्ग्यश्चेतिख्यातौ, उभौ भेदौ स्मृतौ कथितावित्यर्थः । तदेवाह वृत्तिकारः—**काव्यस्येत्यादिना** । ललितेन गुणालङ्कारादिसुन्दरेण, उचितेन रसव्यञ्जनानुकूलेन, सन्निवेशेन शब्दार्थविरचनेन चारुणो मनोरमस्य काव्यस्येत्यन्वयः । अवशिष्टं स्पष्टं विवृतमेव ।

इदमत्रावसेयम्—काव्येऽर्थप्रतीत्युपयोगिनः शब्दस्य वाच्यलक्ष्यार्थयोेव न प्राधान्यम्, शरीररूपत्वात् । किन्तु सहृदयश्लाघोत्कर्षमात्रत्वेन परापेक्षया चमत्कारातिशयाधानाच्चात्मभूतः प्रतीयमानो योऽर्थः, स एव काव्यत्वव्यपदेशहेतुरनुप्राणकः प्रधानम् । इतरथा सर्वेषामपि वाक्यानां काव्यत्वमापद्येत । ननु यदि 'काव्यस्यात्मा ध्वनिः' इति प्रागुक्तम्, 'काव्यस्यात्मा स एवार्थः' इत्यग्रेऽपि प्रतीयमानस्यैवार्थस्य काव्यात्मत्वं वक्ष्यते, तर्हि कथमिदानीं काव्यात्मभूतार्थप्रभेदतया वाच्यार्थोऽप्युच्यत इति चेत् ; मैवम् । वाच्यार्थस्येहाविविक्तार्थसामान्यप्रकारताकथनेऽपि काव्यात्मत्वेनोपादानाभावात् । यदाहुर्लोचनकाराः—'स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्याऽभियुज्यते । तथाहि—तुल्येऽर्थरूपत्वे किमिति कस्मैचित् सहृदयः श्लाघते, तद्भवितव्यं केनचिद्विशेषेण । यो विशेषः, स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते । वाच्यसङ्कलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्यते, चार्वाकैरिवात्मपृथग्भावः । अत एवार्थ इत्येकतयोपक्रम्य 'सहृदयश्लाघ्य इतिविशेषणद्वारा हेतुमभिधायापोद्धारणदशा तस्य द्वौ भेदावंशावित्युक्तम्, नतु द्वावप्यात्मानौ काव्यस्य' इति । न च ध्वनिनिरूपणप्रस्तावे वाच्यार्थनिरूपणम-

बहुधा व्याकृतः सोऽन्यैः काव्य ...येभिः ॥ ३ ॥

ततो नेह प्रतन्यते केवलमनूद्यते पुनर्यथोपयोगमिति ।

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीना... ।

यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गना... ॥४॥

प्रतीयमानं पुनरन्यदेव वाच्याद्वस्त्वस्ति वाणीषु महाकवीनाम् । यत्तत्सहृदयहृदयसुप्रसिद्धं प्रसिद्धेभ्योऽलंकृतेभ्यः प्रतीतेभ्यो वाऽवयवेभ्यो व्य-

---

सङ्गतमिति वाच्यम् । व्यङ्ग्यार्थबोधौपयिकत्वेन तन्निरूपणस्याऽप्यपेक्षितत्वात् । अत एवाग्रे वक्ष्यति 'तदुपायतया तद्वदर्थे वाच्ये तदादरः' इति ॥

वाच्यार्थविशेषनिरूपणाभावकारणमाह—**तत्र वाच्यइत्यादिना** । तत्र द्वयोरर्थस्यांशयोर्मध्ये, यो वाच्योऽर्थः प्रसिद्धो; न तु विप्रतिपत्तिग्रासनिगूढः, सोऽन्यैरुद्भटादिभिः, काव्यलक्ष्मविधायिभिः काव्यलक्षणकारैः, बहुधा वाच्यालङ्कारादिविपुलप्रकारैः, व्याकृतो व्युत्पादित इत्यर्थः । यतोऽलङ्कारादिप्रकारनिरूपणप्रसङ्गेन प्राचीनैर्वाच्योऽर्थः सुविवृत एव, तस्मात् तत्पिष्टपेषणमिव मन्यमानैरस्माभिर्नैवात्र स विस्तरेण वर्ण्यते, किन्तु क्वचित्क्वचिदुपकाराय केवलमुद्देश्यतयोपादीयत इत्याशयः ॥

तदेवाह वृत्तिकृत्—**ततो नेत्यादिना** । तच्छब्देन कारिकाऽर्थो हेतुत्वेन परामृश्यते पुनश्शब्देन च व्यतिरेकः सूच्यते । अन्यद्व्याख्यातमेव । अर्थान्तरापेक्षया व्यङ्ग्यस्य वैलक्षण्यं निदर्शनेन द्रढयति—**प्रतीयमानमिति** । अङ्गनासु प्रशस्तस्त्रीषु, प्रसिद्धेभ्यो ऽवयवेभ्यः करचरणादिभ्यो ऽतिरिक्तं भिन्नं, लावण्यम् "मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमितीरितम्" इतिशिङ्गभूपेन लक्षितं कान्तिपूरमिव, महाकवीनां वाणीषु कवितात्मकवाक्षु, प्रसिद्धेभ्यो ऽवयवेभ्यः शब्दार्थ—तदुभयालङ्कारादिभ्यो ऽतिरिक्तं, यत् त्रिशाखं, प्रतीयमानं वस्तु विभाति, तदन्यदेवास्ति, न तु शब्दार्थादिरूपं विद्यत इत्यर्थः; तदेव विवृणोति वृत्तिकृत्—**प्रतीयमानमिति** । सहृदयहृदयेषु सुप्रसिद्धं शाश्वतिकप्रतीतिगोचरीभूतम् । प्रतीतेभ्यः प्रख्यातेभ्यः, पृथक्त्वं—लावण्यस्यावयवेभ्यो ज्ञेयम्, निर्वर्ण्यमानं दृश्यमानम् । लोचनानां सुधावन्नयवानन्दकम् । तत्त्वं वस्तु, पदार्थ इति यावत् । सोऽर्थोव्यङ्ग्योऽर्थः । अवशिष्टं व्याख्यातमेव ।

तिरिक्तत्वेन प्रकाशते लावण्यमिवाङ्गनासु । यथा ह्यङ्गनासु लावण्यं पृथङ्निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव सहृदयलोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थः । स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलंकारा रसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते । सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम् । तथा ह्याद्यस्तावत्प्रभेदो वाच्याद्दूरं विभेदवान् । स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः ।

यथा—

'भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण ।

यत्तु व्यक्तिविवेककारः—'प्रतीयमानः पुनरन्य एव, सोऽर्थोऽस्ति वाणीषु महाकवीनाम्' इतीह प्रकरणानुरोधेन पाठभेदमकल्पयत् । तत्र विचार्यते—वस्तुत्वं यदि केवलान्वयि तर्हि प्रतीयमानेऽर्थे कथं न तिष्ठेत् । तत्सत्त्वस्वीकारे च काऽनुपपत्तिः इत्थं च वृथैव पाठविपर्यासकल्पनमिति विभावनीयम् । प्रतीयमानार्थस्य वाच्यात्पार्थक्यं प्रदर्श्य शाखात्रयमुद्दिशति—**सह्यर्थ इत्यादिना** । स व्यङ्ग्यो ऽर्थो हि अनेकैस्त्रिभिः । प्रभेदैः प्रकारैः भिन्नो विभक्तः अनुपदं दर्शयिष्यते । तथाहि—वाच्यस्य सामर्थ्येन व्यञ्जनाशक्त्या आक्षिप्तं प्रत्यायितं, वस्तुमात्रं केवलं वस्तु नत्वलङ्काररसादिरित्येकः प्रकारः । वाच्यसामर्थ्याक्षिप्ताअलङ्कारा द्वितीयः प्रकारः । तादृशा एव रसादयश्चेति तृतीयः प्रकारः । अनेकत्वमिह कपिञ्जलालम्भन्यायेन त्रित्वमात्रपर्यवसायि, प्रभेदप्रभेदापेक्षि वा ज्ञेयम् ॥ इत्थं व्यङ्ग्यस्य भेदानुद्दिश्य पुनर्वाच्याद्भेदं प्रतिजानीते—**सर्वेषु चेत्यादिना** । तेषु पूर्वोक्तेषु त्रिषु । तस्य—व्यङ्ग्यस्य । अन्यत्वं भेदः ॥

तत्राद्यं वस्तुनो व्यङ्ग्यस्य ततो भेदं वदति—**तथाहीति** । आद्यो वस्तुरूपः । दूरमत्यन्तम् । तत्र हेतुमाह—**स हि कदाचिदिति** । हि यतो वाच्ये विधिरूपे, स व्यङ्ग्योऽर्थः प्रतिषेधरूपः कदाचिद् भवति, ततस्तस्माद्भिन्न एव । नहि विधिनिषेधात्मनोरर्थयोरैक्यं सम्भवति । भेदसिद्धौ च व्यङ्ग्यप्राधान्यनिबन्धना ध्वनिसिद्धिरित्याकूतम् । तमुदाहरति—**यथेति** । कुसुमान्यवचेतुं स्वसङ्केतस्थलीभूतगोदावरीतीरस्थकुञ्जं प्रति प्रयान्तं कमप्यभिसारविघ्नं रहस्यभेदं वाऽऽशङ्कमाना भीषयितुं काचन पुंश्चली व्याहरति—**भमधम्मि अइति** । "भ्रमधार्म्मिकः ! विश्वस्तः, स शुनकोऽद्य मारितस्तेन ॥ गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन' ॥ इतिच्छाया । हे

गोलाणइकच्छकुडङ्गवासिणा द ॥”

क्वचिद्वाच्ये प्रतिषेधरूपे विधिरूपो यथा—

“अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलो
मा पहिअ रत्तिअन्धअ सेज्जाए महण मज्जहिसि ।

धार्म्मिक ! विश्वस्तः स्वैरं न तु पूर्ववत्सत्रासम्, भ्रम-कुसुमान्यवचेतुं सञ्चर । यतः स त्वत्त्रासहेतुः शुनकः श्वा, अद्य, तेन प्रसिद्धेन (केवलं त्वयैवाज्ञातेन) गोदानदी-च्छकुञ्जे गोदावरीसरित्तीरलतामण्डपे, वासिना सन्ततवासशीलेन, दृप्तो गर्वितः (ग्राममपि प्रविश्य हठाद्घातुकः) चासौ सिंहो दृप्तसिंहस्तेन मारित इत्यर्थः । जघन-विपुलाच्छन्दः । अत्र त्रासहेतोः शुनो विनाशोपन्यासेन भ्रमणविधिर्वाच्यः । शुनोऽपि भीरोः सिंहोपलम्भोक्त्या सुतरां भ्रमणनिषेधस्तु वस्तुरूपः, सङ्केतरहस्यभङ्गभीरुपुंश्च-लीवैशिष्ट्येन व्यङ्ग्य इतिवाच्यव्यङ्ग्ययोर्भेदः स्फुटः व्यङ्ग्यस्य चमत्कारितया च वस्तुध्वनिः । न च भ्रमेत्यस्य भ्रमणनिषेधे विपरीतलक्षणैवेति कुतो ध्वनेः सम्भव इति वाच्यम् । पदार्थोपस्थित्यनन्तरमेव बाधग्रहे जायमाने विपरीतलक्षणायाः प्रस-रस्य प्रदीपकर्तृचरणैर्निर्धारणात् । इह तु वाच्यार्थबोधोत्तरं वक्त्र्यादिवैशिष्ट्यपर्यालो-चनावसरे तद्ग्रह इति लक्षणायास्तदानीं भ्रष्टावसरतया व्यञ्जनयैव बोधः । तथाच—क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् । पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ॥' इत्यभियुक्तोक्तिसंवादेन व्यवस्थापितं दर्पणेऽपि । यदपि 'सद्मप्रान्ते श्वविनाश-हेतुकेन भ्रमणविधिना, नदीकूले सिंहोपलम्भात्तन्निषेधो ऽनुमीयत इति महिम्ना ऽव-लेपमहिम्ना प्रतिपादितम् । तच्चिन्तनीयम्, धार्म्मिकत्वेन स्पर्शदोषाच्छुनो भीरोरपि, वीरस्य, गुरुप्रभुनिदेश–प्रियानुराग–निधिलाभलोभादिपरवशस्य च सिंहाधिष्ठानस्था-नेऽपि गमनदर्शनाद्धेतोर्व्यभिचरितत्वात् ॥ दार्ढ्याय पुनरन्यथोदाहरति—**क्वचिद्वा-च्ये इति** । स्वगृहकृतवसतिं पथिकं प्रोषितपतिका पांसुला प्रतिपादयति—**अत्ता-एत्थेति** । 'श्वश्रूरत्र निमज्जति, अत्राहं दिवसकं प्रलोकय । मा पथिक ! रात्र्यन्धक ! शय्यायामावयोर्माङ्क्षीः ॥' इतिच्छाया । हे रात्र्यन्धक तैमिरिक ! पथिक पान्थ ! अत्रास्मिन् स्थाने, श्वश्रूर्मत्पतिजननी निमज्जति जराऽऽधिक्यैन निश्चेतनं शेते, अत्र तदितरस्थाने, अहं शये । (तत् त्वं) दिवसकं दिनं व्याप्य प्रलोकय सम्यक् पश्य । (अन्यथा) आवयोः श्वश्रूस्नुषयोः, शय्यायां, मा माङ्क्षीर्निस्सञ्ज्ञो मा पते-

क्वचिद्वाच्ये विधिरूपेऽनुभयरूपो यथा—

'वच्च मह व्विअ एक्केइ होन्तु णीसासरोइअव्वाइं ।
मा तुज्ज वि तीअ विणा दक्खिण्णहअस्स जाअन्तु ॥'

त्यर्थः । गाथाच्छन्दश्च । इह शय्यायामापतनस्य निषेधो वाच्यः । निमज्जनेन सञ्ज्ञाशून्यता, तया रहस्यभेदासम्भवः, तेन स्वैरविहारयोग्यता, तया च निवासावश्यम्भावौचिती, स्वस्य भिन्नस्थाने शयनेन विशेषविधेः शेषनिषेधपरत्वमितिन्यायेनाहमित्युक्तेस्तत्र स्वेतरजनाभावः, तेन प्राग्वत्, कुत्साऽर्थककप्रत्ययेन सम्भोगप्रतिबन्धिनि दिवसे ऽसूया, यद्वा ऽल्पार्थकेन तेन विलासौत्सुक्यम्, प्रलोकनाभ्यनुज्ञया तन्मुखेक्षणविनोदेन दिननिर्नीषा पथिकत्वेन कामुकत्वोपपत्तिः श्रान्तिश्च, ताभ्यां शय्याश्रयणसम्भवः, रात्र्यन्धकत्वेन निशि तल्पस्थे कदाचित् परेण दृष्टेऽपि तस्मिन् क्षत्यभावः, तल्पपतनसम्भवश्च, आवयोरित्यनेन केवलस्वसम्बन्धाभावः, तेन रहस्यगोपनम्, तावता, व्यभिचारिप्रतिपादकप्रतिपाद्यसम्बन्धेन च, मम शय्यायां निश्शङ्कं त्वया निशि शयनीयमिति कामुकपथिकविजिहीर्षाऽनुमानानन्तरमभ्यनुज्ञानरूपो विधिस्तु व्यङ्ग्य इति तयोरपि व्यक्तमेवान्यत्वम् ॥

पुनरन्यथोदाहरति—**क्वचिद्वाच्ये इति** । अनुभयरूपो विधिनिषेधविलक्षणस्तटस्थस्वरूपः । सपत्नीसमासक्तं तदन्तिके जिगमिषन्तमपि स्वानुरोधेन विलम्बमानं कान्तं काचन ब्रूते—**वच्चमहेति** । "व्रज ममैवैकस्या भवन्तु निश्श्वासरोदितव्यानि । मा तवापि तया विना दाक्षिण्यहतस्य जनिषत ।" इतिच्छाया । हे कान्त ! व्रज प्रेयसीगृहं गच्छ । एकस्या एकाकिन्याः ममैव त्वद्वियोगेन निश्श्वासा रोदितव्यानि च भवन्तु । दाक्षिण्येनानेककान्ताविषयकाविषमानुरागेण, हतस्य नष्टस्य (न तु प्रेमगुणोत्कर्षापकर्षविवेकिनः) तवापि, तया प्रेप्सितप्रेयस्या, विना तद्विरहेण, निश्श्वासरोदितव्यानि, मा जनिषत माभूवन्नित्यर्थः । इह 'दुःखी स्यामहमेक एव सकलो लोकः सुखं जीवतु' इति न्यायेन सर्वथा ऽनिष्टस्यापि प्रियगमनस्य विधिर्वाच्यः, त्वन्मनोनितरान्तस्यामासक्तमिति त्वदीयं शठत्वमवधारितं मया, अतो मदन्तिके स्थित्वा कृतं कृतकदाक्षिण्यप्रकटनेनेतिविधिनिषेधाभ्यामुदासीनमतदुभयात्मकं तर्जनं वस्तु तु व्यङ्ग्यमित्यतोऽपि तयोर्भेदः ।

पुनरन्यथोदाहरति—

क्वचिद्वाच्ये प्रतिषेधरूपेऽनुभयरूपो य

नायकः स्वापराधमवधाय सङ्केतस्थलान्निवर्तमानां दयितां [illegible] आधुनाऽनुनयति—

'दे आ पसिअ णिवत्तसु मुहससिजोह्लाविलुत्त[illegible]णिवहे ! ।
अहिसारिआणँ विग्घं करोसि अण्णाणँ वि हआसे ! ॥'

"प्रार्थये तावत् प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे !
अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे ! ॥" इतिच्छाया ।

हे मुखशशिज्योत्स्नाविलुप्ततमोनिवहे ! वदनेन्दुचन्द्रिकानिरस्त[illegible]मिरस्तोमे ! त्वामहं प्रार्थये, प्रसीद–प्रसन्ना भव, निवर्तस्व मा प्रयासीः। हे हताशे ! अन्यासामपि (स्वस्य त्वर्थतः प्राप्तम्) अभिसारिकाणां कान्तार्थं सङ्केतं गच्छन्तीनां, मार्गे मुखचन्द्रप्रकाशकरणाद् विघ्नं करोषीत्यर्थः । नायकस्य गृहमेवागच्छन्तीं प्रत्यप्रत्यभिज्ञानच्छलेन, तटस्थस्याभिसारिकासामान्यं प्रतिवेयमुक्तिरिति,' 'हताशे' इति सम्बुद्ध्यनौचितीं चाहुराचार्याः । अत्र प्रवृत्तिप्रतिषेधरूपं निवर्तनं वाच्यम् , विधिनिषेधाभ्यामुदासीनं दयितोपश्लोकनन्तु व्यङ्ग्यमिति भेदः सुवेदः ॥

पुनः प्रतिपाद्यभेदनिबन्धनं तयोर्भेदमुदाहरति—

क्वचिद्वाच्याद्विभिन्नविषयत्वेन व्यवस्थापितो यथा ।

वाच्ये यो विषयः प्रतिपाद्यो बोद्धव्य इति यावत्, तस्माद् विभिन्नो विषयो बोद्धव्यजनो यस्य तत्त्वेन व्यवस्थापितो वक्त्र्या नियमितः ।

अविनीतनायिकाया अधरे क्षतदर्शनेन नायकस्य तद्विषयकजारकर्तृकत्वसन्देहो मा भूदिति वाच्यकक्षायां ताम्प्रति, व्यङ्ग्यकक्षायान्तु तत्पतिं प्रति विदग्धसहचरी निगदति—

'कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरम् ।
सभमरपउमग्घाइणि ! वारिअवामे ! सहसु एह्लिम्' ॥

"कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्रायिणि ! वारितवामे ! सहस्वेदानीम् ॥" इतिच्छाया ।

प्रियायाः स्वपत्न्याः सव्रणमनात्मकृतक्षतभाजम् , अधरं दृष्ट्वा, कस्य वा पुंसो रोषो न भवति, (अपि तु सर्वस्य भवत्येव) भ्रमरेण सहितं सभ्रमरं यत्पद्मं तदाघ्रातुं

शीलमस्या इति तत्सम्बुद्धौ हे सभ्रमरपद्माघ्रायिणि ! तथा वारिता 'मा सभ्रमरं पद्मं घ्रासीः' इति मुहुर्निरुद्धाऽपि वामा विरुद्धाचरणात् प्रतिकूला या, तत्सम्बुद्धौ हे वारितवामे ! इदानीं पतिसंशयदशायां स्वानुचिताचरणोचितफलोपगमावसरे वा, सहस्व स्वदुरभिनिवेशसम्भवं पतिरोषजनियन्त्रणं मर्षयेत्यर्थः। इह मद्वारणमनादृत्य विहितस्याग्रहस्य फलं भुङ्क्ष्व, न मयाऽत्र किमपि प्रतिविधेय' मितितात्पर्यकस्य वाच्यस्य प्रतिपाद्या नायिका, मया वारिताऽपीयं मत्सखी, वामस्वभावतया सभ्रमरं पद्ममघ्रासीदिति भ्रमरेणास्या अधरो दष्टो, न तूपपतिनेतिव्यङ्ग्यस्य प्रतिपाद्यस्तु सन्निहितस्तत्पतिरिति विषयभेदादपि तयोर्भेदः स्ववधार्यः। अत्र सम्भविनामन्येषां क्रमशो भासमानानां प्रतिवेशि–सपत्नी–नायिका–तदुपपति–तटस्थादिविषयकाणां व्यङ्ग्यानां विस्तरभिया वर्णनं पृथङ् न कृतमितिलोचनेनालोचनीयम् ॥

'गतोऽस्तमर्कः' इत्यादौ वाच्यव्यङ्ग्ययोर्भेदकानां संख्यादीनामपि सङ्ग्रहार्थमाह—

अन्ये चैवं प्रकारा वाच्याद्विभेदिनः प्रतीयमानभेदा संभवन्ति। तेषां दिङ्मात्रमेतत्प्रदर्शितम्।

विभेदिनो भिन्नाः। प्रतीयमानभेदा व्यङ्ग्यप्रकाराः। दिङ्मात्रं नत्ववधारणम्। तेन सङ्ख्यादिभेदभिन्नानामपि सङ्ग्रहः। तदुक्तं दर्पणे—

"बोद्धृस्वरूपसङ्ख्यानिमित्तकार्यप्रतीतिकालानाम्।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः॥" इति॥

अलङ्कारात्मकव्यङ्ग्यद्वितीयभेदस्यापि वाच्याद्भेदमुपदिशति—

द्वितीयोऽपि प्रभेदो वाच्याद्विभिन्नः सप्रपञ्चमग्रे दर्शयिष्यते।

द्वितीयोऽलङ्काररूपः। सप्रपञ्चम्–सविस्तरम्। अग्रे 'क्रमेणोद्द्योतितः परः' इत्यादिना द्वितीयोद्द्योते। वस्तुध्वनिवदलङ्कारध्वनिर्विधिनिषेध–तदुदासीनरूपत्वेनैव नानुगतः, किन्तु बहुशाख इतीह विस्तरेण न वर्णित इतिभावः।

रसादिलक्षणं प्रधानतमं व्यङ्ग्यस्य तृतीयमपि भेदं वाच्याद्भिन्नं वदति—

तृतीयस्तु रसादिलक्षणः प्रभेदो वाच्यसामर्थ्याक्षिप्तः प्रकाशते। न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद्विभिन्न एव।

तृतीयो रस–भाव–तदाभास–तदुदय–शान्ति–सन्धि–शवलताध्वनिरूपो व्यङ्ग्यप्रकारः, वाच्यसामर्थ्याक्षिप्तोऽर्थनिष्ठव्यञ्जनाऽवगतः, प्रकाशते बोधविषयो भवति,

न तु साक्षाच्छब्दव्यापारस्याभिधाशक्तेः, विषयस्तत्प्रयोज्यशाब्दधीगोचरो भवति । तथा सति दोषान्तरैः सह स्वशब्दवाच्यत्वमप्यापद्येत ।

रसादीनां वाच्यत्वं खण्डयितुं विकल्पयति—

तथा हि वाच्यत्वं तस्य स्वशब्दनिवेदितत्वेन वा स्यात्, विभावादिप्रतिपादनमुखेन वा ।

तस्य रसादेः, स्वशब्दैरसादिशब्दैश्शृङ्गारादिशब्दैर्वा, निवेदितत्वेनाभिधाद्वारा बोधनेन, विभावादिवाचकशब्दैरभिधाद्वारा विभावादेः, 'यत्परः शब्दः स शब्दार्थः' इति न्यायेन तात्पर्यशक्त्या च रसादेरपि बोधनेन वाच्यत्वं सम्भवति ।

तत्राद्यपक्षे दोषमाह—

पूर्वस्मिन्पक्षे स्वशब्दनिवेदितत्वाभावे रसादीनामप्रतीतिप्रसङ्गः।

रसादि-शृङ्गारादिशब्दैरेव रसादीनामास्वाद इति पूर्वः पक्षः, तदभ्युपगमे तु, रसादिशब्दाभाववति—

भानुमिश्रस्य—

"कर्णकल्पितरसालमञ्जरी-पिञ्जरीकृतकपोलमण्डलः ।
निष्पतन्नयनवारिधारया, राधया मधुरिपुर्निरीक्ष्यते ॥"

इत्यादौ रसप्रतीतिः, ।

रूपगोस्वामिनः-

"अवतंसितमञ्जुमञ्जरे, तरुणीनेत्रचकोरपञ्जरे ।
नवकुङ्कुमपुञ्जपिञ्जरे, मतिरास्तां मम गोपकुञ्जरे ॥"

इत्यादौ भावप्रतीतिश्च सर्वसम्मताऽपि भवितुं न शक्नुयात् । रसालशब्दस्य व्यूढस्यैव चूते रूढिरिति तद्घटकरसशब्दो निरर्थकः । तामेवानुपपत्तिमुपपादयति—

न च सर्वत्र तेषां स्वशब्दनिवेदितत्वम् ।

सर्वत्र रसादिप्रत्यायके काव्ये तेषां रसादीनां च न तत्त्वम् । इत्थञ्च रसादिवाचकाभावेऽपि तत्र तत्र रसप्रतीतेर्जागरूकत्वाद्व्यक्तो व्यतिरेकाभावः ।

अथान्वयाभावमपि दर्शयति—

यत्राप्यस्ति तत् तत्रापि विशिष्टविभावादिप्रतिपादनमुखेनैवैषां प्रतीतिः ।

यत्रापि—

"मीनवती नयनाभ्यां चरणाभ्यामपि प्रफुल्लकमलवती ।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी ॥" इत्यादौ,

"त्रिभुवनकमनं तमालवर्णं, रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं, विजयसखे रतिरस्तु मेऽनवद्या ॥"

इत्यादौ च रसस्य भावस्य च तत् स्वशब्दनिवेदितत्वमस्ति, तत्रापि रसभावास्वादौ रसभाववाचकशब्दमहिम्ना नैव भवतः, किन्तु विशिष्टानां मिथस्संसर्गेण विलक्षणानां विभावादीनां, प्रतिपादनमुखेनैव, एषां रसादीनां प्रतीतिरास्वादो भवतीत्यर्थः ।

ननु तत्र रसादिशब्दादपि तत्प्रतीतिर्वारयितुमशक्येत्यत आह—

स्वशब्देन सा केवलमनूद्यते, न तु तत्कृता ।

सा रसादिप्रतीतिः । न तत्कृता न रसादिशब्दप्रयोज्या ।

अयम्भावः—रसादिव्यञ्जकाभ्यां रसादिशब्दघटिताभ्यामुक्तवाक्याभ्यां यो रसाद्यास्वादः, स च विभावादिप्रतीतिद्वारको व्यक्तिप्रयुक्त एव, न तु रसरतिशब्दप्रयुक्तः । तत्र रसरतिशब्दौ च शाब्दबोधमात्रं जनयन्तौ तमेवास्वादमनुवदतः, न तु स्वयं तमास्वादं जनयितुमीशाते, व्यभिचारेण तत्कारणताविघटनात् ।

तत्र व्यतिरेकिहेतुमाह—

विषयान्तरे तथा तस्या अदर्शनात् ।

विषयान्तरे विभावादिवाचकशब्दभाववति रसादिशब्दघटितेऽपि—

"सरसो विपरीतश्चेत् सरसत्वं न मुञ्चति ।
साक्षराविपरीताश्चेद् राक्षसा एव केवलम् ॥" इत्यादौ,

तथा।तादृशालौकिकचमत्कारप्राणत्वप्रकारेण, तस्या रसादिप्रतीतेः, अदर्शनादनुव्यवसायविरहादित्यर्थः । यदि रसादिशब्देभ्य एव रसाद्यास्वादो, न तु विभावादिवाचकशब्देभ्यः, तदा विभावादिप्रतिपादकशब्दाभावेऽपि पूर्वोक्तपद्ये स स्यात् ।

विच्छित्तिविधुरं शाब्दधीमात्रं तु तत्रापि भवत्येवेत्याचष्टे—तथेति ।

तथेति । प्रत्यक्षातिरिक्तं ज्ञानं न चमत्कारकारीति प्रदीपे स्फुटम् ।

तदाह—

नहि केवलशृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्त्वप्रतीतिरस्ति ।

आदिशब्देन वीरकरुणाद्भुतहास्यभयानकबीभत्सरौद्रशान्ता गृह्यन्ते । मनागीषत् । रसवत्त्वस्य रसस्य प्रतीतिरास्वादः, प्रकृत्यर्थे प्रकारीभूतस्य भावत्वात् ।

पर्यवसितमाह—

यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावादिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः। केवलाच्च स्वाभिधानादप्रतीतिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम्। नत्वभिधेयत्वं कथञ्चित्। इति तृतीयोऽपि प्रभेदो वाच्याद्भिन्न एवेति स्थितम्।

अभिधीयते ऽभिधया बोध्यतेऽनेनेत्यभिधानं वाचकशब्दः, तद्विनाऽपि, यस्माद्विभावादिप्रतीतिबलेन रसाद्यास्वादो भवति, तत्सत्त्वेऽपि विभावादिप्रतिपादनं विना च न भवति। तस्मात् कार्य्यसत्त्वे कारणसत्त्वं, कारणाभावे कार्य्याभावः इत्यन्वयव्यतिरेकयोः कारणता-नियामकयोरभावाद्रसादिशब्दानां नैव रसाद्यास्वादजनकत्वम्। इत्थं पूर्वो विकल्पः स्फुटं निरस्तः। द्वितीयस्तु विकल्पः सर्वथा खण्डनं नैवार्हति, विभावादिप्रतीतिद्वारकस्य रसास्वादस्य स्वीकृतत्वात्, किन्तु तत्र तेषां वाच्यत्वमात्रं खण्डनीयम्, विभावादिवाचकशब्देभ्योऽभिधया तदबोधात्। अत एव कण्ठतस्तदापत्तिर्नोक्ता। एवञ्च रसादिरूपव्यङ्ग्यतृतीयभेदस्यापि नैव वाच्यता, किन्तु वाच्यसामर्थ्याक्षिप्तत्वमेव। इति तस्मात्। सर्वे त्रयोऽपि, प्रतीयमानप्रकारा वाच्यातिरिक्ता एवेति स्थितं पर्यवसितमित्यर्थः।

रसादिप्रतीतेरलक्ष्यक्रमत्वं समासेनाह—

वाच्येन त्वस्य सहेव प्रतीतिरित्यग्रे दर्शयिष्यते।

अस्य रसादिरूपव्यङ्ग्यस्य, न तु वस्त्वलङ्काररूपयोः, प्रतीतिर्वाच्येन सह सममिव, न तु सहैव; नवाचिरकालोत्तरम्, भवतीत्यग्रे द्वितीयोद्द्योते-'रसभावतदाभासभावशान्त्यादिरक्रमः' इति कारिकया तृतीयोद्द्योते-प्रघट्टकेन च दर्शयिष्यत इत्यर्थः। कार्यकारणभावाद्वाच्यप्रतीतेः पश्चाद्भवन्त्या अपि रसादिप्रतीतेर्लाघवातिरेकेण क्रमः सम्यङ् न लक्ष्यत इत्यसंलक्ष्यक्रमत्वं रसादीनामिवशब्दो व्यनक्ति॥

रसादिरूपव्यङ्ग्य एव काव्ये जीवनाधायक इति प्राचीनेतिवृत्तोपन्यासेन द्रढयति—

'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ ५॥'

स व्यङ्ग्यो रसादिरेवार्थः काव्यस्य जीव इव शरीरस्य जीवनाधायकत्वादात्मा प्रधानमस्तीति शेषः। तथाच आदिकवेर्वाल्मीकेः क्रौञ्चद्वन्द्वस्य बकोटमिथुनस्य

वियोगादेकस्य व्याधेन हननाज्जायमानाद्विरहाद् उत्थः—उत्पन्नः, शोकः करुणरसस्थायिभावः, श्लोकत्वं छन्दोबन्धविशिष्टपद्यत्वम् ,आगत प्राप्त इत्यर्थः ।

इह त्रिविधानामपि व्यङ्ग्यानां प्रक्रमेऽपि, सन्निकर्षविशेषवशाद् वृत्तिग्रन्थबलाच्च तच्छब्देन रसादिरेव गृह्यते । तदेव विशदीकरोति—

विविधवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य स एवार्थः सारभूतः। तथाचादिकवेर्वाल्मीकेर्निहतसहचरविरहकातरक्रौञ्च्याक्रन्दजनितः शोक एव श्लोकतया परिणतः ।

विविधेन नानासंविधानेन, वाच्यवाचकयोरर्थशब्दयोः, रचनायाः प्रपञ्चेन विन्यासेन, चारुणो मनोरमस्य, काव्यस्य, स रसादिरेवार्थः सारभूतः प्रधानम् । तथाच—आदिकवेर्वाल्मीकेः, निहतस्य व्याधेन मारितस्य सहचरस्य विरहेण कान्तस्य वियोगेन, कातरायाः—विह्वलायाः क्रौञ्च्या आक्रन्दाज्जनितश्श्रवणागोचरीभूतः, शोकश्चित्तवृत्तिविशेष एव श्लोकतया पद्यरूपेण परिणतः पर्यवसन्न इत्यर्थः । 'सन्निहितसहचरीविरहकातरक्रौञ्चाक्रन्दजनितः' इतिपाठः , 'क्रौञ्चद्वन्द्ववियोगेन सहचरीहननोद्भूतेन साहचर्यध्वंसनेन' इत्यादिव्याख्यानञ्च न सम्यक्—

'तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥'

इति तदीयरामायणेन निषादकृतक्रौञ्चघातस्यैव सिद्धेः, तत्समशिरस्कतया मतिमारूढे श्रीरामचरितात्मकद्वितीयार्थेऽपि रावणवधस्यैव प्रसिद्धेश्च । अत एव 'कञ्चन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धम्' इति भोजमहाराजः प्रायुङ्क्त । एतेन 'अनुप्रेषितश्च स तया निषादनिहतसहचरीकं क्रौञ्चयुवानं करुणक्रेङ्कारया गिरा क्रन्दन्तमुदीक्ष्य शोकवान् श्लोकमुज्जगाद' इति राजशेखरोक्तिरप्यपहस्तितैव ।

ननु चित्तवृत्त्यात्मकशोकस्य शब्दार्थरूपश्लोकत्वपरिणामो न सम्भवीति चेत् ? सत्यम् । न हि परिणामोऽत्र साङ्ख्याभिमतं कारणसमसत्ताकं कार्यं मन्यते, किन्तु 'वृक्षः फलरूपेण परिणतः' इत्यादिवत् फलं कार्यमात्रम् । तथाच शोकास्वादानन्तरं मुनिहृदये सहसैव श्लोकस्याविर्भावेन 'तदुदितः स हि यो यदनन्तरः' इतिन्यायेन शोकस्य श्लोकः परिणामः सङ्गच्छते । एषा विचित्रपरिणतिरेव स्वशिष्यं भारद्वाजं प्रति 'अहो किमिदम्' इतिप्रश्नहेतोर्मुनिचित्रीयितत्वस्य मूलम् । 'न मुनेः शोक इति

मन्तव्यम्' इत्यादिलोचनन्तु चिन्त्यम्, क्रौञ्चस्य शोकालम्बनविभावतायास्तत्रैवोक्तत्वेन तस्य क्रौञ्चवृत्तित्वेन वक्तुमशक्यत्वात्। 'चर्वणा च सामाजिकानामिति तेष्वेव रसः' इत्यादिना प्रदीप आस्वादात्मनो रसादेरालम्बनेऽस्वीकारादनायत्या मुनौ तत्कल्पनात्। न च मुनेः शोकाङ्गीकारे दुःखितया तद्वृत्तिशोकस्य दुःखसंवलनात्काव्यात्मत्वं न स्यादिति वाच्यम्? मुनेर्दुःखित्वेऽप्यानन्दचिन्मयस्य रसादेरात्मत्वेऽबाधात्। लौकिकस्य शोकस्योद्वेजकत्वेऽप्यलौकिकभावताऽऽपत्तिदशायामानन्दरूपत्वं हि सर्वसम्मतम्। रस्यमानतास्थितावेव हि शोकस्य रसादिपदवाच्यत्वम्।

एवं तेन यदाह भट्टनायकः—

'शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः।
अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः।
द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीर्भवेत्॥' इति;

तदपास्तम्। व्यापारो हि यदि ध्वननात्मा रसनास्वभावः, तन्नापूर्वमुक्तम्। अथाभिधैव व्यापारः, तथाप्यस्याः प्राधान्यं नेत्यावेदितं प्राक्' इतिभट्टनायकोक्तिखण्डनमपि चिन्त्यमेव, रसनाख्यव्यापारस्य सर्वानभ्युपगमादज्ञातुश्च कृतेऽपूर्वत्वादित्यलं प्राचीनवचनपर्य्यालोचनयेति दिक्॥

आदिकवेः श्लोकं निर्दिशति—

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥' इति

हे निषाद! तु निश्चयेन मा नास्ति यस्य सोऽमो निश्श्रीकस्तत्सम्बोधने हे अम! (त्वम्) शाश्वतीरपरिमिताः, समा वर्षाणि यावत् प्रतिष्ठां स्थितिं मा गमो न प्राप्नुहि, द्रुतं म्रियस्वेति यावत्। यद् यस्मात् कामेन मोहितं मदनातुरम्, क्रौञ्चमिथुनाद्बकविशेषद्वन्द्वादेकं पुमांसम्, अवधीर्निहतवानिति शोकपक्षीयोऽर्थः।

अस्य श्लोकस्य रामायणाविर्भावमूलतया रामपक्षीयार्थस्तु—निषीदति तिष्ठत्यस्मिन्निति निषाद आश्रयः, माया लक्ष्म्या निषादो मानिषादस्तत्सम्बुद्धौ हे मानिषाद! श्रीनिवास! राम! त्वं शाश्वतीः समाः प्रतिष्ठाम् अगमः प्राप्तवानसि। यत् कुञ्चा कुटिलगतिकत्वाद्राक्षसी कैकसी तदपत्यं पुमान् क्रौञ्चो रावणस्तत्पत्नी च क्रौञ्ची मन्दोदरी, तयोर्मिथुनादेकं काममोहितं रावणमवधीरिति।

इह यच्छब्दस्योत्तरवाक्यघटकतया 'साधु चन्द्रमसि पुष्करैः कृतं, मीलितं यद-

भिरामताऽधिके' इत्यादिवत्रैव तच्छब्दोपादानोपेक्षा। पूर्वार्थे 'माङो योगेऽपि छान्दसत्वादड्ागमः' इति कस्यचन व्याख्यानन्तु 'अम' इति छेदेनैव निरवलम्बनीकृतम्॥

शोकस्यैतत्काव्यजीवितत्वबीजभूतं व्यङ्ग्यत्वमाह–

शोको हि करुणरसस्थायिभावः प्रतीयमानरूप एवेति प्रतिपादितम्।

करुणरसस्य—

'प्रकृष्यमाणो यो भावो रसतां प्रतिपद्यते।
स एव भावः स्थायीति भरतादिभिरुच्यते॥'

इत्युक्तलक्षणः स्थायी भावः, 'पुत्रादिमरणजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः' इतिजगन्नाथलक्षितः शोको व्यङ्ग्य एवात्र काव्ये जीवितम्, न तु वाच्य इत्युक्तमेवेत्यर्थः। वस्त्वलङ्कारध्वन्योः सतोरपि चमत्कारोत्कर्षनिबन्धनं रसादिध्वनेरेवात्मत्वम्। यत्र तु रसादिध्वन्यभावः, तत्र तयोरपि चमत्कारितया कुशकाशन्यायेन काव्यजीवितत्वम्। इहादिकविपद्येऽपि प्रथमार्थेन प्रधानतया प्रतीयमानः करुणस्थायी शोक एव जीवितम्॥ योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः' इत्यनेन सर्वेषामेव प्रतीयमानानामुपक्षिप्तं काव्यात्मत्वं रसादिमात्रस्य तत्त्वव्यवस्थापनेन विरुद्धमित्यत आह—

प्रतीयमानस्य चान्यप्रभेददर्शनेऽपि रसाभावमुखेनैवोपलक्षणम्; प्राधान्यात्।

यद्यपि व्यङ्ग्यस्य वस्त्वलङ्काररूपं भेदद्वयमपरमप्यस्ति, किन्तु विच्छित्तिविशेषाधानात् प्राधान्येन रसभावादीनां मुखेनैव द्वारेणैव, उपलक्षणं तयोरपि भासनमित्यर्थः। अभिप्रायस्तु प्रागेव स्फुटीकृतः॥

प्राचीनेतिवृत्तावलम्बेन व्यङ्ग्यस्य रसादेः काव्यात्मतां प्रतिपाद्य सम्प्रति तामेवान्यथाऽपि व्यवस्थापयति—

'सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥ ६॥'

स्वादु चर्वणीयं, तदर्थवस्तु रसादिव्यङ्ग्यार्थरूपतत्त्वं, निःष्यन्दमाना—

''वाग्धेनुर्दुग्ध एकं हि रसं यद्बालतृष्णया।
तेन नास्य समः स स्याद्दुह्यते योगिभिर्हि यः॥'

इतिभट्टनायकोक्तेर्दुग्धं कामधेनुरिव स्वयं प्रस्नुवाना, महतां प्रतिभातिशयेन गुरूणां कवीनाम्, सरस्वती भारती अलोकसामान्यम्—अलौकिकमसर्वसाधारणं दिव्यमिति यावत्, परिस्फुरन्तमतिभासमानम्, प्रतिभाविशेषं (तदीय) सरसकाव्यरचनानिदान—नवनवोन्मेषशालिप्रज्ञाऽतिरेकम्, अभिव्यनक्ति सूचयतीत्यर्थः ।

कविप्रतिभाया भासमानत्वेनानुभवविषयताऽप्यनुमन्यते न केवलमनुमितिगोचरतैव,

'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः'

इति तौतभट्टोक्तेः ॥

कारिकां विवृणोति वृत्तिकृत्—

भारती तद् वस्तुतत्त्वं निष्यन्दमाना महतां कवीनाम् अलोकसामान्यं प्रतिभाविशेषं परिस्फुरन्तमभिव्यनक्ति ।

व्याकृतोऽर्थः ॥

स प्रतिभाविशेष एव महाकवित्वस्य सम्पादक इति दर्शयति—

येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते ।

येन परिस्फुरत्प्रतिभाविशेषेण हेतुना, अतिविचित्रकविपरम्परावाहिनि नैकप्रकारकत्वेनाद्भुततरकविपरिपाटीधारणपटीयसि, अस्मिन् संसारे, कालिदासप्रभृतयस्तत्सदृशाः, द्वौ वा त्रयो वा द्वित्राः, पञ्च वा षड् वा पञ्चषा एव, न त्वन्येऽपि बहवः, महाकवय इति गण्यन्ते महाकवित्वेन सङ्ख्यायन्त इत्यर्थः ।

तादृशप्रतिभाया एव महाकवित्वख्यातिमूलत्वादनेकेषु जातेषु जायमानेषु कविषु, विरलानामेव महाकवित्वेन गणनेत्यभिप्रायः ॥

सम्प्रति वाच्यव्यङ्ग्ययोः प्रतीतिसामग्रीभेदनिबन्धनमपि भेदं दर्शयितुमुपक्षिपति—

इदं चापरं प्रतीयमानस्यार्थस्य सद्भावसाधनं प्रमाणम् ।

चकारः प्रागुक्तबोद्धृस्वरूपसङ्ख्यादीनि भेदकान्तराणि समुच्चितानि सूचयति । भेदसिद्धौ सुतरां सद्भावसिद्धिरिति पूर्वापरसन्दर्भसङ्गतिरनुसन्धेया ॥

तमेव भेदकमाह—

'शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥ ७ ॥'

स–व्यङ्ग्योऽर्थः, हि–यतः, शब्दार्थशासनमात्रेणैव केवलेन शब्दसाधकार्थव्युत्पादकव्याकरणकोशज्ञानेन, न वेद्यते नावगम्यते, किन्तु केवलं परं, काव्यार्थतत्त्वज्ञैः काव्यसारार्थभावकैः, वेद्यते, तस्माद्वाच्यतो ऽतिरिक्त एवेत्यर्थः ।

भावना वाच्यादिवैलक्षण्येन शश्वदनुसन्धानम् । वेद्यत इत्यविवक्षितप्रेरणार्थाद्वेत्तेर्णिजन्तात्कर्मणि तङ् । विद्यत इति पाठस्तूचितः । 'गतो ऽस्तमर्कः' इत्यादौ सूर्यकर्तृकास्तङ्गतिरूपवाच्यार्थस्यैव बोधे व्याकरणादिव्युत्पत्तिः कारणम्, सन्तापासद्भावादिनानाविधव्यङ्ग्यार्थावगमे तु काव्यार्थभावनापरिपक्वप्रज्ञैव कारणमिति प्रतीतिसामग्रीभेदहेतुकस्तयोर्भेद इति सारम् ॥

तदेवाह वृत्तिकारः—

शब्दार्थशासनज्ञानमात्रेऽपि परं न वेद्यते सोऽर्थो यस्मात्केवलं काव्यार्थतत्त्वज्ञैरेव ज्ञायते ।

व्याख्यातप्रायमेतत् ॥

तयोर्भेदकं तर्कमाख्याति—

यदि च वाच्यरूप एवासावर्थः स्यात्, तद्वाच्यवाचकस्वरूपपरिज्ञानादेव तत्प्रतीतिः स्यात् ।

वाच्यवाचकस्वरूपपरिज्ञानं पदप्रत्यक्षपूर्विका पदार्थोपस्थितिः ॥

तत्र सनिदर्शनं व्यतिरेकमाह—

अथ च वाच्यवाचकलक्षणमात्रकृतश्रमाणां काव्यतत्त्वार्थभावनाविमुखानां स्वरश्रुत्यादिलक्षणमिव प्रगीतानां गान्धर्वलक्षणविदामगोचर एवासावर्थः ।

यथा गान्धर्वलक्षणविदां सङ्गीतशास्त्रीयपदार्थसम्बन्धीनि लक्षणानि न तु लक्ष्याण्यपि जानतां पुंसाम्, प्रगीतानां प्रकृष्टगीतसम्बन्धी स्वरः—

"श्रुत्यनन्तरभावी यः स्निग्धो ऽनुरणनात्मकः ॥
स्वनो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते ॥"

इति सङ्गीतरत्नाकरोक्तलक्षणो निषादादिसप्तविधो ध्वनिविशेषः,

श्रुतिः—'प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः ।
सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणा ॥'

इति तदुक्तलक्षणः स्वराद्यावयवात्मकः स्वनः, तल्लक्षणं तद्रूपं वस्तु, अगोचरो

बुद्धेरविषयः, लक्ष्याज्ञानात्, तथा वाच्यवाचकलक्षणमात्रे केवलशब्दार्थज्ञापकशास्त्रे कृतश्रमाणां काव्यार्थभावनाविमुखानामसहृदयवैयाकरणानाम्, असौ व्यङ्ग्योऽर्थः, बुद्ध्यविषय इत्यर्थः।

यद्वा—यथा गान्धर्वलक्षणविदां स्वरश्रुत्यादिलक्षणं गोचरः, तथा नायं शब्दार्थमात्रविदां गोचर इति व्यतिरेकिदृष्टान्तो ऽयं द्रष्टव्यः। किन्त्वस्मिन् पक्षे नञः समासो दुर्घटः। 'अप्रगीतानाम्' इतित्वपपाठः, सन्दर्भाशुद्धेः।

इदानीं प्रतीयमानार्थस्य प्राधान्यं बोधयितुमुपक्रमते—

एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्य सद्भावं प्रतिपाद्य प्राधान्यं तस्यैवेति प्रतिपादयति-

'सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥ ८॥'

स व्यङ्ग्योऽर्थः, च पुनः, कश्चनः न तु सर्वः, तस्य प्रविरलत्वात्, तस्य व्यङ्ग्यस्य व्यक्तिसामर्थ्येन व्यञ्जनशक्त्या योगः सम्बन्धोऽस्त्यस्येति तादृशः शब्दः, तौ शब्दार्थौ महाकवेः यत्नतः प्रत्यभिज्ञेयावित्यर्थः। महाकवेरिति कर्तरि षष्ठी। प्रत्यभिज्ञानमिह ज्ञातस्यापि शश्वदनुसन्धानरूपं निरूपणम्, न तु तदेवेदमिति प्रतीतिमात्रम्॥

कारिकां विवृणोति वृत्तिकृत्—

स व्यङ्ग्योऽर्थस्तत्प्रकाशनसामर्थ्ययोगी शब्दश्च कश्चन, न सर्वः। तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ व्यङ्ग्यव्यञ्जकाभ्यामेव हि सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनाम्, न वाच्यवाचकरचनामात्रेण।

व्यक्तिर्व्यञ्जनम्। नहि सर्व एव शब्दोऽर्थो वा व्यञ्जकः, किन्तु विरल एव। न चा व्यङ्ग्यव्यञ्जकप्रयोगमन्तरेण महाकवित्वसम्पत्तिः, तस्मान्महाकवित्वमाशासानस्य तादृशशब्दार्थभावनाविशेष एवावश्यक इत्याशयः॥

ध्वनिमार्गे वाच्यवाचकयोर्बहिरङ्गत्वेऽपि प्रथमोपादानप्रयोजनमुपपादयति—

इदानीं व्यङ्ग्यव्यञ्जकयोः प्राधान्येऽपि यद्वाच्यवाचकावेव प्रथममुपाददते कवयस्तदपि युक्तमेवेत्याह-

'आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः ।
तदुपायतया, तद्वदर्थे वाच्ये तदादृतः ॥ ९ ॥'

आलोकार्थी प्रकाशं प्रकाशनं वाऽभिलषन्, जनो यथा तदुपायतया प्रकाशकारणत्वेन दीपस्य शिखायां कीलकलिकायां यत्नवान् भवति, तद्वत् तथा तदादृतो व्यङ्ग्यार्थप्रतीतिविषयकादरयुक्तो व्यङ्ग्यं बुभुत्सुरिति यावत्, तज्जनकतया वाच्येऽर्थे तदवगमे यत्नवान् भवतीत्यर्थः । कार्यस्य प्राधान्येऽपि कारणोपादानं प्रागेव युक्तम्, नच तावता तस्य प्राधान्ये काचन क्षतिरिति भावः ॥

तदाह वृत्तिकारः—

यथा ह्यालोकार्थी सन्नपि दीपशिखायां यत्नवाञ्जनो भवति तदुपायतया । नहि दीपशिखामन्तरेणालोकः संभवति । तद्वद्व्यङ्ग्यमथ प्रत्यादृतो जनो वाच्येऽर्थे यत्नवान्भवति ।

वाच्यव्यङ्ग्यप्रतीत्योः कार्यकारणभावस्त्वग्रेऽपि व्यवस्थापयिष्यते साम्प्रतन्तु प्रासङ्गिकः सनिदर्शनः समुद्देशः ॥

प्रकृतोपयोगं दर्शयति—

अनेन प्रतिपादकस्य कवेर्व्यङ्ग्यमर्थं प्रति व्यापारो दर्शितः ।

व्यङ्ग्यार्थबुबोधयिषयैव कविः शब्दं प्रयुङ्क्त इति तस्यैव परमोद्देश्यतया प्राधान्यमित्याशयः ॥

न केवलं वक्तुरेव सोऽर्थ उद्देश्यभूतः, किन्तु बोद्धुरपीत्याह—

प्रतिपाद्यस्यापि तं दर्शयितुमाह ।

तच्छब्दो व्यङ्ग्योद्देश्यकव्यापारं परामृशति ।

सदृष्टान्तप्रदर्शनं कार्यकारणभावमाह—

'यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते ।
वाच्यार्थपूर्विका तद्वत्प्रतिपत् तस्य वस्तुनः ॥ १० ॥'

पदार्थद्वारेण पदार्थप्रतीतिपुरस्सरं यथा वाक्यार्थः सम्प्रतीयते, तद्वत् तथा तस्य वस्तुनो व्यङ्ग्यार्थस्य प्रतिपज्ज्ञानम्, वाच्यार्थपूर्विका वाच्यार्थप्रतीतिपुरस्सरा, एवेत्यर्थः । प्रतिपदिति प्रतिपद्यतेर्ज्ञानार्थाद्भावे क्विप् । वाक्यार्थबोधे पदार्थोपस्थितिरिव, व्यङ्ग्यार्थबोधे वाच्यप्रतीतिः कारणमिति सारांशः ।

नन्वेवं वर्णानां व्यञ्जकत्वं व्याहन्येत वाच्यार्थविरहादिति चेत् ? उच्यते—यत्र वाच्यव्यङ्ग्ययोरुभयोः प्रतीतिः, तत्रैव व्यङ्ग्यप्रतीतेर्वाच्यप्रतीतिपूर्वकत्वं कल्प्यते, इतरथा गुरुनये वाक्यार्थ एव शक्तिस्वीकारे दृष्टान्तासिद्धिरापद्येत। यत्र तु वाच्यबोधमनपेक्ष्यैव व्यङ्ग्यबोध आनुभविकः, तत्रानायत्या शब्दादिप्रत्यक्षपूर्वकत्वमेव तस्य स्वीक्रियते । इह दृष्टान्तदार्ष्टान्तिकयोः साम्यं त्वांशिकमेव सामान्यकारणत्वेनेतिविशेषतस्तृतीयोद्द्योते स्फुटीकृतं भविष्यति ॥

तदेवाह—

यथा हि पदार्थद्वारेण वाक्यार्थावगमः, तथा वाच्यार्थप्रतीतिपूर्विका व्यङ्ग्यस्यार्थस्य प्रतिपत्तिः ।

एतावता वाच्यव्यङ्ग्यप्रतीत्योः क्रमोऽप्युद्दिष्टः ।

ननु वाच्यस्य प्रथमप्रतीतत्वान्न कुतः प्राधान्यमित्यत आह—

इदानीं वाच्यार्थप्रतीतिपूर्वकत्वेऽपि तत्प्रतीतेर्व्यङ्ग्यस्यार्थस्य प्राधान्यं यथा न व्यालुप्यते तथा दर्शयति-

'स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन् ।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते ॥११॥

सन्दानितकम् ॥

तामेतां व्याचष्टे वृत्तिकारः—

यथा स्वसामर्थ्यवशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पत्तौ न विभाव्यते विभक्ततया ।

स्वस्योपस्थितपदार्थस्य, सामर्थ्यमाकाङ्क्षा–योग्यताऽऽसत्ति–तात्पर्य्यज्ञानादिसहकारिकारणसमवधानम्, तद्वशेन तदधीनतया यथा व्यापारस्य वाक्यार्थबोधानुकूलक्रियायाः, निष्पत्तौ पार्यन्तिकफलोत्पादनेन कृतकृत्यतायाम्, पदार्थो न विभाव्यते विभक्ततया नावगम्यते, तद्वदित्यग्रेसरकारिकया सह सम्बन्धः । एवं चेहाविज्ञायमानक्रमसत्त्वं सूचितम् । एतेन स्फोटात्मकतया क्रमाभावपरत्वमस्य केनचिदुक्तं प्रत्युक्तम् ॥

दृष्टान्तमुक्त्वा दार्ष्टान्तिकं ब्रवीति—

'तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते ॥ १२ ॥'

तद्वत्, वाच्यार्थाद् विमुखश्चमत्कारविरहादपरितुष्यन्, आत्मा येषां ते तथोक्ताः, तेषां सचेतसाम्, तत्त्वार्थदर्शिन्यां सारार्थानुसन्धायिन्याम्, बुद्धौ, स व्यङ्ग्योऽर्थः, झटित्येव वाच्यार्थप्रतीत्यविलम्बेनैव भासते विषयो भवतीत्यर्थः ।

इदमाकूतम्—तद्धर्मावच्छिन्नविषयताकशाब्दबोधत्वावच्छिन्नं प्रति, तात्पर्ययोग्यताऽऽकाङ्क्षाऽऽसत्तिप्रतीतिसध्रीचीनायास्तद्धर्मावच्छिन्ननिरूपितवृत्तिज्ञानाधीनतद्धर्मावच्छिन्नविषयताकोपस्थितेः कारणतया, यथा पदार्थोपस्थितिः, उपस्थितिविषयः पदार्थो वा, तात्पर्यादिज्ञानसहकारेण, वाक्यार्थबोधं जनयित्वा स्वयं सन्नपि पृथगनवगम्यमानः प्राधान्यं नावलम्बते, तथैव व्यङ्ग्यप्रतीतिजनकप्रतीतिविषयो वाच्योऽप्युपसर्जनत्वमेव भजति ॥

नन्वेवं सचेतसां बुद्धेरेवायमनुभावो यद्विलक्षणमर्थमवगाहते, न तु काव्यस्य कश्चन विशेषोऽमुना सिध्यतीत्याशङ्कां निराकर्तुमाह—

यत्रावभासते ।

यत्र काव्ये, वाच्यप्रतीतिसाहाय्येन, अवभासते, सोऽर्थ इति शेषः । तेन काव्यस्यापि महत्त्वमायातमेव । अविभागेन भासनाद्वाच्यस्य सर्वथैव तत्र नानवभासः । तेन घटप्रदीपन्यायमुपन्यस्य वाच्यव्यङ्ग्यप्रतीत्योरेककालिकत्वं बोधयता तृतीयोद्योतग्रन्थेन सह नास्य विरोधः ।

ननु ध्वनौ निरूपणीये व्यङ्ग्यस्य सत्त्व–वाच्यभिन्नत्व–प्रधानत्वानां विचारोऽनुचित इत्याक्षेपं समाधातुमाचष्टे—

एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत उपयोजयन्नाह ।

एवमुक्तरीत्या वाच्यभिन्नस्य व्यङ्ग्यस्य सद्भावं सत्तामुत्तमतां प्राधान्यं वा प्रतिपाद्योक्त्वा, प्रकृते ध्वनिनिरूपणे, उपयोजयन्नुपकारं दर्शयन्नाहेत्यर्थः । सच्छब्दस्यार्थत्रयमिह विवक्षितमुपयोगात् ॥

ध्वनिं लक्षयति—

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥१३॥'

यत्र काव्ये, उपसर्जनीकृतौ व्यङ्ग्योपस्कारकत्वेनाप्रधानीकृतौ स्वमात्मा अर्थश्च याभ्यां तौ गुणीकृतात्माऽर्थो गुणीकृताभिधेयः शब्दश्च, तं सहृदयहृदयानन्दनेन प्रसिद्धं तदनुभवैकगोचरं 'प्रतीयमानं पुनरन्यदेव वस्तु' इत्यादिना पूर्वप्रक्रान्तं वा, अर्थं व्यङ्क्तो व्यञ्जनाशक्त्या प्रकाशयतः, स काव्यस्य विशेष उत्तमं काव्यं, ध्वनिरिति नाम्ना, सूरिभिर्ध्वनिपण्डितैः कथित इत्यर्थः । तथाच—'अप्रधानोपसर्जने' इत्यमरः । इह व्यङ्क्त इति द्विवचनं वाशब्दस्य समुच्चयद्योतकतां द्रढयति । नचैकतरस्य व्यञ्जकतायां काव्येऽव्याप्तिरिति वाच्यम्, एकस्य व्यञ्जकतायामपरस्य सहकारित्वस्वीकारात् । तदुक्तं साहित्यदर्पणे—

'शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥'

इत्युभयोरपि व्यञ्जकत्वमायातमेव । तेनात्र द्विवचनासङ्गतिवचनं भट्टनायकस्य चिन्त्यमेव । काव्यशब्दो गुणालङ्कारप्रसाधितशब्दार्थयोः सर्वातिशायिव्यङ्ग्यप्रकाशकत्वे ध्वनित्वमनुमनुते । ध्वनतीति ध्वन्यते ऽनेन वेतिव्युत्पत्तिः शब्दार्थयोर्ध्वनित्वे ऽवधार्यते । शब्दस्य पश्चादुपादानमेवाप्राधान्यं सूचयति ।

यत्तु व्यक्तिं ध्वनिं शब्द शब्दनिवेशञ्च खण्डयता महिमभट्टेन—

'वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति ।
सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता ॥'

इतिकारिकास्वरूपं परिवर्त्य, 'एतच्चानुमानस्यैव लक्षणं नान्यस्य' इत्यभिहितम् । तदवसरे ध्वनिस्थापनेन तदननुमेयत्वकथनेन च स्फुटं निरस्येत । गीतादौ शब्दस्य व्यञ्जकताया व्यक्तमनुभवात्तन्निवेशोऽप्यावश्यक एव । तथाच—'स्वविषयकप्रतीतिजन्यचमत्कारन्यूनचमत्कारजनकप्रतीतिविषयत्व—स्वव्यञ्जकघटितत्वसम्बन्धाभ्याम् व्यङ्ग्यविशिष्टशब्दार्थोभयत्वम्' इति ध्वनिकाव्यस्य लक्षणनिष्कर्षः । विच्छित्तिविशेषाधायकशब्दार्थयोः काव्यत्वमितिनये लक्षणमिदम् । तादृशशब्दमात्रस्य तत्त्वाङ्गीकारमते तु शब्द एव व्यङ्ग्यवैशिष्ट्यं योजनीयमिति दिक् ॥

कारिकां विवृणोति—

यत्रार्थो वाच्यविशेषो वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः, स काव्यविशेषो ध्वनिरिति ।

व्याख्यातम् ॥

एवं ध्वनिं लक्षयित्वा विप्रतिपन्नमतानि खण्डयितुमुपक्रममाणः प्रथमं ध्वनेरलङ्कारान्तर्भावाभावमाह—

अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमाऽऽदिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम् ।

अनेन शब्दार्थयोर्गौणत्वस्य व्यङ्ग्यस्य मुख्यतायाश्च वचनेन, उपमादयो वाच्यमात्रम्, अनुप्रासादयश्च वाचकमात्रमवलम्ब्य चारुतामादधानाः स्वरूपं प्रकाशयन्ति, ध्वनिस्तु शब्दार्थातिशायिनं व्यङ्ग्यमाश्रित्येति व्यक्तो विषयविभागः । आश्रयभेदे च तेषु तदन्तर्भावो दुर्भावः ।

अथाप्रसिद्धेर्ध्वनिमनङ्गीकुर्वतो मतमुद्दिश्य निराकरोति—

यदप्युक्तम्—'प्रसिद्धप्रस्थानातिक्रमिणो मार्गस्य काव्यत्वहानेर्ध्वनिर्नास्ति' इति, तदप्ययुक्तम् । यतो लक्षणकृतामेव स केवलं न प्रसिद्धः, लक्ष्ये तु परीक्ष्यमाणे स एव सहृदयहृदयाह्लादकारि काव्यतत्त्वम् । ततोऽन्यच्चित्रमेवेत्यग्रे दर्शयिष्यामः ।

पूर्वपक्षस्याशयः प्रागुक्त एव । लक्ष्यानुरोधेनैव लक्षणकरणमिति लक्ष्याप्रसिद्धिरिह ध्वनिसिद्धिं बाधितुं क्षमेत, न तु लक्षणाप्रसिद्धिः । लक्ष्यन्तु काव्यप्राणभूतं शतशः सहृदयानुभवगोचरीकृतं महाभारतादौ नैकधाप्रसिद्धमिति लक्षणकाराणामेवायं प्रमादः । 'न ह्ययं स्थाणोरपराधो यदन्धो नैनं पश्यती'तिन्यायेनेत्याशयः ।

ध्वनिपदमिह प्रधानाप्रधानान्यतरव्यङ्ग्यभृत्काव्यपरम् । अत एव 'ततोऽन्यच्चित्रमेव' इति वृत्तिस्सङ्गच्छते । लक्ष्यस्य परीक्षणं विवेकः । स एव काव्यतत्त्वमित्युद्देश्यविधेयवाचकपदयोः समानलिङ्गकत्वनियमविरहात् । अविवक्षितव्यङ्ग्यककाव्यस्य चित्रत्वोपचारस्तु विस्मयजनकच्छन्दोऽलङ्कारादिसम्बन्धात्, प्रधानानुकारिगजतुरगादिचित्रवत् काव्यानुकरणाद्वा, बोध्यः । तदेतत्, अग्रे तृतीयोद्द्योते—

'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थितम् ॥
द्विधा काव्यं, ततोऽन्यद्यत्तच्चित्रमभिधीयते' ॥

इति कारिकाया व्याख्यानावसरे दर्शयिष्यामः ॥

पुनरलङ्कारगुणादिष्वेव ध्वनिमन्तर्भावयतो मतमुद्दिश्य खण्डयति—

यदप्युक्तम्–'कामनीयकमनतिवर्तमानस्य तस्योक्तालङ्कारादिप्रकारेष्वन्तर्भावः' इति, तदप्यसमीचीनम् । यतो वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः ।

केवलं शब्दमर्थं वाऽऽश्रित्य तिष्ठत्स्वलङ्कारेषु, व्यङ्ग्यार्थ–पदवाक्यप्रभृतिनानाविधव्यञ्जकाश्रयेण विद्यमानो ध्वनिर्नान्तर्भवितुमर्हति, विभिन्नाश्रयत्वादितिभावः । आदिपदेन गुणानां रीतीनां वृत्तीनां च सङ्ग्रहः । अन्यथाऽलङ्कारमात्रान्तर्भावस्याधुनैव निराकृतत्वे पुनस्तन्निराकरणं छायां क्षपयेत् ॥

तत्र हेतुमाह—

वाच्यवाचकचारुत्वहेतवो हि तस्याङ्गभूताः, न तु तदेकरूपा एवेति प्रतिपिपादयिष्यमाणत्वात् ।

अनुप्रासोपमादयो हि यतो ध्वनेरुपकारकाः, तस्मान्न ध्वनिस्वरूपाः, कार्यकारणवदुपकार्य्योपकारकयोस्तादात्म्यानङ्गीकारात् ॥

समाहरति—

परिकरश्लोकश्चात्र—

अस्तीति शेषः । परिकरोति प्रकृतार्थमधिकाधानेनोपकरोतीति परिकरः ॥

'व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः ।
वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः ॥'

व्यङ्ग्यव्यञ्जकयोः सम्बन्धो व्यञ्जना, तन्निबन्धनतया तन्मूलकत्वेन भासमानस्य, वाच्यवाचकचारुत्वहेतुष्वलङ्कारेषु, ध्वनेरन्तर्भावः कुतः स्यादित्यर्थः ॥

इदानीं गुणीभूतव्यङ्ग्येष्वलङ्कारविशेषेषु, ध्वनेरन्तर्भावमाशङ्क्य क्रमशो निरस्यति—

ननु यत्र प्रतीयमानस्यार्थस्य वैशद्येनाप्रतीतिः, स नाम मा भूद्ध्वनेर्विषयः । यत्र तु प्रतीतिरस्ति यथा समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तिपर्यायोक्तापन्हुतिदीपकसङ्करालङ्कारादौ, तत्र ध्वनेरन्तर्भावो भविष्यतीत्यादि निराकर्तुमभिहितम् 'उपसर्जनीकृतस्वार्थौ' इति ।

यत्रानुप्रासाद्यलङ्कारेषु, व्यङ्ग्यस्याप्रतीतिः, यत्रचोपमाद्यलङ्कारेषु तस्य स्फुट-

तया ऽप्रतीतिः, तत्र ध्वनेरन्तर्भावो नास्ताम्। येषु पुनः समासोक्त्यादिष्वलङ्कारेषु व्यङ्ग्यस्य स्फुटतयैव प्रतीतिः, तत्र कथं नान्तर्भावः स्यादिति चेत्? उच्यते—ध्वनौ व्यङ्ग्यापेक्षया वाच्यवाचकयोरुपसर्जनत्वं भवति, गुणीभूतव्यङ्ग्ये समासोक्त्यादौ तु व्यङ्ग्यस्योपसर्जनत्वाद्वाच्यस्यैव प्राधान्यात्तदभावः। कारिकांशोक्तेर्भूतकालिकतया 'अभिहितम्' इत्यत्र क्तप्रत्ययः॥

कारिकांशं विवृण्वन्नुक्तमर्थं समर्थयति—

अर्थो गुणीकृतात्मा, गुणीकृताभिधेयश्च शब्दो वा यत्रार्थान्तरमभिव्यनक्ति स ध्वनिरिति। तेषु कथं तस्यान्तर्भावः। व्यङ्ग्यप्राधान्ये हि ध्वनिः। न चैतत्समासोक्त्यादिष्वस्ति।

इतिर्हेतौ। यतः समासोक्त्यादिषु व्यङ्ग्यस्य सत्त्वेऽपि, वाच्योपस्कारकत्वेन गुणीभावान्न प्राधान्यम्, ध्वनौ तु तदेव प्रधानम्, तस्मात्तेषु समासोक्त्यादिषु, तस्य ध्वनेरन्तर्भावः कथं स्यात्। न हि व्यङ्ग्यप्राधान्यमन्तरेण ध्वनिः, न वा तदलङ्कारेषु व्यङ्ग्यस्य प्राधान्यं सम्भवतीति नान्तर्भाव इति सारम्॥

तत्र प्रथमोपात्तत्वात् समासोक्तौ प्रथमं व्यङ्ग्याप्राधान्यमुदाहरणोपन्यासेन दर्शयति—

समासोक्तौ तावत्—

तावत् पूर्वम्।

'प्रकृतार्थेन वाक्येन तत्समानैर्विशेषणैः।
अप्रस्तुतार्थकथनं समासोक्तिरुदाहृता'॥

इत्युद्भटलक्षितायां समासोक्तौ, वाच्येनानुगतमित्यादिनाऽन्वयः॥

सायंसन्ध्यां वर्णयति—

'उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम्॥'

उपोढो धृतः, रागः सन्ध्याशोणिमा प्रेमा च, येन, स उपोढरागस्तेन शशिना नायकेन च विलोला उदयारम्भसेन प्रियालोकजविभ्रमेण च चञ्चलाः, तारका उडवः- कनीनिकाश्च यत्र, तादृशं निशाया नायिकायाश्च, मुखं प्रदोषरूपाग्रिमाङ्गम् वदनञ्च, तथा तेन प्रकारेण द्रुतमितियावत्, वात्स्यायनोक्तप्रकारेण च, गृहीतमुद्दीपितं चुम्बितुमात्तञ्च यथा पुरोऽपि प्राच्यामपि पुरस्तादपि च, रागादुदयारुण्यात् प्रेमोद्रेकाच्च,

गलितं विनष्टं पतितञ्च, समस्तमखिलम्, तिमिरांशुकं तमःपटलं तिमिराभवसनञ्च, तया हेतुभूतया निशया कर्त्र्या नायिकया च, न लक्षितं नावलोकितमित्यर्थः । तथाहि–'अंशुकं शुक्लवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः' इति रभसः । 'रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु' इति विश्वश्च ।

अत्र रागस्य वहनकर्मत्वेन गौरवातिशयः, मुखस्य विलोलतारकत्वेन स्मरसमरसम्भ्रमः, तेन गलितांशुकदर्शनाभावेन च नायिकायाः प्रमोदातिशयद्वारा प्रागल्भ्यं च सूच्यते । 'तया निशयेति कर्तृपदम् । नचाचेतनायाः कर्तृत्वमुपपन्नम्, इति शब्देनैवात्र नायकव्यवहार उन्नीतो ऽभिधेय एव, न व्यङ्ग्य इत्यत एव समासोक्तिः' इति चन्द्रिका नायकव्यवहारस्याभिधेयत्वाभावात्प्रकृतग्रन्थप्रातिकूल्यादुपपत्तिचिन्तामपेक्षते ॥

प्रकृतसङ्गतिमाह—

इत्यादौ व्यङ्ग्येनानुगतं वाच्यमेव प्राधान्येन प्रतीयते ।

व्यङ्ग्येनानुगतमुपस्कृतम् । अत्र यद्यपि श्लिष्टविशेषणमहिम्नाऽवाच्ययोरपि शृङ्गाररसालम्बनयोर्नायकयोर्निशाशशिशब्दाभ्यां प्रतीतिर्जायते, किन्तु, व्यङ्ग्ययोस्तद्व्यवहारयोरारोपा दारोपितनायिकाव्यवहारा वाच्या निशा, आरोपितनायकव्यवहारो वाच्यः शशी च प्राधान्येन वाक्यार्थबोधविषयाविति व्यङ्ग्यस्य गुणीभावान्न ध्वनिः, किन्त्वलङ्कार एवेत्याशयः ॥

तदेवाहवृत्तिकारः—

समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोरेव वाक्यार्थत्वात् ।

वाक्यार्थत्वं प्राधान्येन वाक्यार्थबोधविषयत्वम् । नायिकानायकेतित्वेकशेषावश्यम्भावाद्दुर्घटम्, किन्तु नायिकया सहितो नायक इति शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासो ऽत्र बोध्यः । तथासति नायिकायाश्शाब्दप्रतीतावप्राधान्ये ऽप्यार्थप्रतीतौ तदबाधः । एकशेषे प्रायो ऽप्यदिति प्रतीतिविरहादेवमुक्तिः ॥

अथाक्षेपालङ्कारे व्यङ्ग्याप्राधान्यं दर्शयितुमाचष्टे—

आक्षेपेऽपि व्यङ्ग्यविशेषाक्षेपिणो वाच्यस्यैव चारुत्वम् । प्राधान्येन वाक्यार्थ आक्षेपोक्तिसामर्थ्यादेव ज्ञायते ।

"निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः" ॥

इति मम्मटभट्टोक्तलक्षणस्याक्षेपस्य,—

"स्मरशरविधुराया भणामि सख्याः कृते किमपि ॥
क्षणमिह विश्रम्य सखे ! निर्दयहृदयस्य किं भणाम्यथवा ॥
तव विरहे हरिणाक्षी निरीक्ष्य नवमालिकां दलिताम् ॥
हन्त नितान्तमिदानी माः ! किं हतजल्पितैरथवा ॥"

इत्युदाहरणयोः वाच्यो वचननिषेधः कथनस्य प्रस्तुतत्वादिष्टत्वाच्च बाधेनास्कन्दितो निषेधाभासत्वेन पर्यवस्यन् विधिशवलं वक्तव्यवैलक्षण्यवैभवं व्यनक्ति। तत्रागूरितव्यङ्ग्यमन्तरेण बाधग्रस्ततया वाच्यार्थबोधस्यैवानिष्पत्त्या व्यङ्ग्यस्य वाच्यबोधनिर्वाहकत्वेन गुणीभावः। आक्षेपशब्द एव व्यङ्ग्यावापं विना वाच्यार्थबोधानिर्वाहं कथयति। तथाच स्फुटमेव व्यङ्ग्यस्य वाच्याङ्गत्वम्।

यत्तु वामनेन 'उपमानाक्षेपः' इत्युपमानतिरस्कार आक्षेपो ऽलङ्कार उक्तः, तन्न। तस्य प्रतीपभेदेऽन्तर्भावात् ॥

तत्र हेतुमाह—तथाहि—

तत्र शब्दोपारूढरूपो विशेषाभिधानेच्छया प्रतिषेधरूपो य आक्षेपः स एव व्यङ्ग्यविशेषमाक्षिपन्मुख्यं काव्यशरीरम्।

तत्राक्षेपालङ्कारे। शब्दादुपारूढं प्रकटीभूतं रूपं यस्य, सः निषेधात्मको य आक्षेपः, स निषेधरूपो वाच्य एव, न तु व्यङ्ग्यः, व्यङ्ग्यविशेषं स्वान्वयबोधोपपत्तय आक्षिपन्नध्याहरन्, काव्यस्य वाच्यवाचकवपुषः, मुख्यं चमत्कारिव्यङ्ग्यप्रसाधितत्वात् प्रधानं, शरीरम्, अस्तीति शेषः। आक्षेपे वाच्येनेष्टनिषेधेन बाध्यमानेन स्वोपपादकतयाऽङ्गभूत एव व्यङ्ग्य आक्षिप्यत इति तत्रापि व्यङ्ग्यस्यगुणीभूतत्वान्न ध्वनेरन्तर्भाव इत्यभिसन्धिः ॥

ननु तत्र वाच्यस्यैव कुतः प्राधान्यमित्यत आह—

चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा।

हि यतो यत्र वाच्ये चारुत्वस्योत्कर्ष आधिक्यम्, तत्र वाच्यस्य प्राधान्यम्। यत्र च व्यङ्ग्ये तदुत्कर्षः, तत्र तस्यैव प्राधान्यं विवक्षितं भवति, विवक्षायास्तन्मूलकत्वात्। प्रकृते निषेधाभासतया पर्यवसानाद्वाच्यस्य निषेधस्यैव तदुत्कर्ष इतिप्राधान्यं बोध्यम् ॥

तत्र निदर्शनं दर्शयति—

यथा–'अनुरागवती संध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिः कीदृक्तथापि न समागमः ॥'

यद्यपि सन्ध्या नायिका च, अनुरागवती लौहित्यभाक् प्रेमवती च, अस्तीति शेषः। दिवसो नायकश्च, तस्याः पुरस्सरोऽग्रगामी सम्मुखश्चास्ति। अहो आश्चर्यम्, कीदृग् विलक्षणाऽचिन्त्या, दैवस्य विधेः, गतिरस्ति, यत् तथापि तयोः समागमः सम्मेलनं सम्भोगश्च न भवतीत्यर्थः। इह प्रस्तुतेऽर्थेऽभिधाया नियन्त्रणादपरार्थस्य व्यङ्ग्यतया न श्लेषः, किन्तु श्लिष्टविशेषणमहिम्ना नायकयोर्वृत्तस्यावगतिरिति समासोक्तिरेव। नायकरूपव्यङ्ग्यापेक्षया ऽऽरोपिततद्वृत्तसन्ध्यादिवसात्मकवाच्यस्यैव चमत्कारिता॥

तदाह वृत्तिकृत्—

अत्र सत्यामपि व्यङ्ग्यप्रतीतौ वाच्यस्यैव चारुत्वमुत्कर्षवदिति तस्यैव प्राधान्यविवक्षा।

व्याख्यातम्। श्लोकेऽस्मिन् वामनमतेनाक्षेपः, भामहमतेन तु समासोक्तिरित्येकत्रोभयोः समावेशमालोक्योदाजहार ग्रन्थकृदिति लोचने स्फुटम्॥

प्राधान्यविवक्षां व्यपदेशबीजत्वेन व्यवस्थापयन् दृष्टान्तमाचष्टे—

यथा च दीपकापह्नुत्यादौ व्यङ्ग्यत्वेनोपमायाः प्रतीतावपि प्राधान्येनाविवक्षितत्वान्न तया व्यपदेशस्तद्वदत्रापि द्रष्टव्यम्।

'सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥'

इति मम्मटलक्षितस्य दीपकालङ्कारस्य—

'सञ्जहार शरत्कालः कदम्बकुसुमश्रियः॥
प्रेयोवियोगिनीनां च निश्शेषसुखसम्पदः॥' इत्युदाहरणे,

'प्रकृतस्य निषेधेन यदन्यत्वप्रकल्पनम्॥
साम्यादपह्नुतिः' इति पीयूषवर्षलक्षिताया अपह्नुतेः।

''एतद्धि न तपः सत्यमिदं हालाहलं विषम्।
विशेषतः शशिकला-कोमलानां भवादृशाम्॥' इत्युदाहरणे च,

यथा कदम्बकुसुमश्री-वियोगिनीसुखसम्पदां तपोहालाहलयोश्चोपमा व्यज्यते,

किन्तु तदपेक्षयैकधर्मान्वितप्रस्तुताप्रस्तुतधर्मिरूपस्य, उपमेयापह्नवोपमानस्थापनात्मकस्य च वाच्यस्यैव चमत्कारितया प्राधान्यात् तेनैव व्यवहारः, न तूपमया। सा तु भित्तिभूतैवान्यत्रातिशयोक्तिवत्। तदुक्तं चित्रमीमांसायाम्—

'उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्॥
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः॥' इति।

तथाऽऽक्षेपेऽपि व्यङ्ग्यसत्त्वेऽप्यतिसुन्दरेण वाच्येनैव व्यपदेश इति भावः॥

अथानुक्तनिमित्तविशेषोक्तौ व्यङ्ग्याप्राधान्यमाह—

अनुक्तनिमित्तायामपि विशेषोक्तौ—

'यत्सामग्र्येऽपि हेतूनां फलानुत्पत्तिबन्धनम्।
विशेषस्याभिधित्सातस्तद्विशेषोक्तिरुच्यते॥'

इत्युद्भटेन लक्षिता विशेषोक्तिः, सामग्रीसत्त्वेऽपि कार्यानुत्पत्तिप्रयोजकोपादानानुपादानाभ्यां द्विधा।

केचित्तु निमित्तस्याचिन्त्यत्वेन तृतीयमप्यस्याः प्रकारं वदन्ति। परे तु द्वितीयभेद एव तमन्तर्भावयन्ति। तत्रोक्तनिमित्तायां तस्यां निमित्तस्य वाच्यतैव। अचिन्त्यनिमित्तायां तस्य व्यङ्ग्यत्वेऽपि निगूढत्वम्, तेन 'नास्यां व्यङ्ग्यस्य सद्भावः' इतिलोचने व्यङ्ग्यपदं चमत्कारिव्यङ्ग्यपरमवगन्तव्यम्। अनुक्तनिमित्तायान्तु व्यङ्ग्यस्य सद्भावेऽपि नैव प्राधान्यम्। तत्रोक्तनिमित्ताचिन्त्यनिमित्तप्रकारयोः—

'कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे॥' इति।
'स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।
हरताऽपि तनुं यस्य शम्भुना न हृतं बलम्॥'

इति च क्रमेणोदाहरणे अप्रासङ्गिकत्वादनुक्त्वाऽनुक्तनिमित्तां तामुदाहरति—

'आहूतोऽपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोऽपि।
गन्तुमना अपि पथिकः संकोचं नैव शिथिलयति॥'

सहायैः सहचरैः, सहगन्तुमाहूत आकारितोऽपि, एम्यागच्छामीत्युक्त्वा विमुक्ता निद्रा येन तादृशोऽपि, तथा गन्तुमनाः प्रस्थातुकामोऽपि, पथिकः, सङ्कोचं नेत्रगात्राकुञ्चनं, नैव शिथिलयति नैवोनयतीत्यर्थः॥

प्रकृतोक्तिसङ्गतिमाह—

इत्यादौ व्यङ्ग्यस्य प्रकरणसामर्थ्यात्प्रतीतिमात्रम् । न तु तत्प्रतीतिनिमित्ता काचिच्चारुत्वनिष्पत्तिरिति न प्राधान्यम् ।

इह सहचरकृताह्वानादिहेतूनां सत्त्वेऽपि, सङ्कोचशिथिलीकरणरूपकार्य्याभावप्रयोजकस्य, निमित्तस्य उद्भटमते शीतकृतार्त्तेः, रुय्यकमते प्रियतमास्वप्नसमागमानुध्यानस्य यद्यपि व्यङ्ग्यतयैव प्रतीतिः, किन्तु तदपेक्षयाऽपि तदुपपादितस्य सङ्कोचशिथिलीकरणाभावरूपवाच्यस्यैव चारुत्वेन प्राधान्यमिति नात्र ध्वनेरन्तर्भावः ॥

अथ पर्य्यायोक्ते ध्वनेरन्तर्भावं दर्शयति—

पर्यायोक्तेऽपि यदि प्राधान्येन व्यङ्ग्यत्वं, तद्भवतु नाम तस्य ध्वनावन्तर्भावः । न तु ध्वनेस्तत्रान्तर्भावः । तस्य महाविषयत्वेनाङ्गित्वेन च प्रतिपिपादयिष्यमाणत्वात् । न पुनः पर्यायोक्ते भामहोदाहृतसदृशे व्यङ्ग्यस्यैव प्राधान्यम् । वाच्यस्य तत्रोपसर्जनीभावेनाविवक्षितत्वात् ।

'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्य्यायोक्तम्'

इति रुय्यकलक्षितस्य पर्य्यायोक्तस्य—

'चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूगणस्य ।
आलिङ्गनोद्दामविलासबन्ध्यं रतोत्सवं चुम्बनमात्रशेषम् ॥'

इत्युदाहरणे, राहुशिरश्छेदात्मनो व्यङ्ग्यस्य कारणस्य नैव तादृशी चारुता, यादृशी वाच्यस्य तत्कार्यस्येति न ध्वनेस्तत्रान्तर्भावः, वाच्यस्याप्राधान्येनाविवक्षणात् ।

यैस्तु लक्षणघटकमभिधानपदं प्रत्यायनपरमेव नत्वभिधाप्रयोज्यबोधजननपरं गृहीत्वा 'निश्शेषच्युतचन्दनंस्तनतटम्' इत्यादौ प्रतीयमानप्राधान्ये स्थापितेऽपि, पर्यायोक्ते ध्वनिरन्तर्भाव्यते, तैः पुनरिदं विचारणीयम्, वाक्यार्थप्राधान्यमलङ्कारत्वं चेति विरुद्धौ धर्मौ । प्रकृते व्यङ्ग्यस्य यदि प्राधान्यम्, तदा नालङ्कारता, अथालङ्कारता, न तर्हि प्राधान्यमिति । आस्तां वा कथञ्चिदुभयमपि, तथाऽपि पर्यायोक्तापेक्षया बृहदाकारो ध्वनिस्तत्र नान्तर्भवितुमर्हति, सुमेरुरिव सूचीसुषिरे । अपि तु तदेवात्र प्रविशेत्, सुरधुनीस्रोत इव सरस्वति । इदमुद्भटाक्षेपसमाधानम् ।

वस्तुतस्तु पर्यायोक्ते व्यङ्ग्यस्य प्राधान्यमेव नास्तीति का चिन्ता तत्रान्त-

भावस्य, आलङ्कारिकशेखरेण भामहेनोक्ते—

गृहेष्वध्वसु वा नान्नं भुञ्ज्महे यदधीतिनः ।
विप्रा न भुञ्जते 'तच्च रसदाननिवृत्तये ॥'

इत्युदाहरणे, पर्यायेण रसदानविषेधरूपव्यङ्ग्यस्याचारुताया व्यक्तत्वात् । अत एव तेनैव 'तच्च रसदाननिवृत्तये' इत्यनेन व्यङ्ग्यं स्फुटीकृतम् ॥

अपह्नुतिदीपकयोर्ध्वनिप्रवेशं निरस्यति—

अपह्नुतिदीपकयोः पुनर्वाच्यस्य प्राधान्यं व्यङ्ग्यस्यानुयायित्वं प्रसिद्धमेव

तयोर्वाच्यस्यैव प्राधान्यम्, उपमारूपव्यङ्ग्यस्य यथाऽप्राधान्यम्, तथा प्रागेव दर्शितम् ॥

अथध्वनेः सङ्करानन्तर्भावे वाच्ये, प्रथममादिमभेदे तमाह—

संकरालंकारेऽपि यदाऽलंकारोऽलंकारान्तरच्छायामनुगृह्णाति, तदा व्यङ्ग्यस्य प्राधान्येनाविवक्षितत्वान्न ध्वनिविषयत्वम् ।

छायाऽनुग्रहः शोभाजननम् । विषयता लक्ष्यत्वम् ।

"नीरक्षीरनयाद्यत्र सम्बन्धः स्यात् परस्परम् ।
अलङ्कृतीनामेतासां, सङ्करः स उदाहृतः ॥"

इतिविद्यानाथोक्तलक्षणो दुग्धजलन्यायेनालङ्काराणां मिथस्समावेशः सङ्करः । सचोद्भटमते चतुर्धा । तत्र

'अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः'

इतिमम्मटोक्तेरलब्धस्वातन्त्र्याणामेषामनुग्राह्यानुग्राहकभावे प्रथमः प्रकारो यथा कुमारसम्भवे—

'प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्याः ॥
तयागृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ॥'

इत्यत्र पार्वती–मृगीविलोकनयोर्व्यज्यमानोपमा वाच्यस्य ससन्देहस्य सुषमान्तनोतीत्यङ्गमेव, न तु प्रधानम् । अतो न ध्वनेस्तत्र प्रवेशः सम्भवति ॥

द्वितीयेऽपि तद्भेदे ध्वनेः प्रवेशं निरस्यति—

अलंकारद्वयसंभावनायां तु वाच्यव्यङ्ग्ययोः समं प्राधान्यम् ।

'एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः' इतिमम्मटोक्तेरलङ्काराणामेकतमपरिग्रहे साधकबाधकप्रमाणविरहात्समवाये सन्देहरूपो द्वितीयः सङ्करप्रकारः ।

यथा—'नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति ।
अधुनाऽपि निरुद्धाशमविशीर्णमिदं तमः ॥'

इत्यत्र कामोद्दीपकः कालो ऽयं वर्तते किमिति पर्यायोक्तम्, वदनमिन्दुबिम्बतया ऽध्यवसितमित्यतिशयोक्तिर्वा, अथवैतदितिनिर्दिष्टे वदन इन्दुबिम्बत्वारोपाद्रूपकम्, किमुत तयोः समुच्चयविवक्षया दीपकम्, इत्येवं नानाऽलङ्कारसङ्करे गुणप्रधानभावयोर्वाच्यव्यङ्ग्यतयोश्च निश्चेतुमशक्यत्वे कथं ध्वनेरन्तर्भावः ।

यश्चापि वाच्यालङ्काराणामेकवाचकानुप्रवेशलक्षणस्तृतीयः, शब्दार्थालङ्काराणामेकत्र समावेशरूपश्चतुर्थश्च सङ्करप्रकारस्तेनैव निरदेशि, तयोस्तु सर्वथा प्रतीयमानप्राधान्यासम्भवान्न ध्वनिप्रवेशसम्भावनाऽपि । नव्यास्तु चतुर्थं प्रकारं संसृष्टावन्तर्भावयन्तस्त्रैविध्यमेव सङ्करस्य मन्यन्ते । तदुक्तं दर्पणे—

'अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति, सङ्करस्त्रिविधः पुनः ॥' इति ।

ननु—'होइ ण गुणाणुराओ जड़ाण णवरं पसिद्धिसरणाण ।
किर पह्लवइ ससिमणी चन्दे णपिआमुहे दिट्ठे ॥'
'भवति न गुणानुरागो जड़ानां केवलं प्रसिद्धिशरणानाम् ।
किल प्रस्नौति शशिमणिश्चन्द्रे न प्रियामुखे दृष्टे ॥' इतिच्छाया ।

इत्यत्र सङ्करेऽपि प्रस्तुतत्वाद्वाच्योऽर्थान्तरन्यासोऽङ्गताम्, व्यतिरेकापह्नुती त्वतिचारुतया प्रतीयमाने अङ्गितामेव वहत इति व्यङ्ग्यप्राधान्यान्न कथं ध्वनेः प्रवेश इत्यत आह—

अथ वाच्योपसर्जनीभावेन व्यङ्ग्यस्य तत्रापि व्यवस्थानं, तदा सोऽपि ध्वनिविषयोऽस्तु, न तु स एव ध्वनिरिति वक्तुं शक्यम् । पर्यायोक्तनिर्दिष्टन्यायात् ।

अथेति यद्यर्थे । उपसर्जनीभावोऽप्राधान्यम् । तत्र सङ्करे । अयमर्थः—यदि सङ्करे व्यङ्ग्यप्राधान्यं क्वचिदस्ति, तदा तस्यापि ध्वनावेवान्तःपातोऽस्तु । यथा ध्वनेर्महाविषयतया पर्यायोक्ते नान्तर्भावः, किन्तु तदेवालङ्कारध्वनिनाम्ना ध्वनावन्तर्भावितम्, तद्वदत्रापि तादृशसङ्करस्यैव ध्वनौ प्रवेशः स्वीक्रियताम् ॥

सामान्यतया सङ्करे पुनर्ध्वनेरप्रवेशं व्याहरति—

अपि च संकरालंकारस्य संकरोक्तिरेव ध्वनिसंभावनां निराकरोति ।

नीरक्षीरवदलङ्कारमिश्रणे हि सङ्करः, न च मिश्रणे कस्यचिन्मुख्यत्वमपरस्य गुणत्वं वा शक्यमवगन्तुम्, व्यङ्ग्यप्राधान्यानवधारणे च कुतो ध्वनेः सम्भावनेति सारम् । इहार्थानुरोधेन, 'व्यङ्ग्यसम्भावनानिरासप्रकारम्' इतिलोचनलेखेन च निरे त्यधिकं पाठे कल्पितम् ॥

'सङ्करालङ्कारादौ' इत्यादिपदगृहीतायामप्रस्तुतप्रशंसायां सम्भावितं ध्वनेरन्तर्भावं निराकरोति—

अप्रस्तुतप्रशंसायामपि यदा सामान्यविशेषभावान्निमित्तिनिमित्तभावाद्वाऽभिधीयमानस्याप्रस्तुतस्य प्रतीयमानेन प्रस्तुतेनाभिसम्बन्धः, तदाऽभिधीयमानयप्रतीयमानयोः सममेव प्राधान्यम् ।

'अप्रस्तुतात् सामान्यविशेषभावे, कार्यकारणभावे, सारूप्ये च प्रस्तुतप्रतीतावप्रस्तुतप्रशंसा'इतिरुय्यकलक्षिताया अप्रस्तुतप्रशंसायाः प्रकारपञ्चकम् । तत्राप्रस्तुतात्सामान्याद्वाच्यात् प्रस्तुतस्य विशेषस्य व्यङ्ग्यत्वे प्रथमो यथा—

'पादाहतं यदुत्थाय मूर्धानमधिरोहति ॥
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥'

इत्यत्र प्रस्तुतादपमानेऽपि स्वस्थात्सामान्याद् विशेषस्य प्रस्तुतस्य स्वस्य गम्यत्वम् ।

द्वितीयो यथा—

'अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः' ॥
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥'

इत्यत्र केसरिणो मृगाधिपत्याद्विशेषात् सामान्यस्य क्रूरप्रभुत्वस्य गम्यत्वम् ।

तृतीयो यथा—

नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि ।
यदि कोमलता तवाङ्गकानामथ का नाम कथाऽपि पल्लवानाम्' ॥

इत्यत्र सरोजमालादितिरस्कारात्मनः कार्यान्नायिकाऽङ्गमार्दवविशेषस्य कारणस्य गम्यत्वम् । कार्यकारणभावस्त्वत्र प्रतीतिद्वारको बोध्यः ।

तुरीयो यथा—

'आनम्य वल्गुवचनैर्विनिवारितेऽपि रोषात् प्रयातुमुदिते मयिदूरदेशम्॥
बाला कराङ्गुलिनिदेशवशंवदेन, क्रीडाविडालशिशुना ऽऽशु रुरोध मार्गम् ॥'

इत्यत्र मार्गरोधनात्कारणात् प्रवासान्निवृत्तेः कार्यस्य गम्यत्वम्। पञ्चमः प्रकारस्त्वग्र उदाहरिष्यते। उदाहृतप्रकारचतुष्टये न ध्वनिरन्तर्भवितुमर्हति, व्यङ्ग्यस्य वाच्यानतिशायित्वात्। अत एवाह जगन्नाथः–'कार्यकारणसामान्यविशेषभावमूलास्तु चत्वारः प्रकारा गुणीभूतव्यङ्ग्यस्यैव भेदाः, अभिधादिलेशशून्यस्य केवलागूरणमात्रस्य ध्वनित्वप्रयोजकत्वात्' इति ॥

नन्वत्र प्रस्तुताप्रस्तुतयोः कथं तुल्यं प्राधान्यमित्यतआह—

यदा तावत्सामान्यस्याप्रस्तुतस्याभिधीयमानस्य प्राकरणिकेन विशेषेण प्रतीयमानेन संबन्धस्तदा विशेषप्रतीतौ सत्यामपि प्राधान्येन तस्य सामान्येनाविनाभावात्सामान्यस्यापि प्राधान्यम्।

अविनाभावो व्याप्तिः। यदि वाच्यात्सामान्याद् व्यङ्ग्यस्य विशेषस्य प्रस्तुतत्वात् प्राधान्येन प्रतीतिः, तर्हि सामान्यस्याप्रस्तुतस्यापि प्राधान्येनैव प्रतीतिः, सामान्यविशेषयोर्व्याप्तेः। तथाहि—न खलु विशेषाधिकरणे सामान्याभावः प्रतीयते।

यदाऽपि विशेषस्य सामान्यनिष्ठत्वं तदाऽपि सामान्यस्य प्राधान्ये सामान्ये सर्वविशेषाणामन्तर्भावाद्विशेषस्यापि प्राधान्यम्।

सामान्ये निष्ठा पर्यवसानं यस्य तत्सामान्यनिष्ठं तस्य भावस्तत्त्वं सामान्यव्यञ्जकत्वमित्यर्थः। सामान्यं हि विशेषात्मकमेव। अत एव सामान्याभावस्य विशेषाभावकूटप्रयोज्यत्वम्। एवञ्च सामान्यस्य प्राधान्ये विशेषस्यापि प्राधान्यमर्थादापतितमितिकेवलव्यङ्ग्यस्यैव प्राधान्याभावान्न ध्वनिप्रवेशः॥

कार्यकारणभावे चायमेव न्यायः।

सत्कार्यवादसिद्धान्ते कार्यकारणयोस्तादात्म्याङ्गीकारात्कार्यस्य प्राधान्ये कारणस्यापि प्राधान्यम्, एवं कारणस्य प्राधान्ये कार्यस्यापि तत्त्वं स्वतःसिद्धमिति पूर्ववन्न ध्वनिप्रवेशस्तत्रापि॥

'अथपञ्चमेऽपि प्रकारे ध्वनेरप्रवेशं दर्शयति—

यदा तु सारूप्यमात्रवशेनाप्रस्तुतप्रशंसायामप्रकृतप्रकृतयोः संबन्धस्तदाऽप्यप्रस्तुतस्य सरूपस्याभिधीयमानस्य प्राधान्येनाविवक्षायां ध्वनावेवान्तःपातः। इतरथा त्वलंकारत्वमेव ।

मात्रशब्दः सामान्यविशेष्यभावदिं व्यवच्छिनत्ति ।

आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुम्भतटपाटनलम्पटस्य, नादं करिष्यति कथं हरिणाधिपस्य ॥'

इत्यत्राप्रस्तुतस्य वाच्यस्य शुनो निन्दया विद्वद्वरेण्यत्वं वेषव्यवहारैरभिनयतो वैधेयस्य प्राकरणिकस्य गर्हा गम्यते। सारूप्यं चोभयोः सम्बन्धः। तत्र यदि वाच्यस्याप्रस्तुतत्वात्कचनाप्राधान्यम्, व्यङ्ग्यस्य च प्राकरणिकत्वेन प्राधान्यमनुभूयेत, तदा तस्यैव ध्वनौ प्रवेशः। किन्तु न ध्वनेर्विपुलाकारस्य तत्र प्रवेशः। एवं वाच्यव्यङ्ग्ययोः प्रस्तुतत्वेऽपि बोध्यम्। नचात्र वाच्यप्रस्तुतत्वमप्रसिद्धम्, खलतिरस्कृतस्य गुणिनः, चञ्चरीकावहेलितस्य चाम्पेयकस्य च सन्निधाने कानने केनचिदुक्ते—

'यन्नादृतस्त्वमलिना मलिनाशयेन, किन्तेन चम्पक! विषादमुरीकरोषि ।
विश्वाभिरामनवनीरदनीलवेशाः, केशाः कुशेशयदृशां कुशलीभवन्तु ॥'

इत्यत्र वाच्यप्रतीयमानयोश्चम्पकगुणिनोः प्रस्तुतत्वस्य स्फुटत्वात्। नन्वत्र वाच्यस्य प्रस्तुतत्वे ऽप्रस्तुतप्रशंसालक्षणमेव न समन्वियादिति चेत्, न, मुख्यतात्पर्यविषयीभूतार्थभिन्नार्थस्य विवक्षितताया एवात्राप्रस्तुतशब्दार्थत्वेन विवक्षणात्।

ननु तर्हि ध्वनेरप्रस्तुतप्रशंसायाः को भेदः? व्यङ्ग्यस्य प्राधान्ये, नैव कश्चिद् भेदः। अप्राधान्ये तु तदेव ध्वनेरिमां व्यतिरेचयति। तदाह—इतरथेत्यादि। इतरथा प्रस्तुतस्य व्यङ्ग्यस्य विच्छित्त्यजनकत्वादप्राधान्येन, अलङ्कारत्वमेव, न ध्वनित्वम्, व्यङ्ग्याप्राधान्यात्। 'अलङ्कारान्तरमेव' इति पाठे तु इतरथा प्रतीयमानस्याप्यप्रस्तुतत्वे ऽलङ्कारान्तरमन्यो ऽलङ्कारो, नत्वप्रस्तुतप्रशंसैवेति कथञ्चन योजना विधेया। इत्थमेव व्याजस्तुतिपरिकरप्रभृतिषु व्यङ्ग्यसंस्पर्श्यलङ्कारेषु ध्वनेरप्रवेशोऽवसेयः ॥

उक्तं निगमयति—

तदयमत्र संक्षेपः—

'व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः ।
समासोक्त्यादयस्तत्र वाच्यालंकृतयः स्फुटाः ॥ १४ ॥'
'व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा ।
न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते ॥ १५ ॥'

यत्र काव्ये वाच्यमात्रानुयायिनो वाच्यमेवोपकुर्वतो व्यङ्ग्यस्याप्राधान्यम्, तत्र समासोक्त्यादयोऽलङ्कृतयः स्फुटा इति, व्यङ्ग्यस्योपमादाविव, प्रतिभामात्रे केवलआभासे न तु प्ररोहे, प्ररोहेऽपि वा समासोक्त्यादाविव वाच्यार्थस्यानुगमे ऽनुसरणे सति वा, यत्र व्यङ्ग्यस्य प्राधान्यं न प्रतीयते तत्र न ध्वनिरितिचार्थः । कारिकाद्वयमिदमग्रिमा च कारिका वृत्तिग्रन्थ इतिकेचित् ।

तर्हि क्व ध्वनेर्विषय इत्याकाङ्क्षायामाह—

'तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ ।
ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः ॥ १६ ॥'

यत्र काव्ये तत्परावेव व्यङ्ग्यप्रत्यायनतात्पर्येणैवोपात्तौ, शब्दार्थौ, व्यङ्ग्यं प्रति स्थितौ तदुपस्कारकतया तदुन्मुखौ स्तः । स एव, नत्वप्रधानव्यङ्ग्यः सङ्करेणालङ्कारमिश्रणेनोज्झितो रहितः शुद्ध इति यावत्, ध्वनेर्विषयो मन्तव्य इत्यर्थः ॥

पर्यवसितमाह—

तस्मान्न ध्वनेरन्यत्रान्तर्भावः ।

तस्मादुक्तहेतोः, अन्यत्रालङ्कारेषु ॥

अलङ्कारादौ ध्वनेरप्रवेशस्य हेत्वन्तरमभिधत्ते—

इतश्च नान्तर्भावः । यतः काव्यविशेषोऽङ्गी ध्वनिरितिकथितः । तस्य पुनरङ्गानि—अलङ्कारा गुणा वृत्तयश्चेति प्रतिपादयिष्यन्ते ।

इतश्चास्मादप्युच्यमानाद्धेतोः, न पुनरुक्तेभ्यएवहेतुभ्यः । यस्माद्ध्वनिरङ्गीमुख्यः, अलङ्काराश्शब्दार्थस्वभावत्वाद् गुणावृत्तयश्च तद्धर्मात्मत्वात्, तस्याङ्गान्यु-

पस्कर्तारो यतः प्रतिपादयिष्यन्ते, तस्मात् पृथग्भूतकरादिशरीरयोरिवाङ्गाङ्गिनोरलङ्कारादिध्वन्योस्तादात्म्यं न सम्भवति ॥

तदेवाह—

न चावयव एव पृथग्भूतोऽवयवीति प्रसिद्धः ।

स्फुटम् ॥

ननु तर्ह्यपृथग्भूतमङ्गमेवाङ्गितां लभेतेत्याशङ्कामपाकरोति—

अपृथग्भावे तु तदङ्गत्वं तस्य । न तु तत्त्वमेव ।

यदा करादिषु समवेतं शरीरं, तदैव तेषामङ्गत्वम् । अथच यथा करादीनामङ्गत्वेऽपि न शरीरत्वम्, तथाऽलङ्कारादीनामपि न ध्वनित्वम् । ननु कराद्यवयवातिरिक्तस्य वपुषोऽनुपलम्भादङ्गानामेवाङ्गितेतिचेत्, मैवम्, न्यायनयेऽवयविनः पार्थक्यस्य 'एकोघटः' इत्यादिप्रतीतिबलेन व्यक्तं व्यवस्थापितत्वात् । अपृथग्भावे तूपकारकत्वविरहात्समवायाभावाच्च कथमङ्गत्वमिति चिन्त्यमेव ॥

ननु तदाऽप्रस्तुतप्रशंसापञ्चमप्रकारादौ कथं ध्वनेस्तादात्म्यमित्यत्राह—

यत्रापि वा तत्त्वम्, तत्रापि ध्वनेर्महाविषयत्वान्न तन्निष्ठत्वमेव ।

अलङ्काराणामेव ध्वन्यन्तःपातो नतु ध्वनेस्तन्निष्ठत्वं तत्तादात्म्यमिति बोध्यम् ।

ध्वनिलक्षणकारिकाऽवयव मुपयोगाय व्याचष्टे—

'सूरिभिःकथितः' इति विद्वदुपज्ञेयमुक्तिः, न तु यथाकथञ्चित्प्रवृत्तेति प्रतिपाद्यते ।

विद्वद्भ्यउपज्ञा प्रथमउपक्रमो यस्याः सेति बहुव्रीहिः । तत्पुरुषेतु 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' इत्यनेन पाणिनिसूत्रेण क्लीबत्वं स्यात् । अमूलकत्वे हि प्रमत्तवाक्यवदुपेक्ष्येत ॥

ध्वनिसञ्ज्ञाव्यपदेशक्रमं दर्शयितुं गौरवाय व्यपदेशकर्तॄन् स्तौति—

प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम् ।

प्रथमे मुख्याः, सर्वविद्यामूलभूतशब्दब्रह्मवित्त्वात् । शब्दब्रह्मणा हि जगदेव व्याप्तम्, किं पुनश्चतुर्दशाष्टादश वा विद्याः ॥

ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति ।

ते शाब्दिकाः श्रवणेन्द्रियगोचरीक्रियमाणेषु ध्वनिरितिव्यपदेशं कुर्वन्ति । तथाहि—'अथवा प्रतीतपदार्थको लोके ध्वनिश्शब्दउच्यते' इति व्याकरणमहाभाष्यम् ।

'यः संयोगवियोगाभ्यां करणैरुपजन्यते ॥
स स्फोटश्शब्दजश्शब्दो ध्वनिरित्युच्यते बुधैः ॥
प्रत्ययैरनुपाख्येयैर्ग्रहणानुग्रहै स्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥
अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः ।
यदि या नैव गृह्णाति वर्णं वा सकलंस्फुटम् ॥
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदास्तु वैकृताः ।
ध्वनयःसमुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥'

इति वाक्यपदीयं च । प्रतीतो ज्ञातः पदार्थो यस्मादितिव्युत्पत्तिर्वर्णात्मकएव शब्दे सङ्गच्छते ।

अयमाशयः—समग्रपदप्रत्यक्षमन्तरेण शाब्दबोधो न सम्भवति । वर्णानामाविर्भावतिरोभावयो राशुभावित्वेनैकदा ऽनेकवर्णात्मकपदप्रत्यक्षं तु दुर्घटम् । तस्मान्मध्यमानादाभिव्यङ्ग्यं नित्यमखण्डात्मकं शब्दस्वरूपं शाब्दबोधोपयोगिनं स्फोटं तद्व्यञ्जकं मध्यमानादरूपञ्च ध्वनिं शाब्दिकाःपूर्वमवोचन् । पश्चात्तदनुयायिन आलङ्कारिकाश्चमत्कारि व्यङ्ग्यार्थव्यञ्जकं शब्दार्थोभयंध्वनिमाहुरिति नेयमपूर्वाऽसम्भविनी कल्पनेति नास्तीहभूयः परीक्षाप्रयोजनम् ।

तदाह—

तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद्ध्वनिरित्युक्तः ।

तद्व्यञ्जनादिस्वीकारे शाब्दिकसरणि मनुसरद्भिरालङ्कारिकै र्वाच्यवाचकाभ्यामर्थशब्दाभ्यां, सम्मिश्रोमिलितः, शब्दात्मा शब्दस्य प्रथमं बुद्धिविषयत्वात्तत्प्रधानः, काव्यमिति व्यवहरणीयो व्यञ्जकत्वसाधर्म्येण मध्यमानादतुल्यो ध्वनिरित्युक्तइत्यर्थः ।

इह 'वाच्यवाचकसहितः सम्मिश्र इति मध्यमपदलोपी समासः । 'गामश्वं पुरुषं पशुम्' इतिवत् समुच्चयोऽत्र चकारेण विनाऽपि । तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दोध्वनिः, द्वयोर्व्यञ्जकत्वं ध्वनित्वसाम्यात् । सम्मिश्रिते विभावानुभाव-सर्वलनच्छाययेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा । शब्दनं शब्दः शब्द

व्यापारः, न चासावभिधाऽऽदिरूपः, अपित्वात्मभूतः, सोऽपिध्वननाद्धनिः । काव्य-मितिव्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः' इति लोचनमालोचनीयम् ॥

'वाग्विकल्पानामानन्त्यात्' इत्यादिनोपक्षिप्तां ध्वनेः क्षोदिष्ठतां निःक्षिपति—

न चैवंविधस्य ध्वनेर्वक्ष्यमाणप्रभेदतद्भेदसङ्कलनया महाविषयस्य यत्प्रकाशनम्, तदत्र प्रसिद्धालङ्कारविशेषमात्रप्रतिपादनेन तुल्यमिति तद्भावितचेतसां युक्त एवात्र संरम्भः । न च तेषु कथञ्चिदीर्ष्यया कलुषितशेमुषीकत्वमाविष्करणीयम् ।

वक्ष्यमाणा ये प्रभेदा अविवक्षितवाच्यत्वादयः, तद्भेदा अर्थान्तरसंक्रमितवाच्यत्वादयश्च, तेषां सङ्कलनया गणनया, महाविषयस्य कात्स्न्र्येनावधारयितुमशक्यत्वाद् व्यापकस्य, ध्वनेर्यत्प्रकाशनम्, तद् अप्रसिद्धानां परिमिताकारतया सर्वथाऽप्रख्यातानाम्, अलङ्कारमात्राणामशेषालङ्काराणाम्, प्रतिपादनेन च न तुल्यम्, इति तयोरतितारतम्याद्धेतोः, तद्भावितचेतसा मलङ्कारवासितमनसां ध्वनिवासनापूर्णचेतसां वा संरम्भः स्वपक्षन्यूनताख्यातिजन्मा क्रोधः, अत्रास्मिन् ध्वनिसविशेषनिरूपणलक्षणे ध्वन्याक्षेपलक्षणे वा विषये, युक्त एव । अतः, तेषु ईर्ष्यया कलुषितशेमुषीकत्वमक्षमया दूषितमतित्वम्, कथञ्चित्, नाविष्करणीयं न प्रकाशनीयमित्यर्थः ।

इदमुक्तंभवति—'अल्पविषयत्वाद्ध्वनिर्नास्त्येव, 'सन्नपि क्षोदीयस्तया ज्ञातुमशक्यएव' इति यदुक्तम्, तदुभयमपि ध्वनेर्महाविषयत्वप्रकाशनेन निरस्तम् । अतो महीयसो ध्वनेर्मुष्टिमेयै रलङ्कारैर्भारोवोढुं न पार्यत इत्यस्माभिः काव्ये ध्वनिरेव मूर्धन्यतया ऽवधार्यते । तत्रालङ्कारमात्राभिनिविष्टबुद्धीनामभीष्टसिद्धिव्याघाताद् रोषः समुचित एवेतितत्रास्माभिः क्षमैवविधेया, नतु प्रतिरोषः कार्यः । यद्वा ध्वन्यसदृशालङ्कारसादृश्योपन्यासदर्शनेन ध्वनिभावितचेतसामेव कोपउचित इतितेभ्य आलङ्कारिकैरेव न प्रतिकोपनीयम् ॥

उपसंहरति—

तदेवं ध्वनेस्तावदभाववादिनः प्रत्युक्ताः ।

एवमुक्तैः प्रकारैः, तावदादौ, ध्वनेरभाववादिनः, प्रत्युक्ताः प्रत्याख्याताइत्यर्थः । ध्वनिस्थापकप्रमाणाद्युपक्षेपेण तन्मतं निरस्तमितिभावः ।

पर्य्यवसितमुपन्यस्यति—

अस्ति ध्वनिः ।

अस्त्येव, नतु विपक्षाक्षेपैरपाकृत इत्याशयः । आचार्यास्तु पूर्ववच्छब्द-तदर्थ-व्यापार-व्यङ्ग्य-समुदाय-रूपं ध्वनिपदप्रतिपाद्यपञ्चकमिहापि व्याचख्युः ॥

द्वितीयोद्द्योतारम्भे ध्वनिप्रभेदनिरूपणस्यासङ्गतिं दवयितुं तद्भेदावुद्दिशति—

स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन ।

सामान्येन, नतु वक्ष्यमाणविशेषैः । अन्यथा द्वैविध्यमेव न स्यात् । नतु भाक्तत्वाक्षेपनिरासानुक्तौ विप्रतिपन्नमतनिराकृतौ सावशेषायां मध्ये ध्वनिप्रकारनिरूपणमसाम्प्रतमितिचेत्, सत्यम्, लक्षणोदाहरणाभ्यां ध्वनौ सामान्यतया निरूपितएव भाक्तत्वाद्याक्षेप-तत्समाधाने सौकर्यं लभेते इति प्रागेव प्रकारनिरूपणं कृतम् ।

उपस्थितिकालेऽन्वयबाधस्य जागरूकतयाऽविवक्षितो वाच्यजात्यादिरूपेणान्वयबोधविषयतयाऽनपेक्षितो वाच्यो यत्र, सोऽविवक्षितवाच्यः प्रथमो लक्षणामूलः, विवक्षितो वाच्यताऽवच्छेदकरूपेणान्वयबोधविषयत्वेनापेक्षितोऽन्यपरो व्यङ्ग्योपसर्जनीभूतो वाच्यो यत्र, स विवक्षितान्यपरवाच्योऽभिधामूलो द्वितीयश्च ध्वनेः प्रकारोऽवगन्तव्यः । तत्र विवक्षितान्यपरवाच्ये ऽभिधामूलतयोपजीव्ये प्राङ्निरूपयितुमर्हेऽपि, सूचीकटाहन्यायेन लक्षणामूलस्याविवक्षितवाच्यस्य ध्वने र्निरूपणमिह विहितम् ॥

अविवक्षितवाच्यध्वनिमुदाहरति—

तत्राद्यस्योदाहरणम्—

सुवर्णपुष्पं पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

यः शूरः यः कृतविद्योविद्वान्, यश्च सेवितुं प्रभुं परिचरितुं जानाति । ते त्रयः पुरुषाः, पृथिवीं सुवर्णपुष्पं चिन्वन्तीत्यर्थः। चिञो द्विकर्मकत्वात्पृथिव्या अपि कर्मत्वम् 'सुवर्णपुष्पाम्' इति पाठे सुवर्णमेव पुष्पं यस्या इति बहुव्रीहिः । सुवर्णानि पुष्प्यतीति सुवर्णपुष्पेति विग्रहश्चिन्त्यः, पुष्प्यतेरकर्मकत्वात् । अन्तर्भावितण्यर्थत्वेऽप्यणन्तत्वेन ङीपो दुर्वारत्वात् । अजादिगणपाठकल्पना त्वगतिकगतिः । शूरसूरिसेवनचतुरा एवानायासेन धनं विपुलमुपार्जयन्तीति तात्पर्य्यम् ।

इह पृथिव्याः सुवर्णपुष्पस्य तच्चयनस्य चाप्रसिद्धेः 'सुवर्णपुष्पम्' 'चिन्वन्ति'इति-पदयोर्वाच्यार्थबाधे विपुलधनानायासोपार्जनयो र्लक्षणायास्तत्प्रकर्षः प्राधान्येन व्यज्यत इतिवाच्याविवक्षया वाक्ये ध्वनिप्रथमप्रकारता, दीपकं तुल्ययोगिता वाऽलङ्कारश्च ॥

विवक्षितान्यपरवाच्यध्वनिमुदाहरति—

द्वितीयस्यापि—

उदाहरणमितिशेषः ॥ चाटुकृत्कान्तः प्रेयसीं ब्रूते—

शिखरिणि क नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
सुमुखि ! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥

हेसुमुखि ! असावचिन्त्यभाग्यमहिमा, शुकस्य शावकः शिशुः, क्व नु नाम शिखरिणि कस्मिन् पर्वते, कियच्चिरम्, किमभिधानं किन्नामकम्, तपः अकरोत्! येन तव अधरवत् पाटलं श्वेतरक्तम्, बिम्बस्य तुण्डिकेर्याः फलं दशत्यास्वादयतीत्यर्थः।

इहशीघ्रसिद्धिदानि श्रीशैलादिप्रदेश—देवशरत्सहस्रसमय—पञ्चाग्निप्रभृतितीव्रतपांसि विना यदा त्वदधरसदृशबिम्बफलस्याप्यास्वादो दुर्लभः, तर्हि का कथा त्वदधरस्येति व्यङ्ग्यं प्रति वाच्यार्थ उपसर्जनीभूत इतिविवक्षितान्यपरवाच्यो ध्वनिः। दंशनमिह निरन्तरास्वादनमात्रम्, नतूदरम्भरिव्यापारः, तावताऽपि तस्य तपोऽतिरेकेण परिणता रसज्ञता,'कामिना मधरास्वादः सुरतादतिरिच्यते' इत्युक्ते, श्चाटुकृतोऽधरास्वादसमीहाच पुनः सूच्यते।

युष्मच्छब्दस्य समासघटकत्वे स्वातन्त्र्येण दंशनक्रियाऽन्वयिपदार्थोपस्थापकताविरहाद्विच्छित्तिर्विच्छित्तिमापद्येत। तेन वृत्तौ त्वदादेशेच्छन्दोभङ्गप्रसङ्गः स्यादित्येतावन्मात्रं समासाभावहेतुमिह व्याहरन्तो निरस्ताः।

इत्थंसामान्यनिरूपणानन्तरमापादितपूर्वं ध्वनेर्भाक्तत्वं निराकर्तुमाह—

यदप्युक्तम् 'भक्तिर्ध्वनि रिति, तत्प्रतिसमाधीयते।

शङ्कायाः प्रतिसमाधानं निराकरणम्। ननु पूर्वं 'भाक्तमाहुस्तमन्ये' इत्यनेन ध्वने र्भाक्तत्वमुक्तम्, नतु भक्तित्वम्, इदानीं पुनरन्यथा कथमनूद्य खण्ड्यत इतिचेत्, उच्यते, व्युत्पत्तिभेदेन ध्वनिशब्दो हि नानाऽर्थकः। तत्र यदा व्यङ्ग्यार्थकः, तदा भक्तेस्तल्लक्षणतोपलक्षणते क्रमेण प्रदर्श्य 'अतिव्याप्तेरथाव्याप्तेः' इत्यादिनाऽनुपदं खण्डयिष्यते। 'यदा पुनर्ध्वननव्यापारार्थकः, तदा यद्भक्तितादात्म्यमापादितम्, तदेतत्खण्ड्यते। तदाचार्यैरप्युक्तम्–'भक्तिश्च ध्वनिश्चेतितादात्म्यं लक्षणमुपलक्षणमिति त्रिविधमपि मतं दूषयति। किं पर्यायवत्तादात्म्यम्, अथ पृथिवीत्वमिव

पृथिव्या अन्यतोव्यावर्तकधर्मरूपतया लक्षणम् , उत काक इव देवदत्तगृहस्य सम्भवमात्रादुपलक्षणम्' इति ॥

तत्र ताद्रूप्यं खण्डयति—

भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।

विवृणोति वृत्तिकृत्—

अयमुक्तप्रकारो ध्वनिर्भक्त्या नैकत्वं बिभर्ति ।

उक्तप्रकारोऽयं ध्वनिर्भक्त्या भक्तेरेकत्वं ताद्रूप्यं, भक्त्या सह वा ताद्रूप्यं न बिभर्त्ति 'वृद्धोयूना' इत्यादिनिर्देशात्सहशब्दाप्रयोगेऽपि तृतीया । तत्र हेतुमाह—

भिन्नरूपत्वात् ।

रूपभेद एव हि घटादीनां पटादिभ्यो भेदकइत्याकूतम् ॥

तमेव रूपभेदं दर्शयितुमादौध्वनेः स्वरूपमनुवदति—

वाच्यवाचकव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये, स ध्वनिः ।

व्यतिरिक्तस्य भिन्नस्य । अर्थस्य व्यङ्ग्यस्य । तात्पर्येणप्रयोजनत्वेन बुबोधयिषया । प्रकाशनं व्यञ्जनयाद्द्योतनम् । अन्यत्स्फुटम् । 'अर्थप्रकाशन' मितिपाठस्त्वर्थशब्दस्य द्विरुपादानादन्वयानुपपत्त्याऽनुपपन्नः ॥

ततो भक्तेः स्वरूपं दर्शयति—

उपचारमात्रं तु भक्तिः ।

उपचारः शक्यताऽवच्छेदकप्रकारकआरोपो लक्षणा गुणवृत्ति रितियावत् । तुना ध्वनेर्भेदः, मात्रशब्देन लक्षणाप्रयोजनीभूतव्यङ्ग्यस्याप्राधान्यं च सूच्यते ।

यद्यप्युपचारशब्देनाग्रे सादृश्यसम्बन्धमूलिकैव गुणवृत्ति र्ग्रहीष्यते । अन्यत्रापि 'उपचारो नामात्यन्तविशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनम्' इत्यनेन गौणलक्षणैवोक्ता । तथापि खण्डनप्रकरणानुरोधेन लक्षणासामान्यपरतयैव तद्व्याख्यानं बोध्यम् । अनेन भक्ते र्व्यङ्ग्यव्यञ्जना तादात्म्यंखण्डितम्, व्यञ्जना तादात्म्यन्तु विस्तरेण तृतीयोद्द्योतेऽपि खण्डयिष्यते ॥

ननु भक्ते स्ताद्रूप्यासम्भवे तल्लक्षणत्वमेव स्वीक्रियेतेतिद्वितीयं विकल्पं निराकर्तुं कारिकामवतारयति—

मा चैतत् स्याद्भक्तिर्लक्षणं ध्वने रित्याह—

अतिव्याप्ते रथाव्याप्ते र्न चासौ लक्ष्यते तया ॥ १७ ॥

अतिव्याप्ते रव्याप्तेश्च दोषात्, तयाभक्त्या, असौध्वनि र्न लक्ष्यत इत्यर्थः ॥

क्रमेण विवृणोति वृत्तिकृत्—

न च भक्त्या ध्वनिर्लक्ष्यते ।

प्रतिज्ञानिर्देशोऽयम् ॥

तत्रहेतुं पृच्छति—

कथम् ॥

उत्तरयति—

अतिव्याप्ते रव्याप्तेश्च ॥

उद्देशानुसारं पूर्वमतिव्याप्तिं दर्शयति—

तत्रातिव्याप्तिः, ध्वनिव्यतिरिक्तेऽपि विषये भक्तेः सम्भवात् ।

तत्र तयोर्मध्ये अतिव्याप्तिर्लक्षणस्य लक्ष्यताऽवच्छेदकसामानाधिकरण्यवि-शिष्ट–लक्ष्यताऽवच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम् । साच ध्वन्य-विषये वक्ष्यमाणलक्ष्ये ध्वनिलक्षणतयाऽभिमताया भक्तेः सम्भवात्समन्वयाद्बोध्या ॥

तामेवोपपादयति—

यत्र हि व्यङ्ग्यकृतं महत्सौष्ठवं नास्ति, तत्राप्युपचरितशब्दवृत्त्या प्रसिद्ध्यनुरोधप्रवर्तितव्यवहाराः कवयो दृश्यन्ते ।

हि यतः, यत्र येषु वक्ष्यमाणभक्त्युदाहरणेषु, व्यङ्ग्यकृतं, महत् सौष्ठवं चारुत्वं, नास्ति । तत्रापि, उपचरिताऽऽरोपिता या शब्दवृत्तिर्लक्षणा, तया, प्रसिद्धेरूढेः, अनुरोधेन, प्रवर्तितो व्यवहारश्शब्दप्रयोगरूपव्यापारो यै, स्तादृशाः, कवयो दृश्यन्ते, तस्माद्भक्ति र्न ध्वनेर्लक्षण मित्यन्वयः ।

इदमुक्तम्भवति—

'नान्ध्रीपयोधर इवातितरां प्रकाशो, नो गुर्जरीस्तन इवातितरां निगूढः ॥
अर्थो गिरामपिहितः पिहितश्च शश्वत्, सौभाग्यमेति मरहट्टवधूकुचाभः ॥'

इत्यभियुक्तोक्ते रीषद्गूढस्यैव व्यङ्ग्यस्य चारुतानिर्धारणेऽपि चमत्कारिणं व्यङ्ग्यं व्यङ्ग्यसामान्यं वाऽनपेक्ष्य रूढिमात्रमनुरुन्धानैः कविभिः प्रयुज्यमानेषु 'कलि-

ङ्गःसाहसिकः' 'श्वेतो धावति' 'मञ्चाः क्रोशन्ति' इत्यादिषु ध्वनेरलक्ष्येष्वपि गुणवृत्ते रुपलम्भादतिव्याप्ते जागरूकतया नैव गुणवृत्तिः कदाचन ध्वनेर्लक्षणम् ॥

अथभक्त्युदाहरणानि स्वपक्षं द्रढयितुं दर्शयति—

यथा—'परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनो र्मध्यस्यान्तःपरिमलनमप्राप्यहरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताऽऽक्षेपवलनैः,
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्त्रशयनम् ॥'

कृशाङ्ग्या वियोगव्यलीकेन तनुगात्र्याः, पीनस्य पीवरस्य, स्तनजघनस्य कुचयोः श्रोणिपुरोभागस्यच, सङ्गात् सम्पर्कात्, उभयत ऊर्ध्वमधश्च स्थानद्वये, परिम्लानं तदीयतापभाराभ्यामतिम्लानम्, तथा तनोः कृशस्य, मध्यस्यावलग्नस्य परिमलनं धारणं गाढ़सम्बन्धमितियावत्, अन्तर्मध्ये, अप्राप्य, हरितं पालाशवर्णम्, तथा श्लथयोः सन्तापातिशयेन शिथिलयोः, भुजलतयोः, आक्षेपाणां वेदनाधिक्यादितस्ततो न्यासानां, वलनैर्विधानैः,व्यस्तोविपर्यस्तो न्यासोरचना यस्य, तत्, इदं पुरोवर्त्ति, बिसिनीपत्त्रशयनं नलिनीदलतल्पम्, (तस्याः)सन्तापं वदति स्फुटीकरोतीत्यर्थः ।

इह धारणार्थकान्मलधातोर्ल्युटिमलनमिति । मिलतेः कुटादित्वाभावान्मिलनमितिपाठस्त्वसङ्गतः । तल्पस्य व्यक्तवागुच्चारणकर्तृत्वासम्भवाद्वदतेः स्फुटीकरणे लक्षणा । सा च प्रयोजनविरहाद् रूढ़िमूलिकैव । प्रयोजनस्य कथञ्चित्कल्पनेऽप्यचमत्कारितया न ध्वनिः, किन्तु भक्तिरेवेति न तयो र्लक्ष्यलक्षणभावः । एवमेवोदाहरणान्तरेष्वपि बोध्यम् ॥

द्वितीयमुदाहरणं दर्शयति—

तथा—'चुम्बिज्जइ सअहुत्तं अवरुन्धिज्जइ सहस्सहुत्तम्मि ।
विरमिअ पुणो रमिज्जइ पिओ जणो णत्थि पुनरुत्तम् ॥'

'चुम्ब्यते शतकृत्वोऽवरुध्यते सहस्रकृत्वः ॥
विरम्य पुनारम्यते प्रियोजनो नास्ति पुनरुक्तम् ॥' इतिच्छाया ।

प्रियोजनः, शतकृत्वः शतं वारान्, प्रियेण जनेन, चुम्ब्यते, सहस्रकृत्वोऽवरुध्यतउपगूह्यते, विरम्य विश्रम्य, पुनः सुरतानन्तरमपि, रम्यते । (तत्र) पुनरुक्तं पिष्टपेषणवत्कृतकरणं नास्तीत्यर्थः । शब्दस्यैवोक्तिकर्मत्वाच् चुम्बनादिक्रि-

यासु पुनरुक्तत्वासम्भवात्पुनरुक्तपदस्य पुनःकृते लक्षणा ॥

तृतीयमुदाहरणं दर्शयति—

तथा—'कुविआओ पसन्नाओ ओरण्णमुहीओ विहसमाणाओ।
जह गहिओ तह हिअअं हरन्ति उच्छिन्तमहिलाओ ॥'

'कुपिताः प्रसन्ना अवरुदितमुख्यो विहसन्त्यः ॥
यथा गृहीतास्तथा हृदयं हरन्ति स्वैरिण्यो महिलाः ॥' इतिच्छाया।

स्वैरिण्यः पुंश्चल्यो महिलाः कुपिताः क्रुद्धाः, प्रसन्ना हृष्टाः अवरुदितमुख्यः सरुदितवदनाः, यथा कुपितत्वादिना येनप्रकारेण, गृहीताज्ञाता विलोकिता इतियावत्, तथा हृदयं विलोकयितुर्मनः हरन्ति वशीकुर्वन्तीत्यर्थः।

इह हरते वशीकृतौ भक्ति मनसो मूर्त्यभावेन हरणकर्मत्वासम्भवात्। यत्तुकश्चिदाह—'ग्रहणेनोपादानं लक्ष्यते' इति, तन्न, गृह्णातेरुपादानेऽभिधाया एव सत्त्वात्, उपादानरूपार्थस्यात्राविवक्षितत्वाच्च ॥

चतुर्थमुदाहरणं दर्शयति—

तथा—'अज्जाएँ पहारो णवलदाए दिण्णो पिएण थणवट्टे ॥
मिउओ वि दूसहो च्चिअ जाओ हिअए सवत्तीणम् ॥'

'कनिष्ठभार्यायाः प्रहारो नवलतया दत्तः प्रियेणस्तनपृष्ठे।
मृदुकोऽपि दुस्सहइव जातो हृदये सपत्नीनाम् ॥' इतिच्छाया ॥

कनिष्ठा चासौ भार्या कनिष्ठभार्या, तस्या यवीयःपत्न्याः, स्तनपृष्ठे कुचोपरि, प्रियेण, नवलतया, मृदुकोऽप्यल्पतया सुसहोऽपि, दत्तो विहितः, प्रहार आघातः, सपत्नीनां हृदये दुस्सहइव जातइत्यर्थः।

इह कनिष्ठत्वं वयसैव विवक्षितं नतु प्रेम्णा। यवीयस्यां प्रेमप्रकर्षसूचकतया प्रहारस्य सपत्नीहृदयदुस्सहत्वम्। स्वसत्त्वनिवृत्तिपूर्वक-परसत्त्वोत्पत्त्यनुकूलव्यापारस्य ददाते मुख्यार्थस्य बाधितत्वाद् विधानेलक्षणा। व्यङ्ग्यार्थादपि विभावना-विशेषोक्तिसङ्करासङ्गत्युत्प्रेक्षाणां वाच्यालङ्काराणामेव चमत्कारितया प्राधान्यम् ॥

पञ्चममुदाहरणमाह—

तथा—'परार्थे यः पीडा मनुभवति भङ्गेऽपि मधुरो,
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः,

किमिन्नो दोषोऽयं न पुनरगुणाया मरुभुवः ॥

यो भङ्गे खण्डने पराभवेऽपि च मधुरो माधुर्यगुणभाग्रम्यशीलश्च, परार्थे परेषां प्रयोजन उपकारे च, पीडां यन्त्रनिष्पीडनं क्लेशं च, अनुभवति लभते प्रत्यक्षीकरोति च । यदीयो विकारो वैकृतं गुडादि हानिश्च, इहखलु सर्वेषामभिमतः प्रियो भवति । स इक्षुः सज्जनश्च, अक्षेत्र ऊषरकेदारे कुस्थाने च, पतितः प्राप्तः, यदि वृद्धिं पुष्टिमुन्नतिञ्च न सम्प्राप्तः, तर्हि, असौ किम् ? इक्षोः सजनस्यच दोषः अगुणायागुणशून्यायाः, मरुभुवो दुरास्पदस्य च पुन र्न दोषः, अपितु तदीयएव दोष इत्यर्थः ।

अत्राप्रस्तुतेक्षुप्रशंसामनुबध्नता कविना प्रस्तुतसज्जनबुबोधयिषयोपात्तस्यानुभवस्य जड इक्षावन्वयबाधाल्लाभे वहने वाऽनुभवते लक्षणा ॥

तदाह—

इत्यत्रेक्षुपक्षेऽनुभवतिशब्दः ।

लाक्षणिक इतिशेषः ।

नन्वेतादृशस्थले सप्रयोजनाया अपि लक्षणायाः सम्भवाद्व्यङ्ग्यसद्भावा न्न कथं ध्वनिरित्यतोऽभिधत्ते—

न चैवंविधः कदाचिदपि ध्वनेर्विषयोऽभिमतः ।

तत्र हेतुमाह—

यतः—

उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन् ।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्ते र्विषयी भवेत् ॥ १८ ॥

यच्चारुत्वं चमत्कारः, उक्त्यन्तरेण ध्वन्यतिरिक्तशब्देन, अशक्यं प्रकाशयितुमितिशेषः । तच्चारुत्वं प्रकाशयन्, शब्दः शब्दनाख्यव्यापारभाक् पूर्वोक्तः शब्दादिः ध्वन्युक्ते र्विषयीभवेद् ध्वनिशब्दवाच्यः स्यादित्यर्थः ।

कारिकार्थं प्रकृत उपयोजयति—

अत्र चोदाहृते विषये नोक्त्यन्तराशक्यचारुत्वव्यक्तिहेतुः शब्दः ।

यत उक्तोदाहरणघटका वदतीत्यादिशब्दा अगूढत्वादनादरणीयं व्यङ्ग्यं तादृशमेव प्रकाशयन्ति, यादृशं तद्वाक्यघटकोऽपरोऽपि शब्दः प्रकाशयितुं शक्नुयात्,

अतो व्यङ्ग्यस्य तत्र चारिमप्रकर्षाभावान्न ध्वनिविषयतेत्याशयः ॥

एवं सप्रयोजनलक्षणास्थलाद्ध्वनिं निरस्य, रूढिहेतुकलक्षणास्थलादपि निरसितुमाचष्टे—

किञ्च—

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥ १९ ॥

ये लावण्याद्या लावण्य-सब्रह्मचारि-सोदर-प्रभृतयः शब्दाः, स्वविषयादात्मवाच्यार्थोल्लवणभाव-समानशाखाऽध्यायि-समानोदरकादिरूपाद्, अन्यत्रान्यस्मिन्, द्युतिविशेषतुल्यादिरूपे विषयेऽर्थेलक्ष्ये रूढाः प्रसिद्धाः प्रयुक्ताः, ते ध्वनेः पदमाश्रयो न भवन्तीत्यर्थः ।

ध्वनिपदमिह चमत्कारातिशयशालिव्यङ्ग्यपरम् । तद्विरहादेवध्वनित्वाभावः । नन्वेवम् 'लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्, स्मेरेऽधुना तवमुखे तरलायताक्षि !
क्षोभं यदेति न मनागपि तेन मन्ये, सुव्यक्तमेव जलराशिरयं पयोधिः ॥'
इत्यादौ लावण्यशब्दप्रयोगसद्भावाद्रूपकध्वनि र्न स्यादित्यत आह—

तथाविधे च विषये क्वचित् सम्भवन्नपि ध्वनिव्यवहारः प्रकारान्तरेण प्रवर्तते, न तु तथाविधशब्दमुखेन ।

क्वचिदुक्तपद्यादौ, तथाविधे लावण्यादिशब्दभाजि, विषये स्थले, सम्भवन्नपि ध्वनिव्यवहारो रूपकादिध्वनिव्यपदेशः, प्रकारान्तरेण रूपकव्यञ्जकवाच्यमहिम्ना प्रवर्त्तते, न तु तथाविधशब्दमुखेन लावण्यादिशब्दद्वारेणेत्यर्थः ।

अन्वयव्यतिरेकविरहाल्लावण्यादिलाक्षणिकशब्दप्रयोज्यो न ध्वनि व्यपदेश इति सारम् ॥

लक्षणासामग्रीविरहादपि गुणवृत्तिर्व्यङ्ग्यमवगमयितुं न प्रभवतीत्याह—

अपिच—

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम् ॥
यदुद्दिश्य फलं, तत्र शब्दोनैव स्खलद्गतिः ॥ २० ॥

यद्व्यङ्ग्यं, फलंप्रयोजनम्, उद्दिश्याभिप्रेत्यबोधयितुमितिशेषः, मुख्यामभिधां-

वृत्तिं परित्यज्य विहाय परिसमाप्यवा, गुणवृत्त्या लक्षणया, अर्थस्यलक्ष्यस्य, दर्शनं प्रकाशनं विधीयते । तत्र प्रयोजने बोधनीये शब्दः स्खलद्गति र्बोधनासमर्थो नैवेत्यर्थः ।

तदाह वृत्तिकृत्—

तत्रहि चारुत्वातिशयविशिष्टार्थप्रकाशनलक्षणे प्रयोजने कर्तव्ये, यदि शब्दस्यामुख्यता, तदा तस्य प्रयोगे दुष्टतैव स्यात् ।

तत्र चारुत्वातिशयविशिष्टस्य व्यङ्ग्यस्यार्थस्य, प्रकाशनलक्षणे बोधजननरूपे प्रयोजने कार्ये, यदि शब्दस्य, अमुख्यता गौणता बाधितार्थत्वमिति यावत्, स्यात्, तदा तस्य शब्दस्य प्रयोगे दुष्टतैव दोषएव स्यादित्यर्थः ॥

वक्तव्यमभिधत्ते—

नचैवम् । तस्मात् ।

एवं व्यङ्ग्यार्थे बोधनीये मुख्यार्थबाधो यतो नैव भवति । तस्मात्सामग्रीविरहा-ल्लक्षणा नैव ध्वनेर्लक्षणमित्यर्थः ।

वाच्यार्थबाधो वाच्यार्थसम्बन्धो रूढिप्रयोजनान्यतरच्चेतित्रितयस्य—

'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥'

इतिमम्मटेन कारणत्वे निर्धारिते, 'गङ्गायां घोषः' इत्यादौ लक्ष्ये तीरएव बोधनीये वाच्यान्वयबाधः, नतु शैत्यातिशयलक्षणे व्यङ्ग्ये प्रयोजने बोधनीये । तस्मात् प्रयोजनबुबोधयिषाया मुक्तसामग्रीविरहान्न लक्षणा प्रसरतीति ध्वनिः कुतो लक्षणया लक्ष्येतेत्याकूतम् ॥

भक्तेर्ध्वनिलक्षणत्वंपुनरन्यथा खण्डयति—

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता ।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम् ॥ २१ ॥**

वाचकत्वाश्रयेणैव व्यवस्थिताऽभिधापुच्छभूतत्वात्तामेवावलम्ब्योदिता गुणवृत्तिर्ल-क्षणा,व्यञ्जकत्वैकमूलस्य व्यञ्जनामात्रगम्यस्य ध्वने र्लक्ष्मं बोधकारणं कथंस्यादित्यर्थः।

व्यञ्जनैव व्यङ्ग्यं बोधयितुमीष्टे, नतु लक्षणा, सातु स्वयमेवाभिधाऽऽश्रितत्वा-दस्वतन्त्रेत्यभिप्रायः । तथाचोक्तम्—'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते' इति ॥

पर्यवसितमाह—

तस्मादन्यो ध्वनि, रन्या च गुणवृत्तिः ।

तस्मात्स्वरूपसामग्रीकार्यादिभेदाद्ध्वने र्भक्त्या भेद इत्यर्थः ॥

भक्तेर्ध्वनिलक्षणत्वं निरस्यन्नेवमतिव्याप्तिं प्रदर्श्याव्याप्तिं प्रदर्शयति—

अव्याप्तिरप्यस्य लक्षणस्य ।

भक्तेर्ध्वनिलक्षणत्वे 'लक्ष्यताऽवच्छेदकसामानाधिकरण्यविशिष्ट–लक्ष्यताऽवच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपा' ऽव्याप्तिरप्यापद्येत । अपिरतिव्याप्तिमपि सङ्गृह्णाति । तामेवोपपादयति—

नहि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षणः अन्ये च बहवस्तद्भेदप्रकारा भक्त्या व्याप्यन्ते ।

सन्दर्भशुद्धेरभावेऽपि कथञ्चिद्व्याख्यायते ध्वने र्विवक्षितान्यपरवाच्यलक्षणः प्रकारः, अन्ये च बहवस्तद्भेदप्रकारा असंलक्ष्यक्रमभेदाप्रभेदा रसभावादिध्वनयः, नहि भक्त्या व्याप्यन्त इत्यन्वयः ।

भक्तिर्नाम ध्वनेर्लक्षणं तदा स्यात्, यदि सर्वत्र ध्वनिभेदेषु भक्तिस्तिष्ठेत् । तदेव तु नास्ति, तथाहि–केवलमविवक्षितवाच्ये ध्वनिभेदे वाच्याविवक्षया भक्तेः सञ्चारेऽपि, विवक्षितान्यपरवाच्यादावसम्भवादव्याप्तिः स्फुटैवेत्यभिसन्धिः ॥

अनुगमयति—

तस्माद्भक्तिरलक्षणम् ।

तस्मादतिव्याप्त्यव्याप्तिदोषापाताद्भक्तिर्ध्वनेः, अलक्षणम् । लक्षणं नेतीत्युचितम्, प्रसज्यप्रतिषेधीयनञ एव क्रियान्वयिप्रधानाभावबोधकत्वनियमात्, समासे पर्युदासत्वसम्भवाच्च । तदुक्तम्—

> 'अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
> प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥'
> 'प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
> पर्युदासः सविज्ञेयो यत्रोत्तरपदेन नञ् ॥' इति ॥

इदानीं भक्तेर्ध्वनितादात्म्यलक्षणत्वे निरस्य, तदुपलक्षणत्वमपि निरसितुं सम्भावयति—

कस्यचिद्ध्वनिभेदस्य सा तु स्यादुपलक्षणम् ।

कस्यचिदविवक्षितवाच्यस्य (नतु सर्वस्य) ध्वनिभेदस्य, उपलक्षणं काकइवदेवदत्तमन्दिरस्य कादाचित्कबोधकारणं, तु सा गुणवृत्तिः, स्यात् सम्भाव्येतेत्यर्थः ॥

विवृणोति वृत्तिकृत्—

सा पुनर्भक्ति र्वक्ष्यमाणप्रभेदमध्यादन्यतमस्य भेदस्य यदिनामोपलक्षणतया सम्भाव्येत ।

तदाऽपि न ध्वनिपक्षावलम्बिनां काचनक्षतिरितियोजनीयम् । यदि नाम भक्ति-रविवक्षितवाच्यरूपध्वनिभेदस्य बोधं जनयेत्, तर्हि जनयतु, न तावता भक्तिः कृतार्था, व्यञ्जना वा गतार्था, भक्तेस्तदितरभेदबोधजनकत्वाभावादित्याशयः ॥

ननूपलक्षणात्मकभक्तिद्वारेणैव सर्वेषां ध्वनिप्रकाराणामवगमः स्यात्, किन्तल्लक्षण-विधानेनेत्याक्षेपं क्षपयति—

यदि च गुणवृत्त्यैव ध्वनिर्लक्ष्यत इत्युच्यते, तदभिधाव्यापारेणैव तदितरोऽलङ्कारवर्गः समग्र एव लक्ष्यत इति प्रत्येकमलङ्काराणां लक्षणक-रणे वैयर्थ्यप्रसङ्गः ।

असुसङ्गतोऽपि सन्दर्भः कथञ्चिद्व्याख्यायते । प्राचीनमतश्रद्धाजाड्येन भक्तिर्यदि ध्वनिलक्षणं स्वीक्रियते, तदाऽपि न निर्वाहः । नैव सा सर्वान्ध्वनीनवगमयितुमीष्टे, न वा व्यञ्जनाकार्यभारं वोढुम् । इतरथाऽलङ्कारसामान्यवाचकपदादेवाभिधया सर्वेषा मलङ्कारत्वसामान्येनावगमे जाते, तत्तदलङ्कारविशेषाणामपि लक्षणविधानमेवमेव वृथा स्यात् । सामान्यतयाऽवगतस्यापि विशेषेणावगमाय लक्षणं विधीयते । नहि प्रमेयत्वेनावगतं घटं घटत्वेनावगमयितुं कम्बुग्रीवादिमत्वात्मकं तल्लक्षणं न कुर्वन्ति । तस्माद्भक्तिर्न ध्वनिरूपा, नवा ध्वनेर्लक्षणम्, नच वोपलक्षणमित्याकूतम् । परमार्थतस्त्वविवक्षितवाच्येऽपि ध्वनौ भक्त्यालक्ष्यार्थ एव बोध्यते, नतु प्रयोजनी-भूतप्रतीतिगोचरो व्यङ्ग्यार्थः—

'यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापराक्रिया ॥'' इतिमम्मटोक्तेः ॥

'तुष्यतु दुर्जनः' इति न्यायेन भक्तेर्ध्वनिलक्षणत्व मभ्युपगत्यापि ध्वनिपक्षं-द्रढयति—

लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः ॥ २२ ॥

अन्यैःप्राचीनैर्भक्तिवादिभिः, अस्यध्वनेः, लक्षणे कृते च, नोऽस्माकं ध्वनिवादि-नामेव, नतु तेषाम्, पक्षस्य साधनीयार्थस्य सम्यगनायासेन सिद्धि र्निष्पत्तिरित्यर्थः ॥

तदाह वृत्तिकारः—

कृतेऽपि वा पूर्वमेवान्यै र्ध्वनिलक्षणे पक्षसंसिद्धिरेव नः ।

यदि भक्तिरेव ध्वनेर्लक्षणम्, सा च प्राचीनैरेव व्याकृतेत्युच्यते, तदाऽपि ध्वनि-वादिनामस्माकमेवेष्टसिद्धि रित्यभिसन्धिः ॥

कुत इत्यत आह—

यस्माद् ध्वनिरस्तीति नः पक्षः। स च प्रागेव संसिद्ध इत्ययत्नसम्पन्न-समीहितार्थाः सम्पन्नाः स्मः।

यतो ध्वनेः सत्त्वमेवास्माकं साधनीयम्। तच्च यद्यस्मत्प्रयासात्पूर्वत एव संसिद्धमस्ति, तर्हि प्रयत्नं विनैव सिद्धेष्टार्था वयमभूमेत्यस्माकं महाँल्लाभ इतिसारम्॥ निरस्तचरीमपि ध्वनेरनिर्वचनीयतामनूद्य निगदेन खण्डयति—

येऽपि सहृदयहृदयसंवेद्य मनाख्येयमेव ध्वने रात्मानमाम्नासिषुः। तेऽपि न परीक्ष्यवादिनः, यत उक्तया नीत्या वक्ष्यमाणया च ध्वनेः सामान्यविशेषलक्षणे प्रतिपादितेऽपि, यद्यनाख्येयत्वम्, तत्सर्वेषामेव वस्तूनां तत्प्रसक्तम्।

ये पराक्षेपप्रतिक्षेपाक्षमतया ध्वनिलक्षणकरणाद्विमुखा ध्वनेस्तत्त्वंस्वरूपम्, अनाख्येयमनिर्वचनीयम्, सहृदयहृदयसंवेद्यं तत्प्रतीतिगोचरमात्रम्, आम्नासिषु रवोचन्। तेऽपि न परीक्ष्य वादिनो विविच्यवक्तारः सन्तीतिशेषः, यतः 'यत्रार्थः शब्दो वा' इत्यादिनोक्तया, 'अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्' इत्यादिना वक्ष्यमाणया च नीत्या न्यायेन रीत्येतियावत्, ध्वनेः सामान्यलक्षणे विशेषलक्षणे च प्रतिपादिते कथितेऽपि, यद्यनाख्येयत्वमेव तस्य, तदा सर्वेषां कृतलक्षणानां वस्तूनां पदार्थानां, तदनाख्येयत्वं प्रसक्तमापन्नमित्यर्थः।

निरुक्तावप्यनिर्वचनीयत्वं ध्वने दुर्वदमिति तदनिर्वचनीयतावादोऽपि वचनीयतागोचरएवेत्यभिप्रायः॥

अनिर्वाच्यतावादिनोऽपि स्वनये प्रवेशयन्नुद्द्योतमुपसंहरति—

यदि पुनर्ध्वनेरतिशयोक्त्याऽनया, काव्यान्तरातिशायि स्वरूपमाख्यायते, तत्तोऽपि युक्ताभिधायिन एव॥

इति राजानकानन्दवर्धनाचार्यविरचिते ध्वन्यालोके प्रथम उद्द्योतः॥

यदितु—प्रियप्राया वृत्ति र्विनयमधुरो वाचि नियमः।
प्रकृत्या कल्याणी मति रनवगीतः परिचयः॥
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसम्, इत्यनेन साधूनां चरित्रस्वभावे

निरुक्तेऽपि—'चरित्रं साधूनां किमपि निरवद्यं विजयते' इति किमपीत्यनेन पुनस्तदनाख्येयतोक्ता यथा कमप्यतिशयं बोधयति, तथैव ध्वनेरनाख्येयतेयं काव्यान्तरातिशायि गुणीभूतव्यङ्ग्यचित्रकाव्यापेक्षया विच्छित्तिविशेषाधानेन विलक्षणं, स्वरूपमाख्याति । तत्रैव चानाख्येयत्ववादिनान्तात्पर्य्यम्, नत्वनाख्येयत्वमुखेन ध्वनेरभावे, तत्तदा, तेऽनिर्वचनीयतावादिनोऽपि, युक्ताभिधायिन उचितवादिन एव, सर्वथासिद्धध्वनिसिद्धान्तस्वीकारादिति दिक् ॥

अभ्यस्तस्खलिता दृष्टि र्लङ्घनीया घनाटवी ।
राधिकाकृष्णकारुण्यं शरणं मम केवलम् ॥

इति मैथिलश्रोत्रियाग्रजन्मश्रीबदरीनाथशर्मनिर्मितायां ध्वन्यालोकदीधितौ
प्रथम उद्द्योतः ॥

अथ ध्वन्यालोकदीधितौ द्वितीय उद्द्योतः ।

कृष्णालकप्रतिच्छाय—लाञ्छिताः सन्ततश्रियः ।
ममान्तरं तमो घ्नन्तु, राधापदनखेन्दवः ॥

अथ प्रथमोद्द्योते सपरिकरं सामान्यभेदद्वयप्रदर्शनपुरस्सरं ध्वनिंनिरूप्य, विशेषजिज्ञासानिवृत्तये तद्विशेषभेदान्निरूपयितुं द्वितीयमुद्द्योतमुपक्रममाणो विवरणकारः कारिकाऽवतरणमुपन्यस्यति—

अथ ध्वन्यालोके द्वितीय उद्द्योतः ।

एवमविवक्षितवाच्य-विवक्षितान्यपरवाच्यत्वे[न] ध्वनिर्द्विप्रकारः प्रकाशितः । तत्राविवक्षितवाच्यस्य प्रभेदप्रतिपादनायेदमुच्यते—

स्पष्टम् ।

अर्थान्तरे संक्रमित मत्यन्तं वा तिरस्कृतम् ॥
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम् ॥ २३ ॥

अर्थान्तरे वाच्यभिन्ने व्यङ्ग्येऽर्थे संक्रमितं सङ्क्रमितं विशेषणीकृतमितियावत्, वा तथा, अत्यन्तं सर्वथा तिरस्कृतमयोग्यतयाऽनुपात्तमिति द्विधा द्विप्रकारकम्, अविवक्षितवाच्यस्य ध्वनेर्वाच्यं मतमित्यर्थः । वाच्यमिति सामान्ये नपुंसकम् ।

व्यङ्ग्यप्रकारनिरूपणप्रस्तावे वाच्यभेदनिरूपणस्यासङ्गतिमाशङ्कितां समादधाति–

तथाविधाभ्यां च ताभ्यां व्यङ्ग्यस्यैव विशेष इति व्यङ्ग्यप्रकाशनपरस्य ध्वनेरेवायं प्रकारः।

तथाविधाभ्यामर्थान्तरसंक्रमितात्यन्ततिरस्कृताभ्यां, ताभ्यां वाच्याभ्यां, व्यङ्ग्यस्यैव नतु वाच्यस्य विशेषो वैलक्षण्यं भेद इतियावत्, इतिहेतोः, व्यङ्ग्यप्रकाशनपरस्य प्रधानीभूतव्यङ्ग्यव्यञ्जकस्य ध्वनेरेवायं प्रकारो न तु गुणीभूतव्यङ्ग्यादेरित्यर्थः। व्यङ्ग्यभेदनिरूपणोपयोगि वाच्यभेदनिरूपणमिह प्रासङ्गिकं नासङ्गतमितिसारम्।

अविवक्षितवाच्यध्वनेराद्यं भेदमुदाहर्तुमाह—

तत्रार्थान्तरसंक्रमितवाच्यो यथा—

वैदेहीविरहव्यग्रो रामो व्याहरति—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना,
वाताः शीकरिणः पयोदसुहृदा मानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे,
वैदेही तु कथं भविष्यति हहा हा देवि! धीरा भव॥'

स्निग्धामसृणा श्यामला नीलाच या कान्तिस्तया लिप्तमाच्छादितं वियद्गगनं यैस्तादृशाः, तथा वेल्लन्त्यः प्रमदभरेण सविलासंस्फुरन्त्यो बलाका बकपंक्तयो येषु तादृशाघना मेघाः, तथा शीकरिणो वृष्टिसम्पर्केण जललवभृतो वाता वायवः, तथा पयोदःसुहृद्येषां ते, पयोदसुहृदस्तेषां, यद्वा पयोदस्यमेघस्य सुहृदां मित्राणां, केकाशब्दसमासत्त्या केकिनाम्, कला अस्फुटमधुराः, आनन्दकेकाः प्रमोदजमयूरध्वनयः कामं यथेच्छं, सन्तु समुज्जृम्भन्ताम् (ततो मे नभीतिरितिभावः) दृढमत्यन्तं, कठोरहृदयः कर्कशमनाः, रामो दाशरथिदुःखसहनैकशीलप्रसिद्धः, अस्मि। तत् सर्वं मेघाद्युद्दीपनकृताखिलकदनं, सहे मर्षयामि। तु पुनः, वैदेही विदेहराजदुहिता, कथं भविष्यति केन प्रकारेण जीविष्यति। इतिविमृश्य भावनया प्रत्यक्षीक्रियमाणां वैदेहीं तज्जनयित्रीं धरित्रीं वा सद्योमरणोन्मुखीं सम्भाव्याश्वासयति-हहा हा देवि! सीते! अथवा पृथ्वि! धीराभव धृतिंबधान माशोकेन विदीर्णाभूरित्यर्थः। तथा च 'स्निग्धंमसृणम्' इत्यमरः।

अत्र रामपदं स्ववाच्यार्थसम्बद्धं राज्यपरित्याग—भीषणगहनगमन–जटावल्कलवहन–जनकनिधन–दयिताहरणजन्यदुःखातिशयसहनशीलं, तावताऽपि सम्भा-

वितजीवितत्वं च व्यनक्तीति वाच्यो दाशरथिरूपोऽर्थो व्यङ्ग्येष्वर्थान्तरेषु संक्रमित इत्यर्थान्तरसङ्क्रमितवाच्यध्वनिः ।

कान्तेःस्निग्धत्वश्यामलत्वाभ्यां झटितिमनोहरणशक्तिमुखेनोद्दीपनत्वातिशयः, वातानां शीकरित्वेन शैत्यमान्द्ये, बहुत्वेनानियतदिक्सम्बन्धः, तेनानिवार्यता, पयोदसौहृद्येन मयूराणा मानन्दौचिती, केकाया आनन्दजन्यतया भूयः प्रवृत्तिः, ततोऽप्युद्दीपनतरत्वम्, प्रतीयते ।

लेपनसौहृद्ययो श्चेतनमात्रधर्मतया मेघे बाधाल्लिप्तसुहृत्पदयो र्व्यापनोपकारयोर्लक्षणलक्षणायां तत्तदतिशयो व्यङ्ग्य इति संसृष्टाभ्यामत्यन्ततिरस्कृतवाच्यध्वनिभ्या मर्थान्तरसंक्रमितवाच्यध्वनेः सङ्करः । अर्थान्तरसंक्रमितवाच्यध्वनिना च शृङ्गारध्वने रामपदैकवाचकानुप्रवेशेन सङ्करः । शब्दालङ्कारेण च संसृष्टिः ।

'तद्गेहं नतभित्ति मन्दिरमिदं लब्धागाहं दिवः' इत्यादिवक्ष्यमाणश्लोके बुद्धिविषयताऽवच्छेदकत्वोपलक्षित–तत्तद्धर्म्मावच्छिन्नवाचकेन तच्छब्देनैव प्रतीतिसौकर्येऽपि 'नतभित्ति' इतिविशेषणवद्, रामशब्दमहिम्नैव सिद्धे 'कठोरहृदयः' इति विशेषण मर्थान्तरध्वनिं विकासयितुम् । तथाहि—तादृशविशेषणसाहाय्यमेव स्वानुकूलंव्यङ्ग्यमवगमयति । इतरथा रामपदं कौशल्या दशरथप्रीतिपात्रत्वाद्यनुपयोगिव्यङ्ग्यमेव कथं न बोधयेदिति केचिदाहुः ।

यच्च काव्यालङ्कारसारकारः—श्लोकेऽस्मिन् पर्यायोक्तालङ्कारप्रभवमेव चमत्कारमवधार्य ध्वनिमधुनोत्, तन्न निरवद्यम्, व्यङ्ग्यस्यात्र विच्छित्तिविशेषाधायित्वेन गुणीभावाभावात् । शार्दूलविक्रीडितं छन्दः ॥

तदाह—

इत्यत्र रामशब्दः ।

अर्थान्तरसङ्क्रमितवाच्य इति शेषः एवमग्रेऽपि योजनीयम् ॥

उपपादयति—

अनेन हि व्यङ्ग्यधर्म्मान्तररूपपरिणतः सञ्ज्ञी प्रत्याय्यते, नतु सञ्ज्ञिमात्रम् ।

हि यतः अनेन रामशब्देन दाशरथिरूपवाच्यमात्रस्यानुपयोगाद् व्यङ्ग्यधर्म्मान्तरे तादृशदुःखातिशयसहनशीलवत्त्वे, परिणतोऽनुस्यूतः, सञ्ज्ञी दाशरथिरूपो वाच्योऽर्थः, प्रत्याय्यते बोध्यते, नतु सञ्ज्ञिमात्रं केवलो वाच्यइत्यर्थः । अतोऽर्थान्तरसंक्रमितवाच्योऽत्ररामशब्द इति सङ्गतिः ।

'ननु सञ्ज्ञामात्रम्' इति पाठस्त्वसङ्गतः, देवदत्तादिशब्दवदर्थे शक्तस्य रामशब्दस्यानपेक्षप्रवृत्तशब्दरूपायां संज्ञायां शक्त्यभावात् ततः प्रत्यायनासम्भवात् ।

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥'

इत्यानुभविकोक्तेः सङ्केतसम्बन्धेन सञ्ज्ञाशब्दावच्छिन्ने शक्तिं स्वीकुर्वतां शाब्दिकानां नयेऽप्यर्थविधुरायाः सञ्ज्ञायास्ततो बोधो नानुभविक इति दिक् ॥

स्वीयञ्च पद्यमुदाहरति—

यथा ममैव 'विषमबाणलीलायाम्'—

पद्यमितिशेषः । विषमबाणलीलाऽऽख्ये काव्ये ॥

**'ताला जाअन्ति गुणा जाला दे सहिअएहिँ घेप्पन्ति ।
रइकिरणाणुग्गहिआइँ होन्ति कमलाइँ कमलाइँ ॥**

'तदा जायन्ते गुणा यदा ते सहृदयै गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥' इतिच्छाया ।

गुणाः पाण्डित्यादयः, तदा गुणा विशेषप्रशस्यताऽऽश्रया गुणा जायन्ते भवन्ति । यदा ते गुणाः, सहृदयैर्गुणज्ञैः गृह्यन्ते ज्ञायन्ते । रवेः किरणैः, अनुगृहीतानि विकासनेनानुकम्पितानि, कमलानि कमलानि सौरभसौन्दर्य्यादिमन्ति भवन्तीत्यर्थः । जघनविपुलाच्छन्दः ।

अत्र यथा कमलानां सूर्यकिरणसम्प्योगेन विकास एव शोभाद्युत्कर्षः, तथा गुणानां सहृदयावगम एव विशेषप्रशस्यतेति प्रतिवस्तूपमाऽलङ्कारः । 'अर्थान्तरन्यासमाह—रविकिरणेति' इति लोचनलेखस्तु चिन्तनीयः, गुण—कमलादिपदार्थानां मिथः सामान्यविशेष—कार्यकारणभावाभावात् ।

द्वितीयकमलशब्दार्थस्य च व्यङ्ग्यवैशिष्ट्येनाकारभेदाद्विभिन्नधर्मावच्छिन्नप्रकारताकोपस्थितिविषयतायाप्रथमकमलशब्दार्थेन सहाभेदान्वयबोधः । अन्यथा 'अभेदान्वयबोधश्च विरूपोपस्थितयोरेव' इतिव्युत्पत्तिविरोधस्य दुरुद्धरत्वमेव ।

यत्तु रुय्यकेन लाटानुप्रासोदाहरण मिदमुक्तम्, तदसत्, यतः—

'शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः' ।

इति मम्मटोक्ततल्लक्षणघटकतात्पर्यपदं वक्त्रिच्छाविषयीभूतसंसर्गपरं प्रदीपो

द्योतयोर्व्याख्यातम् । तथाचात्र कमलशब्दयो र्न संसर्गमात्रेण भेदः, किन्तूत्तरांशे व्यङ्ग्यसङ्गतेरर्थेनापि भेदः ।

नच वाच्यार्थमात्रमादाय तयोरर्थभेदो वक्तुंशक्यत एवेति वाच्यम् , अर्थसामान्योपादाने व्यङ्ग्यस्य परिहर्तुमनौचित्यात् । अतएव विश्वनाथोऽपि—'नयने तस्यैव नयने च' इत्यत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्यमात्रेण भिन्नार्थः' इतिवदभिदं प्रत्युदाहरणत्वेनोपन्यस्तवान् । अतएव च सप्तमोल्लासे—कथितपदत्वदोष–गुणत्वस्थलपरिगणनावसरे लाटानुप्रासतःपार्थक्येनेदमेव पद्यमर्थान्तरसङ्क्रमितवाच्यध्वनावुदाजहार प्रकाशकारः । इतरथोभयोरेकत्रैव समावेशे पृथगुपादानं वृथा स्यादिति दर्पणविवृतिप्रभृतावपि व्यक्तम् । अधिकं पुनरलङ्कारमञ्जूषायां निरूपयिष्यामः ॥

समन्वयमाह—

इत्यत्र द्वितीयः कमलशब्दः ।

'काकः कृष्णः पिकः कृष्णः कोभेदः पिककाकयोः ।
प्राप्ते वसन्तसमये काकः काकः पिकः पिकः ॥'

इत्यादौ द्वितीयकाकपिकशब्दवदर्थान्तरसङ्क्रमितवाच्यः सौन्दर्यादिगुणान्वितकमलबोधकत्वादितिशेषः ॥

अथात्यन्ततिरस्कृतवाच्यध्वनिमुदाहरति—

अत्यन्ततिरस्कृतवाच्यो यथाऽऽदिकवेर्वाल्मीकेः—

पञ्चवटीस्थो रामो हेमन्तं वर्णयति—

'रविसंक्रान्तलक्ष्मीक स्तुषारावृतमण्डलः ।
निश्श्वासान्ध इवादर्श श्चन्द्रमा न प्रकाशते ॥'

रवौ सङ्क्रान्ता हेमन्ते रवेरेवाह्लादकत्वात् , सङ्गता लक्ष्मीश्शोभा यस्य तादृशः, तथा तुषारैर्हिमैरावृतमाच्छादितं मण्डलं यस्य, स चन्द्रमाः, निश्श्वासेन मुखनासिकाऽनिलेन (तत्संसर्गेण) अन्धोमलिनः, आदर्शो दर्पण इव न प्रकाशते नो भासत इत्यर्थः ।

समन्वयमभिधत्ते—

इत्यत्रान्धशब्दः ।

अत्यन्ततिरस्कृतवाच्य इत्यर्थः । तथाहि—'अन्धदृष्ट्युपघाते' इतिधातुपाठा-

दन्धशब्दस्योपहतदृष्टिके शक्तिरवधार्यते । दर्पणे च दृष्टेरभावान्मुख्यार्थबाधादन्धशब्दो मालिन्यविशिष्टं लक्षयंस्तदतिशयमनुपयोगिताऽऽदि च द्योतयति । नच जनुषाऽन्धेऽप्यन्धशब्दप्रयोगेऽपीयमेवगतिः, गर्भएव तद्दृष्ट्युपघातस्य प्रामाणिकत्वात् । यदनुपहतदृष्टिकेऽपि 'अन्धोऽयं पुरोऽपि न पश्यति' इति प्रयोगः, तस्य तिरस्कृतिद्योतकत्वेन प्रमादिपरतया मुख्यार्थबाधवैधुर्यान्नेदन्त्वम् ।

यदपि भट्टनायकेन—'इवशब्दप्रयोगाद्गौणताऽप्यत्र न काचित्' इत्यनेन मुख्यार्थबाधविरहमुक्त्वाऽयं ध्वनिरितो निराकारि, तदप्यमनोरमम्, इवशब्दस्यात्रदर्पणप्रतियोगिकसादृश्यद्योतकतया सम्भावनाव्यञ्जकत्वाभावादन्धइवेत्युत्प्रेक्षाया अङ्गीकारासम्भवात्, उपमायान्तु मुख्यार्थबाधस्य जागरूकत्वाच्च ॥

पदगतमुदाहृत्य वाक्यगतं तं ध्वनिमुदाहरति—

'गअणं च मत्तमेहं धारालुलिअज्जुणाइँ अ वणाइँ ।
णिरहंकारमिअङ्का हरन्ति णीलाओ वि णिसाओ ॥'

'गगनं च मत्तमेघं धारालुलितार्ज्जुनानि च वनानि ।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशाः ॥' इतिच्छाया ।

मत्ता उद्धता मेघा यत्र तादृशं चापि (न केवलं तारकितं) गगनमाकाशम्, च तथा, धाराभिरासारै र्लुलिता इतस्ततश्चलिता अर्जुना वृक्षा वृक्षविशेषा वा येषु तानि चापि (न परं मलयानिलमन्दान्दोलितमाकन्दानि) वनानि, तथा निरहङ्कारदृशोभादारिद्र्येणापास्तदर्पो विच्छाय इतियावत्, मृगाङ्कश्चन्द्रमा यासु ताः, नीला अपि (नतु चन्द्रिकाक्षालिता एव) निशा रजन्यः, हरन्ति चित्तं वशीकुर्वन्तीत्यर्थः ।

अत्र क्षीवत्वाभिमानयो र्जीवधर्मतया मेघमृगाङ्कयोर्बाधात् क्रमेण परितो भ्रमणं मालिन्यं च लक्षयन्तौ मत्तनिरहङ्कारशब्दौ तदतिशयं व्यङ्क्तः ।

नन्वहङ्कारविरहस्य चन्द्रेऽबाधएवेति कुतोऽत्र लक्षणेति चेत्, मैवम्, अहङ्कारस्य चन्द्रे क्वचित्कदाचिदप्यनुपलम्भात्तदभावस्यापि घटे ज्ञानाभावस्येवोपलब्धुमशक्यत्वात् ॥

तदाह—

अत्र मत्तनिरहङ्कारशब्दौ ।

अत्यन्ततिरस्कृतवाच्या वितिशेषः । पदद्वयापेक्षतयाऽत्र वाक्यध्वनित्वमवधारणीयम् ॥

अथ प्राप्तावसरस्य विवक्षितान्यपरवाच्यध्वनेः स्वरूपप्रदर्शनगर्भं विभागं दर्शयति—

असंलक्ष्यक्रमोद्द्योतः, क्रमेण द्योतितः परः।
विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः॥ २४॥

न सम्यग्लक्ष्योऽसंलक्ष्यः, स क्रमो यत्र, तादृश उद्द्योतः प्रकाशो यस्य स एकोऽसंलक्ष्यक्रमोध्वनिः, क्रमेण द्योतितः संलक्ष्यक्रमः, परो द्वितीयो ध्वनिरिति विवक्षिताभिधेयस्य विवक्षितान्यपरवाच्यस्य, ध्वनेर्ध्वन्यत इति योगात्प्रधानीभूतव्यङ्ग्यस्य, आत्मा स्वरूपं द्विधा द्विप्रकारको मतः सुधीभिरित्यर्थः॥

विवृणोति—

मुख्यतया प्रकाशमानो व्यङ्ग्योऽर्थो ध्वनेरात्मा। स च वाच्यार्थापेक्षया कश्चिदलक्ष्यक्रमतया प्रकाशते, कश्चित् क्रमेणेति द्विधा मतः।

वाच्यविभावादिप्रतीते र्व्यङ्ग्यरसादिप्रतीतौ हेतुतया, ततः प्राक्सत्त्वमवश्यं कल्पनीयमिति तयोः क्रमोऽनायत्या कल्प्यते। किन्तु व्यङ्ग्यप्रतीते राशुभावितयोत्पलदलशतभेदवत् क्रमः सम्यङ् न लक्ष्यते। अतएव वाच्यार्थेन सह तस्य प्रकाशभ्रमोऽपि संघटते। सोऽयमसंलक्ष्यक्रमो नाम ध्वनिः। क्वचित्तु ध्वनिप्रतिध्वनिवद् वाच्यव्यङ्ग्यप्रतीत्योः क्रमः स्फुटं लक्ष्यत एव। सच संलक्ष्यक्रमो ध्वनिरितिद्वैविध्यंध्वनेरितिसारम्। तुल्यमितिपाठे सहेवेत्यर्थः।

विस्तरेण क्रमस्थापना तृतीयोद्द्योते करिष्यते। प्रथमकारिकया वाच्यभेदप्रयोज्यो ध्वनिभेदउक्तः। अनयातु क्रमसम्यग्लक्ष्यालक्ष्यत्वप्रयोज्यः स उच्यत इति विशेषः।

असंलक्ष्यक्रमध्वनिं लक्षयन् विभजते—

तत्र।

तत्र ध्वनिद्वये।

रसभाव-तदाभास-भावशान्त्यादिरक्रमः।
ध्वने रात्माऽङ्गिभावेन भासमानो व्यवस्थितः॥ २५॥

रसा आवरणभङ्गावच्छिन्नरत्याद्यवच्छिन्नचिद्रूपाः शृङ्गारवीरकरुणाद्भुतहास्यभयानकबीभत्सरौद्रशान्तेतिनवप्रभेदाः, भावा रसरूपतासम्पादकविभावादिसंसर्ग-

विरहिताः केवलाः स्थायिनः, प्राधान्येन व्यक्ता व्यभिचारिणश्च, तदाभासा अनौचित्येन प्रवृत्तेर्दुष्टा रसा रसाभासा दुष्टा भावा भावाभासाश्च, तत्प्रशान्तिर्भावस्योक्तरूपस्य शान्तिः प्रशाम्यदवस्था, आदिः प्रधानं यस्य स तादृशः, अक्रमोऽसंलक्ष्यक्रमः, अङ्गित्वेन प्राधान्येन, भासमानः सहृदयचर्वणा—गोचरीभवन् , ध्वनेर्विवक्षितान्यपरवाच्यप्रकारस्य, आत्मा स्वरूपं व्यवस्थितइत्यर्थः ।

समष्टितात्पर्येणादिशब्दादेकवचनम् । तेन च भावोदय—भावसन्धि—भावशबलत्वानि गृह्यन्ते । भावस्योक्तरूपस्योदय उद्गमावस्था, सन्धि स्तयोस्तुल्यकक्षयो र्युगपदास्वादः, शबलता निरन्तरतया तेषां पूर्वपूर्वोपमर्दिनामास्वादः । उदयमात्रस्य शान्तिमात्रस्य चास्वादाभावाद्भावशबलत्वतउदयशान्त्योर्भेदः । विस्तरेण तूद्द्योते नागेशेन तेषां मिथः पार्थक्यं विवेचितम् । अपरिच्छिन्नानन्दचिन्मयब्रह्मसतत्त्वस्य रसस्य शान्त्युदयसन्धिशवलत्वानि नैव सम्भवन्ति, तस्माद्भावानुबन्धीन्येवैतान्यास्वादपदवीमवतरन्ति । ननु विभावानुभावयोरपि भाववच्चमत्कारभूमितया नकथं तद्ध्वनिरितिचेत् , न तयोर्वाच्यतायामेव चमत्कारित्वात् , तच्चर्वणायाश्चित्तवृत्तिष्वेव पर्यवसानाच्च । तयोरपि कथञ्चन व्यज्यमानतादशायान्तु वस्तुध्वनिकुक्षिप्रवेशएवेति लोचने व्यक्तम् । रसभावादीनां स्वरूपनिरूपणमाचार्य्यै राकरेषु, मया रसमञ्जरीसुरभौ च विहितमेवेति नेह तत्प्रतन्यते, उदाहरणानि पुनरेषां क्रमेणविदग्धविनोदाय निर्दिश्यन्ते ।

तत्र सम्भोगशृङ्गाररसो यथा भवभूतेरुत्तररामचरिते—

'किमपि किमपि मन्दं मन्दमासत्तियोगादविरलितकपोलं जल्पतो रक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो रविदितगतयामा रात्रिरेव व्यरंसीत् ॥'

श्रीकृष्णविषयो रतिभावो यथा मम राधापरिणये शक्रसुरभिस्तवे—

'जपारागप्रेङ्खन्महिममहनीयाङ्गुलिदले शरद्राकाऽधीशोज्ज्वलनखमहः केसरवृते ।
पदाम्भोजे भक्तव्रजहृदयभृङ्गोपचरिते तवास्मत्संसारज्वरपरमशान्त्यै प्रभवताम् ॥'

रसाभासो यथा कालिदासस्य कुमारसम्भवे वसन्तवर्णने—

मधुद्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥

यथा वा मदीये राधापरिणये निदाघवर्णने—

'उन्मदोऽसितमणिप्रमलोलद्–भृङ्गजातपरिवीतकपोलः ।

कानने मुकुलितानन कोशां, वासितामनुससार करीन्द्रः ॥

अनयोस्तिर्यग्विषयत्वादनौचित्यप्रवृत्तिः ॥

भावाभासो यथा जगन्नाथस्य भामिनीविलासे करुणोल्लासे—

'सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता विद्याऽपि खेदकलिता विमुखीबभूव ।
सा केवलं हरिणशावकलोचना मे नैवापयाति हृदयादधिदेवतेव ॥

गुरुकन्याविषयकत्वेन रतेरिहानौचित्यप्रवृत्तिः ॥

भावशान्तिर्यथा ऽमरुककवेः शतके—

'सुतनु ! जहिहि कोपं पश्य पादानतं मां न खलु तव कदाचित् कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या नयनजलमनल्पं मुक्तमुक्तं न किञ्चित् ॥'

इह नयनजलमोचनेनेर्ष्यारूपव्यभिचारिभावस्य प्राधान्यभाजः शान्तिः ॥

भावोदयो यथा तस्य तत्रैव—

'चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते ।
व्रजति रमणे निश्श्वस्योच्चैः स्तनस्थितहस्तया नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता॥

अत्र व्यभिचारिणो विषादस्योदयः ॥

भावसन्धिर्यथा भवभूते महावीरचरिते—

'उत्सिक्तस्य तपःपराक्रमनिधे रभ्यागमादेकतः,
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ।
वैदेहीपरिरम्भ एषच मुहुश्चैतन्य मामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥'

इहावेगहर्षयोः समकक्षयोर्व्यभिचारिणोः सन्धिः ॥

शबलता यथा विद्यानाथस्य प्रतापरुद्रयशोभूषणे—

'निन्दन्त्वत्र कुलस्त्रियः प्रियतमो लभ्यः सुखं केन वा,
भाग्येनानुमतं नकिं गुरुजनैः कावा सखी प्रेष्यते ।
किं लोकस्य भवेत्प्रसिद्धमचिरात् स्वच्छन्दमङ्कं कदाऽऽ-
रोक्ष्यामि स्थिरता कदा हृदि भवेद्ध्यातव्य एव प्रियः ॥'

अत्र लज्जा-वितर्क-दैन्य-विषाद-शङ्कौ-त्सुक्य-धृति-मतयो• व्यभिचारिणः क्रमेण प्रतीयन्ते ॥

असंलक्ष्यक्रमत्वोपपत्तिमभिधत्ते—

रसादिरर्थो हि सहेव वाच्येनावभासते। स चाङ्गित्वेनावभासमानो ध्वने रात्मा।

हि यतो रसादिर्व्यङ्ग्योऽर्थो वाच्येन विभावादिना सह इव ननु सहैव, नवा विलम्बेन, अवभासते प्रतीतिविषयोभवति, तस्मादसंलक्ष्यक्रमः, कार्यकारणभावेन निर्णीतस्य क्रमस्य सम्यगलक्ष्यत्वात्। स रसादिश्च, अङ्गित्वेन प्राधान्येन अवभासमानः प्रतीतिगोचरीभवन्, ध्वनेरात्मा स्वरूपमित्यर्थः।

'सहैव' इति पाठस्यासङ्गतिस्तु प्रागेव दर्शिता। अतएव च 'इवशब्देनासंलक्ष्यता विद्यमानत्वेऽपि क्रमस्य व्याख्याता' इति लोचनं सङ्गच्छते॥

नन्वङ्गिनोऽपि रसादिध्वने रसवदाद्यलङ्कारेभ्यः कोभेदः इत्याशङ्कां' कारिकाद्वितयेन समाधातुमवतारयति—

इदानीं रसवदाद्यलङ्कारादलक्ष्यक्रमद्योतनात्मनो ध्वने विभक्तो विषय इति प्रदर्श्यते—

अलक्ष्यक्रमद्योतनात्मनोऽसंलक्ष्यक्रमस्य रसादिध्वनेः। विभक्तोऽतिरिक्तः। विषयोलक्ष्यः। अलङ्कारादिति जातितात्पर्यकमेकवचनं प्रदर्श्यते, प्रस्तुतकारिकाभ्यामितिशेषः॥

वाच्यवाचकचारुत्व-हेतूनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः॥ २६॥

यत्र काव्ये विविधात्मनां नानारूपाणां, वाच्यं च वाचकं च तच्चारुहेतवश्चेति तेषां शब्दार्थ-तदुभयालङ्कारादीनाम्, रसादिपरता प्रधानीभूतरसादिव्यङ्ग्योपस्कारकत्वम्, भवतीतिशेषः, स ध्वने विषयो लक्ष्यो मतः प्रागुक्त इत्यर्थः।

विभागाय पुनरिहोपादानं ध्वनेरवगमनीयम्॥

तदाह वृत्तिकृत्—

रस-भाव-तदाभास-तत्प्रशमलक्षणं मुख्यमर्थमनुवर्तमाना यत्र शब्दार्थालङ्कारा गुणाश्च परस्परं ध्वन्यपेक्षया च विभिन्नरूपा व्यवस्थिताः, तत्र काव्ये ध्वनिरिति व्यपदेशः।

तत्प्रशमपदं भावोदयादीनां त्रयाणामप्युपलक्षणम्। अनुवर्तनमुपस्करणम्।

प्राग्वच्छब्दश्चार्थश्चालङ्काराश्चेतिद्वन्द्वः । शब्दादीनां स्वरूपतोऽधिकरणभेदतश्च भेदोऽवसेयः । अन्यत्स्फुटम् ॥

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥ २७ ॥

तु पुनः, यत्र काव्ये, अन्यत्रान्यस्मिन् स्वभिन्ने वस्त्वलङ्काररसादिरूपे व्यङ्ग्ये, वाच्ये वा वस्त्वलङ्कारलक्षणे, वाक्यार्थे तदर्थबोधे, प्रधाने सति, रसादयो नातिचमत्कारितयाऽङ्गम्, तस्मिन् काव्ये रसादिः—नामैकदेशग्रहणे नामग्रहणं देवदत्तोदत्तः इति न्यायेन रसवदादिः 'रसवत्, प्रेय ऊर्जस्वि, समाहितम्, भावोदयम्, भावसन्धि, भावशबलत्वम्' अलङ्कारो भवतीति मे मतिरित्यर्थः ।

अत्र'मे मतिः' इत्युक्तिरेव खण्डनीयपक्षान्तराणामपि सद्भावं सूचयति । तथाच 'रसादीनामलङ्कार्यत्वेन शब्दार्थवृत्त्यभावेन च नालङ्कारता' 'रसादीनामङ्गितायामेव रसवदाद्यलङ्काराः, अङ्गतायान्तूदात्तालङ्कारस्य द्वितीयोभेदः' 'रसादिषु रूपकादिसाम्यादलङ्कारत्वव्यपदेशो गौणः' इत्यादय औद्भटाः पक्षाः पूर्वपक्षायमाणाःसमुल्लसन्ति।

तत्खण्डनान्यपि क्रमशः 'प्रधानानामेव रसादीनामलङ्कार्यता, प्रकृतेत्वङ्गत्वमेवेत्यलङ्कारतैव, शब्दार्थवृत्तित्वं नालङ्कारतायां नियामकम्, किन्तु चमत्कारः, सच प्रकृतेऽप्यक्षतः । यद्वा व्यङ्ग्यव्यञ्जकभावेन रसादीनां शब्दार्थयोरपि वृत्तिः' 'रसादीनामङ्गित्वे, स्वयमेवालङ्कार्यत्वात् कुतोऽलङ्कारता ? । अङ्गताया मुदात्तालङ्कारप्रकारकल्पना न सम्भवति, तत्र महतां चरितस्यैवोपलक्षणत्वनियमो नतु रसादीनाम्' 'विच्छित्तिविशेषकृत्स्वरूपमुख्यधर्म्मयोगेऽपि कुतोव्यवहारस्य गौणत्वम् ? इत्यादीनि ज्ञेयानि ।

इत्थञ्च रसस्याङ्गत्वे रसवत्, भावस्य प्रेयः, रसाभासस्य भावाभासस्यचोर्ज्जस्वि, भावशान्तेः समाहितम्, भावोदयस्य भावोदयम्, भावसन्धेर्भावसन्धि, भावशबलताया भावशबलत्वं चालङ्कारोऽवधारणीयः ॥

तदाह वृत्तिकारः—

यद्यपि रसवदलङ्कारस्यान्यैर्दर्शितो विषयः, तथापि यस्मिन् काव्ये प्रधानतयाऽन्योऽर्थो वाक्यार्थीभूतः, तस्य चाङ्गभूता ये रसादयः,ते रसादेरलङ्कारस्य विषया इति मामकीनः पक्षः ।

चकारस्त्वर्थकः। उद्भटादिभि र्यद्यपि रसादीनां वाक्यार्थबोधे प्राधान्यएव रसवदाद्यलङ्कारा उक्ताः, किन्तूक्तयुक्त्या सिद्धान्तभूतेऽस्मन्मते रसादीनां तत्राप्रधानतायामेव तेऽलङ्कारा इतिसारम्। यद्यपीत्यनेन परमतस्य युक्तिरिक्तत्वम्, तथाऽपीत्यनेन स्वमतस्यागतार्थत्वं च सूच्यते ॥

निदर्शनेन स्वमतं द्रढयति—

तद्यथा-चाटुषु प्रेयोलङ्कारस्य वाक्यार्थत्वेऽपि रसादयोऽङ्गभूता दृश्यन्ते।

तद् रसादीनामङ्गत्वं यथाऽनुपदंवक्ष्यमाणोदाहरणे—चाटुषु राजादिमृषाप्रशंसासु, भामहोक्तरीत्याप्रेयोऽलङ्कारो यस्मिन् स प्रेयोऽलङ्कारो वाक्यार्थबोधप्रधानीभूतोऽर्थः, तस्य वाक्यार्थत्वे तद्बोधप्राधान्येऽपि, रसादयोऽङ्गभूता दृश्यन्ते, नतु प्रधानीभूता इत्यर्थः।

उद्भटानुसारिणस्तु भिन्नक्रममपिशब्दं मत्वा प्रेयोऽलङ्कारसङ्ग्राहकं वाक्यमिदमङ्गीकृत्य 'चाटुषु (षष्ठयर्थेसप्तमी) चाटूनां वाक्यार्थत्वे प्रेयोऽलङ्कारोऽपि, न केवलं रसवदलङ्कारः' इतिव्याचक्षते।

परन्तु षष्ठयर्थे सप्तम्या अननुशिष्टाया इह कल्पने क्लेशादुक्तं भामहानुसारिव्याख्यानमेव ज्यायः। वस्तुतस्तु चाटुषु प्रशंसनीयविषयकरतिभावस्य प्राधान्याच्च प्रेयोऽलङ्कारत्वम्, तेन तत्र रसादीनां प्रधानीभूतभावाङ्गतयैव रसवदाद्यलङ्कारत्वमिति द्रष्टव्यम् ॥

तत्र रसवदलङ्कारं द्विधा विभजते—

सच रसादिरलङ्कारः शुद्धः सङ्कीर्णो वा।

वाशब्दः स मुच्चये। यत्रान्यामिश्रणं स शुद्धः, यत्रचावयवावयविभावेनान्यमिश्रणं ससङ्कीर्णः। रसादीरसवदादिः ॥

उदाहरति—

तत्राद्यो यथा—

तत्र शुद्धसङ्कीर्णयोर्मध्ये आद्यः शुद्धः।

चाटुकारो राजानं प्रसादयति—

'किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद्दर्शनं,
केयं निष्करुण! प्रवासरुचिता? केनासि दूरीकृतः?।
स्वप्नान्तेष्विति ते वदन् प्रियतमव्यासक्तकण्ठग्रहो,

बुद्ध्वा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः ॥'

हास्येन प्रणयपरिहासेन किम् ? नकिमपि । चिरान्मे दर्शनं दृष्टिविषयं प्राप्तो ननु बुद्धिपूर्वकं स्वयमागतस्त्वं पुन र्न प्रयास्यसि प्रस्थातुं शक्ष्यसि भुजनिगडनिबद्धो मोक्षं न लप्स्यस इति यावत् । हे निष्करुण ! निर्दय ! कान्त ! तव इयमनिवार्या, प्रवासे विदेशवासे रुचिरासक्ति र्यस्य तद्भावः प्रवासरुचिता का ? अनुचितेतियावत् । केन ममापराधेन दुर्भाग्येन वा दूरीकृतः, असि, इत्येवं स्वप्नान्तेषूत्स्वप्नायितेषु, वदन् व्याहरन्, प्रियतमे विशेषादासक्तः सम्बद्धः कण्ठस्य ग्रहो ग्रहणं येन स तादृशः ते तव रिपूणां स्त्रीजनः, बुद्ध्वा जागरित्वा, रिक्तं प्रियेणशून्यं बाहुवलयं भुजमण्डलं यस्य तथाभूतः, तारमुच्चै रोदितीत्यर्थः ।

इह 'किं हास्येन' इत्यनेन हसत एव प्रियतमस्य स्वप्नेऽवलोकनम्, 'न मे प्रयास्यसि पुनः' इत्यनेन भुजशृङ्खलया दृढं सय्यँतस्य मोक्षासम्भवः, द्वाभ्यां शठत्वावगमोत्तरमुपालम्भौचित्यम्, 'निष्करुणे'त्यनेन प्रवासरुचितोपपत्तिः, 'केने'त्यनेन तदसह्यापराधानामपि सदातूष्णीम्मर्षणम्, 'स्वप्नान्तेषु' इति बहुवचनेन स्वप्नानां पुनःपुनरुद्भूततया बहुत्वम्, रिक्तबाहुवलयत्वेन रोदनौचित्यम्, रोदनस्य तारत्वेन शोकस्यासह्यता च सूच्यते ।

अत्र वस्त्वन्तरेणानुपस्कृतः स्वप्नदर्शनोद्दीपितः शोकस्थायिभावकः करुणरसः स्तुत्यराजप्रभावातिशयस्य वस्तुनोऽङ्गमिति शुद्धो रसवदलङ्कारः ॥

तदाह वृत्तिकृत्—

इत्यत्र करुणरसस्य शुद्धस्याङ्गभावात् स्पष्टमेव रसवदलङ्कारत्वम् ।

लक्ष्यान्तराणामपि संङ्ग्रहाय व्याहरति—

एवमेवंविधे विषये रसान्तराणां स्पष्ट एवाङ्गभावः ।

एवंविधे वस्तुप्राधान्यभाजि चाटुरूप इत्यर्थः ।

अथ द्वितीयमुदाहर्तुमाह—

सङ्कीर्णो रसादिरङ्गभूतो यथा—

अमरुककविर्मङ्गलमाचरति—

'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं,
गृह्णन् केशेष्वपास्त श्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन् योऽवधूत स्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः,

कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥"

आर्द्रापराधस्तत्कालकृतपराङ्गनासङ्गलक्षणापराधः, कामीकामुकइव, साश्रूणि भयेन कोपेन च बाष्पपूर्णानि, नेत्रोत्पलानि नयनकमलानि यासां ताभि स्त्रिपुरयुवतिभि स्त्रिपुराम्यरतरुणीभिः, हस्तेऽवलग्नो हस्तस्पर्शी क्षिप्तः पृथक्कृतस्तिरस्कृतश्च, प्रसभं हठात्, अंशुकान्तं वसनाञ्चलम्, आददानो गृह्णन्नपि, अभिहतोनिर्धूत स्ताडितश्च, यद्वा प्रभसमभिहतोऽप्यंशुकान्तमाददानः, केशेषु केशावच्छेदेन गृह्णन्नामृशन्नुपाददच्च, अपास्तो दूरीकृतोऽनादृतश्च, चरणयोर्निपतितो भ्रष्टः प्रणतश्च, सम्भ्रमेण भयेन संवेगेन च नेक्षितोऽनवलोकितः, तथा य आलिङ्गन्नुपगूहन् संस्पृशंश्च, अवधूतः प्रक्षिप्तोऽवहेलितश्च स शम्भोरयं शाम्भवः शिवनियुक्तः, शराग्नि र्बाणवह्निः, वो युष्माकं, दुरितं पापं दहतु भस्मीकरोत्वित्यर्थः ।

तथाच 'सम्भ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि' इति मेदिनी । स्रग्धराच्छन्दः ।

उपादानोपयोगं दर्शयति वृत्तिकारः—

इत्यत्र त्रिपुररिपुप्रभावातिशयस्य वाक्यार्थत्वे, ईर्ष्याविप्रलम्भस्य श्लेषसहितस्याङ्गभाव इत्येवंविधएव रसवदलङ्कारस्य न्याय्यो विषयः ।

अत्रोक्तश्लोके त्रिपुररिपोः शिवस्य, प्रभावातिशयस्य महिमोत्कर्षस्य, वाक्यार्थबोधविषयत्वेन प्राधान्येऽङ्गित्व इति यावत्, श्लेषोपस्कृतस्येर्ष्याविप्रलम्भाख्यश्रृङ्गाररसस्य, अङ्गभावोऽङ्गत्वम्, इति हेतोः, एवं विधएतादृशोऽप्रधानीभूतरसक एव, नतु रसप्राधान्यवानपि, रसवदलङ्कारस्य विषयो न्याय्यो न्यायादनपेतस्समुचित इत्यर्थः ।

अत्रहि शिवप्रभावातिशयोऽङ्गी, परेषांतस्यैवोपस्करणात् तस्येर्ष्याविप्रलम्भोऽङ्गम्, सच न शुद्धः, किन्तुश्लेषालङ्कारप्रसाधित इति सङ्कीर्णस्य रसस्याङ्गत्वम् । श्लेषस्तुक्षिप्तइत्यादिष्वर्थगतः। यद्यपि करुणोऽपीहास्त्येव रसः, तथाऽपि तस्य विच्छित्तिविशेषानाधायकत्वादङ्गाङ्गत्वेनानुपादानमित्येके ।

परेतु श्लेषस्य च्छायात्मनो नेहप्ररोहः, अतः शिवप्रभावातिशयस्याङ्गिनोवस्तुनः शिवविषयकरतेर्भावस्यवा करुणः, तस्य च विप्रलम्भश्रृङ्गारो रसोऽङ्गमित्येवं सङ्कीर्णतां वदन्ति ।

उपोद्घलकमाह—

अतएव चेर्ष्याविप्रलम्भकरुणयोरङ्गत्वेन व्यवस्थानात्समावेशे न दोषः।

अतएव शृङ्गारस्याप्रधानत्वादेव, मिथो विरुद्धयोरपि शृङ्गारकरुणयो रङ्गिनो वस्तुनोऽङ्गत्वेन व्यवस्थानात् स्थितेः, समावेशे सन्निवेशे, न दोषइत्यर्थः।

तृतीयोद्द्योते दर्शयिष्यमाणया रीत्या विरुद्धयोरपि रसयोः समावेशः पराङ्गत्वेन न दोषावहः। यद्युभयो रसयोरङ्गत्वं न स्यात्तर्हि समावेशोऽप्येकत्र दुष्टः स्यादिति सारम्॥

एवंविध एवेत्येवशब्दार्थं समर्थयति—

यत्र हि रसस्य वाक्यार्थीभावः, तत्र कथमलङ्कारत्वम्।

यतो रसः प्रधानम्, तस्मान्नालङ्कार इति निष्कर्षः॥

तत्र हेतुमाह—

अलङ्कारो हि चारुत्वहेतुः प्रसिद्धः। नत्वसावात्मैवात्मनश्चारुत्वहेतुः।

यथाऽऽत्मनः शोभायाः सम्पादकः कटकादिरलङ्कारः, तथाऽङ्गिनो रसादेरुपमाऽऽदिः। इत्थं च प्रधानस्य रसस्येतरचारुतासम्पादकत्वाभावान्नालङ्कारत्वम् तत्त्वे च न प्राधान्यम्। अलङ्कारस्य ध्वन्यमानतादशायां क्वचित्तद्व्यपदेशस्तु गौणो ब्राह्मणश्रमणन्यायेन भूतपूर्वालङ्कारत्वमादायैव, अङ्गित्वालङ्कारत्वयोर्विरोधात्। नहि स्वनिष्ठसुषमायाः सम्पादकः स्वयम्भवितुमर्हति, अलङ्कार्य्यालङ्कारभावस्य भेदप्रतिष्ठानात्।

उपसंहरति—

तथाचायमत्र संक्षेपः—

'रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।
अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्॥ २८॥

सर्वासामुपमाऽऽदीनामलङ्कृतीनामलङ्काराणां, रसभावादीनामुक्तप्रतीयमानप्रधानानां, तात्पर्य्यमलञ्चिकीर्षाम्, आश्रित्य, विनिवेशनं विन्यसनम्, अलङ्कारत्वस्य, साधनंप्रयोजकमित्यर्थः।

रसादेरात्मभूतस्योत्कर्षं कुर्वतामेवोपमादीनामलङ्कारत्वम्, नतु स्वरूपतइतिता-

त्पर्य्यम्। ननु वाच्यवृत्तीनामुपमाऽऽदीनां रसाद्युत्कर्षणमसम्भवि साक्षात्सम्बन्धाभावादितिचेत्, मैवम्, शरीरवृत्तीनां कटककुण्डलादीनां शरीरद्वाराऽऽत्मन इव, काव्यावयववृत्तीनामुपमाऽऽदीनां तदात्मभूतस्य रसादेरवयवद्वारा परम्परयोत्कर्षस्य जनकत्वेऽप्यलङ्कारतायाः सुवचत्वात्।

यथा कटकादयो न शरीरमात्रमलङ्कुर्वन्ति, किन्तु तद्द्वाराऽऽत्मानम्। इतरथा नकथं शवशरीराश्रयिणां तेषामलङ्कारत्वम्। 'अहमलङ्कृतः' 'ममायमलङ्कारः' इत्यादिप्रतीतिविषयताचात्मनएवभवति, नतुशरीरस्य। तथैवोपमाऽऽदयो न केवलं काव्यावयवमलङ्कुर्वन्ति, अपित्वात्मभूतं रसादिम्। क्वचिद्रसादितात्पर्य्यविरहेऽप्यलङ्कारत्वव्यपदेशस्तु सादृश्यहेतुकत्वादौपचारिक एव।

भावबोधकक्तिन्प्रत्ययान्तालङ्कृतिपदस्योपमाऽऽदिबोधकत्वमपि लक्षणामन्तरेण न सम्भवतीति द्रष्टव्यम्॥

पर्यवसितं दर्शयति—

तस्माद्यत्र रसादयोवाक्यार्थीभूताः, स सर्वो न रसादेरलङ्कारस्य विषयः, स ध्वनेः प्रभेदः। तस्योपमाऽऽदयोऽलङ्काराः। यत्र तु प्राधान्येनार्थान्तरस्य वाक्यार्थीभावे, रसादिभिश्चारुत्वनिष्पत्तिः क्रियते स रसादेरलङ्कारताया विषयः।

तस्माद्रसादीनां प्राधान्येऽलङ्कारत्वाभावाद्धेतोः यत्र रसादीनांवाक्यार्थबोधप्राधान्यम्, तत्र न रसवदाद्यलङ्काराणां प्रसरः, किन्तु रसादिध्वनेरेव, रसादीनामलङ्कार्यत्वात्। उपमाऽऽदयस्तु प्रधानीभूतस्य तस्य प्रसाधकत्वादलङ्काराः। यत्र पुनरर्थान्तरस्य वस्तुनोऽलङ्कारस्य रसादेर्वा वाक्यार्थबोधप्राधान्यम्, रसादिभिश्च तस्य चारुत्वस्य शोभाविशेषस्य, निष्पत्तिः सम्पादनं, क्रियते। तत्र रसादीनां प्रधानालङ्कारकत्वादलङ्कारत्वस्य प्रसर इत्यर्थः।

'न रसादेरलङ्कारस्य वा विषयाः' इति पाठस्तु वाशब्दर्थस्यान्वयायोग्यत्वादुपेक्षितः।

रसादीनां प्राधान्ये ध्वनिः उपमाऽऽदीनां तदुपकारत्वेऽलङ्कारत्वम्, रसादेरन्यस्य व्यङ्ग्यस्य प्राधान्ये रसादेः पुनरङ्गत्वे रसवदादयोऽलङ्कारा इति विषयविभागः स्फुटमवगन्तव्यः॥

तदाह—

एवं ध्वनेरुपमाऽऽदीनां रसवदलङ्कारस्य च विभक्तविषयता भवति।

विभक्तो विषयो येषां ते विभक्तविषया स्तेषां भावो विषयविभाग इत्यर्थः ।
तत्र रसवदलङ्कारस्योदाहरणद्वयमुक्तमेव ।
प्रेयसो यथा—

'तद्वक्त्रामृतपानदुर्ललितया दृष्टया क्व विश्रम्यताम् ?
तद्वाक्यश्रवणाभियोगपरयोः श्राव्यं कुतः कर्णयोः ।
एभिस्तत्परिरम्भनिर्भरतरैरङ्गैः कथं स्थीयतां
कष्टं तद्विरहेण सम्प्रति वयं कृच्छ्रामवस्थां गताः ॥'

अत्र चिन्तारूपस्य व्यभिचारिभावस्य विप्रलम्भाङ्गतया प्रेयोऽलङ्कारः ।
ऊर्जस्विनो यथाऽभिनवगुप्तपादानां देवतास्तोत्रे—

'समस्तगुणसम्पदः सममलंक्रियाणां गुणै-
र्भवन्ति यदिभूषणं तव तथाऽपि नो शोभसे ।
शिवं हृदयवल्लभं यदि यथा तथा रञ्जये-
स्तदेव ननु वाणि ! ते जगति सर्वलोकोत्तरम् ॥'

अत्रहि परमेशस्तुतिमात्रं वाचः परमोपादेयमिति वाक्यार्थे शृङ्गाररसाभासोऽङ्गम् ।

'स पातु वो यस्य हतावशेषा-स्तत्तुल्यवर्णाञ्जनरञ्जितेषु ।
लावण्ययुक्तेष्वपि वित्रसन्ति, दैत्याः स्वकान्तानयनोत्पलेषु ॥'

इत्यत्र रौद्रप्रभृतीनामनुचितस्त्रासो भगवत्प्रभावातिशयस्याङ्गम् ।
समाहितस्य यथा—'अक्ष्णोः स्फुटाश्रुकलुषोऽरुणिमा विलीनः,
शान्तं च सार्धमधरस्फुरणं भ्रुकुटया ।
भावान्तरस्य तव चण्डि ! गतोऽपि रोषो,
नोद्गाढ़वासनतया प्रसरं ददाति ॥'

अत्रानौचित्यप्रवृत्तस्य कोपभावस्यशान्ति श्शृङ्गारस्याङ्गम् ।
भावोदयस्य यथा—'सार्कं कुरङ्गकदृशा मधुपानलीलां,
कर्तुं सुहृद्भिरपि वैरिणि सम्प्रवृत्ते ।
अन्याभिधायि तव नाम विभो ! गृहीतं,
केनापि तत्र विषमामकरोदवस्थाम् ॥'

अत्र त्रासभावोदयस्य राजरतिभावाङ्गत्वम् ।
भावसन्धेर्यथा—'जन्मान्तरीणरमणस्याङ्गसङ्गसमुत्सुका ।

सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा ॥'

इहौत्सुक्यलज्जयोर्भावयोः सन्धिः कविनिष्ठपार्वतीविषयकरतिभावस्याङ्गम् ।

भावशबलताया यथा—'पश्येत् कश्चिच्चल चपल ! रे कात्वराऽहं कुमारी,

हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।

इत्थं पृथ्वीपरिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः,

कन्या कश्चित् फलकिसलयान्याददानाऽभिधत्ते ॥'

अत्र शङ्काऽसूया-धृति-स्मृति-श्रम-दैन्य-विबाधौत्सुक्यानां शबलता राजरतेरङ्गम् । एषामलङ्कारसर्वस्वकारोक्तान्युदाहरणानि तु चिन्तनीयान्येव, तेषु भावोदयादेः प्रधानतया व्यङ्ग्यत्वात् ॥

'मेमतिः' इत्यनेन सूचितं परैकदेशिनोमतं निराकर्तुमनुवदति—

यदितु 'चेतनानां वाक्यार्थीभावो रसाद्यलंकारस्य विषयः' इत्युच्यते ।

यदितिवित्यस्य तर्हीत्यनेनाग्रेसरेणान्वयः । चेतनानां चैतन्यभृतां प्राणिनाम् । अयमाशयः पूर्वपक्षिणः—चिद्रूपाणां रसानां, चित्तवृत्तिविशेषरूपाणांभावादीनां च जड़ेऽसम्भवात्तत्प्राधान्येऽचेतनवस्तुवृत्तान्तवर्णने रसवदादयोऽलङ्कारा न सम्भवन्तीति चेतनानामेव वाक्यार्थबोधप्रधानतायां तेषां सद्भावोऽङ्गीकरणीयः ।

निराकरोति—

तर्ह्युपमाऽऽदीनां प्रविरलविषयता निर्विषयता वाऽभिहिता स्यात् ।

तर्हि तत्स्वीकृतौ रसवदाद्यलङ्कारैरुपमाऽऽदीनामपि विषयेषु व्याप्तेषु, तेषामुदाहरणाल्पता, सर्वथोदाहरणाभावो वा स्यादित्येषाऽऽपत्तिः ।

नन्वचेतनचरितवर्णनात्मकान्युपमाऽऽदीनां लक्ष्याणि कुतोरसवदादिभिर्व्याप्येरन्नित्यतआह—

यस्मादचेतनवस्तुवृत्तान्ते वाक्यार्थीभूते, पुनश्चेतनवस्तुवृत्तान्तयोजनया यथाकथञ्चिद्भवितव्यम् ।

यतो जड़सम्बन्धिन्यपि व्यापारे प्राधान्येनवर्णनीये,चेतनसम्बन्धिव्यापारोपारोपो यथाकथञ्चिद् विभावादित्वेनापि भवत्येव । ततश्च जड़मपि वस्तु चेतनव्यापारोपारोपवशाच्चेतनायत इति तत्रापि रसवदादीनामेव साम्राज्यं, न तूपमाऽऽदीनाम्, बलीयसा दुर्बलस्य बाधादितिव्यक्तं निर्विषयत्वमुपमाऽऽदीनाम् ॥

पुनः शङ्कते—

अथ 'सत्यामपि तस्यां यत्राचेतनानां वाक्यार्थीभावो, नासौ रसवदलंकारस्य विषय' इत्युच्यते ।

अथेति यद्यर्थे । तस्यामचेतने चेतनवस्तुवृत्तान्तयोजनायां सत्यामपि, यत्र वस्तुतोऽचेतनानामेव प्राधान्यम्, असौ रसवदलङ्कारस्य न विषयः, चेतनवृत्तान्तारोपेऽपि जड़े चैतन्यविरहेण रसादेर्बोधात् । स एवोपमाऽऽदेर्विषयः' इति भवद्भिरुच्यते चेत्, तदाऽपि न निरवद्यत्वमितिशेषः ॥

तदेव दूषणं दर्शयति—

तन् महतः काव्यप्रबन्धस्य रसनिधानभूतस्य नीरसत्वमभिहितं स्यात् ।

तत् तदा, महतोविपुलस्य वक्ष्यमाणस्यान्यस्यच, काव्यप्रबन्धस्य, रसनिधानभूतस्य रसैकाश्रयतयाप्रसिद्धस्य, नीरसत्वं रसराहित्यम्, अभिहितमुक्तंस्यादित्यर्थः ।

रसप्राधान्ये रसवदलङ्कार इत्युद्भटानुयायिनो मन्यन्ते । नगनगरनदीगहनाद्यचेतनानां वर्णनं प्रायेण महाकवीनां काव्येषु रसैकजीवितेषु च समुपलभ्यते । नच तत्र नीरसत्वं कथञ्चन व्याहर्तुमुचितम्, रससारस्य चमत्कारविशेषस्यानुभूयमानस्यापलपितुमशक्यत्वात्, काव्यत्वाभावप्रसङ्गाच्च । अचेतने चेतनवस्तुवृत्तान्तयोजनायामपि वास्तविकचैतन्याभावे भवन्तः साम्प्रतं रसवदलङ्कारमुपमाऽऽदिविषयरक्षणानुरोधेन नोरीकुर्वन्ति । ततश्च भवन्नयेन नगादिवर्णने रसवतोऽभावे रसाभावोऽप्यर्थत एवापतितः । मन्मते तु तत्र रसवतोऽभावेऽपि रसप्राधान्येन ध्वनेरेव सद्भाव इति नैव नीरसत्वम् । नहि वर्णनीयस्य चैतन्याचैतन्ये अपेक्ष्येते रसास्वादे, अपित्वास्वादयितु रितितत्त्वम् ॥

अचेतनवर्णनमुदाहरति—

यथा—

'तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरसना,
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
यथाऽऽविद्धं याति स्खलितमभिसन्धाय बहुशो-
नदीरूपेणेयं ध्रुवमसहना सा परिणता ॥'

तरङ्गा ऊर्मय एव दैर्घ्यकौटिल्ययोगाद्भ्रुवोर्भङ्गाः क्षेपा यस्याः सा, तथा क्षुभिता तरङ्गाघातेन चञ्चला, विहगश्रेणिः पक्षिपङ्क्तिरेव कलकलस्वनमाचरन्ती रसना काञ्चीयस्याः सा, संरम्भेण त्वरया रोषेण वा शिथिलं श्लथमुच्छ्वसितैबन्धमितियावत्,

वसनमिव धवलं फेनं विकर्षन्ती नीचैः पतदपि प्रियकरग्रहणशङ्कयेव बलान्नयन्ती, बहुशोनैकधा, स्खलितं मदपराधं गतिभङ्गं वा, अभिसन्धायविभाव्य, असहना मानिनीत्वादमर्षणा, सेयं मद्दयिता, नदीरूपेण परिणता सरिदाकारेण पर्यवसिता, यथाऽऽविद्धं सकीलितं, यातीत्यर्थः । दन्त्यमध्योऽपि रसन शब्दः काञ्चीबोधकः ।

दयितापक्षे पूर्वविशेषणयुगले रूपकसमासं विहायोपमितिसमासमेवाश्रयन्ति ।

इहाचेतनायाः सरितश्चरिते गतिविशेषे मानवतीचरितारोपात्सरसताऽनुभूयमानाऽपि भवन्नयेन तिरोधाप्येत ।

पुनरुदाहरति—

यथा वा—

कश्चन सुहृदं व्याहरति—

> 'तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः,
> शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
> चिन्तामौनमिवाश्रिता मधुलिहां शब्दैर्विना लक्ष्यते,
> चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥'

तन्वी कृशा कोमला च, मेघजलेनार्द्रपल्लवतया क्लिन्नकिसलयत्वेन, अश्रुभिर्धौताधरेव क्षालितौष्ठेव, स्वकालस्य पुष्पोद्गमसमयस्य, विरहाद्व्यतिगमाद्, विश्रान्त उपरतः पुष्पोद्गमोयस्याः सा, आभरणैर्भूषणैः शून्या रहितेव, मधुलिहां भ्रमराणां शब्दैर्विना, चिन्तया मत्समागमोपायानुसन्धानेन मौनं तूष्णीम्भावम् आश्रिताऽवलम्बितेव, सा प्रसिद्धा चण्डी कोपना, पादयोः पतितं चरणयोः प्रणतं मामवधूय तिरस्कृत्य, जातानुतापोद्भूतानुशयेव, पुरोलक्ष्यत इत्यर्थः ।

इह लताचरिते कलहान्तरितावृत्तान्तारोपाद्रसवत्ता ।

दार्ढ्याय पुनरप्युदाहरति—

यथा वा—

व्रजादागतमुद्धवं श्रीकृष्णः पृच्छति—

> 'तेषां गोपवधूविलाससुहृदां राधारहस्साक्षिणां,
> क्षेमं भद्र ! कलिन्दशैलतनयातीरे लतावेश्मनाम् ।
> विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना,
> ते जाने जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः ॥'

हे भद्र ! सौम्य ! तेषामद्यापि मनोरमतया मत्स्मृतौलग्नानां, गोपवधूनां विलासे सुहृदां नर्मसचिवानाम्, (तत्रापि) राधाया यद्रहएकान्तक्रीडनं, तस्य साक्षिणां साक्षात्कारिणाम्, कलिन्दशैलतनयाया यमुनाया स्तीरे तटे, (स्थितानाम्) लतावेश्मनां कुञ्जानां, क्षेममनामयं कच्चित् ? अधुना मयि चिरप्रोषिते, स्मरतल्पस्य सुरतशय्यायाः कल्पनाय विन्यासाय यो मृदुरलयः, छेदनोपयोगस्त्रोटनकार्य्यम्, तस्मिन् विच्छिन्ने विरते सति, ते तदीयाः पल्लवाः किसलयाः, विगलन्त्यो जीर्णतया विनश्यन्त्यो नीलास्त्विषः कान्तयो येषां तादृशाः, जरठीभवन्ति पुराणीभवन्तीति जाने मन्य इत्यर्थः ।

इहापि जडलतावेश्मवृत्तौ चेतननर्मसचिववृत्तान्तारोपाद्रसवत्ता ॥

उदाहरणत्रयेऽस्मिन् वक्तव्यमाह—

इत्येवमादौ विषयेऽचेतनानां वाक्यार्थीभावेऽपि चेतनवस्तुवृत्तान्तयोजनाऽस्त्येव ।

व्यक्तोऽर्थः ।

पुनरेकदेशिमतमुपसंहारावसरेऽनुवदति—

अथ यत्र चेतनवस्तुवृत्तान्तयोजनाऽस्ति तत्र रसादिरलंकारः ।

इत्युच्यत इतिशेषः । तत्रापत्तिं दर्शयति—

तदेवं सत्युपमाऽऽदयः प्रविरलविषया निर्विषया वा स्युः ।

व्याख्यातं प्रागेव । तत्र हेतुमाह—

यस्मान्नास्त्येवासावचेतनवस्तुवृत्तान्तो यत्र चेतनवस्तुवृत्तान्तयोजना नास्ति । अन्ततो विभावत्वेन ।

असावीदृशोऽचेतनवस्तुवृत्तान्तएवनास्ति, यस्मिंस्तद्वृत्तान्ते चेतनवृत्तान्तयोजना नास्ति । अन्ततः पर्यवसाने (सर्वप्रकारस्वीकारासद्भावे) विभावत्वेनास्तीत्यन्वयः ।

अयम्भावः—प्रकृतिजडान्यपि चन्द्रचन्दनादीनि चेतनसम्बन्धेन वर्ण्यमानानि वस्तूनि सचेतनानीव शृङ्गारविभावतया यथा चित्तमाक्षिपन्ति, तथैवान्यान्यपि । किञ्च शिखरितरुप्रभृतीनामपि स्तम्भरोमाञ्चादिवर्णनमनायत्यो चेतनत्वमवभासयति यत्रनान्यउपायः, तत्रापि कस्यचिद्रसस्य विभावत्वमागूरणीयम्, विभावत्वस्य वस्तुत्वसमनियतत्वात् । नहीदृशं किमपिवस्तु, यत् कस्यापि रसस्य विभावत्वं नाल-

म्बितुं शक्नुयात् । स्वभावजडोऽपि गिरिः कविवाग्विषयतामवगाहमानः क्वचिच्छृ-ङ्गारस्योद्दीपनत्वम्, कुत्रचिद्भयानकस्याद्भुतस्य वाऽऽलम्बनतामवलम्बतएव । इत्थञ्च सर्वेषु पदार्थेषु रसानां पारम्परिकसम्बन्धस्य दुष्परिहरत्वेन गुणीभावे प्राधान्ये वा रसवदलङ्कारस्य व्यापकतायामक्षुण्णायामुपमाऽऽदीनामेकोऽपिविषयः कोऽप्यवशिष्यते भवन्मते ? ॥

इत्थं परमतं निराकृत्य पर्यवसितं स्वमतं प्रत्यामनति—

तस्मादङ्गत्वेन च रसादीनामलङ्कारता । यः पुनरङ्गी रसो भावो वा सर्वाकारमलङ्कार्य्यः, स ध्वनेरात्मेति ।

सर्वाकारमिति क्रियाविशेषणम् । सर्वथेत्यर्थः अन्यत्स्पष्टम् ॥

गुणगुणिनोरिवालङ्कार्य्यालङ्कारयोरपि भेदोदुरपह्नव इत्यतोऽप्यङ्गिनो रसध्वने रसवदाद्यलङ्कारा भिन्नाएवेतिपरमतमयुक्तमिति रहस्यं सूचयन् विभागगर्भगुणालङ्का-रस्वरूपं प्रदर्शयति—

किञ्च—

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ॥
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥२६॥

येऽङ्गिनं तमर्थं रसमवलम्बन्तेऽधितिष्ठन्ति, ते गुणाः स्मृताः । तु पुनर्येऽङ्गा-श्रिताश्शब्दार्थवर्त्तिनः, ते कटककुण्डलादिवद् अलङ्कारा मन्तव्या इत्यन्वयः ॥

तदाहवृत्तिकृत्—

ये तमर्थं रसादिलक्षणमङ्गिनं सन्तमवलम्बन्ते, ते गुणाः शौर्या-दिवत् । वाच्यवाचकलक्षणान्यङ्गानि ये पुनराश्रिताः, तेऽलङ्कारामन्तव्याः कटकादिवत् ।

शूरतासौजन्यविद्यादयोगुणा यथा 'प्रधानात्मनि विद्यमाना स्तं प्रगुणयन्ति, तथैव माधुर्यौजःप्रसादा रसस्था आत्मभूतं रसादिम् । यथा च वलयकेयूरादयः शरीरस्थाअलङ्काराश्शरीरद्वाराऽऽत्मानं भूषयन्ति, तथैव च शब्दार्थनिष्ठा अनुप्रासो-पमाऽऽदयश्शब्दार्थद्वारा रसादिम् । इत्थंच गुणलङ्कारयोरात्मभूताद्रसान्मिथश्च लोक-वन्महान्भेदः । अतएव 'रसोत्कर्षप्रयोजकत्वविशिष्टरसमात्रवृत्तित्वं गुणत्वम् 'रसो-त्कर्षप्रयोजकत्वविशिष्टशब्दार्थान्यतरवृत्तित्वमलङ्कारत्वम्' इति तयोर्लक्षणे पर्यव-

स्यतः । लक्षणद्वयघटकरसपदं रसादिपरम्, रस्यतआस्वाद्यतइतिरस इतिव्युत्पत्तेः । अलङ्कारलक्षणविशेषस्त्वलङ्कारचन्द्रिकायां द्रष्टव्य इति सारम् ॥

गुणानां रसमात्रवृत्तित्वेऽपि शब्दार्थवृत्तित्वप्रसिद्धिं कथञ्चिदुपपादयति—

तथाच—

शृङ्गार एव मधुरः परः प्रह्लादनो रसः ॥
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥३०॥

यतः परः प्रह्लादनोमधुरोरसश्शृङ्गारएव अतो माधुर्य्यं गुणस्तन्मयं शृङ्गारप्रधानं, काव्यं शब्दार्थावाश्रित्य व्यङ्ग्यव्यञ्जकभावेनाधिष्ठाय प्रतितिष्ठतीत्यन्वयः ।

रतेरापामरमाकीटञ्च प्रमोदातिशयमयत्वप्रसिद्धेस्तत्सारस्य शृङ्गारस्य सुतरां तत्त्वमिति माधुर्यनामा गुणो यद्यपि साक्षात्तत्रैव तिष्ठति, तथाऽपि शृङ्गारव्यञ्जकशब्दार्थयोरप्युपचारेण प्रतिष्ठतो भवतीति व्यञ्जकत्वेन गुणवत्ताशब्दार्थयोर्वर्ततएव—
'गुणवृत्त्या पुनस्तेषां वृत्तिश्शब्दार्थयोर्मता' इतिमम्मटानुशासनात्, तथैव तृतीयोद्द्योतेऽपि व्यवस्थापयिष्यमाणत्वाच्च ।

नचाग्रेसरेण 'करुणेच प्रकर्षवत्' इति करुणरसेऽपि माधुर्यगुणप्रकर्षबोधकग्रन्थेन शृङ्गारभिन्नरसेषु माधुर्यव्यावृत्तिंबोधयत एवकारस्य सत्त्वाद् 'शृङ्गारएवमधुरः' इत्यस्य विरोध इति वाच्यम्, काव्यात्मनि शृङ्गारएव माधुर्य्यं नतु शब्दार्थयोरितिशब्दार्थवृत्तित्वव्यावृत्तावेवैवकारस्य तात्पर्य्यपर्यवसानात् ।

नचैवं माधुर्य्यादेश्शब्दार्थवृत्तित्वप्रसिद्धेरनुपपत्तिः, उपचारस्य तदुपपादकस्य जागरूकत्वात् ॥

तदभिप्रेत्याह वृत्तिकृत्—

शृङ्गार एव रसान्तरापेक्षया मधुरः प्रह्लादहेतुत्वात् प्रकाशनपरः। शब्दार्थतया काव्यस्य स माधुर्यलक्षणो गुणः ।

प्रकाशनं चित्तस्य निर्गलितत्वरूपा द्रुतिः । इतरद् व्यक्तम् ॥

नन्वेतावता माधुर्यातिरिक्तगुणयोरश्रव्यत्वमापततीत्यत आह—

श्रव्यत्वं पुनरोजसोऽपि साधारणमिति ।

द्रुतिजनकत्वं माधुर्य्यएव, श्रव्यत्वं सुशब्दतया श्रवणेच्छाविषयीभूतत्वं श्रव-

णानुद्वेजकत्वं दीर्घसमासाभावो वा, पुनः ओजसः—

'दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति' इतिमम्मटलक्षितस्य दीप्तिजत्व-रूपस्य गुणविशेषस्यापि साधारणं तद्वृत्त्यपि। इतरथा गुणत्वापायसम्भवात्।

इदमुक्तम्भवति—'योयश्शस्त्रं बिभर्ति' इत्यादिवक्ष्यमाणौजोगुणोदाहरणेऽपि-श्रव्यत्वमस्त्येव। अतो माधुर्यलक्षणे परव्यावर्तकत्वेन तत्प्रवेशो नोचितः। तेन—

'श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते' इत्यस्यमाधुर्य्यलक्षणत्वं भामहा-भिमतमपास्तम्। ओज ✕पदञ्च प्रसादस्याप्युपलक्षकम्॥

गुणानां शब्दार्थयोरौपचारिकींवृत्तिं भङ्गया स्थापयति—

शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्॥

माधुर्य, मार्द्रतां याति यतस्तत्राधिकं मनः॥३१॥

यतो विप्रलम्भशृङ्गारे, ततोऽपिकरुणे, मनः, अधिकमुत्तरोत्तरम्, आर्द्रतां द्रुतिं द्वेषादिजन्यकाठिन्यशून्यतामितियावत्, याति प्राप्नोति, तस्मात्तत्र क्रमशो माधुर्यम्—

'आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्' इतिप्रकाशोक्तलक्षणं (गुणः) प्रकर्षवद् विच्छित्तिविशेषकृदित्यर्थः।

इत्थंच व्यङ्गयत्वेन व्यञ्जकयोश्शब्दार्थयोरपि गुणास्तिष्ठन्त्येवेति निष्पन्नम्॥

तदेवाह—

विप्रलम्भशृङ्गारकरुणयोस्तु माधुर्यमेव प्रकर्षवत्, सहृदयहृदया-वर्जनातिशयनिमित्तत्वादिति।

रसवृत्तित्वेनैव गुणानान्तत्त्वम्। प्रकाशेतु—

'करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्' इति ताभ्यामपि शान्तेरसे माधुर्यप्रकर्षउक्तः।

गुणप्रसङ्गादाह-

रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः॥

तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम्॥३२॥

काव्यवर्तिनश्शब्दार्थव्यङ्ग्याः, रौद्रादयो रौद्रवीराद्भुताख्या रसा दीप्त्या चेतस्समुज्ज्वलत्वेन लक्ष्यन्तेप्रतीयन्ते । तस्मात्तद्व्यक्तिहेतू दीप्तेः रौद्रादीनां वा व्यञ्जननिमित्तभूतौ शब्दार्थौ, आश्रित्य व्यङ्ग्यव्यञ्जकभावेनावलम्ब्य, ओजो (गुणः) व्यवस्थितमित्यर्थः ॥

सारं निर्दिशतिवृत्तिकारः—

रौद्रादयो हि रसाः परां दीप्तिमुज्ज्वलतां जनयन्तीति लक्षणया त एव दीप्तिरित्युच्यते ।

दीप्तिर्नाम ज्वलितत्वमिव चित्तस्य विस्तारात्मा वृत्तिविशेषः, तज्जनको गुणओजस्तत्र दीप्तिपदम् 'आयुर्घृतम्' इतिवत् तत्कारणत्वाल्लाक्षणिकम् । दीप्त्याश्रया रौद्रादयो रसाः, तेष्वपि गृहादारा इतिवत् तात्स्थ्याल्लाक्षणिकमेव । एवकारस्त्वप्यर्थकः ।

तद्व्यञ्जकं शब्दमुपदिशति—

तत्प्रकाशनपरः शब्दो दीर्घसमासरचनाऽलङ्कृतंवाक्यम ।

तदोजोगुणं दीर्घसमासया रचनयाऽलङ्कृतं वाक्यं व्यनक्तीति निष्कर्षः । समासदैर्ध्यमर्थौद्धत्यादेरुपलक्षणम् ॥

तादृशं शब्दमुदाहरति । भीमसेनो याज्ञसेनीं क्रुद्धोऽभिधत्ते—

'चञ्चद्भुजभ्रमितचण्डगदाऽभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य ॥
स्त्यानावबद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि!भीमः॥'

चञ्चता वेगवशादावर्तमानेन भुजेन भ्रमिता घूर्णिता चण्डा भीषणा या गदा, तस्या अभिघातेन सम्यक् चूर्णितं संक्षुण्णमूरुयुगलं जङ्घाद्वयं यस्य, तस्य सुयोधनस्य दुर्योधनस्य, स्त्यानं स्निग्धमवबद्धं संलग्नं, यद्घनं सान्द्रं, शोणितं रुधिरं, तेन शोणोरक्तः पाणिः करो यस्य, स भीमः (शत्रुभीषणोऽहम्) हे देवि ! तव कचान् वेणीकृतकेशान्, उत्तंसयिष्यति शेखरविशिष्टान् करिष्यतीत्यर्थः ।

तथा च 'स्त्यानं स्निग्धे' इति मेदिनी । 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे' इत्यमरश्च । इह 'भीमः' इत्यर्थान्तरसङ्क्रमितवाच्यध्वनिसङ्कीर्णो देवीतिसम्बोधनबोधितराजावरोधविरुद्धविविधधर्षणापराधस्मरण दीपितक्रोधप्रधानरौद्ररसध्वनिः । तद्व्यञ्जकन्तु दीर्घसमासादिविशिष्टवाक्यम् । वसन्ततिलकं छन्दः ॥

प्राप्तावसरं रौद्रादिव्यञ्जकमर्थमुपदिशति—

तत्प्रकाशनपरश्चार्थोऽनपेक्षितदीर्घसमासरचनःप्रसन्नवाचकाभिधेयः ।

न केवलं तादृशः शब्दएव, किन्तु अनपेक्षिता दीर्घसमासारचना यत्र, तादृशस्य, प्रसन्नस्य प्रसादगुणव्यञ्जकस्य, वाचकस्य, अभिधेयोऽर्थश्चापि, तस्यौजसोदीप्तेर्वा व्यञ्जकइत्यर्थः ॥

उदाहरति—

यथा—

क्रुद्धोऽश्वत्थामा वक्ति—

'यो यश्शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां,
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ॥
यो यस्तत्कर्मसाक्षी, चरति मयि रणे यश्च यश्च प्रतीपः,
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥'

पाण्डवसम्बन्धिनीनांचमूनां सेनानां मध्ये, स्वभुजयोः (बलस्य) गुरुर्मदोऽभिमानोयस्य तादृशो योयः शस्त्रं बिभर्त्ति धारयति । (तथा) पाञ्चालगोत्रे द्रुपदवंशे, यो यः शिशुः स्तनन्धयः, अधिकवयाः स्थविरश्च, गर्भशय्यां गर्भावस्थां गतः प्राप्तो वाऽस्ति । (तथा) योयस्तस्य मृतद्रोणशिरश्चरणाभिमर्शलक्षणस्याग्राह्यनाम्नः कर्मणः, साक्षी द्रष्टा चास्ति । (तथा) मयि रणे चलति सति यश्च यश्च प्रतीपः प्रतिकूलो भवति । तस्य तस्य, स्वयं जगतामन्तकस्यापि (काकथाऽन्येषाम् ?) क्रोधेनान्धोऽहम् अन्तको नाशको भवामीत्यर्थः ।

अत्रोद्धतस्यार्थस्य दीर्घसमासवाक्यवाच्यत्वाभावेऽप्योजोगुणव्यञ्जकत्वम् । स्रग्धराच्छन्दः ॥

तदाह—

इत्यादौ द्वयोरोजस्त्वम् ।

पूर्वश्लोके समासदैर्घ्याच्छब्दस्य, इहत्वौद्धत्यादर्थस्य व्यञ्जकत्वेनौजोगुणविशिष्टत्वमित्यर्थः ॥

प्रसङ्गात्प्रसादं निरूपयति—

समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ॥
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥ १२ ॥

काव्यस्य सर्वरसान्प्रति तु यत् समर्पकत्वं सकलरसव्यञ्जकत्वम्, स सर्वसाधारणी सर्वरसानुकूला क्रिया वृत्ति र्यस्य, तादृशः प्रसादो गुणो ज्ञेय इत्यन्वयः ॥

विवृणोति—

प्रसादस्तु स्वच्छता शब्दार्थयोः । स च सर्वरससाधारणो गुणः सर्वरचनासाधारणश्चेति व्यङ्ग्यार्थापेक्षयैव मुख्यतया व्यवस्थितो मन्तव्यः ।

इतिर्हेतौ । एवकारोऽप्यर्थकः । शब्दस्य स्वच्छता झटित्यर्थोपस्थापकता, अर्थस्य तु झटित्युपस्थितिविषयता, ताभ्यां श्रोतुश्चित्तस्य सुतरां प्रसादनात्प्रसादइत्यन्वर्था सञ्ज्ञा । अस्य च माधुर्यवदोजोवच्च न रसानां न च शब्दानामर्थानां वा प्रति नियमोऽस्तीति सर्वसाधारणोऽयं प्रसादोगुणः । अतएवायं व्यङ्ग्यानां रसानामपेक्षयाऽपि प्राधान्येन व्यवस्थितो बोध्य इत्यर्थः ।

गुणानां रसापेक्षयाऽपि मुख्यत्वमिति भट्टभामहमतेनेदमुच्यते । अर्वाञ्चस्तु—

'ये रसस्याङ्गिनो धर्माश्शौर्यादय इवात्मनः ॥
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥'

इतिलक्षयित्वा गुणानांरसवृत्तित्वेऽपि तदुपकारकत्वेनाङ्गत्वमेव न प्राधान्यमित्यातिष्ठन्ते ॥

इत्थं गुणालङ्कारयो र्विभक्तोव्यवहारो यथा प्रागुक्तोद्भट—प्रतिभटमते समुपपन्नः, तथादोषाणां नित्यानित्यत्वयो विभक्तोव्यवहारोऽपि तन्मतएवोपपद्यत इत्युद्भटमतमत्र नादेयमित्याह—

श्रुतिदुष्टादयो दोषा अनित्या येच दर्शिताः ॥
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥ ३४ ॥

श्रुतिदुष्टादय इतिभावप्रधानो निर्देशः, दोषाणां धर्मरूपत्वात् । वृत्तिग्रन्थ—लोचनव्याख्ययोर्दर्शनेन 'दर्शिताः' इत्यत्र 'सूचिताः' इतिपाठः साधीयान् प्रतिभाति ।

श्रुतिदुष्टत्वप्रभृतयो येऽनित्यादोषाः सूचिता न तु विभज्य दर्शिताः, ते ध्वन्यात्मनि प्राधान्येन व्यङ्ग्ये शृङ्गारे रस एव नतु रौद्रादौ हेयाः परित्याज्या इति, उदाहृताअभियुक्तैरुक्ता इत्यर्थः ॥

विवृणोति—

अनित्या दोषाश्च ये श्रुतिदुष्टादयः सूचिताः, तेऽपि न वाच्येऽर्थमा-

त्रे न च व्यङ्ग्ये शृङ्गारव्यतिरेकिणि वा ध्वनेरनात्मभावे, किन्तर्हि, ध्वन्यात्मन्येव शृङ्गारेऽङ्गितया व्यङ्ग्ये ते हेया इत्युदाहृताः।

श्रुतिदुष्टत्वं श्रवणोद्वेजकताऽवच्छेदकधर्मवत्त्वम्। आदिपदेन लचनोक्तार्थदुष्टत्वदीनां सङ्ग्रहः। अनित्यत्वं तेषां काचित्कतया। वाच्यमात्रप्रतीतौ शृङ्गारस्य व्यङ्गयस्याङ्गत्वेन प्रतीतौ शृङ्गारातिरिक्तरसानां व्यङ्गयानामङ्गित्वेन प्रतीतौ च तेषामदुष्टत्वम्, केवलं शृङ्गारध्वनावेव दुष्टत्वमितिस्वरसः। आचार्यास्तु शृङ्गारवच्छान्ताद्भुतवीरध्वनावपि तेषां दुष्टत्वमेवाहुः।

तेषांकाचित्कताऽनभ्युपगमे दोषमाह—

अन्यथा हि तेषामनित्यदोषतैव न स्यात्।

त एवानित्यदोषाः, ये क्वचिद् दोषा भवन्ति, क्वचिन्नैव, यदिश्रुतिकटुत्वादीनां तथात्वं न स्यात्, तदाऽनित्यदोषताऽपि न स्यादितिभावः। एतत्सर्वं रसादीनामङ्गित्वे ध्वनित्वमङ्गीकुर्वतामेव मत उपपन्नमितिद्रष्टव्यम्।

उपसंहरति—

एवमसंलक्ष्यक्रमोद्द्योतोध्वनेरात्मा प्रदर्शितः सामान्येन।

एवमुक्तप्रकारेण, ध्वनेः, असंलक्ष्यक्रमोद्द्योतः आत्मास्वरूपम्, सामान्येनाविशेषेण, प्रदर्शितोवर्णित इत्यर्थः।

तेषां विशेषेणानुक्तेः हेतुमाह—

तस्याङ्गानां प्रभेदा ये भेदाः स्वगताश्च ये॥
तेषामानन्त्यमन्योन्यसम्बन्धपरिकल्पने॥ ३५॥

तस्याङ्गिनोरसादेः, अङ्गानामुपकारकाणामलङ्कारादीनां, ये प्रभेदा उपमाऽऽदयः, च तथा स्वगताः स्वीया ये प्रभेदा रसभावादयः सम्भोगविप्रलम्भादयश्च, तेषामन्योऽन्यं मिथः, सम्बन्धपरिकल्पने सङ्करसंसृष्टिसम्पादने कृते सति, आनन्त्यमनवधित्वं वियत इति ते विशेषेण न प्रदर्शिता इत्यभिप्रायः॥

तदाह वृत्तिकारः—

अङ्गितया व्यङ्ग्यो रसादिर्विवक्षितान्यपरवाच्यस्य ध्वनेरेक आत्मा य उक्तः, तस्याङ्गानां वाच्यवाचकानुपातिनामलङ्काराणां ये प्रभेदा निरवधयो, ये च स्वगतास्तस्याङ्गिनोऽर्थस्य रसभावतदाभासतत्प्रशमलक्षणा विभावानु-

भावव्यभिचारिप्रतिपादनसहिता अनन्ताः स्वाश्रयापेक्षया निस्सीमानो विशेषाः, तेषामन्योऽन्यसम्बन्धपरिकल्पने क्रियमाणे, कस्यचिदन्यतमस्यापि रसस्य प्रकाराः परिसङ्ख्यातुं न शक्यन्ते, किमुत सर्वेषाम् ।

तत्प्रशमपदं तदुदयादीनामप्युपलक्षणम् । रसानां मध्य एकस्यापि परै रसभावादिभि र्विभावादिभि रलङ्कारप्रकारैश्च प्रचुरैः सङ्करेसंसृष्टौ च प्रकारा असङ्ख्येया एवेति तत्त्वम् ।

तदेव प्रकारानन्त्यमुपपादयति—

तथा हि—शृङ्गारस्यैवाङ्गिन स्तावदाद्यौ द्वौ भेदौ, सम्भोगोविप्रलम्भश्च । सम्भोगस्य च परस्परप्रेमदर्शनसुरतविहरणादिलक्षणाः प्रकाराः । विप्रलम्भस्याप्यभिलाषेर्ष्याविरहप्रवासविप्रलम्भादयः । तेषां च प्रत्येकं विभावानुभावव्यभिचारिभेदाः । तेषां च देशकालाद्याश्रयावस्थाभेदा इति स्वगतभेदापेक्षयैव तस्यापरिमेयत्वम्, किंपुनरङ्गप्रभेदकल्पनया । ते हि प्रभेदाः प्रत्येकमङ्गिप्रभेदसम्बन्धपरिकल्पने क्रियमाणे सत्यानन्त्यमेवोपयान्ति ।

प्रेम्णादर्शनं प्रेमदर्शनम्, सुरतं चातुष्षष्टिकमालिङ्गनादि, विहरणमुद्यानसञ्चरणम् । अभिलाषः केवलः पूर्वरागः । ईर्ष्या मानमूलभूताऽक्षमा । विरहएकदेशस्थयोरप्येकतराननुरागगुरुजनलज्जापारवश्यदैवप्रतिबन्धकार्य्यान्तरादिहेतुको ऽसँय्योगः । प्रवासो विदेशस्थितिः । प्रथमादिपदग्राह्या आलापजलक्रीडापानकप्रभृतयः । द्वितीयादिपदग्राह्यः करुणविप्रलम्भः । तदुक्तं दर्पणे—

यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैक स्तदा भवेत् करुणविप्रलम्भाख्यः ।' इति ।

केचित्तु शापहेतुकमपि विप्रलम्भं मन्यन्ते ।

यद्येकः श्रृङ्गाररसश्शुद्धस्वीयप्रकारै रेवैतावद्भिः सम्बद्धोविशेषेणपरिसङ्ख्यातुं न शक्यते, तर्हि का कथा परैः सम्बद्धस्य तस्य, परेषां वा रसानामिति समासेनैव गणना विहितेति सारम् ।

तदेवाह कारिकाकारः—

दिङ्मात्रं तूच्यते येन व्युत्पन्नानां सचेतसाम् ॥
बुद्धिरासादितालोका सर्वत्रैव भविष्यति ॥ ३६ ॥

इत्थं रसादिध्वने र्भेदानामसङ्ख्यत्वे, तु पुनः, दिङ्मात्रम् उच्यते, 'अनया रीत्याऽसंलक्ष्यक्रमध्वनिभेदाज्ञेयाः' इति दिशाप्रदशनंमार्गप्रदर्शनमिति यावत् केवलं क्रियते। येन दिग्दर्शनमात्रेण व्युत्पन्नानां विशेषज्ञानां सचेतसां बुद्धिः सर्वत्रैव रसादिध्वनेरनिर्दिष्टेष्वपि प्रकारेषु, आसादितालोका प्राप्तप्रकाशा भविष्यतीत्यर्थः।

व्यासेन वक्तुमशक्यत्वे वा, सप्रतिभानां दिग्दर्शनादपि सकलतत्त्वावगमः सम्पत्तुमर्हतीति समासेनैवासंलक्ष्यक्रमध्वनिरुच्यत इत्याकूतम्।

यदेवाचष्टे—

दिङ्मात्रकथनेन हि व्युत्पन्नानां सहृदयानामेकत्रापि रसभेदे कर्तव्येऽलङ्कारेऽङ्गाङ्गिभावपरिज्ञानादासादितालोका बुद्धिः सर्वत्रैव भविष्यति।

करणं विभज्यान्वाख्यानम्। अन्यद् व्यक्तम्।

दिशमेव दर्शयति—

तत्र।

दिङ्मात्रदर्शने कार्य्ये। पूर्वमियदवगमनमावश्यकमितिशेषः।

शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धनात्॥
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः॥ ३७॥

अङ्गिनः शृङ्गारस्य सर्वेष्वेव प्रभेदेषु, यत्नाद्यत्नतः क्रियमाणाद्, एकरूपस्य समानाकारस्य, अनुबन्धनात्सम्पादनाद्धेतोः, अनुप्रासः—'अनुप्रासो वर्णसाम्यं वैषम्येऽपि स्वरस्य यत्' इतिलक्षितोऽर्थानुसन्धानविधुरः शब्दालङ्कारः न प्रकाशको नैवव्यञ्जक इत्यर्थः॥

विवृणोति—

अङ्गिनो हि शृङ्गारस्य ये उक्ताः प्रभेदाः, तेषु सर्वेष्वेकप्रकारानुबन्धितया प्रबन्धेन प्रवृत्तोऽनुप्रासो न व्यञ्जकः।

अयंभावः—शृङ्गारध्वनिं सुकुमारतरं तएवालङ्कारा उपस्कुर्वन्ति, येषां निबन्धने पृथग्यत्नो नापेक्ष्यते। अनुप्रासनिबन्धेतु समानस्वरूपकशब्दानुसरणात्मा यत्नोऽपरिहेय इतिनायं तदलङ्करणक्षमः॥

'अङ्गिनः' इतिनिवेशस्य फलं प्रकटयति—

अङ्गिन इत्यनेनाङ्गभूतस्य शृङ्गारस्यैकरूपानुबन्ध्यनुप्रासनिबन्धने कामचारमाह।

शृङ्गारस्य कारिकायामङ्गित्वेन विशेषणाद्ध्वनेरेवानुप्रासो न भासकः, तस्य गुणीभावे रसान्तरध्वनौ च कामचारः स्वाच्छन्द्यमित्यर्थः ॥

तुल्यन्यायादाह—

ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ॥
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ॥३८॥

ध्वन्यात्मभूते शृङ्गारे शृङ्गारध्वनौ, तत्रापि विशेषतो विप्रलम्भे तद्ध्वनौ, यमकम्—

'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ॥
क्रमेण तेनैवावृत्ति र्यमकं विनिगद्यते ॥'

इति दर्पणलक्षितमादिर्येषां ते तदादयः सभङ्गश्लेषचित्रभाषासमप्रभृतयः, तेषां निबन्धनं सन्निवेशनं कवेः शक्तौ प्रतिभायां सत्यामपि प्रमादित्वमनवधानं स्खलनमिति यावद्भवतीत्यर्थः ॥

तदाह—

ध्वनेरात्मभूतः शृङ्गारस्तात्पर्येण वाच्यवाचकाभ्यां प्रकाश्यमानः, तस्मिन् यमकादीनां यमकप्रकाराणां निबन्धनं दुष्करशब्दभङ्गश्लेषादीनां शक्तावपि प्रमादित्वम् ।

आदिशब्देन चित्रभाषासमप्रभृतीनां परिग्रहः । अन्यद् व्याख्यातमेव ॥

प्रमादित्वपदकृत्यमाह—

'प्रमादित्वम्' इत्यनेनैतद्दर्श्यते—काकतालीयेन कदाचित्कस्यचिदेकस्य यमकादेर्निष्पत्तावपि, भूम्नाऽलङ्कारान्तरवद्रसाङ्गत्वेन निबन्धो न कर्तव्य इति ।

काकतालीयेन काककृततालफलोपभोगवदकस्मात्, कदाचित्तु सर्वदा, कस्यचिदेकस्य यमकादेर्निष्पत्तौ सन्निवेशेऽपि, न क्षतिः, किन्तुऽलङ्कारान्तरवद् रूपकादि-

रसोपकारकान्यालङ्कारवद् रसाङ्गत्वेन रसोपकाराभिप्रायेण, भूम्ना बाहुल्येन तस्य निबन्धो न कर्तव्य इत्यर्थः ।

काकतालीयपदसाधनमन्यत्रावलोकनीयम् । बाहुल्येन निबद्धो यमकादिः प्रधानीभूतश्रृङ्गारं नोपकरोतीत्याशयः ॥

कारिकाचतुर्थचरणकार्यमाह—

'विप्रलम्भे विशेषतः' इत्यनेन विप्रलम्भे सौकुमार्यातिशयः ख्याप्यते । तस्मिन् द्योत्ये यमकादेरङ्गस्य निबन्धो नियमान्न कर्तव्य इति ।

विप्रलम्भश्रृङ्गारो हि सुकुमारतरः स्तनीयांसमप्यन्यव्यासङ्गं न सहत इत्येकोऽपि यमकादिनिबन्धस्तद्ध्वनौ न कार्यइतिभावः ।

ननु कस्तर्हि श्रृङ्गारादिध्वनावलङ्कारः ? इतिपृच्छायामाह—

अत्र युक्तिरभिधीयते ।

रसादिध्वनावलङ्कारयोजनोपाय उच्यत इत्यर्थः ॥

रसाक्षिप्ततया यस्य बन्ध श्शक्यक्रियो भवेत् ॥
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ॥ १६ ॥

रसादिध्वनौ सएवालङ्कारो मत उपकारकः स्मृतः । योऽपृथग्यत्नेन निर्वर्त्यो नान्तरीयकतया रसबन्धानुकूलप्रयासेनैव निष्पाद्यो भवेत् । किञ्च यस्यबन्धस्सन्निवेशो रसाक्षिप्ततया रसैकतानतया शक्यक्रियः कर्तुं शक्योभवेदित्यर्थः ॥

तदाह—

निष्पत्तावाश्चर्यभूतोऽपि यस्यालङ्कारस्य रसाक्षिप्ततयैव बन्धः शक्यक्रियो भवेत्, सोऽस्मिन्नलक्ष्यक्रमव्यङ्ग्ये ध्वनावलङ्कारो मतः । तस्यैव रसाङ्गत्वं मुख्यमित्यर्थः ।

रसनिबन्धप्रवणधियाऽबुद्धिपूर्वकं कृतोऽलङ्कारबन्धः सम्पन्नोऽवधीयमानः 'कथमयं निष्पन्नः' इत्याश्चर्य्यमुदञ्चयेद्यः, स एव रसादिध्वनावलङ्कारः, तस्यैव प्रधानं रसोपकारकत्वम्, नेतरेषाम् । अतएव संग्रहश्लोकेष्वनुपदं वक्ष्यंति—'रसेऽङ्गत्वं तस्मादेषां न विद्यते' इति ।

रसबन्धानुकूलव्यापारेणैवानुषङ्गिकतयाऽकस्मान्निष्पन्नानामेव मुख्यमलङ्कारत्वम् । इतरेषान्तु तत्साम्याद्गौणमिति तात्पर्यम् ॥

अपृथग्यत्ननिर्वर्त्यमलङ्कारमुदाहरति—

यथा—

मानिनीमनुनयन्नायको ब्रवीति—

'कपोले पत्त्राली करतलनिरोधेन मृदिता,
निपीतो निश्श्वासैरयममृतहृद्योऽधररसः॥
मुहुः कण्ठे लग्नस्तरलयति बाष्पस्तनतटं,
प्रियो मन्युर्जातस्तव निरनुरोधे! नतु वयम्॥'

हे निरनुरोधे! निरपेक्षे! तव कपोले गण्डे, पत्राली चन्दनपत्ररचना, करतलस्य निरोधेन विषादाद्वामहस्तमण्डलस्यावरोधेन मृदिता प्रोञ्छिता। तथा—अयंप्रत्यक्षी-क्रियमाणः, अमृतमिव हृद्योमनोरमः, अधररसः, निश्श्वासैः खेदायतायतोच्छ्वासैः, निपीतो निकामं पीतः। तथा—कण्ठे लग्नो गलाधिष्ठितः, बाष्पोऽश्रु मुहुस्तनतटं तर-लयत्यान्दोलयति। तेन तव मन्युः क्रोधः प्रियो जातोऽजनि, तु पुनर्वयं न जाता इत्यर्थः। तथाच 'मन्युर्दैन्ये क्रतौक्रुधि' इत्यभिधानम्।

क्रोधानुरोधेनास्मत्त्यागस्त्वया क्रियते, नत्वस्मदनुरोधेन क्रोधत्यागइत्युपालम्भ-स्तात्पर्यविषयः।

अत्र वक्त्रपेक्षया मानस्य नायिकाप्रियत्वेन निष्पद्यमानो व्यतिरेकालङ्कारोऽपृथ-ग्यत्ननिष्पन्नत्वाद्विप्रलम्भश्रृङ्गारध्वनिमुपस्करोतीति तस्य तदङ्गत्वम्॥

पर्यवसितमाह—

रसाङ्गत्वे च तस्य लक्षणमक्षुण्णमपृथग्यत्नं निर्वर्त्येत इति।

योऽलङ्कारः, अपृथग्यत्नं पृथक्प्रयासमन्तरेण निर्वर्त्येते निष्पाद्यते कविनेति-शेषः। इतिहेतोस्तस्य रसाङ्गत्वे लक्षणमलङ्कारवृत्तिस्तदितरव्यावर्तको धर्मः, अक्षुण्णं व्यापकं सङ्गतमितियावत्। यद्वा तस्यालङ्कारस्य रसाङ्गत्वे लक्षणम्, अक्षुण्णम्, यतः सोऽपृथग्यत्नं निर्वर्त्यते। यद्वा लक्षणमेवापृथग्यत्नं निर्वर्त्येत इत्यन्वयः॥

अथ यमकादीनां रसध्वने रङ्गत्वाभावमुपपादयति—

रसं बन्धुमध्यवसितस्य कवेर्योऽलङ्कारस्तां वासनामत्यूह्य यत्नान्तर-मास्थितस्य निष्पद्यते, स न रसाङ्गमिति। यमके च प्रबन्धेन बुद्धिपूर्वकं क्रियमाणे नियमेनैव यत्नान्तरपरिग्रह आपतति शब्दविशेषान्वेषणरूपः।

रसनिबन्धाय कृताध्यवसायस्य कवेः, तां रससम्बन्धिनीं वासनां संस्कारशृङ्खलाम्, अत्यूह्यातिक्रम्य यत्नान्तरं समानशब्दान्वेषणादिलक्षणं रसानुपयोगिनमन्यं व्यापारम्, आस्थितस्य कृतवतस्तस्य, योऽलङ्कारो निष्पद्यते, स न रसाङ्गम् , रसप्रतिकूलव्यापारनिष्पन्नत्वात् । बुद्धिपूर्वकं यमकं निबध्नामीति ज्ञानपुरस्सरं प्रबन्धेन बाहुल्येन क्रियमाणे निबध्यमाने यमके तु, शब्दविशेषस्य समानाकारकासमानार्थकशब्दस्यान्वेषणरूपं यद्यत्नान्तरम्, तस्य परिग्रहः स्वीकारो नियमेनैव, आपतत्यापन्नोभवतीत्यर्थः ।

नहि प्राग्दर्शितव्यतिरेकवद् रसवासनयैव विपुलं यमकमप्यनायासेन कविना निबन्धुं शक्यम्, व्यापारान्तरसाध्यत्वात् । तस्मान्न रसाङ्गंयमकमिति सारम् ॥

तुल्यन्यायेनाशङ्क्य समाधत्ते—

अलङ्कारान्तरेष्वपि तत् तुल्यमिति चेत्, मैवम्, अलङ्कारान्तराणि हि निरूप्यमाणदुर्घटनान्यपि रससमाहितचेतसः प्रतिभानवतः कवेरहम्पूर्विकया परापतन्ति ।

अन्येष्वप्यलङ्कारेषु निबन्धनीयेषु कश्चनभिन्नप्रयत्नो ऽवश्यमपेक्ष्यते, अर्थविशेषान्वेषणस्वरूपः, अन्यथा रसादितोभिन्नानामुपमाऽऽदीनां निष्पत्तिरेव न स्यात् । एवञ्च यमके यथा प्रयत्नान्तरनिष्पाद्यत्वम् , तथैवान्यत्रापीति कथं तेषामपि रसाङ्गत्वम् ? इतिशङ्क्यते चेन्न, हि यतो रसैकतानमानसस्य सप्रतिभस्य कवे रसे निबन्धनीये,निरूप्यमाणदुर्घटनान्यपि निष्पत्त्युत्तरं विचारे दुष्करत्वेन प्रतिभासमानान्यपि, अलङ्कारान्तराणि परेऽर्थालङ्काराः, अहम्पूर्विकया अहंपूर्वमहम्पूर्वमितियस्यां क्रियायां तया नितान्तत्वरया, परापतन्त्युपतिष्ठन्तीत्यर्थः ।

सप्रतिभस्य कवे रसानुकूलायासेनैवालङ्कारान्तराणि निष्पद्यन्त इतितेषांनैव यमकतुल्यत्वमितिसारम् ॥

स्वोक्तिं द्रढयितुमुदाहरति—

यथा कादम्बर्याम्—कादम्बरीदर्शनावसरे । यथा च मायारामादिशिरो दर्शनविह्वलायां सीतादेव्यां सेतौ ।

कादम्बरीनाम्नि बाणस्य कथाकाव्ये चन्द्रापीडस्य कादम्बरीदर्शनकाले पूर्वार्धोपान्ते, सेतौ प्रवरसेनविरचितप्राकृतमयसेतुबन्धमहाकाव्य एकादशाश्वासके मेघनादेन माययाछिन्नस्य दर्शितस्य च रामादिशिरसो दर्शनेन विह्वलायाः सीतायाः

'अह तेहि' इति५२श्लोकतआश्वासकान्तं यावद्वर्णिते विलापे च रसानुसन्धानेनैव प्रवृत्ते प्रबन्धे तदुपकारिणोऽलङ्कारा अनितरयत्ननिष्पन्नाः स्फुरन्तीत्यर्थः ।

उक्तं समर्थयति—

युक्तं चैतत्, यतो रसा वाच्यविशेषैरेवाक्षेप्तव्या स्तत्प्रतिपादकैश्च शब्दैः तत्प्रकाशिनो वाच्यविशेषा एव रूपकादयोऽलङ्काराः, तस्मान्न तेषां बहिरङ्गत्वं रसाभिव्यक्तौ । यमकदुष्करमार्गे तु तत् स्थितमेव ।

एतदर्थालङ्काराणामहम्पूर्विकया परापतनं च युक्तमुचितम्, यतो वाच्यविशेषै स्तत्प्रदिपादकैश्शब्दैरेव च रसा आक्षेप्तव्या व्यञ्जनीयाः, रसप्रकाशनकारणानि रूपकादयश्चार्थालङ्कारत्वाद्वाच्यार्थरूपा एवेतितेषां रसव्यञ्जने बहिरङ्गत्वमनुपयोगित्वं साक्षादनुपयोगित्वं वा नास्ति । प्रयत्नविशेषसाध्यत्वाद्दुष्करे यमके तु तद्बहिरङ्गत्वं स्थितमेव, नत्वपनेतुं कथञ्चन शक्यत इत्यर्थः ॥

ननु शिशुपालवधे षष्ठसर्गे माघस्य, रघुवंशनवमसर्गे कालिदासस्य च बाहुल्येन यमकनिबन्धो दृश्यते, स किं रसध्वनिविधुरएवेत्याशङ्कां समादधाति—

यत्तु रसवन्ति कानिचिद् यमकादीनि दृश्यन्ते, तत्र रसादीनामङ्गता यमकादीनां त्वङ्गितैव ।

रसादीनामङ्गत्वमप्राधान्यम्, यमकाद्यलङ्काराणामेव तत्र प्राधान्यमित्यर्थः ॥

विशेषमाह—

रसाभासे चाङ्गत्वमप्यविरुद्धम् ।

रसाभासस्य तादृशसौकुमार्यविरहाद्यमकादय उपकारका इत्यर्थः ॥

निगमयति—

अङ्गिता तु व्यङ्ग्ये रसे नाङ्गत्वम् पृथग्यत्ननिर्वर्त्यत्वाद् यमकादेः ।

उक्तानर्थान् वृत्तिकृत्त्रिभिः श्लोकैः सङ्गृह्णाति—

यमकादेः पृथग्यत्ननिर्वर्त्यत्वाद् व्यङ्ग्ये रसेऽङ्गिता नत्वङ्गत्वमित्यन्वयः ॥

अस्यैवार्थस्य संग्रहश्लोकाः—

"रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित् ।
एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः ॥
यमकादिनिबन्धे तु पृथग्यत्नोऽस्य जायते ।
शक्तस्यापि, रसेऽङ्गत्वं तस्मादेषां न विद्यते ॥

रसाभासाङ्गभावस्तु यमकादेर्न वार्यते ।
ध्वन्यात्मभूते शृङ्गारे त्वङ्गता नोपपद्यते ॥'

महाकवेरसवन्ति सालङ्काराणि च कानिचिद् वस्तूनि, एकेनैव प्रयत्नेन निर्वर्त्यन्ते । शक्तस्याप्यस्य यमकादिनिबन्धेतु यतः पृथग्यत्नो जायते, तस्मादेषां यमकादीनां रसेऽङ्गत्वं न विद्यते । यमकादे रसाभासाङ्गभावस्तु न वार्यते, ध्वन्यात्मभूते शृङ्गारे तु पुनरङ्गता नोपपद्यते यमकादेरित्यन्वयः ॥

केषां तर्ह्यलङ्काराणां रसाङ्गत्वम् ? इत्याकाङ्क्षायां कारिकामवतारयति—

इदानींध्वन्यात्मभूतस्य शृङ्गारस्य व्यञ्जकोऽलङ्कारावर्ग आख्यायते—

ध्वन्यात्मभुते शृङ्गारे समीक्ष्य विनिवेशितः ।
रूपकादिरलङ्कारवर्ग एति यथार्थताम् ॥ ४० ॥

शृङ्गारे ध्वन्यात्मभूते सति, समीक्ष्य वक्ष्यमाणां रसोपयोगित्वसमीक्षां विधाय, प्रबुद्धेन कविना विनिवेशितो निबद्धः, रूपकादिरर्थालङ्कारवर्गः, यथार्थतां रसोपयोगितया वस्तुतोऽलङ्कारत्वं चारुताहेतुतामितियावत्, यान्तीत्यर्थः ॥

तदेव विवृणोति—

अलङ्कारो हि बाह्यालङ्कारसाम्यादङ्गिनश्चारुत्वहेतुरुच्यते वाच्यालङ्कारवर्गश्च रूपकादिर्यावानुक्तो वक्ष्यते च कैश्चित्, अलङ्काराणामनन्तत्वात्, सर्वोऽपि यदि समीक्ष्य विनिवेश्यते, तदलक्ष्यक्रमव्यङ्ग्यस्य ध्वने रङ्गिनः सर्वएवचारुत्वहेतु र्निष्पद्यते ।

बाह्यालङ्कारो लौकिकालङ्कारः । उक्तोभामहादिभिः । वक्ष्यते च ग्रन्थकृतोऽर्वाचीनैः । कविप्रतिभाऽनन्त्यादलङ्काराणामानन्त्यम् ।

यथा कटककुण्डलादिरलङ्कारः समीक्ष्य सन्निवेशितएवशरीरस्य शोभां जनयन्नलङ्कारत्वंभजति, तथैव रूपकादी रसस्य । नहिकरे धृतोनूपुरश्चरणे धृतो वलयश्च शरीरस्य शोभांजनयतीति भावः ।

समीक्षामभिधत्ते—

एषा चास्य विनिवेशने समीक्षा—

विवक्षा तत्परत्वेन नाङ्गित्वेन कथञ्चन ।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता ॥

निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् ।
रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम् ॥ ४२ ॥

तत्परत्वेन रसाद्यङ्गत्वेन, न तु स्वयमङ्गित्वेन विवक्षा । कालेऽउचितावसरे ग्रहणमुपादानं त्यागश्च । अतिनिर्वहणैषिता ऽत्यन्तनिर्वाहस्येच्छा न । निर्व्यूढौ निर्वाहेऽपि यत्नेन, अङ्गत्वेऽप्राधान्ये, प्रत्यवेक्षणं पर्यालोचनम् । इति सर्वं रूपकादेरलङ्कारवर्गस्य अङ्गत्वसाधनं रसाद्युपकारकत्वकारणमित्यर्थः ॥

अथ 'यमलङ्कारं तदङ्गतया विवक्षति नाङ्गित्वेन, यमवसरे गृह्णाति, यमवसरे त्यजति, यं नात्यन्तं निर्वोढुमिच्छति, यं यत्नादङ्गत्वेन, प्रत्यवेक्षते, स एवमुपनिबध्यमानो रसाभिव्यक्तिहेतु र्भवतीतिवितर्तं महावाक्यम्, इतिलोचनोक्तमहावाक्यस्य प्रथमांशप्रतिपाद्यमुदाहर्तुमाह—

रसबन्धेष्वत्यादृतमनाः कविर्यमलङ्कारं तदङ्गतया विवक्षति (स) यथा ।

तदङ्गतया रसाद्युपकारकत्वेन । विवक्षति विवक्षाविषयीकरोति ।

दुष्यन्तनृपोमधुपं वक्ति—

'चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं,
रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकगतः ॥
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं,
वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती ॥'

हे मधुकर ! वयं किङ्कर्तव्यमितितत्त्वस्यान्वेषान्मार्गणाद्विवेचनादितियावत्, हतानष्टा अभीष्टासिद्धेः, त्वं खलु निश्चितं पुनर्वा, कृतीधन्यो ऽभीष्टसिद्धे रसीतिशेषः । यतोऽस्याः चलापाङ्गां लोलकटाक्षां, वेपथुमतीं सकम्पां, दृष्टिं बहुशोऽसकृत्, स्पृशसि । तथा रहस्यस्य गुप्तार्थस्य, आख्यायी वक्तेव, कर्णान्तिकं श्रवणसमीपं गतः प्राप्तः, मृदुकोमलं स्वनसि शब्दायसे । तथा करौ व्याधुन्वत्या स्त्वद्भीत्या विक्षिपन्त्याः कम्पयन्त्या वा, रतौ रते र्वा सर्वस्वमधरं पिबसीत्यर्थः । शिखरिणीच्छन्दः ।

'केयम् ? मत्परिग्रहयोग्या नवा, तत्त्वेऽपिमय्यनुरक्ता न वा, अपरिचितायां च साहसं नोचितम्' इत्यादि बहुविवेचयतैव स्वमनोरथो व्यर्थीकृतः । त्वया पुनः साहसिकेन मदुचितमुपभोगमाचरता धन्यत्वं लब्धमितिमदपेक्षया त्वमेवोत्कृष्ट इति

व्यतिरेकोऽत्रस्फुटः, तदुक्तं चन्द्रालोके—'व्यतिरेको विशेषश्चेदुपमानोपमेययोः ॥'इति॥

सङ्गमयति—

अत्रहि भ्रमरस्वभावोक्तिरलङ्कारो रसानुगुणः ।

अत्रोक्तश्लोके भ्रमरस्वभावोक्तेः—'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्' इतिमम्मटलक्षितस्स्वभावोक्त्यलङ्कारोरसस्य श्रृङ्गारस्यानुगुण उत्कर्षाध्यायकत्वादङ्गभूत इत्यर्थः । वस्तुतस्तु भ्रमरासाधारणधर्मवर्णनाभावान्नस्वभावोक्तिः, किन्तु व्यतिरेकएवाङ्गिकचमत्कारभूमिरलङ्कारः । इत्थं च भ्रमरस्य स्वभावे उक्तिर्यस्येति बहुव्रीहिः । समुदितं पदं च व्यतिरेकपरमवगमनीयम् ॥

यत्त्विह रूपकमपि केचनोचिरे, तन्न कस्मिंश्चिदप्यंशे तादात्म्यारोपादर्शनात् । इह श्रृङ्गाररससन्निवेशव्यासक्तेन कविनाऽपृथग्यत्नेनैव निवेशितोव्यतिरेकः श्रृङ्गारं पुष्णन्नङ्गत्वं भजन्नलङ्कारतां वास्तविकीं श्रयतीति विभावनीयम् ॥

तद्द्वितीयांशं व्याचष्टे—

नाङ्गित्वेनेति-प्राधान्येन ।

अङ्गित्वेनेत्यस्य प्राधान्येनेति विवृतिः । कथञ्चनप्राधान्येन न विविक्षा, किन्त्वलङ्कारस्य रसाङ्गत्वेनैवेत्यर्थः । प्राधान्येन विवक्षायान्तु गुणीभूतव्यङ्गयत्वभवति ॥

तत्तृतीयांशमुदाहर्तुमाह—

कदाचिद्रसादितात्पर्येण विवक्षितोह्यलंकारः कश्चिदङ्गित्वेन विवक्षितो दृश्यते ।

कश्चिदलङ्कारः कदाचित् पूर्वं, रसादितात्पर्येण रसाद्युपकारकत्वेन विवक्षितोऽपि, प्राधान्येन पश्चाद्विवक्षितो दृश्यत इत्यर्थः ॥

यथा—चक्राभिघातप्रसभाज्ञयैव, चकार यो राहुवधूजनस्य ।
आलिङ्गनोद्दामविलासवन्ध्यं, रतोत्सवं चुम्बनमात्रशेषम् ॥'

यो भगवान्, चक्रेण सुदर्शनेन, अभिघातो हननं चक्राभिघातः, तत्र प्रसभाज्ञाऽलङ्घनीयो नियोग, स्तयैव नत्वन्यथा, राहो स्तमोग्रहस्य यो वधूजनः, तस्य, रतोत्सवं निधुवनविनोदम्, आलिङ्गनमुद्दाममुत्कटं प्रधानंवा येषु तैर्विलासै र्वन्ध्यं शून्यम्, अतएव चुम्बनमात्रं शेषमवशिष्टं यस्मिंस्तादृशं चकारेत्यर्थः । राहोश्शिरश्छिच्छेदेति भावः ॥ अलङ्कारस्याङ्गित्वान्नरसोपयोगित्वम् ।

अत्राह—

अत्र हि पर्यायोक्तस्याङ्गित्वेन विवक्षा, रसादितात्पर्ये सत्यपि ।

अत्रास्मिन् पद्ये रसादितात्पर्ये सत्यपि रसस्य शृङ्गारवीरकरुणान्यतमस्य विष्णुविषयकरतिभावस्य विवक्षायां सत्यामपि, राहुवधूजननिधुवन-चुम्बनमात्रशेषीकरणोक्तेः राहुशिरश्छेदपर्यवसायितया पर्यायोक्तालङ्कारस्यैवाङ्गित्वेन विवक्षेत्यर्थः ।

यद्यपि रसादिप्रतीतिरप्यत्र भवत्येव किन्तु तेषांप्राधान्येनाविवक्षितत्वादङ्गता, पर्यायोक्तस्य त्वलङ्कारस्याङ्गिता चमत्काराधिक्यादितिसारम् ।

केचित्तु रसादिमिहाविवक्षितमेव मन्वते, तदसमञ्जसम्, स्फुटमङ्गत्वेनावभासमानानां तेषां विवक्षाया अपलपितुमनर्हत्वात् ।

तच्चतुर्थपञ्चमांशावुदाहर्तु माह—

अङ्गित्वेनाविवक्षितमपि यमवसरे गृह्णाति, नानवसरे ।

यमलङ्कारम्, अङ्गित्वेनाविवक्षितमपि, अवसरे रसाद्युपयोगोचितसमये गृह्णात्युपादत्ते, नत्वनवसरे अनवसरे तं नोपादत्त इत्यर्थः ।

एतेन 'काले च ग्रहणत्यागौ' इति प्रागुक्तं विवृतम् ॥

तत्र काले ग्रहणमुदाहरति—

अवसरे गृहीतिर्यथा—

अलङ्कारस्येतिशेषः । गृहीतिरुपादानम् ॥

अग्निमित्रो ब्रवीति—

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ॥
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं,
पश्यन्कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥'

उद्दामोत्कलिकामुत्कटोद्गतकुड्मलाम्, पक्षेसमधिकोत्कण्ठाम्, विशेषेण पाण्डुररुचं पीतवर्णाम्, क्षणात्तस्मिन्नेवावसरे प्रारब्धा जृम्भा विकासः पक्षे मन्मथकृतोऽङ्गमर्दोमुखविकासो वा यया, ताम्, अविरलैर्निरन्तरैः, श्वसनोद्गमैर्वसन्तमारुतोल्लासैः, पक्षे श्वासोल्लासैः, आत्मनआयासमान्दोलनयत्नं पक्षे हृदयस्थितखेदम्, आतन्वतीं विदधतीं पक्षे प्रकटयन्तीम्, मदनेन मरुबकेण पक्षे मन्मथेन सहिताम्, अन्यां देव्या धारिण्या भिन्नां नारीमिव । अद्य, इमां पुरोवर्तिनीम्, उद्यानस्योपवनस्य लतां

पश्यन्, अहम्, देव्याधारिण्यामुखं कोपेन विपाटलाऽतिरक्ताद्युति र्यस्य तादृशं ध्रुवमवश्यं करिष्यामीत्यर्थः ।

तथाच 'कथितोत्कलिकोत्कण्ठा' 'जृम्भाविकासजृम्भणयोः' इतिमेदिनी । 'पिण्डीतकोमरुबकः श्वसनः करहाटकः । शल्यश्चमदने' इत्यमरश्च ॥

उपादानोपयोग माचष्टे—

इत्यत्र श्लेषस्य ।

श्लेषस्य श्लेषानुप्राणितोपमाया भविष्यदीर्ष्याविप्रलम्भशृङ्गारस्यानुगुणत्वेनावसरे ग्रहणमित्यर्थः । पूर्णोपमाऽत्र रसमुपकरोत्येवेत्यवसरे रसस्यप्रमुखीभावदशायां तदुपादानमुचितमित्याशयः ॥

काले त्यागमुदाहर्तुमाह—

गृहीतमपिच यमवसरे त्यजति, तद्रसानुगुणतयाऽलङ्कारान्तरापेक्षया ।

उपात्तमप्यलङ्कारं यत्त्यजति, तद्रसानुगुण्यादन्यस्यालङ्कारस्यापेक्षयेत्यर्थः । यदाऽन्यमलङ्कारं कविर्नितरां रसोपयोगिनं पश्यति, तदोपात्तमप्यलङ्कारं त्यजति रसोपयोगातिशयानाधानादित्याकूतम् ॥

उदाहरति—

यथा—

अशोकं विरही व्याहरति—

रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे ! मामपि ॥
कान्तापादतलाहति स्तव मुदे तद्वन्ममाप्यावयोः,
सर्वं तुल्यमशोक ! केवलमहं धात्रा सशोकः कृतः ॥

हे अशोक ! वञ्जुल ! त्वं नवपल्लवैरक्तो लोहितोऽसि, अहमपि श्लाघ्यैः प्रशंसनीयैः, प्रियायागुणैरक्तोऽनुरक्तोऽस्मि । हे सखे ! स्मरधनुषोमदनचापात्, पक्षे पुष्पात् । मुक्ताः, शिलीमुखा बाणाः पक्षेभ्रमराः, त्वामायान्ति त्वदुपरिपतन्ति मामप्यायान्ति । यथा कान्तायाः पादतलेनाहतिस्ताडनं तव मुदे मोदजननाय भवति, तद्वत् कान्तापादतलाहतिः ममापि मुदे भवतीति सर्वमावयोस्तुल्यमस्ति, केवलं धात्रा दुर्दैवेनाहंसशोकः कृतोऽस्मीत्यर्थः ।

तथाच 'रक्तोऽनुरक्ते नील्यादिरञ्जिते लोहिते त्रिषु' इति मेदिनी । 'भृङ्गबाण

शिलीमुखौ' इत्यनेकार्थध्वनिमञ्जरी। 'वञ्जुलोऽशोके' इत्यमरः। 'पादाघातादशोको विकसति बकुलः सीधुगण्डूषदानात्' इति कविसमयश्च ॥

सङ्गमयति—

अत्र हि प्रबन्धप्रवृत्तोऽपि श्लेषो व्यतिरेकविवक्षया त्यज्यमानो रसविशेषं पुष्णाति।

अत्र श्लोके प्रबन्धप्रवृत्त आदिमचरणत्रयनिर्व्यूढोऽपिश्लेषश्चतुर्थचरणस्थव्यतिरेकस्य रसानुगुणतमस्यानुरोधेन त्यज्यमानो रसविशेषं विप्रलम्भश्रृङ्गारं पुष्णातीत्यर्थः। रक्तशिलीमुखशब्दयोरशब्दश्लेषः शब्दस्य परिवृत्त्यसहत्वात्, कान्तापादतलाहतिरित्यत्रतु तदभावादर्थश्लेषः। रक्तत्वादिभिः साधर्म्ये प्रतिपादितेऽपि सशोकत्वेनात्मन उपमेयस्य न्यूनतायाः प्रतिपादनाद्व्यतिरेकः। भवतिहि 'हनूमदाद्यैर्यशसा मया पुन, र्द्विषांहसै र्दूत्यपथः सितीकृतः' इत्याद्युदाहरणस्य 'न्यूनताऽथवा' इतिलक्षणस्य च सद्भावादुपमानादुपमेयस्य न्यूनतोक्तावपि व्यतिरेकालङ्कारः। 'सशोकशब्देन व्यतिरेकमानयतां शोकसहभूतानां निर्वेदचिन्ताऽऽदीनां व्यभिचारिणां विप्रलम्भपरिपोषकाणामवकाशोदत्तः' इति लोचनम् ॥

उक्तश्लोके श्लेषव्यतिरेकयोः सङ्करं शङ्कते—

नात्रालङ्कारद्वयसन्निपातः, किन्तर्हि? अलङ्कारान्तरमेव श्लेषव्यतिरेकलक्षणं नरसिंहवदिति चेत्।

अत्र श्लोकेऽलङ्कारद्वयस्य स्वतन्त्रयोः श्लेषव्यतिरेकयोः, सन्निपातः समावेशो, नास्ति, किन्तु मनुष्यसिंहयोर्नरसिंहो यथा सङ्कर, स्तथैव तयोरङ्गाङ्गिभावेन सङ्कर इत्याकूतम् ॥

खण्डयति—

न, तस्य प्रकारान्तरेण व्यवस्थापनात्।

तस्य श्लेषव्यतिरेकसङ्करस्य ॥

तदेवप्रकारान्तरं दर्शयति—

यत्र हि श्लेषविषय एव शब्दे प्रकारान्तरेण व्यतिरेकप्रतीतिर्जायते, स तस्य विषयः।

यत्र श्लेषस्य विषये लक्ष्यएव शब्दे प्रकारान्तरेणोपकार्यत्वेन व्यतिरेकालङ्कारस्य प्रतीतिर्जनकतासम्बन्धेन जायते, स तस्य श्लेषव्यतिरेकसङ्करस्य विषयोलक्ष्य

मित्यर्थः। उभयोरुपकार्योपकारकभावे सामानाधिकरण्ये च सङ्करः, न तु नैरपेक्ष्ये वैयधिकरण्ये चेतिभावः।

ननु शब्दार्थालङ्कारयोः कथं सङ्करः, तयो रङ्गाङ्गिभावासम्भवादितिचेत्, मैवम् अर्थानुसन्धानविरहिणएवानुप्रासादेश्शब्दालङ्कारस्यार्थालङ्कारेण सह साङ्कर्यस्यास्वीकारात्। श्लेषेतु स्फुटैवार्थापेक्षा॥

सङ्करोदाहरणमाह—

यथा—

'स हरिर्नाम्ना, देवः सहरिवरतुरगनिवहेन' इत्यादौ।

स इन्द्रो नाम्ना हरिः, देवोभवान् पुनर्वरेणश्रेष्टेन तुरगनिवहेनाश्वसमूहेन हरिभिः सहितः सहरि रिति कस्यचन चाटुभटो राजानं प्रत्युक्तिरियम्।

अत्र—

'हरिश्चन्द्रार्कवाताश्वशुकभेकयमादिषु।
कपौ सिंहे हरेऽजेशौ शक्रे लोकान्तरे पुमान्॥'

इति मेदिनीकोशाद्धरिशब्दस्य शक्राश्वयोः शक्तौ बोधितायां सहरिशब्दे श्लेषः, सचेन्द्रापेक्षया राज्ञो वास्तविकहरिसम्बन्धवर्णनेनाधिक्यात् स्फुटं व्यतिरेकमुपस्करोतीत्युभयोरलङ्कारयोरेकः सहरिशब्द आस्पदमितिसङ्करः।

वस्तुतस्तु नात्रश्लेषः, प्रथमस्य हरिशब्दस्येन्द्रमात्रबोधकत्वाद् द्वितीयस्याश्वमात्रबोधकत्वाच्च। यद्यपिलोचने सहहरिः सहरिः। यदि वा सहहरिभिः सहरिः इत्यर्थद्वयं व्याख्यातं, किन्तु तत्स्फुटं न प्रतीयत इति 'अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणाः इत्येवात्रोदाहरणीयम्॥

'रक्तस्त्वम्' इत्यादिपद्ये तदन्यथाभावमाह—

अत्र ह्यन्यएवशब्दः श्लेषस्य विषयः अन्यश्च व्यतिरेकस्य।

हिशब्दस्त्वर्थे। अत्रोक्तपद्येतु, अन्योरक्तेत्यादिः शब्दएव श्लेषस्यलक्ष्यम्, अन्योऽशोकसशोकादिशब्दश्चार्थद्वारा व्यतिरेकस्य लक्ष्यमिति वैयधिकरण्यान्नसङ्कर इत्यर्थः।

ननु तदैक्यवाक्यरूपंतूभयोरधिकरणमिहाप्यस्त्येवेति न कथं समानाधिकरण्यात्सङ्कर इत्याशङ्कामापत्तिदर्शनेन निराकरोति—

यदि चैवंविधे विषयेऽलङ्कारान्तरत्वकल्पना क्रियेत, ततः संसृष्टेर्विषयापहार एव स्यात्।

यदि च एवंविधे विषये वाक्यमात्रापेक्षयाकल्पितसामानाधिकरण्ये स्थले, अलङ्कारान्तरत्वस्य साङ्कर्यस्य, कल्पना क्रियेत, तर्हि संसृष्टेरेकवाक्यस्थमिथोनिरपेक्षानेकालङ्कारसमवायलक्षणायाः, विषयापहारो लक्ष्यलोप एवस्यादित्यर्थः।

एकवाक्यस्थत्वरूपं सामानाधिकरण्यन्तु संसृष्टावप्यस्त्येवेति तत्रापि सङ्करएवस्यादिति भावः।

इदमत्रबोध्यम्—सङ्करवत्संसृष्टेरप्यलङ्कारान्तरत्वमेव, किन्तुसङ्करेऽलङ्कारयोर्मिथोऽपेक्षा, संसृष्टौ तु नैरपेक्ष्यम्। पूर्वत्र सामानाधिकरण्यं क्वचित्पदापेक्षमपि दृश्यते, उत्तरत्र तु सर्वत्र। वाक्यापेक्षमेवेत्युभयो र्विभाग इदानीं वाक्यापेक्षसामानाधिकरण्येऽपि सङ्करस्वीकारे लुप्येत॥

पुनश्शङ्कते—

श्लेषमुखेनैवात्र व्यतिरेकस्यात्मलाभ इति नायं संसृष्टेर्विषय इतिचेत्।

श्लेषपदमिह श्लेषोत्थापितोपमापरम्। पूर्वपक्षिणोऽयमाशयः—अलङ्कारद्वयस्योपकार्योपकारकभावे साङ्कर्यं सर्वसम्मतम्, अतः प्रागुक्तश्लोके व्यतिरेकस्तदैव स्वरूपप्रतिष्ठां लभते, यदा श्लेषमूलिकोपमाऽऽत्मानं प्रकाश्य भूमिकां रचयति। अन्यथा साम्येऽप्रतीते प्रतीयमानमपि केवलं वैषम्यं व्यतिरेकप्रकाशाय न प्रभवतीतिश्लेषोपमाव्यतिरेकयो रनुग्राह्यानुग्राहकभावस्य स्फुटत्वान्न कथं सङ्करः? कथं वा संसृष्टे र्विषयापहारः? तस्याः सापेक्षत्वानपेक्षतयाऽत्र प्राप्तेरेवासम्भवात्॥

समाधत्ते—

न, व्यतिरेकस्य प्रकारान्तरेणापि दर्शनात्।

प्रकारान्तरेणापि साम्याभिधानंविनाऽपि वक्ष्यमाणश्लोके व्यतिरेकस्य दर्शनान्नेदं युक्तमित्यर्थः। यदि व्यतिरेके सर्वत्र वाच्यैवोपमाऽपेक्ष्येत; तदात्वत्रापि श्लेषोपमाया अपेक्षणाद्व्यतिरेकस्य सङ्करोवक्तुमुचितः, किन्तु 'नोकल्पापाय' इत्यादिवक्ष्यमाणश्लोके वाच्यश्लेषोपमाया अभावेऽपि व्यतिरेकदर्शनादुभयोरङ्गाङ्गिभावएवानिर्णीते, कुतस्सु उच्यत इत्याकूतम्॥

श्लेषोपमाव्यतिरिक्तव्यतिरेकमुदाहरति—

नो कल्पापायवायोरदयरयदलत्क्ष्माधरस्यापि शम्या,
गाढोद्गीर्णोज्ज्वलश्रीरहनि न रहिता नो तमःकज्जलेन॥

प्राप्तोत्पत्तिः पतङ्गान्न पुनरुपगता मोषमुष्णत्विषो वो,
वर्तिः सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः ॥

अदयो निर्दयोदारुणइतियावत्, यो रयोवेगः, तस्माद्दलन्तोविशीर्णतां व्रजन्तः क्ष्माधराः पर्वता यस्मात्तस्य कल्पापायवायोः प्रलयपवमानस्यापि या नोशम्या नैवनिर्वापणीया, तथाऽहनि दिवा गाढमत्यन्तमुद्गीर्णाप्रकाशितोज्ज्वलाश्रीः शोभा यया तादृशी, तथा या तमएवकृष्णत्वात्कज्जलं तेन न रहिता नो, किन्तुर्रहितैव, यद्वाऽहनि नराणां हितोपकारिणी, तमःकज्जलेन नो युक्ता, पतङ्गात्सूर्यात्प्राप्तोत्पत्तिर्यया सा, तथा या मोषं निर्वाणं पुनर्नोपगता, सा निखिलानां द्वीपानां प्रकाशकत्वाद्दीपस्यान्यरूपा विलक्षणा वर्तिर्दशैव, उष्णत्विषः सूर्यस्य दीप्तिः प्रभावो युष्मान् सुखयत्वित्यर्थः ।

तथाच 'श्रीर्वेशरचना शोभा' इति मेदिनी । 'पतङ्गः पक्षिसूर्ययोः' 'समौ पतङ्गशलभौ' इत्यमरः । 'वर्तिर्दीपदशास्वपि' इति त्रिकाण्डशेषश्च ॥

वक्तव्यमाह—

अत्र हि साम्यप्रपञ्चप्रतिपादनं विनैव व्यतिरेको दर्शितः ।

साधारणी हि दीपशिखा स्वल्पेनापि वायुना शम्या, दिवा विच्छाया, कज्जलप्रसूः, पतङ्गाच्छलभाद्ध्वंसिनी शलभानां वा नाशिनी, नैकदा निर्वाणमनुभूतवती च । इयं पुनस्तद्विलक्षणेत्यस्या दीपशिखाया आधिक्यप्रदर्शनाद्व्यतिरेकोऽत्र साम्यस्य प्रपञ्चेन प्रतिपादनं श्लेषोत्थापितोपमायाःप्रबन्धेनाभिधानंविनैव यतोदर्शितोऽस्ति, तस्मान्नतयोः सङ्कर इत्यर्थः । तथा चोक्तमाचार्यैः—'एतदुक्तम्भवति—प्रतीयमानैवोपमा व्यतिरेकस्यानुग्राहिणी भवन्ती नाभिधानं कण्ठेनापेक्षते । तस्मान्नश्लेषोपमा व्यतिरेकस्यानुग्राहित्वे नोपात्तः इति ॥

पुनश्शङ्कित्वा समाधत्ते—

नात्र श्लेषमात्राच्चारुत्वप्रतीतिरस्तीति श्लेषस्य व्यतिरेकाङ्गत्वेनैव विवक्षितत्वम्, न स्वतोऽलङ्कारत्वेनेत्यपि न वाच्यम्, यत एवंविधे विषये साम्यमात्रादपि सुप्रतिपादिताच्चारुत्वं दृश्यत एव ।

अत्र 'रक्तस्त्वम्' इत्यादिपद्ये, यद्यपि श्लेषोपमा व्यतिरेकानुग्राहित्वेन नोपात्ता, तथापि तदधीनतयैवोपात्ता मन्तव्या, यतस्तस्या अत्र स्वातन्त्र्येण चारुत्वस्याजनकत्वात्पृथगलङ्कारत्वं नाङ्गीकर्तुंशक्यं, मतोऽनायत्या सङ्करएवस्वीकर्तव्य इत्यपि न

वाच्यम्, यस्मादेवंविधे व्यतिरेकप्रत्यायके विषये, श्लेषशून्यात्केवलसाम्यप्रतिपादनादपि चारुत्वं दृश्यतएवेत्यर्थः ।

तदैव श्लेषोपमायाव्यतिरेकाङ्गत्वं मनायत्या कल्पयितुं शक्यम्, यदि तां विना व्यतिरेकः स्वरूपं प्रकाशयितुं न प्रभवेत्, तन्नास्ति यतः 'आक्रन्दाः' इत्यादिवक्ष्यमाणश्लोके श्लेषहीनेन साम्येनापि व्यतिरेकः प्रतिभासते, तस्मान्न तयोरङ्गाङ्गिभावः सुवच इति सारम् ॥

तदुदाहरणमाह—

यथा—

वियोगी पयोदं वक्ति—

आक्रन्दाः स्तनितैर्विलोचनजलान्यश्रान्तधाराऽम्बुभि,
स्तद्विच्छेदभुवश्च शोकशिखिनस्तुल्यास्तड़िद्विभ्रमैः ॥
अन्तर्मे दयितामुखं तव शशी वृत्तिः समैवावयो—
स्तत्किं मामनिशं सखे ? जलधर ? त्वं दग्धुमेवोद्यतः ॥' इत्यादौ ।

हे सखे ? जलधर ? यतो मे ममाक्रन्दा स्तव स्तनितै र्गर्जितै स्तुल्याः, तथा मे विलोचनजलान्यश्रूणि ते ऽश्रान्तधाराऽम्बुभिः सन्ततासारजलै स्तुल्यानि, तथा मे तद्विच्छेदभुवः, प्रियाविरहोत्पन्नाः, शोकशिखिनः शोकाग्नयस्तव तड़िद्विभ्रमै र्विद्युद्विलासै स्तुल्याः, तथा मे ममान्त र्भावनाविषयीभूतमिति यावत्, दयितायामुखम्, तवान्तश्चावृतमण्डलः शशीविद्यत इत्यावयोर्मम तवच, वृत्तिर्व्यापारो यतः समा तुल्यैव, तस्मादनिशं सन्ततं, मां दग्धुं विरहानलप्रज्वालनेन भस्मीकर्तुमेव त्वं किमुद्यतोऽसीत्यर्थः ।

इत्यादावुदाहरणे श्लेषमन्तरेणापि केवलेन मेघविरहिणोः साम्यप्रतिपादनेन मेघे दाहोद्यमस्य वर्णनादाधिक्येन व्यतिरेकः स्फुरतीति न व्यतिरेकस्य श्लेषावश्यकत्वमितिकुतः श्लेषस्य व्यतिरेकाङ्गतेत्यभिप्रायः ॥

'नातिनिर्वहणैषिता' इत्यंशमुदाहर्तुमाह—

रसनिर्वहणैकतानहृदयो यो यं च नात्यन्तं निर्वोढुमिच्छति ।

चकारोऽन्यान् समीक्षाप्रकारान् समुच्चिनोति । रसनिर्वहणे रसबन्धनिर्वाहएकतानं सर्वथाप्रवणं हृदयं यस्यतादृशो यः कविः, यमलङ्कारं नात्यन्तं निर्वोढुमिच्छति, प्रबन्धप्रवृत्तमपि नासमाप्ति निनीषति, स यथा रसमुपकुर्वन्वास्तविकालङ्कारत्वं भजतीत्यर्थः ॥

उदाहरति—

यथा—'कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं,
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः ॥
भूयो नैवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितं,
धन्यो हन्यत एव निह्नुतिपरः प्रेयान्रुदत्या हसन् ॥'

सायं कोमला मृद्वी लोलाच बाहुलतिकैव पाशस्तेन दृढं कोपाद्बद्ध्वा, तथा वासनिकेतनं भोगावासं नीत्वा, सखीनां पुरोऽग्रे, भूयो नैवं करिष्यसीति कोपसमुद्वेगेन त्रुट्यन्ती कला मधुरा गीर्वाग्यस्या स्तया रुदत्या क्रन्दन्त्या, दयितया दुश्चेष्टितं प्रेयसो दुर्व्यवहारं दन्तनखक्षतादिलक्षितं सम्यगङ्गुल्यादिनिर्देशेन सूचयित्वा, धन्यः सौभाग्यशाली, हसन्, तथा निह्नुतिपरो हसनेनापराधापलापपरायणः, प्रेयान् हन्यते ताड्यत एव, नतुसौख्यादिकृतोऽनुनयो मनागप्यनुरुध्यत इत्यर्थः ।

सखीनां पुर इति—भवत्योऽनवरतं ब्रुवते नायमेवं करोतीति, तत्पश्यन्त्विदानी मितिभावः इत्यभिनवगुप्तपादाः ॥

वक्तव्यमाह—

अत्र हि रूपकमाक्षिप्तमनिर्व्यूढं च ।

बाहुलतिकापाशेत्यनेन रूपकं प्रारब्धम्, नतु समाप्तिं यावन्नीतमित्यर्थः । तथासति सुतरामर्थासङ्गतिः स्यात् । तदुक्तं लोचने'बाहुलतिकायाः पाशत्वेन रूपणं यदि निर्वाहयेत्, दयिताव्याधवधूः, वासगृहं कारागारपञ्जरादीति परमनौचित्यं स्यात्' इति ॥

'निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्' इत्यन्तिममंशमुदाहर्तुमाह—

परं रसपुष्टये निर्वोढुमिष्टमपि यं यत्नादङ्गत्वेन प्रत्यवेक्षते ।

रसपोषकत्वाद्यं परिसमापयितुमिष्टमत्यलङ्कारं कविरङ्गत्वेन यत्नात्पर्यालोचयतीत्यर्थः । स यथेतिशेषः ॥

उदाहरति—

यथा—

विरही यक्षो जायां सन्दिशति—

'श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं,
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ॥

उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्,
हन्तैकस्थं क्वचिदपि न ते भीरु ! सादृश्यमस्ति ॥'

हे भीरु ! कातरे ! श्यामासु प्रियङ्गुलतासु तेऽङ्गम्, । चकिताया हरिण्याः प्रेक्षणेविलोकने ते दृष्टिपातं दृग्व्यापारम्, शशिनि चन्द्रे ते वक्त्रस्य छायां कान्तिम्, शिखिनां मयूराणां बर्हभारेषु पिच्छकलापेषु ते केशान्, तथा प्रतनुषु कृशासु नद्याम-न्दाकिन्यावीचिषु ते भ्रुवोर्विलासान् विभ्रमान् यद्यपि उत्पश्याम्युत्प्रेक्षे, तथापि हन्त ! कष्टम्, एकस्थमेकस्मिन् पदार्थेस्थितं ते सादृश्यं क्वचिदपि नास्तीत्यर्थः ।

तथाच 'श्यामातु महिलाह्वया ॥ लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली' 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इत्यमरः ।

कथंचित्पृथक् सादृश्यावलोकनेन जीवनं दधानोऽपि क्वचिदेकत्र सर्वसादृश्य-मालोकयितुं दोलायमानोऽहं तदनुपलभ्य न निर्वृणोमीतितात्पर्यम् । 'भीरु' इति-सम्बोधनस्य 'योहिकातरहृदयो भवति, नासौ सर्वस्वमेकस्थं धारयतीति' भाव इत्याचार्यः । 'अनेनास्याः सौन्दर्यमनुपममिति व्यज्यते' इति मल्लिनाथः । छाया-शब्दस्य क्लीबत्वाभावोपपत्तिस्तु प्रागुक्तैव ॥

वक्तव्यमाह—

इत्यादौ स एवमुपनिबध्यमानोऽलङ्कारो रसाभिव्यक्तिहेतुः कवेर्भवति ।

श्लोकेऽस्मिन्नुत्प्रेक्षाऽलङ्कारस्य निर्वाहकं साम्यं यथा प्रारब्धं तथैव परिसमापि-तमपि विप्रलम्भशृङ्गाररसं पुष्णात्येवेति निर्व्यूढस्यापि साम्यस्य यत्नाद्रसोपकार-त्वेन समीक्षणादङ्गत्वमित्याकूतम् ॥

उक्तसमीक्षाप्रकारातिक्रमे दोषमाह—

उक्तप्रकारातिक्रमे तु नियमेनैव रसभङ्गहेतुः सम्पद्यते ।

असमीक्ष्य विनिवेशितोह्यलङ्कारः शरीरस्येव रसस्यापकर्षमेव जनयति, नतूत्क-र्षमितिभावः ॥ नन्वसमीक्षितालङ्कारसन्निवेशं लक्ष्यं न सम्भवति, विरलमेववासम्भ-वतीत्याशङ्कायामाह—

लक्ष्यं च तथाविधमपि महाकविप्रबन्धेषु दृश्यते बहुशः ।

महाकवीनामपि कदाचिदलङ्कारैकाभिनिवेशेन रसानुसन्धिविरमात् ॥ चका-रः पुनरर्थकः ॥

ननु तर्हि कथं न तद् विभज्य दर्शितमित्यत आह—

तत्तु सूक्तिसहस्रद्योतितात्मनां महात्मनां दोषोद्घोषणमात्मन एव दूषणं भवतीति न विभज्य दर्शितम् ।

सूक्तिः सुभाषितं तासां सहस्रेण द्योतिताः प्रख्यापिता आत्मानो यै स्तेषां महात्मनां महीयसां कवीनां तत्तादृशविभागपूर्वकं दोषाणां स्खलितानामुद्घोषणं प्रख्यापनम्, आत्मन उद्घोषकस्यैव दूषणं दोषोभवतीति तथा नोक्तं तदित्यर्थः । महीयसां स्वयशोविदितानां दोषप्रख्यापक एव लोकैर्दुष्टो मन्यत इति भिया तद्विवरणं विस्तरेण मया न कृतम् । तावता तत्र सम्भवत्येवेति न मन्तव्यमित्यभिप्रायः ॥

ननु तेषां दोषलक्ष्याणामनुक्तानामज्ञानात् कथं निर्वाह इत्यत आह—

किन्तु रूपकादेरलङ्कारवर्गस्य येयं व्यञ्जकत्वे रसादिविषये (वि)लक्षणादिग् दर्शिता, तामनुसरन् स्वयं चान्यल्लक्षणमुत्प्रेक्षमाणो यद्यलक्ष्यक्रमपतितमनन्तरोक्तमेनं ध्वनेरात्मानमुपनिबध्नाति सुकविः समाहितचेताः, तदस्यात्मलाभो भवति महीयानिति ।

रूपकादेरलङ्कारवर्गस्य, रसादिविषये व्यञ्जकत्वे रसादिविषयकव्यञ्जनकारित्वविषये, इयमधुनैवोक्ताया लक्षणायाःसमीक्षाया दिक् पद्धतिः, तामनुसरन्ननुशीलयन्, स्वयम् अन्यदनुक्तं चापि लक्षणं समीक्षाप्रकारम्, उत्प्रेक्षमाणो दर्शितयादिशोहमानः, समाहितचेताः सावधानः सुकविर्यदि अनन्तर मिदानीमेवोक्तम् , अलक्ष्यक्रमपतितमसंलक्ष्यक्रममेनंध्वने रात्मानं स्वरूपमुपनिबध्नाति, तत्तदाऽस्यकवेर्महीयानात्मलाभः कवित्वलाभो भवतीत्यर्थः ।

प्रत्युदाहरणदर्शनेऽप्युदाहरणमात्रपर्यालोचनेन स्वयं समीक्षाप्रकारान्तरतर्केणेन च रसादिध्वनिं रचयत एव कृतार्थतेति न तादृशी प्रत्युदाहरणप्रदर्शनापेक्षेति हृदयम् ।

इतिशब्दोऽसंलक्ष्यक्रमध्वनिनिरूपणसमाप्तिसूचकः । अत्राहुर्लोचनकाराः—'अन्यल्लक्षणमितिपरोक्षाप्रकार मित्यर्थः । तद्यथाऽवसरेत्यक्तस्यापि पुनर्ग्रहणमित्यादि । यथाममैव—

शीतांशोरमृतच्छटा यदिकराः कस्मान्मनो मे भृशं,
संप्लुष्यन्त्य(थ)कालकूटपटली–संवाससन्दूषिताः ॥
किं प्राणान्न हरन्त्युत प्रियतमासञ्जल्पमन्त्राक्षरै-
रक्ष्यन्ते किमु मोहमेमि हहहा नोवेद्मि केयं गतिः ॥

इत्यत्र हि रूपकसन्देहनिदर्शनास्त्यक्त्वा पुनरुपात्ता रसपरिपोषायेत्यलम्, इति ॥

इत्थमसंलक्ष्यक्रमध्वनिं निरूप्य सम्प्रति प्रतिपन्नावसरं विवक्षितान्यपरवाच्यध्वनिद्वितीयभेदं संलक्ष्यक्रमं निरूपयन् विभजते—

क्रमेण प्रतिभात्यात्मा योऽस्यानुस्वानसन्निभः ॥
शब्दार्थशक्तिमूलत्वात् सोऽपि द्वेधा व्यवस्थितः ॥ ४३ ॥

अस्य विवक्षितान्यपरवाच्यध्वनेः अनुस्वानसन्निभो घण्टादिशब्दानन्तरजायमानप्रतिशब्दसदृशः संलक्ष्यक्रम इति यावत्, य आत्मा स्वरूपप्रकार आभाति, सोऽपि शब्दार्थशक्तिमूलत्वाच्छब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति द्वेधा द्विप्रकारको व्यवस्थित इत्यर्थः ॥

तदाह वृत्तिकारः—

अस्य विवक्षितान्यपरवाच्यस्य ध्वनेः स क्रमव्यङ्ग्यत्वादनुरणनप्रख्यो य आत्मा सोऽपि शब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति द्विप्रकारः ।

यथा घण्टाशब्दस्य तदुत्तरं 'जायमानस्य तत्प्रतिशब्दस्य च' क्रमः सुलक्षो भवति, तथैव वाच्यप्रतीत्यनन्तरं जायमानाया रसादिभिन्नव्यङ्ग्यप्रतीतेरित्युभयोः साम्यमवगन्तव्यम् । अनुरणनप्रख्यः प्रतिशब्दसदृशः । उपलक्षणमिदं शब्दार्थशक्तिमूलस्य तृतीयभेदस्यापि । तथाच प्रकाशे—

'अनुस्वानाभसंलक्ष्य-क्रमव्यङ्ग्यस्थितिस्तु यः ।
शब्दार्थोभयशक्त्युत्थ स्त्रिधा स कथितो ध्वनिः ॥'

इति विभज्य, 'शब्दार्थोभयभूरेकः' इत्येकविधत्वं च प्रतिपाद्य,

'अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥' इत्युदाहरणं दर्शितम् ।

ननु शब्दशक्तिरभिधैव, तया यत्र द्वितीयार्थस्य प्रतीति र्भवति, स यदि शब्द शक्तिमूलध्वनेः प्रकार इदानीमुच्यते, तर्हि श्लेषालङ्कारो निरवकाशः स्यात्, श्लेषलक्ष्याणामप्येतेन ध्वनिप्रकारेणाक्रान्तत्वात्, श्लेषेऽपि द्वितीयार्थस्याभिधयैव बोधनीयत्वादिति चेत्, न श्लेषध्वन्योरुच्यमानरीत्या विषयभेदस्य व्यवस्थानादिति सर्वं दर्शयन् शब्दशक्त्युद्भवध्वनिनिरूपिकां कारिकामवतारयति वृत्तिकारः ।

ननु शब्दशक्त्या यत्रार्थान्तरं प्रकाशते, स यदि ध्वनेः प्रकारउच्यते,

तदिदानीं श्लेषस्य विषय एवापहृतः स्यात्, नापहृत इत्याह—

'आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते ॥

यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः ॥ ४४ ॥

एवकारो भिन्नक्रमोऽलङ्काराद्वस्तु व्यवच्छिनत्ति । हि यस्माद् यस्मिन् काव्ये शब्देनानुक्तश्शब्दानभिहितः, अतएवाक्षिप्तोऽव्यक्तः, अलङ्कार एव नतु वस्त्वपि, शब्द-शक्त्याऽभिधामूलव्यञ्जनया प्रकाशते, स शब्दशक्त्युद्भवो ध्वनि रित्यर्थः ॥

तदाह—

यस्मादलङ्कारो न वस्तुमात्रम्, यस्मिन् काव्ये शब्दशक्त्या प्रकाशते, स एव शब्दशक्त्युद्भवो ध्वनिरित्यस्माकं विवक्षितः ।

हिशब्दस्य विवरणं यस्मादिति, एवशब्दस्य न वस्तुमात्रमिति । 'अस्माकं विवक्षितः' इत्यनेन परैश्शब्दशक्त्युद्भवो वस्तुध्वनिरपि स्वीक्रियते,

'पन्थिअ ण एत्थ सत्थर मत्थि मणं पत्थरत्थले गामे ॥
उण्णअपओहरं पेक्खिऊण जइ वससि तावससु ॥'
'पथिक ! नात्रस्रस्तर मस्ति मनाक्प्रस्तरस्थले ग्रामे ॥
उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस ॥' इतिच्छाया ॥

इत्युदाह्रियते चेति सूचितम् ॥

श्लेषस्य विषयपृथग्भावं दर्शयति—

वस्तुद्वये च शब्दशक्त्या प्रकाशमाने श्लेषः ।

च स्त्वर्थे । वस्तुनो र्नत्वलङ्कारयो रुभयोरर्थयो र्यद्यभिधयैव बोधस्तदाश्लेषाल-ङ्कारइत्यर्थः ।

अयमाशयः—संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥'

इतिवाक्यपदीयोक्तैरभिधानियामकै रनेकार्थकस्य शब्दस्यैकस्मिन्नर्थे ऽभिधायां नियमिताया मपरस्यार्थस्य बोधनमभिधया दुर्घट मित्यभिधामूलव्यञ्जनया यत्रापरो-ऽर्थोबोध्यते, स शब्दशक्त्युद्भवध्वनिः, तत्र शब्दस्यपरिवृत्त्यसहत्वात्तु शब्दशक्त्यु-

द्रवत्वम् । यत्र पुनः सँघ्योगादिविरहादनियताभ्यामभिधाभ्यामेवार्थद्वयं समशिरस्कं प्रत्याय्यते, स श्लेषइतिश्लेषविषयस्य व्यञ्जनासम्बन्धवैधुर्यान्न ध्वनिनाऽऽक्रमणं सम्भवति ॥

श्लेषेऽर्थद्वयस्य वाच्यतां दर्शयितुमुदाहरति—

यथा—'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो,
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गाञ्च योऽधारयत् ॥
यस्याहु श्शशिमच्छिरोहर इति स्तुत्यं च नामामराः,
पायात् स स्वयमन्धकक्षयकर स्त्वां सर्वदो माधवः ॥'

सुभाषितावलावुद्धृतं चन्द्रककवेः पद्यमिदम् । अस्य विष्णुपक्षे—येन गृहीतकृष्णावतारेण, अनश्शकटं तद्रूपं रक्षो ध्वस्तं पातितम्, तथाऽभवेनाजन्मना पुराऽमृतपरिवेषणकाले, बलिं तदाख्यदैत्यं जयतीति बलिजित् तस्य कायो देहः स्त्रीकृतो मोहिनीरूपतां प्रापितः, तथा यः पुनरुद्वृत्तस्योद्धताचरणस्य भुजङ्गस्याघासुरस्य हन्ता, तथा नामरूपात्मकजगतो ब्रह्मणि लयस्य श्रवणाद्यो रवाणां शब्दानां लयो यत्र तादृशः, यद्वाऽरेरिदमारम्, आरं बलं सैन्यं यातीत्यारबलयः, तथाऽगं गोवर्धनगिरिं कृष्णस्सन्करेण गां पृथ्वीं च वराहस्सन्दंष्ट्रया योऽधारयत्, तथा शशिनं मथ्नातीति शशिमद्राहुस्तस्य शिरसोहरश्छेदक इति यस्य स्तुत्यंप्रशस्यंनाम नामधेय ममरादेवाआहुः, सोऽन्धकानां यादवानां क्षयकरो नाशकरो गृहनिर्मायको वा सर्वदश्चतुर्वर्गप्रदः स्वयं माधवोलक्ष्मीपति स्त्वां पायादित्यर्थः ।

शिवपक्षे तु—येन ध्वस्तमनोभवेन नाशितकामेन पुररात्रिपुरासुरदाहावसरे बलिजित्कायो विष्णुदेहोऽस्त्रीकृत श्शरीकृतः, तथा य उद्वृत्ता उद्धता अतिवर्तुलीभूतावयवा वा भुजङ्गा एव हारावलयानिच यस्य तादृशः, तथा गङ्गां शिरसा योऽधारयत्, तथा यस्य शिरः शश्यस्त्यस्मिन्निति शशिमत्, तथा यस्य हर इति स्तुत्यं नामामराआहुः, यद्वाशशिमच्छिरोयस्यासौशशिमच्छिराः । स चासौ हर इति स्तुत्यं नामामरा आहुः । सोऽन्धकस्य तदाख्यासुरस्य क्षयकरः स्वयमुमाधवो गौरीपतिः सर्वदा त्वां पायादित्यर्थः ।

तथाच 'अनः क्लीबं जले शोके मातृस्पन्दनयोरपि' इतिविश्वः । 'भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः' इति मेदिनी । 'क्षयो गेहे च कल्पान्ते ऽपचये रुजि' इति हैमः । 'धवः प्रियः पतिर्भर्ता' इत्यमरश्च ।

अत्राभिधानियामकाभावादर्थद्वयस्य वाच्यत्वाच्छ्लेषो नतु ध्वनिः ॥

कारिकाघटकस्य 'आक्षिप्तः' इतिपदस्य कृत्यं दर्शयति—

नन्वलङ्कारान्तरप्रतिभायामपि श्लेषव्यपदेशो भवतीति दर्शितं भट्टोद्भटेन, तत्पुनरपि शब्दशक्तिमूलो ध्वनिर्निरवकाश इत्याशङ्क्येदमुक्तम्—'आक्षिप्तः' इति ।

प्रतिभा प्रतीतिः । यत्रैकस्मादन्योऽप्यलङ्कारात्माऽर्थः प्रतीयेत सश्लेष इत्युद्भटभट्टमतम् । एवञ्च ('अत्रान्तरे च कुसुमसमययुगम्') इत्यादिवक्ष्यमाणशब्दशक्तिमूलध्वने रुदाहरणेऽप्युपमाऽलङ्काररूपस्यापरार्थस्य भानाच्छ्लेषेणैवाक्रान्तेषु शब्दशक्त्युद्भवध्वने रनवकाशत्वमापाद्यमानं निराकर्तुं ध्वनिकारः पूर्वकारिकायामलङ्कारात्मनोऽपरार्थस्य व्यङ्ग्यत्वरूपमाक्षिप्तत्वं विशेषणमुक्तवान् । तेनालङ्कारान्तस्यापि वाच्यत्वे श्लेषव्यङ्ग्यतायां तु ध्वनिरिति नानवकाशताध्वने रित्याकूतम् ।

तदेवाह समासेन—

तदयमर्थः—अत्र शब्दशक्त्या साक्षादलङ्कारान्तरं वाच्यं सत् प्रतिभासते, स सर्वः श्लेषविषयः । यत्रतु शब्दशक्त्या सामर्थ्याक्षिप्तं वाच्यव्यतिरिक्तं व्यङ्ग्यमेवालङ्कारान्तरं प्रकाशते, स ध्वनेर्विषयः ।

शब्दशक्त्याऽभिधया । ध्वनौपरम्परयाशब्दशक्त्याऽलङ्कारप्रकाशनात् साक्षादिति । सामर्थ्याक्षिप्तं व्यञ्जनावृत्तिप्रत्यायितम् । इतरद्व्याख्यातमेव ।

अपरालङ्कारस्य वाच्यत्वे श्लेषमुदाहर्तुमाह—

शब्दशक्त्या साक्षादलङ्कारान्तरप्रतिभा यथा—

'तस्या विनाऽपि हारेण निसर्गादेव हारिणौ ॥
जनयामासतुः कस्य विस्मयं न पयोधरौ ॥'

हारं मुक्तामाल्यं विनाऽपि निसर्गात्स्वभावादेव, हारिणौ मनोहरौ, तस्याः पयोधरौ कुचौ, कस्य विस्मयमाश्चर्यं न जनयामासतुः, अपितु सर्वस्येत्यर्थः ।

अत्र हारं विनाऽपि हारिणौ हारवन्ताविति विरोधः, मनोहराविति तत्परिहारे 'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः' इति प्रकाशलक्षितो विरोधाभासोऽपिशब्दसाक्षाद्वाच्यः । शृङ्गाररसव्यभिचारिभावश्च विस्मयः स्वशब्दसाक्षाद्वाच्य इतिश्लेषस्यात्र विषयो, न तु ध्वनेरिति बोध्यम् ॥

तदाह—

अत्र शृङ्गारव्यभिचारी विस्मयाख्यो भावः साक्षाद्विरोधालङ्कारश्च प्रतिभासत इति विरोधच्छायाऽनुग्राहिणः श्लेषस्यायं विषयः, न त्वनुस्वानोपमव्यङ्ग्यस्य ध्वनेः ।

विरोधच्छायाऽनुग्राहिणो विरोधानुप्राणकस्य । अनुस्वानोपमव्यङ्ग्यस्य शब्दशक्तिमूलसंलक्ष्यक्रमव्यङ्ग्यस्य ।' 'विस्मयाख्यो भाव इति दृष्टान्ताभिप्रायेणोपात्तम् । यथा विस्मयः शब्देन प्रतिभाति विस्मयइत्यनेन, तथा विरोधोऽपि प्रतिभात्यपीत्यनेन शब्देन' इत्याचार्याः ॥

ननु किं कोऽपिध्वनिरिह नास्त्येवेत्याशङ्कायामाह—

अलक्ष्यक्रमव्यङ्ग्यप्रतिभासस्य तु ध्वनेर्वाच्येन श्लेषेण विरोधेन वा व्यञ्जितस्य विषय एव ।

'तस्या विनाऽपि' इत्यादिश्लोको यद्यपि संलक्ष्यक्रमध्वनेर्नविषयः, किन्तु वाच्येन श्लेषानुप्राणितविरोधेन व्यञ्जनावृत्त्या प्रकाशितस्यासंलक्ष्यक्रमस्य शृङ्गाररसध्वने विषयोऽस्त्येवेति नात्र सर्वथाध्वन्यभावः । 'वा ग्रहणेन श्लेषविरोधसङ्करालङ्कारोऽयमिति दर्शयति । अनुग्रहयोगादेकतरत्यागग्रहणनिमित्ताभावो हि वाशब्देन सूच्यते' इति लोचनम् ॥

स्वकीयमुदाहरणान्तरमाह—

यथा ममैव—'श्लाघ्याशेषतनुं सुदर्शनकरः सर्वाङ्गलीलाजित-
त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरिः ।
बिभ्राणां मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दधत्,
स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात् ॥'

श्लाघ्या प्रशंसनीयाऽशेषातनु र्यस्यास्ताम्, तथा सर्वेषामङ्गानां लीलाभिर्विलासैर्जितं त्रैलोक्यं यया ताम्, तथेन्दुरूपमखिलं मुखं बिभ्राणां दधतीम्, यां रुक्मिणीम्, शोभनं दर्शनं यस्यासौ सुदर्शनस्तादृशः करो हस्तो यस्य सः, करमात्रेण सुन्दरः, वस्तुतः सुदर्शनं तदाख्यचक्रं करे यस्य सः, एवं चरणारविन्दस्य ललितेन लीलयैवाक्रान्तो जितोलोको भुवनं येन सः, चरणमात्रेण लोकविजयी, वस्तुतो वामनावतारे चरणेनैव समस्तलोकाक्रमणकारी, एवं चन्द्रात्म चन्द्ररूपं चक्षुर्दधत्

चक्षुर्मात्रेण चन्द्रवान्, वस्तुतश्चन्द्रनेत्रः, हरिः कृष्णः, स्वतनोः स्वशरीरादधिकामुत्कृष्टां स्थाने युक्तमपश्यत्, सा रुक्मिणी, वोयुष्मानवताद्रक्षतादित्यर्थः।

इह 'लीलाविलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा।
विहृतं चेतिमन्तव्या दशस्त्रीणां स्वभावजा॥'

इति नाटकरत्नकोशात्स्त्रीमात्रवृत्तिव्यापारस्यापिललितस्य भगवच्चरणारविन्दसम्बन्ध आरोपितो बोध्यः। तनुशब्दस्य च द्विरुपादानं रसमपकर्षति। सुदर्शनादिपदवृत्तिना श्लेषेणानुगृहीतो भगवदपेक्षया रुक्मिण्याआधिक्यवर्णनादुत्थापितो गम्यसाम्यसम्भावितो व्यतिरेकालङ्कारोवाच्यतयैव प्रतीयते इति न संलक्ष्यक्रमध्वनिः॥

तदाह—

अत्र वाच्यतयैव व्यतिरेकच्छायानुग्राही श्लेषः प्रतीयते।

'सुदर्शनकरः' 'अधिकाम्' इति शब्दाभ्यां श्लेषव्यतिरेकयोः सङ्करो वाच्य एवेत्यर्थः॥

पुनरुदाहरति—

यथा च—'भ्रमि मरति मलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम्।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम्॥'

नायिकाऽवस्थां नायकं बोधयितुं सामान्यतो वर्षावर्णनपरा सख्याउक्तिरियम्। जलदो मेघ एव भीषणतया भुजगः सर्पस्तस्माज्जातं विषं सलिलमेवविषं गरलम्, वियोगिनीनाम्, भ्रमिंशिरोभ्रमणं चेतोविकारविशेषं वा, अरतिं विषयानभिलाषमानन्दाभावं वा, अलसहृदयतां मानसौदास्यम्, प्रलयं बाह्येन्द्रियव्यापारवैधुर्यम्, मूर्च्छां बाह्यान्तरेन्द्रियव्यापारराहित्यम्, तमस्तमोगुणोद्रेकेणान्ध्यम्, शरीरस्य सादं कार्श्यं पीडां वा, मरणं जीवननिर्गमारम्भं च वा प्रसह्य हठात् कुरुते करोतीत्यर्थः।

तथा च 'विषं च गरले तोये' इति मेदिनी। 'जीवस्योद्गमनारम्भोमरणं परिकीर्तितम्' इति प्रदीपश्च। इह 'यस्याः पादे प्रथमे द्वादश मात्रा स्तथा तृतीयेऽपि॥ अष्टादश द्वितीये चतुर्थे पञ्चदश साऽऽर्या॥' इति श्रुतबोधोक्तार्यालक्षणस्य प्रतिचरणमेकमात्राधिक्येनासमन्वये 'अत्रानुक्तं गाथा' इति पिङ्गलच्छन्दस्सूत्रानुशासनाद्गाथाच्छन्दः।

जलदएवभुजग इतिरूपकस्य विषपदश्लेषः साधक इतिश्लेषानुप्राणितं रूपकमलङ्कारोवाच्यतयैव प्रतीयत इत्यग्रेऽनुपदं वक्ष्यति॥

पुनरुदाहरति—

> 'चमहिअमाणसकञ्चण-णिम्महिअपरिमला जस्स ।
> अखण्डिअदाणप्पसारा बाहुप्पलिहा व्विअ गइन्दा ॥'
> '(खण्डित) मानसकाञ्चनपङ्कजनिर्मथितपरिमला यस्य ।
> अखण्डितदानप्रसरा बाहुपरिघा एव गजेन्द्राः ॥' इतिच्छाया ।

कश्चनचाटुकारो राजानं वर्णयति । अस्फुटार्थाऽस्फुटच्छायाचेयं गाथा प्रकोष्ठस्थच्छायां कल्पयित्वा कथञ्चिद्व्याख्यायते—खण्डितानां त्रोटितानां मानसस्य तदाख्यसरसः काञ्चनपङ्कजानां निर्मथितो विजृम्भितः परिमलोविमर्दोत्थातिमनोहरगन्धो येषु तादृशाः, पक्षे खण्डितानि निराशीकृतत्वेन विहतानि शत्रूणां मानसानि हृदयान्येव सुसारतया काञ्चनपङ्कजानि, तैर्निर्मथितः प्ररूढः परिमलः प्रतापप्रकर्षो येषां तादृशाः, न खण्डितो न विच्छिन्नो दानस्य मदजलस्य पक्षे वितरणस्य प्रसरः प्रवाहः पक्षे प्रवृत्तिर्येषु तादृशाः, यस्य राज्ञो बाहवो दृढत्वात् परिघा लोहलगुडा इव बाहुपरिघा एव गजेन्द्रा भान्तीत्यर्थः । तथाच 'मानसं सरसिस्वान्ते' 'दानंगजमदेत्यागे' इतिमेदिनी ।

अत्रापि बाहुपरिघा एव गजेन्द्रा इतिरूपकं मानसादिशब्दनिष्ठश्लेषः प्रसाधयतीत्युभयोर्वाच्ययोः सङ्करो न तु शब्दशक्तिमूलध्वनिः ॥

तदाह—

अत्र रूपकच्छायाऽनुग्राही श्लेषो वाच्यतयैवावभासते ।

अत्रानयोरनन्तरश्लोकयोः ॥ कारिकाघटकैवकारस्याक्षिप्तशब्देन सहार्थिकान्वयस्य फलन्दर्शयति—

स चाक्षिप्तोऽलङ्कारो यत्र पुनः शब्दान्तरेणाभिहितस्वरूपः, तत्र शब्दशक्त्युद्भवानुरणनरूपव्यङ्ग्यध्वनिव्यवहारः (नैव, किन्तु) तत्र वक्रोक्त्यादिवाच्यालङ्कारव्यवहार एव ।

प्रकोष्ठस्थः पाठोऽर्थानुरोधेन कल्पितः । चकारोऽप्यर्थको भिन्नक्रमः । स आक्षिप्तोव्यक्तोऽप्यलङ्काररूपोऽर्थो यत्र 'दृष्ट्या केशव !' इत्यादिषु वक्ष्यमाणलक्ष्येषु, पुनः शब्दान्तरेणान्येन लेशादिशब्देन अभिहितस्वरूपो नियन्त्रितायाअभिधायाः प्रत्युज्जीवनेन वाच्यतांनीतो भवति तत्र व्यङ्ग्यस्य वाच्यायमानत्वेनाचारुत्वान्न शब्दश-

त्युद्भवसंलक्ष्यक्रमध्वनेर्व्यपदेशः, किन्तु तत्र गुणीभूतव्यङ्ग्यत्वाद् वक्रोक्तेरन्येषां वाऽलङ्काराणामेव व्यपदेश इत्यर्थः ।

पद्यघटकेनैकेनापि पदेनाभिधीयमानोऽर्थोऽश्लिष्टं व्यङ्ग्यत्वं कथं भजेत् । तत्त्वे च कथं ध्वनिव्यवहार इति सारम् ॥

तदुदाहरति—

यथा—'दृष्ट्या केशव ! गोपरागहृतया किञ्चिन्न दृष्टं मया,
तेनैव स्खलिताऽस्मि नाथ ! पतितां किं नाम नालम्बसे ॥
एकस्त्वं विषमेषुखिन्नमनसां सर्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम् ॥'

हे केशव ! गवां परागैः खुरोद्धूतधूलिभि र्हृतया तिरोहितया दृष्ट्या मया किञ्चिन्न दृष्टं निम्नमुन्नतं वा नावलोकितम्, पक्षे गोपे बल्लवे त्वयि रागः प्रेमा तेन हृतयाऽऽयत्तीकृतया दृष्ट्या किञ्चित्कर्तव्यमकर्तव्यं वा मया न दृष्टं नालोचितम्, गोपेति सम्बोधनं वा, तेनैव हेतुना स्खलिता मार्गात् पक्षे सच्चारित्र्याद् भ्रष्टाऽस्मि । हे नाथ ! ऐश्वर्यशालिन् पक्षे स्वामिन् ! पतितां मां किन्नाम कुतः खलु नालम्बसे, हस्तेन न गृह्णासि ? पक्षे पतितां पतित्वं कुतो नाश्रयसि ? विषमेषूच्चावचस्थलेषु गमनासामर्थ्यात् खिन्नमनसां क्लान्तचित्तानां सर्वेषामबलानां बलहीनजनानाम्, एकस्त्वंगतिश्शरणमसि, पक्षे विषमेषोः कन्दर्पात् खिन्नमनसां सर्वासामबलानामङ्गनानामेकस्त्वं गतिश्शरणमसि, एवं सलेशं ससूचनं सच्छलमिति यावत्, गोप्या गोष्ठे व्रजे गदितउक्तो हरिर्वोयुष्मांश्चिर मवताद्रक्षतादित्यर्थः ।

तथाच—अल्पीभावार्थकाल्लिशधातोर्घञि लेश इति सूचनार्थम् 'अल्पीभावनं हि सूचन मेव' इति लोचनदर्शनात् ।

अत्रोभयार्थकानामपि गोपरागादिशब्दानामभिधायां पूर्वप्रकरणेन गोधूल्यादिष्वर्थेष्वेव नियन्त्रितायां द्वितीयार्थस्य यद्यपिमूलतोव्यङ्ग्यत्वचमत्कारातिशयाभ्यां ध्वनेः सम्भावना, तथाऽपि पश्चात्सलेशशब्दोपादानेन नियन्त्रितपूर्वद्वितीयार्थाभिधायामपि प्रत्युज्जीवितायां तदर्थबोधोऽप्यभिधालभ्य एवेत्युभयो रर्थयोर्वाच्यत्वेन वाच्यश्लेषस्यैवाय मीदृशोऽन्यश्च विषयः, नतु शब्दशक्तिमूलध्वनेरितिबोध्यम् ॥

तदाह—

एवंजातीयकः सर्व एव भवतु कामं वाच्यश्लेषस्य विषयः।

स्पष्टम्॥

इत्थं विप्रतिपत्तिनिरासाय श्लेषविषयं पृथक् प्रदर्श्य ध्वनेरपि विषयं प्रदर्शयति—

यत्र तु सामर्थ्याक्षिप्तं सदलङ्कारान्तरं शब्दशक्त्या प्रकाशते, स सर्व एव ध्वनेर्विषयः।

प्रागव्याख्यातम्। अनेकार्थस्य शब्दस्य संयोगादिभिरेकस्मिन्नर्थे ऽभिधायां नियमितायां द्वितीयार्थस्याभिधामूलव्यञ्जनयैव बोध्यते शब्दशक्तिमूलस्य संलक्ष्यक्रमध्वनेर्विषयः तदर्थस्याभिधामूलव्यञ्जनागम्यत्वात् केवलाभिधायाः प्रतिरुद्धत्वादित्यभिसन्धिः॥

इत्थं विप्रतिपन्नं मूकीकृत्य शब्दशक्तिमूलध्वनिमुदाहरति—

यथा—'अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः'।

हर्षचरितद्वितीयोच्छ्वासस्थं गद्यमिदम्। अत्रान्तर एतन्मध्ये, कुसुमानां पुष्पाणां समययुगं मधुमाधवात्मकमासद्वयम्, उपसंहरन् समापयन्, पक्षे कौकोर्वा सुमानां समयोयत्र तादृशं, यद्वा कुसुमसमयसदृशं युगं सत्यादियुगम्, उपसंहरन् नाशयन्, धवलानिस्वच्छान्यट्टानिहर्म्यपृष्ठानि गृहान्तराणि वा येन स धवलाट्टः, तादृशश्चासौ फुल्लमल्लिकानां हासो विकासो यत्र सः, पक्षे फुल्लमल्लिकावद्धवलोऽट्टोऽत्यर्थो हासो यस्य तादृशः, ग्रीष्माभिधानो ग्रीष्मनामा, पक्षे ग्रीष्मेणोष्मणोपलक्षितमभक्तानामसुराणां वा कृते ऽभिधानं यस्य सः, महाद्राघीयान् कालोग्रीष्मर्तुः। पक्षे महाकालः शिवः। अजृम्भतोदलसदित्यर्थः।

तथा 'गोत्राः कुः पृथिवी' इत्यमरः। 'अट्टं भक्तेचशुष्के ना क्षौमेऽत्यर्थे गृहान्तरे' 'ग्रीष्मऊष्मर्तुभेदयोः' 'युगोहलरथाद्यङ्गे न द्वयोस्तु कृतादिषु॥ युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपिच॥' इतिमेदिनी।

इह ऋतुवर्णनप्रकरणेन ग्रीष्मपक्षीयार्थे ऽभिधायां नियमितायां शिवपक्षीयार्थस्य शिवग्रीष्मयोरुपमानोपमेयभावव्यञ्जनेनोपमायाश्च प्रतीतिरभिधामूलव्यञ्जनयैवेति ध्वनेरुदाहरणमिदम्। ग्रीष्मपक्षे फुल्लमल्लिकेत्यादौ बहुव्रीहिकर्मधारयगर्भो व्यधिकरणबहुव्रीहिः। शिवपक्षे फुल्लमल्लिकैव धवलाट्टहासो यस्येति विग्रहाश्रयणे 'अल-

दभुजगजम्' इत्यादिवदध्वनित्वंस्यात् । अत्रत्या बहवो मतभेदा लोचनेनालोचनीयाः॥

पुनरुदाहरति—

यथा च—'उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः ॥
पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम् ॥'

उन्नतो गगनोच्छ्रितः, पक्षे यौवनवशोत्थितः, प्रकर्षेणोल्लसन्ती निस्सरन्ती धारा जलप्रपातो यस्मात्सः, पक्षे प्रकर्षेणोल्लसन् शोभमानो हारो मुक्तामाला यत्र तादृशः, कालागुरु अगुरुनामा सुगन्धिधूपद्रव्यविशेषः तदिवमलीमसः, श्यामः, पक्षे तेनोपलिप्तेन मलीमसः, पयोधरभरोमेघातिशयः पक्षे स्तनोत्कर्षः, तन्व्याअभिलाषिणं कं न चक्रे, अपितु सर्वानेव चक्र इत्यर्थः ।

तथाच 'कालागुर्वगुरुस्यात्तु इत्यमरः । 'स्तनमेघौ पयोधरौ' इत्यनेकार्थध्वनिमञ्जरी । 'धारा सैन्याग्रिमस्कन्धे तुरङ्गगतिपञ्चके ॥ घटादिच्छिद्रसन्तत्योः प्रपाते स्याद्द्रवस्य च ॥' 'हारो मुक्तावली युधि' इति मेदिनी च ।

अत्रापि वर्षावर्णनप्रकरणेनमेघपक्षीयार्थेऽभिधानियमनात्स्तनपक्षीयोऽर्थो मेघस्तनयोरौपम्यं व्यज्यत एवेति ध्वनिः ॥

पुनरुदाहरति—

यथा वा—'दत्तानन्दाः प्रजानां समुचितसमयाक्लिष्टसृष्टैः पयोभिः,
पूर्वाह्णे विप्रकीर्णा दिशिदिशि विरमत्यह्नि संहारभाजः ॥
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो,
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु ॥'

मयूरकवेः सूर्यशतकघटकं पद्यमिदम् । समुचिते वर्षादौ पक्षे प्रातरादौ, अक्लिष्टमक्लेशं सृष्टैर्मुक्तैः पयोभि र्जलैः, पक्षे दुग्धैः, प्रजानां जनानां पक्षेसन्ततीनां, दत्तानन्दाः कल्पितप्रमोदाः, तथा पूर्वाह्णे दिशिदिशि, प्रकाशार्थं पक्षे शष्पचरणार्थं, विप्रकीर्णा विक्षिप्ताः प्रसृता इति यावत्, पुनः, अह्निदिने विरमत्यवसानं गच्छति सति, संहारभाजः समाक्षिप्ता ध्वस्ताः, पक्षे एकत्रस्थापिताः, तथा दीर्घस्य दुस्सहत्वादायतस्य जननादिदुःखस्य प्रभवउत्पादको यो भवः संसार स्तत्सम्बन्धि तस्माद्भयं भयम्, तदेव दुस्तरत्वादुदन्वान् समुद्रः, तस्योत्तारउत्तरणं पारगमनमितियावत्, तत्र नावो नौकारूपाः, दीप्तांशोः सूर्यस्य गावः किरणाः पक्षे धेनवः, पावनानां पवि-

त्राणां वो युष्माक मपरिमिता मपरिच्छिन्नां प्रीतिमानन्दं परमत्यन्तमुत्पादयन्तु जनयन्त्वित्यर्थः।

तथाच 'प्रजास्यात्सन्ततौजने' 'उदन्वानुदधिः सिन्धुः' इत्यमरः। 'पयः स्यात्क्षीरनीरयोः' इति मेदिनी। 'दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु॥ भूमौ पशौ च गोशब्दः' इति क्षपणकश्च।

अत्रापि किरणपक्षीयोऽर्थः प्राकरणिकत्वाद्वाच्यः, धेनुपक्षीयोऽर्थः, वाच्यव्यङ्ग्यार्थयोः समन्वये सम्पादनाय कल्पितं गावइवगाव इत्यौपम्यं च व्यज्येते एवेति ध्वनिरेव॥

तदाह—

एषूदाहरणेषु शब्दशक्त्या प्रकाशमाने सत्यप्राकरणिकेऽर्थान्तरे, वाक्यस्यासम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीदित्यप्राकरणिकार्थयो रुपमानोपमेयभावः कल्पयितव्यः सामर्थ्यादित्यर्थाक्षिप्तोऽयं श्लेषो न शब्दोपारूढ इति विभिन्न एव श्लेषादनुस्वानोपमव्यङ्ग्यस्य ध्वनेर्विषयः।

एषु 'अत्रान्तरे' इत्यतः 'दत्तानन्दाः' इत्यन्तेषु त्रिषूदाहरणेषु पूर्वं 'सँय्योगोविप्रयोगश्च' इत्याद्युक्तेः प्रकरणेन प्रस्तुतेऽर्थेऽभिधायानियमनात्प्रस्तुतेऽर्थेऽभिधया बोधिते, पश्चाच्छब्दशक्त्याऽभिधामूलव्यञ्जनया ऽप्रस्तुतेद्वितीयार्थेऽपि बोध्यमाने सति, प्रस्तुताप्रस्तुतयो र्वाच्यव्यङ्ग्ययोरर्थयो र्यदि मिथः सम्बन्धो न स्यात्, तदाऽनन्वितार्थबोधकत्वरूपदोषो वाक्यस्यापतेत्, अतस्तयोरुपमानोपमेयभावः सम्बन्धः सम्बन्धान्तरायोग्यतायां कल्पयितव्यो व्यञ्जनया बोधनीयो भवति, तथा व्यङ्ग्योऽप्रस्तुतत्वादुपमानम्, वाच्यस्तु प्रस्तुतत्वादुपमेय इति द्वितीयार्थस्य वाच्यत्वाभावान्न शब्दोपारूढः, किन्तु च्छायारूप एव श्लेष इति नायं श्लेषस्य विषयः, अपितु शब्दशक्तिमूलध्वने रितिश्लेषध्वन्यो विषयविभागः स्फुटएवेत्यर्थः। 'उपमानोपमेयभाव इति—तेनोपमारूपेण व्यतिरेकनिह्नवादयो व्यापारमात्ररूपा एवास्वादप्रतीतेः प्रधानं विश्रान्तिस्थानं, नतूपमेयादीति सर्वत्रालङ्कारध्वनौ मन्तव्यम्' इति लोचनम्॥

अलङ्काराणामपीमं ध्वनिं दर्शयति—

अन्येऽपि चालङ्काराः शब्दशक्तिमूलानुस्वानरूपव्यङ्ग्ये ध्वनौ सम्भवन्त्येव।

न केवलमुपमैवेति भावः ॥

तत्रादौ विरोधाभासध्वनिमुदाहरति—

तथाहि-विरोधोऽपि शब्दशक्तिमूलानुस्वानरूपो दृश्यत एव । यथा-स्थाण्वीश्वराख्यजनपदवर्णने भट्टबाणस्य—

कादम्बरीकर्तुर्बाणभट्टस्य हर्षचरिते तृतीयोच्छ्वासे स्थाण्वीश्वरनाम्नः कुरुपरपर्यायश्रीकण्ठदेशोपदेशस्य वर्णने गद्यमिदम् ।

'यत्र च मत्तमातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च, श्यामाः पद्मरागिण्यश्च, धवलद्विजशुचिवदना मदिराऽऽमोदिश्वसनाश्च, चन्द्रकान्तवपुषः शिरीषकोमलाङ्ग्यश्च, अभुजङ्गगम्याः कञ्चुकिन्यश्च, पृथुकलत्रश्रियो दरिद्रमध्यकलिताश्च, लावण्यवत्यो मधुरभाषिण्यश्च, अप्रमत्ताः प्रसन्नोज्ज्वलरागाश्च, अकौतुकाः प्रौढाश्च प्रमदाः ।'

यत्र स्थाण्वीश्वरजनपदे 'प्रमदाः कामिन्य ईदृश्यः सन्तीति सर्वत्रसम्बन्धः । मत्तान् क्षीबान् मातङ्गाञ्छ्वपचान् गन्तुमुपरमयितुं शीलं यासां ताः, शीलंसद्वृत्तं सदाचार इतियावत् तद्वत्यश्चेतिविरोधः, मत्तगजवद्गामिन्य इति परिहारः । गौर्यः पार्वत्यः, विगतोविभिन्नो वा भवश्शिवो यस्मात्तस्मिन् विभवे शिवभिन्ने रताः, यद्वा विगतं भवेभवाद्वा रतं यासां ता इति विरोधः, गौरवर्णा धने रता इति परिहारः । श्यामाः कृष्णवर्णाः क्षपा वा, पद्मस्य रागइवरागो लौहित्यं, तद्वत्यः पद्मस्यरागं दधानावेति विरोधः, षोडशवार्षिक्यः शीतकालादावुष्णत्वादिगुणवत्यो वा, पद्मरागमणिभाजः पद्मप्रेम भाजो वेति परिहारः । धवलद्विजानां शुद्धब्राह्मणानामिव शुचि पवित्रं वदनं यासां ताः, मदिरावन्मदिरया वा आमोदि सुगन्धि श्वसनं निश्श्वासो यासां यद्वाऽऽमोदीश्वसनो मुखमारुतो यासां ता इति विरोधः, धवलैःश्वेतैं द्विजैं र्दन्तैं श्शुचिस्वच्छं वदनं यासां ता इति परिहारः । चन्द्रकान्तस्य मणे र्वपुर्यासां ताः, शिरीषपुष्पवत् कोमलाङ्ग्य इति विरोधः, चन्द्रवत्कान्तं कमनीयं वपु र्यासां ता इति परिहारः । अभुजङ्गेन सर्पभिन्नेन गम्या उपभोग्या भुजङ्गेन सर्पेणागम्या वा, कञ्चुकिन्यः सर्पिण्य इति विरोधः, विटेनागम्या कूर्पासकवत्य इति परिहारः । पृथोस्तदाख्यस्यराज्ञःकलत्रस्य दाराणां श्रीरिव श्रीर्यासां ताः, यद्वा पृथोः कलत्रभूताः श्रियः, दरिद्राणां दुर्विधानां मध्ये कलिताः सङ्ख्याता इति विरोधः पृथ्वी गुरु र्यद्वापृथोर्गुरोः

कलत्रस्य श्रोणेः श्रीश्शोभा यासां ताः, दरिद्रेण क्षीणेन मध्येनावलग्नेन कलिता युक्ता इति परिहारः । लवणानां भावो लावण्यं तद्रत्यः, । मधुरं मिष्टं भाषितुं शीलं यासां ता इति विरोधः, लावण्यं प्रागलक्षितं कान्तिविशेषं दधाना इति परिहारः । न प्रकर्षेण मत्ताः, प्रसन्नः स्फीत उज्ज्वलो दीप्यमानो रागो मदो यासां ता इति विरोधः, अननत्रहिताः सावधाना इति यावत्, प्रसन्न उज्ज्वलो रागः प्रेमा यासां ता इति परिहारः । अकौतुका अजातविवाहा अनैवाहिककङ्कणा वा, प्रकर्षेणोढाः परिणीता इति विरोधः, नास्ति कौतुकमभिलाषः पूर्णकामतया यासां ताः, प्रौढाः प्रगल्भाः पतिमात्रविषयककेलिकलाकलापकोविदाश्चेति विरोधस्य परिहारः । तथाच—'मातङ्गश्श्वपचेगजे' 'कौतुकं त्वभिलाषेस्यादुत्सवे नर्महर्षयोः ॥ तथापरम्परायातमङ्गले च कुतूहले ॥ विवाहसूत्र—गीतादिभोगयोरपि न द्वयोः' 'द्विजःस्याद्ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना' इतिमेदिनी । 'शीलं स्वभावे सद्वृत्ते' 'श्वसनः स्पर्शनोवायुः' इत्यमरः 'भुजङ्गोभुजगे षिङ्गे' इति त्रिकाण्डशेषः । 'कञ्चुकं वारबाणो ना' 'निर्मोकः कञ्चुकोऽस्त्रियाम्' इति केशवः । 'चामीकराभं शुक्लं च गौरमाहु र्मनीषिणः ॥ असञ्जातरजाः कन्या गौरीगौरी च पार्वती' इति शाश्वतः । 'श्यामाषोडशवार्षिकी' इत्यभिधानम् । 'रजनी वसति. श्यामा' इति हैमः । 'कूपोदकं वटच्छाया श्यामा स्त्री चेष्टकागृहम् ॥ शीतकालेभवेदुष्णमुष्णकाले च शीतलम्' इति चाणक्यशतकम् । 'कलत्रं श्रोणिभार्ययोः' इतिविश्वश्च । इत्थमत्र प्रतीयमानोऽपि श्लेषानुप्राणितो विरोधाभासो वाच्य इति नैव वक्तुं शक्यम्, विरोधाभासवाचकस्याप्यादेरभावादर्थद्वयस्य वाच्यत्वाच्च ॥

तदाह—

अत्रहि वाच्यो विरोध, स्तच्छायाऽनुग्राही वा श्लेषोऽयमिति न शक्यं वदितुम्, साक्षाच्छब्देन विरोधालङ्कारस्याप्रकाशितत्वात् ।

अपिशब्दो विरोधशब्दश्च विरोधाभासमभिधत्ते । द्वयोरर्थयोर्वाच्यतायां श्लेषो वाच्यः । प्रकृतेऽप्यादिशब्दाभावादर्थद्वयस्य वाच्यत्वविरहाच्च न विरोधो नवाश्लेषो वाच्यः, किन्तु व्यङ्ग्यएवेति ध्वनेरेवोदाहरणमिदमितिसारम् ॥

वाच्यं विरोधं श्लेषं च दर्शयति—

यत्रहि साक्षाच्छब्दावेदितो विरोधालङ्कारः, तत्र हि श्लिष्टोक्तौ वाच्यालङ्कारस्य विरोधस्य श्लेषस्य वा विषयत्वम् ।

यत्र यस्यां श्लिष्टोक्तौ श्लेषवतिकाव्ये, शब्देन साक्षादावेदितोऽभिहितो विरो-

धाभासो ऽलङ्कारः, तत्र काव्ये वाच्यस्य श्लेषविरोधयोः सङ्करस्य विषयतेत्यर्थः । वाशब्दः पूर्ववत्साङ्कर्य्यसूचकः ॥

उदाहरति—

यथा हर्षचरिते—'समवाय इव विरोधिनां पदार्थानाम् । तथाहि—'सन्निहितबालान्धकारा भास्वन्मूर्त्तिश्च' इत्यादौ ।

हर्षचरितप्रथमोच्छ्वासे दधीचानुचरेण विकुक्षिणा सावित्रीम्प्रत्युक्तं गायत्रीवर्णनमिदम् । विरोधिनां मिथोविरुद्धानां पदार्थानां वस्तूनां समवाय एकत्र स्थितिरिवेयम् । तथाहि—सन्निहितः समीपस्थो बालोनवीनोऽन्धकारस्तमो यस्याः सा च पुनर्भास्वतः सूर्यस्य मूर्त्तिरिति विरोधः, सन्निहिता बालाः कचा एव नीलत्वादन्धकारा यस्याः, तथा भास्वती कान्तिमती मूर्त्ति यस्याः सेति परिहारः ।

तथाहि 'बालोऽङ्गेऽश्वेभपुच्छयोः ॥ शिशौ ह्रीवेरकचयोः' इतिहैमः ॥ अत्र यद्यपि, अपिशब्दोनास्ति, किन्तु पूर्ववाक्यघटकविरोधशब्देनैव विरोधालङ्कारः साक्षाद्बोधित इति विरोधाभास स्तदुपकारी श्लेषश्च वाच्यः । वस्तुतः श्लेषस्यात्र न वाच्यत्वम्, तथापि विरोधानुरोधेन वाच्यत्वव्यपदेशः ॥

नन्विहापि मत्तमातङ्गेत्यादावपि चकारोऽपिशब्दवत्पुनःपुनरुच्चारितः समुच्चयाबोधकोविरोधाभिधायकोऽस्त्येवेति कथं व्यङ्ग्यत्वमित्यरुचेःस्वीयं तदुदाहरणमाह—

यथा वा ममैव—'सर्वैकशरणमक्षयमधीशमीशं धियां हरिं कृष्णम् ॥
चतुरात्मानं निष्क्रियमरिमथनं नमत चक्रधरम् ॥'

सर्वेषा मेकस्य शरणं गृहम्, अक्षयं क्षयोगृहं तद्भिन्नमितिविरोधः, सर्वेषांचराचराणामेकं प्रधानं शरणं रक्षकम्, अविनाशिनमिति परिहारः । न धियां बुद्धीनामीशोऽधिपति रधीश, स्तम्, धिया मीशमिति विरोधः, अधीशमधिपतिमितिपरिहारः । हरिं हरितवर्णं कृष्णं श्याममिति विरोधः, विष्णुं, कृष्णाख्यमिति परिहारः । चतुरः क्रियाकुशल आत्मा यस्य, तं निष्क्रियं क्रियाशून्यमिति विरोधः, चत्वारः कृष्णबलभद्रप्रद्युम्नानिरुद्धाख्या मूर्त्तिव्यूहरूपा आत्मानो यस्य तमिति परिहारः । अराणि रथाङ्गावयवाः सन्त्यस्मिन्नित्यरि चक्रम्, तस्य मथनं नाशकम्, चक्रस्य धरं धारकमिति विरोधः, अरीणां शत्रूणां मथनमिति परिहारः । नमत नमस्कुरुतेत्यर्थः ।

तथाच 'शरणं गृहरक्षित्रोः' इति विश्वः। 'क्षयौ निलयकल्पान्तौ क्षयोऽपचय-रोगयोः।' 'अरमङ्गे रथाङ्गस्य' इति शाश्वतः। 'शात्रवः प्रत्यवस्थाता प्रत्यनीकोऽभि-यात्यरी' इति हैमः। 'दक्षे तु चतुरपेशलपटवः' 'एके मुख्यान्यकेवलाः' इत्यमरः।

अत्रवाचकविरहात्संलक्ष्यक्रमव्यङ्ग्यो विरोधाभासः श्लेषोत्थापितः॥

तदाह—

अत्र हि शब्दशक्तिमूलानुस्वानरूपो विरोधः स्फुटमेव प्रतीयते।

शब्दशक्तिमूलत्वं शब्दस्यपरिवर्तनासहत्वात् प्रतीयते व्यज्यते॥

व्यतिरेकालङ्कारं शब्दशक्त्या व्यज्यमानमुदाहरति—

एवंविधो व्यतिरेकोऽपि दृश्यते--

एवंविधःशब्दशक्तिमूलव्यङ्ग्यः॥

खं येऽत्युज्ज्वलयन्ति लूनतमसो ये वा नखोद्भासिनो,
ये पुष्णन्ति सरोरुहश्रियमपि क्षिप्ताब्जभासश्च ये॥
ये मूर्धस्ववभासिनः क्षितिभृतां येचामराणां शिरां-
स्याक्रामन्त्युभयेऽपि ते दिनपतेः पादाश्श्रिये सन्तु वः॥'

ये लूनतमसउन्मूलितान्धकाराः पादाः किरणाः, खमाकाशम्, अतिशयेनोज्ज्व-लयन्ति भासयन्ति। ये वा ये च पादाश्चरणाः नखैर्नखरैरुद्भासिनः खस्यनोद्भासि-नश्च। ये किरणाः सरोरुहाणां कमलानां श्रियं शोभामपि पुष्णन्ति वर्धयन्ति। ये चरणाः पुनः क्षिप्ता आहता निन्दितावाऽब्जानां कमलानां भासः श्रियो यै स्तादृशाः। ये किरणाः क्षितिभृतां पर्वतानां राज्ञां वा मूर्धसु शिखरेषु मस्तकेषु वा, अवभासि-नो दीपनशीलाः सन्ति। ये चरणाः पुनरमराणां देवानां चामराणां वा शिरांसि, आ-क्रामन्त्यधिष्ठानेन व्याप्नुवन्ति। त उभयेऽपि द्विविधा अपि, दिनपतेः सूर्यस्य पा-दाः किरणाश्चरणाश्च वो युष्माकं श्रियैसम्पत्तिजननाय सन्तु प्रभवन्त्वित्यर्थः।

तथाच 'पादाबुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते॥ चरणे च मयूखे च' इति-मेदिनी॥

अत्र• तमोनाशनपुरस्सराकाशभासन-सरोरुहश्रीपोषण-पर्वतशिखरोल्लसना दिव्यापारविशिष्टसूर्यकिरणानामुपमेयाना माकाशानुद्भासन-सरोरुहशोभाऽऽहरण पूजनीयामरविसरशिखरारोहणादि-हीनधर्मयोगि-सूर्यचरणरूपोपमानापेक्षयाऽऽधिक्यं शब्दानभिधेयं प्रतीयत इति शब्दशक्तिमूलव्यतिरेकध्वनिः॥

उपसंहरति—

एवमन्येऽपि शब्दशक्तिमूलानुस्वानरूपव्यङ्ग्यध्वनिप्रकाराः सम्भवन्ति, ते सहृदयैः स्वयमनुसर्तव्याः। इह तु ग्रन्थविस्तरभयान्न तत्प्रपञ्चः कृतः।

प्रपञ्चोविस्तरः। अन्यत्स्फुटम् ॥

इत्थं शब्दशक्त्युद्भवध्वनिं निरूप्यार्थशक्त्युद्भवध्वनिं निरूपयति—

'अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः सम्प्रकाशते ॥

यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः ॥४५॥

यत्र यस्मिन् काव्ये, अर्थशब्दाभिधावलेन स्वयं पूर्वं सम्यक्प्रकाशते बोधविषयोभवति, पश्चाद्योऽर्थः स्वतउक्तिं वाचकशब्दप्रयोगं विनाऽभिधां विनैवेतियावत्, तातत्पर्येणव्यञ्जनया, अन्यद् वाच्याद्भिन्नं व्यङ्ग्यं वस्त्वर्थम्, व्यनक्ति बोधयति, स शब्दशक्तिमूध्वने रन्योऽर्थशक्त्युद्भवो ध्वनिरित्यर्थः ॥

तदाह वृत्तिकारः—

यत्रार्थः स्वसामर्थ्यादर्थान्तरमभिव्यनक्ति शब्दव्यापारं विनैव सोऽर्थशक्त्युद्भवो नामानुस्वानोपमव्यङ्ग्यो ध्वनिः।

अस्यापि पूर्ववत्संलक्ष्यक्रमत्वं शब्दपरिवृत्तिसहत्वाच्चार्थशक्त्युद्भवत्वं च ॥

उदाहरति—

यथा—**'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ॥**

लीलाकमलपत्राणि गणयामास पार्वती ॥'

कुमारसम्भवषष्ठसर्गस्थं पद्यमिदम्। देवर्षावङ्गिरसि, एवं वादिनि पूर्वोक्तं वदति सति, पितु र्हिमाचलस्य पार्श्वेस्थितेति शेषः, पार्वती, अधोमुखी विवाहवृत्तश्रवणजलज्जया नम्रवदना लीलाकमलस्य हस्तस्थसरोजस्य पत्राणि दलानि गणयामास भावगोपनाय सञ्चख्याविल्यर्थः। अत्र शब्दव्यापारं विनैव नतवदनायाः पार्वत्या लीलाकमलदलसङ्ख्यानरूपोऽर्थो लज्जारूपं व्यभिचारिभावं व्यनक्तीत्यर्थशक्त्युद्भवध्वनिः ॥

तदाह—

अत्र हि लीलाकमलपत्त्रगणनमुपसर्जनीकृतस्वरूपं शब्दव्यापारं विनैवार्थान्तरं व्यभिचारिभावलक्षणं प्रकाशयति।

वाच्यार्थस्योपसर्जनीभावादेवात्रध्वनिः ।

अयमाशयः—'एवंवादिनि' इत्यादिश्लोकाद्वाच्यार्थे प्रतीते, विवाहवार्ता-श्रवणसमये गौर्यावदननमनं लीलाकमलदलसङ्ख्यानञ्च तद्वाच्यार्थवस्तुप्रकरणादि-साहाय्येन स्वोपपादकं व्रीडं गमयतीतिवाच्यव्यङ्ग्यप्रतीत्योः क्रमस्य लक्ष्यत्वम् ॥

अस्यासंलक्ष्यक्रमव्यङ्ग्यलक्ष्यत्वमाशङ्क्य, समाधत्ते—

न चायमलक्ष्यक्रमव्यङ्ग्यस्यैव (ध्वनेः) विषयः, यतो यत्र साक्षाच्छब्दनिवेदितेभ्यो विभावानुभावव्यभिचारिभ्यो रसादीनां प्रतीतिः, स तस्य केवलस्य मार्गः ।

अलक्ष्यक्रमव्यङ्ग्यस्यैव विषयोऽयमिति न वाच्यम्, यस्मायत्र विभावादिभ्यः साक्षाच्छब्दं बोधितेभ्यो रसादीनां प्रतीतिर्भवति, स केवलस्य कृत्स्नस्य तस्यासंलक्ष्यक्रमध्वनेर्मार्गोविषय इत्यर्थः । असंलक्ष्यक्रमध्वनि स्तत्रभवति, यत्र वाच्यार्थबोधाव्यवधानेन विभावादिप्रतीतिरूपसामग्र्यासमवधानेन रसादीनां प्रतिपत्तिर्जायते । प्रकृते तु पद्मपत्रसङ्ख्यानं मुखनमनं चान्यथाऽपि बालिकानां सम्भवतीतिवाच्यार्थेन झटित्येव लज्जात्मको व्यङ्ग्यार्थो न बोधयितुं शक्यः, किन्तु विवाहवृत्तान्तप्रस्तावात्मकप्रकरणपर्यालोचनानन्तरं क्रमेणेति लक्ष्यक्रमतैवेत्याशयः ।

ननु व्यभिचारिणा मभिधेयत्वं क्वचिदपि न भवतीति प्रागुक्तम्, इदानीं पुनस्तेषां शब्दसाक्षान्निवेदितत्वमुच्यत इति पूर्वापरकथनविरोध आपद्यत इतिचेत्, न, अत्र शब्दसाक्षान्निवेदितत्वस्य वाच्यार्थप्रतीत्यव्यवहितप्रतीतिविषयत्वमात्रपरत्वात्, तत्त्वस्य च तादृशव्यङ्ग्यप्रतीतिविषयत्वेऽप्यनिरासात् ॥

उदाहरणदर्शनेनोक्तं द्रढयति—

यथा कुमारसम्भवे मधुप्रसङ्गे वसन्तपुष्पाभरणं वहन्त्या देव्या आगमनादिवर्णनं मनोभवशरसन्धानपर्य्यन्तम्, शम्भोश्च परिवृत्तधैर्यस्य चेष्टाविशेषवर्णनादि, साक्षाच्छब्दनिवेदितम् ।

कुमारसम्भवे तृतीयसर्गे वसन्तप्रारम्भे—

'निर्वाणभूयिष्ठमथास्य वीर्यं, सन्धुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ॥'
'प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च ।
सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥'

'हरस्तु किञ्चित्परिलुप्तधैर्य श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥' इत्यादौ ।

यथाऽऽलम्बनोद्दीपनविभावानामुमा-वसन्तप्रसङ्ग-मनोभवशरसन्धान—शिवकृतोमामुखावलोकनप्रभृतीनां शब्दाभिधेयत्वेन स्थायिभावस्य रते, र्व्यभिचारिणामौत्सुक्यहर्षावेगचापल्यप्रभृतीनां च झटित्येवालक्ष्यक्रमत्वेन व्यज्यमानता, न तथाऽत्र, अत्र हि वाच्यार्थप्रतीत्युत्तरं विलम्बेन लज्जाया व्यभिचारिभावस्य प्रतीतिः, तदुत्तरं रतेरिति महान् विलम्बोऽलक्ष्यक्रमतां बाधत इति सारम् ॥

तदाह—

इह तु सामर्थ्याक्षिप्तव्यभिचारिमुखेन रसप्रतीतिः ।

इह 'एवंवादिनि' इतिश्लोकेतु व्यज्यमानेन लज्जाऽऽख्यव्यभिचारिभावेन व्यवहिता रसस्य रतेश्शृङ्गारस्य चास्वाद इति नासंलक्ष्यक्रमत्वं, किन्तुलक्ष्यकमतैवेत्याशयः ॥

निगमयति—

तस्मादयमन्यो ध्वनेः प्रकारः ।

अन्यः संलक्ष्यक्रमव्यङ्ग्यः ॥

कारिकायाम् 'उक्तिंविना' इत्युक्तेः फलं दर्शयितुमुपक्रमते—

यत्र च शब्दव्यापारसहायोऽर्थोऽर्थान्तरस्य व्यञ्जकत्वेनोपादीयते, स नास्य ध्वने र्विषयः ।

उपादीयतेऽभिधीयते । यत्र 'सङ्केतकालमनसम्' इत्यादौ लीलाकमलनिमीलनादिरूपो वाच्यार्थआकूतशब्दव्यापारस्याभिधायाः साहाय्येनार्थान्तर मागमनयोग्यसायंसमयरूपं व्यङ्ग्यमर्थं प्रत्याययति, सोऽस्यार्थशक्त्युद्भवसंलक्ष्यक्रमव्यङ्ग्यस्य न विषयः । तत्रापि सामग्रीसङ्घटनाया मसंलक्ष्यक्रमव्यङ्ग्यप्रभेदत्वं न वार्यते, तस्य प्रकारान्तरेण व्यवस्थापनादित्यभिसन्धिः ॥

उदाहरति—

यथा—'सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥'

विदग्धया चतुरया पुंश्चल्या, सङ्केतकाले मनो यस्य तादृशं सम्मेलनसमयं जिज्ञासुं विटं षिङ्गमुपपतिं ज्ञात्वेङ्गितैरनुमाय, हसद्भ्यामीषद्विकसद्भ्यां नेत्राभ्या-

मर्पितं दत्तमाकूतमभिप्रायसूचकमिङ्गितं यथाभवति तथा लीलापद्मं निमीलितं सङ्कोचितमित्यर्थः। तथाच 'विटोऽद्रौलवणे षिङ्गे' इतिमेदिनी। 'स्यादाकूतमभिप्रायः' इत्यभिधानञ्च। केचित्पुनर्हसदित्यादि विटविशेषणं मन्यन्ते। अपरे हस्ते नेत्रार्पिताकूतमितिपाठं व्याहरन्ति।

अत्र कमलनिमीलनरूपवाच्यार्थेन यद्यपि सायंसन्ध्यालक्षणः सङ्केतकालो व्यज्यत इति ध्वनेः सम्भावनाऽस्ति, किन्त्वाकूतशब्देन सोऽर्थोऽभिहित इति न ध्वनिः, अपितु गुणीभूतव्यङ्ग्य एव। नन्वाकूतशब्दस्याद्यचरणत्रयस्य वा तदर्थेऽभिधाऽभावादिदानीमपि कथं नध्वनिरिति चेत्, न, अभिधाविरहात्तदर्थस्याभिधेयीकरणाभावेऽप्याकूतशब्देनार्थान्तरस्य व्यञ्जकोऽत्रशब्दोऽस्तीतिसूचनाद्द्वाराऽर्थान्तरेऽभिधेयायमानताऽऽधानात्।

तदाह—

अत्र लीलाकमलनिमीलनस्य व्यञ्जकत्वमुक्त्यैव निवेदितम्।

अतोनार्थशक्तिमूलो ध्वनिरिति शेषः॥

तदाह ध्वनिकारोऽपि—

तथाच—

'शब्दार्थशक्त्या वाऽऽक्षिप्तो व्यङ्ग्योऽर्थः कविना पुनः॥
यत्राविष्क्रियते स्वोक्त्या साऽन्यैवालंकृति ध्वनेः॥ ४३॥

शब्दश्चार्थश्च शब्दार्थौ, शब्दार्थौ च शब्दार्थौ च शब्दार्थाः, तेषां शक्तिरभिधामूला स्वतन्त्रा च व्यञ्जना तयाऽऽक्षिप्तोबोधितोऽर्थो यत्र कविना पुनः स्वोक्त्या तद्वाक्यघटकपदान्तरेण, आविष्क्रियते प्रकाश्यते, सा ध्वने रन्यावाच्यत्वादतिरिक्ता, अलंकृतिरलङ्कार एव, नतु ध्वनि रित्यर्थः।

यत्रवाक्ये बहुभिः पदैरर्थोव्यज्यते, किन्त्वेकेन केनापि पदेन पुनरत्र वाच्यभिन्नो ऽप्यर्थोऽस्तीति सूच्यते चेत्, तर्हि न तत्र संलक्ष्यक्रमोऽसंलक्ष्यक्रमो वा ध्वनिः, व्यङ्ग्यार्थस्य स्फुटीभावेन निरावरणीकृतकामिनीकुचकलशवच्चमत्कारकत्वविरहात्, अपितु तत्र श्लेषादिरलङ्कार एव भवतीतिसारम्॥

तद्व्याचष्टे वृत्तिकृत्—

शब्दशक्त्याऽर्थशक्त्या शब्दार्थशक्त्या वाऽऽक्षिप्तोऽपि व्यङ्ग्योऽर्थः

कविना पुनर्यत्र स्वोक्त्या प्रकाशीक्रियते, सोऽस्मादनुस्वानोपमव्यङ्ग्या-द्ध्वने रन्यएवालङ्कारः। अलक्ष्यक्रमव्यङ्ग्यस्य वा ध्वनेः सति सम्भवे, स तादृगन्योऽलङ्कारः।

एतेन पूर्वोक्तशब्दशक्त्युद्भवध्वने स्तृतीयोऽपिप्रकारः साधितः॥

तत्र शब्दशक्त्या व्यङ्ग्यस्य पदान्तरेण प्रकाशनात्संलक्ष्यक्रमध्वने रभावमुदाहरति—

तत्र शब्दशक्त्या यथा—

'वत्से! मा गा विषादं श्वसनमुरुजवं सन्त्यजोर्ध्वप्रवृत्तं,
कम्पः को वा गुरुस्ते किमिह बलभिदा जृम्भितेनात्र याहि॥
प्रत्याख्यानं सुराणामिति भयशमनच्छद्मना कारयित्वा,
यस्मै लक्ष्मी मदाद्वः स दहतु दुरितं मन्थमूढां पयोधिः॥'

हे वत्से! पुत्रि! विषादं खेदं पक्षे विषमत्तीतिविषादस्तं शिवं, मागा न प्राप्नुहि पक्षे नवृणु, ऊर्ध्वप्रवृत्तमुच्चैर्जातम्, उरुजवं बहुवेगं, श्वसनं श्वासं सम्यक्त्यज, पक्षे उरुजवं श्वसनं वायुम्, ऊर्ध्वप्रवृत्तं 'प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः' इत्यादिदर्शनादग्निं सन्त्यज, गुरुर्महान् कम्पोवेपथुर्वा ते कः? कुतोभवति? पक्षे कं जलं पातीति कम्पो वरुणः को ब्रह्मा वा ते गुरुः पूज्यस्तेन तावपि न वृणु, बलभिदाऽऽयासकारितया बलहानिकारिणा जृम्भितेन जृम्भया गात्रसम्मर्देनेन च, इह किम्? न किमपि प्रयोजनम्, पक्षे जृम्भितेन परमैश्वर्यशोभितेन बलभिदाशक्रेणेह किम्, अत्र निर्भये स्थाने, पक्षे विष्णौ, याहि, इत्येवं भयस्य शमनच्छद्मना निवारणव्याजेन, सुराणां शिवप्रभृतिदेवानां प्रत्याख्यानं निराकरणं मन्थमूढां मन्दरान्दोलनजलधितरङ्गभङ्गपर्याकुलितां लक्ष्मीं कारयित्वा, पयोधिः समुद्रो यस्मै तामदाद्दौ, स विष्णुर्वोयुष्माकं दुरितं पापं दहत्वित्यर्थः।

अत्र विषादादिशब्दै र्व्यज्यमानोऽपि शिवादिरूपोऽपरार्थश्छद्मशब्दं प्रयुञ्जानेन कविना प्रकाशित इति न ध्वनिः। विषादादिशब्दानां परिवर्तनं च कर्तुमशक्यमिति शब्दशक्तिमूलत्वसम्भावना। कमित्यव्ययं जलवाचीति कम्पशब्दः सिध्यति। विषभक्षकत्वाच्छिवस्य, प्रचण्डवेगत्वा द्वायोः, ऊर्ध्वप्रवृत्तत्वादग्नेः, गुरुत्वाद्वरुणविरिञ्च्योः, बलभेदकत्वादिन्द्रस्य च त्याज्यत्वं दोषविशेषानुक्तेर्विष्णोश्चाश्रयणीयत्वंच व्यज्यते॥

अर्थशक्त्या व्यङ्ग्यस्य गुणीभावमुदाहरति—

अर्थशक्त्या यथा—

अम्बा शेतेऽत्र वृद्धा परिणतवयसामग्रणीरत्र तातो,
निश्शेषागारकर्मश्रमशिथिलतनुः कुम्भदासी तथाऽत्र ॥
अस्मिन् पापाऽहमेका कतिपयदिवसप्रोषितप्राणनाथा,
पान्थायेत्थं तरुण्या कथितमवसरव्याहृतिव्याजपूर्वम् ॥

हे पान्थ ! अत्रास्मिन् गृहे वृद्धाजरती, अम्बा माता शेते, अत्र परिणतवयसां-वृद्धानामग्रणीर्वर्षीयांस्तातः पिता शेते, तथाऽत्र निश्शेषैरखिलैरगारकर्मभिर्गृहकार्यैरिन्धनाहरणादिभिर्यः श्रम आयासस्तेन शिथिला तनु र्यस्याः सा, कुम्भदासी जलहारिणी चेटी शेते, अस्मिन् गृहे च कतिपयदिवसैः प्रोषितः परदेशंगतः प्राणनाथो यस्याः सा, अतएव पापाऽपुण्यात्माऽहंशये, इत्थम्, अवसरव्याहृतिव्याजपूर्वं तत्समागमप्रसरोक्तिपुरस्सरं पान्थाय पथिकाय तरुण्यास्त्वैरिण्या युवत्या कथितमित्यर्थः ।

अत्राम्बावार्द्धक्यादयोऽर्थाः समागमसंनिधानसौकर्यमुखेन यां तदीयसम्भोगेच्छां व्यञ्जन्ति, सा व्याजशब्देन स्फुटीकृतेति नार्थशक्त्युद्भवव्यङ्ग्योध्वनिः । तदभावे च ध्वनिः स्यादेव एवं पूर्वत्रापि बोध्यम् ।

पित्रोर्वार्द्धक्येन दास्या श्रमशिथिलाङ्गत्वेन गृहान्तरशयनेनच रहस्यविहारस्य सौकर्यमुद्भेदायोग्यता च, ततस्तदाचरणसमीहा, प्रोषितपतिकत्वेनात्मन उत्कटा विजिहीर्षा पान्थस्य भीत्यसम्भावना च, दास्याः कुम्भसम्बन्धेन परचरितानभिज्ञत्वं च सूच्यते ।

उभयशक्त्या व्यङ्ग्यस्य गुणीभावमुदाहरति—

उभयशक्त्या यथा—'दृष्ट्या केशव ! गोपरागहृतया' इत्यादौ ।

श्लोकोऽयं प्रागेव विवृतोवर्णितव्यङ्ग्यगुणीभावश्च । तत्र गोपरागादिशब्दानां परिवर्तनाक्षमत्वेन दृष्टमित्यादिशब्दानां तत्क्षमतयाचोभयशक्तिमूलध्वनेः सम्भावना लेशशब्देन निराकृतेतिसङ्क्षेपः ।

अर्थशक्त्युद्भवध्वनिमुदाहर्तुमर्थभेदं दर्शयति—

प्रौढोक्तिमात्रनिष्पन्नशरीरः सम्भवी स्वतः ।
अर्थोऽपि द्विविधो ज्ञेयो वस्तुनोऽन्यस्य दीपकः ॥४७॥

प्रौढोक्तिमात्रनिष्पन्नशरीरः स्वतः सम्भवीचेति द्विविधोऽर्थोऽपि अन्यस्य व्यङ्ग्यस्य वस्तुनोऽर्थस्य दीपको व्यञ्जक इत्यर्थः। केचित्तु—'योऽर्थान्तरस्य दीपको व्यञ्जकोऽर्थ उक्तः, सोऽपि द्विविधः, न केवलमनुस्वानोपमोद्विविधः, यावत्तद्भेदो यो द्वितीयः, सोऽपि व्यञ्जकार्थद्वैविध्यद्वारेण द्विविध इत्यपि शब्दस्यार्थः' इत्याहुः॥

तदनुसारेण विवृणोति वृत्तिकृत्—

अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्ये ध्वनौ यो व्यञ्जकोऽर्थ उक्तः, तस्यापि द्वौ प्रकारौ। कवेः कविनिबद्धस्य वा वक्तुः प्रौढोक्तिमात्रनिष्पन्नशरीर एकः, स्वतः सम्भवी च द्वितीयः।

प्रौढोक्तिमात्रनिष्पन्नशरीरः कवेः कविकल्पितस्य वक्तु र्वा 'अत्यन्ता सत्यपिह्यर्थे ज्ञानंशब्दः करोतिहि' इति न्यायात्काल्पनिकभणित्यैव, न तु वस्तुस्थित्याऽपि, सम्पन्नाकारः, स्वतः सम्भवी योग्यतया लोकेऽपि सम्भवनाविषयः, नतु काल्पनिकभणितिमात्रेण निष्पन्नशरीर इति द्विविधः, वस्तुतः प्रथमप्रकारस्य द्वैविध्यात्त्रिविधोऽर्थो व्यञ्जक इत्यर्थः।

त्रिविधोऽप्यसौ वस्तुरूपोऽलङ्काररूपश्चार्थो वस्तुनोऽलङ्कारस्य च व्यञ्जक इति द्वादशधाऽर्थशक्त्युद्भवध्वनिरन्यत्र दर्शितः। तथाहि—कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यवस्तुध्वनिः १, तादृशवस्तुव्यङ्ग्यालङ्कारध्वनिः २, तादृशालङ्कारव्यङ्ग्यवस्तुध्वनिः ३, तादृशालङ्कारव्यङ्ग्यालङ्कारध्वनिः ४, एवं कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यवस्तुध्वनिः ५, तादृशवस्तुव्यङ्ग्यालङ्कारध्वनिः ६, तादृशालङ्कारव्यङ्ग्यवस्तुध्वनिः ७, तादृशालङ्कारव्यङ्ग्यालङ्कारध्वनिः ८, एवं स्वतस्सम्भविवस्तुव्यङ्ग्यवस्तुध्वनिः ९, तादृशवस्तुव्यङ्ग्यालङ्कारध्वनिः १०, तादृशालङ्कारव्यङ्ग्यवस्तुध्वनिः ११, तादृशालङ्कारव्यङ्ग्यालङ्कारध्वनिः १२, इति तत्र प्रथमस्य द्वितीयस्य पञ्चमस्य षष्ठस्याष्टमस्य नवमस्य दशमस्य च प्रकारस्योदाहरणानि मूले दर्शयिष्यन्ते, परेषां प्रकाराणां प्रकाशप्रभृतौ दर्शितानि—तृतीयस्य प्रकाशे यथा—

'गाढालिंगणरहसुज्जुअम्मि दइए लहुं समोसरइ।
माणं-सिणीण माणो पीलणभीअ व्व हिअआहिं॥'
'गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति।
मनस्विन्या मानः पीडनभीत इव हृदयात्॥' इतिच्छाया।

चतुर्थस्य यथा प्रतापरुद्रीये—'काकतीयविभोः कीर्ति-पुण्डरीके विजृम्भिते ॥
धत्ते मधुकरक्रीडां तमालश्यामलं नभः ॥'

सप्तमस्य यथा दर्पणे—'मल्लिकामुकुले चण्डि ! भातिगुञ्जन् मधुव्रतः ॥
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥'

अष्टमस्य यथा प्रकाशे—'महिलासहस्सभरिए तुह हिअए सुहअ ! सा अमाअन्ती ।
अणुदिणमणण्णकम्मा अङ्गं तणुअं वि तणुएइ ॥'
'महिलासहस्रभरिते तवहृदये सुभग ! साऽमान्ती ।
अनुदिनमनन्यकर्मा अङ्गंतन्वपि तनयति ॥'इतिच्छाया ।

एकादशस्य यथा दर्पणे—आपतन्तममुं दूराद्दूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥'

द्वादशस्य यथा रसगङ्गाधरे—'उदितं मण्डलमिन्दो रुदितं सद्यो वियोगिवृन्देन ॥
मुदितं च सकलललना-चूडामणिशासनेन मदनेन ॥' इति ।

यत्तु जगन्नाथेन—'कवितदुम्भितप्रौढोक्तिवक्तृप्रौढोक्तिनिष्पन्नयो र्न पृथग्भावेन गणनोचिता, उम्भितोम्भितादेरपि भेदान्तरप्रयोजकताऽऽपत्तेः' इत्युक्तम्, तन्न, वृद्धोक्तिविषयाच्छिशूक्तिविषय इव, कव्युक्तिविषयात्तन्निबद्धोक्तिविषयोऽधिकतरराग-प्रकटकत्वेनाधिकचमत्कारीति द्वयो र्भेदस्य स्फुटत्वात् । अन्यथा कविनिबद्धभणिति-निष्पन्नः कविभणितिनिष्पन्न एवेति स्वतस्सम्भवित्वं प्रौढोक्तिनिष्पन्नत्वं चेतिद्वैरूप्य-मेव विदध्यात् । इतः परं च प्रणिधानप्रतीतिकतया चमत्कारस्य स्थगनान्न कविनि-बद्धनिबद्धवक्त्रादेः पृथग्गणनमित्युद्द्योतादौ स्पष्टं द्रष्टव्यम् ॥

प्रथमं प्रकारमुदाहर्तुमाह—

कविप्रौढोक्तिमात्रनिष्पन्नशरीरो यथा—

'सज्जेहि सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खमुहे ।
अहिणवसहआरमुहे णवपल्लवपत्तले अणङ्गस्स शरे ॥'

'सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यमुखान् ।
अभिनवसहकारमुखान् नवपल्लवपत्रलाननङ्गस्य शरान् ॥ इति च्छाया ॥

सुरभिमास श्चैत्रमासः, युवतिजनैर्लक्ष्यं रमणीयतया दर्शनीयं मुखमग्रभागो येषां तान्, नवपल्लवाः किसलया एव पत्त्राणि पक्षास्तानि लान्ति गृह्णन्ति ये, तान्, तथा अभिनवो नवमुकुलितः सहकारोऽतिसौरभाम्रो मुखमादि येषां तान्, अनङ्गस्य

कामस्य, शरान् बाणान्, सज्जयति निर्माति प्रसाधयति वा, न केवलं तावदर्पयति कामाय ददातीत्यर्थः ।

इहाचेतनोवसन्तः शरनिर्माता, अनङ्गोधन्वीत्यादिवस्तुरूपोऽर्थः कविप्रौढोक्तिमात्रेण केवलं सिद्धः प्रधानं मन्मथोन्माथदायकत्वं वस्तु वसन्तस्य क्रमेण व्यनक्तीति संलक्ष्यक्रमार्थशक्त्युद्भवकविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यवस्तुध्वनिः । किञ्च सुरभिमासादीनां कविप्रौढोक्तिविषयीकरणादेव व्यञ्जकत्वम्। अन्यथा वसन्तकालिकसहकारकिसलयमुकुलोद्गमस्य वस्तुमात्रस्य तन्न स्यात्। स्कन्धकं छन्दः ॥

द्वितीयभेदस्योदाहरणान्यग्रे 'वीराणं रमइ' इत्यादीनि दर्शयिष्यन्ते । तृतीयचतुर्थभेदयोस्तु प्रागेव मया दर्शितम् ॥

पञ्चमं भेदमुदाहरति—

कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो यथा-'शिखरिणि'इत्यादौ।

पूर्वमेव व्याख्यातोऽयं श्लोकः । अत्र कविनिबद्धस्य कामिनो वक्तुःप्रौढोक्त्या निष्पन्नस्य शुकशावककृतनायिकाऽधरलोहितबिम्बफलदंशनस्य वस्तुनोवस्तुव्यञ्जकत्वेन द्वितीयभेदोदाहरणत्वम् । अन्यथा शुकशिशुर्लोहितं विम्बफलं दशतीत्येतावन्मात्रस्य व्यञ्जकत्वं न स्यात् ॥

पुनरुदाहरति तमेवप्रकारम्—

यथा वा—

कश्चिद्विटो नवयौवनां व्याहरति—

'साअरविइण्णजोव्वणहत्थालम्बं समुण्णमन्तेहिम् ।
अब्भुट्ठाणं विअ मम्महस्स दिण्णं तुह थणेहिम् ॥'
'सादरवितीर्णयौवनहस्तालम्बं समुन्नमद्भ्याम् ।
अभ्युत्थानमिव मन्मथस्य दत्तं तवस्तनाभ्याम् ॥' इतिच्छाया ।

अयि बाले! सादरं ससत्कारं वितीर्णस्य दत्तस्य यौवनेनेतिशेषः, यौवनहस्तस्य तारुण्यकरस्य, आलम्बमवलम्बनं कृत्वा, तद् यथा भवति तथा वा, समुन्नमद्भ्यां समुत्तिष्ठद्भ्याम्, तव स्तनाभ्यां कर्तृभ्याम्, मन्मथस्य कामस्याभ्युत्थानमिव दत्त मित्यर्थः ।

यौवनोन्नम्यमानाभ्यां तवस्तनाभ्यां कामः सम्भावित इति भावः । झटिति स्वयमुत्थातुमशक्नुवन्नन्योऽप्यनुचरकरमवलम्ब्योत्तिष्ठन् समागच्छते गुरवे प्रभवे

वाऽभ्युत्थानं ददातीति समुदाचार इति प्रधानीभूताभ्यामपि स्वयमुत्थातुमशक्नुवद्भ्यां तव कुचाभ्यां यौवनलक्षणानुचरहस्तावलम्बनं विधाय प्रभवे प्रधानतमाय कामाया-भ्युत्थानमिव दत्तमिति समासोक्त्युत्प्रेक्षयोः सङ्करः ।

ददातेर्योगेऽपि मन्मथस्येति सम्बन्धसामान्यविवक्षायां षष्ठी, रजकस्यवस्त्रं ददातीतिवत्परसत्त्वोत्पत्त्यनुत्पत्तिविभावनाच्चतुर्थ्यभावो वा ।

अत्रापि यौवनेन स्तनावुन्नमिताविति साधारणार्थस्य न व्यञ्जकत्वम्, अपि तूक्त-स्य कविकल्पितकामुकप्रौढोक्तिनिष्पन्नस्यैवेति वस्तुनोऽसम्भवितया प्रौढोक्तिमात्रनि-ष्पन्नशरीरत्वमिति च विवेचनीयम् ।

षष्ठभेदस्योदाहरणं 'लावण्यपूरपरिपूरितदिङ्मुखेऽस्मिन्' इत्यादिना मूले दर्श-यिष्यते, सप्तमाष्टमभेदयोस्तु मयैव दर्शितम् ।

इदानीं नवमं भेदमुदाहर्तुमाह—

स्वतः सम्भवी, य औचित्येन बहिरपि सम्भाव्यमानसद्भावो, न केवलं भणितिवशेनैवाभिनिष्पन्नशरीरः ।

स्पष्टम् । उदाहरति—

यथोदाहृतम्—'एवं वादिनि' इत्यादौ ।

इदमपि पद्यं प्राग् विवृतमेव । अत्र स्वतस्सम्भविना मुखनमनादिवस्तुना तादृशंवस्तु व्यज्यते ।

उदाहरणान्तरमपि दर्शयति—

'सिहिपिच्छकण्णपूरा जाआ वाहस्स गव्विरी भमइ ।
मुत्ताफलरइअपसाहणाणं मज्झे सवत्तीणम् ॥'

'शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति ।
मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम् ॥' इतिच्छाया ।

शिखिपिच्छस्य बर्हस्य शिखिपिच्छमेव वा कर्णपूरः कर्णाभरणं यस्याः सा, व्याधस्य मृगयो जायावधूः, मुक्ताफलै मौक्तिकै रचितानि विन्यस्तानि प्रसाधनान्य-लङ्करणानि यासां, तादृशीनां सपत्नीनां मध्ये गर्विणी साभिमाना भ्रमति सञ्चरतीत्यर्थः ।

अत्र स्वतस्सम्भविगर्विव्याधवधू-तादृशसपत्नीजनमध्य—भ्रमणलक्षणं वस्तु स-पत्नीनां दिवसेषु पत्युः सम्भोगैकलग्नमनस्त्वाभावाद्धस्तिनोऽपि हन्तुंक्षमतां द्योतीकृत्य तासां दौर्भाग्यातिशयं, स्वस्य वासरेषु तु साम्प्रतं तस्य निरन्तरस्मरसमरपराय-

णस्य क्षामतयाऽलब्धभूयोऽवकाशतया वा सुहिंसान् गृहपर्यन्तचरान् वा मयूरानेव मारयितुं समर्थतामन्तरा विधाय स्वसौभाग्यप्रकर्षं च वस्तु व्यनक्तीति स्वतस्सम्भविवस्तुव्यङ्ग्यवस्तुलक्षणोऽर्थशक्त्युद्भवध्वनिप्रकारः ।

'गर्वश्च बाल्याविवेकादिनाऽपि भवतीति नात्र स्वोक्तिसद्भावः शङ्क्यः' इति लोचनम् ।

इत्थं वस्तुध्वनिं निरूप्यालङ्कारध्वनिं निरूपयति—

'अर्थशक्तेरलङ्कारो यत्राप्यन्यः प्रतीयते ।
अनुस्वानोपमव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः ॥४८॥

अपिशब्दोऽत्रभिन्नक्रमः । यत्र, अन्यो वाच्यालङ्काराद्भिन्नो व्यङ्ग्य इति यावद् अलङ्कारोऽपि न पुनर्वस्तुमात्रम्, अर्थशक्तेरर्थनिष्ठव्यञ्जनासामर्थ्यात्, प्रकाशते प्रतीतिविषयो भवति, सोऽनुस्वानोपमव्यङ्ग्यो ध्वने रपरोवस्तुध्वने रतिरिक्तोऽलङ्कारध्वनि र्नाम प्रकारो भवतीत्यर्थः ॥

तदाह वृत्तिकारः—

वाच्यालङ्कारव्यतिरिक्तो यत्रान्योऽलङ्कारोऽर्थसामर्थ्यात् प्रतीयमानोऽवभासते, सोऽर्थशक्त्युद्भवो नामानुस्वानरूपव्यङ्ग्योऽन्यो ध्वनिः ।

यथा कविप्रौढोक्तिसिद्धादित्रिविधवस्तुना वस्तुनि व्यङ्ग्ये, त्रिविधोध्वनिः, तथैवालङ्कारेऽपि व्यङ्ग्ये स त्रिविध इति भावः ॥

कारिकाऽन्तरमवतारयति—

तस्य प्रविरलविषयत्वमाशङ्क्येदमुच्यते—

तस्यालङ्कारध्वनेः । शब्दशक्तिमूल उदाहृतपूर्वश्श्लेषाद्यलङ्कारध्वनिस्तु सम्भवति न पुनरर्थशक्तिमूलोऽलङ्कारध्वनिरपीत्याशङ्कितुराशयः ॥

रूपकादिरलङ्कारवर्गो यो वाच्यतां श्रितः ॥
स सर्वो गम्यमानत्वं बिभ्रद् भूम्ना प्रदर्शितः ॥४९॥

यो रूपकादिरर्थालङ्कारवर्गो वाच्यतां श्रितोऽभिधेयीभूतः, सर्वोऽखिलः सोऽलङ्कारवर्गो गम्यमानत्वं व्यङ्ग्यत्वं बिभ्रद्दधानो भूम्नाबाहुल्येन भट्टोद्भटादिभिरपि प्रदर्शित इत्यर्थः ।

तेनालङ्कारध्वने नैव प्रविरलविषयत्वं सम्भवतीतिभावः ॥

तदाह वृत्तिकृत्—

अन्यत्र वाच्यत्वेन प्रसिद्धो यो रूपकादिरलङ्कारः, सोऽन्यत्र प्रतीयमानतया बाहुल्येन प्रदर्शितस्तत्रभवद्भिर्भट्टोद्भटादिभिः ।

तत्रभवद्भिः पूज्यैः, 'अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ' इत्यभियुक्तोक्तेः ॥

कतिषु च न वाच्यालङ्कारेषु प्रतीयमानेषु परोऽलङ्कारविशेषोऽपि प्रतीयत इत्यङ्गीकुर्वद्भिरुद्भटादिभिरप्यर्थशक्त्याऽलङ्कारो व्यज्यत इति स्वीकृतमेव केवलं कण्ठतोनोक्तम्, वाच्यव्यतिरिक्तस्यालङ्कारस्य तत्र व्यञ्जनां विना प्रतीतिपदवीमवतरीतुमनर्हत्वादिति तात्पर्यम् ॥

तदुपपादयति—

तथा च—ससन्देहादिषूपमारूपकातिशयोक्तीनां प्रकाशमानत्वं प्रदर्शितमित्यलङ्कारान्तरस्यालङ्कारान्तरे व्यङ्ग्यत्वं न यत्नप्रतिपाद्यम् ।

अयमाशयः—'सादृश्यमूला भासमानविरोधका समबला नानाकोट्यवगाहिनी धी रमणीया ससन्देहालङ्कृतिः' इति जगन्नाथेन लक्षितस्य ससन्देहालङ्कारस्य—

'मरकतमणिमेदिनीधरो वा तरुणतरस्तरुरेष वा तमालः ।
रघुपतिमवलोक्य तत्र दूराद्दृषिनिकरैरितिसंशयः प्रपेदे ॥'

इत्युदाहरणे यथा रघुपतिधर्मिक-मरकतमयपर्वततरुगतमालतरुत्वप्रकारकसंशयस्याभिधीयमानतया ससन्देहालङ्कारोवाच्यो भासते, तथैव पर्यन्ते रघुपते र्मरकतपर्वततमालतरुभ्यां सादृश्यस्य प्रत्ययादुपमा, तादात्म्यारोपाद्रूपकम्, तादात्म्याध्यवसानादतिशयोक्ति र्वा भासते । तदुक्तमप्पय्यदीक्षितैः—

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान् ।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥

भामहभट्टश्च—'सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ॥
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥ इति ।

ते च तत्र प्रतीयमाना उपमादयोऽलङ्कारा वाचकाभावान्न वाच्या इति वक्तुं शक्या इत्युद्भटमतेऽपि तेऽनायत्या व्यङ्ग्या एव स्वीकरणीया. इति निष्प्रत्यूहोऽलङ्कारध्वनिः सिद्धः ॥

ननु यदि प्राचीनैरेवेदमुक्तम्, तर्हि कोऽत्र भवतोयत्नः ? इत्याशङ्क्याह—

इत्यत्पुनरुच्यतएव—

अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वने र्मतः ॥५०॥

अपरिभिन्नक्रमः । यत्र काव्ये, अलङ्कारान्तरस्य वाच्यातिरिक्तालङ्कारस्य व्यङ्ग्यस्येतियावत्, प्रतीतौ सत्यामपि, वाच्यस्यार्थस्य तत्परत्वं व्यङ्ग्योपकारकत्वं व्यङ्ग्यापेक्षयाऽप्रधानत्वं वा न भासते, असौ ध्वनेरनुस्वानोपमव्यङ्ग्यस्य मार्गो न मतः, किन्तु गुणीभूतव्यङ्ग्यस्यैवेत्यर्थः ॥

तदेवव्याचष्टे—

अलङ्कारान्तरस्य रूपकादेरलङ्कारस्य प्रतीतौ सत्यामपि, यत्र वाच्यस्य व्यङ्ग्यप्रतिपादनौन्मुख्येन चारुत्वं न प्रकाशते, नासौ ध्वनेर्मार्गः ।

नह्यलङ्कारव्यञ्जनमात्रेणालङ्कारध्वनि र्व्यपदेष्टुं शक्यः, अपितु व्यङ्ग्यापेक्षया तस्याधिकविच्छित्तिशालित्वेनेति तदभावे कथं ध्वनिव्यपदेश इति भावः ।

तदुपपादयति—

तथाच—दीपकादावलङ्कारे उपमाया गम्यमानत्वेऽपि, तत्परत्वेन चारुत्वस्याव्यवस्थानान्न ध्वनिव्यपदेशः ।

आदिशब्देन तुल्ययोगिताऽपह्नुतिरूपकस्मरणप्रभृतीनां परिग्रहः । दीपकालङ्कारे वाच्ये प्रस्तुताप्रस्तुतयोरर्थयो रेकधर्म्माभिसम्बन्धितया भाने सादृश्यएवपर्यवसानाद्व्यङ्ग्यत्वेन भासमानाया अप्युपमाया श्चारुत्वानाश्रयत्वेन नैवध्वनिव्यपदेशप्रयोजकत्वमित्यभिसन्धिः ॥

उदाहरति—

तथा—'चन्दमऊएहिं णिसा णलिनी कमलेहिं कुसुमगुच्छेहिं लआ ।
हंसेहिं सरअसोहा कव्वकहा सज्जनेहिं करइ गरुई ॥'

'चन्द्रमयूखैर्निशा, नलिनी कमलैः कुसुमगुच्छै र्लता ।
हंसैः शारदशोभा, काव्यकथा सज्जनैः क्रियते गुर्वी ॥' इतिच्छाया ।

चन्द्रस्यमयूखैः किरणैर्निशारात्रिः, कमलैर्नलिनीपद्मिनी, कुसुमानां गुच्छैस्तवकैर्लता, हंसैः शारदी शरदृतुसम्बन्धिनीशोभा, सज्जनैः सहृदयैः सत्पुरुषैर्वा, गुर्वी श्रेष्ठा शोभना भास्वती सेव्या वा क्रियतइत्यर्थः ।

अत्राप्रस्तुतानां चन्द्रमयूखप्रमुखानां प्रस्तुतानां सज्जनानाञ्च कर्तृत्वेन, अप्रस्तुतानां निशाऽऽदीनां प्रस्तुतायाः काव्यकथायाश्च कर्मत्वेन गुरूकरणैकधर्माभिसम्बन्धाद्रूपकेभासमाने, चन्द्रमयूखादीनां सज्जनैः सह, निशाप्रभृतीनां काव्यकथया च साकं कमपि सम्बन्धं विना वाच्यप्रतीतिरसम्बद्धविषयैव स्यादिति 'गावो वः पावनानाम्' इत्यादिवद् यथा चन्द्रमयूखादिभिर्निशादि स्तथा सज्जनैः काव्यकथा गुर्वी क्रियत इत्युपमानोपमेयभावः कल्प्यत इति व्यङ्ग्योपमाया वाच्योपस्कारकत्वेनाङ्गत्वान्न ध्वनिव्यपदेशः । लोचनेतु—'आसतां तावत्काव्यस्य केचन सूक्ष्मा विशेषाः, सज्जनैर्विना काव्यमित्येषशब्दोऽपि ध्वंसते । तेषु सत्स्वास्ते सुभगं काव्यं काव्यशब्दव्यपदेशभागपि शब्दसन्दर्भमात्रं तथातथा तैः क्रियते, यथायथाऽऽदरणीयतां प्रतिपद्यत इति दीपकस्यैव प्राधान्यं, नोपमायाः' इत्युक्तम् ।

चन्द्रमयूखैर्निशाया भास्वरत्वसेव्यत्वादेः, कमलैर्नलिन्याः शोभापरिमलादेः कुसुमगुच्छैर्लताया अभिगम्यत्वमनोरमत्वादेः, हंसैश्शारदशोभाया श्श्रुतिसुखदत्वरमणीयत्वादेः, सज्जनैः काव्यकथाया स्तेषां सर्वेषामेव धर्म्माणामाधानमेव गुरूकरणं बोध्यम् ॥

फलितमाह—

तस्मात्तत्र वाच्यालङ्कारमुखेनैव काव्यव्यपदेशो न्यायः ।

तत्र 'चन्दमऊएहिं' इत्यादौ चित्रकाव्यव्यपदेशएवोचित इति केचित् ।

वस्तुतस्तु व्यङ्ग्योपमाया गुणीभावाद्गुणीभूतव्यङ्ग्यतैव युक्ता ॥

इत्थंध्वनेः प्रत्युदाहरणं प्रदर्श्योक्तभेदानामुदाहरणानि दर्शयितुमाह—

यत्र तु व्यङ्ग्यपरत्वेनैव वाच्यस्य व्यवस्थानम्, तत्र व्यङ्ग्यमुखेनैव व्यपदेशो युक्तः ।

वाच्यार्थस्य व्यङ्ग्योपस्कारकत्वे तु ध्वनिरेव भवतीतिसारम् ।

अष्टमं भेदमुदाहरति—

यथा—

कश्चन चाटुकारो राजानं वक्ति—

प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव सम्भावयामि ॥
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-

स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥'

हे राजन्! त्वयि आयात उपगते सति, प्राप्ता श्रीर्येन तादृश एष पुनरपि मयि तमनुभूतपूर्वं मन्थखेदं मन्दरगिरिपीडनं कस्माद् विदध्यात् कुर्यात्, अनलसमनस आलस्यशून्यहृदयस्यास्य पूर्वां प्राचीनां निद्रामपि नैव सम्भावयामि तर्कयामि, सकलानां द्वीपानां नाथैरधिपैरनुयातोऽनुसृतश्चायं भूयः किमिति सेतुं बध्नाति, इत्येवं वितर्कान् सङ्कल्पान् सन्देहान् वा दधतो धारयत इव पयोधेः समुद्रस्य कम्प आभातीत्यर्थः।

अत्र स सन्देहोत्प्रेक्षयोः सङ्करोवाच्यः, ततश्च भगवत्तादात्म्यमस्य भूभृतोऽवगम्यत इति रूपकालङ्कारध्वनिः कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्यः।

यद्यपि राज्ञोऽस्य प्राप्तश्रीकत्वेन लक्ष्मीप्राप्तये समुद्रं मथितवतः, आलस्यशून्यमनस्त्वेन समुद्रे शेषशयने निदिद्रासोः, सर्वद्वीपेश्वरानुगम्यमानत्वेन रावणं विजेतुं सेतुं बद्धवतश्च विष्णोरपेक्षयाऽऽधिक्यप्रदर्शनाद्व्यतिरेकोऽपि प्रतीयते, तथाऽपि न तत्र वैचित्र्यम्, साम्प्रतं विष्णावप्याधिक्यप्रयोजकधर्मत्रयस्य सद्भावात्।

'न च सन्देहोत्प्रेक्षाऽनुपपत्तिबलाद्रूपकस्याक्षेपः, येन वाच्यालङ्कारोपस्कारकत्वं व्यङ्ग्यस्य भवेत्, योयः सम्प्राप्तलक्ष्मीको निर्व्याजविजिगीषाऽऽक्रान्तः, सस मां मथ्नीयादित्याद्यर्थसम्भावनात्। न च 'पुनरपीति' 'पूर्वामिति' 'भूयइति' च शब्दै रयमाकृष्टोऽर्थः, पुनरर्थस्य भूयोऽर्थस्य कर्तृभेदेऽपि समुद्रैक्यमात्रेणाप्युपपत्तेः। यथा—पृथ्वी पूर्वं कार्त्तवीर्येण जिता पुनरपि जामदग्न्येनेति। पूर्वा च निद्रा राजपुत्राद्यवस्थायामपीति सिद्धं रूपकध्वनिरेवायमिति, शब्दव्यापारं विनैवार्थसौन्दर्यबलाद्रूपणप्रतिपत्तेः' इति लोचनमपीहद्रष्टव्यम्।

स्वीयमुदाहरणान्तरमाह—

यथा वा ममैव—

कान्तः कामिनीं कथयति—

'लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्, स्मेरेऽधुना तव मुखे तरलायताक्षि!।
क्षोभं यदेति न मनागपि तेनमन्ये, सुव्यक्तमेव जलराशिरयं पयोधिः ॥'

तरले चञ्चले, आयते दीर्घे चाक्षिणी यस्या स्तत्सम्बुद्धौ हे तरलायताक्षि! अधुना रोषकालुष्यापगमोत्तरं, लावण्यं सौन्दर्यं कान्तिः प्रभा ताभ्यां परिपूरितानि पूर्णी-

कृतानि धवलितानि वा दिशां मुखानि येन, तस्मिंस्तव मुखे स्मेरे ईषद्विहसिते सति यन्मनागीषदपि, क्षोभमुत्तरलतरङ्गत्वं मदनाहितचपलत्वं च नैति न प्राप्नोति, तेनायं पयोधिः समुद्रः सुव्यक्तमतिस्फुटम्, जलानां वारीणां राशिः, किञ्च जलस्य डलयोश्चैक्यस्मरणाद्भावप्रधाननिर्देशस्वीकरणाच्च जाड्यस्य राशिरेवास्तीति मन्यउत्प्रेक्षइत्यर्थः। इह वाच्यः श्लेषानुप्राणितोत्प्रेक्षाऽलङ्कारः, ततश्चातन्द्रचन्द्रदर्शनेन समुद्रस्य क्षोभे प्रसिद्धेऽपि यदयंस्मितशालित्वन्मुखदर्शनेन न क्षुभित इत्यमुंजडतमं मन्यइत्येतावता त्वन्मुखं चन्द्र इति रूपकालङ्कारोऽध्वन्यते ॥

केचित्पुनरत्र—

'ज्योत्स्नापूरप्रसरधवले सैकतेऽस्मिन् सरय्वा,वादद्यूतं सुचिरमभवत् सिद्धयूनोःकयोश्चित्।
एकोऽवादीत्प्रथमनिहतं केशिनं कंसमन्यः, स त्वं तत्त्वं कथय भवता को हतस्तत्रपूर्वम्॥'

इत्युदाहरन्ति। तन्न विचाररमणीयम्, भवतेत्यनेन त्वं वासुदेव इति रूपकस्य प्रसह्य स्फुटीकरणात् ॥

तदाह—

इत्येवंविधे विषयेऽनुरणनरूपकाश्रयेण काव्यचारुत्वव्यवस्थानाद्रूपकध्वनिरिति व्यपदेशोन्याय्यः।

स्पष्टम्।

उपमाध्वनिमुदाहरति—

उपमाध्वनिर्यथा—

'वीराणं रमइ घुसिणरुणम्मि ण तहा पिआथणुच्छङ्गे।
दिट्ठी रिउगअकुम्भत्थलम्मि जह बहलसिन्दूरे॥'

'वीराणां रमते घुसृणारुणे न तथा प्रियास्तनोत्सङ्गे।
दृष्टी रिपुगजकुम्भस्थले यथा बहलसिन्दूरे ॥' इति च्छाया।'

वीराणां दृष्टिस्तथा घुसृणैः कुङ्कुमैररुणे शोणे प्रियायाः स्तनोत्सङ्गे कुचतटे न रमते नानन्दमनुभवति, यथा बहलमत्यर्थं सिन्दूरं यत्र तादृशे रिपोर्गजानां कुम्भस्थले रमते वीरस्वभावत्वादित्यर्थः।

तथाच—'कुङ्कुमम् ॥ जागुडं दीपनं घस्रं सौरभं घुसृणं च तत्' इति त्रिकाण्डशेषः।

अत्र 'लाभे सस्ये शराग्रे व्युष्टौच फलके फलम्' इति शाश्वतस्य 'व्युष्टिः फले समृद्धौ च' इत्यमरस्य चानुशिष्टेः फलशब्दस्यानेकार्थशक्तत्वे निर्णीते, तरुसस्य-रूपं समर्थनीयं विशेषमर्थम्, 'लोकोत्तरविक्रमविजिगीषातदुपायशालिनोऽपि समृद्धि-लक्षणं फलं दैवायत्तं कदाचिन्न सम्पद्येत, तत्र किं विधेयम् इत्याकारकः सामान्या-त्माऽर्थोऽभिधामूलव्यञ्जनागम्यः समर्थयतीत्यभिधामूलार्थान्तरन्यासध्वनिः फल-शब्दस्य परिवर्तनासहत्वाच्च शब्दशक्तिमूलता ।

ननु समस्तेन वाक्येनात्राप्रस्तुतप्रशंसैव प्राधान्येन व्यज्यत इति कथमर्था-न्तरन्यासध्वनिः ? तस्य व्यङ्ग्यत्वेऽपि प्राधान्यायोगादित्याशङ्कायामाह—

पदप्रकाशश्चायं ध्वनिरिति वाक्यस्यार्थान्तरतात्पर्य्येऽपि सति न विरोधः।

पदात्प्रकाशो यस्येति बहुव्रीहिः । तृतीयोद्द्योतेहि ध्वनेः पद–वाक्यप्रकाशत्वेन भेदो निरूपयिष्यते । तथाचात्राप्रस्तुतप्रशंसाया वाक्यप्रकाशत्वसत्त्वेऽप्यर्थान्तर-न्यासस्य पदात्प्राधान्येन प्रकाशात्तद्ध्वनिव्यपदेशे न काचन क्षतिरितितात्पर्यम् । 'प्रकाशक' इति पाठस्त्वसङ्गतः ।

अर्थशक्तिमूलार्थान्तरन्यासध्वनिमुदाहरति—

द्वितीयस्योदाहरणं यथा—

पूर्वं खण्डिता पुनरनुनीताऽप्यसूयाशवलाशया नायिका दयितं वदति—

'हिअअट्ठाविअमण्णुं अवरुण्णमुहं हि मं पसाअन्त ।
अवरद्धस्स वि ण हु दे बहुजाणअ ! रोसिउं सक्कम् ॥'

'हृदयस्थापितमन्यु मपरोषमुखीमपि मां प्रसादयन् ! ।
अपराद्धस्यापि नखलु ते बहुज्ञ ! रोषितुं शक्यम् ॥' इति च्छाया ।

हे बहुज्ञ ! नानाविधानुनयानां पराशयस्य वा विज्ञ ! हृदयेस्थापितो निगूहितो मन्युः क्रोधो यया ताम्, तथाऽपगतो रोषोयस्मात्तादृशं मुखं यस्यास्तथाविधामपि मां यतस्त्वं प्रसादयन्नसि, यद्वा प्रसादयन्नित्यन्तं सम्बोधनम्, अतोऽपराद्धस्य कृता-गसोऽपि ते तवोपरीतिशेषः, खलु निश्चयेन मया रोषितुं कोपितुं न शक्यमित्यर्थः ।

तथाच 'मन्युर्दैन्ये क्रतौ क्रुधि' इति विश्वः ।

इहापि कृतागसोऽपि बहुज्ञस्य तवोपरि क्रोधः कर्तुमशक्य इति विशेषं तादृशा-नामपि बहुज्ञानामुपरि क्रोधः कर्तुमशक्य इति व्यञ्जनागम्यमर्थसामान्यं समर्थ-

यतीत्यर्थशक्तिमूलोऽर्थान्तरन्यासध्वनिः । शब्दानां परिवर्तनसहत्वाच्चार्थशक्तिमूलत्वम् ।

तदाह—

अत्रहि वाच्यविशेषेण सापराधस्यापि बहुज्ञस्य कोपः कर्तुमशक्य इति समर्थकमर्थसामान्यमन्वित मन्यत्तात्पर्येण प्रकाशते ।

अन्वितं समर्थकतया वाच्यसम्बद्धम् । अन्यद्वाच्यातिरिक्तम् । तात्पर्येण-व्यञ्जनया ॥

व्यतिरेकध्वनेरपि द्वैविध्यं प्रदर्श्योदाहरति—

व्यतिरेकध्वनिरप्युभयरूपः सम्भवति । तत्राद्यस्योदाहरणं प्राक् प्रदर्शितमेव ।

उभयरूप श्शब्दशक्तिमूलोऽर्थशक्तिमूलश्च । अपिनाऽर्थान्तरन्यासादि परिगृह्यते । आद्यस्य शब्दशक्तिमूलस्य । प्राक् 'खंयेऽत्युज्ज्वलयन्ति' इत्यादिना ॥

अर्थशक्तिमूलव्यतिरेकध्वनिमुदाहरति—

द्वितीयस्योदाहरणं यथा—

निर्विण्णो दरिद्रो दातृतरः कश्चन वदति—

'जाएज्ज वणुद्देसे खुज्ज व्विअ पाअवो (अ)घड़िअवत्तो ।
मा माणुसम्मि लोए ताएक्करसो दरिद्दो अ ॥'

'जायेय वनोद्देशे कुब्ज इव पादपोऽघटितपत्रः ॥
मा मानुषेलोके त्यागैकरसो दरिद्रश्च ॥' इतिच्छाया ।

वनोद्देशे काननप्रान्ते (यत्र बहुवृक्षसङ्घाते कोऽपि न पश्येत्) कुब्जइव गडुलइव (येनस्तम्भादावप्युपयोगो न स्यात्) अघटितपत्रोऽसंलग्नदलः । (येनच्छायाऽपि न स्याद्दूरेफलपुष्पाशा, किन्तु तथाऽपि कदाचिदाङ्गारिकस्याङ्गारबाहुल्याय, घूकादीनां निवासाय चोपयोगः स्यात्) पादपो वृक्षो जायेय भवेयम्, (किन्तु) मानुषे लोके (सुलभार्थिजने) मर्त्यभुवने, त्यागैकरसोऽतिदानशीलो दरिद्रश्च मा जनिषि माभूवमित्यर्थः ।

तथाच—'स्यादेडे बधिरः कुब्जे गडुलः' इत्यमरः ।

इह दानशीलस्य निर्धनस्य जन्म निन्दा, निष्पत्रकुब्जपादपजन्मप्रशंसा च वाच्या, 'विषं भुङ्क्ष्व, माचास्यगृहे भुङ्थाः' इत्यादिवत् तादृशपादप-पुरुषयोरौप-

म्यज्ञानपुरस्सरं तादृशपादपापेक्षयाऽपि तादृशपुरुषस्य जन्मनोऽपकर्षेण शोचनीयतायामाधिक्यं व्यञ्जनया प्रत्याययतीत्यर्थशक्तिमूलो व्यतिरेकध्वनिः। अत्र वाच्यालङ्कारो न कश्चित्' इति लोचनम्। तेनायं ध्वनेः षष्ठः प्रकार इति बोध्यम् ॥

तदाह—

अत्रहि त्यागैकरसस्य दरिद्रस्य जन्मानभिनन्दनम् (अ) घटितपत्रकुब्जपादपजन्माभिनन्दनं च साक्षाच्छब्दवाच्यम्। तथाविधादपि पादपात्तादृशस्य पुंस उपमानोपमेयत्वप्रतीतिपूर्वकं शोच्यतायामाधिक्यं तात्पर्येण प्रकाशयति।

विवृतम्।

उत्प्रेक्षाध्वनिमुदाहरति—

उत्प्रेक्षाध्वनिर्यथा—

'चन्दनासक्तभुजगनिश्श्वासानिलमूर्च्छितः।
मूर्च्छयत्येष पथिकान् मधौ मलयमारुतः॥'

चन्दने श्रीखण्ड आसक्तानां संलग्नानां भुजगानां सर्पाणां निश्श्वासानिलैश्श्वासवातै मूर्च्छितोवर्धित एष मलयानिलो दक्षिणपवनः, मधौ वसन्ते, पथिकानध्वनीनान् (वियोगिनः) मूर्च्छयतिसम्मोहयतीत्यर्थः।

मूर्च्छनं मोहनं वर्धनं च 'मूर्च्छामोहसमुच्छ्राययोः' इति धातुपाठात्।

इह वसन्ते मलयानिलस्य पथिकमूर्च्छकत्वं वस्तुतोमदनकदनविधायित्वेनैव सम्भवदत्र चन्दनतरुलग्नसर्पनिश्श्वासवातवर्द्धितत्वेन सम्भावितमिवादिशब्दश्चोत्प्रेक्षावाचकोनोक्तइत्यखिलवाक्यार्थव्यङ्ग्योत्प्रेक्षाऽलङ्कारध्वनिः। विषसंसर्गमन्तरेण हि मलयानिलस्य मूर्च्छाजनकत्वमसम्भवीति स तादृशसंसर्गवत्त्वेनोत्प्रेक्षितः। 'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति दर्पणोक्तेरुपमेयस्य मूर्च्छाजनकत्वहेतोश्चन्दनासक्तभुजगनिश्श्वासानिलमूर्च्छितत्वरूपोपमानात्मना सम्भावनेति हेतूत्प्रेक्षाऽत्र व्यज्यत इति बोध्यम् ॥

तदाह—

अत्र हि मधौ मलयमारुतस्य पथिकमूर्च्छाकारित्वं मन्मथोन्माथदायित्वेनैव, तत्तु चन्दनासक्तभुजगनिश्श्वासानिलमूर्च्छितत्वेनोत्प्रेक्षितमित्युत्प्रेक्षा साक्षादनुक्ताऽपि वाक्यार्थसामर्थ्यादनुरणनरूपा लक्ष्यते।

लक्ष्यते प्रतीयते।

अत्रोत्प्रेक्षाऽभावमाशङ्क्य समाधत्ते—

नचैवंविधे विषये इवादिशब्दप्रयोगमन्तरेणासम्बद्धैवेति शक्यं वक्तुम्, गमकत्वादन्यत्रापि तदप्रयोगे तदर्थावगतिदर्शनात्।

एवंविध उत्प्रेक्षाऽऽस्पदत्वेन सम्भाव्यमाने विषये, उत्प्रेक्षावाचकानाम् 'मन्ये शङ्के ध्रुवं प्रायोनूनमित्येवमादयः। उत्प्रेक्षावाचकाश्शब्दा इवशब्दोऽपि तादृशः॥' इति परिगणितानामिवादिशब्दानां प्रयोगमन्तरेण विना, असम्बद्धतैवोत्प्रेक्षाया असङ्गतिरेव स्यादिति च नैव वक्तुं शक्यम्, गमकत्वात्प्रमाणसद्भावात्, अन्यत्रैतदुदाहरणातिरिक्तस्थलेष्वपि, तदप्रयोग इवादिशब्दानुच्चारणे, तदर्थस्योत्प्रेक्षालक्षणव्यङ्ग्यार्थस्यावगते र्बोधस्य दर्शनादनुव्यवसायविषयत्वादित्यर्थः।

उत्प्रेक्षायां साध्यउपमेयस्योपमानात्मनाऽध्यवसाय एव मूलम्, नत्विवादिशब्दप्रयोगः, यत इवाद्यप्रयोगेऽपि वक्ष्यमाणोदाहरणयो रुत्प्रेक्षाप्रतीतेः प्रामाणिकत्वम्, तत्प्रयोगेऽपि 'असत्पुरुषसेवेव दृष्टिर्विफलतां गता' इत्यादौ तदभाव इति भावः।

इदमिहाकलनीयम्—उत्प्रेक्षणसद्भावः सर्वत्रापेक्ष्यते, तत्सत्त्व इवादिशब्दसत्त्वे च वाच्या, इवादिशब्दाभावेऽप्युत्प्रेक्षणीयार्थमन्तरेण वाच्यार्थबोधानिर्वाहे प्रतीयमाना, इवादिशब्दाभावे वाच्यार्थबोधोत्तरं प्रकरणादिपर्यालोचनया प्रतीतिपथमवतरदुत्प्रेक्षणं दधाना व्यङ्ग्योत्प्रेक्षा इति त्रैविध्यं तस्याः। तत्र 'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः' इत्याद्यायाः, 'तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्॥ हाराय गुणिने स्थानं न दत्तमिति लज्जया॥' इत्यादि मध्यमायाः, इदमग्रिमं च पद्यद्वयं चरमाया स्तस्या उदाहरणम्॥

क्वान्यत्रेवादिशब्दाप्रयोगेऽप्युत्प्रेक्षा प्रतीतिः? इत्याकांक्षाया मुदाहरति—

यथा—

मानिनीमनुनयन्नायकोब्रूते—

> **'ईसाकलुसस्स वि तुह मुहस्स णं एस पुण्णिमाचन्दो॥**
> **अज्ज सरिसत्तणं पाविऊण अङ्गे विअ ण माइ॥'**
>
> 'ईर्ष्याकलुषस्यापि तव मुखस्य नन्वेष पूर्णिमाचन्द्रः॥
> अद्य सदृशत्वं प्राप्याङ्ग एव न माति॥' इतिच्छाया।

अयि मनस्विनि! एष दृश्यमानः, पूर्णिमाचन्द्रोराकासुधाकरः ईर्ष्यया मद्विषय-

कया सपत्नीविषयकया वा ऽक्षमया, कलुषस्य शोणिमाविलस्य अपि, (काकथा प्रसन्नस्य) तवमुखस्य, सदृशत्वं साम्यम्, अद्येदानीम (नत्वन्यदा कदाचित्) प्राप्य लब्ध्वा ननु निश्चितम्। अङ्गे स्वावयवे न मात्येव, अपितु दशदिशः प्रकाशैः पूरयतीवेत्यर्थः।

अन्योऽप्यलभ्यं लब्धाऽत्यर्थं मुदितो ऽङ्गेन मातीति प्रसिद्धिः। इहाद्यशब्दस्येदानीम्मात्रमर्थः, दिवाचन्द्रस्य प्रकाशायोगात्। दशदिशः पूरयतीवेत्युत्प्रेक्षा चेवादिशब्दाभावात्प्राधान्येन व्यज्यते॥

ननूत्प्रेक्षावाचकोऽत्रवितर्कोपस्थापको ननु शब्दएवास्तीति सा कथं व्यङ्ग्या स्यादित्यरुचेरुदाहरणान्तरमाह—

यथा वा—

'त्रासाकुलः परिपतन् परितो निकेतान्,
पुम्भि र्न कैश्चिदपि धन्विभिरन्वबन्धि।
तस्थौ तथाऽपि न मृगः क्वचिदङ्गनाना-
माकर्णपूर्णनयनेषुहतेक्षणश्रीः॥'

शिशुपालवधपञ्चमसर्गस्थं पद्यमिदम्। त्रासेन लोकदर्शनजनितभयेनाकुलः, निकेतान् सेनानिवेशान् परितः परिपतन् धावन्, मृगो हरिणः, (यद्यपि) कैश्चिदपि धन्विभिः कार्मुकधरैः, पुम्भिः पुरुषैः, नान्वबन्धि नान्वधावि नानुसृत इति यावत्। तथाऽप्यङ्गनानामवरोधजनानाम्, आकर्णपूर्णा आश्रवणमाकृष्टा ये नयनान्येव चपलत्वादिषवो बाणा स्तैर्हता क्षिप्ता ईक्षणयोर्नेत्रयोः श्रीश्शोभा यस्य, स इव, क्वचिन्न तस्थावित्यर्थः।

अत्रोत्प्रेक्षावाचकाभावेऽपि मृगेऽसतो ऽङ्गनानयनेषु हृतेक्षणश्रीकत्वस्य स्थित्यभावहेतुतया सम्भावनाद्यथोत्प्रेक्षा व्यज्यते तथा चन्दनेत्यादिश्लोकेऽपि। 'प्रतियोगिपदादन्यद् यदन्यत् कारकादपि' इत्यभियुक्तोक्ते रङ्गनानां पदार्थैकदेशेऽपि हननक्रियायामन्वयः॥

नन्वनयोरपिश्लोकयोरुत्प्रेक्षा माऽस्तु, तथा च दृष्टान्तासिद्धेः कथं प्रकृते सेत्याशङ्कायामाह—

शब्दार्थव्यवहारे च प्रसिद्धिरेव प्रमाणम्।

शब्दार्थस्य व्यवहारे बोधे तु, प्रसिद्धिरेव प्रमाणमित्यर्थः। तथाचात्रोत्प्रेक्षा-

प्रतीतेरानुभविकत्वादनायत्या तत्कल्पनमिति न दृष्टान्तासिद्धि रितितात्पर्यम् ॥

श्लेषध्वनि मुदाहरति—

श्लेषध्वनिर्यथा—

माघो द्वारकां वर्णयति—

'रम्या इति प्राप्तवतीः पताका रागं विविक्ता इति वर्धयन्तीः ॥
यस्यामसेवन्त नमद्वलीकाः, समं वधूभिर्वलभीर्युवानः ॥'

यस्यां द्वारकायाम्, रम्या रमणीया इतिहेतोः पताकाध्वजान् पक्षे प्रसिद्धीः । सौभाग्यानि वा प्राप्तवतीः, विविक्ता विजनाः पक्षे विमला इति हेतो रागं सुरताभिलाषं वर्धयन्तीः, नमन्ति नम्राणि वलीकानि नीध्राणि यासु ताः, पक्षे नमन्त्यो वल्यस्त्रिवलयो मध्यमरेखा यासां ताः, वलभीर्गोपानसीः वधूभिः समं सार्धं युवानो ऽसेवन्तेत्यर्थः।

तथाच 'पताका वैजयन्त्यां च सौभाग्येऽर्कध्वजे ऽपिच ॥' 'इति हेतौ प्रकरणे प्रकारादिसमाप्तिषु ॥' इति विश्वः । 'विविक्तौ पूतविजनौ' 'वलीकनीध्रे पटलप्रान्ते' 'गोपानसी तु वलभी' इत्यमरः । 'वली मध्यमरेखोर्मिजीर्णत्वग्गृहदारुषु' इतिवैजयन्ती च ।

अत्र युवानो वधूभिः सह वलभीरसेवन्तेति पूर्वं सहोक्त्यात्मकवाक्यार्थः प्रतीयते, ततो वध्व इववलभ्य इत्यौपम्यम् , चरमं तन्निर्वाहकतया व्यञ्जनाबलेन प्रधानतमोऽर्थश्लेष इति श्लेषध्वनिः । सममिति सहार्थको निपातः, ततस्तुल्यार्थप्रतीतिरपि श्लेषबलादेवेति श्लेषस्य समासेऽभिधाकृत्ये प्रतीयमानत्वेन शब्दानभिधेयस्य सुन्दराभिधेयव्यञ्जितस्य पार्यन्तिकास्वादभूमे र्ध्वन्यमानत्वम् । तदेतदभिहितमाचार्यैः– 'सममिति सहेत्यर्थः । ननु समशब्दात्तुल्यार्थेऽपि प्रतीतिः, सत्यम्, साऽपिश्लेषबलात् । श्लेषश्च नाभिधावृत्ते राक्षिप्तः, अपित्वर्थसौन्दर्यबलादेवेति सर्वथा ध्वन्यमान एव श्लेषः । अतएव वध्व इव वलभ्य इत्यभिदधताऽपि वृत्तिकृतोपमाध्वनिरिति नोक्तम् । श्लेषस्यैवात्र मूलत्वात् ।' इत्यादि ।

तदाह वृत्तिकारः—

अत्र वधूभिः सह वलभीरसेवन्तेति वाक्यार्थप्रतीतेरनन्तरं, वध्व इववलभ्यइतिश्लेषप्रतीति रशब्दाऽप्यर्थसामर्थ्यान्मुख्यत्वेन विवर्तते ।

अविद्यमानो जनकश्शब्दो यस्याः साऽशब्दा शब्दाजन्येत्यर्थः । मुख्यत्वेन विवर्तते प्राधान्येनोत्पद्यते, कारणविषमसत्ताककार्यस्य वेदान्तिनये विवर्तत्वेन प्रसिद्धेः।

अशब्देत्यनेनात्र श्लेषस्य तार्किकमतेऽनुमितिलभ्यत्वं मीमांसकमते श्रुतार्थापत्तिगम्यत्वं च न सम्भवतीति सूच्यते, उभयत्र शब्दापेक्षणात् ।

नन्वेवंरीत्या सर्वत्रोपमास्थलेषु श्लेषध्वनिः सम्भवेदितिचेत्, मैवम्, 'सकलकलं पुरमेतज्जातं परितः सुधांशुबिम्बमिव' इत्यादौ शब्दश्लेषस्य, 'कमलमिव मुखं मनोज्ञमेतत्' इत्यादौ चार्थश्लेषस्य वाच्यत्वात् । श्लेषस्यात्रौपम्यनिर्वाहकत्वेऽपि प्राधान्यं चिन्तनीयम्, वृत्ति–विवृतिकृदुक्तदिशा रुय्यकानुमतपथेन वा कथञ्चनावसेयम् ॥

यथासङ्ख्यध्वनिमुदाहरति—

यथासङ्ख्यध्वनिर्यथा—

वसन्तं वर्णयति—

'अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च सहकारः ।
अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च हृदि मदनः ॥'

यथायथा बहिः सहकारोऽतिसौरभ आम्रः, अङ्कुरितो जाताङ्कुरः, पल्लवितः सपल्लवः, कोरकितउद्भूतकुड्मलः, पुष्पितः कुसुमितः स्फुटितमञ्जरीकश्चाभूत्, तथा तथा यूनां हृदि मदनोऽपि क्रमेणाङ्कुरित ईषदुद्भूतः पल्लवितोलब्धकिञ्चिदुच्छ्रयः, कोरकितो मनोरथाभिनिविष्टः, पुष्पितः समासादितविकासश्चाभवदित्यर्थः ।

इह वसन्तवर्णने प्रस्तुतयो र्मदनसहकारयो रङ्कुरणाद्येकधर्मयोगितया तुल्ययोगिता, उभयोरङ्कुरणादीनां यौगपद्येन समुच्चयश्चालङ्कारो वाच्यः प्रतीयते । पश्चान्निष्पन्ने वाच्यार्थबोधे येनैवक्रमेण सहकारस्याङ्कुरणादीनामुपर्युपादानम्, तेनैव क्रमेण कामीयानामपि तेषामधउक्तिरितिपर्यालोचनायाम्–'उद्दिष्टानामर्थानां क्रमेणानुनिर्देशो यथासङ्ख्यम्' इतिरुय्यकलक्षितो यथासङ्ख्यालङ्कारो वैयञ्जनिकप्रतीतिदेहल्यां पदं प्रमुखतया निदधातीति यथासङ्ख्यध्वनिः ॥

तदाह—

अत्र हि यथोद्देशमनूद्देशे यच्चारुत्वमनुरणनरूपं मदनविशेषणभूताङ्कुरितादिशब्दगतं, तन्मदनसहकारयोस्तुल्ययोगितासमुच्चयलक्षणाद्वाच्यादतिरिच्यमानमालक्ष्यते ।

उद्देशउच्चारणम् 'दिशिरुच्चारणक्रियः' इतिमहाभाष्यकारोक्तेः । अनूद्देशः

पश्चात्तेनैव क्रमेणोच्चारणम् । अतिरिच्यमानं भिद्यमानम् । आलक्ष्यते प्रतीयते व्यञ्जनयेति शेषः ॥

उपसंहरति—

एवमन्येऽप्यलङ्कारा यथायोगं योजनीयाः ।

एवमनयैवरीत्या, अन्येऽत्रानुदाहृताः सर्वेऽप्यलङ्काराः, यथायोगं क्वचिद्वस्तुनो व्यञ्जकत्वं क्वचनचालङ्कारस्येत्युपायमौचित्यं युक्तिं वाऽनतिक्रम्य योजनीया ध्वन्यमानतयेति शेषः ।

नहि परिगणितानामेवालङ्काराणां ध्वन्यमानतेति परोक्तं युक्तम्, दर्शितदिशा सर्वेषामपि तत्त्वसम्भवादित्यभिसन्धिः ।

अलङ्कारान्तरध्वन्युदाहरणानि लोचनेनसमुन्मीलितानीति विशेषस्ततोऽवसेयः । इह तूदाहरणमात्रमुपादीयते । तथाहि दीपकध्वनिर्यथा—

'मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ॥
वज्रमिन्द्रकरविप्रसृतं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ! ॥'

अप्रस्तुतप्रशंसाध्वनिर्यथा—

'ढुण्ढुल्लन्तो मरिहिसि कण्टअकलिआइँ केअइवणाइं ।
मालइकुसुमसरिच्छं भमर ! भमन्तो न पाविहिसि ॥'

अपह्नुतिध्वनिर्यथा भट्टेन्दुराजस्य—

'यः कालागुरुपत्रभङ्गरचनावासैकसारायते,
गौराङ्गीकुचकुम्भभूरिसुभगाभोगे सुधाधामनि ।
विच्छेदानलदीपितोत्कवनिताचेतोऽधिवासोत्सवं,
सन्तापं विनिनीषुरेष विनतैरङ्गैर्नताङ्गि ! स्मरः ॥'

अत्रैव ससन्देह-प्रतिवस्तूपमा-हेतु-सहोक्त्यु-पमेयोपमाध्वनिरपि विभावनीयः। अतिशयोक्तिध्वनिर्यथाऽभिनवगुप्तस्य—

'केलीकन्दलितस्य विभ्रममधो धुर्यं वपुस्ते दृशौ,
भङ्गीभङ्गुरकामकार्मुकमिदं भ्रूनर्मकर्मक्रमः ।
आपातेऽपि विकारकारणमहो वक्त्राम्बुजन्मासवः,
सत्यं सुन्दरि ! वेधसस्त्रिजगतीसारस्त्वमेकाकृतिः ॥'

इहैव विभावना-तुल्ययोगिताध्वनिरपि द्रष्टव्यः ॥

प्राचीनैरुक्तानामेवालङ्काराणां ध्वनित्वं स्थापयद्भिर्भवद्भिः किमधिकं लब्धमित्याशङ्कायां कारिकामवतारयति—

एवमलङ्कारध्वनिमार्गं व्युत्पाद्य तस्य प्रयोजनवत्तां ख्यापयितुमिदमुच्यते-

व्युत्पादनं विशेषतोज्ञापनम्। प्रयोजनं फलम् ।

'शरीरीकरणं येषां वाच्यत्वे न व्यवस्थितम् ।
तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गताङ्गताः ॥५१॥

येषामलङ्काराणां वाच्यत्वे वाच्यतादशायाम्, शरीरीकरणं कटककुण्डलादिस्थानीयतयाऽशरीराणां शरीरतापर्यन्तसम्पादनम्, न व्यवस्थितं किन्तु दुर्घटम्, अस्तीतिशेषः, तेऽलङ्कारा ध्वनेः काव्यस्य ध्वननव्यापारस्य वाऽङ्गतां व्यङ्ग्यतां गताः परामुत्कृष्टतमां छायां शोभाश्रयात्मरूपतां यान्तीत्यर्थः ।

प्राचीनोक्तानामप्यलङ्काराणां ध्वन्यमानतायां विच्छित्तिविशेषजनकत्वमानुभाविकमिति नाप्रयोजनको ध्वन्युपदेश इतिभावः ॥

ननु ध्वनेरङ्गत्वमलङ्काराणां यद्युपकारकत्वाद्वाच्यत्वेन व्यञ्जकत्वादभिमतम्, तर्हि शोभाऽतिरेकविरह इति कथं सप्रयोजनत्व मित्यतआह—

ध्वन्यङ्गता चोभाभ्यां प्रकाराभ्यां व्यञ्जकत्वेन व्यङ्ग्यत्वेन च । तत्रेह प्रकरणा द्व्यङ्ग्यत्वेनेत्यवगन्तव्यम् ।

अयमाशयः—वाच्यानामलङ्काराणां ध्वने रुपकारकत्वरूपमङ्गत्वं व्यञ्जकतया, व्यङ्ग्यानान्तु तेषां स्वयमलङ्कार्याणां ध्वनेरङ्गत्वं तदात्मतयैव, इत्थं द्विधाऽङ्गत्वसम्भावनायामिह व्यङ्ग्यानामलङ्काराणां तादात्म्येन ध्वन्यङ्गत्वम्प्रकरणावधारित मतो न छायाऽपकर्षेण प्रयोजनवैधुर्य्यम् । अलङ्काराणां व्यङ्ग्यत्वेऽपि तादात्म्यं न वास्तविकम् 'काव्यस्यात्मा स एवार्थः' इत्यनेन रसादीनामेव तत्त्वेन व्यवस्थापितत्वात् । किन्तु शिशुक्रीडायां यथा कस्मिंश्चिद्राजत्वमवास्तविकमप्यारोपितं किञ्चिदन्यापेक्षया महत्त्वं तावदादधाति, तथैवेहाप्यारोपितमात्मत्वं वाच्यालङ्कारापेक्षयोत्कर्ष मावहति । तेषान्तु कटककुण्डलादीनामिव शरीररूपताऽपि स्वतोदुर्घटैव, दूरे पुनरात्मतासम्भावना ॥

नन्वेवं पुनर्दीपकादावुपमाया व्यङ्ग्यत्वेन ध्वन्यङ्गत्वमापततीत्याशङ्कायामाह—

व्यङ्ग्यत्वेऽप्यलङ्काराणां प्राधान्यविवक्षायामेव सत्यां, ध्वनावन्तःपातः । इतरथा तु गुणीभूतव्यङ्ग्यत्वं प्रतिपादयिष्यते ।

इतरथाऽप्राधान्यविवक्षया । प्रतिपादयिष्यते 'प्रकारोऽन्योगुणीभूतव्यङ्ग्यः' इत्यादिना तृतीयोद्द्योते । तेन दीपकादावुपमाया व्यङ्ग्यत्वेऽप्यप्राधान्यविवक्षया न ध्वन्यात्मत्वमित्यवसेयम् ॥

अलङ्काराणां व्यङ्ग्यत्वे प्राधान्येन विवक्षितत्वेचापि प्रकारद्वयमुपदिशंस्तत्प्रकारद्वयस्य ध्वन्यात्मताव्यवस्थापकं कारिकायुगमवतारयति वृत्तिकारः—

अङ्गित्वेन व्यङ्ग्यतायामप्यलङ्काराणां द्वयीगतिः, कदाचिद्वस्तुमात्रेण व्यज्यन्ते, कदाचिदलङ्कारेण । तत्र—

गतिरवस्था, वस्तुव्यङ्ग्यताऽलङ्कारव्यङ्ग्यताचेति । तत्र गतिद्वये । 'प्राप्तश्रीरेष' इत्यादौ वस्तुना प्राधान्येन रूपकालङ्कारो व्यज्यते, 'काकतोयविभोः'इत्यादौ च निदर्शनाऽलङ्कारेणाधिकालङ्कारो व्यज्यत इति वस्त्वलङ्काररूपव्यञ्जकभेदेनालङ्कारध्वनेरपिभेदः, उभयव्यङ्ग्यत्वेऽप्यलङ्काराणां ध्वनिरूपता चेतिभावः ॥

व्यज्यन्ते वस्तुमात्रेण यदाऽलङ्कृतय स्तदा ॥
ध्रुवं ध्वन्यङ्गता तासाम्,

अत्रहेतुः—निर्दिश्यत इति शेषः ।

काव्यवृत्तेस्तदाश्रयात् ॥ ५२ ॥

यदा वस्तुमात्रेण नतु सालङ्कारेणापि, अलङ्कृतयोऽलङ्कारा व्यज्यन्ते, तदा व्यङ्ग्यत्वकाले तासामलङ्कृतीनां ध्रुवं नियमेन, ध्वन्यङ्गता ध्वनिरूपता वाच्यवस्त्वपेक्षयाऽलङ्कारत्वेनैवातिशायितया ध्वनित्वनिर्वाहकतेतियावत्, भवतीतिशेषः । कुत इति चेत् ?-काव्यस्य कविव्यापारस्य वृत्तेः प्रवृत्तेः स व्यङ्ग्योऽर्थ आश्रयउद्देश्यतयाऽऽलम्बनं यस्याः सा तदाश्रया, तस्या भावस्तदाश्रयत्वम्, तदुद्देश्यकत्वम्, तस्मादित्यर्थः ।

इह तदाश्रयादिति भावप्रधानोनिर्देशः । यद्वाऽऽश्रयणमाश्रयस्तस्मादित्याश्रयते भावेऽच्प्रत्ययः । कारिकाचतुर्थचरणस्य हेतूपस्थापकतां बोधयितुं मध्ये 'अत्रहेतुः' इत्येतावान् वृत्तिग्रन्थो निक्षिप्तः । व्यङ्ग्यार्थबुबोधयिषयैव कवे रचना-

ऽऽत्मकव्यापारस्य प्रवृत्तत्वादलङ्काराणां वाच्यवाचकावधिकोत्कर्षेण व्यङ्ग्यताया मवश्यं ध्वन्यात्मत्वम् । यागप्रवृत्त्युद्देश्यस्वर्गवत्काव्यप्रवृत्त्युद्देश्यप्रतीतिविषयव्यङ्ग्यस्य प्राधान्यम् । तदर्थाप्रकाशकत्वे शब्दार्थयोः सहृदयाह्लादजनकत्वविरहात्काव्यत्वमेव न सम्भवतीतिभावः ॥

तदाह—

यस्मात्तत्र तथाविधव्यङ्ग्यालङ्कारपरत्वेनैव काव्यं प्रवृत्तम् । अन्यथा तु तद्वाक्यमात्रमेव स्यात् ।

अन्यथा व्यङ्ग्यतात्पर्यकत्वाभावे । देवदत्तोग्रामं गच्छतीत्यादिवद्वाक्यमात्रं, नतु काव्यं स्यात् तस्य तत्परत्वेनैव व्यवस्थापितत्वात् ॥

अलङ्काराणां वस्तुव्यङ्ग्यतायां ध्वनिरूपतां व्यवस्थाप्यालङ्कारव्यङ्ग्यतायामपि व्यवस्थापयति—

तासामेवालङ्कृतीनाम्—

'अलङ्कारान्तरव्यङ्ग्यभावे,

पुनः—

ध्वन्यङ्गता भवेत् ॥

चारुत्वोत्कर्षतो व्यङ्ग्यप्राधान्यं यदि लक्ष्यते ॥५२॥

तेषामेवालङ्काराणां पुनः अलङ्कारान्तरव्यङ्ग्यभावेऽन्यै र्व्यङ्ग्यभिन्नैरलङ्कारै र्व्यङ्ग्यत्वे, चारुत्वस्य विच्छित्तिजनकत्वसमनियतसौन्दर्यस्य, उत्कर्षत आधिक्याद् यदि व्यङ्ग्यानामलङ्काराणां प्राधान्यं, लक्ष्यते प्रतीयते, तदा ध्वन्यङ्गता ध्वनिव्यवहारप्रयोजकता भवेदित्यर्थः ।

व्यङ्ग्यालङ्कारप्राधान्याभावे वाच्यालङ्काराणामेव प्राधान्यमिति गुणीभूतव्यङ्ग्यतैव काव्यस्येतिबोध्यम् ॥

उक्तप्राधान्यव्यवस्थां द्रढ़यति—

उक्तं ह्येतत्—'चारुत्वोत्कर्षनिबन्धना वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा' इति ।

प्रागेवेदं विवृतम् ॥

ननु वस्तुव्यङ्ग्यालङ्कारध्वनेरुदाहरणं मूले कुतो न दर्शितमित्यतआह—

वस्तुमात्रव्यङ्ग्यत्वे चालङ्काराणामनन्तरोपदर्शितेभ्य एवोदाहरणेभ्यो विषय उन्नेयः ।

अनन्तरोपदर्शितेभ्यः 'प्राप्तश्रीरेष' इत्यादिभ्यएव, विषयउन्नेय उदाहरणमूहनीयम् । तच्चदर्शितमेवप्राक् । चकारोऽलङ्कारव्यङ्ग्यालङ्कारध्वनेरपि संग्राहकः ॥

समासेनोपसंहरति—

तदेवमर्थमात्रेणालङ्कारविशेषरूपेण वाऽर्थेन, अर्थान्तरस्यालङ्कारस्य वा प्रकाशने, चारुत्वोत्कर्षनिबन्धने सति प्राधान्ये, अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यो ध्वनिरवगन्तव्यः ।

तथाच कवि-तन्निबद्धवक्तृप्रौढोक्तिसिद्ध-स्वतस्सम्भविवस्त्वलङ्कारव्यङ्ग्यवस्त्वलङ्काररूपत्वेनार्थशक्त्युद्भवस्संलक्ष्यक्रमव्यङ्ग्योध्वनि र्द्वादशविधोबोध्य इति भावः ।

अथ ध्वनिगुणीभूतव्यङ्ग्यपार्थक्यप्रदर्शनकारिकां कारिकामवतारयति ।

एवं ध्वनेः प्रभेदान् प्रतिपाद्य तदाभासविवेकं कर्तुमुच्यते—

ध्वनिप्रभेदपरिगणनमग्रे करिष्यते । तदाभासो ध्वन्याभासो गुणीभूतव्यङ्ग्यमिति यावत् । विवेको विभागः पृथग्भावार्थकघञन्तरौधादिकविचेर्विवेकशब्दस्य निष्पन्नत्वात् ॥

यत्र प्रतीयमानोऽर्थः प्रक्लिष्टत्वेन भासते ।
वाच्यस्याङ्गतया वाऽपि नास्यासौ गोचरो ध्वनेः ॥५४॥

यत्र यस्मिन् काव्ये, प्रतीयमानो व्यङ्ग्योऽर्थः प्रक्लिष्टत्वेन गूढतयाऽस्वच्छत्वेनेति यावत्, भासते प्रतीयते, वाच्यस्यार्थस्याङ्गतयोपकारकत्वेनापि वा भासते, असौ काव्यविशेषोऽस्य संलक्ष्यक्रमस्य ध्वने र्न गोचरो न विषयः, किन्तु गुणीभूतव्यङ्ग्यत्वेनैव व्यपदेश्य इत्यर्थः । व्यङ्ग्यस्य स्फुटतायां चमत्कारातिशयकारित्वेन प्रधानतायां च ध्वनिः, अन्यथा गुणीभूतव्यङ्ग्यमेवेति सारम् ॥

तदेव विभक्तिभङ्ग्याऽऽह—

द्विविधोऽपि प्रतीयमानः स्फुटोऽस्फुटश्च । तत्र य एव स्फुटः शब्दशक्त्याऽर्थशक्त्या वा प्रकाशते, स एव ध्वनेर्मार्गो नेतरः । स्फुटोऽपि योऽ-

भिधेयस्याङ्गत्वेन प्रतीयमानोऽवभासते, सोऽस्यानुरणनरूपव्यङ्ग्यस्य ध्वनेरगोचरः।

अपिः प्रथमोद्यर्थकः। इतरोऽस्फुटव्यङ्ग्यः।

अस्फुटव्यङ्ग्यस्त्वनतिचमत्करणात्, स्फुटव्यङ्ग्योऽपि वाच्याङ्गभूतव्यङ्ग्यो व्यङ्ग्याप्राधान्याच्च ध्वने र्विषयः, किन्तु स्फुटप्रधानव्यङ्ग्य एवेति सारम्॥

ध्वनेरविषयं वाच्याङ्गव्यङ्ग्यरूपं गुणीभूतव्यङ्ग्यमुदाहरति--

यथा—

मुग्धा पितृष्वसारं व्याहरति--

कमलाअरा णँ मलिआ हंसा उड्डाविआ ण अ पिउच्छा!।
केण वि गामतड़ाए अब्भं उत्ताणअं फलिहम्॥

'कमलाकरा न मलिता हंसा उड्डायिता नच पितृष्वसः!।
केनापि ग्रामतड़ागे ऽभ्रमुत्तानितं क्षिप्तम्॥' इतिच्छाया।

अयि पितृष्वसः! कमलाकराः पद्मनिकरा न मलिताः खण्डिताः, हंसा नोड्डायिता उत्पातिताः, (तड़ागेऽभ्रप्रवेशने तदावश्यकत्वात्) केनाप्यतिकुशलेन जनेन ग्रामस्य तड़ागे सरसि, उत्तानितमुद्वर्त्तितम्, अभ्रं मेघः, निक्षिप्तं प्रवेशितमित्यर्थः। गाथासप्तशतीघटकं पद्यमिदम्।

अत्र मुग्धाकर्तृकं मेघप्रतिबिम्बदर्शनं व्यङ्ग्यमपि वाच्यस्याङ्गमिति न ध्वनेर्विषयः। तथाहि—तड़ागजलेऽधो मेघस्य प्रतिच्छायां दृष्ट्वा केनापि तत्र प्रवेशितं मेघमेव मन्वानाया मुग्धतमायाः कस्याश्चित् पितृष्वसारं प्रत्युक्तिरियं तदैव वाच्यार्थसङ्गतिं भजति, जलधरप्रतिबिम्बदर्शनं तस्या आगूर्यत इति व्यङ्ग्यस्य तस्य वाच्योपपादकत्वात्तदङ्गत्वम्॥

तत्राह—

अत्र हि प्रतीयमानस्य मुग्धवध्वा जलधरप्रतिबिम्बदर्शनस्य वाच्याङ्गत्वमेव।

तेन नध्वनिः, किन्तु गुणीभूतव्यङ्ग्यमेवेति शेषः। 'वाच्येनैव हि विस्मयविभावरूपेण मुग्धमातिशयः प्रतीयत इति वाच्यादेव चारुत्वसम्पत्। वाच्यन्तु स्वात्मोपपत्तयेऽर्थान्तरं स्वोपस्कारवाञ्छया व्यनक्ति' इति लोचनमपि द्रष्टव्यम्॥

गुणीभूतव्यङ्ग्यस्योदाहरणान्तरं दिदर्शयिषुः सामान्यव्यवस्थामाह—

एवंविधे विषयेऽन्यत्रापि यत्र व्यङ्ग्यापेक्षया वाच्यस्य चारुत्वोत्कर्षप्रतीत्या प्राधान्यमवसीयते, तत्र व्यङ्ग्यस्याङ्गत्वेन प्रतीतेर्ध्वनेरविषयत्वम्।

एवंविधे गुणीभूतव्यङ्ग्ये। अन्यत्र 'वाणीर' इत्यादौ। नह्यस्मिन्नेवोदाहरणे, किन्त्वन्यत्रापीदृशस्थलेषु नध्वनिरितिभावः॥

उदाहरणान्तरमाह--

यथा—

कविस्तत्कालसन्निहितः कश्चन साक्षीवा स्वैरिणीचरितं परामृशति--

'वाणीरकुडङ्गोड्डीण-सउणि-कोलाहलं-सुणन्तीए।
घरकम्मवावडाए वहुए सीअन्ति अङ्गाइं॥'

वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वत्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि॥' इति च्छाया।

वानीरकुञ्जाद्वेतसलतामण्डपाद्, उड्डीनानामुत्पतितानां, शकुनीनांपक्षिणां कोलाहलं कलकलं शृण्वत्या आकर्णयन्त्याः, तथा गृहकर्मसु व्यापृतायाः कृतव्यापारायाः संलग्नाया इति यावत्, वध्वा वनिताया अङ्गान्यवयवाः, सीदन्त्यवसादं व्रजन्त्याकुलीभवन्तीतियावदित्यर्थः। जघनविपुलाच्छन्दः।

तथा च 'अथ वेतसे। रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः' 'निकुञ्जकुञ्जौ वा क्लीबे लताऽऽदिपिहितोदरे' 'कोलाहलः कलकलः' इत्यमरः।

अत्र 'दत्तसङ्केतः कान्तः कुञ्जं प्रविष्टः' इति व्यङ्ग्यापेक्षया शकुनिशब्दश्रवणसमकालमेव सकलाङ्गावसादसन्तन्यमानतारूपं वाच्यमेव सुन्दरमिति प्रदीपकृतः। शरीरावसादरूपवाच्यमेवानुभावभूत मौत्सुक्यावेगसंवलितानुरागोद्रेककृतमदनपारतन्त्र्यबोधकम्, व्यङ्ग्यन्तु तन्मुखप्रेक्षीत्युद्द्योतकारः। तेनासुन्दरव्यङ्ग्यत्वेनैवास्य गुणीभूतव्यङ्ग्यत्वम्। लोचने पुनः—'अत्र दत्तसङ्केतचौर्यकामुकरतसमुचितस्थानप्राप्तिर्ध्वन्यमाना वाच्यमेवोपस्कुरुते। तथाहि-गृहकर्मव्यापृताया इत्यन्यपराया अपि, वध्वा इति सातिशयलज्जापारतन्त्र्यबद्धाया अपि, अङ्गानीत्येकमपि न तादृगङ्गं यद्गाम्भीर्यावहित्थवशेन संवरीतुं पारितम्, सीदन्तीत्यास्तां गृहकर्मसम्पादनं स्वात्मानमपि धर्तुं न प्रभवतीति, गृहकर्मयोगेन स्फुटं तथा लक्ष्यमाणानीत्यस्मादेव वाच्यात्सा-

तिशयमदनपरवशताप्रतीतेश्चारुत्वसम्पत्तिः' इत्यनेनास्य वाच्याङ्गव्यङ्ग्यत्वेन गुणीभूतव्यङ्ग्यत्वमुक्तम् ।

तत्र विचार्यते—वाच्यसिद्ध्यङ्गव्यङ्ग्ये व्यङ्ग्यस्य नाचारुत्वं, किन्तु वाच्याङ्गत्वेन गुणीभाव इह त्वचारुत्वमपीति मम्मटानुसारिसिद्धान्तसरणिरेव साधीयसी प्रतिभाति । अत एव काव्यप्रकाशदर्पणे—'एतच्च वाच्यसिद्ध्यङ्गताऽऽदेरपवादभूतत्वाद्भिन्नम् । तेषु हि व्यङ्ग्यस्यापि चारुत्वं सम्भवति' इति विश्वनाथोऽपि निरणयत् ।

ईदृशानां तर्हि का गति रित्यत्राह—

एवंविधो हि विषयः प्रायेण गुणीभूतव्यङ्ग्यस्योदाहरणत्वेन निर्देक्ष्यते ।

प्रायेणेत्यविवक्षितव्यङ्ग्यव्यवच्छेदाभिप्रायेण भणितम् ॥

व्यङ्ग्यस्य पूर्वं गुणीभावेऽपि क्वचित्पश्चात्प्राधान्ये ध्वनेरेव विषय इत्युपदिशति—

यत्र तु प्रकरणादिप्रतिपत्त्या निर्धारितविशेषो वाच्योऽर्थः पुनःप्रतीयमानाङ्गत्वेनैवावभासते, सोऽस्यैवानुरणनरूपव्यङ्ग्यस्य ध्वनेर्मार्गः ।

अयं भावः—शब्दाः कामधेनवइति ततो वाच्यविशेषावधारणं पुरुषः प्रकरण–लिङ्ग–शब्दान्तरसान्निध्य–संयोग–विप्रयोग–साहचर्यप्रभृतीनामर्थनिर्णायकानां ज्ञानस्य बलेनैव कर्तुंशक्नोति । प्रकरणादिच वाच्यातिरिक्तमेवप्रायेणोपलभ्यते । ततश्च व्यङ्ग्येन प्रकरणादिना स्वज्ञानद्वारा वाच्यावधारणं सम्पाद्यत इति व्यङ्ग्यस्य यद्यपि वाच्याङ्गत्वम्, किन्तु यत्र तथा प्रकरणादिज्ञानेन निर्णीतो वाच्योऽर्थः प्रधानीभूतस्य व्यङ्ग्यान्तरस्य पुनरुपस्कारकत्वेनाङ्गतां दधान एव प्रतीयते, तत्रपर्यन्ते व्यङ्ग्यार्थस्यैव प्राधान्यमिति ध्वनेरेव विषयता न गुणीभूतव्यङ्ग्यस्य ॥

उदाहरति—

यथा—

अविनीतकामुकेन समं क्रीडन्तीं नायिकां बहिश्श्रुतवलयध्वनिः सखी प्रतिबोधयति—

'उच्चिणसु पडिअ कुसुमं मा धुण सेहालिअं हलिअसुह्ने ! ।
अह दे विसमविरावो ससुरेण सुओ वलअसद्दो ॥'

'उच्चिनु पतितानि कुसुमानि मा धुनीः शेफालिकां हालिकस्नुषे !
एष ते विषमविरावः श्वशुरेण श्रुतो वलयशब्दः ॥' इति च्छाया ॥

हे हालिकस्नुषे ! हलवाहपुत्रवधु ! क्रियाकौशलानभिज्ञे ! पतितानि वृक्षाद्भूतल इतिशेषः, कुसुमानि शेफालिकायाः पुष्पाणि, उच्चिनु संगृहाण, शेफालिकां श्वेतनिर्गुण्डीलतां माधुनी नैकम्पय, पुष्पाणि पातयितुमितिशेषः, यतः, विषमउत्कटो विरावो ध्वनिर्यत्र तादृश एष मयाऽपि श्रावणप्रलाक्षविषयीक्रियमाणः, ते वलयानां कङ्कणानां, शब्दः, श्वशुरेण श्रुत इत्यर्थः ।

तथा च—'शेफालिका तु सुवहा निर्गुण्डी' इत्यमरः ।

अत्र 'धृष्टेन केनापि कान्तेनान्तः स्वैरं समुद्धतं क्रीडन्त्या नायिकाया मणितशिञ्जितादि तारं बहिस्थितैव श्रुत्वा रहस्यभङ्गाद्बिभ्यती वचनचतुरा सहचरी तां तथा प्रतिबोधयति, यथा सा ततो निवर्तेत, रहस्योद्भेदश्चापि न भवेत्' इत्येव व्यज्यमानं प्रकरणम् 'तव श्वशुरस्य शेफालिकालतायां महानादर इति तदा कर्षणकम्पनादिभिरसौ भृशं कुप्येदत एवं न विधेयम्' इति प्रतीयमानं समर्थनं च ज्ञानद्वारा वाच्यार्थमुपकरोतीति व्यङ्ग्यस्य पूर्वं वाच्याङ्गत्वम्, किन्तु पश्चाच्छेफालिकानिर्धूननस्याप्रस्तुतत्वात्तदुक्तेस्तन्निषेधतात्पर्यकत्वाभावे, नायिकारहस्यगोपनतात्पर्यकत्वे च गृहीते, निषेधात्मनो वाच्यार्थस्य तादृशविहारनिषेधरूपप्रधानव्यङ्ग्यपोषकत्वमेवेत्यसौ पर्यवसाने संलक्ष्यक्रमव्यङ्ग्यध्वनेरेव विषयोऽवधार्यते ॥

तदाह—

अत्र ह्यविनयपतिना सह रममाणा सखी बहिश्श्रुतवलयकलकलया सख्या प्रतिबोध्यते । एतदपेक्षणीयं वाच्यार्थप्रतिपत्तये । प्रतिपन्ने च वाच्यार्थे, तस्याविनयप्रच्छादनतात्पर्येणाभिधीयमानत्वात् पुनर्व्यङ्ग्याङ्गत्वमेवेत्यस्मिन्ननुरणनरूपव्यङ्ग्यध्वनावन्तर्भावः ।

अविद्यमानो विनय आर्जवं यस्यासावविनयो धृष्टउद्धत इति यावत् । प्रतिपत्तिर्ज्ञानम् । अविनयस्यौद्धत्यस्य प्रच्छादनमपह्नवः ॥

अविवक्षितवाच्यध्वन्यविषयव्यवच्छेदप्रदर्शनकारिकां कारिकामवतारयति—

एवं विवक्षितवाच्यस्य ध्वनेस्तदाभासविवेके प्रस्तुते सत्यविवक्षितवाच्यस्यापि तं कर्तुमाह—

'प्रस्तुतइति हेतौ सप्तमी । तदाभासविवेकप्रस्तावलक्षणात्प्रसङ्गादिति यावत् । कस्य तदाभास इत्यपेक्षायामाह–विवक्षितवाच्यस्येति । स्पष्टे तु व्याख्याने प्रस्तुत इत्यसङ्गतम् । परिसमाप्तौ हि विवक्षिताभिधेयस्य तदाभासविवेकः । नत्वधुना

प्रस्तुत·······मनुबध्नाति ।' इत्याचार्यवचनमिहत्यमनावर्जकम् , सम्योंगसमवायस-म्बन्धवैधुर्येण 'निमित्तात्कर्मयोगे' इत्यनेन वार्तिकेन हेतौ सप्तम्या दुर्घटत्वात् , विवक्षितवाच्यस्य ध्वनेस्तदाभासाद्विवेके (विभागे) प्रस्तुते (सम्पन्ने) सतीत्याद्यर्थेऽपि प्रस्तुतइत्यस्य सङ्गतत्वात् , 'यस्यचभावेन भावलक्षणम्' इत्यनेन सूत्रेण सप्तम्याः सुलभत्वाच्च ॥

'अव्युत्पत्तेरशक्तेर्वा निबन्धो यः स्खलद्गतेः ।
शब्दस्य, स च न ज्ञेयः सूरिभिर्विषयो ध्वनेः ॥ ५५ ॥'

अव्युत्पत्तेरनैपुण्यादनुप्रासादिनिबन्धनैकरसिकत्वादिति यावत् , वाऽथवाऽशक्तेर्वृत्तपरिपूरणसामर्थ्यविरहाद्धेतोः, स्खलद्गतेर्बाधितार्थस्य लक्षणा गुणवृत्तिमात्रप्रयोज्यबोधजनकस्येतियावत् , शब्दस्य यो निबन्धो यः प्रयोगः सच ध्वनेरविक्षितवाच्यस्य विषयः सूरिभिर्नज्ञेय इत्यर्थः ।

अयमाशयः—

अनुप्रासप्रवणतया कवेर्लाक्षणिकशब्दप्रयोगो यथा—

'प्रेङ्खत्प्रेमप्रबन्ध–प्रचुर–परिचयप्रौढसीमन्तिनीनां,
चित्ताऽऽकाशावकाशे विहरति सततं यः स सौभाग्यभूमिः ॥'

इह प्रेङ्खदिति लाक्षणिकः, चित्तमाकाश इतिगौणः शब्दप्रयोगो यः, स ध्वनेर्न विषयः एवं वृत्तपरिपूरणसामर्थ्यविरहेण यथा—

'विषमकाण्डकुटुम्बकसञ्चयप्रवर ! वारिनिधौ पतता त्वया ॥
जलतरङ्गविघूर्णितभाजने, विचलितात्मनि कुड्यमये कृताः ॥'

अत्र प्रथमचरणश्चन्द्रमस्युपचरितो वृत्तभरणमात्रप्रयोजन इत्ययमपि ध्वनेर्न विषयः । कारिकाघटकश्चकारः प्रथमोद्द्योतोक्तवद्गत्यनुभवतिलावण्यादिलाक्षणिकशब्दान् सङ्गृह्णाति॥

अभासाद्विवेके प्रक्रम्यमाणे ध्वनेरपिस्वरूपनिर्देश आवश्यक इति पुनर्ध्वनिस्वरूपप्रदर्शिकां कारिकामवतारयति कारिकाऽर्थोपस्कारकार्थोपस्थापकपदोपन्यासेन वृत्तिकारः—

यतश्च—

'सर्वेष्वेव प्रभेदेषु स्फुटत्वेनावभासनम् ॥
यद्व्यङ्ग्यस्याङ्गिभूतस्य, तत्पूर्णं ध्वनिलक्षणम् ॥५६॥'

अङ्गिभूतस्य प्रधानस्य, व्यङ्ग्यस्य, सर्वेषु विवक्षितान्यपरवाच्य-विवक्षितवाच्यप्रभृतिषु प्रभेदेषु प्रकारेषु, यत् स्फुटत्वेनाक्लिष्टत्वेनैव (नतु गौणत्वगूढत्वाभ्याम्) अवभासनं ज्ञानं ज्ञापनं वा, तत्, पूर्णं समस्तमखण्डमिति यावत्, ध्वनेर्लक्षणं प्रमाणं प्रत्यायकं वा यतोऽस्त्यतो न गौणलाक्षणिकाद्याभासेषु ध्वनित्वम् ॥

तदाह—

तच्च, उदाहृतविषयमेव ।

इति राजानकानन्दवर्धनाचार्यविरचिते ध्वन्यालोके
द्वितीय उद्द्योतः ॥

तद् ध्वनिलक्षणं च, उदाहृताः 'स्निग्धश्यामलकान्ति' इत्याद्यारभ्य प्रदर्शिता विषया लक्ष्याणि यस्य, तादृशमेव, नतु तत्तदाभासविषयमप्यस्तीति शेषइत्यर्थः ॥

आलोके विषमे क्षामे लोचने च पुरातने ।
स्वैरं मे चरतश्शश्वत् स्खलनं क्षम्यतां बुधैः ॥

इति मैथिलश्रोत्रियाग्रजन्म-श्रीबदरीनाथशर्मनिर्मितायां
ध्वन्यालोकदीधितौ द्वितीय उद्द्योतः ॥

* शुभम्भूयात् *

अथ ध्वन्यालोकदीधितौ तृतीय उद्द्योतः ।

विलसत्सागरोत्सङ्ग-सङ्गिगङ्गाविडम्बिनीम् ॥
क्रीडन्तीं केशवक्रोडे राधामाधारये धिया ॥

विनेयबुद्धिवैशद्याय प्रकारान्तरेण पुनर्ध्वनिनिरूपण मारभमाणोऽतीतोद्द्योतद्वय-सङ्गतिं दर्शयन् वृत्तिकारः कारिकामवतारयति—

एवं व्यङ्ग्यमुखेनैव ध्वनेः प्रदर्शिते सप्रभेदे स्वरूपे पुनर्व्यञ्जकमुखेन तत् प्रकाश्यते—

तच्छब्दो ध्वनिस्वरूपं परामृशति । अविवक्षितवाच्या-विवक्षितान्यपरवाच्य-

त्वादिव्यङ्ग्यधर्मभेदभिन्ना ध्वनेः प्रकाराः प्रथममुद्द्योतयुगुलेन प्रतिपादिताः, इदानीं पुन र्व्यञ्जकभेदभिन्ना एते "स्थूणाऽभिखनन" न्यायेन प्रतिपाद्यन्त इत्याशयः। तेन न पिष्टपेषणाशङ्का, नवा ऽनवधेयवचनताप्रसक्ति र्वक्तुरिति बोध्यम् ॥

'अविवक्षितवाच्यस्य पदवाक्यप्रकाशता ॥

तदन्यस्यानुरणन-रूपव्यङ्ग्यस्य च ध्वनेः । ५७ ॥'

अविवक्षितवाच्यस्य=अर्थान्तरसङ्क्रमितवाच्यात्यन्ततिरस्कृतवाच्येतिद्विभेदस्य लक्षणामूलध्वनेः, पदवाक्यप्रकाशता = प्रत्येकं पदाद् वाक्याच्च प्रकाशः प्रतीति-र्यस्य तत्त्वं भवतीत्यर्थः।

इत्थं च ध्वने र्भेदत्रयं द्विशाखतया षोढाऽवगन्तव्यम्। न च ध्वनेः पदप्रका-शताया असम्भवः, इहैवोद्द्योते-'पदानां स्मारकत्वेऽपि पदमात्रावभासिनः' इत्या-दिना तद्व्यवस्थाया वक्ष्यमाणत्वात् ॥

क्रमश उदाहर्तुमाह—

अविवक्षितवाच्यस्यात्यन्ततिरस्कृतवाच्ये प्रभेदे पदप्रकाशता यथा म-हर्षेर्व्यासस्य—

महाभारते।

'सप्तैताः समिधः श्रियः'।

'धृतिः क्षमा दया शौचं कारुण्यं वागनिष्ठुरा।
मित्राणां चानभिद्रोहः' ॥ इत्यवशिष्टं चरणत्रयम्।

धैर्य्यादयः सुहृदनभिद्रोहान्ताः सप्त श्रियः सम्पदः समिध उद्दीपिका इत्यर्थः। शुष्केन्धनानि वह्निमिव धृत्यादीनि समृद्धिं दीपयन्तीत्यौपम्यपर्यवसानेऽपि पुरस्ता-द्धृत्यादिषु समित्तादात्म्यस्य बाधितत्वेन 'आयुर्घृतम्' इत्यत्र घृतशब्दवत् समि-च्छब्दस्योद्दीपकत्वं लक्षयतोऽन्यवैलक्षण्येन तत्करत्वस्य व्यञ्जकत्वम्। इन्धनात्मनो वाच्यस्य सर्वथाऽविवक्षा, व्यञ्जने च समिदतिरिक्तपदानपेक्षाचेति। पदादेकस्मादेव व्यङ्ग्यस्य प्रतीतिरिह व्यक्तैव।

पुनरुदाहरति—

यथावा कालिदासस्य—

मेघदूते—मेघं प्रति यक्षस्योक्तिः।

'कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्'

'न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः' इति पद्यस्य तुरीयश्चरणः।

हे मेघ! त्वयि सन्नद्धे समुन्नते सति विरहेण विधुरां विकलां जायां क उपेक्षेत? न कोऽपीत्यर्थः।

समुन्नतस्य मेघस्य नितरां मन्मथोन्माथदायकत्वमिति तात्पर्यम्।

इह 'सन्नद्धो वर्मितः सज्जो दंशितः' इत्यमरोक्तेः सन्नाहो युद्धोद्यमश्चेतनमात्रधर्म इत्यचेतने मेघे बाधित इति सन्नद्धपदं केवलं वाच्यनैरपेक्ष्येणौन्नत्यं लक्षयन्निष्कारुणिकत्वाप्रतिकार्यत्वादि व्यनक्ति।

पुनरुदाहरति—

यथा वा तस्यैव—

कालिदासस्यैव।

'किमिव हि मधुराणां मण्डनं नाकृतीनाम्'

अभिज्ञानशाकुन्तल आश्रमवृक्षान् सिञ्चन्तीं शकुन्तलां पश्यतो दुष्यन्तस्योक्तिरियम्।
'सरसिजमनुविद्धं शैवलेनापि रम्यं, मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति॥
इयमधिकमनोज्ञा वल्कलेनापि तन्वी' इत्याद्यं पादत्रयं श्लोकस्य।

मधुराणां कमनीयानामाकृतीनां किमिव (वस्तु) मण्डनं भूषणं न भवतीत्यर्थः। निसर्गशोभनमाकारं तुच्छमपि वस्तु भूषयत्येवेति भावः।

अत्र रसविशेषवाचकं मधुरपदं बाधसध्रीचीनतयाऽऽकृत्यभिन्नमर्थं बोधयितुमनर्हं सर्वानुरञ्जकत्वं लक्षयद् वाच्यनिरपेक्षमेव कमनीयतमत्वं सूचयति।

तदाह—

एतेषूदाहरणेषु 'समिधः' इति 'सन्नद्धे' इति 'मधुराणाम्' इति च पदानि व्यञ्जकत्वाभिप्रायेणैव कृतानि।

व्यञ्जकत्वस्य व्यञ्जनस्याभिप्रायेणेच्छयैव, व्यङ्ग्यार्थबुबोधयिषयैव, नतु वाच्यार्थबोधनाय, कृतान्युच्चारितानीत्यर्थः।

इत्थमविवक्षितवाच्यध्वनेः प्रथममत्यन्ततिरस्कृतवाच्यात्मकं प्रकारमुदाहृत्य, द्वितीयमुदाहरति—

तस्यैवार्थान्तरसङ्क्रमितवाच्ये यथा—

तस्याविवक्षितवाच्यध्वनेः। पदप्रकाशतेति शेषः।

ऋष्यमूकस्थो रामः सीतां मनसा सम्बोध्य ब्रवीति—

'रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्'

प्रत्याख्यानरुषः कृतं समुचितं क्रूरेण ते रक्षसा,
सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैश्शिरः ॥
व्यर्थं सम्प्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा' इत्याद्यः पद्यांशः।

हे प्रिये! वैदेहि! क्रूरेण दारुणेन रक्षसा रावणेन प्रत्याख्यानरुषस्तदाज्ञाऽनङ्गीकारजकोपस्य समुचितमनुरूपं ते तव हरणतर्जनादि कृतम्। आज्ञाभङ्गात् कुपितो हि राजा तीव्रं दण्डं ददात्येव। त्वया च तद् हरणादि तथा धैर्येण कुलमर्यादां रक्षन्त्याऽलक्षितविकारतया सोढं मर्षितम्, न तु भयेन लोभेन वा तदीयत्वमङ्गीकृतम्, यथा कुलजनः शिर उच्चैर्धत्ते, न तु स्वकुलवधूबान्धक्यावबोधेनाधोनीतमूर्धा भवति, इति त्वयाऽपि सत्कुलोत्पत्तेरुचितमेव कृतम्। किन्तु सम्प्रति कान्ताहरणोत्तरमपि प्रतीकाराक्षमत्वेन व्यर्थं निष्फलमिदं सन्निहितमंसस्थं धनुर्बिभ्रता, त्वद्व्यापदस्त्वदीयविशिष्टापत्तेर्हरणादेः साक्षिणा तूष्णीमवेक्षकेण प्रियजीवितेन स्वजीवनरक्षार्थं युद्धाद्बिभ्यता साहसैकरसेनापि कातरेण स्वार्थान्धेनाविवेकिना वा रामेण मया प्रेम्णस्त्वद्विषयकप्रणयस्योचितं न कृतमित्यर्थः।

न हि प्रियजनपराभवः प्रणयिना शूरेण तूष्णीं सोढव्य इत्यभिसन्धिः।

अत्र 'प्रिये' इति सम्बोधनपदप्रवृत्तिनिमित्तस्य प्रेम्णोऽनौचित्येन कलङ्कितत्वाच्छोकालम्बनोद्दीपनविभावयोगाद्रामस्य करुणो रसः स्फुटतीत्याचार्याः।

स्वयं रामेण दशरथापत्यमात्ररूपस्वार्थोपस्थापक—स्वनामोच्चारणासङ्गतेरतिसाहसिक्य-पराक्रमातिशयादिसमानाधिकरणकातर्यादिव्यङ्ग्यार्थविशिष्टः स्वार्थो रामपदेन प्रत्याय्यत इत्यर्थान्तरसङ्क्रमितवाच्यध्वनेः पदप्रकाशता।

तदाह—

अत्र रामेणेत्येतत् पदं साहसैकरसत्वादिव्यङ्ग्याभिसङ्क्रमितवाच्यं व्यञ्जकम्।

विशेषणद्वयं पदस्य।

तमेवपुनरुदाहरति—

**'एमेअ जणो तिस्सा देउ कवोलोपमाइ ससिबिम्बम्।
परमत्थविआरे उण चन्दो चन्दो विअ वराओ॥'**

'एवमेव जनस्तस्या ददाति कपोलोपमायां शशिबिम्बम् ।
परमार्थविचारे पुनश्चन्द्रश्चन्द्र एव वराकः ॥' इतिच्छाया ।

नायिकाप्रशंसापरं नायकस्य दूत्या वा वचनमिदम् । तस्याः प्रसिद्धैकसुन्दर्य्योः कपोलयोरुपमायां जन एवमेव गतानुगतिकतया विवेकं विनैव, शशिबिम्बं ददाति तद्गण्डसाम्येन चन्द्रमण्डलं निर्दिशति । परमार्थविचारे तत्त्वविवेके पुनः, चन्द्रः शशी वराकः क्षयिसुषमत्वाद्दयनीयः क्षयिसुषमत्व–कलङ्कित्वादिधर्मविशिष्टश्चन्द्र एव, न तु तत्कपोलतुलां कथमप्यवरोहतीत्यर्थः ।

तस्या इत्यद्भुतसौन्दर्येण प्रसिद्धिम्, सा वाक्यार्थोपपत्तिम्, कपोलपदं स्वरूपसम्पदा निरवधिलावण्यसम्भारेण चन्द्रावधिकोत्कर्षम्, 'जन' इति गतानुगतिकतामात्रावलम्बनेन विवेकवैमुख्यम्, एवमेवेति विवेचनाक्षमत्वम्, शशिपदं कलङ्कितया साम्यासादनानर्हत्वम्. ददातीत्यौपम्यस्य वास्तविकताविरहम्, वराकपदं चन्द्रेऽज्ञानिनि दयनीयताम्, चरमं चन्द्रपदं क्षयिसुषमत्वादिविशिष्टं चन्द्रमसं प्रत्याययतीति द्वितीयचन्द्रपदापेक्षोऽत्रार्थान्तरसङ्क्रमितवाच्यध्वनिः । अन्यथा द्वितीयचन्द्रपदोपादानात् पौनरुक्त्यमापतेत् । इदानीं त्वर्थान्तरसङ्क्रमणाद् वाच्यस्याकारवैलक्षण्येन न दोषः ।

'विअ' इतीवार्थकशब्दघटितस्त्वपपाठः । तथा सति चन्द्रश्चन्द्रइवेत्यनन्वये द्वितीयसादृश्यव्यवच्छेदमात्रेऽवगम्यमाने चन्द्रस्य प्रत्युत महत्त्वमेव प्रतीयेतेति विवक्षितार्थप्रतीतिव्याघातः स्फुट एव ।

तदाह—

अत्र द्वितीयश्चन्द्रशब्दोऽर्थान्तरसङ्क्रमितवाच्यः ।

एवमविवक्षितवाच्यध्वनेः पदप्रकाशतायां प्रकारयुगलमुदाहृत्य वाक्यप्रकाशतायामप्युदाहरति—

अविवक्षितवाच्यस्यात्यन्ततिरस्कृतवाच्ये प्रभेदे वाक्यप्रकाशता यथा–

तत्रापि प्रथमं प्रकारमुदाहरति—

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥'

भगवद्गीतायां द्वितीयाध्यायेऽर्जुनं श्रीकृष्ण उपदिशति । हे पार्थ ! सर्वेषां स्थावरजङ्गमानां भूतानां प्राणिनां या निशा मोहजनकतया रात्रिसदृशी मिथ्यादृष्टिः,

यद्वा सकलातात्त्विकपदार्थतिरोधापकतया तात्त्विकदृष्टिर्निशैव, अस्तीति शेषः । तस्यां तद्विषये सँय्यमी जितेन्द्रियो मुनिर्जागर्ति कथमियं ह्रीयेतेति कथमियं लभ्येतेति वाऽवधत्ते । यस्यां पुनर्मिथ्यादृष्टौ भूतानि जाग्रत्यवदधत्यनुरज्यन्तीति यावत् । सा पश्यतस्तत्त्वावबोधं बिभ्रतो मुनेर्मननशीलस्य निशाऽनवधानविषयोऽस्तीत्यर्थः । मिथ्यादृष्टिः परिहेया, तत्त्वदृष्टिश्चाश्रयणीयेति तात्पर्यम् ।

इत्थञ्चात्र निशा-जागरणशब्दाभ्यां क्रमेण रात्रि-निद्राक्षयरूपवाच्यार्थयोरुपस्थितिमात्रे तात्पर्यानुपपत्तौ जागरूकायां मिथ्यादृष्टि-तत्त्वदृष्टी लक्षयित्वा मिथ्याज्ञानपराङ्मुखत्व-तत्त्वज्ञानौन्मुख्ये व्यज्येते इत्यनेकपदसापेक्षतयाऽत्यन्ततिरस्कृतवाच्यध्वनेर्वाक्यप्रकाशता । तथा हि—या भूतानां रात्रिः, स मुनेर्जागरणकाल इत्याद्यर्थः प्रकृतोपदेशेऽनुपपन्न इति मूढानां मिथ्याज्ञानविषयपदार्थ आस्था, न तु ज्ञानिनाम् । 'अतस्त्वयाऽतात्त्विके जगत्यास्था न विधेया' इत्युपदेश्यार्थो लक्षणामूलव्यञ्जनया प्रत्याय्यते ।

तदाह—

अनेन हि वाक्येन (न) निशार्थो न (वा) जागरणार्थः कश्चिद् विवक्षितः, किन्तर्हि–तत्त्वज्ञानानवहितत्वमतत्त्वपराङ्मुखत्वं च मुनेः प्रतिपाद्यत इति तिरस्कृतवाच्यस्यास्य व्यञ्जकत्वम् ।

अनेन वाक्येन, प्रतिपाद्यते व्यज्यते, अस्य वाक्यस्येत्यर्थः । तिरस्कृतवाच्यस्येति वाक्यस्य विशेषणम् । प्रकोष्ठस्थ 'न–वा' शब्दाभ्यां विना न सम्यक् सन्दर्भशुद्धिरिति तत्कल्पना ।

वाक्यप्रकाशध्वनेरपरं प्रकारमुदाहरति—

तस्यैवार्थान्तरसंक्रमितवाच्यस्य वाक्यप्रकाशता यथा—

तस्याविवक्षितवाच्यस्य ध्वनेः ।

स्वकर्मार्जितं दुःखमनुभवन् कश्चिद् व्याहरति—

'विसमअओ च्चिअ काणवि काणवि बोलेइ अमिअणिम्माओ ।
काणवि विसामिअमओ काण वि अविसामिअमओ कालो ॥'

'विषमय इव केषामपि केषामप्यतियात्यमृतनिर्माणः ।
केषामपि विषामृतमयः केषामप्यविषामृतमयः कालः ॥' इतिच्छाया ।

केषामपि पापिनामविवेकिनां वा जनानां कालो विषमय इव दुःखसाधनमयः,

केषामपि पुण्यवतामतिविवेकभृतां वाऽमृतेन निर्माणं यस्य तादृक् सुखसाधनमयः, केषामपि पुण्यापुण्योभयभृतां विवेकाविवेकजुषां वा विषामृतमयो दुःखसुखोभयसाधनमयः, पुनः केषामपि नितान्तमूढानामवाप्तपारमहंस्यानां वाऽविषामृतमयो दुःखसुखोभयसाधनविधुरः कालोऽतियाति, व्यत्येतीत्यर्थः ।

पापिनां दुःखोपभोगेन, पुण्यात्मनां सुखोपभोगेन, मिश्रकर्मणां तदुभयभोगेन, अज्ञानां परमहंसानां वाऽनवधारितविशेषाणां दुःखसुखानुपभोगेन समयो गच्छतीति सारम् ।

अत्र लोचनसाक्ष्येण पाठपरिवर्तो विहितः । केवलम् 'अमिअ णिम्माओ' इत्यलङ्कारसर्वस्वानुसारेण पठितम् । यथाश्रुतपाठे तु मात्राविकार आपतति ।

इह लावण्यादिशब्दानां छायाऽतिशयादाविव विषशब्दस्य दुःखसाधनेऽमृतशब्दस्य सुखसाधने च निरूढा लक्षणा 'विषं निम्बममृतं कपित्थम्' इतिवत् । केवलसुखदुःखमयतायाः कालेऽकिञ्चित्करत्वादसम्भवाद्वा तत्साधनपर्यन्तानुधावनम् । 'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्' इत्यभियुक्तोक्तेर्निरूढलक्षणायाः शक्त्यनतिरेकात् सुखदुःखसाधनयोरभिधेयत्वव्यवहार इति वाच्ये तत्साधने प्रतीयमानयोः सुखदुःखयोः सम्बन्धेनैव प्रतीयेते इत्यर्थान्तरसंक्रमितवाच्यत्वं, वाक्यप्रकाशता च पूर्ववदेव ध्वनेः ।

तदाह—

अत्र हि वाक्ये विषामृतशब्दाभ्यां सुखदुःखरूपसंक्रमितवाच्याभ्यां व्यवहार इत्यर्थान्तरसंक्रमितवाच्यस्यास्य व्यञ्जकत्वम् ।

सुखदुःखयो रूपे संक्रमिते वाच्ये ययोरिति बहुव्रीहिः । विषामृतेत्युपक्रमानुसारं दुःखसुखेत्युपसंहरणमुचितम् । तद्विपर्यासमूलं तु 'सुखदुःखतत्क्रियायाम्' इति धातुपाठः, सुखस्याभ्यर्हितत्वं वा ।

इदं पुनरिहानुसन्धेयम्—अमृतविषशब्दयोः सुखदुःखसाधनरूपार्थद्वये न निरूढा लक्षणा, वाच्यवत् सार्वत्रिकतत्प्रत्ययाभावात्, न वा रूढिमूलिकैव, तथा सति व्यङ्ग्यार्थसंस्पर्शासम्भवात्, किन्तु प्रयोजनवत्येव । तथा हि—विषामृतशब्दयोर्दुःखसुखानुभवकारणयोर्लक्षणा, तद्बाहुल्यं च प्रतीयमानं प्रयोजनमिति प्रतीत्यभावाद् वाच्यस्य व्यङ्ग्यसंक्रमणायोगादिदमुदाहरणं चिन्त्यम् । अपि त्वत्यन्ततिरस्कृतवाच्य-

ध्वनेरेवेदमुदाहरणं प्रतिभाति। अत्र तु—

'कदली कदली, करभः करभः, करिराजकरः करिराजकरः।'

इत्यादि पीयूषवर्षपद्यमेवान्यैरप्युदाहृतमुदाहरणीयमिति दिक्।

इत्थमविवक्षितवाच्यध्वनेर्द्विविधस्य प्रत्येकं पदवाक्यप्रकाशत्वेन प्रकारचतुष्टयमुदाहृत्य, विवक्षितान्यपरवाच्यस्यापि शब्दशक्त्युद्भवत्वेन कविप्रौढोक्तिनिष्पन्नार्थशक्त्युद्भवत्वेन स्वतस्सम्भव्यर्थशक्त्युद्भवत्वेन च त्रिविधस्य ध्वनेः पदवाक्यप्रकाशतया सम्पन्नं प्रकारषट्कं क्रमेणोदाहरति—

विवक्षिताभिधेयस्यानुरणनरूपव्यङ्ग्यस्य शब्दशक्त्युद्भवे प्रभेदे पदप्रकाशता यथा—

दित्सुर्दारिद्र्याद्दातुमशक्तो निर्विण्णो वक्ति—

'प्रातुं धनैरर्थिजनस्य वाञ्छां दैवेन सृष्टो यदि नाम नास्मि।
पथि प्रसन्नाम्बुधरस्तडागः कूपोऽथवा किं न जडः कृतोऽहम्॥'

धनैर्नानाविधद्रविणैः, अर्थिजनस्य याचकनिकरस्य, वाञ्छामभिलाषं, प्रातुं पूरयितुम्, यदि नाम निश्चितं जडो मूढोऽहं, दैवेन विधिना सृष्ट उत्पादितो नास्मि, तदा प्रसन्नस्य स्वच्छस्यात एव लोकोपकारकस्याम्बुनो जलस्य धरस्तडागः, अथवा जडः शिशिरः कूपः पथि मार्गे किं कथं न कृतोऽस्मीत्यर्थः।

मदपेक्षया मार्गसन्निकृष्टतडागकूपयोरेव परोपकारकत्वादुत्पत्तेः साफल्यमिति भावः। वाञ्छायास्त्राणानौचित्यात्'त्रातुम्'इति पाठ उपचारेण योजनीयः। प्रातिस्तु पूरणार्थक एवेति तत्प्रयोगे नानुपपत्तिः। 'अम्बु धारयती'ति विग्रहप्रदर्शनमपि कस्यचिच्चिन्त्यम्, कर्मण्यणा बाधादम्बुधार इत्यापत्तेः।

इह धनैरिति बहुवचनेन याचकप्रकरस्पृहाऽनुरूपनानाप्रकारकत्वम्, जनशब्देनार्थिनां बाहुल्यं धनमात्रस्पृहिता च, प्रातिना वितरणस्यार्थिजनेच्छाऽनुरूपत्वम्, तुमुना सृष्टेस्तदनन्यप्रयोजनकत्वम्, दैवपदेन स्वातन्त्र्यम्, तेन नियोगपर्यनुयोगानर्हत्वम्, अम्बुनः प्रसन्नत्वेन पथिस्थित्या च लोकोपकारकत्वम्, स्वस्य जडत्वेन शोच्यता, कूपस्य च तत्त्वेन तापशामकतयाऽध्वन्योपयोगित्वम्, शोच्यतया 'जाएज्ज वणुद्देशे' इत्यादिवन्निर्वेदश्च व्यज्यते।

किंच 'जडः' इति पदं मूढार्थे प्रथमैकवचनान्तं विषण्णो वक्ता स्वविशेषणत्वेन प्रायुङ्क्तेति तत्रैवाभिधायां नियन्त्रितायाम् 'सुषीमः शिशिरो जडः' इति कोशानुशिष्ट

कूपाऽन्वयिनं शिशिररूपार्थं पश्चादभिधामूलव्यञ्जनया प्रत्याययतीति शब्दशक्तिमूल-ध्वनेः पदप्रकाशता ।

तदाह—

अत्र हि जड इति पदं निर्विण्णेन वक्त्राऽऽत्मसमानाधिकरणतया प्रयुक्तमनुरणनरूपतया कूपसमानाधिकरणतां स्वशक्त्या प्रतिपद्यते ।

समानाधिकरणताऽभेदसम्बन्धेन विशेषणत्वम् । अनुरणनरूपत्वं संलक्ष्यक्रमता । स्वशक्त्याऽभिधासहकृतव्यञ्जनया प्रतिपद्यते प्राप्नोति ।

तस्यैव वाक्यप्रकाशात्मकं द्वितीयं भेदमुदाहरति—

तस्यैव वाक्यप्रकाशता यथा हर्षचरिते सिंहनादवाक्येषु—

तस्यैव संलक्ष्यक्रमशब्दशक्त्युद्भवध्वनेरेव । हर्षचरिते बाणभट्टकृते षष्ठोच्छ्वासे सिंहनादनामा हर्षनृपतिसेनापतिर्हर्षं ब्रवीति—

'वृत्तेऽस्मिन् महाप्रलये धरणीधारणायाधुना त्वं शेषः ।'

अस्मिन् प्रभाकरवर्धनाभिधस्य पितुः, राज्यवर्धनाख्यस्य ज्येष्ठभ्रातुश्च मरणरूपे महति प्रलयेऽपाये, वृत्ते जाते सति, धरणीधारणाय राज्यधुराग्रहणाय, अधुना त्वं शेषोऽवशिष्ट इति प्राकरणिकवाक्यार्थबोधे सम्पन्ने, पश्चात्—

'प्रलयो मृत्युकल्पान्त-मूर्च्छाऽपायेषु पुंस्ययम् ।' इति

'शेषः सङ्कर्षणे वधे ।

'अनन्ते ना प्रसादेन स्वनिर्माल्यार्पणे स्त्रियाम् ॥' इति च मेदिनीकोशानुशासनादभिधामूलव्यञ्जनया 'अस्मिन् महाप्रलये कल्पान्ते वृत्ते सति धरणीधारणाय धरोद्वहनाय त्वं शेषोऽनन्त एव' इत्यर्थान्तरे प्रत्यायिते, अर्थद्वयस्य मिथोऽनन्वयापत्तिवारणायोपमानोपमेयभावोऽपि व्यज्यत इति प्रलयाद्यनेकपदसापेक्षतयाऽस्य ध्वनेर्वाक्यप्रकाशता, शब्दपरिवृत्त्यसहत्वाच्च शब्दशक्त्युद्भवत्वम् ।

तदाह—

एतद्धि वाक्यमनुरणनरूपमर्थान्तरं शब्दशक्त्या स्फुटमेव प्रकाशयति ।

अथ तृतीयं भेदमुदाहरति—

अस्यैव कविप्रौढोक्तिमात्रनिष्पन्नशरीरस्यार्थशक्त्युद्भवे प्रभेदे पदप्रकाशता यथा हरिविजये—

अस्य विवक्षितान्यपरवाच्यध्वनेः । हरिविजये प्रवरसेनकृतप्राकृतरूपके ।

वसन्तं वर्णयति—

'चूअङ्कुरावअंसं छणपसरमहग्घणमहुरामोअम् ॥
असमप्पिअं पि गहिअं कुसुमसरेण महुमासलच्छिमुहम् ॥'

'चूताङ्कुरावतंसं क्षणप्रसरमहद्घनमधुरामोदम् ।
असमर्पितमपि गृहीतं कुसुमशरेण मधुमासलक्ष्मीमुखम् ॥' इतिच्छाया ।

कुसुमशरेण कामेन, चूतस्याङ्कुरो मञ्जरिरेव, अवतंसः कर्णपूरो यस्मिंस्तादृशम्, क्षणस्य वसन्तोत्सवस्य महाप्रसरेण विपुलसमारोहेण, घनो निबिडो मधुरश्चामोदः सुगन्धिरानन्दो वा यत्र तादृक्, मधुमासलक्ष्म्या वसन्तश्रिया मुखमाननमारम्भश्चा, (तया) असमर्पितम् (चुम्बितुम्) अदत्तमपि (बलाद्) गृहीतमित्यर्थः ।

तथा च 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे' इत्यमरः । 'मुखं निस्सरणे वक्त्रे प्रारम्भोपाययोरपि' इति मेदिनी । 'महच्छब्दस्य परनिपातः प्राकृते नियमाभावात्' इतिलोचनम् । वसन्तारम्भो नितरां कामोद्दीपक इत्याशयः । नवोढललनाया मदिरमोदि वक्त्रं बलात् कान्तेनापि गृह्यत इति प्रत्यायनात् समासोक्तिरलङ्कारः ।

इह नवोढावस्थां सूचयन्मुखविशेषणोपस्थापकम् 'असमर्पितम्' इति पदं कामकर्तृकस्य बलान्मुखग्रहणात्मकहठकामुकव्यवहारस्य कविप्रौढोक्तिमात्रनिष्पन्नशरीरस्य सूचकम्, तच्च कामातिशयोद्दीपकताया इत्यर्थशक्त्युद्भवस्य कविप्रौढोक्तिमात्रनिष्पन्नाकारस्य ध्वनेः पदप्रकाशता ।

तदाह—

अत्र ह्यसमर्पितमपि कुसुमशरेण मधुमासलक्ष्म्या मुखं गृहीतमित्यसमर्पितमित्येतदवस्थाभिधायिपदमर्थशक्त्या कुसुमशरस्य बलात्कारं प्रकाशयति ।

अवस्था नवोढदशा ।

कविप्रौढोक्तिनिष्पन्नार्थशक्त्युत्थध्वनेर्वाक्यप्रकाशतायां चतुर्थं भेदमुदाहरति—

अत्रैव प्रभेदे वाक्यप्रकाशता यथा—उदाहृतं प्राक्—'सज्जेहि सुरहिमासो' इत्यादि ।

व्याख्यातमेव प्राक् ।

एतदुदाहरणद्वयदानेनैव कविनिबद्धवक्तृप्रौढोक्तिसिद्धशरीरार्थशक्त्युत्थध्वनेरपि पदवाक्यप्रकाशतोदाहरणद्वयमपि दत्तमवगन्तव्यम्, 'प्रौढोक्तिमात्रनिष्पन्नशरीरः

सम्भवीस्वतः' इति पूर्वकारिकायां प्रौढोक्तिमात्रनिष्पन्नत्वेनैवोभयोः सङ्ग्रहात् ।

वस्तुतस्तु कविनिबद्धवक्तृप्रौढोक्तिशरीरार्थशक्त्युद्भवध्वनेः पदप्रकाशतायाम्—

'सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः ।

किन्तु मत्ताङ्गनाऽपाङ्ग–भङ्गलोलं हि जीवितम् ॥' इत्युदाहरणम् ।

अत्र कविनिबद्धविरागिवक्तृप्रौढोक्त्या जीवितशब्देन सर्वेषामर्थकामानां जीवितमात्रोपयोगित्वम्, तदभावे सतामपि तेषामसद्रूपत्वम्, प्राणधारणरूपस्य जीवितस्य प्राणवायुचाञ्चल्याच्चपलतमत्वम्, तेनानास्थाऽऽस्पदत्वम्, ततः को दोषो विषयाणां सर्वथा जीवितस्यैवापराधोऽत्रेति, अथवा तदपि नितरां चञ्चलमिति तस्यापि कोऽपराधः, दृढं वैराग्यमेवास्थापदमित्येतावत् सूच्यत इति पदप्रकाशता ध्वनेः ।

वाक्यप्रकाशतायां तु 'शिखरिणि क नु नाम' इत्यादि पूर्वोक्तमेवोदाहरणम् ।

पूर्वोक्तमुपपादयति—

अत्र सज्जयति सुरभिमासो न तावदर्पयत्यनङ्गाय शरानित्ययं वाक्यार्थः कविप्रौढोक्तिमात्रनिष्पन्नशरीरो मन्मथोन्मादकताऽपादनावस्थानं वसन्तसमयस्य सूचयति ।

मन्मथोन्मादकताऽऽपादनावस्थानं कामोद्दीपकताऽऽपत्तिदशा । इह कविप्रौढोक्तिनिष्पन्नाकारवसन्तकर्तृककामशरसज्जनतदर्पणाभावाद्यर्थः कामोद्दीपकताऽतिशयं व्यनक्तीत्यनेकपदापेक्षत्वाद् ध्वनेर्वाक्यप्रकाशता ।

अथ स्वतस्सम्भव्यर्थशक्त्युद्भवध्वनेः पदप्रकाशतायां पञ्चमं भेदमुदाहरति—

स्वतस्सम्भविशरीरार्थशक्त्युद्भवे प्रभेदे पदप्रकाशता यथा—

त्वद्गृहे हस्तिदन्ता व्याघ्रकृत्तयश्च विक्रेयाः सन्ति ? इति तद्वाणिजकेन पृष्टो व्याधवृद्ध उत्तरं ददाति—

'वाणिअअ ! हत्तिदन्ता कुत्तो अह्माण वाघकित्ती अ ।

जाव लुलिआलअमुही घरम्मि परिसक्कए सुह्णा ॥'

'वाणिजक ! हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च ।

यावल्लुलितालकमुखी गृहे परिष्वक्कते स्नुषा ॥' इतिच्छाया ।

हे वाणिजक ! वणिज्याशील ! अस्माकं हस्तिनां दन्ताः, व्याघ्राणां कृत्तयश्चर्माणि च तावत् कुतः स्युः, यावत् लुलिता उल्लुठिता अलकाश्चूर्णकुन्तला मुखे यस्यास्तादृशी स्नुषा पुत्रस्य वधूः, गृहे परिष्वक्कते सविभ्रमं परिभ्रमतीत्यर्थः ।

तथा च 'अजिनं चर्मकृत्तिश्च' इत्यमरः। भौवादिको गत्यर्थकः ष्वक्कधातुः। उत्तरालङ्कार इति रुय्यकः।

अलकालङ्कृतमुखत्वेन मनोहरतमायाः स्नुषाया विभ्रमावेक्षण—सुरतविलासाक्षिप्त-चेताः सन्ततदुपभोगक्षामो मृगयाऽर्थं मत्सुतः क्षणमपि बहिर्न यातीति कुतो हस्ति-दन्तादीनां मद्गृहे सम्भव इत्ययमर्थं स्वतस्सम्भविना तादृशस्नुषासत्त्वादिरूपार्थेन व्यज्यमानं 'लुलितालकमुखी' इत्येतत्पदं प्रकाशयतीति ध्वनेः पदप्रकाशता।

तदाह—

अत्र 'लुलितालकमुखी' इत्येतत् पदं व्याधवध्वाः स्वतस्सम्भावितशरीरार्थशक्त्या सुरतक्रीडासक्तिं सूचयत् तदीयस्य भर्त्तः सततसम्भोगक्षामतां प्रकाशयति।

स्फुटम्।

अथ षष्ठं भेदमुदाहरति—

तस्यैव वाक्यप्रकाशता यथा—

तस्य स्वतस्सम्भव्यर्थशक्त्युद्भवध्वनेरेव।

'सिहिपिञ्छकण्णऊरा बहुआ वाहस्स गव्विरी भमइ।
मुत्ताफलरइअपसाहणाणँ मज्झे सवत्तीणम्॥'

(गाथा सप्तशती)

अस्यच्छायाप्रदर्शनं विवरणं च पूर्वमेव कृतमिति प्रकृतोक्त्युपपत्तये केवलं व्यङ्ग्यार्थमेव दर्शयति—

अनेन वाक्येन व्याधवध्वाः शिखिपिञ्छकर्णपूराया नवपरिणीतायाः कस्याश्चित् सौभाग्यातिशयः प्रकाश्यते, तत्सम्भोगकाले स एव व्याधः करिवरवधव्यापारसमर्थ आसीदित्यर्थप्रकाशनात्।

अनेन 'सिहिपिञ्छ' इत्यादिना। क्षणमपि त्यागासहिष्णुतया व्यज्यमानो गुणप्रकर्षो नवीनवध्वाः सौभाग्यातिशयमूलके गर्वे हेतुः। सपत्नीनां सम्भोगकाले भर्तुर्हस्तिनामपि हननसामर्थ्यसत्त्वेन तास्वनासक्तिः, तया तासां सौभाग्यापकर्षः, स च गर्वे हेतुस्तदुपपादकः। अन्यथा मौक्तिकभूषितानां पुरः पिच्छभूषणाया गर्वो नोपपद्येत। सर्वमेतत् स्वतस्सम्भव्यर्थबोधकं वाक्यमेव प्रकाशयतीति वाक्यप्रकाशता ध्वनेः।

इत्थमुदाहरणषट्कं प्रदर्श्य ध्वनेः पदप्रकाशताया असम्भवितां शङ्कते—

ननु ध्वनिः काव्यविशेष इत्युक्तम्, तत् कथं तस्य पदप्रकाशता ? ।

उपपादयति—

काव्यविशेषो हि विशिष्टार्थप्रतिपत्तिहेतुः शब्दसन्दर्भविशेषः, तद्भावश्च पदप्रकाशत्वे नोपपद्यते, पदानां स्मारकत्वेनावाचकत्वात् ।

काव्यविशेषो विलक्षणकाव्यम्, वैलक्षण्यं च शब्दार्थाधिकचमत्कारिव्यङ्ग्यबोधकत्वेन । अर्थे वैशिष्ट्यम्-व्यङ्ग्यत्वे सति तादृशचमत्कारभूमित्वमेव । प्रतिपत्तिर्बोधः । शब्दसन्दर्भविशेषस्तादृशवाक्यम् । तद्भावः काव्यविशेषत्वम् । वाक्यशक्तिवादिनां वेदान्तिनां प्राभाकरमीमांसकानां वा मते पदानां स्मारकत्वमिहास्थितमवसेयम् ।

अयं भावः—ध्वनेः पदप्रकाशता तदा सम्भवति, यदि ध्वनेर्वाचकं पदं भवेत्, तन्नास्ति, यतः शब्दार्थातिशायिव्यङ्ग्यबोधकं काव्यमेव ध्वनिः, काव्यं पुनः सहृदयहृदयाह्लादजनकज्ञानजनकं वाक्यमेव, तद्वाचकता पदे कथं स्यात्, शक्तिग्राहकशिरोमणेर्व्यवहाराद् वाक्यस्यैव वाचकत्वेन पदानां तदभावात्, वाक्यावयवेषु पदेषु पदावयवेषु वर्णेष्विव स्मारकत्वमात्रस्य व्यवस्थापनात् । अथवा नहि शब्दाच्छब्दान्तरस्य बोधः प्रसिद्ध इति शब्दस्वरूपयोः पद-ध्वनिकाव्ययोः कथं मिथः प्रकाश्यप्रकाशकभावः सम्भवतीत्याक्षेपः । 'समुदाय एव ध्वनिरित्यत्र पक्षे चोद्यमेतत्' इति लोचनम् । तथा च यदि पदप्रकाशत्वम्, न तर्हि ध्वनिकाव्यत्वम्, तत्त्वे वा कथं पदप्रकाशत्वम्, उभयोर्वैयधिकरण्यात् ।

समादधाति—

उच्यते—स्यादेष दोषः, यदि वाचकत्वं प्रयोजकं ध्वनिव्यवहारे स्यात् । नत्वेवम्, तस्य व्यञ्जकत्वेन व्यवस्थानात् ।

प्रयोजकं साक्षात्परम्परासाधारणं कारणम् । व्यवस्थानं व्यवस्था, नियम इति यावत् । पदानां वाचकत्वाभावेन ध्वनेः पदप्रकाशत्वासम्भवो नैव वक्तुं शक्यते, ध्वनौ वाच्यार्थस्य प्रयोजनाभावादभिधारूपाया वाचकताया अनपेक्षणात् । 'व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः' इति प्रागुक्तेः केवलं व्यञ्जनात्मिकाया व्यञ्जनाया अपेक्षितत्वात् । इत्थं च ध्वनेः पदात् प्रकाशो नाम बोधः, स चाभिधाप्रयोज्यो

यदि न सम्भवति, तर्हि व्यञ्जनाप्रयोज्यः केन वार्यते, तावताऽपि पदप्रकाशत्वं ध्वनेरक्षतमेव।

अथवा ध्वन्यत इति ध्वनिरिति व्युत्पत्त्याऽतिशयचमत्कारी व्यङ्ग्यार्थोऽपि ध्वनिपदार्थः, तस्य शब्दरूपत्वाभावात् तत्प्रकाशकत्वं प्राग्वद्व्यञ्जकत्वरूपं पदानां सम्भवत्येवेति न काऽपि क्षतिरित्याकूतम्।

नन्वेकस्मात् पदाद् व्यङ्ग्यप्रतीतेरप्यदर्शनात् कथं पुनर्ध्वनेः पदप्रकाशतेत्याशङ्कां निरस्यति—

किं च काव्यानां शरीरिणामिव संस्थानविशेषावच्छिन्नसमुदायसाध्याऽपि चारुत्वप्रतीतिरन्वयव्यतिरेकाभ्यां भागेषु कल्प्यत इति पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहारो न विरोधी।

संस्थानविशेषास्तत्तदवयवाः, तैरवच्छिन्नो विशिष्टो घटित इति यावत्, यः समुदायोऽवयवी। भागेष्ववयवेषु। काव्यानां शरीरितुल्यता रसादिविशिष्टानामेव, केवलशब्दार्थमात्राणां शरीरमात्रत्वात्।

अयमाशयः—नह्यवयवमन्तरेणावयविना कथमपि किञ्चिच्चारुत्वमाधातुं शक्यमित्यन्यथाऽनुपपत्त्या यथाऽवयविनीवावयवेष्वपि चारुत्वप्रयोजकता कल्प्यते, तथैवाकाङ्क्षाऽऽदिविशिष्टपदसमुदायरूपवाक्ये विद्यमाना चमत्कारिव्यङ्ग्यप्रतीतिप्रयोजकता पदेष्वप्यन्वयव्यतिरेकाभ्यां कल्पनीयैव, पदानां व्यञ्जकत्वाभावे तद्घटितवाक्यानामपि व्यञ्जकत्वासम्भवात्। इत्थं च यत्र वाक्यस्य व्यञ्जकत्वम्, तत्र तद्घटकपदानामपि व्यञ्जकत्वम्। दृश्यते च क्वचिद् वाक्यघटकादेकस्मादपि पदाद्व्यङ्ग्यप्रतीतिः। अतोऽनुपदं वक्ष्यति—'विच्छित्तिशोभिनैकेन' इत्यादि। तथा च पदानामपि व्यञ्जकत्वे सुस्थिते ध्वनिप्रकाशकता तेषामुचितैवेति दिक्।

तदेव पुनरपरथा व्यवस्थापयति—

'अनिष्टस्य श्रुतिर्यद्वदापादयति दुष्टताम्।
श्रुतिदुष्टादिषु व्यक्तं तद्वदिष्टस्मृतिर्गुणम्॥
पदानां स्मारकत्वेऽपि पदमात्रावभासिनः।
तेन ध्वनेः प्रभेदेषु सर्वेष्वेवास्ति रम्यता॥
विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी।

पद्द्योत्येन सुकवेर्ध्वनिना भाति भारती ॥'

इति परिकरश्लोकाः ।

श्रुतिदुष्टेति भावप्रधानो निर्देशः पदविशेषणं वा । स्मारकत्वेऽपीत्यपिशब्दः काकाक्षिगोलकन्यायेन पदमात्रावभासिनोऽपीत्यत्राप्यन्वेति ।

श्रुतिदुष्टत्वादिषु दोषेषु यद्वद् यथाऽनिष्टस्य श्रुत्युद्वेगजनकस्य शब्दस्य श्रुतिःश्रवणं दुष्टतामापादयति करोति, तद्वत् तथा इष्टस्य व्यङ्ग्यार्थस्य स्मृतिः स्मरणमपि गुणं चारुतोत्कर्षमापादयत्येव ।

तेन हेतुना पदानां स्मारकत्वेऽवाचकत्वेन द्योतकत्वे सत्यपि, पदमात्रादवभासते वैयञ्जनिकप्रतीतिविषयो भवतीति तादृशस्य ध्वनेरपि सर्वेष्वपि प्रभेदेषु रम्यता रमणीयाऽस्त्येव ।

विच्छित्तिशोभिना चमत्कारकेण, एकेनापि भूषणेन कामिनीव, पद्द्योत्येन पदव्यङ्ग्येन ध्वनिना विलक्षणप्रतीतिविषयेण तदर्थेन, सुकवेर्भारती वाणी कवितेति यावत्, भातीत्यर्थः ।

यथा वाचकेष्वपि पदेषु तदंशेषु वर्णेषु वा, श्रुत्युद्वेगजनकतया दुष्टत्वं स्वीक्रियते, रमणीयार्थस्मारकतया तेषु चारुताऽपि स्वीकर्तव्यैवेति रमणीयव्यङ्ग्यार्थप्रकाशकत्वं पदानाम्, पदव्यङ्ग्यत्वं च तादृशार्थरूपध्वनेरायातमेव तुल्यन्यायात् । किञ्च कामिन्येकमात्रावयवस्थितभूषणनिदर्शनमपि पदप्रकाशतां रम्यतां च द्रढयति—ध्वनेरिति ; नात्र पर्यनुयोगावसर इति सारम् ।

एवं व्यञ्जकमुखेन संलक्ष्यक्रमध्वनिं निरूप्यासंलक्ष्यक्रमध्वनिमपि तथा निरूपयति—

'यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये सङ्घटनायां च स प्रबन्धेऽपि दीप्यते ॥ ५८ ॥

तुशब्दः संलक्ष्यक्रमव्यङ्ग्यापेक्षयाऽस्य वैलक्षण्यं सूचयति ।

यःपुनरलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, स वर्णे नित्यस्फोटात्मन्यक्षरे, पदे प्रयोगार्हानन्वितैकार्थबोधके सुप्तिङन्तलक्षणे, आदिशब्देनानर्थके पदावयवे, वाक्ये योग्यताऽऽकाङ्क्षाऽऽसत्तिभृति पदसमूहे, सङ्घटनायां पदवाक्यसन्निवेशात्मकरीतौ, प्रबन्धे योग्यताऽऽदिमद्वाक्यप्रकरलक्षणे महावाक्ये च दीप्यते प्रकाशत इत्यर्थः ।

यत्त्विह निमित्तार्थिका सप्तमी.ते लोचनम्, तदालोचनीयम्-'निमित्तात् कर्मयोगे' इति वार्त्तिकेन विहितायाः सप्तम्या अप्राप्तेः, तथा हि—'केशेषु चमरीं हन्ति' इत्यादितदुदाहरणेषु सँय्योगसमवायान्यतरसंसर्गेण हननक्रियाकर्मीभूतचमर्यादिविशिष्टफलरूपनिमित्तवाचककेशादिपदेभ्यः सप्तमी भवति । प्रकृते दीपनक्रियाया अकर्मकत्वात् तत्कर्मणा सह रसादिप्रकाशनिमित्तवर्णादीनां तादृशसम्बन्धाभावान्नैव सा सम्भवतीत्यौपश्लेषिकाधार एव सप्तमी युक्ता ।

ननु व्याकरणमहाभाष्यादिषु वर्णानामनर्थकत्वोक्तेः कथं प्रकृते रसादिव्यङ्ग्यबोधकतेत्याक्षेपं निरसितुं वर्णानां रसादिव्यञ्जकत्वव्यवस्थापिके कारिके अवतारयति—

तत्र वर्णानामनर्थकत्वाद् द्योतकत्वं न सम्भवतीत्याशङ्क्येदमुच्यते—

'शषौ सरेफसँय्योगौ ढकारश्चापि भूयसा ।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युतः ॥ ५९ ॥
त एव तु निवेश्यन्ते बीभत्सादौ रसे यदा ।
तदा तं दीपयन्त्येव तेन वर्णा रसच्युतः ॥ ६० ॥

शृङ्गारपदं करुणशान्तयोरुपलक्षणम् । आदिशब्देन रौद्रवीरयोर्ग्रहणम् ।

भूयसा बाहुल्येन रेफसंय्योगेन सहितौ शषौ शकारषकारौ ढकारश्चापि, यतः शृङ्गारे तद्व्यञ्जने विरोधिनः प्रतिबन्धका भवन्ति, तेन हेतुना वर्णा रसांश्च्योतन्त्यासिञ्चन्ति द्योतयन्तीति रसच्युतः, यद्वा रसाच्च्यवन्ते च्युता भवन्ति तं न प्रकाशयन्तीति रसच्युतो भवन्ति ।

ते रेफसँय्युक्तशषादयो वर्णा एव यदा बीभत्सादौ रसे व्यञ्जनीये निवेश्यन्ते निर्बध्यन्ते, तदा यतस्तं रसं दीपयन्त्येव, न तु विरोधिनो भवन्ति, तेन हेतुना वर्णा रसच्युतो मन्यन्त इत्यर्थः ।

'च्युतिर् आसेचने' 'च्युङ् गतौ' इति भौवादिकौ धातू, ततः क्विप् ।

इदमिहाभिधीयते—न हि महाभाष्ये सर्वेषामेव वर्णानामानर्थक्यमुक्तम्, यदप्युक्तम्, तदप्यभिधाशक्तिविरहमूलकमेव, तेन व्यञ्जनाशक्तेस्तेष्वपि सद्भावाद् रसादिव्यञ्जकत्वं सम्भवत्येव । तत्रैव का युक्तिरिति चेत् ?

श्रूयताम्-यदि वर्णानामपि व्यक्तिप्रयोज्यरसादिप्रतीतौ सहकारिता न स्यात्, तर्हि शृङ्गाररसे व्यञ्जनीये, कठोरवर्णसद्भावे तत्प्रतीत्यभावः, बीभत्सादौ पुनः कठोरवर्णसत्त्व एव तत्प्रतीत्युत्कर्षः कथं स्यात्। अतः कोमलवर्णैः सह शृङ्गारादिप्रतीतेः, कठोरवर्णैः सह बीभत्सादिप्रतीतेश्चान्वयव्यतिरेकावेव तत्र तेषां सहकारिकारणतां निर्णयतः। अत एव परुषावृत्तिर्गौडीरीतिर्वा बीभत्सादावनुकूला, शृङ्गारादौ प्रतिकूला, उपनागरिकावृत्तिर्वैदर्भीरीतिर्वा शृङ्गारादावनुकूला, बीभत्सादौ प्रतिकूलेति व्यवस्थीयते।

ननु 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति भरतोक्ते रसप्रतीतौ विभावादिप्रतीतेः प्रतीयमानविभावादीनां वा कारणता प्रसिद्धा, वर्णानामभिनवा पुनरिह सा कथमुच्यते—मैवम्, विभावादिप्रतीतिर्हि रसप्रतीतिं जनयति, तत्र शब्दाधीनतत्प्रतीतिं केचनानुकूलावर्णाः सहकुर्वन्ति, परे प्रतिकूलाश्च ते प्रतिबध्नन्तीत्यानुभविकी केषांचन सहकारिता, परेषां प्रतिबन्धकता च वर्णानां कल्प्यते, न तु कारणतेति निष्पत्तेः।

कारिकाद्वयतात्पर्यं विवृणोति वृत्तिकृत्—

श्लोकद्वयेनान्वयव्यतिरेकाभ्यां वर्णानां द्योतकत्वं दर्शितं भवति।

इह प्रथमश्लोकेन व्यतिरेको द्वितीयश्लोकेन चान्वयः प्रत्याय्यत इति श्लोकाभ्यामिति द्वन्द्वनिर्देशो न कृतः। तदुक्तौ यथासङ्ख्यान्वये प्रथमश्लोकेनान्वयप्रत्यायनाभावादनुपपत्तिः स्यादिति व्युत्क्रमेणाप्यन्वयबोधनार्थं श्लोकद्वयेनेत्युक्तम्।

इत्थं वर्णानां रसद्योतकत्वं व्यवस्थाप्य, पदानामप्युदाहरणमुखेन व्यवस्थापयति—

पदे चालक्ष्यक्रमव्यङ्ग्यस्य द्योतकत्वं यथा—

अत्रापि पदे द्योतकत्वं पूर्ववदेव विभावादिप्रतीतिकृततद्द्योतनसहकारित्वम्। एवं परत्रापि शब्दे ज्ञेयम्। द्योतनसहकारित्वेऽपि वर्णपदादिषु द्योतकत्वमहत्त्वमारोप्यत इति तदुक्तिः।

वत्सराज उदयनो लावाणके प्रेयसीं वासवदत्तां दग्धां सम्भाव्यानुध्यायन् परिदेव्यति—

'उत्कम्पिनी भयपरिस्खलितांशुकान्ता,
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती।

क्रूरेण दारुणतया सहसैव दग्धा,
धूमान्धितेन दहनेन न वीक्षिताऽसि ॥'

अयि प्रेयसि ! उत्कम्पिनी समुद्भूतकम्पा, भयेन परिस्खलितः परिभ्रष्टोंऽशुकान्त उत्तरीयप्रान्तो यस्यास्तादृशी, तथा ते मदनुभवैकगोचरीभूते कथमपि विस्मर्तुमशक्ये अनिर्वचनीयसौन्दर्यविभ्रमशालिनी वा विधुरे रक्षणोपायाभावाद् विकले लोचने कश्चिन्मां रक्षेदित्याशया प्रतिदिशं कान्दिशीकतया क्षिपन्ती सञ्चारयन्ती त्वं क्रूरेण प्रोज्ज्वलितेन दहनेन दाहकारिणा वह्निना दारुणतया निष्करुणत्वेन सहसाऽविचार्य तत्कालमेव दग्धा भस्मीकृताऽसि; न पुनर्धूमान्धितेन धूमोपहतदृष्टिना तदाच्छन्नेन तेन वीक्षिताऽवलोकिताऽसीत्यर्थः ।

तथा च 'अंशुकं शुक्लवस्त्रे स्याद् वस्त्रमात्रोत्तरीययोः' इति रभसः । 'विधुरं विकले त्रिषु' इति मेदिनी च ।

तदवस्थां त्वां दृष्ट्वा वह्निः कथमपि दग्धुं न प्रवर्त्तेतेति तात्पर्यम् ।

अत्र वासवदत्तारूपेष्टनाशजन्यवत्सराजवृत्तिचित्तवृत्तिविशेषात्मकशोकस्थायिभावकस्य रत्युद्दीपनविभावचर- तादृशलोचनविक्षेपाद्युद्दीपनविभावकस्य कम्पाद्यनुभावकस्य तदनुमितभयादिव्यभिचारिकस्य करुणरसस्य 'ते' इति पदं तल्लोचनवृत्त्यनिर्वचनीयगुणगणस्मरणप्रयोजकत्वेन व्यञ्जने सहकारीति स्फुटं रसस्य पदप्रकाशता । अनुभूतार्थकत्वाच्च तच्छब्दस्य न यच्छब्दोपादानापेक्षा ।

तदाह—

अत्र हि 'ते' इत्येतत्पदं रसमयत्वेन स्फुटमेवावभासते सहृदयानाम् ।

पदस्य रसमयत्वं च व्यञ्जकतया रसवत्त्वम् । यद्वा स्वरूपार्थे मयट्, तादात्म्यमौपचारिकम् ।

दाढर्याय पदप्रकाशतामेव रसस्य पुनरुदाहरति—

यथा वा—

वैदेहीविरही रामो विलपति—

'झगिति कनकचित्रे तत्र दृष्टे कुरङ्गे,
रभसविकसितास्ते दृष्टिपाताः प्रियायाः ।
पवनविलुलितानामुत्पलानां पलाश—
प्रकरमिव किरन्तः स्मर्यमाणा दहन्ति ॥'

तत्र तस्मिन् मारीचरक्षोरूपे कनकचित्रे हिरण्यकर्बुरे कुरङ्गे हरिणे दृष्टे सति, झगिति शीघ्रं रभसेन हर्षेण विकसिताः प्रसृताः तेऽनुभूतिमात्रविषयाः प्रियाया जानक्या दृष्टिपाताः कटाक्षविक्षेपाः, पवनेन विलुलितानां तरलितानामुत्पलानां नीलकमलानां पलाशप्रकरं दलसमुदयं किरन्तः परितो विक्षिपन्त इव स्मर्यमाणा विरहदशायामिदानीं स्मृतिविषयतामापद्यमाना दहन्ति, मां तापयन्तीत्यर्थः।

तथा च 'मृगे कुरङ्गवातायुहरिणाजिनयोनयः' इत्यमरः। 'रभसो हर्षवेगयोः' इति विश्वश्च।

इहापि 'ते' इति पदं पूर्ववद् विप्रलम्भशृङ्गारव्यञ्जकम्।

अथ रसादिध्वनेः पदांशप्रकाशतामुदाहरति—

पदावयवेन द्योतनं यथा—

प्रवासी कश्चन सुहृदं वदति, स्वयं वा परामृशति—

'व्रीडायोगान्नतवदनया सन्निधाने गुरूणां,
बद्धोत्कम्पं कुचकलशयोर्मन्युमन्तर्निगृह्य।
तिष्ठेत्युक्तं किमिव न तया यत् समुत्सृज्य बाष्पं,
मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः॥' इत्यत्र त्रिभागशब्दः।

रसप्रकाशक इति शेषः। गुरूणां श्वश्रूप्रभृतीनां सन्निधाने निकटे, व्रीडायोगाद् लज्जोद्गमात्, नतवदनया नम्रीकृतास्यया, तया प्रेयस्या, कुचकलशयोः स्तनकुम्भयोर्बद्धो योजित उत्कटः कम्पो येन, तं मन्युं शोकं दैन्यं क्रोधं वा अन्तर्हृदये निगृह्य निरुध्य, प्रवसन्तं मां प्रति, 'तिष्ठ' 'मा प्रवासं व्राजीः' इति किमिव नोक्तं कथं न कथितम्, 'अपि तूक्तमेव' यद् बाष्पमश्रु समुत्सृज्य सन्त्यज्य, चकिताया मृगयुत्रस्ताया हरिण्या इव हारि तरलताऽऽधिक्येन मनोहरं यन्नेत्रं तस्य त्रिभागः कटाक्षरूपः, मयि-आसक्तो, मामुद्दिश्य निक्षिप्त इत्यर्थः।

तथा च 'मन्युः क्रतौ क्रुधि। दैन्ये शोके च क्रोधे च' इति मेदिनी।

अत्र स्वतन्त्रपदरूपोऽपि समस्तपदावयवत्वात् पदांशरूपस्त्रिभागशब्दः प्रवासहेतुकविप्रलम्भशृङ्गारप्रकाशकः। तदुक्तमाचार्यैः—'त्रिभाग इति गुरुजनमवधीर्यापि सा मां यथा तथाऽपि साभिलाषमन्युदैन्यगर्भमधुरं विलोकितवतीत्येवं स्मरणेन परस्परहेतुकत्वप्राणप्रवासविप्रलम्भोद्दीपनं त्रिभागशब्दसन्निधौ स्फुटं भातीति'। त्रिशब्दात्

पूरणार्थकप्रत्ययोत्पत्तेरौचित्यात्, 'तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः' इत्यादि कालिदासप्रयोगवदुपपत्तिश्चिन्त्या सा चेत्थम्—'सङ्ख्यावाचकानां वृत्तिविषये पूरणार्थत्व-नियमात्' इति नियमेन त्रिभिर्भोगो यस्येति ज्यौतिषरीत्या बहुव्रीहिणा वाऽवगन्तव्या ।

क्रमप्राप्तं वाक्यव्यङ्ग्यरसादिध्वनिमुदाहर्तुं विभजते—

वाक्यरूपश्चालक्ष्यक्रमव्यङ्ग्यो ध्वनिः शुद्धोऽलङ्कारसङ्कीर्णश्चेति द्विधा मतः ।

वाक्यं रूपं यस्येति विग्रहे तु व्यङ्ग्यार्थकध्वनिशब्देन सामानाधिकरण्यं नोपपद्येत, ध्वनेः शब्दरूपत्वे तु वाक्यप्रकाशता प्रकृतोपादानसङ्गतिश्च दुरुपपादा स्यादिति रूपणं रूपं वाक्याद् रूपं रूपसम्पत्तिर्वा यस्य सः, वाक्यरूपो वाक्यव्यङ्ग्य इत्यर्थः । शुद्धोऽर्थालङ्कारानुपस्कृतः, तदुपस्कृतोऽलङ्कारसङ्कीर्ण इति द्विविधः सः । वाक्यरूप इति प्रथमान्तनिर्देशेन पदादिप्रकाशध्वन्यपेक्षयाऽस्य वैलक्षण्यं सूच्यते । तथा हि—पदतदंशादयः स्वयमसम्पूर्णशरीराः सामस्त्येन रसोपयोगिविभावादि-प्रतीतिं जनयितुमनर्हा इति घटोत्पत्तौ व्यस्तानां दण्डादीनामिव रसप्रतीतौ तेषां निमित्ततामात्रम् । वाक्यं पुनः समस्तरूपं सर्वथा समर्थमिति तस्य दण्डादिकूट-स्येव तत्र स्वातन्त्र्यम् ।

तत्र प्रथमं भेदमुदाहरति—

तत्र शुद्धस्योदाहरणं यथा, रामाभ्युदये—'कृतककुपितैः' इत्यादि-श्लोकः ।

रामाभ्युदयं यशोवर्मप्रणीतं नाटकम् । स च कान्यकुब्जेश्वरः ।

'कृतककुपितैर्बाष्पाम्भोभिः सदैन्यविलोकितै-
र्वनमपि गता यस्य प्रीत्या धृताऽपि तथाऽम्बया ।
नवजलधरश्यामाः पश्यन् दिशो भवतीं विना,
कठिनहृदयो जीवत्येव प्रिये ! स तव प्रियः ॥' इति पूर्णः श्लोको

विरहे वैदेहीमुद्दिश्य रामेणोक्तः प्रकृतोपयोगितया व्याख्यायते—

हे प्रिये ! यस्य मे प्रीत्या प्रणयेन, अम्बया कौशल्यया तथाऽनेकविधाग्रहैः धृता निरुद्धाऽपि, कृतककुपितैः कृत्रिमरोषैः, बाष्पाम्भोभिरश्रुसलिलैः दैन्येन विषादेन सह विलोकितैरीक्षणविभ्रमैः, (हेतुभिः) वनमपि गता का कथा गृहस्य । स तव प्रियः (रामः) कठिनहृदयः कठोरमनाः, नवैर्जलधरैः श्यामा नीला दिशः पश्यन्, भवतीं विना जीवत्येव, न तु मृत इत्यर्थः ।

अत्र त्वया यदर्थं सुखसम्पत्तयस्त्यक्ताः, तेन त्वद्विरहे दूयमानेनापि तुच्छं जीवनमपि न त्यक्तमित्यहो तस्य दौरात्म्यमिति रामोक्तेः सकलवाक्यमेव सीताराम-योरनुसरणादिभिः परिपुष्टं परस्परानुरागं प्रकाशयद् विप्रलम्भशृङ्गारं व्यनक्ति।

न चात्र कस्यचनार्थालङ्कारस्य सङ्करः।

तदाह—

एतद्धि वाक्यं परस्परानुरागं परिपोषप्राप्तं प्रदर्शयत् सर्वत एव परं र-सतत्त्वं प्रकाशयति।

सर्वत इति पदाद्यपेक्षयेत्यर्थः। न हि पदादीनामिह व्यञ्जकत्वम्, अपि तु वाक्य-स्यैवेति द्रष्टव्यम्।

द्वितीयमुदाहरति—

अलङ्कारान्तरसङ्कीर्णो यथा—'स्मरनवनदीपूरेणोढाः' इत्यादिश्लोकः।

अलङ्कारान्तरेणालङ्कारभेदेन सङ्कीर्ण इत्यर्थः, 'अन्तरमवकाशावधिपरिधानान्त-र्धिभेदतादर्थ्ये' इति मेदिनीकोशात्। न त्वन्येनालङ्कारेण, प्रकृतेऽलङ्कारद्वयानुप-निपातात्।

'स्मरनवनदीपूरेणोढाः पुनर्गुरुसेतुभि-
र्यदपि विधृता दुःखं तिष्ठन्त्यपूर्णमनोरथाः।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः॥' इति पूर्णः श्लोकः

पूर्ववद् व्याख्यायते—

स्मर एव वेगप्रकर्षाद् नवो नदीपूरः प्रावृषेण्यः सरित्प्रवाहस्तेन ऊढास्तृणकाष्ठा-दिवदज्ञानपूर्वमेव परस्परसाम्मुख्यं प्रापिताः, पुनर्गुरवः श्वश्रूप्रभृतय एव स्वैरप्रस-रवारकतया सेतवस्तैर्विधृता निरुद्धा अत एवापूर्णमनोरथाः प्रियाश्च प्रियाश्चेत्येकशेषे प्रियाः—प्रेयांसः प्रेयस्यश्च, यदपि दुःखं वियोगकदनानुभवेन तिष्ठन्ति, पृथगिति शेषः। तथाऽपि परस्परम् उन्मुखा इत्यौन्मुख्येनैव मिथस्तादात्म्योल्लासाद् देहे निस्स्पन्दे, लिखितप्रख्यैरालेख्यसदृशैरङ्गैरुपलक्षिताः, नयनान्येव नलिन्या नालानि वृन्तानि तैरानीतं प्रापितं रसं मिथोऽभिलाषात्मकविप्रलम्भशृङ्गारं पिबन्त्यास्वादयन्तीत्यर्थः।

सङ्गमाभावेऽपि मिथ आकस्मिकदृष्टिमिश्रणविनोदेनैव सुखं समयमतिवाहयन्तीति भावः।

इह स्मरे नवनदीपूरत्वस्य, गुरुषु सेतुत्वस्य, नयनेषु नलिनीनालत्वस्य चारोपाद् रूपकेण रसोपकारितयाऽलङ्कारेणोपस्कृतो विप्रलम्भः पारस्परिकदर्शनात् सम्भोगो वा शृङ्गाररसः सूच्यते वाक्येन ।

तदाह—

अत्र हि रूपकेण यथोक्तव्यञ्जकलक्षणानुगतेन प्रसाधितो रसः सुतरामभिव्यज्यते ।

यथोक्तव्यञ्जकलक्षणानुगतेन 'विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन' इत्यादिद्वितीयोद्द्योतोक्तालङ्कारलक्षणमनुसृतेन । तेनात्र रूपकेणारम्भं विधाय नायकयुगुले नलिनीनालद्वारा रसपानकारितया चक्रवाकमिथुनत्वानारोपणाद् रूपकेणैव निर्वाहं न कृतवानिति न्यूनत्वाक्षेपो निरस्तः, तत्रैव 'नातिनिर्वहणैषिता' इत्युक्तेः । प्रसाधितो विभावाद्यलङ्करणद्वारोपस्कृतः ।

संघटनाव्यङ्ग्यं रसादिध्वनिमुदाहर्तुमुक्तं स्मारयन् संघटनास्वरूपोपस्थापनगर्भविभागबोधककारिकामवतारयति—

अलक्ष्यक्रमव्यङ्ग्यः संघटनायां भासते ध्वनिरित्युक्तम्, तत्र संघटनास्वरूपमेव तावन्निरूप्यते—

संघटना वामनोक्ता रीतिः । उक्तं 'वाक्ये संघटनायां च' इत्यादिना पूर्वकारिकायाम् । निरूप्यते गुणपृथक्कारेण विचार्य्यते ।

'असमासा समासेन मध्यमेन च भूषिता ।
तथा दीर्घसमासेति त्रिधा संघटनोदिता ॥ ६१ ॥'

अविद्यमानः समासो यस्यां सा वैदर्भीरूपैका, मध्यमेनादीर्घेण समासेन भूषिता च पाञ्चालीरूपा द्वितीया, तथा दीर्घः समासो यस्यां सा गौडीरूपा तृतीयेति त्रिधा त्रिप्रकारा संघटना रीतिः क्रमेणोपनागरिका कोमला परुषा च वृत्तिर्वा उदिता, कथितेत्यर्थः ।

तदुक्तम्—'अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥'
'आश्लिष्टश्लथभावां तु पुराणच्छायायाऽन्विताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥'

'समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।
गौडीयामपि गायन्ति रीतिं रीतिविचक्षणाः ॥' इति वामनेन ।
'माधुर्य्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ॥'
'ओजःप्रकाशकैस्तैस्तु परुषा'—'कोमला परैः ॥'
इति मम्मटेन च ।

संघटना-गुणविवेकमुपक्रममाणः कारिकामवतारयति—

कैश्चित् तां केवलमनूद्येदमुच्यते—

'गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा ।
रसांस्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः ॥ ६२ ॥'

माधुर्यादीन् माधुर्यौजःप्रसादान् गुणान् आश्रित्यावलम्ब्य तिष्ठन्ती सा संघटना रसान् व्यनक्ति, तन्नियमे तस्याः संघटनाया नियन्त्रणे, वक्तुर्वाच्यस्य च, औचित्यं हेतुरित्यर्थः ।

गुणाश्रिताया रसव्यञ्जिकायाः संघटनाया वक्त्रौचित्यानुसारेण वाच्यौचित्यानुसारेण च व्यवस्थेति सारम् ।

संघटनाया गुणाश्रयत्वं वक्ष्यमाणविकल्पदिशाऽवसेयम् । तृतीयचरणे 'रसः' इत्यपपाठः, रसस्य संघटनानियामकत्वाभावात्, व्यञ्जनकर्मानुक्तिप्रसक्तेश्च ।

कारिकापूर्वार्धं विवृणोति—

संघटना रसादीन् व्यनक्ति, गुणानाश्रित्य तिष्ठन्तीति ।

गुणाश्रया हि संघटना रसव्यञ्जिकेत्यर्थः ।

अथ संघटनाया गुणतादात्म्यम्, उत गुणवृत्तित्वम्, गुणानां संघटनावृत्तित्वं वेति सम्भावयितुं शक्यं पक्षत्रयं परीक्षितुमुपक्षिपन् निर्दिशति—

अत्र च विकल्प्यम्—गुणानां संघटनायाश्चैक्यम्, व्यतिरेको वा ? व्यतिरेकेऽपि द्वयी गतिर्बोद्धव्या—गुणाश्रया संघटना ? संघटनाश्रया वा गुणा इति ।

विकल्प्यं विभज्य विवेचनीयम् । व्यतिरेको भेदः ।

तत्र प्रथमतृतीयपक्षयोः कारिकांऽशं व्याख्याति—

तत्रैक्यपक्षे, सङ्घटनाश्रयगुणपक्षे च—गुणानात्मभूतानाधेयभूतान वाऽऽश्रित्य तिष्ठन्ती संघटना रसादीन् व्यनक्तीत्ययमर्थः ।

धर्मधर्मिणोस्तादात्म्यमङ्गीकुर्वतां मते गुणानां संघटनायाश्च यदैक्यं, तदा संघटनाऽऽत्मका एव गुणा इत्युक्तम्—आत्मभूतानिति। संघटनायामेव गुणान् मन्वानानामुद्भटादीनां नये तु संघटनाऽधिकरणम्, धर्मित्वात्, गुणास्त्वाधेया धर्मत्वादित्युक्तम्—आधेयभूतानिति। आश्रयणं च पूर्वत्र घटे नष्टे घटाकाशो महाकाशमाश्रयदित्यादिव्यवहारात् तादात्म्यसद्भावेऽपि काल्पनिकभेदेन, उत्तरत्र तु वृक्षो भूमिमाश्रयतीत्यादिव्यवहारादाधाराधेयभावेनैव। द्वितीयपक्षे तदर्थमाह—

यदा तु नानात्वपक्षो गुणाश्रयसंघटनापक्षश्च, तदा गुणानाश्रित्य तिष्ठन्तीति गुणपरतन्त्रस्वभावा, न तु गुणरूपैवेत्यर्थः।

नानात्वं भेदः। गुणाश्रया संघटना इत्युपाध्यायाश्रिताश्छात्रा इत्यादिदर्शनादाश्रयणमायत्तत्वमात्रेण, नत्वाधाराधेयभावेन, गुणेषु संघटनास्थितेरप्रसिद्धेः।

पक्षत्रयप्रदर्शनप्रयोजनं दर्शयति—

किं पुनरेवं विकल्पनस्य प्रयोजनम्? इत्यभिधीयते, यदि गुणाः संघटना चेत्येकं तत्त्वम्, सङ्घटनाश्रया वा गुणाः, तदा संघटनाया इव गुणानामप्यनियतविषयत्वप्रसङ्गः।

किं प्रयोजनमिति जिज्ञासायामभिधीयत इत्यभिसम्बन्धः। एकं तत्त्वमभिन्नं वस्तु।

अयं भावः—अस्मिन् रसे व्यङ्ग्ये इयमेव संघटना भवेदिति संघटनाया यथा विषयनियमो नास्ति, तथैव संघटनारूपत्वे संघटनानिष्ठत्वे च गुणानामपि विषयनियमो न स्यादित्यापत्तिः। एकत्र तादात्म्यम्, अपरत्राधेयानामाधारानुसारेणैव व्यवस्था तत्र निमित्तम्।

ननु केयमापत्तिः? नैव गुणानामपि नियतविषयत्वमित्यत आह—

गुणानां हि माधुर्यप्रसादप्रकर्षः करुणविप्रलम्भशृङ्गारविषय एव। रौद्राद्भुतादिविषयमोजः। माधुर्यप्रसादौ रसभाव-तदाभासविषयावेवेति विषयनियमो व्यवस्थितः।

गुणानां हि विषयनियमो व्यवस्थित इति सम्बन्धः। 'शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।' 'माधुर्यम्' इति प्रागुक्ते माधुर्यगुणस्य प्रसादप्रकर्षः स्फीतिमाधिक्यम्, यद्वा माधुर्यप्रसादयोः प्रकर्षः, करुण-विप्रलम्भशृङ्गारौ विषयौ यस्य तादृशः।

'रौद्रादयो रसाः' इत्याद्युक्तेरोजसः पुनर्गुणस्य रौद्राद्भुतवीरबीभत्सा विषयाः। सम्मिलितयोर्माधुर्यप्रसादयोस्तु रसो भावस्तदाभासौ च विषया इति विषयनियमः साम्प्रतं सङ्घटनातादात्म्याद्यङ्गीकारे भज्येत। प्रसादस्य सकलरसभावादिविषयता तु रूढैव। माधुर्यस्य पुनः कथं तथोपादानमिति न ज्ञायते, तस्याधुनैव करुणादिमात्रविषयत्वस्य कथनात्। यद्वा स्वतन्त्रयोर्माधुर्यप्रसादयो रसाः पृथक् पृथग् विषयाः, सम्मिलितयोस्तु सकला रसादय इति व्यवस्था कल्प्यताम्।

नन्वेवं संघटनाया अपि विषयनियमो वक्तुं शक्यते, तथा हि—शृङ्गारादौ व्यङ्ग्येऽसमासा, रौद्रादौ दीर्घसमासा, रसादिसामान्ये मध्यमसमासा चेति को दोष इत्यत आह—

सङ्घटनायास्तु स विघटते।

तुशब्दो गुणव्यवच्छेदकः। स नियमो विषयस्य। विघटतेऽनियतो भवतीत्यर्थः। बहुत्र व्यभिचारदर्शनादिह तथा नियमो दुरुदाहर इति भावः।

तामेवाव्यवस्थामुपपादयति—

तथा हि—शृङ्गारेऽपि दीर्घसमासा दृश्यन्ते, रौद्रादिष्वसमासाश्चेति।

व्यभिचारलक्ष्यबाहुल्यबोधनाय बहुवचनम्।

व्यभिचारमुदाहरणेन दर्शयति—

तत्र शृङ्गारे दीर्घसमासा यथा—'मन्दारकुसुमरेणुपिञ्जरितालका' इति।

मन्दारस्य देवद्रुमविशेषस्य कुसुमानां रेणुभिः परागैः पिञ्जरिताः पिशङ्गिता अलका यस्याः सेत्यर्थः। इह शृङ्गाररसेऽपि समासदीर्घतेति कल्पितसङ्घटनानियमो व्यभिचरति। 'नात्र शृङ्गारः कश्चिदित्याशङ्क्य द्वितीयमुदाहरणमाहेति'—परकीयमवतरणकल्पनं चिन्त्यम्, इयतोऽपि शृङ्गारालम्बनोपस्थापकतया सर्वथा तदभावस्य वक्तुमशक्यत्वात्। किन्तु—शृङ्गारव्यञ्जकसन्दर्भैकदेशोऽयमालम्बनमात्रवर्णनलक्षण इति शृङ्गारोऽत्र स्फुटो न प्रतीयत इति स्फुटशृङ्गारव्यञ्जकमुदाहरणान्तरं दर्शयति—

यथा वा—

'अनवरतनयनजललवनिपतन-परिमुषितपत्रलेखान्तम्।
करतलनिषण्णमबले! वदनमिदं कं न तापयति॥' इत्यादौ।

मानिनीमनुनयत उक्तिरियम्। अयि! अबले! अनवरतं सततं नयनजलस्या-

श्रुणो लवानां बिन्दूनां निपतनेन परिमुषितो मार्जनाच्चोरितः पत्त्रलेखान्तः कपोललिखितमकराकारो यत्र तादृशं, पुनः करतले वामकरमध्ये निषण्णं स्थितम्, इदं त्वदीयं वदनं पश्यन्तं कं जनं न परितापयतीत्यर्थः ।

अत्रेर्ष्याविप्रलम्भशृङ्गारे व्यङ्ग्येऽपि दीर्घसमासा सङ्घटना दृश्यत इति व्यभिचारः स्फुटः ।

पुनरन्यं व्यभिचारं दर्शयति—

तथा रौद्रादिष्वप्यसमासा दृश्यन्ते ।

सङ्घटनेति शेषः । उचिता तु दीर्घसमासैव ।

व्यभिचारस्थलं दर्शयति—

यथा—'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः' इत्यादौ ।

प्रागोजोगुणोदाहरणतया व्याख्यातोऽयं श्लोकः । अत्र रौद्ररसेऽपि व्यङ्ग्ये समासदैर्घ्याभावाद् व्यभिचारः ।

उपसंहरति—

तस्मान्न गुणाः सङ्घटनास्वरूपा न च सङ्घटनाश्रयाः ।

तस्माद् गुणानामप्यनियतविषयत्वापत्तिहेतोः । इत्थं च प्रथमतृतीयपक्षौ निरस्तौ बोध्यौ ।

पुनश्शङ्कते—

ननु यदि सङ्घटना गुणानां नाश्रयः, तर्हि किमालम्बना एते परिकल्प्यन्ते ।

आलम्बनमाधारः । निराधाराणामाधेयानां कल्पनाऽसम्भवाद् गुणानामाधारत्वेन सङ्घटनाया अस्वीकारात् कस्तेषामाधारत्वेन कल्प्यते, शब्दार्थाश्रयत्वे त्वलङ्कारभेदः स्यादिति प्रष्टुरभिप्रायः ।

उत्तरयति—

उच्यते—प्रतिपादितमेवैषामालम्बनम् ।

प्रतिपादितमेव कारिकायां द्वितीयोद्द्योते । एषां गुणानाम् । आलम्बनं रसरूपम् ।

तामेव कारिकामनुवदति—

'तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥' इति ।

कारिकेयं पूर्वं विवृतैव । रस एवाधिकरणं गुणानामित्यनया प्रतिपादितम् ।

तस्माद् द्वितीयपक्ष एव सहृदयहृदयङ्गम इति बोध्यम् ।

गुणानां सङ्घटनाश्रयत्वेऽनियतविषयता दुरुद्धरैवेति सङ्घटनामनुपादाय शब्दाश्रयान् गुणान् मन्वान औपचारिकत्वेनानभिमतमप्यविवेकिजनानुरोधेन तृतीयपक्षमंशतोऽभ्युपगच्छति—

अथवा भवन्तु शब्दाश्रया एव गुणाः ।

शब्दानामाश्रयता च व्यञ्जकतासम्बन्धेनेत्यनुपदं स्फुटीभविष्यति ।

तत्रापत्तिमाशङ्क्य निराकरोति—

न चैषामनुप्रासादितुल्यत्वं शङ्कनीयम्, यस्मादनुप्रासादयोऽनपेक्षितार्थविस्ताराः शब्दधर्मा एव । शब्दधर्मत्वं चैषामन्याश्रयत्वेऽपि शरीराश्रयत्वमिव शौर्यादीनाम् ।

एषां गुणानां शब्दवृत्तित्वादनुप्रासादिभिः शब्दालङ्कारैस्तुल्यत्वं च न शङ्कनीयम्, यस्माद्धेतोः, अनुप्रासादयः–अनपेक्षितोऽर्थविस्तारो येषु यैर्वा तादृशाः केवलं शब्दधर्माः । यथा शौर्यादीनां गुणानामन्याश्रयत्वेऽप्यात्मधर्मत्वेऽपि, शरीराश्रयत्वं, तथैव माधुर्यादीनां गुणानां रसाश्रयत्वेऽपि शब्दधर्मत्वमौपचारिकं वेद्यमित्यर्थः ।

अयं भावः—अनुप्रासादिष्वर्थापेक्षा नास्ति, माधुर्यादिषु तु सा परिहर्तुमशक्यैव, तेन शब्दाश्रयत्वमात्रेण साम्यमवलोक्य तादात्म्यं न कल्पनीयम् । किञ्च न हि गुणानां वास्तविकी शब्दधर्मता किन्त्वौपचारिक्येव, तथा हि–यथाऽविवेकिनः शरीरात्मनोः पार्थक्यमवधारयितुमसमर्था आत्मवृत्तीनपि शौर्यादीन् 'शरीरमस्य शूरम्' इत्यादिव्यवहारतः शरीरवृत्तीन् मन्यन्ते, तथैव रसवृत्तीनपि माधुर्यादींस्तत्तद्रसव्यञ्जकवाच्योपस्थापनसामर्थ्यमेव शब्देषु गुणान् मत्वा शब्दधर्मत्वेन मन्यन्त इत्यविवेक एवोपचारस्य मूलम् । अविवेकमूलकतयैव चास्याभ्युपगमपक्षस्यानुपादेयता सूच्यते ।

गुणानां सङ्घटनाऽऽश्रयत्वमुपेक्ष्य शब्दाश्रयत्वं व्याहृतवन्तं प्रति वादी शङ्कते—

ननु यदि शब्दाश्रया गुणाः, तत् सङ्घटनारूपत्वं तदाश्रयत्वं वा तेषां प्राप्तमेव ।

तदिति तदाऽर्थकमव्ययम् । सङ्घटनारूपत्वं च पूर्ववद्धर्मधर्मिणोरभेदेन । तदाश्रयत्वं सङ्घटनाऽऽश्रयत्वम् । प्राप्तमेव भवद्भिरनुक्तमप्यर्थत आपतितमेव ।

स एवोपपादयति—

नह्यसङ्घटिताः शब्दा अर्थविशेषं प्रतिपाद्य रसाद्याश्रितानां गुणानामवाचकत्वादाश्रया भवन्ति।

असङ्घटिताः सङ्घटनारहिता अप्राप्तवाक्यभावा इति यावत्, शब्दा अर्थविशेषं रसव्यञ्जकमर्थं प्रतिपाद्य रसाद्याश्रितानां रसादिवृत्तीनां गुणानामाश्रया न भवन्ति, अवाचकत्वादित्यर्थः।

इदमुक्तं भवति–सङ्घटना नाम शब्दानां वाक्यत्वसम्पादकः परस्परसम्बन्धः, तदभावे विशृङ्खलशब्दानां वाच्यार्थाबोधकत्वाद् रसव्यञ्जकत्वेन गुणव्यञ्जकत्वरूपगुणाश्रयत्वस्याप्यभावस्तेषां सुतरामेवेति गुणानां शब्दवृत्तित्वमभ्युपगच्छता भवताऽकामेनापि सङ्घटनाधर्मत्वमभ्युपगतमेव, तत् कोऽयमाडम्बरः, यत् सङ्घटनाशब्दो निह्नूयते।

निरस्यति—

नैवम्—वर्णपदव्यङ्ग्यत्वस्य रसादीनां प्रतिपादितत्वात्।

प्रतिपादितत्वात् पूर्वमिति शेषः। न हि रसादीनां वाक्यव्यङ्ग्यत्वमेवेति नियमः, यत् सङ्घटनयाऽपि तत्रायातव्यम। निरपेक्षाणामपि पदानां वर्णानां च स्वसौष्ठवबलेन रसव्यञ्जकत्वदर्शनाद् रसानां 'यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु' इति कारिकाकृता वर्णव्यङ्ग्यत्वस्य पदव्यङ्ग्यत्वस्य च कथितत्वात्। इत्थं च यदा सङ्घटनाशून्यानां वर्णानां पदानां वा गुणाधिकरणरसव्यञ्जकत्वम्, तदा सर्वथा सङ्घटनासम्पर्कविरहात् कथं पुनस्तस्या गुणव्यञ्जकत्वेन तदधिकरणत्वमित्युत्तरयितुराशयः।

ननु रसानां वाक्यव्यङ्ग्यतायान्तु सङ्घटितपदसमुदायात्मकवाक्यानुषङ्गित्वेन तया विना वाक्यस्वरूपसौष्ठवविरहेण च, सङ्घटनाया अपि रसव्यञ्जकत्वमायातमेवेत्याक्षेपिपक्षमभ्युपगच्छन् क्षिपति—

अभ्युपगते वा वाक्यव्यङ्ग्यत्वे रसादीनां, न नियता काचित् सङ्घटना तेषामाश्रयत्वं प्रतिपद्यत इत्यनियतसङ्घटनाः शब्दा एव गुणानां व्यङ्ग्यविशेषानुगता आश्रयाः।

अप्यर्थको वाशब्दः। तेषां गुणानाम्। व्यङ्ग्यविशेषानुगता रसव्यञ्जकाः।

रसादीनां व्यञ्जकानि वाक्यानीति स्वीकारेऽपि सङ्घटनाया नैव गुणाश्रयत्वं

साधयितुं शक्यम्, तस्या रसेषु प्रागुक्तदिशा नियमाभावात्। तथा हि—शृङ्गारेऽपि दीर्घसमासा, ओजस्यसमासा सा दृश्यत इति रसव्यञ्जन एव चेद् व्यभिचारः, तर्हि दूरे गुणव्यञ्जनप्रत्याशेति रसव्यञ्जननियताः शब्दा एव गुणाश्रया उच्यन्ते, न तु सङ्घटनेत्यभिप्रायः ।

सङ्घटनाऽऽश्रयगुणवादी पुनराक्षिपति—

ननु माधुर्ये यदि नामैवमुच्यते, तदुच्यताम्, ओजसः पुनः कथमनियतसङ्घटनशब्दाश्रयत्वम्। नह्यसमासा सङ्घटना कदाचिदोजस आश्रयतां प्रतिपद्यते।

माधुर्यगुणे व्यञ्जनीये सर्वत्रासमासा क्वचिद् 'अनवरत–' इत्यादौ दीर्घसमासा च सङ्घटना दृश्यत इति तद्व्यञ्जकसङ्घटनाया अनियतत्वं वक्तुमुचितम्, न तु सामान्येन सङ्घटनायाः, ओजोव्यञ्जने दीर्घसमासेतरसङ्घटनायाः कुत्रचिदप्यनुपलम्भादोजोव्यञ्जकसङ्घटनाया नियतत्वादित्याशयः ।

'वाक्यव्यङ्ग्यध्वन्यभिप्रायेणेदं मन्तव्यम्' इति चन्द्रिका । 'वर्णपदव्यङ्ग्येऽप्योजसि रौद्रादिस्वभावे वर्णपदानामेकाकिनां स्वसौन्दर्यमपि न तादृगुन्मीलति तावद्, यावत् तानि समाससङ्घटनाऽङ्कितानि न कृतानीति सामान्येनैवायं पूर्वपक्षः' इति लोचनम् । वयमप्यत्र लोचनपक्ष एव पतामः ।

प्रतिपक्षी निराकरोति—

उच्यते—यदि न प्रसिद्धिमात्रग्रहदूषितं चेतः, तदत्रापि न ब्रूमः ।

प्रसिद्धिमात्रे केवलायां प्राचीनरूढौ, ग्रहोऽभिनिवेशस्तेन दूषितमभिनिविष्टं चेतो भवतामिति शेषः, यदि नास्ति, तत्तदा, अत्रापि-ओजोव्यञ्जकसङ्घटनानियतत्वेऽपि, नेति ब्रूमो नियतत्वाभावं वदाम इत्यर्थः ।

थूत्करोतीत्यादिवच्चरमनकारस्यानितिपरत्वेऽप्यनुकरणत्वं बोध्यम् । आदिमनकाररहितपाठे तु, न ब्रूमो नैव वदाम इत्यर्थः । अनुपदमेव खण्डनादाद्यनकारघटितपाठ एव सन्दर्भशुद्धिः ।

आग्रहाविष्टजनोक्तेरनुचितत्वादुपेक्षणीयतेत्यभिसन्धिः ।

ओजस्यपि सङ्घटनाया अनियतत्वं स्पष्टमाह—

ओजसः कथमसमासा सङ्घटना नाश्रयः ।

कथं नेत्यन्वयः । अस्त्येवेति तात्पर्यम् ।

उपपादयति—

रौद्रादीन् हि प्रकाशयतः काव्यस्य दीप्तिरोज इति प्राक् प्रतिपादितम्। तच्चौजो यद्यसमासायामपि सङ्घटनायां स्यात्, तत् को दोषो भवेत्।

हि यतो रौद्रादीन् रसान् प्रकाशयतो व्यञ्जतः काव्यस्य या वैयञ्जनिकी दीप्तिरुज्ज्वलितप्रायता व्यङ्ग्या, तदेवौज इति प्राग्गुणनिरूपणप्रस्तावे प्रतिपादितम्। तदोजश्च यद्यसमासायामपि सङ्घटनायां स्याद्, व्यङ्ग्यतयेति शेषः। तत् तर्हि को दोषः, न कोऽपीत्यर्थः।

चित्तौज्ज्वल्यरूपमोजो यथा दीर्घसमाससङ्घटनया व्यज्यते, तथैव यदि क्वचिदर्थप्रौढिप्रभावेणासमाससङ्घटनयाऽपि व्यज्येत, तर्हि न कथमोजोव्यञ्जकसङ्घटनाया अप्यनियतत्वमित्याकूतम्।

नन्वोजसि दीर्घसमासाभाववत्सङ्घटनाव्यङ्ग्येऽपि, स्थितिविपर्यासेन बलवान् काव्यप्रयोजनीभूतचमत्कारविशेषविरह आपतेदिति नियमभञ्जकलक्ष्यमेवान्यथनीयमिति प्राप्ते ब्रवीति—

न चाचारुत्वं सहृदयहृदयसंवेद्यमस्ति।

चकारो हेत्वर्थकः। यतोऽचारुत्वं न सहृदयहृदयसंवेद्यं न तस्मादित्यग्रिमवाक्येनान्वयः।

नहि भवदुक्त्यैव लक्ष्यमन्यथाकर्तुं शक्यते, किन्त्वचारुत्वप्रतीत्या, तत्र पुनः सहृदयहृदयमेव साक्षितामवलम्बते। तच्च 'यो यः शस्त्रं बिभर्ति' इत्यादि तदुदाहरणे चारुत्वाभावं नानुभवतीति कुतो न सङ्घटनानियमभङ्गः स्थेयानिति भावः।

उपसंहरति—

तस्मादनियतसङ्घटनशब्दाश्रयत्वे गुणानां न काचित् क्षतिः।

तस्मादुक्तहेतोः, गुणानामनियतसङ्घटना ये शब्दास्तदाश्रयत्वे तद्व्यङ्ग्यत्वे काचित् क्षतिरनुपपत्तिर्नेत्यर्थः।

ननु गुणानां शब्दव्यङ्ग्यत्वेऽपि क्वचिन्माधुर्यं कठोरशब्दैर्व्यज्यते, कुत्रचिदोजो वा मसृणशब्दैरिति सङ्घटनावद् व्यभिचारस्तदवस्थ एवेत्यत आह—

तेषां तु चक्षुरादीनामिव यथास्वं विषयनियमितस्य स्वरूपस्य न कदाचिद् व्यभिचारः।

तेषां गुणानाम् । यथास्वं स्वमनतिक्रम्य स्वविषयानुसारमिति यावत् । विषयो लक्ष्यं रूपादि च । विषयनियमितस्य कृतविषयनियमस्य ।

यथा रूपप्रत्यक्षे चक्षुषो, रसप्रत्यक्षे रसनायाः पृथक् कारणत्वकल्पने न व्यभिचारः, तद्वदत्रापि—

'शृङ्गार एव मधुरः परः प्रह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥' इत्यादिना

द्वितीयोद्द्योते करुणादिवृत्तित्वे माधुर्यस्य, रौद्रादिवृत्तित्वे चौजसो निर्णीते, माधुर्यव्यञ्जने करुणादिव्यञ्जककोमलशब्दानामोजोव्यञ्जने रौद्रादिव्यञ्जककर्कशशब्दानां च कारणतायां मतायां न व्यभिचारः स्यात् । 'अनवरत' इत्यादौ नैसर्गिकं शब्दानां कोमलत्वम्, 'यो यः शस्त्रम्' इत्यादौ च काठिन्यमस्त्येव, केवलं समासस्य दैर्घ्याल्पत्वाभ्यां संघटनैव विपर्यस्तेति संघटनाया व्यञ्जकत्व एव व्यभिचारो न तु शब्दानाम् । यदि च कठोरशब्देभ्योऽपि वैयञ्जनिकमाधुर्यप्रतीतिः क्वचिदानुभविकी भवेत्, तदा कोमलशब्दश्रवणाव्यवहितोत्तरजायमानमाधुर्यप्रतीतिं प्रति श्रूयमाणः कोमलशब्दस्तच्छ्रवणं वा कारणमित्यादिप्रातिस्विकरूपेण कार्यताऽवच्छेदककोटावव्यवहितोत्तरत्वं निवेश्य कार्यकारणभावकल्पनया व्यभिचारो वारणीय इति भावः ।

उपसंहरति—

तस्मादन्ये गुणाः, अन्या च सङ्घटना, न च सङ्घटनामाश्रिता गुणा इत्येकं दर्शनम् ।

तस्मादुक्तहेतोः । गुणानां संघटनायाश्च भेदः, भेदे च संघटनावृत्तित्वं न गुणानाम्, किन्तु व्यञ्जकतया शब्दाश्रयत्वमेवेत्येकं दर्शनं मतमुपपादितमित्यर्थः ।

अथ गुणसंघटनातादात्म्यपक्षपाती स्वमतं स्थापयति—

अथवा संघटनारूपा एव गुणाः ।

जगदीशमते समानाधिकरणानां प्रकारताविशेष्यताऽऽदिविषयतानामिवात्र संघटनागुणानामपि तादात्म्यं कथञ्चिदुपपादनीयम् । वस्तुतस्तु शब्देषु संघटनाया अवयवावयविभावेन, गुणानां च व्यङ्ग्यव्यञ्जकत्वेन वृत्तित्वमिति तदभेदपक्षो दुरुपपाद एव ।

तादात्म्यपक्षे कृतपूर्वमाक्षेपं स्मारयति—

यत्तूक्तम्—'सङ्घटनावद् गुणानामप्यनियतविषयत्वं प्राप्नोति, लक्ष्ये व्यभिचारदर्शनात्' इति ।

पूर्वोक्तेरयमार्थिकोऽनुवादः, आनुपूर्वीविपर्यासात्।

खण्डयति—

तत्राप्येतदुच्यते—यत्र लक्ष्ये परिकल्पितविषयव्यभिचारः, तद् विरूपमेवास्तु।

'नह्येकमुदाहरणं योगारम्भं प्रयोजयति' इति महाभाष्यभाषितरीत्या क्वचिदेकमात्रविपरीतलक्ष्यावेक्षणेन नियमो न व्यभिचारणीयः, किन्तु तल्लक्ष्यमेवान्यथाकार्यमिति 'यो यः शस्त्रं बिभर्ति' इत्यादिलक्ष्यमेव कोमलैः शब्दैर्विरच्यताम्, परिह्रीयतां वेत्याशयः।

ननु तल्लक्ष्ये यदि किञ्चिदप्यचारुत्वमस्ति, तर्हि कथं न सहृदयास्तदनुभवन्ति, तस्मान्नास्त्येव तत्राचारुत्वमित्याशङ्कते—

कथमचारुत्वं तादृशविषये सहृदयानां (न) प्रतिभातीति चेत्।

सन्दर्भशुद्ध्यनुरोधेन प्रकोष्ठस्थनकारघटितः पाठः कल्पितः। कर्मप्रवचनीययोगे प्राप्तां द्वितीयां वारयितुं सहृदयानामिति सम्बन्धसामान्यविवक्षायां षष्ठी।

उत्तरयति—

कविशक्तितिरोहितत्वात्।

न प्रतिभातीति शेषः।

विभज्यान्वाख्याति—

द्विविधो हि दोषः कवेः, अव्युत्पत्तिकृतोऽशक्तिकृतश्च। तत्राव्युत्पत्तिकृतो दोषः शक्तितिरोहितत्वात् कदाचिन्न लक्ष्यते, यस्त्वशक्तिकृतो दोषः, स झटिति प्रतीयते।

कवित्वबीजभूता प्रतिभैव शक्तिः। तदुपयोगिसमस्तवस्तुपरामर्शकौशलं निपुणताऽऽत्मिका च व्युत्पत्तिः। कवेस्तयोरभावश्च दोषप्रयोजकः।

प्रतिभामात्रवत्कविरचिते काव्ये सकलवस्तुवृत्तनैपुण्याभावप्रयोज्यं क्वचित् स्खलनमपि तदीयप्रतिभाऽतिरेकोन्मिषितवस्तुवृत्तवर्णनवैचित्र्यसमाक्षिप्तचेताः सचेताः कदाचिन्नावदधाति। केवलव्युत्पत्तिशालिकविरचिते तु याथातथ्येन वर्णितेऽपि वस्तुनि प्रतिभाविरहाच्छब्दार्थयोरेवोत्कर्टं तस्य स्खलनं दुराच्छादं भवतीति भावः।

तदाह—

परिकरश्लोकश्चात्र—'अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य स झटित्येव भासते ॥'

संव्रियत आच्छाद्यते । तस्य कवेः । स दोषः ।

निदर्शनदर्शनेनाक्तमर्थं द्रढयति—

तथा हि—महाकवीनामप्युत्तमदेवताविषयप्रसिद्धसम्भोगशृङ्गारनिबन्धनाद्यनौचित्यं शक्तितिरस्कृतं ग्राम्यत्वेन न प्रतिभासते । यथा कुमारसम्भवे-देवीसम्भोगवर्णनम् । एवमादौ च विषये यथौचित्यत्यागः, तथा दर्शितमेवाग्रे ।

उत्तमदेवता लक्ष्मीनारायण-पार्वतीपरमेश्वर-वाणीब्रह्मादयः । ग्राम्यत्वेनौचित्यपरित्यागादचमत्कारित्वेन । कुमारसम्भवेऽष्टमसर्गे । देवी पार्वती । अग्रे 'विभावभावानुभाव'इत्यादिकारिकानिकरविवरणे-'अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्' इत्यन्तेन सन्दर्भेण ।

तदुक्तं लोचने-'सम्भोगोऽपि ह्यसौ वर्णितस्तथा प्रतिभानवता कविना, यथा तत्रैव विश्रान्तं हृदयं पौर्वापर्यपरामर्शं कर्तुं न ददाति । यथा निर्व्याजपराक्रमस्य पुरुषस्याविषयेऽपि युध्यमानस्य तावत् तस्मिन्नवसरे साधुवादो वितीर्य्यते, नतु पौर्वापर्यपरामर्शे, तथाऽत्रापीति भावः ।'

ननु कवेः प्रतिभया दोषा आच्छाद्यन्ते इति कुतोऽवगम्यत इत्यत आह—

शक्तितिरस्कृतत्वं चान्वयव्यतिरेकाभ्यामवसीयते ।

अव्युत्पत्तिकृतदोषाणामिति शेषः । अवसीयते निर्णीयते ।

तत्रान्वयः कुमारसम्भवादौ दर्शित एवेति व्यतिरेकमात्रं दर्शयति—

तथा हि—शक्तिरहितेन कविना एवंविधे विषये शृङ्गार उपनिबध्यमानः स्फुटमेव दोषत्वेनावभासते ।

'अनवरतनयन-' इत्यादावप्रतिभकविनिबद्धसमासबहुलशब्दव्यज्यमानः शृङ्गारः सौष्ठवं नादधात्यतो दोष इति शक्त्यभावे दोषसद्भावात् स्फुटो व्यतिरेकः ।

अथेदानीमेवाभ्युपगतं पक्षमनुपपत्त्या तिरयति—

नन्वस्मिन् पक्षे—'यो यः शस्त्रं बिभर्ति' इत्यादौ किमचारुत्वमप्रतीयमानमेवारोपयामः ? ।

अस्मिन् गुणसङ्घटनातादात्म्यपक्षे ।

अयं भावः—यदि गुणानां सङ्घटनायाश्चाभेदः, तदा 'यो यः शस्त्रम्' इत्यादावोजोगुणानुसारिदीर्घसमाससङ्घटनाविरहेणापाद्यमानं व्यभिचारं वारयितुमुक्तलक्ष्यस्यालक्ष्यत्वसम्पादनाय कविशक्तितिरस्कृततत्त्वात् सहृदयैरज्ञायमानोऽपि विच्छित्तिविरहो बलात् कल्पनीयःस्यादिति महीयस्यनुपपत्तिः, अतो नायं पक्षः समीचीनः ।

उपसंहरन् कारिकोत्तरांशमवतारयति—

तस्माद् गुणव्यतिरिक्तत्वे, गुणरूपत्वे च सङ्घटनाया अन्यः कश्चिन्नियमहेतुर्वक्तव्य इत्युच्यते—

'तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः ।'

तस्मादुक्तकारणकूटात् । नियमहेतुर्व्यवस्थापकः ।

वक्तुरौचित्यं वाच्यस्यौचित्यं च तस्याः सङ्घटनाया नियमे हेतुर्नियामक इत्यर्थः ।

सङ्घटनाया गुणतादात्म्यं गुणाश्रयत्वं गुणाश्रितत्वं वाऽस्तु, किन्तु तस्या रसानुसारेण व्यवस्था नोचिता, दर्शितानुपपत्तिव्यूहात्, अपि तु वक्तुर्वाच्यस्य चौचित्यानुसारेणैव, तथा च न व्यभिचार इति तात्पर्यम् ।

कारिकांऽशं विवृण्वन् वक्तृभेदान् दर्शयति—

तत्र वक्ता कविः, कविनिबद्धो वा कश्चित् ।

तत्र वक्तृवाच्ययोर्मध्ये । कविनिबद्धः कविना कल्पितः । वा शब्दः समुच्चये ।

तत्रापि द्वितीयस्य द्वैविध्यमाह—

कविनिबद्धश्चापि रसभावरहितो रसभावसमन्वितो वा ।

वक्तू रसभावराहित्यसाहित्ये रसभावानास्वादकत्वास्वादकत्वरूपे ।

तदेकदेशरसभेदावाचष्टे—

रसोऽपि कथानायकाश्रयस्तद्विपक्षाश्रयो वा ।

कथायाः प्रधानेतिवृत्तस्य नायको निर्वहणसन्धौ फलभाग् रामादिराश्रयो यस्य तादृशः । तद्विपक्षः प्रतिनायको रावणादिश्चाश्रयो यस्य तादृशश्चेति द्विविधो रसः । आश्रय आलम्बनमिति केचित् । कथां 'नयतीति' लोचनदर्शितविग्रहे तु कर्मण्यणो दुर्वारत्वाद् रूपासिद्धिः ।

कथानायकमपि विभजन् वक्तृभेदानुपसंहरति—

कथानायकश्च धीरोदात्तादिभेदभिन्नः पूर्वस्तदनन्तरो वेति विकल्पाः।

नायकः प्रथमं धीरोदात्तो धीरोद्धतो धीरललितो धीरप्रशान्तश्चेति चतुर्विधः। चतुर्विधोऽप्यनुकूलो दक्षिणो धृष्टः शठश्चेति चतुर्विधः। उत्तमोमध्यमोऽधमश्चेति पुनस्त्रिधेत्यष्टचत्वारिंशद्विधो ज्ञेयः। तत्तद्भेदलक्षणादि रसमञ्जरीमुरभौ द्रष्टव्यम्। पूर्वो नायकः। तदनन्तरोऽनुनायक उपनायकः प्रतिनायको वा। इति विकल्पा इयन्तो वक्तुर्भेदाः, सम्भवन्तीति शेषः।

इत्थं वक्तृवैविध्यं प्रपञ्च्य वाच्यवैविध्यमपि दर्शयति—

वाच्यं च ध्वन्यात्मरसाङ्गं रसाभासाङ्गं वा, अभिनेयार्थमनभिनेयार्थं वा, उत्तमप्रकृत्याश्रयं तदितराश्रयं वेति बहुप्रकारम्।

चकारोऽप्यर्थकः। वाशब्दाः समुच्चयार्थकाः।

वाच्यं ध्वन्यात्मनो ध्वनिरूपस्य रसस्याङ्गं व्यञ्जकत्वेनोपकारकम्, रसाभासस्योपकारकं चेति द्विविधम्। द्विविधमपि, अभिनेयो रसाङ्गविभावाद्यात्मकत्वेनाभिनेतुं योग्यो दृश्यकाव्यप्रतिपाद्योऽर्थो यस्य तादृशम्, तद्भिन्नः श्रव्यकाव्यप्रतिपाद्योऽर्थो यस्य तादृशं चेति द्विविधम्। तावद्विधमपि, उत्तमप्रकृतयो देवमुनिप्रभृतय आश्रया अवलम्बनानि यस्य तत्, तदितरे मध्यमाधमप्रकृतयो मनुजदनुजादय आश्रया यस्य तादृशं चेति पुनर्द्विविधमित्यनेकप्रकारकं वाच्यम्, सम्भवतीति शेषः।

तत्र द्वितीयविकल्पे वाच्यस्याभिनेयार्थेनाभेदेऽपि भेदसहं तत्सम्बन्धित्वमौपचारिकं चन्द्रिकाऽनुमतं व्यपदेशिवद्भावेनावगन्तव्यम्। तत्खण्डनपरं लोचनन्त्वामर्शनीयम्, नान्तरीयकतया वाच्यस्याभिनेयत्वेऽभ्युपगतेऽपि भेदस्थापनाविरहादन्यसम्बन्धबोधकबहुव्रीहेरसम्भवात्।

इत्थं वक्तृवाच्ययोः प्रकारान् निरूप्य तदौचित्यस्य सङ्घटनानियामकत्वं क्रमशो दर्शयति—

तत्र यदा कविरपगतरसभावो वक्ता, तदा रचनायाः कामचारः।

रचना सङ्घटना। कामचारः स्वाच्छन्द्यं, यथेच्छं व्यवहार इति यावत्। नीरसभावकवेरुक्तौ रसभावादिविरहात् सङ्घटनाया नियमो नास्तीति भावः।

'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इत्याग्नेयानुशासनादीदृशः कविर्यमकादिचित्रप्रदर्शनपरः क्काचित्क एवेति बोध्यम्।

पुनराह—

यदाऽपि कविनिबद्धो वक्ता रसभावरहितः, तदा स एव ।

स एव कामचार एव । सङ्घटनाया इति शेषः ।

ईदृशो वक्ता च तापसादिरुदासीनस्वभाव इति वृत्तान्तानुरोधेन क्वचित् कविना कल्प्यते । वस्तुतस्तु सोऽपि प्रबन्धप्रधानव्यङ्ग्यरसानुसार्य्येवेति ज्ञेयम् ।

विशेषमाह—

यदा तु कविः कविनिबद्धो वा वक्ता रसभावसमन्वितो, रसश्च प्रधानभूतत्वाद् ध्वन्यात्मभूतः, तदाऽपि नियमेनैव तत्रासमासा–मध्यमसमासे एव सङ्घटने ।

अपिस्त्वर्थकः । यदा तु पुनः, कविस्तत्कल्पितो वक्ता च नियमेनैव रसभावसमन्वितो न तूदासीनः, कथञ्चिद् रसः पुनर्ध्वनिरूपो, न तु रसवदलङ्कारस्वरूपः स्यात्, तदाऽसमासा–मध्यमसमासे सङ्घटने, न तु कदाचिदपि दीर्घसमासा सङ्घना स्यादित्यर्थः । अर्थानुरोधेनात्र पदक्रमभेदः कृतः । अन्यथा नियमशब्दस्य द्वयोरेवकारयोश्च पौनरुक्त्यं दुष्परिहरं स्यात् ।

सरसवक्त्रौचित्यापेक्षयैव रसध्वनौ दीर्घसमाससङ्घटनाव्यावृत्तिः, असमासा तु सर्वथाऽनुकूला, मध्यमसमासाया अपि क्वचिदभ्युपगमः ।

करुणविप्रलम्भध्वनौ विशेषमाह—

करुणविप्रलम्भशृङ्गारयोस्त्वसमासैव सङ्घटना ।

करुणे विप्रलम्भशृङ्गारे च रसे कोमलताऽतिशयोऽपेक्ष्यत इत्यनुपदं वक्ष्यति ।

तत्र शङ्कते—

कथमिति चेत् ?

तत्र को हेतुः, न हि भवदुक्तौ स्वतः प्रामाण्यमिति शङ्कितुराशयः ।

उत्तरमाह—

उच्यते—रसो यदा प्राधान्येन प्रतिपाद्यः, तदा तत्प्रतीतौ व्यवधायका विरोधिनश्च सर्वात्मनैव परिहार्य्याः । एवं च दीर्घसमासा सङ्घटना समासानामनेकप्रकारसम्भावनया कदाचिद् रसप्रतीतिं व्यवदधातीति तस्यां नात्यन्तमभिनिवेशः शोभते, विशेषतोऽभिनेयार्थे काव्ये, ततोऽन्यत्र च विशेषतः करुण–विप्रलम्भशृङ्गारयोः ।

तत्प्रतीतौ रसास्वादे, व्यवधायका विलम्बकारकाः, विरोधिनः प्रतिबन्धकाः । एवं च तेषां सर्वथा परिहार्यत्वे सति, समासानामनेकप्रकारसम्भावना च 'पीतपटः' इत्यादौ कर्मधारय-बहुव्रीहि-मध्यमपदलोपिसमासानामुत्कटकोटिकाशङ्का । रसप्रतीतिं व्यवदधाति वाच्यार्थनिर्णयाभावाद्रसास्वादं विलम्बयति । इति हेतोः । तस्यां दीर्घसमाससङ्घटनायाम् । अत्यन्तमभिनिवेश आग्रहो न शोभते । विशेषतः श्रव्यकाव्यापेक्षयाऽप्यधिकम् । अभिनेयार्थे दृश्यकाव्ये तदभिनिवेशो न शोभते, दीर्घसमासघटितपदार्थस्याभिनये क्लेशात्, नाट्यप्रतिपत्तेः प्रत्यक्षरूपत्वात् । ततो दृश्यकाव्यादन्यत्र,चकारादभिनेयार्थेऽपि । विशेषतोऽधिकं करुणविप्रलम्भशृङ्गारयोस्तदभिनिवेशो न शोभते ।

तत्र हेतुमाह—

तयोर्हि सुकुमारतरत्वात् स्वल्पायामप्यस्वच्छतायां शब्दार्थयोः प्रतीतिर्मन्थरीभवति ।

तयोः करुणविप्रलम्भशृङ्गाररसयोः सुकुमारतरत्वान्माधुर्यप्रकर्षाश्रयत्वेनातिकोमलशब्दार्थव्यङ्ग्यत्वात्, शब्दार्थयोरल्पायामपि द्रागपि, अस्वच्छतायां सन्देहादिजननेन कार्कश्येन वा व्यङ्ग्यार्थोपस्थापनाक्षमतायाम्, प्रतीती रसास्वादो मन्थरीभवति, प्रतिबद्धा भवतीत्यर्थः ।

इदमुक्तम्—करुणविप्रलम्भरसयोर्माधुर्यप्रकर्षादतिकोमलत्वेन शब्दार्थयोर्द्रुततरं व्यङ्ग्यार्थोपस्थापकत्वमपेक्ष्यते । समासदैर्घ्ये तु तदनेकप्रकाराणां सम्भावनया द्रुतमपि सा न सम्भवति । तस्माद् दीर्घसमाससङ्घटना तयोर्व्यङ्ग्यत्वे परिहरणीयैव ।

इत्थं तत्रोपपत्तिमुक्त्वा रसान्तरेऽपि व्यवस्थां कथयति—

रसान्तरे पुनः प्रतिपाद्ये रौद्रादौ, मध्यमसमासा सङ्घटना, कदाचिद् धीरोद्धतनायकसम्बन्धव्यापाराश्रयेण दीर्घसमासाऽपि वा, तदाक्षेपाविनाभाविरसोचितवाच्यापेक्षया न विगुणा भवतीति साऽपि नात्यन्तं परिहार्या ।

रसान्तरे करुणविप्रलम्भाभ्यामन्यस्मिन् रौद्रादौ रसे प्रतिपाद्ये व्यञ्जनीये सति, पुनर्मध्यमसमासा सङ्घटनाऽनुकूलेति शेषः । कदाचित् पुनः—

> 'मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः ।
> आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥' इति दर्पणलक्षितस्य

धीरोद्धतनायकस्य सम्बन्धो यत्र तादृशस्य व्यापारस्य चरितस्याश्रयेण दीर्घसमासाऽपि, तदाक्षेपाविनाभावी—तस्यां दीर्घसमाससङ्घटनायां य आक्षेपोऽनुपपत्तिमूलकोऽध्याहारस्तेन विना यो न भवितुं शक्नोति, तादृग् रसोचितो रसव्यञ्जनोपयोगित्वेनोपादीयमानो यो वाच्योऽर्थस्तदपेक्षया विगुणा प्रतिकूला यतो न भवति, तस्मात् सा (दीर्घसमासाऽपि) नात्यन्तं परिहार्या, किन्तु तत्रात्यन्ताभिनिवेशो न शोभत इत्यर्थः ।

रौद्रादौ रसे व्यङ्ग्ये रसानुसारेण मध्यमसमासा सर्वथाऽनुकूला, कदाचिद् धीरोद्धतवक्त्रनुसारेण समुद्धतवाच्यानुसारेणाख्यायिकाऽऽदिप्रबन्धानुसारेण वा दीर्घसमासाऽपि सङ्घटनाऽनुकूलप्रायैव ।

तदुक्तम्—

'क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनाऽऽदयः' इति सारम् ।

इत्थं सङ्घटनाया वक्त्राद्यौचित्यनिबन्धनं नियममुक्त्वा, प्रसादगुणस्य तद्व्यापकत्वमाह—

सर्वासु च सङ्घटनासु प्रसादाख्यो गुणो व्यापी ।

सङ्घटनात्रयेऽपि झटित्यर्थोपस्थापनमावश्यकमिति भावः ।

उपपादयति—

स हि सर्वरससाधारणः सर्वसङ्घटनासाधारणश्चेत्युक्तम् ।

स प्रसादगुणः सर्वेषु रसेषु, सर्वासु सङ्घटनासु च साधारणः समानोऽस्ति ।

उक्तम्—

'समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥' इति कारिकया ।

प्रसादस्य साधारणत्वं स्थापयितुमन्वयव्यतिरेकौ दर्शयति—

प्रसादातिक्रमे ह्यसमासाऽपि सङ्घटना करुणविप्रलम्भशृङ्गारौ न व्यनक्ति । तदपरित्यागे च मध्यमसमासाऽपि प्रकाशयति ।

प्रसादस्यातिक्रमे त्यागे । न व्यनक्ति, व्यञ्जकस्य वाच्यार्थस्य बोधाभावात् । तदपरित्यागे प्रसादसद्भावे । करुणविप्रलम्भयोर्विशिष्योपादानं कोमलताऽतिरेकं सूचयितुम् । प्रसादसत्त्वे तद्व्यञ्जनम् , प्रसादाभावे तदभाव इत्यन्वयव्यतिरेकाविह व्यक्तमुक्तौ ।

इत्थं च भुवो गन्ध इव सरससङ्घटनायाः प्रसादो व्यापक इति बोध्यम् ।

निर्गलितमाह—

तस्मात् सर्वत्र प्रसादोऽनुसर्तव्यः ।

सर्वत्र सर्वासु सङ्घटनासु । अनुसर्तव्य आश्रयणीयः ।

उपोद्घलकमभिदधाति—

अत एव 'यो यः शस्त्रं बिभर्ति' इत्यादौ यद्योजसः स्थितिर्नेष्यते, तत् प्रसादाख्य एव गुणो, न माधुर्यम् । नचाचारुत्वम्, अभिप्रेतरसप्रकाशनात् ।

अत एव प्रसादस्य व्यापकत्वादेव, ओजोगुणस्य स्थितिः प्राधान्येनेति शेषः । यदि नेष्यते दीर्घसमाससङ्घटनाविरहात्, कैश्चिदिति शेषः । तत्तदा, प्रसादाख्यो गुण एव तत्राङ्गीकरणीयो न तु माधुर्यगुणः, ओजोमाधुर्ययोरन्योऽन्याभाववत्त्वाद् विरुद्धत्वाद्वा । तत्राचारुत्वं स्यादिति न शङ्कनीयम्, अभिप्रेतस्येष्टस्य रौद्ररसस्य प्रकाशनाद्, रसप्रकाशस्यैव चारुत्वहेतुत्वात् ।

ये केचन सङ्घटनाविशेषाभिनिवेशिन उक्तपद्य ओजोगुणं न मन्वते, तन्मते प्रसाद एव गुणस्तत्र तत्र प्रसादप्रकाशेनैव रौद्ररसप्रकाश इति प्रसादस्य व्यापकत्वादेवेदं सङ्गच्छत इति द्रष्टव्यम् ।

उपक्रान्तं सङ्घटनाया रसव्यञ्जकत्वं पर्यवसितपक्षत्रयसामञ्जस्येन दर्शयति—

तस्माद् गुणाव्यतिरिक्तत्वे गुणव्यतिरिक्तत्वे वा सङ्घटनाया यथोक्तादौचित्याद् विषयनियमोऽस्तीति तस्या अपि रसव्यञ्जकत्वम् । तस्याश्च रसाभिव्यक्तिनिमित्तभूताया योऽयमनन्तरोक्तो नियमहेतुः, स एव गुणानां नियतो विषय इति गुणाश्रयेण व्यवस्थानमप्यविरुद्धम् ।

तस्मादुक्तहेतुकूटात् । गुणेभ्योऽव्यतिरिक्तत्वेऽभेदे । वाशब्दः समुच्चये । यथोक्ताद् वक्तृवाच्यसम्बन्धिनः । तस्याः सङ्घटनायाः ।

अयं भावः—सङ्घटना गुणरूपा गुणवती गुणनिष्ठा वा भवतु, न च क्वचिदपि नः क्षतिः । तथाहि–यदि वक्त्राद्यौचित्यविहितविषयव्यवस्था सा नियता, तर्हि तस्या गुणात्मत्वे गुणाश्रयत्वे वाऽप्राधान्याभावान्नैवानियतविषयता । गुणवृत्तित्वेऽपि वक्त्राद्यौचित्येनैव गुणानामपि विषयनियमनात् तदाश्रितायाः सङ्घटनाया अपि नियतविषयता ।

तथा च नियतविषयतया तस्याः प्रागुक्तं रसव्यञ्जकत्वमप्यक्षतं भवति, तस्मात्

पक्षत्रयमप्यत्र समीचीनमेव, तत्रापि ज्यायस्त्वं तु सङ्घटनाऽऽश्रयगुणपक्षस्यैव, व्यङ्ग्यव्यञ्जकभावेन गुणवती सङ्घटनेत्यविसंवादिप्रतीतेः ।

तदाहुराचार्याः—'गुणाः सङ्घटनैकरूपाः, तथाऽपि गुणनियम एव सङ्घटनाया नियमः । गुणाधीनसङ्घटनापक्षेऽप्येवम् । सङ्घटनाऽऽश्रयगुणपक्षेऽपि सङ्घटनाया नियामकत्वेन यद् वक्तृवाच्यौचित्यं हेतुत्वेनोक्तम्, तद्गुणानामपि नियमहेतुरिति पक्षत्रयेऽपि न कश्चिद् विप्लव इति तात्पर्यम् ।'

सङ्घटनाया अपरं नियामकमाह—

'विषयाश्रयमप्यन्यदौचित्यं तां नियच्छति ।
काव्यप्रभेदाश्रयतः स्थिता भेदवती हि सा ॥६३॥'

विषयः सङ्घातविशेषरूपः प्रबन्ध आश्रयो यस्य तादृशमन्यदुक्तौचित्याद् भिन्नं विषयौचित्यमपि तां सङ्घटनां नियच्छति नियमयति । हि यतः सा सङ्घटना काव्यस्य प्रभेदानां मुक्तकादीनामाश्रयत आश्रयणाद् भेदवती, भिन्नेत्यर्थः ।

तदुक्तं लोचने—'यथा हि सेनाऽऽद्यात्मकसङ्घातनिवेशी पुरुषः कातरादिभिरपि तदौचित्यादनुगुणतयैवास्ते, तथा काव्यवाक्यमपि सङ्घातविशेषात्मकसन्दानितकादिमध्यनिविष्टं तदौचित्येन वर्तते । मुक्तकं तु विषयशब्देन यदुक्तम्, तत् सङ्घाताभावे तत्स्वातन्त्र्यमात्रं प्रदर्शयितुम्, स्वप्रतिष्ठितमाकाशमिवेति ।

यथा वक्तृवाच्ययोर्वैचित्र्यात् तदौचित्यं सङ्घटनां नियमयति, तथैव विषयस्यापि मुक्तकादिभेदेन वैचित्र्यात् तदौचित्यमपि तां नियमयतीति सारम् ।

यच्छतेरुपसर्गबलेन नियमनार्थकत्वम् । समुच्चयार्थकेनापिना विषयौचित्यस्य तारतम्यभेदमात्रव्यावृत्तत्वम्, न तु तेन वक्तृवाच्यौचित्यनिराकरणमपि सूच्यते ।

समासेन कारिकां विवृणोति वृत्तिकारः—

वक्तृवाच्यौचित्ये विषयाश्रयमन्यदौचित्यं सङ्घटनां नियच्छति ।

अपिशब्दार्थ उपरि स्फुटीकृतः ।

हेतुतया प्रसङ्गाद् विषयप्रभेदान् दर्शयति—

यतः काव्यस्य प्रभेदाः मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धम्, सन्दानितकविशेषककलापककुलकानि, पर्यायबन्धः, परिकथा, सकलकथा–खण्डकथे, सर्गबन्धोऽभिनेयार्थमाख्यायिका कथेत्येवमादयः ।

मुक्तकमन्यपद्यासम्बद्धं स्वातन्त्र्येणार्थबोधनक्षममेव मुक्तकम्, स्वार्थे कः, सञ्ज्ञायां वा कन् । तच्च संस्कृतं देववाङ्निबद्धम् । प्राकृतं संस्कृतप्रकृतिकम् । तद्भव-तत्सम-देशीत्यनेकप्रकारकभाषाविशेषः, तन्निबद्धम् । अपभ्रंश आभीरादिभाषा, तन्निबद्धं च त्रिविधं भवति । सन्दानितकं च युग्मकापरपर्यायं द्विपरिसमाप्तक्रियं पद्यद्वयम् । विशेषकं त्रिपरिसमाप्तक्रियं पद्यत्रयम् । कालापकं चतुष्परिसमाप्तक्रियं पद्यचतुष्टयम् । कुलकं पञ्चादिपरिसमाप्तक्रियं पद्यपञ्चकादि । क्रियापरिसमाप्तिकृता एवामी भेदा इति सूचनाय मूले द्वन्द्वेन निर्देशः । पर्यायबन्धः खण्डकाव्यस्वरूपः समाप्तायामप्यवान्तरक्रियायां वसन्ताद्येकतमवर्णनीयवस्तुवर्णनात्मकः प्रबन्धः । परिकथा धर्माद्येकतमपुरुषार्थोद्देश्यप्रवृत्तविचित्रप्रकारकानेकवृत्तान्तवर्णना । खण्डकथा तदेकदेशवर्णनैव । सकलकथा सर्वेषां फलपर्यन्तानुधाविवृत्तान्तानां वर्णना । खण्डकथासकलकथे प्राकृतमात्रप्रसिद्धे इति सूचयितुं द्वन्द्वेन निर्देशः । सर्गबन्धः संस्कृतमयं श्रव्यं महाकाव्यम् । अभिनेयार्थं दृश्यं काव्यम् । नाटकादिदशविधं रूपकम् । नाटिकाद्यष्टादशविधमुपरूपकं च । आख्यायिका क्वाचित्कवक्त्रापरवक्त्रादिच्छन्दस्क उच्छ्वासाश्वासाभिधविभागभाग् गद्यप्रचुरः प्रबन्धः । कथा सज्जनदुर्जनवृत्तान्तवर्णनपरः क्वाचित्कार्यावक्त्रापरवक्त्रयुक्त आश्वासादिशून्यो गद्यमयः प्रबन्धः । आदिशब्देनाख्यान-चम्पू-सङ्घात-कोष-चक्रवालो-दाहरण-विरुदावली-भोगावली-तारावली-विश्वावली-रत्नावली-पञ्चाननावलीप्रभृतयो गृह्यन्ते ।

तथा चोक्तमाग्नेयपुराणे—'मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम् ।
द्वाभ्यां तु युग्मकं ज्ञेयं त्रिभिः श्लोकैर्विशेषकम् ।
चतुर्भिस्तु कलापं स्यात् पञ्चभिः कुलकं मतम् ॥' इति ।

काव्यादर्शे—'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।
तद्भवस्तत्समो-देशीत्यनेकः प्राकृतक्रमः ।
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ॥' इति ।

साहित्यदर्पणे—'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुकारि च ॥' इति ।
'सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वाऽपि धीरोदात्तगुणान्वितः ॥ इत्यादि ।
नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥'

'नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकं च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥'
'कथायां सरसं वस्तु गद्यैरेव विनिर्दिशेत् ।
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम् ॥' इति ।
'आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्तनम् ।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित् ॥
कथांऽशानां व्यवच्छेद आश्वास इति बध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ॥' इति ।
काव्यादर्शे—'अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ।' इति ।
आग्नेये—'आख्यायिका कथा खण्डकथा परिकथा तथा ।
कथानिकेति मन्यन्ते गद्यकाव्यं च पञ्चधा ॥
कर्तृवंशप्रशंसा स्याद् यत्र गद्येन विस्तरात् ।
कन्याहरणसङ्ग्राम-विप्रलम्भविपत्तयः ॥
भवन्ति यत्र दीप्ताश्च रीतिवृत्तिप्रवृत्तयः ।
उच्छ्वासैश्च परिच्छेदो यत्र या चूर्णकोत्तरा ॥
वक्त्रं वाऽपरवक्त्रं वा यत्र साऽऽख्यायिका स्मृता ।
श्लोकैः स्ववंशं सङ्क्षेपात् कविर्यत्र प्रशंसति ॥
मुख्यस्यार्थावताराय भवेद् यत्र कथाऽन्तरम् ।
परिच्छेदो न यत्र स्याद् भवेद्वा लम्बकैः क्वचित् ॥
सा कथा नाम तद्गर्भे निबध्नीयाच्चतुष्पदीम् ।
भवेत् खण्डकथा याऽसौ, याऽसौ परिकथा तयोः ॥
अमात्यं सार्थकं वाऽपि द्विजं वा नायकं विदुः ।
स्यात् तयोः करुणं विद्धि विप्रलम्भश्चतुर्विधः ॥
समाप्यते तयोर्नाद्या । कथामनुधावति ।

कथाऽऽख्यायिकयोर्मिश्रभावात् परिकथा स्मृता ॥
भयानको मुखपरो गर्भे च करुणो रसः ।
अद्भुतोऽन्ते सुक्लृप्तार्थो नोदात्ता सा कथानिका ॥' इति ।

दर्पणे—'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।' इति ।

अन्यत्र—'कोषः श्लोकसमूहस्तु स्यादन्योऽन्यानवेक्षकः ।
यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये ।
सङ्घातः स निगदितो वृन्दावन-मेघदूतादिः ॥' इति ।

मन्दारमरन्दे-'येन केनापि तालेन गद्यपद्यसमन्वितम् ।
जयेत्युपक्रमं मालिन्यादि-प्रासविचित्रितम् ॥
तदुदाहरणं नाम्ना विभक्त्यष्टाङ्गसंयुतम् ।'
'सम्बोधनविभक्त्या यत् प्रचुरं पद्यपूर्वकम् ।
विमुक्तपुनरामृष्टशब्दं स्याच्चक्रवालकम् ॥'
'आद्यन्तपद्यसंयुक्ता संस्कृतप्राकृतात्मिका ।
अष्टभिर्वा चतुर्भिर्वा वाक्यैः स्कन्धसमन्विता ॥
प्रतिस्कन्धं भिन्नवाक्य-रीतिर्देवनृपोचिता ।
सर्वतो देवशब्दादिरवा भोगावली मता ॥'
'वर्ण्यमानाङ्कविरुद-वर्णनप्रचुरोज्ज्वला ।
वाक्याडम्बरसंयुक्ता कथिता विरुदावली ॥'
'ताराणां सङ्ख्या पद्यैर्युतत्र तारावली मता ।'
'विश्वेषां सङ्ख्यया पद्यैर्युता विश्वावली मता ॥'
'रत्नानां सङ्ख्यया पद्यैर्युता रत्नावली मता ।
पद्यैश्च पञ्चभिर्युक्ता प्रोक्ता पञ्चाननावली ॥' इति ।

काव्यप्रभेदप्रदर्शनप्रयोजनमाचष्टे—

तदाश्रयेणापि सङ्घटना विशेषवती भवति ।

तच्छब्देन काव्यभेदाः परामृश्यन्ते । विशेषवती भिन्ना ।
तत्तत्काव्यप्रभेदरूपविषयभेदेनापि सङ्घटनाया भेदो भवतीति सारम् ।

तानेव भेदान् क्रमशो दर्शयति—

तत्र मुक्तकेषु रसबन्धाभिनिवेशिनः कवेस्तदाश्रयमौचित्यम्। तच्च दर्शितमेव। अन्यत्र कामचारः।

दर्शितं साम्प्रतमेव सङ्घटनानियामकप्रदर्शनप्रसङ्गेन। अन्यत्र कवेरसबन्धाभिनिवेशविरहस्थले।

यदि रसभावव्यञ्जकानि मुक्तकानि रचयितुमनाः कविः, तदाऽत्रापि रसभावानुसारिणी वक्त्राद्यनुरोधेन सङ्घटना व्यवस्था। नोचेत्, तत्रापि स्वाच्छन्द्यमिति भावः।

मुक्तकानां सूक्ष्मशरीरतया विभावादिसामग्रीसम्यक्संवलनासम्भवाद् रसबन्धाभिनिवेशस्तत्र कवेर्न प्रसिध्यतीत्यत आह—

मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते।

यथा प्रबन्धेषु सामग्रीसंवलनात् कवीनां रसबन्धाभिनिवेशः, तथैव प्रतिभाऽतिरेकभृतां तेषां मुक्तकेष्वपीति नाप्रसिद्धिरिति भावः।

प्रसिद्धिमेव दर्शयति—

यथा ह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव।

मुक्तका इति पुंस्त्वं चिन्त्यम्। शृङ्गाररसस्यन्दिनः शृङ्गाररसस्य व्यञ्जका बाहुल्येन। प्रबन्धायमानाः कृशकायत्वेऽपि व्यङ्ग्यार्थविपुलाकारत्वेन प्रबन्धवदाचरन्तः।

तथा हि तस्यैव—

'अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः,
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः,
कथय सुकृती कोऽयं मुग्धे! त्वयाऽद्य विलोक्यते॥'

इति विभावादिसम्प्रत्यायनात् पूर्वरागविप्रलम्भद्योतकम्।

'लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने! मानमधुना॥'

इति चेर्ष्याविप्रलम्भव्यञ्जकं मुक्तकं प्रसिध्यति।

एतयोर्व्यङ्ग्यविस्तरस्त्वर्जुनवर्मकृततद्विवृतावलोकनीयः ।

विशेषमाख्याति—

सन्दानितकादिषु तु विकटनिबन्धौचित्यान्मध्यमसमासादीर्घसमासे एव सङ्घटने । प्रबन्धाश्रयेषु यथोक्तप्रबन्धौचित्यमेवानुसर्तव्यम् ।

एवकारेणासमाससङ्घटनाया व्यवच्छेदः क्रियते। सन्दानितकादिषु पार्यन्तिकक्रियावाचकपदस्य दविष्ठतया वाच्यार्थप्रतीतावेव विलम्बाद् रसास्वादासम्भवेन केवलबन्धद्रढिमसम्पत्त्यै मध्यमसमासा–दीर्घसमासयोः सङ्घटनयोरेवाभ्युपगमः । प्रबन्धाश्रयेषु प्रबन्धान्तर्वर्तिषु तु सन्दानितकादिषु, यथोक्तं सम्प्रत्युक्तानुरूपं प्रबन्धौचित्यमेव, न तु बन्धद्रढिमानुकूल्यमनुसर्तव्यं, सङ्घटनानियामकत्वेनेति शेषः ।

सन्दानितकादिषु स्वतन्त्रेषु प्रबन्धदार्ढ्यानुसारिणी, प्रबन्धघटकेषु तु प्रबन्धानुसारिण्येव सङ्घटनेति सारम् ।

प्रबन्धान्तर्गतानां पद्यानां मिथः सम्बन्धेन मुक्तकं तत्र न सम्भवतीति न मन्तव्यम् । तेषां तत्र पार्यन्तिकसापेक्षत्वेऽपि बहुत्र शाब्दप्रतीतिजननपर्यन्तं, कुत्रचिद् रसास्वादं यावच्च स्वातन्त्र्योपलम्भान्मुक्तकत्वाभ्युपगमे बाधाभावात् । पूर्वापरनैरपेक्ष्येण रसचर्वणाप्रयोजकत्वस्यैव मुक्तकत्वात् ।

तथा हि मदीये राधापरिणये—

'उल्लङ्घ्य गौरवमुपेक्ष्य वचो गुरूणामालीजनाननवरुध्य विहाय भीतेः ।
लज्जां विसृज्य च हरे ! भवदेकतानस्वान्ताऽन्तिकं सततमुद्यतते वताप्तुम् ॥' इति।

मेघदूते—

'तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी,
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां,
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥' इति च ।

पर्यायबन्धे विशेषमाह—

पर्यायबन्धे पुनरसमासा-मध्यमसमासे एव सङ्घटने । कदाचिदर्थौचित्याश्रयेण दीर्घसमासायामपि सङ्घटनायां परुषा ग्राम्या च वृत्तिः परिहर्तव्या ।

पर्यायबन्धे प्रायः शृङ्गारस्य प्राधान्येन व्यङ्ग्यतेति तत्र दीर्घसमाससङ्घटनायाः परिहार्यता । अभ्युपगमस्तु रसान्तरे व्यङ्ग्ये वक्तृवाच्यौद्धत्ये, नीरसत्वे वा । परुषावृत्तिर्गौडीरीतिरेवेत्युक्तमेव ।

ग्राम्यावृत्तिस्तु—

'शेषैर्वर्णैर्यथायोगं ग्रथितां कोमलाख्यया ।
ग्राम्यां वृत्तिं प्रशंसन्ति काव्ये निष्णातबुद्धयः ॥' इत्युद्भटेन

लक्षिता पाञ्चाली रीतिरेव । तयोर्दूरीकरणे प्रकृतरसभङ्गप्रसङ्गादिति केचित् । परे तु रौद्रादेः कदाचिद् व्यङ्ग्यत्वे परुषायाः, सर्वत्र रसेषु ग्राम्यायाश्चानुकूल्यमेवेति चिन्त्यमिदमिति व्याहरन्ति ।

परिकथायां विशेषमाह—

परिकथायां तु कामचारः, तत्रेतिवृत्तमात्रोपन्यासेन नात्यन्तं रसबन्धाभिनिवेशात् ।

नात्यन्तमित्यभिनिवेशोऽन्वेति । तेन यत्किञ्चित्तु तत्रापि स्यात् ।

खण्डकथा–सकलकथयोर्विशेषमाह—

खण्डकथा–सकलकथयोः प्राकृतप्रसिद्धयोः कुलकादिनिबन्धनभूयस्त्वाद् दीर्घसमासायामपि न विरोधः ।

कुलकादिष्वर्थप्रतीतिविलम्बो हि स्वाभाविकः, रसप्रवणता च नैव भूयसी । अपिनाऽसमास–मध्यमसमाससङ्घटनयोरनुमतिः क्वचित् सूच्यते ।

तत्रापि विशेषमाह—

वृत्त्यौचित्यं तु यथारसमनुसर्तव्यम् ।

प्रबन्धरसानुसारेण परुषाऽऽदिवृत्तीनामौचित्यमनुरोद्धव्यमेवेति सारम् ।

महाकाव्ये नियममाह—

सर्गबन्धे तु रसतात्पर्येण यथारसमौचित्यम् । अन्यथा तु कामचारः ।

तुनाऽभिनेयार्थं व्यवच्छिद्यते । अन्यथा रसतात्पर्यविरहे । महाकाव्यं कविर्यदि रसनिवेशाभिप्रायेण कुर्यात्, तदा रसानुसारेणैव वृत्तीनां व्यवस्था, यदि तु रसमुपेक्ष्येतिवृत्तमात्रवर्णनतात्पर्येण कुर्यात्, तदा पोषणीयरसविरहेण वृत्तीनामनियम इति पर्यवसितम् ।

नन्वितिवृत्तवर्णनमात्रतात्पर्येण कृतं काव्यं न दृश्यत इत्यत आह—

द्वयोरपि मार्गयोः सर्गबन्धविधायिनां दर्शनात् ।

द्वयोर्मार्गयोरिति सप्तमी । रसेषु तात्पर्यमितिवृत्तेषु वा यत्रेति मार्गद्वयम् । उभयत्र कविप्रवृत्तिदर्शनादुभयोरपि सम्भव इति सारम् ।

तत्र रसतात्पर्येण कालिदासादे रघुवंशादि, कथामात्रतात्पर्येण भट्टजयन्तादेः कादम्बरीकथासारादि प्रसिद्धम् ।

तयोर्मध्ये श्रेष्ठमाख्याति—

रसतात्पर्यं साधीयः ।

साधीय इष्टम् , रसास्वादनगर्भोपदेशार्थमेव काव्यप्रवृत्तेः ।

दृश्यकाव्येषु नियममाचष्टे—

अभिनेयार्थे तु सर्वथा रसबन्धेऽभिनिवेशः कार्यः ।

रसतात्पर्यविरहे दृश्यकाव्यस्याचमत्कारित्वेन स्वरूपहानिप्रसङ्गात् ।

आख्यायिका-कथयोरथ नियममभिधातुमुपक्रममाणोऽग्रिमकारिकामवतारयति—

आख्यायिका-कथयोस्तु गद्यनिबन्धबाहुल्याद् , गद्ये च छन्दोबन्ध-भिन्नप्रस्थानत्वादिह नियमे हेतुरकृतपूर्वोऽपि मनाक् क्रियते—

प्रस्थानं मार्गरूपा रीतिरिति प्राग् व्याख्यातमेव । इह गद्ये, नियमे हेतुर्नियामकः, सङ्घटनाया इति शेषः । अकृतपूर्वोऽपि पूर्वं क्वचिदनुक्तोऽपि, मनागीषत् , सङ्क्षेपेणेति यावत् । क्रियते साम्प्रतमुच्यते । यद्वा–इहेति क्रियत इत्यनेनान्वेति ।

'एतद् यथोक्तमौचित्यमेव तस्या नियामकम् ।
सर्वत्र गद्यबन्धेऽपि च्छन्दोनियमवर्जिते ॥ ६४ ॥'

एतत् सम्प्रति पद्यकाव्यप्रस्तावे यथोक्तमुक्तकमनतिक्रम्य वक्तृवाच्यप्रबन्धानामौचित्यमेव, न त्वन्यत् किमपि, छन्दोनियमवर्जिते 'वृत्तबन्धोज्झितं गद्यम्' इति लक्षणाच्छन्दोविहीने सर्वत्र गद्यबन्धे गद्यकाव्येऽपि तस्याः सङ्घटनाया नियामकमित्यर्थः ।

विशेषानुक्तेस्तुल्यन्यायादुभयत्र सङ्घटनानियमहेतुस्तुल्य एवेति सारम् ।

तद् ब्रवीति वृत्तिकारः—

यदेतदौचित्यं वक्तृवाच्यगतं सङ्घटनाया नियामकमुक्तम्, एतदेव गद्ये छन्दोनियमवर्जितेऽपि विषयापेक्षं नियमहेतुः ।

विषयः प्रबन्धस्तदपेक्षमौचित्यमेव । प्रबन्धौचित्यस्य वक्तृवाच्यौचित्याभ्यां पृथगुपादानं प्राधान्यं सूचयति ।

उपपादयति—

तथा हि—अत्रापि यदा कविः, कविनिबद्धो वा वक्ता रसभावरहितः, तदा कामचारः । रसभावसमन्विते तु वक्तरि पूर्वोक्तमेवानुसर्तव्यम् ।

अत्र गद्यकाव्येऽपि पूर्वोक्तं वक्त्राद्यौचित्यम् ।

प्रबन्धौचित्यस्य प्राधान्यं दर्शयति—

तत्रापि वा विषयौचित्यमेव ।

प्राधान्यादनुरोद्धव्यमिति शेषः ।

तदौचित्यमेव निर्वक्ति—

आख्यायिकायां तु भूम्ना मध्यमसमासा-दीर्घसमासे एव सङ्घटने ।

भूम्ना बाहुल्येन । निबद्धव्ये इति शेषः ।

तत्र हेतुमाह—

गद्यस्य विकटनिबन्धाश्रयेण च्छायावत्त्वात् ।

गाढबन्धमेव हि गद्यं शोभते । नव्यास्तु चूर्णिकाप्रायमेव प्रशंसन्ति ।

तस्य निमित्तमभिधत्ते—

तत्र च तस्य प्रकृष्यमाणत्वात् ।

तत्र विकटनिबन्धे तस्य च्छायावत्त्वस्य प्रकृष्यमाणत्वादाधिक्यादित्यर्थः ।

कथायामौचित्यमाह—

कथायां तु विकटबन्धप्राचुर्येऽपि गद्यस्य, रसबन्धोक्तमौचित्यमेवानुसर्तव्यम् ।

'कथायां सरसं वस्तु' इत्याद्युक्ते रसौचित्यानुसरणमेव तत्र ज्यायः ।

चरमं पक्षं द्रढयति कारिकाकारः—

'रसबन्धोक्तमौचित्यं भाति सर्वत्र संश्रिता ।
रचना, विषयापेक्षं तत्तु किञ्चिद्विभेदवत् ॥ ९५ ॥'

सर्वत्र पद्य इव गद्येऽपि रसबन्धोक्तमौचित्यं प्रागुक्तप्रबन्धरसौचित्यं संश्रि-

ता रचना सङ्घटना भाति। तद् रसौचित्यं तु पुनः, विषयापेक्षं प्रबन्धौचित्यानुरोधि सत्, किञ्चिद् विभेदवदीषदेव । न त्वत्यन्तं लक्षणं भवतीत्यर्थः ।

सर्वत्र सङ्घटनायां रसौचित्यमादरणीयम् । न चैतावता विषयौचित्यस्यानादरः, तदनुरोधेनापि तस्या आवान्तरिक-यत्किञ्चिद्वैलक्षण्यदर्शनात् । किन्तु मुख्यं रसौचित्यमेवेति भावः ।

तद्वक्ति वृत्तिकृत्—

अथवा पद्यवद् गद्यबन्धेऽपि रसबन्धोक्तमौचित्यं सर्वत्र संश्रिता रचना भाति । तत्तु विषयापेक्षं किञ्चिद्विशेषवद् भवति । न तु सर्वाकारम् ।

'स्त्रियो नरपतिर्वह्निर्विषं युक्त्या निषेवितम् ।
स्वार्थाय यदि वा दुःख-सम्भारायैव केवलम् ॥'

इतिवद् वाशब्दोऽत्रपक्षे ज्यायस्त्वं सूचयति । पद्यवदिति सप्तम्यन्ताद्वतिः । सर्वाकारं सर्वथाऽत्यन्तमिति यावत् । तच्च क्रियाविशेषणम् ।

सर्वथा वैलक्षण्ये तु तस्यापि मुख्यत्वमेव स्यादिति तात्पर्यम् ।

तदेव दर्शयति—

तथा हि गद्यबन्धेऽप्यतिदीर्घसमासा रचना न विप्रलम्भशृङ्गार-करुणयोराख्यायिकायामपि शोभते ।

सर्वत्रेति शेषः । यदि हि प्रबन्धौचित्यमेव मुख्यं स्यात्, तदाऽऽख्यायिकायामपि करुणविप्रलम्भयोर्दीर्घसमासैव सङ्घटना शोभेत , न च तथा । तस्माद् रसौचित्यमेव श्रेय इति सारम् ।

विशेषमाह—

नाटकादावप्यसमासैव घटना ।

शोभत इति शेषः । नाटकादौ दृश्यकाव्ये । अपिना करुणादिव्यञ्जकश्रव्यकाव्यं परिगृह्यते ।

पुनर्विशेषमाह—

रौद्रवीरादिवर्णने विषयापेक्षं त्वौचित्यं प्रमाणतोऽपकृष्यते प्रकृष्यते च

प्रबन्धानुसारि यदौचित्यमुक्तं, तदपि रौद्रादिरसानुरोधेन कुत्रचित् प्रमाणान्न्यूनमधिकं च भवतीति सर्वथा रसौचित्यस्यैव प्राधान्यम् , प्रबन्धौचित्यादेस्तु तदनुयायित्वमिति भावः ।

उपपादयति—

तथा हि—आख्यायिकायां नात्यन्तमसमासा, स्वविषयेऽपि नाटकादौ नातिदीर्घसमासा चेति सङ्घटनाया दिगनुसर्तव्या ।

आख्यायिकायां स्वविषये करुणादावपि प्राधान्येन व्यङ्ग्ये, नात्यन्तमसमासैव, नाटकादौ स्वविषये रौद्रादावपि नातिदीर्घसमासा सङ्घटना भवति, विषयौचित्यस्यापि किञ्चिदनुरोद्धव्यत्वात् । इत्थं च प्रबन्धाद्यौचित्यसहकृतं रसौचित्यं मुख्यं सङ्घटनानियामकमिति फलितम् । किञ्च सङ्घटनाऽपि रसव्यञ्जिकेत्युपक्रान्तं निरूपितमिति द्रष्टव्यम् ।

उपसंहरति—

'इति काव्यार्थविवेको योऽयं चेतश्चमत्कृतिविधायी ।
सूरिभिरनुसृतसारैरस्मदुपज्ञो न विस्मार्यः ॥' इति ।

इत्येवंरूपः, चेतश्चमत्कृतिविधायी चमत्कारको योऽयं काव्यार्थानां विवेकः, अस्मदुपज्ञो वयमेवोपज्ञा आद्यज्ञातारो यस्य तादृशः, अनुसृतसारैस्तत्त्वान्वेषिभिः सूरिभि र्ध्वनिपाण्डित्यमिच्छद्भिर्न विस्मार्यो, नैव विस्मरणीय इत्यर्थः ।

इह—चेत इत्याद्यपरिहार्यताम्, अनुसृतेत्यादि पक्षपातराहित्यम्, अस्मदित्याद्यात्मसम्भावनामुखेन विषयगौरवम्, ण्यत्प्रत्ययो विधानावश्यकत्वम्, चरमेतिश्च प्रकरणावसानं सूचयति ।

इत्थं सङ्घटनाया रसव्यञ्जकतां निरूप्य, प्रबन्धस्य रसव्यञ्जकतां सर्वसम्मतत्वेन प्रसिद्धामनिरूपयन् कविसहृदयव्युत्पत्तये तद्व्यञ्जनप्रकारमेवाभिदधतीः कारिका अवतारयति—

इदानीमलक्ष्यक्रमव्यङ्ग्यो ध्वनिः प्रबन्धात्मा रामायणमहाभारतादौ प्रकाशमानः, प्रसिद्ध एव तस्य तु यथा प्रकाशनं, तत्प्रतिपाद्यते—

. तस्य रसादिध्वनेः । तच्छब्देनान्तिमेन प्रकाशनप्रकारः परामृश्यते ।

रसादिव्यञ्जनोपयोगिनः प्रकारानेवाह—

'विभावभावानुभाव-सञ्चार्यौचित्यचारुणः ।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ॥ १० ॥

इतिवृत्तवशायातां त्यक्त्वाऽननुगुणां स्थितिम् ।
उत्प्रेक्ष्याप्यन्तराभीष्ट-रसोचितकथोन्नयः ॥ ६७ ॥
सन्धिसन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया ।
न तु केवलया शास्त्र-स्थितिसम्पादनेच्छया ॥ ६८ ॥
उद्दीपनप्रशमने यथाऽवसरमन्तरा ।
रसस्यारब्धविश्रान्तेरनुसन्धानमङ्गिनः ॥ ६९ ॥
अलङ्कृतीनां शक्तावप्यानुरूप्येण योजनम् ।
प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम् ॥ ७० ॥'

इह प्रबन्धस्य रसव्यञ्जकत्वे रसोचितकथायाः स्थापनं प्रथमम्, तत्रानुपयोग्यंशस्यहानम्, उपयोग्यंशस्य कल्पनं च द्वितीयम्, रसोपयोगिसन्धि–तदङ्गसन्निवेशनं तृतीयम्, उचितेऽवसरे रसस्योद्दीपनप्रशमनयोजनं चतुर्थम्, प्रबन्धसमाप्तिपर्यन्तमङ्गिरसानुसन्धानं पञ्चमम्, अलङ्काराणां रसोपयोगितया घटनं षष्ठं च कारणमेतत्कारिकानिकरेण क्रमशो दर्शितम् ।

विभावः—'विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते ।
विभावो नाम स द्वेधाऽऽलम्बनोद्दीपनात्मकः ॥'

इत्याग्नेयोक्तलक्षणविभाग आलम्बनरूप उद्दीपनरूपश्च रत्यादिस्थायिभावकारणम् ।

भावः—'रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः ।
भावः प्रोक्तः' इति मम्मटलक्षितोऽपरिपुष्टः स्थायी, लब्धप्राधान्यो व्यभिचारी च रसाद्यन्यतमः । इह 'स्थायीभाव उपनिबध्यमानः' इत्यग्रिमग्रन्थसंवादाय भावपदेनापरिपुष्टस्थायिमात्रस्य ग्रहणमवगन्तव्यम् ।

अनुभावः—'अनुभावो विकारस्तु भावसंसूचनात्मकः' इति धनिकोदितलक्षणः स्थायिकार्यविशेषः,

व्यभिचार्यपरपर्यायः सञ्चारी—'विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः ॥'

इति दर्पणप्रतिपादितलक्षणविभागो रसस्य पोषकः सहकारी च, तेषामौचित्येन प्रस्तुत रसानुकूल्येन चारुणश्चमत्कारितया सुन्दरस्य वृत्तस्य पुराणादिप्रसिद्धस्य, उत्प्रे-

क्षितस्य कविना स्वयं कल्पितस्य वा कथाशरीरस्येतिवृत्ताकारस्य विधिर्विधानं प्रबन्धस्य रसादीनां व्यञ्जकत्वे प्रथमं निबन्धनं निमित्तं भवति ।

एतेन—'परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ॥
आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः ॥
अर्थानौचित्यमन्यच्च' इति दर्पणोक्तरसदोषपरिहार उक्तः ।

इति वृत्तवशेन कथाप्रसङ्गेनायातामुपस्थिताम्, अननुगुणां रसप्रतिकूलां स्थितिमितिवृत्तांशं त्यक्त्वा, उत्प्रेक्ष्यापि स्वयं कल्पनां विधायापि, अन्तरा मध्ये, रसोचिताया रसानुगुणाया उन्नय ऊहस्तत्र द्वितीयं निबन्धनं भवति ।

तथा चोक्तं दर्पणे—'अविरुद्धं तु यद्वृत्तं रसाभिव्यक्तयेऽधिकम् ।
तदप्यन्यथयेद् धीमान् न वदेद्वा कदाचन ॥'
'यत् स्यादनुचितं वस्तु नायकस्य रसस्य वा ।
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत् ॥' इति ।

रसानामभिव्यक्त्यपेक्षया व्यञ्जनानुकूल्येन न तु—न पुनः केवलया शास्त्रस्थितिसम्पादनेच्छया भरतादिप्रणीतशास्त्रीयसिद्धान्तानुसरणस्पृहामात्रेण, सन्धीनां मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्यानामन्यत्र लक्षितानां पञ्चानाम्, सन्ध्यङ्गानामुपक्षेपपरिकरप्रभृतीनां चतुःषष्टेर्घटनं योजनं तत्र तृतीयं कारणं भवति ।

तथा चोक्तं दर्पणे—'चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः ।
कुर्यादनियते तस्य सन्धावपि निवेशनम् ॥
रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता ।
रसव्यक्तिमपेक्ष्यैषामङ्गानां विनिवेशनम् ॥
न तु केवलया शास्त्र-स्थितिसम्पादनेच्छया ॥' इति ।

एतेन—'अतिविस्तृतिरङ्गस्य' इति तदुक्तरसदोषपरिहार उक्तः ।

अन्तरा मध्ये, यथाऽवसरमुचितावसरे रसस्योद्दीपनं प्रशमनं च तत्र चतुर्थं कारणं भवति ।

एतेन—'अकाण्डे प्रथनच्छेदौ' इति दर्पणोक्तरसदोषपरिहार उक्तः ।

आरब्धविश्रान्तेः प्रबन्धस्यारम्भादवसानं यावदङ्गिनः प्रधानस्य रसस्यानुसन्धानमविस्मरणं पञ्चमं तत्र निबन्धनं भवति ।

एतेन—'अङ्गिनोऽननुसन्धानम्' इति दर्पणोक्तरसदोषपरिहार उक्तः ।

शक्तावलङ्कारयोजकप्रतिभायां सत्यामपि, अलंकृतीनामलङ्काराणामानुरूप्येण रसानुगुण्येन योजनं च षष्ठं तत्र निबन्धनं भवतीत्यर्थः ।

'उत्प्रेक्ष्यः' इति पाठस्तु समन्वयासङ्गतेरुन्नयेन पौनरुक्त्याच्च परित्यक्तः । ल्यबुपपत्तिरावान्तरिकक्रियाऽध्याहारेण करणीया, समन्वयश्च दर्शितदिशेति ज्ञेयम् ।

तदाह वृत्तिकृत्—

प्रबन्धोऽपि रसादीनां व्यञ्जक इत्युक्तम्, तस्य व्यञ्जकत्वे निबन्धनं प्रथमं तावद् विभावभावानुभावसञ्चार्यौचित्यचारुणः कथाशरीरस्य विधिः—यथायथं प्रतिपिपादयिषितरसभावाद्यपेक्षया य उचितो विभावो भावोऽनुभावः सञ्चारी वा, तदौचित्यचारुणः कथाशरीरस्य विधिर्व्यञ्जकत्वे निबन्धनमेकम् ।

एकमिति प्रथममित्यस्य विवृतिः । इतिवृत्तं प्रबन्धे तादृशमेव योजनीयं, यत्र प्रस्तुतरसानुगुणानां विभावादीनां सन्निवेशः स्यादिति भावः ।

तदेव पुनर्व्यष्ट्या प्रतिपादयति—

तत्र विभावौचित्यं तावत् प्रसिद्धम् । भावौचित्यं तु प्रकृत्यौचित्यात् । प्रकृतिह्युत्तममध्यमाधमभावेन, दिव्यमानुषादिभावेन च विभेदिनी । तां यथायथमनुसृत्यासङ्कीर्णः स्थायीभाव उपनिबध्यमान औचित्यवान् भवति ।

प्रसिद्धं लोके भरतादिशासने च । तथा हि—शृङ्गारे प्रस्तुते नायिका नायकश्चालम्बनम्,

'ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥'

इति भरतोक्तेर्ऋतुमाल्यादीन्युद्दीपनानि, तदौचित्यम् । प्रकृतिश्चोत्तमामध्यमाऽधमेति त्रिविधा, पुनर्दिव्या मानुष्यदिव्या दिव्यमानुषी—दिव्यादिव्या चेति त्रिविधा । असङ्कीर्णः प्रतिकूलभावान्तरासम्पृक्तः ।

अधमप्रकृतावुत्तमप्रकृत्युचितो दिव्यप्रकृतौ मानुषप्रकृत्युचितश्च रत्यादिभाव उपवर्ण्यमान औचित्यं नावहति, प्रत्युत प्रतिकूलतया वर्णनस्य वैतथ्यमुपस्थापयन् वैरस्यमादधातीत्याह—

अन्यथा तु केवलमानुषाश्रयेण दिव्यस्य, केवलदिव्याश्रयेण वा मानुषस्योत्साहादय उपनिबध्यमाना अनुचिता भवन्ति । तथा च केवलमानु-

षस्य राजादेर्वर्णने सप्तार्णवलङ्घनादिलक्षणा व्यापारा उपनिबध्यमानाः सौष्ठवभृतोऽपि नीरसा एव नियमेन भान्ति। तत्र त्वनौचित्यमेव हेतुः।

व्यापारास्तद्विषयकोत्साहाः। सौष्ठवभृतः सुन्दरा वर्णनप्रभावेणेति शेषः। तत्र नीरसत्वेन भाने। अनुचितत्वादेव सरसा अपि नीरसा इव प्रतीयन्त इति तात्पर्यम्।

तत्राशङ्कते—

ननु नागलोकगमनादयः सातवाहनप्रभृतीनां श्रूयन्ते, तद्लोकसामान्यप्रभावादतिशयवर्णने किमनौचित्यं सर्वोर्वीभरणक्षमाणां क्षमाभुजामिति।

सातवाहनो नरपतिः पातालं जगामेतिवृत्तमन्यत्र प्रसिद्धम्। गोदावरीतीरस्थकुन्तलजनपदावयव—प्रतिष्ठानाख्यनगरस्वामी हालसातवाहनस्तदन्यो वाऽयमिति निर्णेतुं न शक्यते। अयमेव शकप्रवर्तको गाथासप्तशतीकृद् गुणाढ्यसेवितः शालिवाहन इति केचित्। क्षमाभुजां राज्ञाम्।

साधारणमनुष्यस्यापि राज्ञः प्रभावातिशयवर्णनवशादद्भुतचरितं यदि वर्ण्यते, तदा विशिष्टस्य तद्वर्णनेऽनौचित्यं सुतरामेव स्यादिति भावः।

खण्डयति—

नैतदस्ति, न वयं ब्रूमो यत्प्रभावातिशयवर्णनमनुचितं राज्ञाम्, किन्तु-केवलमानुषाश्रयेण योत्पाद्यवस्तुकथा क्रियते, तस्यां दिव्यमौचित्यं न योजनीयम्। दिव्यमानुषायां तु कथायामुभयमौचित्ययोजनमविरुद्धमेव।

उत्पाद्यं कल्पनीयमेव, न तु पूर्वसिद्धं वस्तु यस्यां तादृशी या कथा, कल्पितेतिवृत्तमिति यावत्।

प्राचीनस्यासम्भाव्यवृत्तान्तस्य वर्णने चिररूढिर्द्रढयति लोकप्रत्ययम्, नवीनस्य तस्य कल्पने तु तादृशस्खलनेन लोकानामप्रत्ययः स्यादेवेति तत्र प्रमादोऽनुचित इत्यत्रैव तात्पर्यमित्यभिसन्धिः।

उदाहरति—

यथा—पाण्ड्वादि कथा।

पाण्डुनरपतेः कुरुवंशोद्भवस्य दिव्यमानुषप्रकृतित्वादुभयौचित्ययोजनमप्यविरुद्धम्। वस्तुतस्तु 'यथा—पाण्डवादिकथा' इति पाठः समीचीनः प्रतिभाति, पाण्डवेषु सवपुषो युधिष्ठिरस्य स्वर्गगतेः, भीमस्य दुर्योधनादिकृतगरलपायनानन्तरं पाथःपथेन नागलोकगतेः, सौगन्धिकाहरणाय देवलोकगतेर्वा, गाण्डीविन उलूप्याः

परिणयाय पातालगतेश्च भारतादौ प्रसिद्धत्वात्, पाण्डोस्तादृशालौकिकचरितस्याश्रुतत्वाच्च ।

ननु तर्हि सातवाहनचरिते कथं सङ्गतिरित्यत आह—

सातवाहनादिषु तु येषु यावदपदानं श्रूयते, तेषु तावन्मात्रमनुगम्यमानमनुगुणत्वेन प्रतिभासते । व्यतिरिक्तं तु तेषामेवोपनिबध्यमानमनुचितम् ।

अपदानं प्राचीनप्रशस्तचरितम्, 'अपदानं कर्मवृत्तम्' इत्यमरकोशात् । अनुगम्यमानं वर्ण्यमानम् । व्यतिरिक्तं तद्भिन्नमधिकम् । सातवाहनादिष्वित्याधारे सप्तमी, व्यापारात्मकस्य चरितस्य पुरुषाधेयत्वात् ।

मानवेषु प्रसिद्धमलौकिकमपि चरितं यदि वर्ण्यते, न तावता वैतथ्यं प्रतिभातीति तद्वर्णनीयम् । तेष्वेवाप्रसिद्धालौकिकचरितवर्णने त्वसत्यताप्रतिभासो दुर्वार एव, तस्मात् परिहरणीयमिति तात्पर्यम् ।

ननु यदि सौष्ठवं तत्रापि वर्णनवशेन स्यादेव, तर्हि किमनौचित्येनेत्यत आह—

तदयमत्र परमार्थः—

'अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ॥'

अनौचित्यादृतेऽनौचित्यं विना रसभङ्गस्यान्यत् कारणं नास्तीति शेषः । प्रसिद्धं यदौचित्यं तस्य बन्धो योजनन्तु पुनः, रसस्य, परोत्कृष्टा, उपनिषत् प्रकाशनोपाय इत्यर्थः ।

रसभङ्गेऽनौचित्यमेव सर्वप्रधानं कारणम्, तेनासत्यत्वप्रतिभासात् । औचित्यं तु तथैव रसं प्रकाशयति, यथोपनिषत् परब्रह्मेत्यनौचित्यं सर्वथा परिहरणीयम्, औचित्यं त्वाकलनीयमित्याकूतम् ।

समर्थयति—

अत एव च भरते—प्रबन्धप्रख्यातवस्तुविषयत्वं प्रख्यातोदात्तनायकत्वं च नाटकस्यावश्यकर्तव्यतयोपन्यस्तम् ।

अत एव—कल्पिते वृत्तेऽनौचित्यस्य नितरां रसभङ्गप्रसङ्गप्रयोजकत्वादेव, भरते भरतमुनिप्रणीतनाट्यशास्त्रे-प्रबन्धे रामायणादौ प्रख्यातं वस्त्वितिवृत्तमाधिकारिकप्रासङ्गिकरूपं विषयः प्रतिपाद्यं यत्र तत्त्वम्, प्रख्यात उदात्त उत्कृष्टो धीरोदात्तलक्ष-

णान्वितो वा नायको यत्र तादृशत्वं च नाटकस्य, अवश्यकर्तव्यतयोपन्यस्त-मुक्तमित्यर्थः ।

नाटके प्रसिद्धवृत्तान्तस्य प्रसिद्धतमरामादिधीरोदात्तनायकस्य वर्णने तन्माहात्म्यप्रकर्षेणानौचित्यप्रत्ययाभावाद् रसभङ्गाभाव इत्याशयः ।

धीरोदात्तलक्षणं च दशरूपके यथा—'महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः॥' इति।

अवश्यकर्तव्यतायां हेतुमाह—

तेन हि नायकौचित्यानौचित्यविषये कर्तव्ये कविर्न विमुह्यति ।

रामादेर्महामहनीयमहिम्नाऽद्भुतमपि वर्ण्यमानं चरितं नानुचितं प्रतिभातीति भावः । कल्पितेतिवृत्तादिविषय आह—

यस्तूत्पाद्यवस्तु नाटकादि कुर्यात्, तस्याप्रसिद्धानुचितनायकस्वभाववर्णने महान् प्रमादः ।

यस्तु कविः । प्रमादोऽनवधानता स्खलनलक्षणा सम्भवतीति शेषः ।

अत एव—'इत्याद्यशेषमिह वस्तुविभेदजातं,
रामायणादि च विभाव्य बृहत्कथां च ।
आसूत्रयेत् तदनु नेतृरसानुगुण्या-
च्चित्रां कथामुचितचारुवचःप्रपञ्चैः ॥' इति धनिकेनाप्युक्तम् ।

नाटकादीत्यतद्गुणसंविज्ञानो बहुव्रीहिः, तेन प्रकरणादीनां कल्पनीयेतिवृत्तानामेव परिग्रहः । अन्यथा नाटकस्य ख्यातवृत्तत्वानुशासनादसङ्गतिरिति द्रष्टव्यम् ।

ननु कल्पितेतिवृत्तेऽप्युत्साहादिनिबन्ध एवानौचित्यसम्भावना, न तु रत्यादिनिबन्ध इति सम्भोगशृङ्गारोपनिबन्धे वृत्तकल्पनायामपि न क्षतिरित्याशङ्कते—

ननु यद्युत्साहादिभाववर्णने कथंचिद् दिव्यमानुष्याद्यौचित्यपरीक्षा क्रियते, तत् क्रियताम्, रत्यादौ तु किन्तया प्रयोजनम्? रतिर्हि भारतवर्षोचितेनैव व्यवहारेण दिव्यानामपि वर्णनीयेति स्थितिः ।

दिवि भवं दिव्यं मनुष्ये भवं मानुष्यं चौचित्यम् । परीक्षा विवेकः इतिरित्यादिना रत्यादिपरीक्षात्यागहेतुरुक्तः । स्थितिर्मर्यादा ।

केवलमुत्साहादौ सुरमनुजयोर्भेदो भवति, न तु रतौ, प्रेम्णः सर्वत्र तुल्यरूपेणैव वर्णनीयत्वादिति सारम् ।

खण्डयति—

नैवम् , तत्रौचित्यातिक्रमे (ण) सुतरां दोषः । तथा हि–अधमप्रकृत्यौचित्येनोत्तमप्रकृतेः शृङ्गारोपनिबन्धने का भवेन्नोपहास्यता ? । विविधं प्रकृत्यौचित्यं भारते वर्षेऽप्यस्ति शृङ्गारविषयम् ।

तत्र रतौ । का कीदृशी उपहास्यता न भवेत् ? अपि तु सर्वविधाऽपि भवेदेव । विविधमुत्तममध्यमाधमत्वेन नानाप्रकारम् ।

अयं भावः–यथोत्साहो यथा देवानां न तथा मनुजानामित्युभयौचित्यभेदः, तथैव—'स्थैर्येणोत्तममध्यमाश्रयाणां नीचानां सम्भ्रमेण' इत्यादि भरतानुशासनाश्लोकानुभवाच्च यथा रतिरुत्तममध्यमप्रकृतीनां न तथाऽधमप्रकृतीनामिति रत्यौचित्येऽपि तारतम्यात् परीक्षणमावश्यकमेव ।

तथाऽपि दिव्यौचित्यपरीक्षा तु रतावयुक्तैवेति शङ्कते—

यत्त्वन्यद् दिव्यमौचित्यम् , तदत्रानुपकारकमेवेति चेत् ।

अतो न परीक्षणीयमिति भावः ।

खण्डयति—

न वयं दिव्यमौचित्यं शृङ्गारविषयमन्यत् किञ्चिद् ब्रूमः, किं तर्हि ? भारतवर्षविषये यथोत्तमनायकेषु राजादिषु शृङ्गारोपनिबन्धः, तथा दिव्याश्रयोऽपि शोभते । न च राजादिषु प्रसिद्धग्राम्यशृङ्गारोपनिबन्धनं प्रसिद्धं नाटकादौ । तथैव देवेषु तत् परिहर्तव्यम् ।

दिव्याश्रय इति शृङ्गारोपनिबन्धस्य विशेषणम् ।

उत्तममानवप्रकृत्यौचित्यमेव रतौ दिव्यौचित्यम्, न त्वन्यत् किमपि, तथा च–तारतम्यस्य रतावपि सत्त्वम् । न चेत्यादि समर्थनम् । तद्–अप्रसिद्धग्राम्यशृङ्गारोपनिबन्धनम् ।

नाटकादौ हि 'रतं तथा ।' 'दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरञ्च यत् ।' 'शयनाधरपानादि' 'एभिर्वर्जितः' इति दर्पणोक्तेर्ग्राम्यसम्भोगशृङ्गारोपनिबन्धस्याभिनयानौचित्येन निषेधः ।

नन्वभिनयायोगात् सम्भोगस्य दृश्यकाव्य एव निषेधो, न तु श्रव्यकाव्येऽपीति कुतस्तद्बलेन रतिभेदकल्पनेत्याशङ्कते—

नाटकादेरभिनेयत्वादभिनेयस्य च सम्भोगशृङ्गाराविषयत्वात् तत्र परिहार इति चेत् ,

परिहारो रतिभेदकल्पनसमर्थनस्य ।

निरस्यति—

न, यद्यभिनेयस्यैवंविषयस्यासह्यता, तत् काव्यस्यैवंविषयस्य सा केन (नि) वार्यते ।

उपक्रमोपसंहारानुरोधाद् 'अभिनेयस्य' इति पठितम् । एवं विषयस्य सम्भोगविषयकस्य । असह्यताऽनौचित्येनामर्षणीयता । काव्यस्याभिनेयार्थभिन्नस्य श्रव्यस्य । केन निवार्यते, न केनापि । तथा च दृश्यवच्छ्रव्येऽपि काव्ये सम्भोगवर्णनमनुचितमेव ।

उपसंहर्तुमुक्तमनुवदति—

तस्मादभिनेयार्थे च काव्ये यदुत्तमप्रकृते राजादेरुत्तमप्रकृतिभिर्नायिकाभिः सह ग्राम्यसम्भोगवर्णनं, तत् पित्रोः सम्भोगवर्णनमिव सुतरामसह्यम् । तथैवोत्तमदेवताविषयम् ।

सम्भोगे ग्राम्यत्वमश्लीलत्वम् । पित्रोर्जनन्या जनकस्य च । उत्तमदेवता राधाकृष्णादयः । तद्विषयमिति सम्भोगवर्णनविशेषणम् ।

नन्वेवमुत्तमप्रकृतिविषये किं सम्भोगशृङ्गारवर्णनमनुचितमेवेत्याशङ्कायामाह—

न च सम्भोगशृङ्गारस्य सुरतलक्षण एवैकः प्रकारः, यावदन्येऽपि प्रभेदाः परस्परप्रेमदर्शनादयः सम्भवन्ति । ते कस्मादुत्तमप्रकृतिविषये न वर्ण्यन्ते ? ।

यावदिति किन्त्वर्थकमव्ययम् । परस्परस्य प्रेम दर्शनं चादिर्येषामिति बहुव्रीहिः । आदिशब्देनालापसम्मेलनादीनां परिग्रहः ।

सम्भोगशृङ्गारप्रकारेषूत्तमप्रकृतिविषये सुरतातिरिक्ता एव प्रकारा वर्णनीया इति सारम् ।

पर्यवसितमाचष्टे—

तस्मादुत्साहवद् रतावपि प्रकृत्यौचित्यमनुसर्तव्यम् । तथैव विस्मयादिषु ।

.विस्मय आश्चर्यमपि सर्वेषां नैकस्यैव विषयस्योपलम्भेन, नैकविधश्च भवति । ननु कालिदासादिमहाकवीनां कुमारसम्भवादौ पार्वतीशिवादिसुरतक्रीडावर्णनं यद् दृश्यते, तस्य का गतिरित्यत आह—

यत्त्वेवंविधे विषये महाकवीनामप्यसमीक्ष्यकारिता लक्ष्ये दृश्यते, स दोष एव ।

स इति विशेष्यवाचकदोषपदानुरोधेन पुंस्त्वनिर्देशः ।

ननु कथं न तेषां स दोषो लक्ष्यत इत्यतोऽभिधत्ते—

स तु शक्तितिरस्कृतत्वात् तेषां न लक्ष्यत इत्युक्तमेव ।

स दोषः । उक्तं द्विषष्टितमकारिकाव्याख्यानावसरे ।

इत्थं विभावभावौचित्यं प्रतिपाद्यानुभावौचित्यं समासेनाख्याति—

अनुभावौचित्यं तु भरतादौ प्रसिद्धमेव ।

तत एवावसेयमिति भावः । सञ्चार्यौचित्यमपि तत एवावगन्तव्यमिति सूचनाय तदनुपादानं बोध्यम् । तदप्यावश्यकमेव । तथा हि—लज्जा यथोत्तमप्रकृतीनां, न तथाऽधमप्रकृतीनामिति तत्रापि तारतम्यमस्त्येवेति दिक् ।

समासेनोपसंहरति—

इयत्तूच्यते—भरतादिस्थितिं चानुवर्तमानेन महाकविप्रबन्धांश्च पर्यालोचयता, स्वप्रतिभां चानुसरता, कविनाऽवहितचेतसा भूत्वा विभावाद्यौचित्यभ्रंशपरित्यागे परः प्रयत्नो विधेयः ।

आदिशब्देन वात्स्यायनादिप्रणीतसाहित्यनिबन्धानां लोकवृत्तस्य च सङ्ग्रहः । महाकविप्रबन्धपर्यालोचनाल्लक्ष्यदर्शनेन नैपुण्यसम्पत्तिः । अवहितचेतस्त्वमप्रमादः । विभावादीनामौचित्यस्य भ्रंशो नाशस्तत्परित्याग औचित्यपरिग्रहे ।

उक्तार्थे कारिकाकृत्सम्मतिं दर्शयति—

औचित्यवतः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ग्रहो व्यञ्जक इत्यनेनैतत् प्रतिपादयति—यदितिहासादिषु रसवतीषु कथासु विविधासु सतीष्वपि, यत्तत्र विभावाद्यौचित्यवत् कथाशरीरं, तदेव ग्राह्यं, नेतरत् ।

ग्रहो ग्रहणम् । प्रतिपादयति कारिकाकृदिति शेषः । कारिकाऽऽनुपूर्वीमनादृत्य तत्प्रतिपाद्यं वस्त्वेव परामृष्टवानत्रेतिशब्देन । रसवतीषु कथास्वित्यत्र 'षष्ठी चानादरे' इति सूत्रेणानादरे सप्तमी । तेन विभावाद्यौचित्यशून्यान् सरसानपि कथांऽशाननादृत्य तद्भिन्नमेव कथांऽशमाददीत कविरित्युच्यते । वस्तुतस्तु–विभावाद्यौचित्यरहिते रसवत्त्वं तथा न सम्भवति, तेषामेव रसप्रकाशकत्वात् ।

'यथादृष्टमेव मया निबद्धमिति नात्र मे दोषः' इति समाधानमपि वृत्त एव कथाशरीरे कथंचित् सम्भवति, न तु स्वकल्पिते । तस्मात् स्वकल्पिते तादृशस्खल-

नाद् बिभ्यता कविना नितरां सावधानेन भाव्यमित्युपदिशति—

वृत्तादपि कथाशरीरादुत्प्रेक्षिते विशेषतः प्रयत्नवता भवितव्यम् ।

कुत इत्याह—

तत्र ह्यनवधानात् स्खलतः कवेरव्युत्पत्तिसम्भावना महती भवति ।

विभावाद्यौचित्यवदेव कथाशरीरं कथं न कल्पितमिति परानुयोगे किमुत्तरं दद्यादिति तात्पर्यम् ।

तदेव सङ्क्षिप्योपदिशति—

परिकरश्लोकश्चात्र—

'कथाशरीरमुत्पाद्यवस्तु कार्यं तथा तथा ।
यथा रसमयं सर्वमेवैतत् प्रतिभासते ॥

उत्पाद्यवस्तूत्प्रेक्षितेतिवृत्तं कथाशरीरं कविना तथा तथा तेन तेन विभावाद्यौचित्यसमुदञ्चितेन प्रकारेण कार्यम् । यथा सर्वमेवैतत् कथाशरीरं रसमयं प्रतिभासत इत्यर्थः ।

तथा तथेति द्विरुक्तिः प्रकारवैचित्र्यमवधानदानावश्यकत्वं च सूचयति । कथाशरीरस्य रसमयत्वसम्पादनोपायमुपदिशति—

तत्र चाभ्युपायः सम्यग् विभावाद्यौचित्यानुसरणम् । तच्च दर्शितमेव ।

दर्शितमनेनैव सन्दर्भेण ।

प्रसङ्गादन्यदप्युपदिशति—

किंच—'सन्ति सिद्धरसप्रख्या ये च रामायणादयः ।
कथाऽऽश्रया न तैर्योज्या स्वेच्छा रसविरोधिनी ॥'

सिद्धो निष्पन्नास्वादात्मा, न तु साध्यो निष्पत्स्यमानास्वादो रसो येषु ते सिद्धरसाः शृङ्गारादयो, यद्वाऽऽयुर्वेदप्रसिद्धाः पारदादयः, तत्प्रख्यास्तन्निमित्तकख्यातिभाजस्तत्सदृशाश्च ये रामायणादयः कथानां रामादिवृत्तान्तानामाश्रयास्तद्बोधकत्वादायतनरूपा इतिहासाः सन्ति, तैः सह रसविरोधिनी स्वेच्छा न योज्येत्यर्थः ।

स्वतो रसवतां रामायणादिप्रसिद्धेतिवृत्तानामन्यथाकरणे रसविरोधोऽपि सम्भवतीति स्वेच्छया न विधेयमिति भावः ।

सहादिशब्दायोगेऽपि 'वृद्धो यूना' इत्यादिनिर्देशात् साहित्यविवक्षामात्रे तृतीया ।

तमेवार्थं प्रमाणोपन्यासेन द्रढयति—

तेषु कथाऽऽश्रयेषु तावत् स्वेच्छैव न योज्या । यदुक्तम्—'कथामार्गे

न चातिक्रमः।' स्वेच्छाऽपि यदि योज्या, तद् रसविरोधिनी न योज्या।

तत्र स्वेच्छाया योजने रसविरोधसम्भावनाया जागरूकत्वात्। उक्तं यशोवर्मणा रामाभ्युदयनाटक इति शेषः। कथामार्गे वृत्तप्रपञ्चेऽतिक्रमः स्वेच्छयोल्लङ्घनं च कविभिर्न विधीयतामित्यर्थः।

इत्थं विस्तरेणाद्यं कारणं निरूप्य द्वितीयं निरूपयति—

इदमपरं प्रबन्धस्य रसाभिव्यञ्जकत्वे निबन्धनम्—इतिवृत्तवशायातां कथञ्चिद् रसाननुगुणां स्थितिं त्यक्त्वा, पुनरुत्प्रेक्ष्याप्यन्तराऽभीष्टरसोचितकथोन्नयो विधेयः।

इदमुच्यमानम्। अपरं द्वितीयम्। अन्यद् व्याख्यातमेव।

उदाहरति—

यथा—कालिदासप्रबन्धेषु। यथा च—सर्वसेनविरचिते हरिविजये। यथा च—मदीय एवार्जुनचरिते महाकाव्ये।

कालिदासेन यथा रघुवंशमहाकाव्येऽजप्रभृतिनृपतिपरिणयादिवृत्तान्त इतिहासाद्यप्रसिद्धोऽपि रसानुगुण्येन स्वयमुत्प्रेक्ष्य सन्निवेशितः सुतरां रसं व्यनक्ति। तथैवान्यैरपि कथाभाग ऊहनीयः। हरिविजये तु—प्रियतमसत्यभामाप्रसादनोपयोगिपारिजातहरणादि। अर्जुनविजये च—पातालविजयादिवृत्तमितिहासप्रसिद्धमप्यभिनवया भङ्ग्या निबद्धं रसव्यञ्जने निदानं बोध्यम्।

तदेव युक्तमित्याह—

कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्। तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत्, तां भङ्क्त्वाऽपि स्वतन्त्रतया रसानुगुणं कथाऽन्तरमुत्पादयेत्।

उपनिबध्नता रचयता। सर्वात्मना सर्वथा। रसपरतन्त्रेण रसैकनिबन्धनप्रवणेन। भङ्क्त्वा विच्छिद्य, दूरीकृत्येति यावत्। उत्पादयेत् कल्पयेत्।

ननु स्वेच्छया तद्दूरीकरणे प्रक्रान्तेतिवृत्तभङ्ग आपद्यत इत्यत आह—

न हि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित् प्रयोजनम्, इतिहासादेव तत्सिद्धेः।

इतिवृत्तमात्रस्य केवलकथानकस्य निर्वहणेनाविच्छिन्नसन्दर्भयोजनेन कवेर्न हि किञ्चित् प्रयोजनं फलं, सिध्येदिति शेषः। फलञ्चात्र महाकवित्वपदवीलाभः, सहृद-

याह्वानपुरस्सरोपदेशश्च । तौ च रससन्निवेशमन्तरेण सर्वथा दुरासदावेव । इतिवृत्तनिर्वहणस्य फलत्वं तु वक्तुं न युक्तम्, अन्यलभ्यत्वात्, तदुक्तमितिहासादेवेति ।

तृतीयं कारणं निरूपयति—

रसादिव्यञ्जकत्वे प्रबन्धस्य चेदमन्यन्मुख्यं निबन्धनम्—यत् सन्धीनां मुख-प्रतिमुख-गर्भा-वमर्श-निर्वहणाख्यानां, तदङ्गानां चोपक्षेपादीनां घटनं रसाभिव्यक्त्यपेक्षया ।

यथा शरीरावयवसुसन्निवेशेनात्मन उत्कर्षः, तथैव सन्धि-सन्ध्यङ्गसुयोजनेन प्रबन्धव्यङ्ग्यरसस्येति ज्ञेयम् ।

सन्धि-तदङ्गानां निरूपणं दशरूपके यथा—

'बीज—विन्दु—पताकाऽऽख्य—प्रकरी—कार्यलक्षणाः ।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः ॥'
'अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भ—यत्न—प्राप्त्याशा—नियताप्ति—फलागमाः ॥'
'अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ।
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्चसन्धयः ॥'
'अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ।'
'मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः ॥'
'मुखं बीजसमुत्पत्तिर्नानाऽर्थरससम्भवा ।'
'अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥
उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥
उद्भेदभेदकरणान्यन्वर्थान्यस्य लक्षणम् ।
लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत् ॥'
'विन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ।
विलासः परिसर्पश्च विधूतं शमनर्मणी ॥
नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम् ।
वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि ॥'
'गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ॥

द्वादशाङ्गः'

'अभूताहरणं मार्गो रूपोदाहरणे क्रमः ।
सङ्ग्रहश्चानुमानञ्च तोटकाधिबले तथा ॥
उद्वेगसम्भ्रमापेक्षाः'
'क्रोधेनावमृशेद् यत्र व्यसनाद्वा विलोभनात् ।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्शः'

'तत्रापवाद-सम्फेटौ विद्रव-द्रव-शक्तयः ।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् ॥
प्ररोचना विचलनमादानं च त्रयोदश ।'
'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ॥
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ।'
'सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ॥
प्रसादानन्दसमयाः कृतिभाषोपगूहनाः ।

पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥' इति ।

सन्ध्यङ्गानां बाहुल्याद् विस्तरभिया लक्षणं नोक्तम् । सन्धयस्तदङ्गानि चेतिवृत्तावयवात्मकत्वेनार्थविशेषा रसव्यञ्जनोपयोगिनः सुतरां भवन्तीति बोध्यम् ।

उदाहरति—

यथा—रत्नावल्याम् ।

'रत्नावली'नाटिकायां यथा प्रकृतवीररसव्यञ्जनोपयोगापेक्षयैव—

"प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ,
दैवे चेत्थं दत्तहस्तावलम्बे ।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं, तथाऽपि,

स्वेच्छाकारी भीत एवास्मि भर्तुः ॥' इति यौगन्धरायणोक्तस्वव्यापारदैवनिष्पत्तिरूपंमुखस-ध्यङ्गपरिन्यासादेः सन्निवेशस्तथैवान्यत्रापि कविना विधेयः ।

व्यतिरेकमाचष्टे—

न तु केवलं शास्त्रस्थितिसम्पादनेच्छया ।

इदं 'न तु केवलया' इत्यत्र विवृतमेव ।

एतदुच्यते—'इष्टस्यार्थस्य रचना वृत्तान्तस्यानपक्षयः ।
रागप्राप्तिः प्रयोगस्य गुह्यानां चैव गूहनम् ॥
आश्चर्यवदभिख्यानं प्रकाश्यानां प्रकाशनम् ।
अङ्गानां षड्विधं ह्येतद् दृष्टं शास्त्रे प्रयोजनम् ॥' इति

सन्ध्यङ्गप्रयोजनं व्याहरता महर्षिभरतेन सन्ध्यङ्गानां रसानुकूल्यावश्यम्भावस्यानुशासनाद् रसप्रतिकूलान्यपि केवलं तदनुशिष्टानीति गौरवादेव सन्धि-तदङ्गानि प्रबन्धेषु नैव निवेशनीयानि ।

तथाऽऽचरणेऽनुपपत्तिं निदर्शयति—

यथा वेणीसंहारे—विलासाख्यस्य प्रतिमुखसन्ध्यङ्गस्य प्रकृतरसनिबन्धानानुगुणमपि द्वितीयेऽङ्के भरतमतानुसरणमात्रेच्छया घटनम् ।

वेणीसंहारे वीररसप्रधाननाटके—

'समीहा रतिभोगार्थो विलास इति कथ्यते' इति दर्पणलक्षितो रत्याख्यभावहेतुभूतभोगविषयनायिकादिविषयकेच्छारूपो हि विलासः,प्रतिमुखसन्धिप्रथमाङ्गं नारायणभट्टेन प्रकृतवीररसानुगुण्यमनवेक्ष्यैव भानुमतीदुर्योधनयोर्योगे द्वितीयेऽङ्के केवलभरतानुशासनश्रद्धाजाड्येन यथा निवेशितो रसं न पुष्णाति, तथैव तादृशमन्यदपीति तत्परिहरणीयमित्याकूतम् ।

तुरीयं कारणं निरूपयति—

इदं चापरं प्रबन्धस्य रसव्यञ्जकत्वे निमित्तम्, यदुद्दीपनप्रशमने यथाऽवसरं (निबध्येयातां) रसस्य ।

रसस्य रसादेर्यथावसरमुचितेऽवसरे, उद्दीपनमनुकूलतमविभावादिसम्बलनपूर्वकप्रकाशनात्मिका दीप्तिः, प्रशमनं तद्विघटनप्रयोज्यास्वादधाराविच्छेदनं च निबध्येयातां, कविनेत्यर्थः ।

प्रकोष्ठघटकपाठः पूर्वापरसन्दर्भानुरोधेन कल्पितो वेद्यः ।

पुनःपुनरुद्दीप्यमानो हि रसो वैरस्यमावहति । तदुक्तमाचार्य्यैः—

'गाढं ह्यनवरतपीडितो रसः सुकुमारतरमालतीकुसुमवज्झटित्येव म्लानिमवलम्बते' विशेषतस्तु शृङ्गारः । यदाह मुनिः—

'यद्वाम्याभिनिवेशित्वं यतश्च विनिवार्यते ।
दुर्लभत्वं यतो नार्याः कामिनः सा परा रतिः ॥' इति ।

अत एवानवसरे रसस्योद्दीपनप्रशमने रसदोषत्वेनान्यत्र प्रतिपादिते। इहापि चानुपदम्—'अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम्' इत्यनेन वक्ष्यते।

उचितोद्दीपनप्रशमने रसस्योदाहरति—

यथा-रत्नावल्यामेव।

रत्नावलीप्रथमाङ्केऽनङ्गपूजाऽवसरे राजदर्शनानन्तरम्—'कहं अअं सो राआ उदअणो, जस्स अहं तादेण दिण्णा' (कथमयं स राजोदयनो, यस्याहं तातेन दत्ता) इति सागरिकाऽपराभिधरत्नावल्युक्त्या पूर्वरागशृङ्गारस्योद्दीपनमुचितावसरे विहितम्। ततस्तदङ्कान्ते वासवदत्ताऽऽख्यमहिष्या भयेन तत्स्थानात्तस्या निष्क्रमणस्योपन्यासेन तदुचितोपशमनं विहितम्। पुनर्द्वितीयाङ्कप्रवेशकान्ते-चित्रफलकोल्लेखेनोद्दीपनम्, ततोऽनुपदं पुनः सुसङ्गताप्रवेशोपन्यासेन तदुपशमनं चोपपादितमिति शृङ्गाररसव्यञ्जने प्रबन्धस्य सर्वमिदमाचरति साहायकमिति द्रष्टव्यम्।

तुरीयकारणस्यावान्तरभेदं निरूपयति—

पुनरारब्धविश्रान्ते रसस्याङ्गिनोऽनुसन्धिश्च।

अनुसन्धिरनुसन्धानं स्मरणविशेषः। तेन भावादिप्राधान्ये तत्तदनुसन्धानमेवासमाप्ति तत्तद्व्यञ्जने निमित्तमवसेयम्। तद्व्यतिरेकश्चाङ्ग्यननुसन्धानलक्षणो रसदोषोऽन्यत्र दर्शितः।

उदाहरति—

यथा-तापसवत्सराजे।

नाटकमिदमिदानीं नोपलभ्यते, केनापि विन्ध्यशिखरिपरिसरग्रामे क्वचिदुपलब्धमिति केवलं श्रूयते, तस्मादेतद्विषये लोचनमेवानुसरामः। तथा च नाटकेऽस्मिन् वत्सराजनिष्ठा वासवदत्ताविषयिणी रतिरेव स्वविभावाद्यौचित्यान्मध्ये विप्रलम्भादिनानाभूमिका धारयन्त्यपि सर्ववृत्तान्तव्यापकत्वात् प्रबन्धेन व्यज्यमाना सामग्रीसमवधानाद् रसात्मत्वं, समस्तभूमिसाम्राज्योपलब्धिपूर्वकपद्मावतीसमधिगमगर्भिता वासवदत्ताप्राप्तिश्च पार्यन्तिकफलत्वं प्राप्नोति। तेन प्रधानशृङ्गाररसस्यान्तं यावदनुसन्धानैमक्षतमेव तत्प्रकाशनप्रयोजकत्वमासादयतीति न तिरोहितम्।

तत्र रतिव्यक्तेः प्रबन्धव्यापकता तु प्रथमेऽङ्के—'तद्वक्त्रेन्दुविलोकनेन, दिवसो नीतः प्रदोषस्तथा' इत्यादिना 'बद्धोत्कण्ठमिदं मनः किमथवा प्रेमासमाप्तोत्सवम्' इत्यन्तेन,

द्वितीयेऽङ्के—'दृष्टिर्नामृतवर्षिणी स्मितमधुप्रस्यन्दिवक्त्रं न किम्' इत्यादिना,

तृतीयेऽङ्के—'सर्वत्र ज्वलितेषु वेश्मसु भयादालीजने विद्रुते,

श्वासोत्कम्पविहस्तया प्रतिपदं देव्या पतन्त्या तया ।

हा नाथेति मुहुः प्रलापपरया मुग्धं वराक्या तथा,

शान्तेनापि वयन्तु तेन दहनेनाद्यापि दह्यामहे ॥' इत्यादिना,

चतुर्थेऽङ्के—'देवी स्वीकृतमानसस्य नियतं स्वप्नायमानस्य मे,

तद्गोत्रग्रहणादियं सुवदना यायात् कथं न व्यथाम् ।

इत्थं यन्त्रणया कथं कथमपि क्षीणा निशा जाग्रतो,

दाक्षिण्योपहतेन सा प्रियतमा स्वप्नेऽपि नासादिता ॥' इत्यादिना,

पञ्चमेऽङ्के विप्रलम्भेऽङ्कुरिते—

'तथाभूते तस्मिन्मुनिवचसि जातागसि मयि,

प्रयातेऽन्तर्गूढां रुषमुपगता मे प्रियतमा ।

प्रसीदेति प्रोक्ता न खलु कुपितेत्युक्तिविधुरं,

समुद्विग्ना पीतैर्नयनसलिलैः स्थास्यति पुनः ॥' इत्यादिना,

षष्ठे चाङ्के—'त्वत्सम्प्राप्तिविलोभितेन मनसा प्राणा मया धारिताः' इत्यादिना च मुहुर्मुहुस्तत्प्रकाशनात् ।

पञ्चमं कारणं निरूपयति—

प्रबन्धविशेषस्य नाटकादे रसव्यक्तिनिमित्तमिदं चावगन्तव्यम्-यदलङ्कृतीनां शक्तावप्यानुरूप्येण योजनम् ।

अलङ्कृतीनामिति कर्मणि षष्ठी । तेनालङ्कारकर्मकं घटनमित्यर्थः। तच्च रसानुगुण्यमपेक्ष्यैव विधेयमित्याशयः । उदाहरणं तु—'कपोले पत्राली करतलनिरोधेन मृदिता' इत्यादि प्रागुक्तमेव, अलङ्काराणां रसपारतन्त्र्यात् ।

एतदुक्तेः प्रयोजनं निगदति—

शक्तो हि कविः कदाचिदलङ्कारनिबन्धने तदाक्षिप्ततयैवानपेक्षितरसबन्धः प्रबन्धमारभते, तदुपदेशार्थमिदमुक्तम् ।

हि यतोऽलङ्कारनिबन्धने शक्तः कदाचिद् रसविषयकावधानध्वंसावसरे तदाक्षिप्ततयाऽलङ्कारव्यासङ्गेनैव, अनपेक्षितरसबन्धोऽकृतरसनिवेशापेक्षः, कविः प्रब-

न्धमारभते निर्माति, तस्योपदेशार्थमेवं विधेयमिति शिक्षणाय इदमुक्तम्, न तु स्वतस्तत्र सावधानानामन्यकवीनां कृत इत्यर्थः ।

नन्वीदृशस्य कवेरप्रसिद्धेऽपार्थकं कथनमित्यत आह—

दृश्यन्ते च कवयोऽलङ्कारनिबन्धनैकरसा अनपेक्षितरसाः प्रबन्धेषु ।

अलङ्काराणां निबन्धन एकोऽद्वितीयो रसोऽनुरागो येषां तादृशाः, अत एवानपेक्षिता रसाः शृङ्गारादयो यैस्तथाभूताश्च कवयो दृश्यन्त इत्यर्थः । तादृशकवीनामप्युपलब्धेर्नास्त्यप्रसिद्धिरिति तात्पर्यम् ।

तथा च—'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः ।

कवीनां दर्शनं च काव्यद्वारा, यद्वा—'गायन्तं देवदत्तं शृणु' इतिवद्धर्ममात्रस्य दर्शनम् । वस्तुतस्तु—तस्यापि तादृशरचनयाऽनुमानमेव । चकारो हेतुत्वं प्रसिद्धिद्रढिमाणं च सूचयति ।

तदुदाहरणन्तु—'मध्ये व्योम स्फुरति सुमनोधन्वनः शाणचक्रं,
मन्दाकिन्या विपुलपुलिनाभ्यागतो राजहंसः ।
अह्नश्छेदे त्वरितचरणन्यासमाकाशलक्ष्म्याः,
संसर्पन्त्याः श्रवणपतितं पुण्डरीकं सुधांऽशुः ॥' इति प्रदीपकर्तुरेव । तत्र च रूपकालङ्कारयोजनैकतानमनाः कविस्तथा रसं नापेक्षतेति चित्रकाव्यत्वं तस्येति स्वयं तेन स्पष्टमुक्तम् ।

न केवलमलक्ष्यक्रम एव प्रबन्धेन द्योत्यतेऽपि तु लक्ष्यक्रमोऽपीति दर्शयति—

किंच—

'अनुस्वानोपमात्माऽपि प्रभेदो य उदाहृतः ।
ध्वनेरस्य प्रबन्धेषु भासते सोऽपि केषुचित् ॥ ७१ ॥'

अस्य विवक्षितान्यपरवाच्यध्वनेरनुस्वानोपमात्मा संलक्ष्यक्रमोऽपि यः शब्दार्थशक्त्युद्भवत्वेन द्विविधः (वस्तुतस्त्रिविधः) प्रभेद उदाहृत उक्तः, सोऽपि न केवलमलक्ष्यक्रम एव, केषुचिन्न तु सर्वेषु प्रबन्धेषु भासत इत्यर्थः ।

तदाह वृत्तिकृत्—

अस्य विवक्षितान्यपरवाच्यध्वनेरनुरणनरूपव्यङ्ग्योऽपि यः प्रभेद उदाहृतो द्विप्रकारः, सोऽपि प्रबन्धेषु केषुचिद् द्योतते ।

केचित्तु—'द्योत्यो लक्ष्यक्रमः क्वचिद्' इत्यग्रिमकारिकायां पाठमवधार्य तत्पौनरुक्त्यपरिजिहीर्षया, पाञ्चजन्योक्तिषु नीरसत्वप्रसक्तिमपासितुम्, असंलक्ष्यक्रमप्रस्तावे संलक्ष्यक्रमविचारानौचित्यनिराकरणाय चास्याः कारिकायाः—'न केवलं प्रबन्धेन साक्षाद् व्यङ्ग्यो रसो, यावत् पारम्पर्येणापीति दर्शयितुमुपक्रमते—किञ्चेति' इत्यवतरणमुक्त्वा 'अनुस्वानोपमः शब्दशक्तिमूलोऽर्थशक्तिमूलश्च यो ध्वनेः प्रभेद उदाहृतः, स केषु प्रबन्धेषु निमित्तभूतेषु व्यञ्जकेषु सत्सु, व्यङ्ग्यतया स्थितः सन् अस्येति रसादिध्वनेः प्रकृतस्य भासते। व्यञ्जकतयेति शेषः' इति व्याख्यां च विधाय 'वृत्तिग्रन्थोऽप्येवमेव योज्यः' इत्यादिशन्ति।

तत्र विचारयामः—अग्रिमकारिकायां वृत्तिनिर्णीतः'अलक्ष्यक्रमः' इत्ययमेव पाठः। न च पौनरुक्त्यप्रसङ्गः, अत्र लक्ष्यक्रमस्योपादानात्। नापि पाञ्चजन्योक्तिषु नीरसत्वापत्तिः, तत्र वस्तुरूपसंलक्ष्यक्रमध्वनिसत्त्वकथनेनासंलक्ष्यक्रमासत्त्वस्याकथनात्। न हि देवदत्तस्तिष्ठतीत्युक्त्या यज्ञदत्तादिस्थितिनिषेधः प्रतीयते। तथा विवक्षायान्तु—'पञ्च पञ्च नखा भक्ष्याः' इत्यादौ स प्रतीयत एव। किन्त्विह तथाविवक्षायामेव प्रमाणविरहः। न वा मध्ये लक्ष्यक्रमोपन्यासे प्रकरणासङ्गतिः, प्रबन्धद्योत्यत्वेनालक्ष्यक्रमानन्तरमेतदुपादानस्यान्तराऽपि स्मृतिविषयत्वे सत्युपेक्षाऽनर्हत्वरूपप्रसङ्गसङ्गतिक्रोडीकरणेनासङ्गत्यभावात्।

तस्मात् तदनुरोधेन ग्रन्थान्यथायोजनमग्रिमकारिकाऽवतरणेऽनुपपत्त्या कल्पनं चापि नोचितम्। अत एव 'प्रबन्धेऽप्यर्थशक्तिभूः' इति प्रबन्धव्यङ्ग्यार्थशक्त्युद्भवरूपलक्ष्यक्रमध्वनेरुदाहरणं मम्मटोऽपि गृध्रगोमायुसंवादमेव व्याजहार। अन्यथा तन्न सङ्गच्छेत। 'लक्ष्यक्रमः' इति पाठेऽपि न पौनरुक्त्यम्, सुबादिव्यञ्जकविशेषप्रदर्शनप्रसङ्गेन तदुपादानात्।

वस्तुतस्त्वत्रोत्तरत्र कारिकायां चोभयविधस्यापि ध्वनेर्व्यञ्जकप्रकाशनमभिप्रेतम्। अत एवोभयत्रोभयं ध्वन्यत इति दर्शयिष्यामः। प्राधान्यानुरोधेन तु व्यपदेशोऽवगन्तव्य इति दिक्।

उदाहरति—

तद्यथा मधुमथनविजये—पाञ्चजन्योक्तिषु।

मधुमथनविजयं नाम काव्यमनुपलब्धमेवेति लोचनमेवात्राप्यनुसरामः। तदुक्तमुदाहरणं यथा—'लीलादाढा ग्गुध्यूढ्ढासअलमहिमण्डलसरिचअ अज्ज।

कीस मुणालाहरतुज्ज आइ अङ्गम्मि॥' (अस्फुटेयं गाथा) 'इत्या-

दयः पाञ्चजन्योक्तयो रुक्मिणीविप्रलब्धवासुदेवाशयप्रतिभेदनाभिप्रायमभिव्यञ्जयन्ति। सोऽभिव्यक्तः प्रकृतरसस्वरूपपर्यवसायी' इत्याचार्याः। परे तु वस्तुध्वनिमिमं प्रबन्धव्यङ्ग्यमङ्गीकुर्वन्ति।

पुनरुदाहरति—

यथा वा ममैव—कामदेवस्य सहचरसमागमे विषमबाणलीलायाम्।

यौवनोक्तिष्विति शेषः। ममैव विषमबाणलीलायां कामदेवस्य सहचरैर्यौवनवसन्तमलयानिलादिभिः सह समागमे सतीति सम्बन्धः।

इहापि—'भिअवहण्डिअरोरो णिरङ्कुसो अविवेअरहिओ वि सविण वि तुमम्मि पुणोवन्ति अअतन्ति पं मुसिम्मि' इत्यादयो यौवनोक्तयस्तत्तन्निजस्वभावव्यञ्जिकाः। स्वभावः प्रकृतरसपर्यवसायी' इति लोचनमेव गतिर्ग्रन्थानधिगमात्। 'स्वभावः' इत्यादितदीयग्रन्थयोजनं तु पूर्ववदेव।

पुनरुदाहरति—

यथा च—गृध्रगोमायुसंवादादौ महाभारते।

महाभारते शान्तिपर्वणि। गृध्रस्य, गोमायोः शृगालस्य च संवाद उक्तौ। न तु तयोर्मिथः सङ्कथने।

तथा च मृतं बालमादाय श्मशाने दग्धुं समागतांस्तत्परिजनानपसारयितुं गृध्रो व्याहरति—

'अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे॥
न चेह जीवितः कश्चित् कालधर्ममुपागतः।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी॥ इति।

गृध्रैर्गोमायुभिश्च सङ्कुले व्याप्ते, कङ्कालैरस्थिपञ्जरैर्बहुले समुपचिते, घोरे भीषणे, सर्वप्राणिनां भयङ्करेऽस्मिन् श्मशाने युष्माभिः स्थित्वा अलं न किमपि फलं लप्स्यते। यत इह कालधर्मं मृत्युमुपागतः कश्चिज्जनः प्रियः सुहृद्वा द्वेष्यः शत्रुर्वा न च जीवितः, अभूदिति शेषः। यतः प्राणिनां सर्वेषां मरणोत्तरमीदृश्यपुनरावृत्तिरूपा गतिः स्वभावोऽस्तीत्यर्थः।

तथा च 'स्याच्छरीरास्थि कङ्कालः' इत्यमरः।

इह दिवैव पललं कवलयितुं समर्थस्य गृध्रस्योक्तौ—श्लोकद्वयात्मकप्रबन्धेन

स्वतः सम्भविवाच्यवक्तृप्रकरणादिवैशिष्टयबलेन गृध्रसमवेतो मृतकपरिजनविसर्जनाभिलाषो वस्तु व्यज्यते ।

तत्रैव गृध्रवाक्यमाकर्ण्य मृतकं परित्यज्य गन्तुं प्रवृत्तांस्तान् गोमायुर्वक्ति—

'आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात् कथं बाला ! स्त्यजध्वमविशङ्किताः ! ॥' इति ।

हे मूढा ! गृध्रेण प्रतारितत्वान्मूर्खाः ! अयमादित्यः सूर्यः स्थितो न त्वस्तंगतो येन युष्माकं भीरपि भवेत् । तस्मात् साम्प्रतं मृते बाले स्नेहं कुरुत, न तु पलायध्वम् । न हि वो निष्फला स्थितिः, यदयं राक्षसवेलात्मकः सन्ध्यारूपो मुहूर्तः कालविशेषः, बहवो राक्षसभूतपिशाचाद्यावेशजन्या विघ्ना यत्र, तादृशोऽस्तीति शेषः । तत् कदाचन तदावेशनिवृत्तौ बालः, अपि जीवेज्जीवितो भवेदिति सम्भावयामि । हे अविशङ्किता निस्सन्देहाः ! बाला मूढाः ! कनकवर्णाभं सुवर्णगौरम्, अप्राप्तं यौवनं येन तादृशम्, अत एवापरित्याज्यममुं बालं गृध्रस्य वाक्यात् कथं त्यजध्वम् ? युष्माकमासूर्यास्तमनं बालपरित्यागो नोचित इत्यर्थः ।

इहापि पूर्ववद् गोमायुवचनरूपप्रबन्धो वाच्यद्वारा तत्समवेतं मृतकपरिजनगमननिवर्तनाभिलाषं वस्तु व्यनक्तीति प्रबन्धस्य संलक्ष्यक्रमध्वनिव्यञ्जकता स्फुटैव । उभयत्र 'सचाभिप्रायो व्यक्तः शान्तरस एव परिनिष्ठिततां प्राप्तः' इत्याहुराचार्याः । कारिकाघटकोऽपिशब्दोऽसंलक्ष्यक्रमध्वनिं संगृह्णाति । तथा च–महाभारतं शान्तस्य रसस्य, रामायणं करुणस्य, वेणीसंहारं वीरस्य, हास्यार्णवप्रहसनं हास्यस्य, मदीयं राधापरिणयं च प्रबन्धरूपं शृङ्गारस्य व्यञ्जकमिति प्रसिद्धमेव ।

इत्थं वर्णेभ्य आरभ्य प्रबन्धं यावदुभयध्वनेर्व्यञ्जकेषु दर्शितेष्वसंलक्ष्यक्रमस्य वस्तुद्वारा पारम्पर्येण व्यञ्जकान् वदति—

'सुप्-तिङ्-वचन-सम्बन्धैस्तथा कारकशक्तिभिः ।
कृत्-तद्धित-समासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ॥७२॥

सुपः स्वौजसादय एकविंशतिः, तिङस्तिप्तस्प्रभृतयोऽष्टादश, वचनान्येकवचनमुखानि त्रीणि, सम्बन्धाः स्वस्वामिभावादयः षष्ठ्यर्थाः, तैस्तथा कारकशक्तिभिः कर्तृ-

त्वादिभिः षड्भिः, कृतः कर्तृकर्मभावादिषु विहिता धातोः प्रातिपदिकत्वसम्पादकाः प्रत्ययाः, तद्धितास्त्वतलादयः, समासा अव्ययीभावादयः षड्विधाः, तैः, चकारान्निपाता अद्रव्यार्थाश्चादयः, उपसर्गाः क्रियायुक्ताः प्रादयः, काला भूतादयः, आदिशब्दात् प्रकृतयः सर्वनामानि, तैश्च, क्वचिदलक्ष्यक्रमो रसादिध्वनिर्द्योत्यो भवतीतिशेष इत्यर्थः ।

अयं भावः—वर्णादिप्रबन्धान्तैः शब्दैर्यथा क्वचिद् विभावादीन् वाच्यान् बोधयित्वा तत्सम्बन्धेन साक्षाद्रसादिर्व्यज्यते, क्वचिच्च वाच्यार्थान् प्रतिपाद्य वस्तुरूपान् विभावादींश्च व्यञ्जनयाऽवगमय्य तत्सम्बन्धेन परम्परया रसादिर्व्यज्यते, तथैव तिङादिभिरपि साक्षात् परम्परया च रसादिर्व्यज्यते । तथा च वक्ष्यमाणेषु 'न्यक्कारः' इत्याद्युदाहरणेषु वस्तूनां साक्षाद् व्यङ्ग्यत्वेऽपि पर्यन्ते रसादावेव विश्रमः ।

तदाह वृत्तिकारः—

अलक्ष्यक्रमो ध्वनेरात्मा रसादिः, सुब्विशेषैस्तिङ्विशेषैर्वचनविशेषैः सम्बन्धविशेषैः कारकशक्तिभिः कृद्विशेषैस्तद्धितविशेषैः समासैश्चेति चशब्दान्निपातोपसर्गकालादिभिः प्रयुक्तैरभिव्यज्यमानो दृश्यते ।

प्रयुक्तैर्लक्ष्यघटकीकृतैः । 'रसादिभिः' इति त्वपपाठः, रसादिनिष्ठव्यङ्ग्यताया एव प्रस्तुतत्वाद्, यथाश्रुते तु तन्निष्ठव्यञ्जकत्वस्यैव प्रतीतेः ।

उदाहरति—

यथा—

रामेणोपक्षिप्ते रक्षःकुलक्षये रावणः स्वमधिक्षिपति—

> 'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,
> सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
> धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा,
> स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥'

हनुमन्नाटक—चतुर्दशाङ्कघटकं पद्यमिदम् । अयमेव, न त्वन्यः कश्चित्, हि निश्चयेन मे मम न्यक्कारो धिक्कारो निन्देति यावत् । यद्—अरयः शत्रवः सन्तीति शेषः, मादृशजगदेकवीरस्यैकोऽपि रिपुर्नोचितः, किंपुनर्बहवः । तत्रापि तेषु रिपुष्वपि, असौ रक्षोभक्ष्यत्वेन प्रसिद्धो मनुष्यः, तापसस्तपोमात्रबलः, न तु युद्धनिपुणो राजादिः । स तापसो रिपुरपि, अत्रैव मत्पुरस्तादेव, न त्वन्यत्र कुत्रचिदरण्या-

दिदुर्गमप्रदेशेषु, न केवलं तूष्णीं तिष्ठत्यपि तु राक्षसानां कुलं बालवृद्धस्त्रीपर्यन्तं निहन्ति निःशेषेण मारयति, न त्वेकमपि मुञ्चति। तथाऽपि, अहो आश्चर्यम्, रावणो विश्रवसोऽपत्यं पुमान् पराक्रमातिरेकेण सकलजगतः क्रन्दयिता वा, मल्लक्षणो राजा जीवति, प्राणान् धारयति, न त्ववमानातिशयेन म्रियते योद्धुं पराक्रमते वा। न केवलं मामेव धिक्, यावद्, शक्रजितं सुरेन्द्रस्य जेतारं मदात्मजं मेघनादमपि धिग्धिगस्तीति शेषः। प्रबोधितं प्रबोधनमायाससहस्रकृतं जागरणमस्त्यस्मिन्निति प्रबोधितवांस्तेन, प्रख्यातशौर्येण कुम्भकर्णेन मदनुजेनापि किं? न किमपि फलं साधितम्। स्वर्ग एव ग्रामटिकाऽल्पग्रामः, तस्य विलुण्ठनेन बलादात्मसात् करणेन, यद्वा-स्वर्गस्य ग्रामटिकावदनायासतो विलुण्ठनेन, वृथोच्छूनैर्व्यर्थपुष्टैरेभिर्विंशत्या सदा सन्निकृष्टैः प्रसिद्धवीर्यैर्वा मम भुजैः किं, न किमपि कृतमित्यर्थः।

तपोऽस्त्यस्मिन्निति विग्रहे 'अण् च' इति सूत्रेण तपश्शब्दादणि तापस इति। विश्रवश्शब्दादपत्यार्थेऽणि 'विश्रवसो विश्रवणरवणौ' इति सूत्रेण रवणादेशे वृद्धौ, यद्वारावयति लंकानिति रौतेर्ण्यन्ताल्ल्युप्रत्यये रावण इति। तथा च वाल्मीकीयरामायणोत्तरकाण्डे—

> 'यस्माल्लोकत्रयं चैतद् भावितं भयमागतम्।
> तस्मात्त्वं रावणो नाम नाम्ना वीरो भविष्यसि॥' इति।

प्रपूर्वकाद् बुध्यतेर्ण्यन्ताद् बोधतेः केवलाद्वा भावक्तान्तान्मतुपि, क्तवतुप्रत्यये वा प्रबोधितवतेति। ग्रामशब्दादल्पार्थे 'तद्धिताः' इत्यधिकारसूत्रस्थबहुवचनसामर्थ्येनानुक्तेऽपि विहिते टिकच् प्रत्यये ग्रामटिकेति। आम्रेडितधिक्छब्दयोगे शक्रजितमिति द्वितीया। तृतीयायुगलन्तु गम्यमानक्रियां प्रति करणत्वविवक्षयैव। इहत्यव्यङ्ग्यविवरणमनुपदं वृत्ति विवृण्वन्तः करिष्यामः।

वृत्तिकृद् व्यङ्ग्यं दर्शयितुमाचष्टे—

अत्र हि श्लोके भूयसा सर्वेषामप्येषां स्फुटमेव व्यञ्जकत्वं दृश्यते।

भूयसा बाहुल्येन। एषां सुबादीनाम्।

क्रमशो व्यङ्ग्यं दर्शयति—

तत्र 'मे यदरयः' इत्यनेन सुप्-सम्बन्ध-वचनानामभिव्यञ्जकत्वम्।

'मे' इत्यत्र ङस् विभक्तिः सुप्, अरिभिः सह वध्यघातकभावश्च सम्बन्धस्तद्‌र्थः, 'अरयः' इति बहुवचनमेवकारश्च सम्भूय न्यक्कारान्तरासम्भवद्वारा स्वपराक्रमा-

तिरेकम् , त्रैलोक्याद्वितीयविक्रमेण स्वेन सहैकस्यापि वध्यघातकभावानौचित्यं किं-पुनर्बहूनामिति च सूचयन्ति ।

तथा—

'तत्राप्यसौ तापसः' इत्यत्र तद्धितनिपातयोः ।

व्यञ्जकत्वमिति शेषः । तद्धितस्तापसशब्देऽण्प्रत्ययः, निपातोऽपिशब्दः, एतौ चासाविति सर्वनाम्नोऽप्युपलक्षणम् । ते चातिविक्रान्तनृपतेः परिपन्थित्वस्य कथञ्चिद-भ्युपगम्यत्वम्, तपोमात्रसाधनस्य युद्धानभिज्ञतया तदनौचित्यं, मानुष्येण भक्ष्य-त्वं च व्यञ्जन्ति ।

निहन्ति जीवतीत्यत्र तिङः, अत्रेत्यधिकरणत्वस्य राक्षसकुलमिति कर्मत्वस्य च कारकशक्तेर्व्यञ्जकत्वमित्यर्थः ।

एतच्चैवकारस्य, 'नि'इत्युपसर्गस्य, जीवधातोः, 'अहो' इत्यव्ययस्य, रावणप-दस्य चोपलक्षणम् । तथा च—मदनाधिष्ठिते देशे यदि स तिष्ठेत्, अत्र स्थितोऽपि यदि तूष्णीं भवेत्, अतूष्णीम्भावेऽपि राक्षसान् यदि न हन्यात्, कस्यचिदेकस्य हननेऽपि तत्कुलमामूलं यदि सम्प्रत्येव न विनाशयेत्, तथाभावेऽपि यदि त्रैलोक्या-द्भुतविक्रमो रावणनामाऽहं प्राणान् न धारयेयम्, तदेतत् कथञ्चन संघटेत । न तु तथा, तदद्भुतमेवेदं मत्प्रख्यातशौर्य्यप्रतिकूलमखिलमापतितमित्याद्यनवधि व्यज्यते तैः ।

तथा—

'धिग्धिक्छक्रजितम्' इत्यादौ श्लोकार्धे कृत्तद्धितसमासोपसर्गाणाम् ।

श्लोकार्धे चरम इति शेषः । 'शक्रजितम्' इत्यत्र 'प्रबोधितवता' इत्यत्र च क्त—क्तवत्वोः कृतोः, 'ग्रामटिका' इत्यत्र टिकचस्तद्धितस्य, चरमचरणस्थ 'स्वर्ग' इत्यादिसमासस्य, 'प्रबोधित' इत्यादौ 'विलुण्ठन' इत्यादौ प्र–विरूपयोरुपसर्गयोश्च व्यञ्जकत्वमित्यर्थः ।

इदमपि 'धिग्धिक्' इत्यव्ययस्य, शक्रशब्दस्य 'प्रबोधित' इत्यादौ प्रेरणार्थक-णिचः, स्वर्गे ग्रामटिकात्वारोपस्य, 'भुजैः'इति बहुवचनस्य चोपलक्षणम् । तथा हि-शक्नोत्यरीन्जेतुमिति व्युत्पत्त्या शक्रस्य दुर्जयत्वम्, शक्रं जितवानिति शक्रजिदिति क्विपा तद्विजयस्य कृतपूर्वत्वम् , तेन मेघनादस्य शौर्यप्रकर्षेण रामविजयसौकर्यम् , तदनाचरणे धिग्धिगिति वीप्सया तस्य गर्हणीयतमत्वम्, णिचा क्तवतुना प्रेत्युपस-र्गेण च कुम्भकर्णजागरणे फलविशेषाशया बहुलाऽऽयासकरणम्, प्रबोधस्य भूतकालि-कत्वेन सिद्धत्वम्, तस्य सर्वथा त्यक्तनिद्रत्वं च, ततः क्षुद्रतापसस्य झटिति विजेय-

त्वम्, किमा तदननुष्ठाने तत्सर्वनैष्फल्यम्, तेन निन्द्यताऽतिशयः, स्वर्गे ग्रामटिका-त्वारोपेण सुजयत्वम्, व्युपसर्गेण लुण्ठनस्य व्यापकतामुखेन स्वर्गस्य स्थूणामात्राव-शेषत्वम्, बहुत्वेनोच्छूनत्वेन च भुजानामेकतमेनापि सुकरस्य तज्जयस्य, मिथः सहचरितैर्बहुभिरप्यकरणाद् वृथायुद्धकण्डूतिवहनाच्च व्यर्थत्वपुष्टत्वद्वारा वचनीयत्व-प्रकर्षः, समस्तवाक्येन कुत्साऽऽधिक्येन स्वक्रोधोद्भववैचित्र्यम्, तेन रौद्ररसः। यद्वा-पुनर्युद्धोत्साहः, तेन वीररसश्च सूच्यते।

स्थालीपुलाकन्यायेनैवैते व्यङ्ग्यार्थाः प्रदर्शिताः। सूक्ष्मेक्षिकायां तु निस्सीमा-नोऽत्र प्रतीयमानाः स्फुरन्तीत्युक्तमेव।

एतावद्व्यङ्ग्यावभासफलमभिदधाति—

एवंविधस्य व्यञ्जकभूयस्त्वे च घटमाने, काव्यस्य सर्वातिशायिनी बन्धच्छाया समुन्मीलति।

एवंविधस्येति काव्यस्य विशेषणम्। भूयस्त्वं बाहुल्यम्। घटमाने सतीति शेषः। बन्धच्छाया संघटनासौन्दर्यम्। समुन्मीलति प्रकाशते।

व्यञ्जकबाहुल्येन बहुलव्यङ्ग्यावभासनात् प्रबन्धसौन्दर्यातिशयः प्रतीयत इत्यर्थः।

इदमेवार्थापत्त्या द्रढयति—

यत्र हि व्यङ्ग्यावभासिनः पदस्यैकस्यैव तावदाविर्भावः, तत्रापि काव्ये काऽपि बन्धच्छाया, किमुत यत्र तेषां बहूनां समवायः।

व्यङ्ग्यावभासिनो व्यञ्जकस्य। एवशब्दोऽप्यर्थकः। काऽप्यनिर्वचनीया। बन्ध-च्छाया भवतीति शेषः। किमुत किंपुनः। तेषां व्यञ्जकपदानाम्। समवायः समुदायः।

एकव्यञ्जकपदसद्भावेऽपि यदि चमत्कारोत्कर्षः प्रबन्धस्यानुभवसिद्धः, तर्हि तादृशबहुपदसद्भावे तु सुतरामित्यर्थः। तेन तत्र प्रबन्धशोभोत्कर्ष एव फलमिति सूचितम्।

बहुव्यञ्जकघटितमुदाहरणमाह—

यथाऽत्रानन्तरोदितश्लोके।

श्लोके 'न्यक्कारः' इत्यादौ। बहुव्यञ्जकसद्भावाद् बन्धस्य सुषमाऽतिशय इति शेषः।

न्यक्कार इत्यादिपद्ये व्यङ्ग्यार्थान् समाहृत्य दर्शयति—

अत्र हि 'रावणः' इत्यस्मिन् पदेऽर्थान्तरसंक्रमितवाच्येन ध्वनिप्रभेदे-नालंकृतेऽपि, पुनरनन्तरोक्तानां व्यञ्जकप्रकाराणामुद्भासनम्।

रावणस्य स्वयं रावण इत्युक्तेरनुचितत्वादत्र रावणपदस्य प्रागुक्तधर्मान्तरविशिष्टस्वार्थबोधकत्वादर्थान्तरसङ्क्रमितवाच्यो नाम ध्वनिः ।

तस्य पूर्वोक्तनानाव्यञ्जकपदव्यङ्ग्यानां च सद्भावादिह छायाऽतिशयो भवतीति भावः ।

असम्भवापत्तिं वारयितुमाह—

दृश्यन्ते च महात्मनां प्रतिभाविशेषभाजां बाहुल्येनैवंविधाः प्रकाराः ।

तावता नाप्रसिद्धिरिति भावः ।

उदाहरति—

यथा महर्षेर्व्यासस्य—

रचनाऽस्तीति शेषः ।

'अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।
श्वश्वःपापीयदिवसा पृथिवी गतयौवना ॥'

अतिक्रान्तं व्यतीतं न तु कथञ्चन विद्यमानं सुखं यत्र तादृशाः, तथा प्रत्युपस्थितानि प्रतिकूलतयोपगतानि विद्यमानानि,न तु भूतानि दारुणानि भीषणानि दुःखानीति यावद् येषु तथाभूताः काला न तु तदंशभूतः कश्चन कालः, साम्प्रतं सन्तीति शेषः । किञ्चश्वः श्वः, प्रत्यग्रिमदिनं पापीयाः पातकिसम्बन्धिनस्तत्स्वामिका इति यावद् दिवसा यस्यां तादृशी, तथा वृद्धस्त्रीवद् गतं यौवनमुपभोगक्षमत्वं यस्यां तथाभूता च पृथिवी, वर्तत इत्यर्थः ।

अत्र श्लोके व्यञ्जकान् संगृह्णाति—

अत्र कृत्तद्धितवचनैरलक्ष्यक्रमव्यङ्ग्यः 'पृथिवी गतयौवना' इत्यनेन चात्यन्ततिरस्कृतवाच्यो ध्वनिः प्रकाशितः ।

अतिक्रान्तोपस्थितगतेत्यादौ क्तरूपकृतः, पापीयेत्यत्र छप्रत्ययतद्धितस्य, काला इति बहुवचनस्य चात्र व्यञ्जकत्वम् । एतच्चान्येषामप्युपलक्षणम् । तथा हि—अतिक्रान्तेति भूतकालार्थकक्तप्रत्ययेन सुखस्य कदाचिदपि न वर्तमानत्वम्, तेन कालस्यातिभीषणत्वम्, उपस्थितेतिक्तेन दारुणदुःखानां प्राक्कालादेव सम्बन्धोऽनिराकरणीयत्वं च, गतेतिक्तेन पृथिव्या यौवनस्यापरावर्तनीयता, तया तस्या निस्सारत्वेन हेयता, दिवसानां पापिजनसम्बन्धबोधकेन छप्रत्ययेनापकर्षातिशयः, बहुवचनेन कालस्यानेकविधत्वमपरिहार्यत्वं क्लेशेन यापनीयत्वं च, श्वःश्वः इति वीप्सिताव्ययेन पापीयदिवसत्वस्य पृथिव्या गतयौवनत्वस्य च कालव्यापकत्वम्, तैश्च सकलैर्नि-

वेदमुखेन शान्तो रसो व्यज्यते। यौवनस्य जडायां पृथिव्यां बाधाद् गतयौवनापदमुपभोगाक्षमत्वं लक्षयद्धेयतां व्यनक्ति, तेनात्रात्यन्ततिरस्कृतवाच्यो ध्वनिः।

उदाहरणान्तरं दातुं भूमिकामारचयति—

एषां च सुबादीनामेकैकशः समुदितानां च व्यञ्जकत्वं महाकवीनां प्रबन्धेषु दृश्यते।

एषां कारिकायां प्रदर्शितानाम्। एकैकशः प्रत्येकं व्यस्तानामिति यावत्, समुदितानां समस्तानाम्।

अथ समस्तानां सुबादीनामुदाहरणं प्रदर्श्य व्यस्तानां दर्शयन् प्रथमं सुबन्तस्योदाहरणमाह—

सुबन्तस्य व्यञ्जकत्वं यथा—

मेघदूते यक्षो जलदं वदति—

'तालैः शिञ्जावलयसुभगैः कान्तया नर्तितो मे,
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः।'

'तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः॥' इत्येतत्पद्यपूर्वार्धः।

तयो रक्ताशोक-केसरवृक्षयोर्मध्ये, अनतिप्रौढवंशप्रकाशैस्तरुणवेणुप्रतिमप्रतिभैर्मणिभिर्मरकतरत्नैः, मूलेऽधोदेशे, बद्धा संघटिता, स्फटिकं तन्मयं फलकं पीठं यस्यास्तादृशी, काञ्चनी सुवर्णमयी वासयष्टिर्निवासदण्डोऽस्तीति शेषः। शिञ्जा भूषणध्वनिस्तत्प्रधानैर्वलयैः कङ्कणैः सुभगा रमणीया ये ताला अनेकविधकरतलवादनानि तैः, मे मम कान्तया कर्त्र्या, नर्तितो नटनं कारितः, वो युष्माकं मेघानां सुहृन्मित्रं नीलकण्ठो मयूरः, दिवसविगमे दिनान्ते यामध्यास्ते यत्र यष्ट्यां वसतीत्यर्थः।

इह यच्छब्दस्योत्तरवाक्यघटकत्वेन पूर्ववाक्ये न तच्छब्दोपादानापेक्षा। तालैरिति बहुवचनसुबन्तस्य तालानामनेकविधत्वद्वारा यक्षपत्न्यास्तद्विज्ञतया सङ्गीतागमनैपुण्यस्य परम्परया विप्रलम्भशृङ्गारस्य च व्यञ्जकत्वम्।

व्यस्तस्य तिङन्तस्योदाहरणमाह—

तिङन्तस्य यथा—

अनुनयन्तं नायकं खण्डिता वदति—

'अवसर रोउं चिअ णिम्मिआइँ मा पुंस मे हअच्छीइं।

दंसणमेत्तुम्मत्तेहिं जेहिं हिअअं तुह ण णाअम् ॥'

'अपसर रोदितुमेव निर्मिते मोत्पुंसय मे हताक्षिणी।

दर्शनमात्रोन्मत्ताभ्यां याभ्यां हृदयं तव न ज्ञातम् ॥' इति च्छाया।

शठ! अपसर अनुनयं विहाय दूरं व्रज, रोदितुमश्रु मोक्तुमेव, न त्वसेचनकदर्शनानन्दमनुभवितुं विधात्रा दैवेन निर्मिते हते अभाग्योपहते मे ममाक्षिणी दृशौ मा उत्पुंसय कृतकानुनयं रोदनबहुलीकरणेन नोच्छूने कुरु। दर्शनमात्रेण त्वदवलोकनेनैव, न तु व्यवहारसमीक्षणेनापि, उन्मत्ताभ्यां याभ्यां मदक्षिभ्यां तवैवंविधकपटोपन्यासपटु हृदयं चित्तं न ज्ञातमित्यर्थः।

अत्रापसरेति तिङन्तेन प्रधानेन नायकविषयकरोषद्वारा तदपराधानाममर्षणीयता, मानवप्रयासवैयर्थ्यं मध्येकृत्य दैवकृतेरपरिवर्तनीयता च सूच्यते। एव-हत-मात्र–हृदयादिशब्दैस्तदनुयायितया हृदयङ्गमदर्शनानधिकारित्व–सौभाग्यविरह–व्यवहारविवेकव्यतिरेकशाठ्यमांसलत्वानि व्यज्यन्ते।

तस्यैवोदाहरणान्तरमाह—

यथा वा—

मार्गं रुन्धन्तं कान्तं भङ्ग्या सङ्केतस्थलं सूचयन्ती कृत्रिमरोषाविष्टा काचिदाचष्टे—

'मा पन्थं रुन्धीओ अवेहि बालअ! अहोसि अहिरीओ।

अम्हेअ णिरिच्छाओ सुण्णघरं रक्खिदव्वं णो ॥'

'मा पन्थानं रुधोऽपेहि बालक! अहो अस्यह्रीकः।

वयं निरिच्छाः शून्यगृहं रक्षितव्यं नः ॥' इतिच्छाया।

बालक! प्रौढिमनापन्न! अविवेकिन्निति यावत्, अपेहि मार्गाद् दूरं व्रज, पन्थानं मद्गमनमार्गं मारुधो नावरुद्धं कुरु। अहोआश्चर्यम्, अह्रीको जनसमाजेऽपि धार्ष्ट्यविधानान्निर्लज्जस्त्वमसि। वयं निरिच्छाः सर्वथा स्पृहाशून्याः पराधीना वा स्मः, यतो नोऽस्माकं शून्यं साक्ष्यन्तरहीनं गृहं रक्षितव्यं चौरादिभ्यः पालनीयं वर्तेत इत्यर्थः।

अत्र परस्परसापेक्षं वाक्यपञ्चकम्, अपेहीति तिङन्तेन प्रधानेन सहसम्भूय, अप्रौढत्वात्तरलस्त्वमसि, यदित्थं पथि लोकानां समक्षमेव रहस्यं प्रकाशयितुं चेष्टसे, अस्त्येव निर्जनत्वात् सङ्केतोचितं मे गृहम्, तत्रैव निभृतमागत्य स्वमनोरथं पूरय, अलमिदानीमतिप्रसङ्गेनेत्यादि सूच्यते।

षष्ठ्यर्थसम्बन्धस्य व्यञ्जकत्वमुदाहरति—

सम्बन्धस्य यथा—

काचित्प्रगल्भा प्रच्छन्नकामुकी पाणिगृहीत्या भीत्या निरन्तरमसन्निधाय विलासतृष्णया कदाचिदुपगतं कान्तं तर्जयति—

'अण्णत्त वच्च बालअ! अह्णा अन्त क्सिमलो एसि एअम्।
हो जाआभीरुआण तु-(हाण संबंधो) विअ ण होइ ॥'

'अन्यत्र व्रज बालक! तृष्णायमाणः कथमालोकयस्येतत्।
भो जायाभीरुकाणां युष्माकं सम्बन्ध एव न भवति ॥' इतिच्छाया।

बालक! प्रणयतारतम्यपरिच्छेदाप्रगल्भ! अदक्षिण! अन्यत्र व्रज न तु मदन्तिके तिष्ठ, तृष्णायमाणो मद्दर्शनेनाधुना विलासतृष्णातरलितस्त्वं कथं केन प्रकारेण विवेकाभावेनेति यावत्, एतदिदानीमपि प्रीतिदार्ढ्यानुबन्धनं निरुपधिविलासवैशद्यं वा, आलोकयसि पश्यसि सम्भावयसीति यावत्, भोः कातर्यास्कन्दितप्रागल्भ्य! जायायाः पाणिगृहीत्या भीरुकाणां त्रस्तानां कुत्सितानां युष्माकं सम्बन्धोऽन्यप्रणयिनीसम्बन्ध एव न भवति नैव सम्भवतीत्यर्थः।

ये खलु पाणिगृहीत्या भ्रूभङ्गमात्रेण नितरां बिभ्यति, तेषां परकीयाप्रणयबन्धो दुर्घट इत्यभिसन्धिः।

इह बालकेति सम्बोधनेन विवेकराहित्यम्, तेन जायाभीरुकत्वेऽप्यन्यप्रणयौत्सुक्यायोग्यता, प्रणयतारतम्यपरिच्छेदाक्षमत्वं च, तृष्णायमाण इत्यनेन भो इति सोल्लुण्ठसम्बोधनेन च वस्तुतत्त्वानभिज्ञत्वम्, जायाशब्देन सन्ततिजननमात्रकारणत्वद्वारा प्रणयादिशून्यत्वम्, तेन ततो भीतेरनौचित्यम् भीरुत्वेन नितान्तपारवश्यम्, तेन पुनःप्रणयभङ्गसम्भावना, तया तत्सम्बन्धाविधेयत्वम्, कुत्सार्थककप्रत्ययेन तद्विषयकेर्ष्योऽतिशयोऽवज्ञाप्रकर्षः प्रणयबन्धासम्भाव्यत्वं च व्यज्यते। तथा च जायाभीरुकाणामिति षष्ठ्यर्थसम्बन्धस्य तद्धितकप्रत्ययस्य च व्यञ्जकता स्फुटैव।

· गाथेयमस्फुटत्वसूचकचिह्नेन मूलटीकयोरुपन्यस्ता, तथाऽपि यथामति कथञ्चिद् विवृता शोधिता च।

तदाह वृत्तिकारः—

कृत-कप्रयोगेषु प्राकृतेषु तद्धितविषये व्यञ्जकत्वमावेद्यत एव।

कृतः कस्य कप्रत्ययस्य प्रयोगो यत्र तेषु, तद्धितकप्रत्ययघटितेषु, प्राकृतेषु तद्धितविषये व्यञ्जकत्वमावेद्यत आख्यायत एवेत्यर्थः ।

कग्रहणं तद्धितान्तरस्याऽप्युपलक्षणम् ।

इह 'जायाभीरुकाणाम्' इत्यत्र यथा कप्रत्ययस्य, तथाऽन्येषामपि तद्धितानां व्यञ्जकत्वमयत्नप्रतिपाद्यमेवेति तात्पर्यम् ।

समासानां व्यञ्जकतां निर्ब्रवीति—

समासानाञ्च वृत्त्यौचित्येन विनियोजने ।

व्यञ्जकत्वं ज्ञेयमिति शेषः । वृत्तिरुपनागरिकाऽऽदिः । चकारः सुबादिसङ्ग्राहकः । निपातानामित्यादिपङ्क्तिभागः पृथगेव योज्यः, मिथः सम्बन्धाभावात् , तदर्थस्य कारिकाघटकचकारसङ्गृहीतत्वेनाप्राधान्याच्च । तथा च तत्र समासबहुलपरुषाऽऽदिवृत्तेरेव रौद्रादिरसव्यञ्जकताया उक्तपूर्वत्वात् तद्व्यञ्जन औचित्यमनुसरतां केवलानामपि समासानां निबन्धनत्वमवगन्तव्यम् ।

अथ कारिकायां स्फुटमुक्तान् व्यञ्जकानुदाहृत्य चकारसङ्गृहीतानुदाहरन् निपातानां व्यञ्जकत्वमुदाहरति—

निपातानां व्यञ्जकत्वं यथा—

निपातानां द्योतकत्वमन्यैरप्यङ्गीकृतमेव ।

विरही पुरूरवा वदति—

> **'अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुस्सहो मे ।**
> **नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥'**

विक्रमोर्वशीयचतुर्थाङ्के पद्यमिदम् । तयोर्वश्या प्रियया सार्धम् एकपदेऽकस्मादयं साक्षात् क्रियमाणः,वियोगो विरहः, मे मम सुदुस्सहो नितरामसह्य उपनत उपस्थितः। नवीनानां वारिधराणामुदयादुद्गमात् , निरातपत्वेनातपाभावेन, छाययेति यावत् , रम्यै रमणीयैः अहोभिर्दिवसैर्भवितव्यं भाव्यं चेत्यर्थः । समुच्चयोऽलङ्कारः ।

अतिदुस्सहः प्रेयसीविरहः काकतालीयन्यायेन वर्षासमयश्च प्राप्तस्तत्कथं जीवनं रक्षणीयमिति भावः ।

अत्र चकारद्वयेन विरहोपनमन–तादृशदिवसभवनयोः क्रिययोर्यौगपद्यं मेघच्छायोद्दीपनतमत्वं तन्मलिनदिवसानां दुर्यापत्वं विरहवेदनाया असह्यतोत्कर्षश्च सूच्यते । ततश्चात्र चकाररूपनिपातस्य व्यञ्जकता स्फुटैव ।

तदाह—

इत्यत्र च-शब्दः ।

निपातो व्यञ्जक इति शेषः । चकारद्वयसत्त्वेऽप्येकवचनं जात्यभिप्रायकम् ।

निपातान्तरस्य व्यञ्जकतामुदाहरति—

यथा वा—

दुष्यन्तोऽनुशयानो ब्रवीति—

'मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥'

अभिज्ञानशाकुन्तले तृतीयाङ्के पद्यमिदम् । मुहुर्भूयो भूयः, अङ्गुल्या तर्जन्या संवृत आच्छादितः-अधरो निम्न ओष्ठो यस्मिंस्तत् । प्रतिषेधस्य चुम्बननिषेधस्याक्षराणां मैवं कार्षीरित्यादिवर्णानां विक्लवेन धर्मप्राधान्यनिर्देशाद् वैक्लव्येन सम्भ्रमलज्जाऽतिरेकाद् व्यक्तानुच्चारणेनाभिरामम्—'नकारोऽलङ्कारो जयति मुखचन्द्रे मृगदृशः' इत्याद्युक्तेर्मनोहरम् , अंसे स्कन्धे वामाजनस्वभावाद् विवर्तितुं विवलितुं शीलमस्येति तादृशं, पक्ष्मले सुन्दरे अक्षिणी यस्याः सा तथोक्ता, तस्याः शकुन्तलाया मुखं मया कथमपि चाटुवादिनानाप्रयासैः उन्नमितमूर्ध्वं नीतम् , चुम्बनार्हतां प्रापितम् , तु किन्तु (पश्चात्तापे) चुम्बितं नाभूदित्यर्थः ।

स्वभावोक्तिकाव्यलिङ्गालङ्कारौ । चुम्बनमात्रलाभेनापि तदा कृतकृत्यता स्यात् , 'कामिनामधरास्वादः सुरतादतिरिच्यते' इति प्रसिद्धेरित्यभिप्रायः ।

इह तु-शब्दो निपातः पश्चात्तापातिशयं, स च चुम्बनस्य दौर्लभ्यं व्यनक्ति,

तदाह—

अत्र तु-शब्दः ।

ननु निपातानां द्योतकत्वं तु प्रसिद्धमेव, तत्कुतस्तदिदानीं समर्थ्यत इत्यत आह—

निपातानां प्रसिद्धमपीह द्योतकत्वं रसाद्यपेक्षयोक्तमिति द्रष्टव्यम् ।

स्वातन्त्र्येण प्रयोक्तुमशक्यत्वाल्लिङ्गसङ्ख्याविरहाच्च निपातानां वस्तुव्यञ्जकत्वं यद्यपि वैयाकरणादिनये प्रसिद्धम् , किन्तु रसादिव्यञ्जकत्वं त्वप्रसिद्धमेवेति तदर्थोऽयं प्रयास इत्याशयः । निपातोदाहरणेषु रसव्यञ्जकता तु पूर्ववद्विभावाद्युपस्थापनमुखेनैव बोध्या ।

इत्थं निपातानां व्यञ्जकत्वमुदाहृत्योपसर्गाणां छन्दसां च स्थालीपुलाकन्यायेनोदाहरति—

उपसर्गाणां व्यञ्जकत्वं यथा—

दुष्यन्तः कण्वाश्रमं वर्णयति—

> 'नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः,
> प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
> विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
> स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दलेखाऽङ्किताः॥'

अभिज्ञानशाकुन्तले प्रथमाङ्के पद्यमिदम्। शुकाः कीरा गर्भेऽन्तर्येषां तानि कोटराणि तरुविवराणि येषां तानि तथोक्तानि, तेषां मुखेभ्योऽग्रभागेभ्यो भ्रष्टाः पतिता नीवारास्तृणधान्यानि, यतः सन्तीति शेषः। तथा—इङ्गुदीफलभिदस्तापसतरुफलचूर्णकाः, अत एव प्रकर्षेण स्निग्धाश्चिक्कणा उपलाः प्रस्थाः क्वचित् सूच्यन्ते प्रकाश्यन्त एव। किञ्च विश्वासस्य नात्र कश्चन हनिष्यतीति विश्रम्भस्योपगमादुदयादभिन्नाऽस्खलिता गतिर्येषां, तादृशा मृगा हरिणाः शब्दं रथध्वनिं सहन्ते न त्वन्यत्र पलायन्ते। च पुनर्वल्कलानां कषायीकृततरुत्वचां शिखाभ्योऽञ्चलांशेभ्यो निष्यन्दो जलस्रावस्तेन या लेखास्ताभिरङ्किताश्चिह्नितास्तोयाधारपथा जलाशयमार्गाः सन्ति, तस्मादिदमृषीणामाश्रमपदमस्तीत्यर्थः। 'वाटः पथश्च मार्गश्च' इति त्रिकाण्डशेषः।

अत्र स्वभावोक्ति—समुच्चयावलङ्कारौ। उपसर्गः प्रशब्द उपलानां स्निग्धतां बोधयन्निङ्गुदीफलानां सरसताऽतिशयं परम्परया शान्तरसं च सूचयति।

छन्दसो व्यञ्जकत्वमुदाहरति—

> 'मदमुखरकपोतमुन्मयूरं प्रविरलवामनवृक्षसन्निवेशम्।
> वनमिदमवगाहमानभीमं व्यसनमिवोपरि दारुणत्वमेति॥'

मदेन मुखराः कलरवकारिणः कपोताः पारावता यत्र तत्, तथा–उत्सुका मयूरा यत्र तादृशम्, तथा प्रकर्षेण विरलोऽनिविडो वामनानां खर्वाणां वृक्षाणां सन्निवेशो यस्मिंस्तथाभूतं वनमिदं व्यसनं पानाद्यासक्तिः, तदिव अवगाहमानानां प्रविशतां सेवमानानां च भीमं श्वापदाद्याक्रान्तत्वाद् दुरायतिमूलत्वाच्च भयानकम्, उपर्यग्रे, परिणामे च दारुणत्वं घोरत्वमेति प्राप्नोतीत्यर्थः।

तथा च 'व्यसनं त्वशुभे सक्तौ पानस्त्रीमृगयादिषु' इति मेदिनी। 'अथ वामने। न्यङ्नीचखर्वह्रस्वाः स्युः' इत्यमरः।

अत्र—'पर्यन्ते यौ तथैव शेषं त्वौपच्छन्दसिकं सुधीभिरुक्तम्'

इति भट्टकेदारलक्षितस्यौपच्छन्दसिकच्छन्दसो वस्तुव्यञ्जनद्वारा भयानकरसव्यञ्जकत्वमवसेयम्।

सङ्कलय्य तदाचष्टे वृत्तिकृत्—

इत्यादौ प्रशब्दस्यौपच्छन्दसिकस्य च व्यञ्जकत्वमधिकं द्योतते।

द्योतते प्रकाशत इत्यर्थः। पूर्वत्र श्लोके प्रशब्दस्य परत्रौपच्छन्दसिकच्छन्दसश्च व्यञ्जकत्वं क्रमेणावगन्तव्यम्।

उपसर्गविषये विशेषमाह—

द्वित्राणां चोपसर्गाणामेकत्र पदे यः प्रयोगः, सोऽपि रसव्यक्त्यनुगुणतयैव निर्दोषः।

द्वौ वा त्रयो वा द्वित्रास्तेषाम्। चतुराद्युपसर्गसन्निवेशस्तु दुष्टः। द्वित्राणामपि रसव्यञ्जनोपयोगित्व एव निर्दोषता।

अनेकोपसर्गनिर्दोषत्वमुदाहरति—

यथा-'प्रभ्रश्यत्युत्तरीयत्विषि तमसि समुद्वीक्ष्य वीतावृतीन् द्राक्' इत्यादौ

भट्टमयूरकविकृतसूर्यशतकघटकपद्यभागोऽयम्।

'जन्तूंस्तन्तून् यथा यानतनु वितनुते तिग्मरोचिर्मरीचीन्।
ते सान्द्रीभूय सद्यः क्रमविशददशाशादशाली विशालं,
शश्वत् सम्पादयन्तोऽम्बरममलमलं मङ्गलं वो दिशन्तु॥'

इत्ययमवशिष्टांशः पद्यस्य। इह समुद्वीक्ष्येति समुदुवीनामुपसर्गाणां समुदयः—सम्यगुच्चैर्विशेषेण दर्शनं बोधयन् भगवतः सूर्यस्य जन्तुविषयकानुकम्पाऽऽधिक्यं तद्विषयकरतिभावं च व्यनक्तीत्यदोषः।

पुनरुदाहृति—

'यथा वा—'मनुष्यवृत्त्या समुपाचरन्तम्।'

'स्वबुद्धिसामान्यकृतानुमानाः।
योगीश्वरैरप्यसुबोधमीशं,
त्वां बोद्धुमिच्छन्त्यबुधाः कुतर्कैः॥' इति श्लोकावशेषः।

अत्र समुपाचरन्तमिति समुपाङामुपसर्गाणां सन्निपातः सम्यगुपांशु आसमन्तान्मानवस्वरूपेणेशचरणमभिदधज्जन्तुसन्तानानुग्रहोत्कर्षं वस्तु तद्विषयकरतिभावं च व्यनक्तीति पूर्ववददुष्टत्वम्।

पुनरुदाहरति—

'यः स्वप्ने सदुपानतस्य' इत्यादौ च।

प्रक्षिप्तः श्लोकांशोऽयम्, प्राचीनव्याख्यातृभिरगृहीतत्वात्। इहाप्युपाङित्युपसर्गयुगयोगः प्राग्वदुप-समीपे, आ-समन्तान्नतस्योपागतस्येत्यभिदधदुपस्थितेः सर्वतोमुखतया समीचीनतां रसादींश्च सूचयतीत्यदुष्टत्वम्। रसादिव्यञ्जकता चैषां परम्परयैवेति न विस्मरणीयम्।

एवं निपातानामपि द्वित्राणामेकत्रोपनिपाते व्यञ्जकताऽपेक्षया निर्दोषत्वमुदाहरति—

निपातानामपि तथैव।

द्वित्राणामेकत्र पदे प्रयोगो रसादिव्यक्त्यानुगुण्येन निर्दोष इति शेषः।

इन्द्रो मदनं वदति—

यथा—'अहो बतासि स्पृहणीयवीर्यः' इत्यादौ।

कुमारसम्भवतृतीयसर्गे श्लोकोऽयम्।

'सुराः समभ्यर्थयितार एते, कार्यं त्रयाणामपि विष्टपानाम्।

चापेन ते कर्म न चातिहिंस्रम्' इत्यादिर्मोऽशः श्लोकस्य।

अत्र अहो बतेति निपातद्वयं क्रमेणाश्चर्यमामन्त्रणं चाभिदधानं मदनवीर्यस्यालौकिकत्वमुखेनाद्भुतरसं प्रकाशयतीति नैव दुष्टम्।

पुनरुदाहरति—

यथा वा—

साधुव्यसनादसाधून्नतेश्च दूयमानः कश्चिदभिदधाति—

'ये जीवन्ति न मान्ति ये स्ववपुषि प्रीत्या प्रनृत्यन्ति ये,
प्रस्यन्दिप्रमदाश्रवः पुलकिता दृष्टे गुणिन्यूर्जिते।
हा धिक् कष्टमहो! क्व यामि शरणं तेषां जनानां कृते,
नीतानां प्रलयं शठेन विधिना साधुद्विषः पुष्यता॥' इत्यादौ।

ऊर्जिते महीयसि, गुणिनि गुणवति जने, दृष्टे सति, ये सज्जना जीवन्ति सुखेन जीवनं धारयन्ति, ये त एव स्ववपुषि स्वात्मनि न मान्ति प्रमोदाधिक्येन शरीरो-

ल्लाघात् सम्मातुं न शक्नुवन्ति, तथा प्रस्यन्दि निपतत् प्रमदाश्रु—आनन्दाश्रु येषां तादृशाः पुलकिता जातरोमाञ्चाश्च ये प्रीत्या सज्जनदर्शनजन्यानन्देन प्रकर्षेण नृत्यन्ति । साधुद्विषः सज्जनद्वेषिणोऽसाधून् पुष्यता पुष्टान् कुर्वता, अत एव शठेन क्रूरेण विधिना दैवेन, प्रलयं विनाशं विपदं वा नीतानां, तेषां जनानां कृते क्व शरणं यामि कुत्र कं रक्षकं प्रपद्ये, हा धिक् ! कष्टं महान् क्लेश इत्यर्थः ।

इह हा धिगित्यनन्तरौ निपातौ विधिं प्रत्यसूयां तदाचरणविचारणया निर्वेदं च व्यङ्क्त इत्यदुष्टौ ।

प्रसङ्गसङ्गत्या पदपौनरुक्त्यस्यापि क्वचिद् दोषानावहत्वेन विच्छित्तिकारित्वमुदाहर्तुं वक्ति—

पदपौनरुक्त्यं च व्यञ्जकत्वापेक्षयैव कदाचित् प्रयुज्यमानं शोभामावहति ।

व्यञ्जकत्वविरहे पदपौनरुक्त्यं तु दोष एव । एतच्च विहितानुवादादीनामप्युपलक्षणम् ।

तदुक्तं दर्पणे—न दोष इत्यधिकृत्य—'कथितं च पदं पुनः ।

विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि ।
दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने ।
अर्थान्तरसङ्क्रमितवाच्ये हर्षेऽवधारणे ॥' इति ।

उदाहरति—

यथा—

'यद्वञ्चनाहितमतिर्बहुचाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति ।
तत्साधवो न न विदन्ति विदन्ति किन्तु कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥'

इत्यादौ ।

वञ्चनायां सज्जनस्य प्रतारणायाम्, आहिता निहिता मतिर्येन सः, कार्योन्मुखः स्वार्थसाधनतत्परः खलजनो यद् बहून्यनेकविधानि चाटूनि मिथ्याप्रशंसनानि गर्भे मध्ये यस्य, तादृशं कृतकं कृत्रिममतात्त्विकं ब्रवीति, साधवः सज्जनाः, तद् न विदन्ति न जानन्ति, न, अपि तु विदन्ति, किन्तु अस्य खलजनस्य प्रणयं बाह्यप्रीतिं वृथा निष्फलं कर्तुं न पारयन्ति, न हि शक्नुवन्तीत्यर्थः ।

खलानां वञ्चनोपचारवचनतत्त्वं जानन्तोऽपि सन्तः स्वाभाविकसौजन्यपरवशास्तदनुकूलमेवाचरन्तीति सारम् ।

अत्र 'नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वम्' इत्यभियुक्तोक्तेः 'न विदन्ति न' इत्येतदुक्त्यैव तदर्थस्य लभ्यत्वे पुन'र्विदन्ति' इति पदोपादानमज्ञत्वव्यावृत्तिमुखेन सतामन्यवैलक्षण्येनाव्यभिचारेण वा तदभिज्ञत्वं द्योतयतीति पदपौनरुक्त्येऽपि न दुष्टतेति स्पष्टम् । 'पदग्रहणं च वाक्यादेरपि यथासम्भवमुपलक्षणम्'इत्याचार्याः । तत्र वाक्यस्य पौनरुक्त्योदाहरणं यथा रत्नावल्याम्—

'द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥ इत्येतदनन्तरम्—

'कः सन्देहः'—'द्वीपादन्यस्मादपि' इत्यादिवाक्यं पुनरुपात्तमवश्यमीप्सितलाभं व्यनक्तीति तत्रैव व्यक्तत्वाददुष्टम् ।

प्रसङ्गाद् भूतादिकालस्य व्यञ्जकतामुदाहरति—

कालस्य व्यञ्जकत्वं यथा—

कश्चित् प्रोषितः प्रवसन् प्रवत्स्यन् वा ब्रवीति । तमेव वा दयिता निगदति—

'समविसमणिव्विसेसा समन्तओ मन्दमन्दसंआरा ।
अइरा होइन्ति पहा मणोरहाणं पि दुल्लङ्घा ॥'

'समविषमनिर्विशेषाः समन्ततो मन्दमन्दसञ्चाराः ।
अचिराद् भविष्यन्ति पन्थानो मनोरथानामपि दुर्लङ्घ्याः ॥'इतिच्छाया।

समा अनिम्नोन्नता, विषमा निम्नोन्नता भूमयो निर्विशेषा जलैर्गर्तानां पूरणात् समाना यत्र ते, तथा समन्ततः परितो मन्दमन्दः पिच्छिलत्वात् स्खलनभयादतिमन्थरः सञ्चारोऽध्वगानां सञ्चलनं येषु तादृशाः पन्थानो मार्गाः, मनोरथानामभिलाषाणामपि का कथा मानवचरणानाम्, दुर्लङ्घ्या दुःखेन लङ्घितुं योग्या दुर्गमा इति यावत्, अचिरादाश्वेव भविष्यन्तीत्यर्थः ।

प्रत्यासीदति जलदसमये प्रवासो नोचितः, वार्ताहारकादेरपि सञ्चरणासम्भवादिति भावः ।

अत्राकारान्तः पथशब्दो न तु छायालेखकनिर्दिष्टः पथिन् शब्दः, तस्यापि 'वाटः पथश्च मार्गश्च' इति त्रिकाण्डशेषेण मार्गार्थेऽनुशिष्टत्वाद् 'रथा' इत्यनुप्रासानुरोधेन तथैव कल्पयितुमुचितत्वात् । वृत्तिकारमनुसरता मयाऽपि यथादृष्टमेव विवृतम् । भविष्यन्तीतिपदघटक–स्यविकरणविशिष्टतिङ्प्रत्ययस्य भविष्यत्कालबोधकस्य भविष्यन्नित्याशंसामात्रविषयोऽपि वर्षाकालो यदि नितरां मन्मथोन्माथकृत्, तर्हि

सुतरां प्रत्यासीदन्नितिवस्तुमुखेन प्रवासहेतुकविप्रलम्भशृङ्गाररसपोषणव्यञ्जनयोः कारणत्वम् । एवं 'गच्छ गच्छसि चेत् कान्त !' इत्यादौ, 'गताः क्षणेनास्फुटितेक्षणा मम' इत्यादौ चावसेयम् ।

तदाह—

अत्र 'अचिराद् भविष्यन्ति पन्थानः' इत्यत्र भविष्यन्तीत्यस्मिन्पदे प्रत्ययः कालविशेषाभिधायी रसपरिपोषहेतुः प्रकाशते । अयं हि गाथाऽर्थः प्रवासविप्रलम्भशृङ्गारविभावतया विभाव्यमानो रसवान् ।

विप्रलम्भशृङ्गारोऽत्र प्रवासमूलकः । तद्विभावता च गाथाऽर्थस्योद्दीपनत्वेन । विभावनञ्च पुनः पुनरनुसन्धानात्मिका चर्वणैव । तिङ्वदिह सङ्ख्याकारकादीनामपि व्यञ्जकत्वमंशांशकल्पनया पृथगवगन्तव्यम् ।

अंशांशकल्पनयैव पदावयवप्रत्ययस्य व्यञ्जकतामुदाहृत्य तादृशप्रकृतेरुदाहर्तुमाह—

यथाऽत्र प्रत्ययांशो व्यञ्जकः, तथा क्वचित्प्रकृत्यंशोऽपि दृश्यते ।

व्यञ्जक इति शेषः ।

उदाहरति—

यथा—

दरिद्रचरस्य सुदामनाम्नः कृष्णसखस्य विचित्रां सम्पदमकस्मादवलोकयन् कश्चिदाह—

'तद्गेहं नतभित्ति, मन्दिरमिदं लब्धावगाहं दिवः,
सा धेनुर्जरती, चरन्ति करिणामेता घनाभा घटाः ।
स क्षुद्रो मुसलध्वनिः, कलमिदं सङ्गीतकं योषिता-
माश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ॥'

नता जीर्णतया पतनोन्मुखी भित्तिर्यस्य तादृशं तत् स्मृतिमात्रगोचरभूतं नकुलमूषकादिमृदाकीर्णं गेहं गृहम् आसीदिति शेषः । दिव आकाशस्य लब्धोऽवगाह आलोडनं येन तादृशं गगनचुम्बि पुनरिदं पुरस्थितमद्भुतं मन्दिरम्, अस्तीति शेषः । सा स्मर्यमाणाऽकर्मण्या जरती जीर्णा धेनुर्गौः आसीदिति शेषः । पुनर्घनाभा मेघनीलाः करिणां हस्तिनाम्, एताः पुरोवर्तमाना लक्ष्मीलक्षणभूता घटाः सङ्घटितपङ्क्तयश्चरन्ति । स निःस्वतामात्रे श्रोतव्यः क्षुद्रो दारिद्रयव्यञ्जकत्वात्तुच्छो मुसलस्य धान्य-

कुट्टनजन्मा ध्वनिः शब्द आसीदिति शेषः, इदं श्रूयमाणं योषितामङ्गनानां कलं मधुरं समृद्धजनकलत्रश्रव्यं सङ्गीतकं गानं भवतीति शेषः । अयं द्विजो दिवसैस्त्रिचतुरै रेव दिनैः, न तु पक्षैर्मासैर्वर्षैर्वा, इयतीमेतावतीमसम्भावनीयां भूमिं संपत्प्रतिष्ठाम्, समारोपितो भगवता श्रीकृष्णेन प्रापितोऽभूदित्याश्चर्यमित्यर्थः ।

अल्पीयसैव कालेनैतावान् विपर्यासः सम्भावनाऽतिगोऽद्भुतावह इति सारम् ।

अत्र दिवसैरित्येतत्पदावयवदिवसरूपप्रकृतिभागो मासादिव्यावर्तनेन कालाल्पतां द्वारीकृत्य संपदोऽसम्भाव्यत्वेनाश्चर्यजनकतां व्यनक्ति ।

तदाह—

अत्र श्लोके 'दिवसै' रित्येतस्मिन् पदे प्रकृत्यंशोऽपि द्योतकः ।

अपिशब्दलभ्यमर्थं समुच्चिनोति—

सर्वनाम्नां च व्यञ्जकत्वं यथाऽत्रैवानन्तरोक्ते श्लोके ।

अनन्तरोक्ते 'तद्गेहम्' इत्यादिश्लोके । सर्वनाम्नां तदिदमादीनाम् । व्यञ्जकत्वं बोध्यमिति शेषः । इह स्मृत्यात्मकबुद्धिविषयवाचकेन सर्वनाम्ना तत्पदेन नतभित्तीति प्रकृत्यंशसाहाय्येन गेहस्यातिदौरवस्थ्यं सूच्यते । तेन केवलेन तु कदाचिद् गेहस्य स्मृतिप्रयोजकं शोभनतमत्वमपि सूच्यते । एवं नतभित्तिशब्दमात्रेणापि गेहस्य दुरवस्थाऽतिशयसूचनं दुष्करमेवेति द्वयोरेव व्यञ्जकता । इत्थमिदं शब्देनानुभवविषयार्थवाचकेन विशेषणवाचकसहकृतेन मन्दिरस्योत्कर्षः, जरतीपदसध्रीचीनेन तच्छब्देन गोरकर्मण्यता, विशेषणवाचकपदोपोद्बलितेनैतच्छब्देन करिघटायाः सपत्नप्रकर्षालङ्कारत्वम्, क्षुद्रशब्दसंवर्धितेन तच्छब्देन दारिद्र्यव्यञ्जकतया मुसलध्वनेस्तुच्छताऽऽधिक्यम्, कलपदानुप्राणितेनेदंशब्देन सङ्गीतस्य मनोरमतामुखेन समृद्धिलक्षणत्वं सूच्यत इति सर्वत्र सम्भूय सूचकत्वं ज्ञातव्यम् । तदिदंशब्दौ पुनः स्मरणानुभवविषयोरर्थयोरतिवैलक्षण्यं सूचयतः ।

उक्तमर्थं युक्त्या द्रढयति—

अत्र सर्वनाम्नामेव व्यञ्जकत्वं हृदि व्यवस्थाप्य कविना क्वेत्यादिशब्दप्रयोगो न कृतः ।

यदीह सर्वनाम्नां व्यञ्जकत्वं न स्यात्, तदा 'क्व कार्यं शशलक्ष्मणः क्व च कुलम्' इत्यादिवत् प्राचीननवीनगेहादीनां वैषम्यातिशयबोधनाय क्वशब्दद्वयं कविरवश्यं प्रयुञ्जीत । तद्व्यतिरेकदर्शनादपि निश्चीयत एवेदमिति भावः ।

उपसंहरति—

अनया दिशा सहृदयैरन्येऽपि व्यञ्जकविशेषाः स्वयमुत्प्रेक्षणीयाः ।

साकल्येन व्यञ्जकानां निर्देशः कर्तुं न शक्यत इति दिङ्मात्रं दर्शितम् । व्यङ्ग्यविशेषतर्कणप्रकारशिक्षा प्रागेव दत्तेति साम्प्रतं व्यञ्जकविशेषमात्रमुपात्तम् ।

ननु प्राक् पदस्य वाक्यस्य रचनायाश्च व्यञ्जकत्वं यदुक्तम्, तावतैव तद्घटकतिङादेरपि कृतकृत्यता, तद्विरहे तेषां तद्रूपताऽसम्भवादिति पौनरुक्त्यशङ्कामपाकरोति।

एतच्च सर्वं पदवाक्यरचनाद्योतनोक्त्यैव गतार्थमपि वैचित्र्येण व्युत्पत्तये पुनरुक्तम् ।

नैपुण्यात्मिका व्युत्पत्तिर्विनेयानामंशांशविभागपूर्वकतन्निरूपणेनाधिकं सम्भवतीति भावः ।

उक्तयनभिप्रेतमर्थं व्यवच्छिनत्ति—

न तु चार्थसामर्थ्याक्षेप्या रसादय इत्युक्तम् ।

न त्वित्यस्योक्तमित्यनेनान्वयः । प्रकृत्यन्तानां व्यञ्जकत्वोक्तेर्नायमभिप्रायः, यद् रसादयः सर्वत्रार्थसामर्थ्याक्षेप्या वाच्यवृत्तिव्यञ्जनाजन्यबोधविषया इति सारम् ।

तथाऽभ्युपगमे को दोष इत्यत आह—

तथा च सुबादीनां व्यञ्जकत्वकथनमनन्वितमेव ।

स्यादिति शेषः ।

अयमाशयः—यदिवाचकत्वमन्तरेण व्यञ्जकत्वं न स्यात्, तर्हि निसर्गादवाचकानां तिङादीनामिदानीमेवोक्तं व्यञ्जकत्वमसङ्गतं स्यात् ।

प्रागुक्तमपि स्मारयति—

उक्तमत्र पदानां व्यञ्जकत्वोक्त्यवसरे ।

अत्रास्मिन्नेव ग्रन्थे । पदानामपि वाक्यशक्तिवादिनां मतेऽवाचकत्वाद् व्यञ्जकत्वं दुर्घटम् । अवाचकानां च गीतशब्दानां, गुणव्यञ्जकानां च स्पर्शादिवर्णानां तादृशामेव व्यञ्जकत्वे कोऽपरः प्रकार इति विभावनीयम् ।

यत्र क्वचिदर्थविशेषाक्षेप्या अपि रसादयः, तत्रापि सहकारितया शब्दस्य व्यञ्जकत्वमर्थादायातमेव, तादृशार्थविशेषबोधस्य तादृशशब्दमन्तरेण भवितुमशक्यत्वात् । अत एवोक्तं दर्पणकृता—

> 'शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
> एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥' इति ।

तदाह—

किञ्चार्थविशेषाक्षेप्यत्वेऽपि रसादीनां तेषामर्थविशेषाणां व्यञ्जकशब्दाविनाभावित्वाद् यथा प्रदर्शितं व्यञ्जकस्वरूपपरिज्ञानं विभज्योपयुज्यत एव ।

विभज्येति प्रदर्शितमित्यनेनान्वेति । व्यञ्जकस्वरूपस्य व्यञ्जकतालक्षणस्य परिज्ञानं परिचयस्तत्कारणं वा ।

अर्थानां व्यञ्जकत्वप्रदर्शनप्रस्तावे तत्सहकारिणां शब्दानामपि विभागेन तत्प्रदर्शनमुपयोग्येव, न त्वसमञ्जसमित्याकूतम् ।

इहांशिकीं प्राचीनसम्मतिमाचष्टे—

शब्दविशेषाणां तत्रान्यत्र च चारुत्वं यद् विभागेनोपदर्शितम्, तदपि तेषां व्यञ्जकत्वेनैवावस्थितमित्यवगन्तव्यम् ।

शब्दविशेषाणां स्रक्चन्दनादिशब्दानाम् । तत्र पदव्यञ्जकत्वोक्त्यवसरे । अन्यत्र भामहादिग्रन्थेषु । तेषां शब्दानां व्यञ्जकत्वेनैव हेतुनाऽवस्थितं स्थितम् ।

इदमुक्तं भवति—स्रक्चन्दनादिरूपेषु शृङ्गाराङ्गवाचकेषु शब्दविशेषेषु विच्छित्तिविशेषाधायकत्वं शृङ्गारे विद्यते, बीभत्सादौ च नैवेति पूर्वैरस्माभिश्चाभिहितम् । तन्मूलजिज्ञासायां व्यञ्जनैव पुरः स्फुरति, यतः शृङ्गारे व्यङ्ग्ये तद्व्यञ्जकत्वेन तेषु चारुत्वम्, बीभत्सादिषु तु तद्व्यञ्जनप्रतिबन्धकत्वेनाचारुत्वमिति शब्दानां विभागेनाङ्गीकृतं चारुत्वमप्यन्यथाऽनुपपत्त्या स्वोपपादिकां तत्तच्छब्दानां व्यञ्जकतामापादयति, न तु केवलमस्माभिः प्रथमं प्रकटितेयं सरणिः ।

ननु यदि तादृशशब्दानां व्यञ्जकत्वनिबन्धनमेव चारुत्वम्, तर्हि यत्र न व्यञ्जकता, तत्रापि कथं चारुत्वं प्रतीयत इत्याशङ्कां निरस्यति—

यत्रापि न तत् प्रतिभासते, तत्रापि व्यञ्जके रचनाऽन्तरे यद् दृष्टं सौष्ठवं तेषां प्रवाहपतितानां तदेवाभ्यासादपोद्धृतानामप्यवभासत इत्यवस्थातव्यम् ।

तद् व्यञ्जकत्वं तेषां शब्दानाम् । प्रवाहपतितानामसमीक्ष्य भूयोऽन्यत्र प्रयुज्यमानानाम् । तत् सौष्ठवम् । अभ्यासात् पौनःपुन्येन प्राचीनपरिचयात् । अपोद्धृतानां पृथगवगतानाम् । अवस्थातव्यं नियमेनाङ्गीकर्तव्यम् ।

अयं भावः—स्रक्चन्दनादिशब्देषु शृङ्गारव्यञ्जकरचनाऽन्तर्गतेषु यत्र क्वचिद्

व्यञ्जकत्वस्य वास्तविकस्य विरहः, सौष्ठवस्य च सद्भावः, तत्र शृङ्गारव्यञ्जकसङ्घटनाघटकानां तेषामन्यत्र यद् व्यञ्जकत्वं सादृश्यमहिम्ना त एवेमेशब्दा इति तत्त्वप्रत्यभिज्ञया तस्यैवारोपेण सौष्ठवनिर्वहणम्, न तु सर्वथा व्यञ्जकत्वविरहेण। तथा च चारुत्वं व्यञ्जकत्वं च समनियतमिति बोद्धव्यम्।

अन्यथाऽनुपपत्तिमभिधत्ते—

कोऽन्यथा तुल्ये वाचकत्वे शब्दानां चारुत्वविषयो विशेषः स्यात्।

अन्यथा व्यञ्जकतायाश्चारुत्वनियामकत्वानङ्गीकारे। व्यञ्जकत्वनिबन्धन एव शब्दानां चारुत्वे विशेष इति भावः।

ननु नासौ विशेषो व्यञ्जकत्वनिबन्धनः, अपि त्वपूर्वः सहृदयैरेव वेद्यः कश्चिदित्याशङ्कां विकल्पद्वयकल्पनेन खण्डयति—

अन्य एवासौ सहृदयसंवेद्य इति चेत्, किमिदं सहृदयत्वं नाम? किं रसभावानपेक्षकाव्याश्रितसमयविशेषाभिज्ञत्वम्? उत रसभावादिमयकाव्यस्वरूपपरिज्ञाननैपुण्यम्?।

असौ विशेषः शब्दानामिति शेषः। रसभावानपेक्षं तद्व्यञ्जकत्वेनाविवक्षितं यत् काव्यम्, तदाश्रितस्तादृशकाव्याङ्गपदार्थविषयको यः समयविशेषो विलक्षणनियमः, तस्य सम्यग् ज्ञातृत्वम्, इति प्रथमः प्रश्नरूपो विकल्पः। उतेत्यादिना द्वितीय उक्तः। सहृदयत्वे रसभावज्ञानं प्रयोजकं न वेति सारम्। साधीयांस्त्विहान्तिमः कल्प इत्यनुपदं स्फुटीभविष्यति।

प्रथमं विकल्पं दूषयति—

पूर्वस्मिन् पक्षे तथाविधसहृदयव्यवस्थापितानां शब्दविशेषाणां चारुत्वनियमो न स्यात्। समयान्तरेणान्यथाऽपि व्यवस्थापनसम्भवात्।

पूर्वस्मिन् पक्षे—सहृदयत्वस्य रसाद्यनभिज्ञत्वरूपत्वे। तादृशेन रसाद्यनभिज्ञेन सहृदयेन व्यवस्थापितानाम् 'अयमेव शब्दश्चारुरयं न चारुः' इति कृतनियमानाम्, शब्दविशेषाणां चारुत्वस्य नियमो व्यवस्था न स्यात्। कुत इति चेत्-पुनः समयान्तरेण तद्भिन्नसहृदयस्यान्यसिद्धान्तेन। अन्यथा चारोरचारुत्वेनाचारोश्च शब्दस्य चारुत्वेन व्यवस्थापनस्य नियमनस्य सम्भवादित्यर्थः।

अयं भावः—अद्वितीयास्वादात्मकत्वेन वस्तुतश्चारुत्वनियामको रसादिः, तेन तदभिज्ञसहृदयेन तदनुसारं विहिताचारुत्वव्यवस्था स्थेयसी साधीयसी च सम्भ-

वति । तदनभिज्ञेन तु स्वैरं यं कञ्चिदंशमादाय व्यवस्थाकरणस्याङ्गीकारे तु चारुत्वमव्यवस्थितं स्यात्, परकृतांशान्तरानुसारि-याहच्छिकव्यवस्थाऽन्तराणामपि सम्भवात् ।

द्वितीयकल्पमनुमत्योपपादयति—

द्वितीयस्मिंस्तु पक्षे रसज्ञतैव सहृदयत्वमिति । तथाविधैः सहृदयैः संवेद्यो रसादिसमर्पणसामर्थ्यमेव नैसर्गिकं शब्दानां विशेष इति व्यञ्जकत्वाश्रय एव तेषां मुख्यं चारुत्वम् ।

तथाविधैः रसाद्यभिज्ञैः । रसादीनां समर्पणं सम्यक् प्रकाशनम् । तदनुकूलं सामर्थ्यं व्यञ्जना शक्तिः शब्दानां तदेव नैसर्गिकमकृत्रिमं विशेषो वैलक्षण्यं चारुत्वमिति यावत् । इति हेतोः व्यञ्जकत्वस्य व्यञ्जनाया आश्रय आश्रयणे, एव, न त्वभिधाऽऽदीनामपि । तेषां शब्दानां मुख्यं चारुत्वं विशेष इति सम्बन्धः ।

इहाश्रयशब्दस्य भावसाधनत्वस्वीकारेऽन्वयः सङ्गच्छते । न त्वधिकरणसाधनः प्रथमान्त आश्रयशब्दः, व्यञ्जकत्वरूपचारुत्वस्य तदाश्रयत्वासम्भवात् । यद्वा—व्यञ्जकत्वाश्रयाणामिति व्यञ्जकत्वाधिकरणीभूतशब्दविशेषणत्वेन षष्ठ्यन्तपाठोऽन्वयाबाधादुपपद्यते । एवमेवानुपदं 'वाचकत्वाश्रयस्तु' इत्यत्रापि शब्दविशेषणतयैव 'वाचकत्वाश्रयाणाम्' इति पाठ एव समीचीनतमः ।

नन्वेवं व्यञ्जनाविरहे सर्वथा वाचकानां शब्दानां चारुत्वाभाव उक्तो भवतीत्याह-

वाचकत्वाश्रयस्तु प्रसाद एवार्थापेक्षायां तेषां विशेषः । अर्थानपेक्षायान्त्वनुप्रासादिरेव ।

अर्थोऽत्र वाच्यः ।

अयमाशयः—व्यञ्जकत्वाभाववन्तोऽपि द्विविधा हि शब्दाश्चारुत्वमाश्रयन्ति । एके, वाच्यार्थबोधप्रयोज्यचमत्कारवन्तः, तेषु झटिति वाच्यार्थबोधकत्वविशेषरूपः प्रसादगुण एव विशेषः। अपरे, वाच्यार्थनैरपेक्ष्येण नानाजातीयस्वरूपसन्निवेशप्रयोज्यचारुत्वभाजः, तेषु तादृशस्वरूपसन्निवेशलक्षणोऽनुप्रासयमकादिः शब्दालङ्कार एव विशेषः । किन्तूभयत्रापि तत्र—

पुरः सुरीणां भण केव मानवी,
न यत्र तास्तत्र तु शोभिकाऽपि सा ॥'

इति न्यायेनैव चारुत्वं कल्प्यते, व्यञ्जनाविरहेऽपि प्रसन्नाया रचनायाः कियत-

श्चमत्कारस्यानुभवात्। वास्तविकस्य तु तस्य व्यञ्जकत्वाभावेऽसम्भव एवोक्तः।

अथ 'उपायांश्चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेद्' इति न्यायेन रसादिव्यञ्जने विरोधिनोऽपि दर्शयितुमुपक्रमं कृतवतीं कारिकामवतारयति वृत्तिकारः—

एवं रसादीनां व्यञ्जकस्वरूपमभिधाय, तेषामेव विरोधिरूपं लक्षयितुमिदमुपक्रम्यते—

कारिकाकारेणेति शेषः। रसादीनां ये व्यञ्जका वर्ण-पद-वाक्यादयः, तेषां स्वरूपमित्थमुक्त्वा, तेषां रसादीनामेव ये प्रतीतिप्रतिबन्धकतया विरोधिनः, तेषां रूपमिति योजना।

'प्रबन्धे मुक्तके वाऽपि रसादीन्बन्धुमिच्छता।
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम्॥ ७१॥'

वाशब्दः समुच्चयार्थकः। प्रबन्धे संघटनाविशेषे, मुक्तके प्रागुक्तलक्षणे वाऽपि रसादीन् बन्धुं सन्निवेशयितुं व्यञ्जयितुमिति यावत्, इच्छता सुमतिना कविना, विरोधिनाम् 'विरोधिरससम्बन्धि-' इत्यादिनाऽनुपदं वक्ष्यमाणानां परिहारे निराकरणे यत्नः कार्य इत्यर्थः।

तदाह—

प्रबन्धे मुक्तके वाऽपि रसभावनिबन्धनं प्रति, आदृतमनाः कविर्विरोधिपरिहारे परं यत्नमादधीत।

तादृशयत्नाकरणे का हानिरित्यत आह—

अन्यथा त्वस्य रसमयः श्लोक एकोऽपि सम्यङ् न सम्पद्यते।

विरोधिभी रसादिनिबन्धनस्य व्याहननात्।

हेयज्ञानाभावे हानासम्भवाद् रसादिप्रतीतिविरोधीन्यपि लक्षयितुं कारिकामवतारयति—

कानि पुनस्तानि विरोधीनि? यानि यत्नतः कवेः परिहर्तव्यानीत्युच्यते—

परिहरणीयविरोधिविषयकजिज्ञासानिवृत्त्य उच्यत इति सारम्।

'ननु 'विभावभावानुभावसञ्चार्यौचित्यचारुणः' इत्यादि यदुक्तम्, तत एव व्यतिरेकमुखेनैतदप्यवगंस्यते, मैवम्—व्यतिरेकेण हि तदभावमात्रं प्रतीयते, न तु

तद्विरुद्धम्। तदभावमात्रं च न तथा दूषकं, यथा तद्विरुद्धम्। पथ्यानुपयोगो हि न तथा व्याधिं जनयति, यद्वदपथ्योपयोगः।' इत्याचार्याः।

'विरोधिरससम्बन्धि-विभावादिपरिग्रहः।
विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम्॥ ७४॥
अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम्।
परिपोषं गतस्यापि पौनःपुन्येन दीपनम्।
रसस्य स्याद् विरोधाय वृत्त्यनौचित्यमेव च॥ ७५॥'

एतत् सर्वं षट्षष्ट्यादिकारिकापञ्चकविवरणे वर्णितमेवेति सङ्क्षेपादेवेह विव्रियते। विरोधिनो रसस्य सम्बन्धिनां विभावादीनां परिग्रहो रसस्य विरोधाय स्यादिति सम्बन्धः। पूर्वं 'विभावभावानुभाव-' इत्यादिश्लोकेन रसादिप्रतीतिसाधकं यदुक्तम्, अत्र तत्प्रतिकूलं श्लोकार्धेनामुना कथितम्। विस्तरेणान्वितस्य विस्तीर्णस्यापि, अन्यस्य प्रकृतरसाद्यनङ्गस्य वस्तुन इति वृत्तस्य वर्णनं रसादिप्रतीतौ विरोधीति पूर्ववत्। अनेनाप्यर्धश्लोकेन तत्र 'इतिवृत्तवशायाताम्' इत्यादिश्लोकद्वयोक्तरसादिप्रकाशकविरुद्धमुक्तम्। अकाण्ड एवानवसर एव रसादेर्विच्छित्तिर्विच्छेदः, अकाण्डे रसादेः प्रकाशनं च विरोधीति प्राग्वत्। अयमपि श्लोकार्धः 'उद्दीपनप्रशमने' इत्यादिपद्यार्धप्रतिपादितविरोधि बोधयति। परिपोषं गतस्यापि रसस्य पौनःपुन्येन दीपनमपि रसस्य विरुद्धमेव। 'रसस्यारब्धविश्रान्तेः' इत्यादिपद्यार्धोक्तविरुद्धमयमपि पद्यार्धः प्रतिपादयति। वृत्तीनामनौचित्यं च रसादीनां प्रतीतौ विरोधाय स्यात्। एषोऽपि श्लोकार्धः 'अलंकृतीनाम्' इत्यादिश्लोकार्धप्रत्यायितप्रतिकूलमेव प्रतिपादयतीति बोध्यम्।

कारिकाः क्रमेण विवृणोति वृत्तिकृत्—

प्रस्तुतरसापेक्षया विरोधी यो रसः, तस्य सम्बन्धिनां विभावानुभावव्यभिचारिणां परिग्रहो रसविरोधहेतुरेकः सम्भवनीयः।

तत्र विरोधिरसविभावपरिग्रहमुदाहरति—

तत्र विरोधिरसविभावपरिग्रहो यथा—शान्तरसविभावेषु तद्विभावतयैव निरूपितेष्वनन्तरमेव शृङ्गारादिवर्णने।

शान्तशृङ्गाररसयोर्हि सामानाधिकरण्ये विरोधः, तदीयस्थायिभावयोः शमरत्यो रेकत्रानवस्थानात्। यथा निसर्गशान्ताश्रयत्वेनोदासीनस्य हरस्य, शृङ्गाराश्रयीभूत-नायकत्वेन वर्णने 'हरस्तु किञ्चित् परिलुप्तधैर्यः' इत्यादिना कुमारसम्भवतृतीयसर्गे। तत्र कथानकानुरोधेन तथावर्णनमिति कथञ्चित् परिहारे तु तापसादिविषयकमुदाहरणान्तरमूह्यम्। इदमालम्बनमात्रस्योदाहरणम्। उद्दीपनस्य तु दर्पणोक्तम्–'मानं मा कुरु तन्वङ्गि ! ज्ञात्वा यौवनमस्थिरम्।' इतिशृङ्गारविरुद्धशान्तरसोद्दीपनयौवना-स्थैर्यनिवेदनपरिग्रहादवगन्तव्यम्। हास्यशृङ्गारयोर्वीराद्भुतयो रौद्रकरुणयोर्भयान-कबीभत्सयोर्नालम्बनकृतो विरोध इति शान्तशृङ्गारयोरेवोपादानम्।

प्रथमविरोधिद्वितीयांशमुदाहरति—

विरोधिरसभावपरिग्रहो यथा—प्रियं प्रति प्रणयकलहकुपितासु कामिनीषु वैराग्यकथाभिरनुनये।

विरोधिरसस्य यो भावो व्यभिचारी, तस्य परिग्रहोऽपि प्रकृतरसव्यञ्जनविरोधीति शेषः। विरोधिरसस्थायिपरिग्रहे तु प्रकृतरसस्थायिन एवानुत्थानमिति दूरे विरोधवार्ता। न चैवं व्यभिचारिणि तस्यानियतत्वात्।

इदमिहावगन्तव्यम्—

'प्रसादे वर्तस्व प्रकटय मुदं सन्त्यज रुषं, प्रिये ! शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं, न मुग्धे ! प्रत्येतुं प्रभवति गतः कालहरिणः॥'

इति चन्द्रकवेः काव्ये प्रकृतविप्रलम्भशृङ्गारसविरोधिनश्शान्तरसस्य स्थायी निर्वेदः शमो वा, तत्पोषकवैराग्यकथाकदम्बकेन यद्यपि परिगृहीतः, किन्तु न स्थायित्वेन, अपि तु व्यभिचारित्वेनेति न रतेरुत्थानासम्भवः। स्थायित्वेन तत्परिग्रहे तु तदसम्भव एवेति प्रागेवोक्तम्। स्थायिव्यभिचार्युभयसाधारणभावपदं स्थायिनोऽपि क्वचिद् व्यभिचारित्वेन परिग्रहमिह सूचयति।

केचित्त्विदमपि 'मानं मा कुरु' इत्यादिवदुद्दीपनोदाहरणमेव वैषम्ये बीजाभावादिति वदन्ति।

तत्तृतीयांशमुदाहरति—

विरोधिरसानुभावपरिग्रहो यथा—प्रणयकुपितायां प्रियायामप्रसीदन्त्यां नायकस्य कोपावेशविवशस्य रौद्रानुभाववर्णने।

रौद्रानुभाव ओष्ठदंशनतर्जनपादप्रहारादिः । नायकस्य तदाचरणं वर्णितं हि नितरां रसभङ्गाय जायते ।

द्वितीयरसविरोधहेतूदाहरणमाचष्टे—

अयं चान्यो रसभङ्गहेतु—र्यत् प्रस्तुतरसाद्यपेक्षया वस्तुनोऽन्यस्य कथञ्चिदन्वितस्यापि विस्तरेण कथनम् । यथा—विप्रलम्भशृङ्गारे नायकस्य कस्यचिद् वर्णयितुमुपक्रान्तस्य कवेर्यमकाद्यलङ्कारनिबन्धरसिकतया महता प्रबन्धेन पर्वतादिवर्णने ।

सर्वथा प्रकृतासम्बद्धस्येतिवृत्तस्य वर्णनमसम्भवमिति कथञ्चिदन्वितस्येति वस्तुनो विशेषणमुक्तम् । परम्परया सम्बद्धस्येति तदर्थः । तादृशवस्तुनः प्रसङ्गादल्पमेव वर्णनमुचितं भवति, विपुलं तु प्रकृतमपि तिरोदधद् वक्तुरनवधेयवचनतामापादयद् विच्छित्तिं विच्छिनत्ति । उपक्रान्तस्येति नायकविशेषणम् । सुकुमारतरे विप्रलम्भशृङ्गारे हि 'विप्रलम्भे विशेषतः' इत्यनेन प्राङ्निषिद्धस्य यमकादेर्निवेशमभिनिवेशवशेन कुर्वतः कवेरनतिप्रासङ्गिक–नगनगरनदीवर्णनाद्यनुपयोगादनुचितमेव । यथा वा काश्मीरमेण्ठकविरचितहयग्रीववधनाटके—नेतारं विष्णुं विहाय प्रतिनायकस्य हयग्रीवदैत्यस्य जलकेलि–वनविहारादीनां विस्तरेण वर्णने ।

तृतीयं द्विशाखमुदाहरति—

अयं चापरो रसभङ्गहेतुरवगन्तव्यो यदकाण्ड एव विच्छित्ती रसस्याकाण्डे च प्रथनम् । तत्रानवसरे विरामो यथा–नायकस्य कस्यचित् स्पृहणीयसमागमया नायिकया कयाचित् परां परिपोषपदवीं प्राप्ते शृङ्गारे, विदिते च परस्परानुरागे समागमोपायचिन्तोचितं व्यवहारमुत्सृज्य स्वतन्त्रतया व्यापारान्तरवर्णने । अनवसरे च प्रकाशनं रसस्य यथा–प्रवृत्ते प्रवृद्धविविधवीरसंक्षये कल्पसंक्षयकल्पे सङ्ग्रामे, देवप्रायस्यापि तावन्नायकस्यानुपक्रान्तविप्रलम्भशृङ्गारस्य निमित्तमुचितमन्तरेणैव शृङ्गारकथायामवतारवर्णने ।

स्पृहणीयो गुणातिरेकेण कमनीयः समागमो यस्या इति बहुव्रीहिः । शृङ्गारश्चात्र पूर्वरागविप्रलम्भलक्षणः, समागमस्यानिष्पत्तेः । परस्परानुराग उभयोरनुरागे विदित उभाभ्यामवगते सतीति शेषः ।

उभयोरनुरागावगम एव हि रसपरिपोषो, न त्वेकतरस्य, समागमोपायस्य चिन्ताऽनुसन्धानं तदुचितो व्यवहारश्च दूतीप्रेषणपत्रलेखनादिः । व्यापारान्तराणि तद-

नुयोगिकव्यक्त्यन्तरसम्बन्धीनि। यथा रत्नावल्यां चतुर्थेऽङ्के—बाभ्रव्यागमने रत्नावलीं विस्मृत्य वत्सराजेन विजयवर्मणो व्यापारश्रवणे। तत्र नायिकाया नितान्तमपरामर्शाद् रसविच्छेदोऽनवसरे। यथा वा भवभूतेर्वीरचरिते—श्रीरामपरशुरामयोरुपक्रममाणे सङ्ग्रामे 'कङ्कणमोचनाय गच्छामि' इति श्रीरामस्योक्तौ। सा हि रामचन्द्रासामर्थ्यसंशयं जनयन्ती प्रकृतं वीररसं विच्छिनत्ति।

प्रकर्षेण वृद्धो विविधानां वीराणां सम्यक् क्षयो यत्र तस्मिन् कल्पसंक्षयकल्पे प्रलयसदृशे। देवप्रायत्वकथनेन नायकस्य धीरोदात्ततयाऽनुचितोपन्यासपराङ्मुखशीलता सूच्यते। अयोग्यत्वात् तदानीमुपक्रान्तो विप्रलम्भश्रृङ्गारो येन तस्येति नायकविशेषणम्। निमित्तेत्यादिनोचितनिमित्तापतने दोषाभावः प्रकाश्यते। यथा वेणीसंहारे द्वितीयेऽङ्के—भानुमतीदुर्योधनसमागमे। तत्र विलासनाम्नि प्रतिमुखसन्ध्यङ्गे, सङ्ग्रामे प्रारब्धे तत्सन्नाहमुपेक्ष्य दुर्योधनस्यासामयिकः श्रृङ्गारोपन्यासः प्रकृतवीररसविच्छेदं जनयति।

दोषद्वितीयांशसमाधिमाशङ्क्य खण्डयति—

न चैवंविधे विषये दैवव्यामोहितत्वं कथापुरुषस्य परिहारः, यतो रसबन्ध एव कवेः प्राधान्येन स्ववृत्तिनिबन्धनं युक्तम्।

एवंविधेऽनुचितोपन्यासात्मके विषये कथापुरुषस्य नायकस्य दैवव्यामोहितत्वं दैवकृतव्यामोहेनैव तेनैवं कृतमिति परिहारः समाधिश्च न भवितुमर्हति, यतो नेह नेतुरनौचित्यं विविच्यते, यस्य दैवव्यामोहः परिहारो भवेत्। किन्तु कवेः, स च न दैवव्यामोहभाक्, कविना तु रसनिबन्धैकतानेनैव भाव्यमित्यसकृदादिष्टमिति दोषोऽसमाधेय एव। स्ववृत्तिनिबन्धनं प्रबन्धघटनम्।

ननु तर्हीतिवृत्तवर्णनमनपेक्षितत्वादप्रयोजकमेवेत्यत आह—

इतिवृत्तवर्णनं तदुपाय एवेत्युक्तं प्राक्—'आलोकार्थी यथा दीपशिखायां यत्नवान् जनः' इत्यादिना।

तदुपाय एव प्रतीयमानरसादिप्रतीतिसाधनमेव। न त्वप्रयोजकम्, न वा प्रधानोद्देश्यम्।

उक्तं समर्थयन्नुपसंहरति—

अत एव चेतिवृत्तमात्रवर्णनप्राधान्येऽङ्गाङ्गिभावरहितरसभावनिबन्धेन

च कवीनामेवंविधानि स्खलितानि भवन्तीति रसादिरूपव्यङ्ग्यतात्पर्यमेवैषां युक्तमिति यत्नोऽस्माभिरारब्धो, न ध्वनिप्रतिपादनमात्राभिनिवेशेन।

अत एव—रसाद्यास्वादस्य काव्यप्रधानोद्देश्यत्वादेव। अङ्गाङ्गिभावः प्रधानाप्रधानभावः। स्खलितानि दोषाः। अभिनिवेश आग्रहः।

इदमाकूतम्—वृत्तान्तमात्रवर्णनाभिनिवेशिनः कवयः कदाचिद् रसभावादीनां काव्यमुख्योद्देश्यप्रतीतिविषयाणामङ्गाङ्गिभावमविविच्यैव प्रवर्तमाना महतीस्त्रुटीः कुर्वन्ति, तद्रसाद्यास्वादस्यैव मुख्योद्देश्यताख्यापनेन तासां निरासार्थमेवायं मे प्रयासः न तु ध्वनिप्रपञ्चप्रतिपादनाग्रहेण।

तुरीयं रसभङ्गहेतुमाचष्टे—

पुनश्चायमन्यो रसभङ्गहेतुरवधारणीयो यत् परिपोषं गतस्यापि रसस्य पौनःपुन्येन दीपनम्।

अवधारणीयो निश्चेयः। परिपोषः स्वीयविभावादिसामग्रीसंवलनादास्वादप्रकर्षः। दीपनं प्रकाशनमास्वादनमिति यावत्।

निदर्शनदर्शनेनोपपादयति—

उपभुक्तो हि रसः स्वसामग्रीलब्धपरिपोषः पुनः पुनः परामृश्यमाणः परिम्लानकुसुमकल्पः कल्पते।

तेन हि सहृदयानां महद् वैमुख्यं सम्भवति। उदाहरणन्तु कुमारसम्भवचतुर्थसर्गे रतिविलापे—करुणरसस्य पुनःपुनर्दीप्तिरित्यन्यत्र स्फुटम्।

पञ्चमं रसभङ्गकारणमाह—

तथा वृत्तेर्व्यवहारस्य यदनौचित्यम्, तदपि रसभङ्गहेतुरेव।

यं प्रति यस्य यादृश आचारः समुचितः तदन्यथाकरणमपि हि सहृदयानुचितत्वाद् विमुखीकरोत्येव। इदमेवान्यत्रोक्तानां प्रकृतिविपर्ययादिरसभङ्गहेतूनामप्युपलक्षणम्। 'वृत्त्यनौचित्यमेव च' इति कारिकाघटकयोः 'एव च'शब्दयोर्वृत्तौ 'अप्येव' शब्दाभ्यां प्रतिनिर्देशः।

उदाहरति—

यथा—नायकं प्रति नायिकायाः कस्याश्चिदुचिताङ्गभङ्गिमन्तरेण स्वयं सम्भोगाभिलाषकथने।

अङ्गभङ्गिः शृङ्गारचेष्टा, विभ्रम इति यावत्।

विभ्रमेणैव रिरंसाप्रकाशनं रमणीनां चमत्कृतिमादधाति, कण्ठतः प्रकाशनन्तु

ग्राम्यतां प्रकाशयद् रसभङ्गाय जायते। ननु स्वयन्दूत्याः का गतिः? तथाऽपि व्यञ्जनयैव तत्प्रकाशनात्।

लक्ष्यानुरोधेन वृत्तिपदार्थं पुनरन्यथा व्याख्याति—

यदि वा वृत्तीनां भरतप्रसिद्धानां कैशिक्यादीनां, काव्यालङ्कारान्तर-प्रसिद्धानामुपनागरिकाऽऽद्यानां वा यदनौचित्यमविषये निबन्धनम्, तदपि रसभङ्गहेतुः।

भरतप्रसिद्धानां तत्प्रणीतनाटयशास्त्रोक्तानाम्। कैशिक्यादीनां कैशिकी-सात्वती-भारत्या-रभटीनाम्।

तत्र कैशिकीलक्षणं यथा दर्पणे—

'या श्लक्ष्णनेपथ्यविधानचित्रा, स्त्रीसङ्कुला पुष्कलनृत्यगीता।
कामोपभोगप्रभवोपचारा, सा कैशिकी चारुविलासयुक्ता॥' इति।

सात्त्वतीलक्षणं यथा नाटयशास्त्रे—

'या सत्त्वजेनेह गुणेन युक्ता, न्यायेन वृत्तेन समन्विता च।
हर्षोत्कटा संहृतशोकभावा, सा सात्त्वती नाम भवेत्तु वृत्तिः॥' इति।

भारतीलक्षणं यथा तत्रैव—

'या वाक्प्रधाना पुरुषप्रयोज्या, स्त्रीवर्जिता संस्कृतवाक्ययुक्ता।
स्वनामधेयैर्भरतैः प्रयुक्ता, सा भारती नाम भवेत् तु वृत्तिः॥' इति।

आरभटीलक्षणं यथा शृङ्गारतिलके—

'या चित्रयुद्धभ्रमशस्त्रपातमायेन्द्रजालप्लुतिलङ्घिताढया।
ओजस्विगुर्वक्षरबन्धगाढ़ा, ज्ञेया बुधैः साऽऽरभटीति वृत्तिः॥' इति।

तासामुत्पत्तिश्च यथा भरतानुशासने—

'ऋग्वेदाद् भारती वृत्तिर्यजुर्वेदात्तु सात्त्वती॥
कैशिकी सामवेदाच्च शेषा चाथर्वणी तथा॥' इति।

काव्यालङ्कारान्तरप्रसिद्धानामुद्भटाद्युदीरितानाम्। उपनागरिकाऽऽद्यानाम्—उपनागरिका-परुषा-कोमलानाम्।

तासां क्रमेण लक्षणं यथोद्भटालङ्कारे—

'सरूपसय्योंगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः।
स्पर्शैर्युतां च मन्यन्त उपनागरिकां बुधाः॥' इति।

'शषाभ्यां रेफसंयोगैष्टवर्गेण च योजिता ।
परुषानाम वृत्तिः स्याद् ह्लह्याद्यैश्च संयुता ॥' इति ।
'शेषैर्वर्णैर्यथायोगं कथितां कोमलाख्यया ।
ग्राम्यां वृत्तिं प्रशंसन्ति काव्येष्वादृतबुद्धयः ॥' इति च ।

उपसंहरन्नुपदिशति—

एवमेषां रसविरोधिनामन्येषां चानया दिशा स्वयमुत्प्रेक्षितानां परिहारे सत्कविभिरवहितैर्भवितव्यम् ।

सत्कविभिः सत्कवीभवितुमिच्छद्भिः ।

अत्र रसादिप्राधान्यबोधकश्लोकान् क्रमेणाभिदधदाह—

परिकरश्लोकाश्चात्र—

तत्र प्रथमेन रसादीनां काव्ये मुख्योद्देश्यत्वमाख्याति—

'मुख्या व्यापारविषयाः सत्कवीनां रसादयः ।
तेषां निबन्धने भाव्यं तैः सदैवाप्रमादिभिः ॥'

तेषां रसादीनाम् । तैः सत्कविभिः । अप्रमादिभिः सावधानैः ।

प्रमादे दोषं दर्शयति—

'नीरसस्तु प्रबन्धो यः सोऽपशब्दो महान् कवेः ।
स तेनाकविरेव स्यादन्येनास्मृतलक्षणः ॥'

स नीरसः प्रबन्धो नीरसकाव्यरचना कवेर्महानपशब्दो दुर्यशस्तज्जनकमिति कार्यकारणभावेनायुर्घृतमितिवल्लक्षणा । स कविस्तेन तादृशप्रबन्धरचनेन, अकविरप्रशस्तकविः, परिपालितसदाचार एव हि सुगृहीतनामा भवतीति सिद्धान्तेन अन्येन स्वभिन्नेनानुचिताचरणान्न स्मृतं लक्षणं नाम यस्य तादृश एव स्यादित्यर्थः । 'अपशवो वाऽन्ये गवाश्वेभ्यः' इत्यादिवदकविरित्यत्राप्राशस्त्यं नञर्थः ।

तदुक्तम्—'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥' इति ।

ननु कुमारसम्भव—रत्नावली-वेणीसंहारादिप्रबन्धकानां प्राचां सरणिमेवानुसरन्नर्वाचीनः कविः किमिति गर्हणीयः स्यादित्यत आह—

'पूर्वे विशृङ्खलगिरः कवयः प्राप्तकीर्तयः ।

तान समाश्रित्य न त्याज्या नीतिरेषा मनीषिणा ॥'

पूर्वे प्राचीनाः कालिदासादयः। विश्रृङ्खलगिरः प्रतिभाऽतिरेकोन्मीलिताप्रतिबद्धमधुररुचिरकविताप्रवाहाः। तैर्यदि कुत्रचित् स्खलितम्, तर्हि तदीयकवित्वश्रारिमवैभवेन तत् समाहितं भवति, न तु तद्दृष्टान्तेन नवीनैरपि स्खलनीयम्, तस्य समाधातुमशक्यत्वादिति भावः।

नायं मयैवोत्प्रेक्षितो न्यायः, किन्त्वादिकवीनामपि तात्पर्यगोचरीभूत एव स इत्याह—

'वाल्मीकिव्यासमुख्याश्च ये प्रख्याताः कवीश्वराः।
तदभिप्रायबाह्योऽयं नास्माभिर्दर्शितो नयः ॥' इति।

तस्मादिह सर्वथा सावधानैः कविभिर्भाव्यमिति भावः।

इत्थं सामान्येन रसादिविरोधिनः परिहाराय परिगणय्य प्रतिप्रसवं वक्ति—

'विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम्।
बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला ॥ ७६ ॥'

विवक्षिते प्रस्तुते रसे लब्धप्रतिष्ठे सामग्रीसमवधानेन प्राप्तपरिपोषे सति, बाध्यानां प्रस्तुतरसेन तदङ्गेन वाऽभिभवितुमशक्यानाम्, अन्यत्राङ्गभावमप्रधानत्वं स्वभावादथवाऽऽरोपात् प्राप्तानां विरोधिरसानाम्, उक्तिरुपादानमच्छला, निर्दोषेत्यर्थः।

तदाह—

स्वसामग्रीलब्धपरिपोषे तु विवक्षिते रसे विरोधिनां विरोधिरसाङ्गानां बाध्यानामङ्गभावं वा प्राप्तानां सतामुक्तिर्निर्दोषा।

तुना प्रकृतरसस्यापरिपुष्टत्वे, बाध्यानामङ्गभावं प्राप्तानां वा विरोधिरसानामुक्तिर्व्यवच्छिद्यते।

अयमभिप्रायः—यथा सप्ताङ्गराज्यरूढमूलस्य राज्ञोऽनतिप्रयासाभिभवनीयेनानुचरीभूतेन वा द्विषता संसर्गो हानिमापादयितुमनर्हः, तथैव स्वानुकूलविभावादिपरिपुष्टस्य प्रकृतरसस्य बाध्येनाङ्गभूतेन वा विरोधिरसाङ्गेनेति तत्कथनमपि नानुचितम्। तदुक्तं दर्पणे—'सञ्चार्यादेर्विरुद्धस्य बाध्यत्वेन वचोगुणः' इति।

बाध्यत्वं विरोधिरसाङ्गानां विवृणोति—

बाध्यत्वं हि विरोधिनां शक्याभिभवत्वे सति, नान्यथा ।

अभिभवितुमशक्यत्वे तु बाधकत्वमेव, दुर्बल एव हि रिपुर्बाध्यो भवति, न तु समकक्षः प्रबलो वेति तात्पर्यम् ।

कुतस्तदुक्तिर्निर्दोषेत्यत आह—

तेषामुक्तिः प्रस्तुतरसपरिपोषायैव सम्पद्यते ।

बाध्यमानेन वैरिणाऽनुस्रियमाणस्य नेतुरुत्कर्ष एव, नापकर्ष इति भावः ।

अङ्गत्वेऽपि तदुक्तेरदोषत्वमभिदधाति—

अङ्गभावं प्राप्तानां च तेषां तावदुक्तावविरोध एव ।

पूर्वरिपोरप्यनुचरीभावे स्वामिनः प्रकर्षस्यैव दर्शनादित्याकूतम् । अङ्गताप्राप्तिश्च तेषां क्वचित् स्वभावात्, क्वचिच्चारोपादिति पुरस्तादुदाहरणाभ्यां स्फुटमवसेयम् ।

उदाहरति -

यथा—विप्रलम्भशृङ्गारे व्याध्यादीनां तदङ्गानामेवादोषो, नातदङ्गानाम् ।

तत्पदेन प्रस्तुतरसपरामर्शः । अङ्गानामुपकारिणाम् । तदङ्गानामित्यनन्तरम् 'उक्तौ' इत्यनुषज्यते ।

यथा विप्रलम्भशृङ्गारे प्राधान्येन विवक्षिते लब्धपरिपोषे च सति, त्रयस्त्रिंशतिनिर्वेदादिषु परत्र दर्शितेषु व्यभिचारिभावेषु सामान्यतया सर्वरसाङ्गेषु— व्याधिप्रभृतीनाम्—'अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसम्प्रलापाश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः ॥'

इत्युक्तानां दशानामत्रत्यकामदशानामन्यत्रोक्तस्वरूपाणां तदनुरूपाणामन्येषां वा तदुपयोगितया तदङ्गानां कथनं न दोषाय भवति ।

तल्लक्ष्यन्तु—'पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि ! हृदन्तः ॥' इत्यादि ।

व्यभिचारिणामप्यनुपकारिणामौग्र्यजुगुप्सादीनामुपादानन्त्वनुपकारकत्वात् प्रतिबन्धनोपस्थापकत्वाच्च दोषावहमेवेति भावः ।

तत्रापि विशेषमाख्याति—

तदङ्गत्वे च संभवति मरणोपन्यासो न न्याय्यः ।

तदङ्गत्वे विप्रलम्भशृङ्गारोपकारकत्वे ।

अयं भावः—यद्यपि व्यभिचार्यन्यतमं मरणमपि 'सर्व एव शृङ्गारे व्यभिचारिणः' इत्युक्तनयेन विप्रलम्भशृङ्गारस्याङ्गं भवत्येव, तथाऽपि केवलतदङ्गत्वेन तदुपादानं नोचितम्, वक्ष्यमाणहेतोः । अपि तु सम्भावितं स्पृहितं पुनरासन्नप्रत्युज्जीवनं चैव मरणं वर्णनीयम् । तदुक्तं दर्पणे—

'रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते ।
जातप्रायन्तु तद्वाच्यं चेतसाऽऽकाङ्क्षितं तथा ।
वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः ॥' इति ।

तत्र हेतुमभिदधाति—

आश्रयविच्छेदे रसस्यात्यन्तविच्छेदप्राप्तेः ।

आश्रयस्य नायिकादेर्विच्छेदे विनाशे सति तद्वृत्तिरतेरपि नाशात् तत्स्थायिकस्य रसस्यात्यन्तविच्छेदस्य प्राप्तेः सम्भवादित्यर्थः । तस्मान्मरणं न वर्णनीयमिति भावः ।

ननु मरणवर्णनं कुतो निषिध्यते ? तत्र शृङ्गारविच्छेदेऽपि, करुणस्य शोकस्थायिकस्यास्वादो भविष्यत्येव, न हि सहृदयानां शृङ्गार एव निर्बन्ध इत्याशङ्क्य समादधाति—

करुणस्य तु तथाविधे विषये परिपोषो भविष्यतीति चेद्, न, तस्याप्रस्तुतत्वात्, प्रस्तुतस्य च विच्छेदात् ।

चस्त्वर्थकः । भवतु तत्र करुणास्वादः, किन्तु तदुद्देश्येन सहृदयानामप्रवृत्तेः स नैव विवक्षित इति तेन कार्ऽर्थसिद्धिः, यदि प्रवृत्त्युद्देश्यस्य विप्रलम्भास्वादस्य विनाश एव स्यादिति सारम् ।

ननु तर्हि करुणस्य कुत्रापि किमुद्देश्यत्वं नास्त्येव ? इत्यत आह—

यत्र तु करुणस्यैव काव्यार्थत्वम्, तत्राविरोधः ।

'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरकोशानुशासनादर्थशब्दोऽत्र प्रयोजनार्थकः । तेन यत्र करुणरसप्रधाने काव्ये करुणस्यैव काव्यार्थत्वं काव्यप्रवृत्ति-

प्रयोजनत्वं, प्राधान्येन प्रस्तुतत्वमिति यावत्, तत्राऽऽलम्बनवर्णनेऽविरोधः, क्षत्यभावा-दित्यर्थः ।

ननु शृङ्गारे प्रस्तुते सर्वथा मरणवर्णननिषेधेन तस्य शृङ्गारव्यभिचारि-तैव नश्यति, तथा च 'शृङ्गारे सर्वे एव व्यभिचारिणः' इति सिद्धान्तस्य का दशेत्यत आह—

शृङ्गारे वा मरणस्यादीर्घकालप्रत्यापत्तिसम्भवे कदाचिदुपनिबन्धो नात्यन्तविरोधी ।

वाशब्दोऽप्यर्थकः । अदीर्घकालेनाचिरेण प्रत्यापत्तेः प्रत्यावर्तनस्य मृतव्यक्ति-प्रत्युज्जीवनस्येति यावत्, सम्भवे सति, शृङ्गारेऽपि मरणस्योपनिबन्धः, कदाचिद् यदि विच्छित्तिविशेषपोषणमपरित्यजन् कविर्मरणं गौणतया वर्णयितुं कुशलः, तर्हि नात्यन्तं विरोधीत्यर्थः ।

न हि शृङ्गारे सर्वाकारं मरणोपन्यासो निषिद्धः, किन्तूक्तभङ्गित्रयमन्तरेणैव । अत एव—'दयितस्य गुणाननुस्मरन्ती शयने सम्प्रति या विलोकिताऽऽसीत् ।
अधुना खलु हन्त ! सा कृशाङ्गी गिरमङ्गीकुरुते न भाषिताऽपि ॥' इति जगन्नाथेन जातप्रायम्,

'रोलम्बाः परिपूरयन्तु हरितो झङ्कारकोलाहलै-
र्मन्दं मन्दमुपैतु चन्दनवनीजातो नभस्वानपि ।
माद्यन्तः कलयन्तु चूतशिखरे केलीपिकाः पञ्चमं,
प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी ॥' इत्यन्येन

चेतसाऽऽकाङ्क्षितम्, महाश्वेतापुण्डरीकवृत्तान्ते बाणभट्टेनाचिरजातप्रत्युज्जी-वनं च शृङ्गारे तद्वर्णितमेव ।

'जीवस्योद्गमनारम्भो मरणं परिकीर्त्तितम्' इति व्यभिचारिलक्षणप्रसङ्गेन मरणं लक्षयत आरम्भशब्दं प्रयुञ्जानस्य प्रदीपकृतोऽप्यत्रैव स्वरसः ।

नव्यास्त्वन्तिममुदाहरणं करुणविप्रलम्भस्य मन्यन्त इत्यन्यत्र स्फुटम् ।

अन्यथा तु विरुद्ध एवेत्याह—

दीर्घकालप्रत्यापत्तौ तु तस्यान्तरा प्रवाहविच्छेद एवेत्येवंविधेतिवृत्तोप-निबन्धनं रसबन्धप्रधानेन कविना परिहर्तव्यम् ।

अन्तरा मध्ये । प्रवाहस्यास्वादधाराया विच्छेदः स्याच्चिरादालम्बननाशात् ।

रसबन्धः प्रधानं यस्येति बहुव्रीहिः । कवेर्विशेषणमिदं तादृशबन्धपरिहारस्यावश्यविधेयतां बोधयति ।

विरोधिनामङ्गताप्राप्तिरियं स्वाभाविक्येव व्याख्याता, तद्विपरीतरूपाऽऽरोपिता तु स्वयमूहनीयेति ग्रन्थकारेण नोक्ता ।

इत्थं विरोधिनां बाध्यत्वोक्तावेकः, द्विविधायामङ्गत्वप्राप्तौ च द्वाविति त्रीनपि प्रकारान् निरूप्य क्रमेणोदाहरति—

तत्र लब्धप्रतिष्ठे तु विवक्षिते रसे विरोधिरसाङ्गानां बाध्यत्वेनोक्तावदोषो यथा—

उर्वशीं दृष्टवान् पुरूरवा विमृशति—

> 'क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा,
> दोषाणां प्रशमाय नः श्रुतमहो ! कोपेऽपि कान्तं मुखम् ।
> किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा,
> चेतः ! स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं पास्यति ॥'

पद्यमिदं विक्रमोर्वश्यां चतुर्थेऽङ्केऽधिकं क्वचित्पठितम् ।

इह—अकार्यं वेश्याऽऽसक्तिः क्व ! शशलक्ष्मणश्चन्द्रस्य कुलं च क्व ! इत्युभयोः सहानवस्थितया महावैषम्यमिति शान्तरसव्यभिचारी वितर्कः प्रकाशितः ।

भूयः पुनरपि, साऽलौकिकसौन्दर्योर्वशी मया दृश्येत, केन प्रकारेण दृष्टा स्यादित्यौत्सुक्येन शृङ्गारसञ्चारिणा प्रतीतेन विरोधिरसव्यभिचारी स बाध्यते ।

नोऽस्माकं दोषाणां चाञ्चल्यप्रमादादीनां प्रशमाय प्रध्वंसाय श्रुत शास्त्रश्रवणमस्तीति शेष इति प्रतीतया शान्तसञ्चारिण्या मत्या तद् बाध्यते ।

अहो आश्चर्यम् ! कोपे प्रणयरोषेऽपि किं पुनरन्यदा ?, तस्या मुखं कान्तं मनोरममासीदिति द्योतिता शृङ्गाराङ्गं स्मृतिस्तामपि बाधते ।

इत्थमाचरन्तं माम् अपगतं कल्मषं पापं येभ्यस्ते निष्पापाः, तथा कृते सदाचारे धीर्येषां तादृशा महात्मानो विद्वांसः, किं वक्ष्यन्ति किं कथयिष्यन्तीति सूचिता शान्तव्यभिचारिणी शङ्का तां बाधते ।

स्वप्नेऽश्रुतादृष्टचरपदार्थदर्शकदशाविशेषेऽपि, का कथा जाग्रत्सुषुप्तिदशयोः?,

सा प्रेयसी दुर्लभेति द्योतितेनाभीष्टाप्राप्तिमूलकदैन्येन शृङ्गाराङ्गेन सा बाध्यते ।

हे चेतश्चित्त ! स्वास्थ्यं स्थैर्यमप्रमादं वा, उपेहि प्राप्नुहीति प्रतीतया शान्ताङ्ग-धृत्या तदपि बाध्यते ।

कः खलु धन्यः पुण्यवान्, न त्वहमिवाधन्यः, युवा तस्या अधरं पास्यतीति प्रकाशिता शृङ्गारसञ्चारिणी चिन्ता धृतिमपि बाधत इतिपर्यन्ते शृङ्गार एव विश्रान्तेरवान्तरे तदविरोधिशान्ताङ्गानां वितर्कादीनामुपनिबन्धोऽपि न दोषावहः, विरोधिनां बाधितत्वात् ।

प्रथमप्रकारमेव पुनरुदाहरति—

यथा वा—पुण्डरीकस्य महाश्वेतां प्रति प्रवृत्तनिर्भरानुरागस्य द्वितीय-मुनिकुमारोपदेशवर्णने ।

पुण्डरीकस्य श्वेतकेतुमुनिसुतस्य । महाश्वेतां हंसाभिधगन्धर्वराजतनूजाम् । प्रवृत्त उत्पन्नो निर्भरोऽतिशयितोऽनुरागः प्रेमा यस्येति विग्रहः । द्वितीयमुनिकुमारस्य कपिञ्जलनाम्नस्तत्सुहृदः । कर्तरि षष्ठी ।

तत्र हि प्रस्तुतविप्रलम्भशृङ्गारस्य विरोधिनः शान्तस्याङ्गभूतवैराग्यविभावा यद्यपि भूयो निर्दिष्टाः, तथाऽपि पर्यवसाने शृङ्गारोऽविच्छिन्न एव स्थितः, बाधितास्ते च तमुपकुर्वन्त्येवेति तदुपनिबन्धस्य व्यक्तमदुष्टत्वम् ।

अथ द्विधाविभक्ताया अङ्गत्वप्राप्तेः प्रथमं स्वाभाविकाङ्गत्वप्राप्तिलक्षणं प्रकारमदोषनिबन्धनमुदाहरति—

स्वाभाविक्यामङ्गभावप्राप्तावदोषो यथा—

वर्षासु विरहिणीदशां कश्चिदाह—

'भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥' इत्यादौ ।

एष श्लोको द्वितीयोद्योत एव व्याख्यातः । अत्र भ्रम्यादीनां प्रस्तुतविप्रलम्भ-विरोधिकरुणपोषकत्वेऽपि, प्रकृते समारोपादेव विप्रलम्भपोषकत्वेनाङ्गत्वप्राप्तावुपादानं न दोषायेति बोध्यम् ।

आरोपिताङ्गताप्राप्तावदोषत्वमुदाहरति—

समारोपितायामप्यविरोधो यथा—

विरहव्यसनं निगूहन्तीं प्रियसखी व्याहरति—

'पाण्डुक्षामम्' इत्यादौ।

'पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः।

आवेदयति नितान्तं क्षेत्रियरोगं सखि! हृदन्तः॥' इति पूर्णः श्लोकः।

हे सखि! तव पाण्डु पिशङ्गं तथा क्षामं कृशं वदनम्, सरसं सानुरागं भुक्तवस्तुरसयुक्तं च हृदयम्, अलसमालस्ययुतं वपुश्शरीरञ्च (कर्तृ) हृदन्तर्हृदयमध्ये क्षेत्रियरोगं देहान्तरचिकित्स्यमसाध्यं वा व्याधिं प्रेमाणं गदं च नितान्तमावेदयति, सूचयतीत्यर्थः।

तथा च—'क्षेत्रियं क्षेत्रजतृणे परदाररतेऽपि च।

अन्यदेहचिकित्साऽर्हेऽसाध्यरोगे च दृश्यते॥' इति विश्वः।

क्षेत्रियरोगो राजयक्ष्मादिः प्रियानुरागश्च। तयोस्तत्त्वमप्रतिकार्यतयैव।

इह राजयक्ष्मादिकार्यतया करुणानुभावत्वेन प्रसिद्धेषु पाण्डुत्वादिषु, स्वभावात् प्रकृतविरुद्धरसाङ्गेष्वपि श्लेषमहिम्ना प्रस्तुतविप्रलम्भाङ्गत्वारोपात् तत्कथनेऽपि न दोषः

प्रकाशकारादयस्तु—पाण्डुत्वादयो यथा करुणस्याङ्गानि, तथैव विप्रलम्भस्यापीत्युभयसाधारणतयैव तदुक्तौ न विरोध इत्याचक्षते।

प्रायस्तामेवारुचिं विचिन्त्य पुनरुदाहरति—

यथा वा—'कोपात् कोमललोलबाहुलतिकापाशेन' इत्यादौ।

प्रागेव व्याख्यातमिदं पद्यम्। इह प्रकृतविप्रलम्भप्रतिकूलरौद्ररसाङ्गानां कोपबन्धनताडनानाम्, बाहुलतिकैव पाश इति रूपकबलाद् रौद्रस्य सामग्र्यभावादनिष्पत्तेरारोपितायां विप्रलम्भाङ्गतायामुक्तिर्न दोषायेति द्रष्टव्यम्।

इत्थं द्विविधे अङ्गत्वप्राप्ती उदाहृत्य तृतीयामन्यविधामुदाहर्तुमाचष्टे—

इयं चाङ्गभावप्राप्तिरन्या, यदाऽऽधिकारिकत्वात् प्रधान एकस्मिन् वाक्यार्थे रसयोर्भावयोर्वा परस्परविरोधिनोर्द्वयोरङ्गभावगमनम्, तस्यामपि न दोषः।

अन्या तृतीयाऽङ्गताप्राप्तिः, चतुर्थश्चाविरोधप्रकारः। आधिकारिकत्वमधिकृतत्वं प्रस्तुतत्वमिति यावत्। तच्च प्राधान्ये मूलम्।

परस्परविरोधिनोऽपि रसद्वयस्य भावद्वयस्य वा प्रस्तुतत्वाद् वाक्यार्थप्रधानी-

भूतमन्यं प्रत्यङ्गता प्राप्ता भवति, तत्र पराङ्गत्वेनास्वतन्त्रयोस्तयोर्न विरोध इति तृतीयेयमङ्गताप्राप्तिरित्याशयः । तदुक्तं भट्टमम्मटेन—

'अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम्' इति ।

उदाहरति—

यथोक्तम्-'क्षिप्तो हस्तावलग्नः' इत्यादौ ।

उक्तमित्यत्र द्वितीयोद्योत इत्यनुषज्यते । अत्र प्रधानीभूतत्रिपुरारिप्रभावातिशयाङ्गत्वं प्राप्तवतोर्विरोधिनोरपि शृङ्गारकरुणयोर्न विरोध इत्युक्तमेव । एवं भावद्वयाविरोधलक्ष्यमप्यूहनीयम् ।

अविरोधबीजं जिज्ञासमानः पृच्छति—

कथमविरोध इति चेत् ?,

उत्तरयति—

द्वयोरपि तयोरन्यपरत्वेन व्यवस्थापनात् ।

अन्यपरत्वेन । पराङ्गत्वेन अस्वातन्त्र्यमेव विरोधनिवृत्तौ हेतुः ।

यथा मिथोविरुद्धयोरपि सेवकयो राज्ञोऽनुरोधेन भिया वा विरोधाभावः, तद्वदिहापीति भावः ।

नन्वनुचराभ्यां विरुद्धाभ्यां स्वामिन एवानुकूलमाचर्यते, न तु परस्परस्य मिथस्तुतयोर्विरोधो जागर्त्येव । तथा च कथमिह विरोधनिवृत्तिरित्याशङ्क्य समाधत्ते—

अन्यपरत्वेऽपि विरोधिनोः कथं विरोधनिवृत्तिरिति चेत्, उच्यते-विधौ विरुद्धसमावेशस्य दुष्टत्वं, नानुवादे ।

विधौ विधेयत्वे । अनुवाद उद्देश्यत्वे । समावेशः सामानाधिकरण्येनावस्थितिः।

यद्यपि स्वभावजविरोधस्य स्वभावनिवृत्तावेव निवृत्तिसम्भव इति तदसम्भवात् साऽप्यसम्भाव्यैव, किन्तु विरोधिनोः सहविधानासम्भवाद् विधेयतायामेव दोषः, उद्देश्यतायान्तु विरुद्धयोरप्यप्राधान्येनास्वतन्त्रयोः समावेशस्य दर्शनाद् विरोधनिवृत्तिः सुवचेति भावः ।

तामेवोदाहरति—

यथा—

'एहि गच्छ, पतोत्तिष्ठ, वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥' इत्यादौ ।

पञ्चतन्त्रघटकं पद्यमिदम् । धनिनो मनुष्याः, (अर्थिनं प्रति) त्वम्, एहि आगच्छ, पत भूमाविति शेषः, पुनः—उत्तिष्ठ, तथा वद स्वाभीष्टं ब्रूहि पुनर्मौनं समाचर तूष्णीम्भावमवलम्बस्व, एवमित्थं प्रकारेण व्याहरन्तः, आशा धनलाभतृष्णैव ग्रहः सूर्यादिः पूतनादिर्वा, तेन ग्रस्तैः अभिभूतैः, अर्थिभिर्याचकैः, क्रीडन्तीत्यर्थः ।

तथा च—'ग्रहो निग्रहनिर्बन्धग्रहणेषु रणोद्यमे ।
सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः ॥' इति विश्वः ।

धनिनां लोभाभिभूता याचका अवमानपात्राणि क्रीडासाधनानि च भवन्तीति तात्पर्यम् । इहागमनगमनादीनां मिथोविरुद्धानामपि विधेयीभूतधनिक्रीडनोद्देश्यतया ऽस्वातन्त्र्येण यथा विरोधाभावः, तथैव 'क्षिप्तः' इत्यादौ करुणशृङ्गारयोरपीति भावः ।

तदाह—

अत्र हि विधिप्रतिषेधयोरनूद्यमानत्वेन समावेशे न विरोधः, तथेहापि भविष्यति ।

अयमाशयः—'गच्छ, मागम इति ब्रवीति' इत्यादावनुवादे यद्यपि गमनागमने विधिनिषेधरूपत्वान्मिथोविरुद्धे, तथाऽपि तयोरुद्देश्ययोरविधेयतया समावेशः । विधावेव हि विरोधो नानुवादे । विधौ विरोधे हि 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इत्यादिवदुभयोः प्रमाणानुप्राणितत्वे सति विकल्पः, विरुद्धयोरुभयोर्युगपद् विधातुमशक्यत्वात, अन्यथात्वविधानमेव । अनुवादे तूभयोरप्यप्राधान्येनाबलत्वाद् विरोधे हृदि जागरूकेऽपि तत्कार्य्यानुत्पादः । एवं प्रकृतेऽनूद्यमानयोः शृङ्गारकरुणयोर्न विरोधः ।

प्रकृते सङ्घटयति—

श्लोके ह्यस्मिन्नीर्ष्याविप्रलम्भशृङ्गार—करुणवस्तुनोर्न विधीयमानत्वम्, त्रिपुररिपुप्रभावातिशयस्य वाक्यार्थत्वात्, तदङ्गत्वेन च तयोर्व्यवस्थानात् ।

ईर्ष्याविप्रलम्भो मानहेतुकविप्रलम्भः । वस्तुत्वं च केवलान्वयित्वाद् रसेऽपि तिष्ठति । विधीयमानत्वं विधेयता । वाक्यार्थत्वं तद्बोधप्राधान्यम् । तयोर्विप्रलम्भकरुणयोः ।

वस्तुतस्तु तत्र निदर्शनोपस्थापितः शृङ्गारः करुणस्याङ्गमिति न तयोः समकक्षतेत्यन्यत्र स्फुटम् ।

ननूद्देश्यविधेयभावो वाच्यदशायामेव विविच्यते, न तु व्यङ्ग्यताऽऽपत्तौ, तत्राऽन्यनैरपेक्ष्यात्। रसादयस्तु व्यङ्ग्या एवेत्यसकृदुक्तमिति कथं तेषामुद्देश्यत्वाभ्युपगमेन प्रकृते विरोधपरिहार इत्याक्षिप्य समादधाति—

न च रसेषु विध्यनुवादव्यवहारो नास्तीति शक्यं वक्तुम्, तेषां वाक्यार्थत्वेनाभ्युपगमात्।

न चेति वक्तुमित्यनेनान्वेति। तेषां रसादीनाम्।

इदमुच्यते—वाक्यार्थता यथा वाच्यस्य, तथैव व्यङ्ग्यस्यापीति कुतो न वाच्यवद् व्यङ्ग्येऽप्युद्देश्यविधेयभावविचारः। किञ्च प्रधानत्वेन विधेयताऽप्रधानत्वेन तूद्देश्यतेति रसादीनामपि क्वचिदप्राधान्येनोद्देश्यता नासम्भविनी।

तदेव समर्थयति—

वाक्यार्थस्य वाच्यस्य च यौ विध्यनुवादौ तौ तदाक्षिप्तानां रसानां केन वार्येते।

चकारः प्रक्षिप्तः प्रतिभाति, तदर्थस्यात्रानन्वितत्वेनाविवक्षितत्वाद् वाक्यार्थबोधप्राधान्याप्राधान्यनिबन्धने विधेयोद्देश्यत्वे वाच्यार्थस्य यदि निर्णीते एव, तर्हि, तदनुसारं ततो व्यज्यमानस्यापि ते निर्णीते एवेति सारम्।

ननु रसादीनां काव्यवाक्यप्रतिपाद्यत्वरूपकाव्यार्थत्वस्य सर्वसम्मतत्वाभावादुद्देश्यविधेयत्वयोरसम्भव इति कथं विरोधपरिहार इति शङ्कित्वा निरस्यति—

यैर्वा साक्षात् काव्यार्थता रसादीनां नाभ्युपगम्यते, तैस्तेषां तन्निमित्तता तावदवश्यमभ्युपगन्तव्या। तथाऽप्यत्र श्लोके न विरोधः।

ते काव्यस्य साक्षाद्वाच्या विभावादयो निमित्तानि सहकारिणो येषां ते तन्निमित्ता रसादयः तेषां भावस्तत्ता। अत्र 'क्षिप्तः' इत्यादौ श्लोके।

उपपादयति—

यस्मादनूद्यमानाङ्गनिमित्तोभयरसवस्तुसहकारिणो विधीयमानांशाद् भावविशेषप्रतीतिरुत्पद्यते, ततश्च न कश्चन विरोधः।

यस्माद्धेतोः—अनूद्यमानान्युद्देश्यीक्रियमाणानि यान्यङ्गानि रसाद्युपकारकाणि विभावादीनि, तन्निमित्तं तद्धेतुकं यदुभयं द्वयं विप्रलम्भकरुणरूपं रसवस्तु रसतत्त्वं, तस्य सहकारिणः सहकारिकारणादुपकारकाद्वा, विधीयमानांशाद् विधेयीभूतशा-

म्भवशराग्निकृतदुरितदाहरूपाद्, भावविशेषस्य त्रिपुररिपुविषयकरतिलक्षणस्य, प्रतीतिरास्वाद उत्पद्यत एव, ततश्च न कश्चन विरोध इति सन्दर्भसङ्गतिः ।

लोचनावधारिता प्रेयोऽलङ्कारस्य प्रतीतिस्त्वत्र न भवति, शिवविषयकरतिभावस्यैव सर्वतोऽत्र प्राधान्याद्, भावाप्राधान्य एव तदङ्गीकरणात् । किन्तु यद्यलङ्कारे पक्षपातः, तर्हि शृङ्गारकरुणयोरङ्गत्वाद् रसवदलङ्कारो निर्णीयताम् ।

उक्तार्थे प्रसिद्धिं दर्शयति—

दृश्यते विरुद्धोभयसहकारिणः कारणात् कार्य्यविशेषोत्पत्तिः ।

विरुद्धमुभयं सहकारि सहायकं यस्येति बहुव्रीहिः, तस्मात् कारणात् कार्यविशेषस्यौदनादिरूपस्योत्पत्तिः, हि यतो दृश्यते, तस्मान्नात्र विरोध इत्यन्वयः ।

इदमेतेन सन्दर्भेण बोध्यते—ये तावद् रसादीनां वाच्यत्वाभावादुद्देश्यविधेयभावं नाङ्गीकुर्वन्ति, तेषां मते रसादीनामनुवाद्यत्वविरहादधुना व्यवस्थापितो विरुद्धयोः सह समावेशो न घटते, तस्मात् किञ्चिदुपायान्तरमवश्यमिह तदर्थमवलम्बनीयम् । तच्चेदम्—यथा जलस्य शैत्यं वह्नेरुष्णत्वं च मिथो विरुद्धमपि सम्भूय तण्डुलानामोदनरूपं कार्यं जनयितुं सहकरोति, तथैव निमित्तभूतहस्तक्षेपाद्यनुभावसूचितः करुणो विप्रलम्भश्च परस्परं विरुद्धावपि मिलित्वा शाम्भवशराग्निजनितदुरितदाहस्य, त्रिपुररिपुप्रभावातिशय—तद्विषयकरतिरूपभावोभयव्यञ्जनात्मककार्यं जनयितुं सहकरोतीति स्वीकरणीयम् । ततश्च मिथोविरुद्धयोरपि द्वयोः सहकारिकारणयोरेककार्यजनकता नासम्भविनी । न हि सहकारिणां विरोधः कार्योत्पत्तिं प्रतिबध्नाति, जलवह्न्योर्विरोध इवौदनोत्पत्तिम् । यौगपद्येन सामानाधिकरण्यं तु क्वचिदुभयोः पारवश्यात्, क्वचन मिथोऽङ्गाङ्गिभावात्, कुत्रचिदवच्छेदकभेदेन व्यवस्थानादवगन्तव्यम् ।

नन्वेवं परिहारस्य सर्वत्र सम्भवाद् विरोधः कुत्र स्यात्, किंरूपश्च स्यादित्याशङ्कायामाह—

विरुद्धफलोत्पादनहेतुत्वं हि युगपदेकस्य कारणस्य विरुद्धत्वम्, न तु विरुद्धोभयसहकारित्वम् ।

विरुद्धं यत्फलं कार्यं तदुत्पादनहेतुत्वम् । विरुद्धं मिथः प्रतिकूलमुभयं सहकारि यस्य तत् तथा, तस्य भावस्तत्त्वम् ।

न ह्येकमेव कारणमेकदैव विरुद्धं कार्यं जनयितुं क्षमते, न हि सलिलं सहैव तापं क्लेदं च जनयति, कालभेदेन तु वह्निसंयुक्तं सत् तापं, स्वतस्तु क्लेदमपि जनयत्येवेति विरुद्धकार्य्यस्य युगपदुत्पादकत्वमेव कारणस्य विरुद्धत्वं प्रसिध्यति । सहकारिविरोधेन तद्विरुद्धत्वाङ्गीकारे तु, प्रागुक्तौदनोत्पत्तिर्न घटते । तस्मात् सहकारिविरोधेन नात्र विरोधो, न वा कारणविरोधस्याप्रसिद्धिरित्याकूतम् ।

ननु श्रव्यकाव्येऽभिनयाभावाद् विरुद्धयोरप्यर्थयोः समावेशो न दोषः, अभिनयमात्रशरणे दृश्यकाव्ये गमनागमनादिविरुद्धार्थाभिनयः कथं स्यादित्याशङ्कय समाधत्ते—

एवं विरुद्धपदार्थविषयः कथमभिनयः प्रयोक्तव्य इति चेत्, अनूद्यमानैवंविधवाच्यविषये या वार्ता साऽत्रापि भविष्यति ।

अनूद्यमानमभिधेयीभवद् एवंविधं परस्परविरुद्धरूपं वाच्यं यत्र, तादृशो यो विषयस्तत्र प्रागुक्ते 'एहि गच्छ' इत्यादौ या वार्ता यः समाचारः प्रतीकार इति यावत्, साऽत्रापि 'क्षिप्तः' इत्याद्यभिनेयकाव्येऽपि भविष्यतीत्यर्थः ।

अयं भावः—'एहि गच्छ' इत्यादावनूद्यमानयोर्गमनागमनाद्योर्विरुद्धार्थयोर्यथा क्रमशोऽवगमः, तथैव 'क्षिप्तः' इत्यादौ तादृशयोः करुणविप्रलम्भयोरभिनयोऽपि बोद्धव्यः, तुल्यन्यायात् । न हि तत्रापि युगपदेवोभयोः प्रतीतिः, विषयभेदेन भिन्नयोर्ज्ञानयोरयौगपद्यनियमात् । अथवाऽत्र प्रतीयमानेषु महेश्वरविषया रतिः प्रधानम्, तत्पोषकतया तस्य प्रभावातिशयोऽङ्गम्, तस्यापि पोषणात् करुणः, तस्यापि च 'कामीव' इत्युपमोपस्थापितो विप्रलम्भशृङ्गार इति साक्षादनुपकारकत्वाद् विप्रकृष्टस्य विप्रलम्भशृङ्गारस्य लेशतः क्वाचित्कोऽभिनयः 'साऽश्रुनेत्रोत्पलाभिः' इति पर्यन्तं प्राधान्येन करुणव्यञ्जकाभिनयस्य न विरुद्धः, यतस्तद्व्यङ्ग्यस्य विप्रलम्भस्य बलवत्त्वविरहादङ्गत्वमेव, न तु विरोधक्षमत्वम् ।

उपसंहरति—

एवं विध्यनुवादनयाश्रयेणात्र श्लोके परिहृतस्तावद् विरोधः ।

नयो नीतिर्मतमिति यावत् । तावच्छब्दः परिहारस्य प्राथम्यं बोधयति ।

विरोधपरिहारस्यापरमपि प्रकारं दर्शयति—

किञ्च नायकस्याभिनन्दनीयोदयस्य कस्यचित् प्रभावातिशयवर्णने, तत्प्रतिपक्षाणां यः करुणो रसः, स परीक्षकाणां न वैक्लव्यमादधाति ।

प्रत्युत प्रीत्यतिशयनिमित्ततां प्रतिपद्यते इत्यतस्तस्य कुण्ठशक्तिकत्वात् तद्विरोधविधायिनो न कश्चिद्दोषः ।

अभिनन्दनीयः श्लाघ्य उदय उन्नतिर्यस्येति विग्रहः । तत्प्रतिपक्षाणां प्रतिनायकप्रभृतीनाम् । रसे तत्सम्बन्धिता च तदालम्बनकत्वेन । परीक्षकाणां विवेचनाकुशलानां सहृदयानाम् । वैक्लव्यमुद्वेगः । आधानं जननम् । तस्य तत्रत्यकरुणस्य । कुण्ठा सामग्रीसमवधानवैधुर्यान्मन्दा शक्तिर्यस्य स तादृशः, तस्य भावस्तत्वं, तस्मात् । 'तद्विरोधविधायिनः' इत्यस्य करुणविशेषणवाचकत्वे तु स चासौ विरोध इति विग्रहः, सत्त्वेऽपीति शेषश्च । नायकालम्बनकप्रधानीभूतरसविशेषणपरत्वे तु तस्य विरोध इति विग्रहः, शङ्कानुकर्षश्च प्राग्वदेव ।

अयमाशयः—विपक्षालम्बनत्वेनोपनिबद्धः करुणो रसो भयानक इव नेतुः प्रभावप्रकर्षपोषकत्वेन तदालम्बनकवीररसं पुष्णात्येव न तु विरुणद्धि, स्वसामग्रीविरहेण क्षीणशक्तिकत्वात् 'अशक्तस्तस्करः साधुः' इति न्यायात् ।

उदाहरणन्तु—'कुरवक ! कुचाघातक्रीडासुखेन वियुज्यसे,

बकुलविटपिन् ! स्मर्तव्यं ते मुखासवसेचनम् ।

चरणघटनाशून्यो यास्यस्यशोक ! सशोकता-

मिति निजपुरत्यागे यस्य द्विषां जगदुः स्त्रियः ॥' इति ।

अत्र हि कुचाघातादिपदव्यङ्ग्याङ्गभूतशृङ्गारपोषितः करुणरसो व्यङ्ग्यं वर्णनीयनृपप्रभावातिशयं पुष्यत्येवेति न क्षोभो लभते पदमेतद्भावकानां चेतसि सचेतसामिति विभावनीयम् ।

उपसंहरति—

तस्माद् वाक्यार्थीभूतस्य रसस्य भावस्य वा विरोधी यो रसः, स रसविरोधीति वक्तुं न्याय्यः, न त्वङ्गभूतस्य कस्यचित् ।

कस्यचिद् रसस्य भावस्य वा । एतेन प्रधानीभूतं भावं शङ्करप्रभावाधिक्यं वा ऽविरुन्धतः शृङ्गारस्य करुणस्य वा निबन्धेऽपि प्रकृतश्लोके रसविरोधविरहाद्दोषाभावो दर्शितः ।

इदानीं प्रधानरसादिविरोधिनो निवेशेऽपि दोषाभावं प्रकारान्तरेण व्याहरति—

अथवा वाक्यार्थीभूतस्यापि कस्यचित् करुणरसविषयस्य तादृशेन शृङ्गारवस्तुना भङ्गिविशेषाश्रयेण संयोजनं रसपरिपोषायैव जायते ।

प्रधानीभूतं करुणं विरुन्धतः शृङ्गारस्यापि, यदि—अग्राम्यतया चमत्कारिण्या रीत्या सन्निवेशः क्रियेत, तदा स नैव दोषं जनयति, किन्तु पुष्णात्येव रसमिति सारम्। तथा च प्रकृते शाम्भवशराक्रमणदर्शनेन शृङ्गाराङ्गभूतः प्राचीनः प्रणयकलहवृत्तान्तः स्मर्यमाणः साम्प्रतं प्रनष्टः शोकमुद्दीपयन् करुणविभावतामेव गच्छतीति तदुपयोगित्वे कुतो विरोधः ।

तदेव हेतुतां दर्शयन्नभिदधाति—

यतः प्रकृतिमधुराः पदार्थाः शोचनीयतां प्राप्ताः प्रागवस्थाभाविभिः संस्मर्यमाणैर्विलासैरधिकतरं शोकावेगमुपजनयन्ति ।

शोचनीयताप्राप्तौ हेतुस्तेषां विनाशः ।

उदाहरति—

यथा—

युधिच्छिन्नं भूरिश्रवसो भुजं विलोक्य तदङ्गना विलपन्ति—

'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥' इत्यादौ ।

भारतस्त्रीपर्वघटकं पद्यमिदम् । अयं पुरा दृश्यमानः (अस्माकम्) रशनायाः काञ्च्याः, उत्कर्षी सुरतारम्भ ऊर्ध्वमाकर्षकः, पीनयोः स्तनयोर्विमर्दनो विशेषेण मर्दनकारकः, नाभिरूरुजघनं च नाभ्यूरुजघनं स्पृशति तच्छीलः, नीव्या वसनग्रन्थेर्विस्रंसनो मोचकः स तथा प्रागसकृदनुभूतः करो भुजोऽस्तीत्यर्थः ।

अत्र शृङ्गारानुकूलरशनाकर्षकत्वादिप्राचीनविलासस्मरणव्यङ्ग्योऽपि शृङ्गारः साम्प्रतं तत्स्मरणस्य शोकातिशयजनकतयोपयोगात् करुणस्याङ्गम् । शोकस्यैव विश्रान्तिधामतया करुणस्यैव प्राधान्यम् ।

प्रकृते सङ्गमयति—

तदत्र त्रिपुरयुवतीनां शाम्भवः शराग्निरार्द्रापराधः कामी यथा व्यवहरति, तथा व्यवहृतवानित्यनेनापि प्रकारेणास्त्येव निर्विरोधत्वम् ।

उपमानोपमेयभावोपन्यासोऽत्र शृङ्गारस्य करुणाङ्गतां प्रकाशयति । अपिशब्दोऽपरमपि त्रिपुररिपुप्रभावातिशयाङ्गत्वप्राप्तिलक्षणविरोधाभावप्रकारं समुच्चिनोति ।

पर्यन्ते 'क्षिप्तः' इत्यादिश्लोके दोषाभावं निगमयति—

तस्माद् यथा यथा निरूप्यते, तथा तथाऽत्र दोषाभावः ।

प्रतीयत इति शेषः ।

ईदृशान्यन्यान्यपि विरोधाभावोदाहरणानि सन्तीति बोधयितुमाह—

इत्थञ्च ।

इत्थमङ्गत्वप्राप्त्या । अस्य च निर्विरोधत्वेऽन्वयः ।

चाटुकारो राजानं व्याहरति—

'क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः,
पादैः पातितयावकैरिव पतद्बाष्पाम्बुधौताननाः ।
भीता भर्तृकरावलम्बितकरास्त्वद्वैरिनार्योऽधुना,
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ॥'

इत्येवमादीनां सर्वेषामेव निर्विरोधत्वमवगन्तव्यम् ।

हनुमत्कविकृतखण्डप्रशस्तौ पठ्यतेऽयं श्लोकः । हे राजन् ! अधुना त्वया विजिते पत्यौ, त्वद्वैरिणां नार्यो वनिताः, क्षताः कुशाङ्कुरैर्विद्धाः कोमलाश्चाङ्गुलयो याः, ताभ्यो गलत् क्षरद् रक्तं शोणितं येषु तादृशैः, अत एव पातितो निहितो यावकोऽलक्तको यत्र, तादृशैरिव पादैश्चरणैः (करणैः) सदर्भाः सकुशाः स्थलीरकृत्रिमवनभूमीं विवाहवेदीश्च क्रामन्त्यश्चरन्त्यः, पतद्भिर्बन्धुजनविरहोद्भूतशोकावेगाद् धूमाक्षिसम्पर्काच्च प्रस्रवद्भिर्बाष्पाम्बुभिरश्रुभिः, धौतं प्रक्षालितमाननं यासां तथाभूताः, भीता रिपुर्माद्राक्षीदिति परिणेता नात्यनुरक्तोऽभूदिति च त्रस्ताः, भर्तुः पत्युर्वरस्य च करेणावलम्बिता धृताः करा हस्ता यासां तादृश्यः, पुनरपि भूयोऽप्युद्यन् जायमानो विवाहो यासां ता इव, दावाग्निं वनवह्निं विवाहहोमानलं च परितो भ्रमन्ति पलायिता लाजहोमपराश्च सञ्चरन्तीत्यर्थः ।

विवाहाङ्गभूतलाजहोमकाले वधूनामेवं समुदाचारः ।

अत्र प्रधाने राजविषयकरतिभावे मिथोविरुद्धयोरपि करुणशृङ्गारयोरङ्गभावेन विरोधनिवृत्तिः । साम्प्रतिकशोचनीयदशावर्णनात् करुणः प्राचीनविवाहावस्थावर्णनाद् शृङ्गारश्चांशतः प्रतीयमानौ रतावङ्गतां प्राप्ताविति द्रष्टव्यम् ।

इयता प्रबन्धेन 'अङ्गभावं वा प्राप्तानामुक्तिरच्छला' इति कारिकाऽवयवानुकूलार्थः

सुनिरूपित इत्युपगमयन्नुपसंहरति—

एवं तावद् रसादीनां विरोधिरसादिभिः समावेशासमावेशयोर्विषय-विभागो दर्शितः ।

तावच्छब्दः प्राथम्यं बोधयन्नेतत्प्रसङ्गे वक्तव्यस्य सावशेषतां सूचयति ।

तमेवावशिष्टमंशं दर्शयितुं कारिकामवतारयति—

इदानीं तेषामेकप्रबन्धनिवेशने न्याय्यो यः क्रमस्तं प्रतिपादयितुमुच्यते—

तेषां रसादीनां क्रम इति सम्बन्धः । पूर्वं मिथोविरुद्धानां रसादीनां विरोधनिवृत्तिप्रकार उक्तः, साम्प्रतं तेषां सौमनस्येनैकत्र सन्निवेशपरिपाटी प्रकटीक्रियत इत्यपौनरुक्त्यं कथञ्चित् कल्पनीयम् ।

'प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।
एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता ॥ ७७ ॥'

प्रबन्धानां श्रव्यदृश्यकाव्यानां नानारसानां निबन्धने सन्निवेशने, प्रसिद्धे भरताद्याचार्यनिरूपितत्वात् प्रख्याते सत्यपि, तेषामुक्तप्रबन्धानामुत्कर्षं सौन्दर्याधिक्यम्, इच्छता कविना, एकस्तेषामेव रसानामन्यतमः कश्चिद् रसः अङ्गी कर्तव्यः, प्रधानतया निबन्धनीय इत्यर्थः ।

तदाह—

प्रबन्धेषु महाकाव्यादिषु नाटकादिषु वा विप्रकीर्णतयाऽङ्गाङ्गिभावेन वा बहवो रसा उपनिबध्यन्त इत्यत्र प्रसिद्धौ सत्यामपि, यः प्रबन्धानां छायाऽतिशयमिच्छति, तेन तेषां रसानामन्यतमः कश्चिद् विवक्षितो रसोऽङ्गित्वेन निवेशयितव्य इत्ययं युक्ततरो मार्गः ।

प्रकारवाचिना वादिशब्दौ तत्सजातीयानि सकलानि श्रव्यकाव्यानि दृश्यकाव्यानि च बोधयतः ।

यत्तु—'महाकाव्यादिष्वित्यादिशब्दः प्रकारेणाभिनेयान् भेदानाह, द्वितीयस्त्वभिनयान्' इति कैश्चिदभिहितम्, तन्न, अभिनयस्य प्रबन्धत्वाभावात् तत्साजात्यविरहात् । विप्रकीर्णताऽऽपणपुरुषवन्मिथोनैरपेक्ष्येणावस्थितिः । अङ्गाङ्गिभावश्च सापेक्ष्येण । अत्र रसानां विप्रकीर्णता प्रबन्धनायक–प्रतिनायक–पताकानायक–प्रकरीनायक–नायिकाप्रभृत्यालम्बनकत्वेन । अङ्गाङ्गिभावस्तु प्रबन्धनायकमात्रालम्बनकत्वेन ।

विवक्षित एव रसोऽङ्गीविधेयो, न तु यः कश्चनाविवक्षितोऽपि । तस्मिन्नङ्गिनि, प्रस्तुते चाङ्गे, राजातिचारिणि भृत्ये, भृत्यानुचारिणि च राजनीव, सुषमाऽपकर्षः प्रतीयेत ।

यद्यपि पर्यायबन्धप्रभृतिकाव्येषु रसानां विप्रकीर्णत्वादेकरसस्याङ्गित्वं न भवति, किन्तु—महाकाव्यादिष्वेकरसाङ्गित्वस्यैवच्छायाऽतिशयजनकत्वादयमेव मार्गः श्रेयानिति युक्ततरपदघटकस्तरप्प्रत्ययः प्रत्याययति । प्रबन्धान्तरेषु रसानां विप्रकीर्णतया निवेशोऽपि सौन्दर्यहेतुरिति युक्त एव । महाकाव्यादिषु पुनरङ्गाङ्गिभावेनैव तेषां निवेशनं सुषमां पुष्यतीतिं सैव रीतिरुचिततरेति तथैव विधेयं निवेशनमित्युपदिश्यते क्रमः । वेद्यान्तरस्पर्शशून्यस्वप्रकाशाखण्डस्वरूपस्य रसस्य रसान्तरेण सह समावेशोऽपि दुर्घटः, दूरेऽङ्गाङ्गिभावः, स्वसामग्रीप्राप्तपरिपोषस्य कस्यचिदप्यङ्गत्वायोगादेकस्याङ्गित्वासम्भवादित्याशङ्कां समाधातुं कारिकाऽवतरणं रचयति—

ननु रसान्तरेषु बहुषु प्राप्तपरिपोषेषु सत्सु, कथमेकस्याङ्गिता न विरुध्यत इत्याशङ्क्येदमुच्यते—

क्षीणसम्पद्राजवदपुष्ट एव रसोऽङ्गं कस्यापि भवितुमर्हति, कस्याप्यङ्गत्वाभावेऽङ्गिता पुनर्गगनकुसुमप्रायैव, सर्वेषां समबलत्वादित्याशयः ।

'रसान्तरसमावेशः प्रस्तुतस्य रसस्य यः ।
नोपहन्त्यङ्गितां सोऽस्य स्थायित्वेनावभासिनः ॥ ७८ ॥'

प्रस्तुतस्य प्रबन्धेष्वितिवृत्तव्यापकत्वेन प्रक्रान्तस्य, स्थायित्वेन पुनःपुनर्जायमानानुसन्धानगोचरीभावात् प्रधानत्वेनावभासिनोऽङ्गिनो रसस्य यो रसान्तरैर्लब्धपरिपोषैरपि प्राबन्धिकयत्किञ्चिदितिवृत्तावयवव्यापकत्वेनाङ्गभूतै रसैः सह समावेशः, सोऽस्याङ्गिनो रसस्याङ्गितां नोपहन्ति, किन्तु पुष्णात्येवेत्यर्थः ।

तदाह—

प्रबन्धेषु प्रथमतरं प्रस्तुतः सन् पुनःपुनरनुसन्धीयमानत्वेन स्थायी यो रसः, तस्य सकलसन्धिव्यापिनो रसान्तरैरन्तरालवर्तिभिः समावेशो यः; स नाङ्गितामुपहन्ति ।

प्रस्तुतस्य स्थायित्वं स्वस्य तदभावश्चाङ्गिताविघाताभावे निमित्तम् । सन्धयो मुखादयः पञ्चेतिवृत्तांशरूपा लक्षिता एव ।

'गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्तते ॥' इति मीमांसासिद्धान्तानुरूपं

स्वसामग्रीसंवलनलब्धपरिपोषा अप्यांशिकेतिवृत्तव्यङ्ग्याः स्वप्रकाशतां चमत्कारातिरेकाश्रयतां च गता इति स्वयमङ्गिनोऽपि रसाः प्रबन्धव्यापकेतिवृत्तव्यङ्ग्यत्वे नाङ्गिभूतस्य रसस्योपस्कारकत्वेनाङ्गतामेव यान्ति, न त्वङ्गितां विहन्तीति सारम् ।

इदमेवानुकूलनिदर्शनदर्शनेन स्थापयितुं कारिकामवतारयति—

एतदेवोपपादयितुमुच्यते—

उपपादनञ्च दृष्टान्तप्रदर्शनेन बोध्यम् ।

'कार्यमेकं यथा व्यापि प्रबन्धस्य विधीयते ।
तथा रसस्यापि विधौ विरोधो नैव विद्यते ॥ ७६ ॥'

यथा प्रबन्धस्य व्यापि लक्षिष्यमाणाधिकारिकवस्तुरूपत्वेन व्यापकमेकं कार्यं बीजबिन्दुप्रभृतिलक्षणं विधीयते कविना निबध्यते, तथैव व्यापकत्वेनैकस्य रसस्य विधौ निबन्धने विरोधोऽङ्गभूतरसैः सह तस्येति शेषः, नैव विद्यते वर्तत इत्यर्थः ।

अयं भावः—द्विविधं हि वस्तुरूपमितिवृत्तं भवति, किञ्चिदाधिकारिकं किञ्चित् प्रासङ्गिकञ्च । तदुक्तं दर्पणे—

'इदं पुनर्वस्तुबुधैर्द्विविधं परिकल्प्यते ।
आधिकारिकमेकं स्यात् प्रासंगिकमथापरम् ॥
अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः ।
तस्येतिवृत्तं कविभिराधिकारिकमुच्यते ॥'
'अस्योपकरणार्थन्तु प्रासङ्गिकमितीष्यते ॥' इति ।

तद्विशेषरूपाश्चार्थप्रकृतयः पञ्च । तदप्युक्तं तत्रैव—

'बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि ॥'
'अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥'

'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ।'
'व्यापिप्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ॥'
'प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता ।'
'अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ॥
समापनन्तु यत्सिद्ध्यै तत्कार्यमिति सम्मतम् ॥' इति ।

तत्र बीजबिन्दुरूपमाधिकारिकं वृत्तं पताकाप्रकरीकार्यात्मकैः प्रासङ्गिकवृत्तैरवान्तरे क्वचित् क्वचित् सङ्कीर्यते, न तु सर्वथा व्याप्यते—

'आगर्भादाविमर्शाच्च पताका विनिवर्तते ।
कस्माद्? यस्मान्निबन्धोऽस्याः परार्थः परिकीर्त्यते ॥' इति भरतानुशासनात् पताकादेर्मध्य एव विरामात्, तथैव प्रबन्धव्यङ्ग्यतया प्रधानीभूतो रस आवान्तरिकप्रबन्धकिञ्चिदंशव्यङ्ग्यैः रसैः सङ्कीर्णोऽपि, व्याप्तो न भवतीति स्वीयं प्राधान्यमङ्गित्वलक्षणं न जहाति, प्रत्युत तैरुपस्क्रियत एवेति न विरोधः ।

तदाह—

सन्ध्यादिमयस्य प्रबन्धशरीरस्य यथा कार्यमेकमनुयायि व्यापकं कल्पते, न च तत् कार्यान्तरैर्न सङ्कीर्यते, न च तैः सङ्कीर्यमाणस्यापि तस्य प्राधान्यमपचीयते, तथैव रसस्याप्येकस्य सन्निवेशे क्रियमाणे विरोधो न कश्चित् । प्रत्युत प्रत्युदितविवेकानामनुसन्धानवतां सचेतसां तथाविधे विषये प्रह्लादातिशयः प्रवर्तते ।

सन्धयो मुखादयः । आदिशब्देनोपक्षेपादीनां पञ्चषष्टेस्तदङ्गानाङ्ग्रहणम् । स्वरूपार्थे मयट् । अनुयायि निर्वहणं यावदनुगामुकं बीजबिन्दुरूपम् । सङ्कीर्यतेऽङ्गाङ्गिभावेन सम्बध्यते । अपचीयते ह्रसते । तथैव-अङ्गभूतरसान्तरसङ्कीर्णत्वेन । रसस्यैकस्य प्राधान्येनेति शेषः । प्रत्युदितो विवेकः सदसद्विचारो येषामिति बहुव्रीहिः । अनुसन्धानं स्मृतिविशेषः । तच्च रसानामङ्गाङ्गिभावप्रयोज्यविरोधनिवृत्तिहेतुकचमत्काराधानप्रकर्षविषयकम् । तथाविधे विषये तापसवत्सराजादिप्रबन्धांशे ।

एतावता दृष्टान्तदर्शनेन रसानामङ्गाङ्गिभावो वर्णनीयेतिवृत्ताधीन इति सूचितम् ।

अथ विरुद्धरससमावेशप्रकारान् दर्शयितुं कारिकाया अवतरणमाह—

ननु येषां रसानां परस्परविरोधः, यथा—वीरशृङ्गारयोः, शृङ्गारहास्ययोः, रौद्रशृङ्गारयोर्वीराद्भुतयोर्वीररौद्रयो रौद्रकरुणयोः शृङ्गाराद्भुतयो-

र्वा तत्र भवत्वङ्गाङ्गिभावः। तेषां तु स कथं भवेद्, येषां परस्परं बाध्यबाधकभावः, यथा—शृङ्गारबीभत्सयोर्वीरभयानकयोः शान्तरौद्रयोः शान्तशृङ्गारयोर्वा, इत्याशङ्क्येदमुच्यते—

इदमुच्यते—द्विधा हि विरोधो रसयोः, कयोश्चित् सामानाधिकरण्यासहिष्णुत्वेन, कयोश्चनोन्मूल्योन्मूलकभावेन। तत्र येषां प्रथमप्रकारेण विरोधः, तेषां तु क्वचन कथञ्चन समावेशे विरोधनिवृत्तिरपि सम्भवति। तथा हि—मिथोविरुद्धयोरपि शृङ्गारवीरयो रुक्मिणीद्रौपदीस्वयंवरादौ युद्धनयपराक्रमादिभिः कान्ताऽधिगमे रत्युत्साहयोः स्थायिनोः समावेशात् तत्प्रकृतिकयोस्तयोरैकाधिकरण्यम्। एवं हास्यस्थायिनो हासस्य शृङ्गारे व्यभिचारितयोपयोगादङ्गाङ्गित्वेनैव शृङ्गारहास्ययोः समावेशः। तत्र हास्यं यद्यप्यपुरुषार्थस्वभावम्, तथाऽपि शृङ्गाराङ्गत्वेनैव तस्यातिरञ्जकतयाऽऽरोपितपुरुषार्थस्वभावत्वम्। तथा दारुणप्रकृतिकदैत्यदानवाद्यालम्बनकशृङ्गारस्योपलम्भबाहुल्येन रौद्रशृङ्गारयोरपि सामानाधिकरण्यम्। वीरप्रकृतिके लोकविस्मायकपराक्रमातिशयशालिनि विस्मयोत्साहस्थायिकयोरद्भुतवीरयोरपि समावेशः। निसर्गक्रोधने वीरे भीमसेनादौ रौद्रवीरयोर्मिथोऽविरुद्धक्रोधोत्साहप्रकृतिकयोरङ्गाङ्गिता। क्रूरप्रकृतिकजनविहितदारुणकृत्यजन्यशोकसमुपलम्भेन रौद्रकरुणयोः सापेक्षत्वम्। रत्नावलीघटकैन्द्रजालिकवृत्तान्तवद् रत्युत्पादकाश्चर्यजनकेतिवृत्तसम्भेदाच्छृङ्गाराद्भुतयोश्चाप्रतिकूलता।

येषां पुनर्द्वितीयेन प्रकारेण विरोधः, तेषां कथमङ्गाङ्गिभावः, स्थायिभावयोः परस्परोपमर्दकत्वात्। तथा हि—रतिमुच्छिद्यैव जुगुप्सा, उत्साहमुन्मूल्यैव भयम्, शममुद्धूयैव क्रोधो रतिश्च प्रवर्तत इति स्फुटस्तत्प्रकृतिकरसयोर्बाध्यबाधकभावः।

इत्थं चैकत्र समावेशे न विरोधः, विरोधे च नाङ्गाङ्गिभाव इत्यविरोधकथनमनुचितमित्याशङ्कां समाधातुं कारिकामाह—

'अविरोधी विरोधी वा रसोऽङ्गिनि रसान्तरे।
परिपोषं न नेतव्यस्तथा स्यादविरोधिता॥ ८०॥'

स्फुटं व्याचष्टे वृत्तिकारः—

अङ्गिनि रसान्तरे शृङ्गारादौ प्रबन्धव्यङ्ग्ये सति, अविरोधी विरोधी वा रसः परिपोषं न नेतव्यः।

'षष्ठी चानादरे' इतिपाणिनिसूत्रेणानादराधिक्ये व्यङ्ग्येऽङ्गिनीति सप्तमी, तेन परिपुपोषिषितरसभिन्नं प्रबन्धेन व्यङ्ग्यं शृङ्गारादिरसमनादृत्य तदविरुद्धस्तद्विरुद्धो वाऽङ्गरसो न पोषणीयः, तेन प्रकारेण प्रधानाप्रधानयो रसयोरविरोधः स्यादिति कारिकाऽर्थः ।

प्रधानीभूतरसापेक्षयाऽविरुद्धोऽप्यङ्गभूतो रसस्ततोऽपि पुष्टः क्रियमाणः स्पर्धालुतया प्रधानसुषमामवश्यमपकर्षेत्, किं वक्तव्यं विरुद्धस्य, तस्मात् तावानेवाङ्गरसस्य पोषो विधेयो यावताऽङ्गिनमुपकुर्यात् स्पर्द्धां च न स्प्रष्टु मर्हेत् । एवं ह्यविरुद्धवत् प्रागुक्तो विरुद्धोऽप्यपरिपुष्टीकृतोऽङ्गभूतो रसो न प्रधानं विरोद्धुमीष्ट इति न कश्चनदोष इति भावः ।

अङ्गरसस्य परिपोषः कथं परिहर्तव्य इत्याकाङ्क्षायां प्रकारत्रयं क्रमेण वदन् प्रथमं प्रकारमादावाख्याति—

तत्राविरोधिरसस्याङ्गिरसापेक्षयाऽत्यन्तमाधिक्यं न कर्तव्यमित्ययं प्रथमः परिपोषपरिहारः ।

तत्र तेषु परिपोषपरिहारप्रकारेषु । अविरोधिरसस्याङ्गभूतस्य । नैतावताऽङ्गरसस्य पोषणं निषिध्यते, किन्त्वङ्गिप्राधान्योपमर्दकमाधिक्यमात्रमिति पुरस्तादुपसंहारे स्फुटं वक्ष्यति ।

अङ्गरसस्य न्यूनतायामेव सर्वाभिमतायामाधिक्यमात्रमिह कुतो निरुध्यते ? एवं ह्युभयोः साम्यमप्यङ्गस्यैवानुमतं भवत्याक्षेपं निराकरोति—

उत्कर्षसाम्येऽपि तयोर्विरोधासम्भवात् ।

तयोरङ्गाङ्गिरसयोर्भावसन्धिवदुत्कर्षस्य साम्येऽपि विच्छित्त्यनुच्छेदाद् विरोधस्यासम्भवः, यतस्तेनाधिक्यमात्रं व्यवच्छिन्नमिति योजना ।

वेद्यान्तरसम्पर्कशून्यापरिच्छिन्नस्वप्रकाशरसस्य तादृशरसान्तरेण सह सम्पर्कासम्भवादुत्कर्षसाम्यं कथं सम्भवतीति चेत्, उच्यते—अङ्गाङ्गिभावेऽपीत्थमसम्भवे यथा रसपदं तद्योग्यस्थायिपरं व्याख्यायते, तथैवात्रापि बोध्यम् । किञ्च पृथगंशद्वयव्यङ्ग्यत्वे निरपेक्षयोरपि साधर्म्यसद्भावात् साम्यं नासम्भवीत्यवधातव्यम् ।

साम्यमुदाहरति—

यथा—

प्रेयसीपरिदेवनसमुदितानुकूल्यनिर्धार्यमाणस्य समरतूर्यघोषश्रवणसमुज्जृम्भ्य-

माणयुद्धयात्रोत्साहस्य वीरस्य दशां कश्चिद्वर्णयति—

'एकन्तो रुअइ पिआ अण्णन्तो समरतूरणिग्घोसो ।
णेहेण रणरसेण अ भडस्स दोलाइअं हिअअम् ॥'

'एकतो रोदिति प्रियाऽन्यतः समरतूर्यनिर्घोषः ।
स्नेहेन रणरसेन च भटस्य दोलायितं हृदयम् ॥' इतिच्छाया ।

एकत एकत्र गृहे प्रिया प्रेयसी, न तु भार्यैव, युद्धे भाविनिधनाऽऽशङ्कया रोदिति, अन्यतोऽन्यत्र युद्धभूमौ समराय वीरानुत्तेजयितुं तूर्याणां ताड्यमानपटहादिवाद्यानां निर्घोषो निनदो भवतीति शेषः । तथा च भटस्य वीरस्य स्नेहेन प्रियाप्रेम्णा रणरसेन युद्धोत्साहेन च हृदयं मनो दोलायितं हिन्दोलामारूढमेकतरकर्तव्यावधारणाक्षममिति यावद् भवतीत्यर्थः ।

तथा च—'तूरं तु तूर्यं स्यात्ताड्यमानास्तु पटहादयः' इति त्रिकाण्डशेषः ।

इह स्नेहपदप्रतिपाद्यरतिस्थायिकशृङ्गारस्य, रणरस-भटपदोपस्थाप्योत्साहस्थायिकस्य वीरस्य च दोलायितपदबोध्यमुत्कर्षसाम्यमपि यथा न दोषमावहति, तथैवान्यत्रापि बोध्यम् ।

मुक्तकमात्रे समप्राधान्यं न तु प्रबन्धेऽपीति केनचिदुक्तं त्वाचार्यैरेव रत्नावलीघटकनिदर्शनोपन्यासेन खण्डितम् ।

पुनरुदाहरति—

यथा वा—

'कण्ठाच्छित्त्वाऽक्षमालावलयमिव करेहा रमावर्तयन्ती,
कृत्वा पर्यङ्कबन्धं विषधरपतिना मेखलाया गुणेन ।
मिथ्यामन्त्राभिजापस्फुरदधरपुटव्यञ्जिताव्यक्तहासा,
देवी सन्ध्याऽभ्यसूयाहसितपशुपतिस्तत्र दृष्टा तु वोऽव्यात् ॥' इत्यत्र ।

हारं मुक्तामालां कण्ठाच्छित्त्वा गलादुत्तार्य, अक्षमालावलयमिव स्फटिकलघुस्रजमिव करे धृत्वा, आवर्तयन्ती सञ्चालयन्ती मेखलाया रशनाया गुणेन सूत्रेण (तद्रूपेण) विषधरपतिना सर्पराजेन वासुकिना, पर्यङ्कबन्धं ध्यानोचितासनविशेषबन्धं कृत्वा, मिथ्या यो मन्त्रस्याभिजापो जपनं तेन स्फुरन् योऽधरपुटस्तेन व्यञ्जितः प्रकाशितोऽव्यक्तो गूढो हासो यस्यास्तादृशी, सन्ध्यायां तन्नामकसपत्न्यामभ्यसूयया हसितोऽनुकृतोऽनुकरणोपहासलक्षीकृत इति यावत्, पशुपतिः शिवो यया

तथाभूता, तत्र शिवसन्ध्योपासनास्थले दृष्टा तटस्थैरलोकिता तु देवी पार्वती वो युष्मानव्यात्, पायादित्यर्थः।

अत्र 'पर्यङ्कबन्धश्च वीरासनम्' इति मल्लिनाथः। तल्लक्षणन्तु—

'एकं पादमथैकस्मिन् विन्यस्योरौ च संस्थितम्।
इतरस्मिस्तथैवोरुं वीरासनमुदाहृतम्॥' इति।

प्रमदाकृतिं सन्ध्यां शिवः स्वीकृतवानिति पुरातनी वार्ता। अत एव पार्वत्यास्तत्रासूया। तद्व्यङ्ग्यविप्रलम्भशृङ्गारस्य सपरिकरमन्त्रजपादिव्यङ्ग्यशान्तस्य चोत्कर्षसाम्यं पूर्ववदविरोधे पर्यवस्यति।

अथ द्वितीयं परिपोषप्रकारं निरूपयति—

अङ्गिरसविरुद्धानां व्यभिचारिणां प्राचुर्येणानिवेशनम्। निवेशने वा क्षिप्रमेवाङ्गिरसव्यभिचार्यनुवृत्तिरिति द्वितीयः।

अनुवृत्तिरनुसन्धानम्। अङ्गरसोपकारिणोऽपि प्रधानरसपरिपन्थिनो व्यभिचारिभावा निवेशनीयाः, किन्तु लेशत एव न तु बाहुल्येन। तथा निवेशिता हि प्रधानास्वादं कदाचिद् व्यवदध्युरित्येका कोटिः। कदाचनाङ्गरसास्वादानुरोधेन प्राचुर्येणापि निवेश्येरंश्चेत्, तर्हि, प्रधानरसपोषकव्यभिचारिणां सत्वरमेवानुसन्धानं विधेयम्, येन तदास्वादप्रकर्षापचयो न स्यादितीयं द्वितीया कोटिरिति समुदितोऽयं द्वितीयः प्रकार इत्यर्थः।

इह व्यभिचारिणां प्राचुर्येण निवेशाभावेऽङ्गरसापरिपोष एव प्रथमकोटिदोष उत्तरकोटिमुत्थापयति, उत्तरकोटौ तद्विरहात् सिद्धान्तता। अत एव वाशब्दोऽत्र न विकल्पार्थकः। अन्यथा प्रकारद्वयं स्यात्। इत्याचार्याः।

उदाहरणन्तु 'कोपात्' इत्यादिः प्रागुक्तः श्लोकः। तत्र हि प्रधानीभूतशृङ्गारस्थायिरतिप्रतिकूलस्याङ्गभूतरौद्रस्थायिक्रोधपोषकव्यभिचार्यमर्षस्य 'बद्ध्वा दृढम्' इत्यादिना भूयो निवेशोऽपि, द्रुतमेव 'रुदत्या हसन्' इत्यादिना रत्यनुकूलेनेर्ष्यौत्सुक्यहर्षानुसन्धानं विहितमिति न प्रधानास्वादापकर्षः।

तृतीयं प्रकारं निरूपयति—

अङ्गत्वेन पुनः पुनः प्रत्यवेक्षा परिपोषं नीयमानस्याप्यङ्गभूतस्य रसस्येति तृतीयः प्रकारः।

परिपोषं नीयमानस्याप्यङ्गभूतस्य रसस्याङ्गत्वेन पुनःपुनः प्रत्यवेक्षेति सम्बन्धः ।

'निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्' इत्यलङ्कारप्रकरणोक्ता सरणिरिह स्मरणीया । तापसवत्सराजे—वत्सराजस्य पद्मावतीविषयकसम्भोगशृङ्गार इहोदाहरणमित्याचार्याः ।

उपसंहरति—

अनया दिशाऽन्येऽपि प्रकारा उत्प्रेक्षणीयाः ।

प्रकाराः परिपोषपरिहारस्य । ते च—विभावादीनां प्रकर्षातिशयानाधानम्, प्रधानरसप्रतिकूलानामनुन्मीलनम्, तदुन्मीलनेऽपि प्रधानरसपोषकैरेव तदुपोद्घलनम्, प्रधानानुकूलविभावादीनां पोषणेऽपि तेषामङ्गत्वेन तस्य चाङ्गित्वेनानुसन्धानम्, इत्यादयः स्वयमूहनीयाः ।

इत्थं प्रधानरसस्याविरोधिनां विषयेऽभिधाय, विरोधिविषये दोषपरिहारमभिदधाति—

विरोधिनस्तु रसस्याङ्गिरसापेक्षया कस्यचिन्न्यूनता सम्पादनीया ।

कस्यचिदङ्गभूतस्य । न्यूनताऽपरिपुष्टता । न्यूनो ह्यङ्गभूतोऽङ्गिनं बलीयांसं बाधितुं न शक्नुयादित्याशयः ।

उदाहरति—

यथा शान्तेऽङ्गिनि शृङ्गारस्य, शृङ्गारे वा शान्तस्य ।

न्यूनता सम्पादनीयेति शेषः ।

तत्र शङ्कते—

परिपोषरहितस्य कथं रसत्वमिति चेत् ।

परिपोषस्त्वास्वादपदवीप्राप्तिः । तदभावे च रसत्वाभावो रसनधर्मयोगिन्येव रसत्वाङ्गीकारादिति तात्पर्यम् ।

समाधत्ते—

उक्तमत्राङ्गिरसापेक्षयेति ।

अङ्गिरसादप्यधिकपुष्टोऽङ्गरसो न विधेयो, न तु सर्वथाऽपुष्ट एवेत्यभ्युपगमे न दोषः ।

तदेवोपपादयति—

अङ्गिनो हि रसस्य यावान् परिपोषः, तावांस्तस्य न कर्तव्यः, स्वगतस्तु सम्भविपरिपोषः केन वार्यते ।

तस्याङ्गरसस्य । स्वगतोऽङ्गरसवृत्तिः । सम्भवी प्रधानरसाप्रतिकूलः । अङ्गिरसाप्रतिकूलेऽङ्गरसपरिपोषे न नो विद्वेष इत्यभिसन्धिः ।

उक्तमर्थं द्रढयन् कारिकाचरमांशं विवृणोति—

एतच्चापेक्षिकं प्रकर्षयोगित्वमेकस्य रसस्य बहुरसेषु प्रबन्धेषु रसानामङ्गाङ्गिभावमनभ्युपगच्छताऽप्यशक्यप्रतिक्षेपमित्यनेन प्रकारेणाविरोधिनामविरोधिनां च रसानामङ्गाङ्गिभावेन समावेशे प्रबन्धेषु स्यादविरोधिता ।

बहवो रसा यत्र तेषु प्रबन्धेषु रसानामपरिच्छिन्नविश्रामधामत्वान्न्यूनाधिक्यानौचित्यादङ्गाङ्गिभावमनभ्युपगच्छताऽस्वीकुर्वताऽपि, एतदुच्यमानमङ्गिरसानाम्, आपेक्षिकमङ्गरसापेक्षया निर्धारितम्, प्रकर्षयोगित्वमुत्कर्षः, न शक्यः प्रतिक्षेपो निरासोऽस्वीकार इति यावद् यस्य तादृशं स्वीकार्यमेव, इति हेतोरनेनोच्यमानेनाङ्गपरिपोषपरिहारप्रकारद्वयेन विरोधिनामविरोधिनां च रसानामङ्गाङ्गिभावेन प्रबन्धेषु समावेशेऽविरोधिता विरोधाभावः स्यादित्यन्वयः ।

अयं भावः—ये च स्वप्रकाशत्वेनान्यनिरपेक्षाणां वेद्यान्तरस्पर्शशून्यानामन्यैः सह मिथोऽपि चोपकार्योपकारकभावं नोररीकुर्वन्ति, अन्यसङ्कीर्णत्वे रसास्वादस्य ब्रह्मास्वादसब्रह्मचारित्वव्याघातसम्भवात् । तैरपि बहुरसव्यञ्जकेषु प्रबन्धेषु भूयोंऽशव्यङ्ग्यत्वेन व्यापकतया कस्यचन रसस्य प्रकर्षादङ्गित्वम्, कस्यचित् स्तोकांशव्यङ्ग्यतयाऽपकर्षादङ्गत्वमभ्युपेयमेवेत्यकामैरपि तै रसानामङ्गाङ्गिभावोऽयमभ्युपेत एव । अन्यथा वृत्तान्तसङ्गतिरपि तेषां दुर्घटैव ।

उपसंहरति—

एतच्च सर्वं येषां 'रसो रसान्तरस्य व्यभिचारीभवति' इति निदर्शनं, तन्मतेनोच्यते ।

निदर्शनं मतम्, दृष्टान्तरूपार्थानन्वयात् ।

इदमाकूतम्—यत्र प्रबन्धेषु बहवो रसाः समवयन्ति, तेषु यस्य रसस्यास्वादप्रकर्षोऽनुभूयते स रसः स्थायीभवति, अवशिष्टाश्च रसाः सञ्चारिणो भवन्ति ।

तथा चोक्तमभियुक्तैः—

'बहूनां समवेतानां रूपं यस्य भवेद्बहु ।
स मन्तव्यो रसः स्थायी शेषाः सञ्चारिणो मताः ॥' इति ।

समवेतानामेकप्रबन्धव्यङ्ग्यानां रसानां मध्ये यस्य रसस्य बहु–आधिकारिवस्तु-व्यापकं रूपमास्वादो भवति, स रसः स्थायी प्रधानमङ्गीति यावत् मन्तव्यः, शेषाः प्रासङ्गिकवस्तुमात्रव्यापका अपकृष्टास्वादा रसाः सञ्चारिणोऽङ्गानि मता इति तदर्थः । अत एव भागुरिरपि—'किं रसानामपि भाववत् स्थायिसञ्चारिता ? इत्याशङ्क्य, 'बाढमस्ति' इति स्वयमूरीचकार ।

इममेव—

'अङ्गं बाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे ।
नास्वाद्यते समग्रं तत् ततः खण्डरसः स्मृतः ॥' इति वदंश्चण्डीदासोऽपि खण्डरसनाम्ना व्यवजहार ।

इत्थं स्थायिनो रसस्य प्राधान्यादङ्गिता, सञ्चारिणान्त्वङ्गतेति स्फुटं रसानामङ्गाङ्गिभावं ये मन्यन्ते, तन्मतानुसारिणीयमुक्तिः ।

रसानामङ्गाङ्गिभावमनभ्युपगच्छतां मते सङ्गतिमाह—

मतान्तरे तु रसानां स्थायिनो भावा उपचाराद् रसशब्देनोक्ताः, तेषामङ्गत्वे निर्विरोधित्वमेव ।

ये तु रसानामङ्गाङ्गिभावं प्रागुक्तयुक्त्याऽस्वीकुर्वन्त उक्ताभियुक्तकारिकाघटकरसपदं रसनधर्मवति भावे लाक्षणिकं मत्वा, भावानामेव स्थायिसञ्चारितयाऽङ्गाङ्गिभावमङ्गीकुर्वन्ति, तन्मते 'रसान्तरसमावेशः प्रस्तुतस्य रसस्य यः' इत्यादिकारिकाविवरणस्थरसपदान्यपि भावलाक्षणिकान्येवावसाय सन्दर्भसङ्गतिः करणीयेत्यभिसन्धिः ।

इत्थं विरोध्यविरोधिसाधारणाविरोधोपायोपादानमुपसंहरन् विरोधिविषयकाविरोधोपायं दर्शयितुं कारिकामवतारयति—

एवमविरोधिनां विरोधिनां च प्रबन्धस्थेनाङ्गिना रसेन समावेशे साधारणमविरोधोपायं प्रतिपाद्येदानीं विरोधिविषये तं प्रतिपादयितुमिदमुच्यते—

तच्छब्दोऽविरोधोपायं परामृशति ।

'विरुद्धैकाश्रयो यस्तु विरोधी स्थायिनो भवेत् ।
स विभिन्नाश्रयः कार्यस्तस्य पोषेऽप्यदोषता ॥ ८१ ॥'

कारिकां विवृणोति—

ऐकाधिकरण्यविरोधी नैरन्तर्यविरोधी चेति द्विविधो विरोधी । तत्र प्रबन्धस्थेन स्थायिनाऽङ्गिना रसेनौचित्यापेक्षया विरुद्धैकाश्रयो यो विरोधी, यथा-वीरेण भयानकः, स विभिन्नाश्रयः कार्यः । तस्य वीरस्य य आश्रयः कथानायकः, तद्विपक्षविषये सन्निवेशयितव्यः । तथासति च तस्य विरोधिनोऽपि यः पोषः, स निर्दोषः । विपक्षविषये हि भयातिशयवर्णने नायकस्य नयपराक्रमादिसम्पत्सुतरामुद्योतिता भवति ।

वृत्त्यनुरोधेन कारिकायां 'विरुद्धैकाश्रय' इति पाठः स्थापितः । विरुद्ध एक आश्रयो यस्येति बहुव्रीहिः । विरोधिप्रकारद्वयं च प्रागेव व्याख्यातम् । विरोधनिर्द्धारकमौचित्यम् । सम्पदतिशयः ।

यो हि स्थायी रसो विरोधिना स्थायिना सहैकस्मिन्नधिकरणे स्थातुं न शक्नोति, विभिन्नाश्रयो व्यधिकरणः कार्यः । एवं सति तस्य विरोधिनोऽपि रसस्य पृथगाश्रयस्य पोषेऽप्यदोषतैव न तु दोषः, वैयधिकरण्ये सति क्वचित्तस्यापि प्रकृतरसपोषकत्वात् । यथा—वीरः स्थायी भयानकेन सहैकाश्रये स्थातुमक्षमः, उत्साहभीत्योरेकाधिकरणस्थत्वासम्भवाद्, इति प्रबन्धेषु नायके वीरः प्रतिनायके च भयानको निबद्धव्यः । तथा च प्रतिपक्षिणो भयेन नेतुर्वीरोचितनीतिविक्रमयोरुत्कर्ष एव सूच्यत इति व्यधिकरणो विरोध्यपि भयानको वीरस्य पोषकः, तेन पोषकस्य तस्य पुष्टावपि स्थायिनो न हानिरिति सारम् ।

उदाहरति—

एतच्च मदीयेऽर्जुनचरितेऽर्जुनस्य पातालावतरणप्रसङ्गे वैशद्येन प्रदर्शितम् ।

अर्जुनचरितं नामकाव्यम् । तत्र हि पातालनिलयानां प्रतिपक्षिणाम्—

'समुत्थिते धनुर्ध्वनौ भयावहे किरीटिनो ।
महानुपप्लवोऽभवत् पुरे पुरन्दरद्विषाम् ॥' इत्यादिना भीतिवर्णने—

नार्जुनस्य नेतुर्वीरता प्रकाश्यत एव, न त्वपकृष्यत इति ज्ञेयम् ।

उपसंहरति—

एवमैकाधिकरण्यविरोधिनः प्रबन्धस्थेन स्थायिना रसेनाङ्गभावगमने निर्विरोधित्वं यथा, तथा तद्दर्शितम् ।

द्वितीयविरोधिसमावेशं दर्शयितुं कारिकामवतारयति—

द्वितीयस्य तु तत् प्रतिपादयितुमुच्यते—

द्वितीयस्य नैरन्तर्यविरोधिनः । तत्—निर्विरोधित्वम् ।

'एकाश्रयत्वे निर्दोषो नैरन्तर्ये विरोधवान् ।
रसान्तरव्यवधिना रसो न्यस्यः सुमेधसा ॥ ८२ ॥'

यो रसो येन रसेन सहेति शेषः, एकाश्रयत्वे सामानाधिकरण्ये, निर्दोषो निर्विरोधः, किन्तु नैरन्तर्येऽव्यवधानस्थितौ विरोधवान् भवेत् । स रसः सुमेधसा सुमतिना कविना प्रबन्धे रसान्तरेणोभयाप्रतिकूलेनान्यरसेन व्यवधिर्व्यवधानम्, तेन न्यस्यो निवेशनीय इत्यर्थः ।

तदाह वृत्तिकृत्—

यः पुनरेकाधिकरणत्वे निर्विरोधो, नैरन्तर्ये तु विरोधी, स रसान्तरव्यवधानेन प्रबन्धे निवेशयितव्यः ।

एष च रसविरोधपरिहारो न प्रबन्धमात्रे, यावन्मुक्तकादिष्वपि भवत्येव । अत एवाग्रिमकारिकायाम—'एकवाक्यस्थयोरपि' 'इत्याद्युदाहरिष्यते ।

उदाहरति—

यथा—शान्तशृङ्गारौ 'नागानन्दे' निवेशितौ ।

अयमभिप्रायः—ययोर्हि रसयोरव्यवधानेन निवेशनमेव विरोधमूलम्, तयोरन्तरा कश्चनोभयानुकूलो रसो विरोधनिवृत्तये निवेशनीयः । यथा–हर्षदेवकृतनागानन्दनाटके–जीमूतवाहनस्य नेतुः—

'रागस्यास्पदमित्यवैमि न तु मे ध्वंसीति न प्रत्ययः' इत्यादिना मुखसन्धिमारभ्य परोपकारनिमित्तशरीरार्पणलक्षणनिर्वहणसन्धिं यावच्छान्तस्य, तद्विरुद्धस्य मलयवतीविषयकानुरागमूलकशृङ्गारस्य च मध्ये 'अहो गीतम्' 'अहो वादित्रम्' इति तत्तपोभङ्गार्थशक्रप्रहिताप्सरस्सङ्गीतप्रशंसनेनोभयानुकूलोऽद्भुतरसो निवेशित इत्युभयोरविरोधः । तथाऽन्यत्रापि प्रबन्धे विधेयम् ।

ननु तदैवेदं विरोधपरिहारविवेचनं सङ्गच्छेत, यदि शान्तो नाम रसः कश्चित् प्रसिद्धः स्यात्। तमेव तु कियन्तो न मन्यन्ते, सकलसहृदयानुभवगोचरत्ववैधुर्यात्, 'तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानम्' इत्यभियुक्तोक्तेस्तत्त्वज्ञानादिजन्यात्मावज्ञानलक्षणनिर्वेदस्थायिकत्वेनास्वाद्यत्वाभावात, सत्त्वेऽपि धार्मिकभावप्राधान्येन वीर एवान्तर्भावयितुं शक्यत्वाच्चेत्याक्षेपं परिहरति—

शान्तश्च तृष्णाक्षयसुखस्य यः परिपोषः, तल्लक्षणो रसः प्रतीयत एव।

तृष्णानां सर्वविधविषयसमीहानां क्षयेण सर्वतो निवृत्तिरूपेण निरोधेन यत्सुखं, तद्रूपं वा यत्सुखं, स्वमात्रविश्रान्तिजन्याह्लादः, तस्य यः परिपोष आस्वादपदवीप्राप्तिः, तल्लक्षणस्तद्रूपः शान्तो रसः प्रतीयतेऽनुभूयत एव सहृदयैरिति नाप्रसिद्ध इत्याकूतम्।

शान्तरसस्वरूपनिर्णायकमतान्तराणि चान्यतोऽवसेयानि।

यत्तु—'तृष्णानां विषयाणां यः क्षयः सर्वतो निवृत्तिरूपो निरोधः' इति केचिद् व्याचक्षते, तन्न, भोग्यपदार्थविषयकचित्तवृत्तिविशेषरूपाणां तृष्णानामेव दुःखकारणत्वेन, तन्निरोधस्यैव सुखमयत्वाद्, विषयाणां निरोधस्य कर्तुमशक्यत्वाच्च।

इममर्थं प्राचीनसम्मतिप्रदर्शनेन दृढयति—

तथा चोक्तम्—'यच्च काममुखं लोके यच्च दिव्यं महत् सुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥'

लोके भूलोके, यत् काममुखमभीष्टप्राप्तिजन्यं सुखम्, दिवि स्वर्गे भवं दिव्यं च महत् मर्त्यसुखादधिकतमं यत् सुखम्, अस्तीति शेषः। एते द्वे सुखे तृष्णाक्षयसुखस्य वैतृष्ण्यजन्याह्लादविशेषस्य, षोडशीं कलां नार्हतः, किन्तु ततोऽतितरां न्यूने इत्यर्थः।

ननु तर्हि सर्वैः सहृदयैः शृङ्गारादिवत् कथं न प्रतीयत इत्याशङ्कां समादधाति—

यदि नाम सर्वजनानुभवगोचरता तस्य नास्ति, नैतावताऽसावलोकसामान्यमहानुभावचित्तवृत्तिविशेषवत् प्रतिक्षेप्तुं शक्यः।

प्रतिक्षेप्तुं निरसितुम्।

अयं भावः—सर्वैः सहृदयैर्नास्वाद्यत इति हेतोः शान्तो रसो नास्त्येवेति वक्तुं न शक्यते, यतो यः सर्वानुभवविषयो न भवति, स नास्त्येवेति दुर्वचम्, तथासति सर्वजनानुभवागोचरस्येश्वरस्याप्यसत्त्वं प्रसज्येत, तादृशो महानुभावजनचित्तवृत्तिवि-

शेषोवाऽसन् मन्येत । किञ्च न ह्यन्येऽपि रसाः सकलहृदयानुभवगोचराः, किन्तु सहृदयेष्वपि तत्तद्रसस्थायिवासनावत एव कस्यचन तत्तद्रससाक्षात्कारस्य सर्वानुमतत्वम् । शान्तस्य तु स्थायी निरुक्तलक्षणो निर्वेदः, तद्वासना तु सर्वैः सांसारिकैरसुलभेति शान्तस्यास्वाददौर्लभ्यप्रयोज्योऽभावो न वाच्यः, जन्मान्तरीयापरिमितसुकृतपरिपाकविजृम्भितनिर्वेदसंस्काराणां कियतांचन तदनुभवस्यापलपितुमशक्यत्वात् ।

तथा—'न यत्र दुःखं न सुखं न चिन्ता, न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः ॥' इतिदर्शनात्

परमहंसदशामात्रानुभवनीयस्य सुखाद्यतिरिक्तस्य व्यभिचार्यादिसम्मेलनामर्हत्वात्तद्विधुरस्य शान्तस्यास्वादविरहान्न रसत्वमिति न वाच्यम्, शान्तप्रकृतिकैः पारमहंस्यातिरिक्तदशायामप्यनुभाव्यत्वात्, सुखाभावकथनस्य वैषयिकसुखाभावपरत्वेनोक्ततृष्णाक्षयसुखरूपतायास्तस्याक्षतत्वात्, परमात्माद्यालम्बन–पुण्याश्रमाद्युद्दीपन–रोमाञ्चाद्यनुभाव–हर्षादिव्यभिचारिभावसम्मेलनस्य सद्भावाच्च ।

तदुक्तम्—'युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः ।
रसतामेति तदस्मिन् सञ्चार्यादेः स्थितिर्न विरुद्धा ॥' इति ।

केचित्तु–आत्मावज्ञालक्षणं विषयवैतथ्यप्रत्ययात्मकं वा निर्वेदमनत्यास्वाद्यं व्यभिचारिणमवसाय—'शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्' इत्युक्तलक्षणं शममेव शान्तरसस्थायिनं मन्यन्ते ।

अपरे—निर्वेदोपजीवनेनैव शमप्रवृत्तिदर्शनान्निर्वेदस्यैवोपजीव्यत्वेन स्थायितां निश्चिन्वन्तीत्यन्यत्र विस्तरः ।

अन्ते शङ्कितं वीरे शान्तस्यान्तर्भावं खण्डयति—

न च वीरे तस्यान्तर्भावः कर्तुं युक्तः, तस्याभिमानमयत्वेन व्यवस्थापनात् । अस्य चाहङ्कारप्रशमैकरूपतया स्थितेः ।

तस्य वीररसस्य । अभिमानमयत्वादाहोपुरुषिकामूलकत्वात् । अस्य शान्तरसस्य । अहङ्कारप्रशमैकरूपतया स्थितेः सर्वविधाहङ्कारनिवृत्तिरूपेण विजृम्भमाणत्वात् ।

तदुक्तं दर्पणे—'निरहङ्काररूपत्वाद् दयावीरादिरेष नो ॥' इति ।

एष शान्तरसः ।

उक्तान्यथाभावे दोषमाह—

तयोश्चैवंविधविशेषसद्भावेऽपि यद्यैक्यं परिकल्प्यते, तद्वीररौद्रयोरपि तथाप्रसङ्गः।

तयोर्वीरशान्तयोः। एवंविधविशेषस्य-अभिमान-सर्वथातदभावरूपस्य। तथाप्रसङ्ग ऐक्यकल्पनाऽऽपत्तिः, वैधर्म्यसद्भावस्य तुल्यत्वात्। वीररौद्रयोर्धर्मार्थोपकारकत्वसाधर्म्याद्विरोधाभावाच्च।

विशेषमुपदिशन्नुपसंहरति—

दयावीरादीनां च चित्तवृत्तिविशेषाणां सर्वाकारमहङ्काररहितत्वेन शान्तरसप्रभेदत्वम्, इतरथा तु वीरप्रभेदत्वमिति व्यवस्थाप्यमाने न कश्चिद् विरोधः।

दयावीरादीनामुत्साहादिस्थाय्यात्मकत्वेन चित्तवृत्तिविशेषरूपता। शान्तरसप्रभेदत्वं, न तु शान्तस्यैव तत्रान्तर्भावः, तस्य तु—

'स्वं स्वं निमित्त मासाद्य शान्तादुत्पद्यते रसः।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते॥' इत्युक्तेरुपजीव्यत्वात्।

इतरथाऽहङ्कारसाहित्ये। आदिशब्देन दानवीर-धर्मवीर-युद्धवीर-सत्यवीर-देवताविषयकरतिभावप्रभृतीनामवगमः।

एतेन विषयदोषदर्शनजन्यजुगुप्सां शान्तस्थायिभावं निश्चित्य बीभत्से तदन्तर्भावं व्याहरन्तोऽपि परास्ताः।

पर्यवसितमाचष्टे—

तदेवमस्ति शान्तो रसः, तस्य चाविरुद्धरसव्यवधानेन प्रबन्धे विरोधिरससमावेशे सत्यपि निर्विरोधत्वम्। यथा—प्रदर्शिते विषये।

अस्ति, न तु कथञ्चिदपि प्रतिक्षेप्तुं शक्यते। प्रदर्शिते विषये—नागानन्दादौ।

उक्तमर्थं द्रढयितुं कारिकामवतारयति—

एतदेव स्थिरीकर्तुमिदमुच्यते—

स्थिरीकरणन्तु शिष्यबुद्धौ।

**'रसान्तरान्तरितयोरेकवाक्यस्थयोरपि।
निवर्तते हि रसयोः समावेशे विरोधिता॥ ८१॥'**

हि यतः, एकवाक्यस्थयोरेकवाक्यव्यङ्ग्ययोरपि रसान्तरेणानुकूलेनान्यरसेन अन्तरितयोः कृतव्यवधानयोर्विरुद्धयो रसयोर्विरोधिता निवर्त्तते, तस्मादेकप्रबन्धव्यङ्ग्यविरुद्धरसयोरपि तादृशरसान्तरव्यवहितयोर्विरोधो निवर्तत एवेति निश्चितमित्यर्थः।

तदाह—

रसान्तरव्यवहितयोरेकप्रबन्धस्थयोर्विरुद्धयोर्विरोधिता निवर्तत इत्यत्र न काचिद् भ्रान्तिः, यस्मादेकवाक्यस्थयोरपि रसयोरुक्तया नीत्या विरुद्धता निवर्तते।

उक्ता नीतिरनुकूलरसान्तरव्यवधानीकृतिः।

एकवाक्ये तादृशरसयोर्विरोधनिवृत्तिमुदाहरति—

यथा—

युद्धे सद्योनिधनमासाद्य स्वर्गतानां वीराणां विषये कश्चिदाह—

'भूरेणुदिग्धान् नवपारिजात-मालारजोवासितबाहुमध्याः।
गाढं शिवाभिः परिरभ्यमाणान्, सुराङ्गनाऽऽश्लिष्टभुजान्तरालाः॥
सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान्।
संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्पलतादुकूलैः॥
विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम्।
निर्दिश्यमानाल्ललनाऽङ्गुलीभिर्वीराः स्वदेहान् पतितानपश्यन्॥' इत्यादौ

नवपारिजातमालाया रजसा परागेण वासितं सुरभीकृतं बाह्वोर्मध्यं वक्षो येषां ते, तथा सुराङ्गनाभिरप्सरोभिः, आश्लिष्टमालिङ्गितं भुजयोरन्तरालं मध्यं येषां तादृशाः, तथा चन्दनवारीणां यत्र यतो वा, तैः सुगन्धिभिः कल्पलतादुकूलैः कल्पवृक्षजपट्टवसनैः संवीजिताः कृतपवनाः, तथा विमानपर्यङ्कतले व्योमयानस्थपर्यङ्कोपरि, निषण्णा उपविष्टाः, वीरास्तदानीम् अमरत्वप्राप्त्यनन्तरम्, भूरेणुदिग्धान् पृथ्वीरजःपूर्णान्, शिवाभिः क्रोष्ट्रीभिर्गाढं परिरभ्यमाणान् भक्षितुमालिङ्ग्यमानान्, सशोणितै रुधिरवद्भिः, स्फुरद्भिः सञ्चलद्भिः, क्रव्यभुजां नवमांसभक्षकाणां गृध्रादीनां खगानां पक्षैः, उपवीज्यमानान्, युद्धभूमौ पतितान्, ललनानामङ्गुलीभिः 'अयं भवतो देहः' इत्येवं निर्दिश्यमानान् प्रदर्श्यमानान्, स्वदेहान् कुतूहलाविष्टतया साश्चर्यं सप्रमोदमपश्यन्नित्यर्थः।

तथा च—'शिवा गौरी शिवा क्रोष्ट्री' इति क्षपणकः ।

इह विशेषकत्वाच्छ्लोकत्रयात्मकैकवाक्ये 'भूरेणुदिग्धान्' इत्यादिदेहविशेषणैरन्तराऽन्तरा बीभत्सः, नवपारिजातेत्यादिभिर्वारविशेषणैः क्रमेण शृङ्गारश्च व्यज्यते । तौ च मिथोविरुद्धौ, तेन तयोर्विरोधपरिहाराय मध्ये युद्धभूमिनिपतन-तज्जन्यस्वर्गप्राप्त्यादेर्युद्धोत्साहजन्यत्वेनोत्साहमूलकवीररसोऽपि व्यज्यते । यद्यपि वीरस्यापि शृङ्गारेण विरोध एवेति नानुकूलता, किन्तु वीरस्यालम्बनमिह प्रतियोद्धा, शृङ्गारस्य तु सुराङ्गना इत्यालम्बनभेदादविरोध इत्यन्तरा निवेशितः ।

तदाह—

अत्र हि शृङ्गारबीभत्सयोस्तदङ्गयोर्वा वीररसव्यवधानेन समावेशो न विरोधी ।

तदङ्गयोः शृङ्गारबीभत्सस्थायि-वीरव्यभिचारि-रतिजुगुप्सयोः ।

अयमाशयः—न हि सुराङ्गनारति-पतितदेहजुगुप्से इह पार्यन्तिकास्वादसीमानमासादयतः, यच्छृङ्गारबीभत्सौ विरुद्धौ स्याताम्, अतो रतिजुगुप्सयोस्तत्स्थायिनोर्मध्य एव वीररससन्निवेशः । वीरस्य तु वाक्यव्यापकत्वेन प्राधान्येनास्वाद्यत्वम् ।

श्रीवत्सलाञ्छनस्तु—वाक्येऽस्मिन् वीरव्यञ्जकसामग्र्यपेक्षया शृङ्गारबीभत्सव्यञ्जकसामग्र्या एवोत्कटत्वेन प्रतीतेः शृङ्गारबीभत्सयोर्मध्य उत्साहमात्रं निवेश्यत इत्यभिदधे ।

उपसंहरन्नुपदिशति—

'विरोधमविरोधञ्च सर्वत्रेत्थं निरूपयेत् ।
विशेषतस्तु शृङ्गारे सुकुमारतरो ह्यसौ ॥ ८४ ॥'

कविः सहृदयश्च, इत्थममुनोक्तेन प्रकारेण सर्वत्र प्रबन्धे मुक्तकादौ च, सर्वेषु रसेषु वा, विरोधमविरोधं च निरूपयेत् । हि यतः, असौ शृङ्गारः सुकुमारतरोऽत्यन्तकोमलोऽस्तीति शेषः, सुकुमारास्त्वन्येऽपि रसाः, शृङ्गारस्तु नितरामिति तत्र विशेषतोऽधिकं निरूपयेदित्यर्थः ।

रसविरोधाविरोधप्रकारश्च—'अत्र रसानां परस्परविरोधस्त्रिधा—क्वचिदाश्रयैक्येन, क्वचिदालम्बनैक्येन, क्वचिन्नैरन्तर्येण । तत्रालम्बनैक्येन वीरशृङ्गारयोः, हास्यरौद्रबीभत्सैः सह सम्भोगस्य, वीरकरुणरौद्रैर्विप्रलम्भस्य । आलम्बनाश्रयैक्याभ्यां

वीरभयानकयोः । नैरन्तर्यविभावैक्याभ्यां शान्तशृङ्गारयोः । अविरोधोऽपि त्रेधा—वीरस्याद्भुतरौद्राभ्यां सर्वथैवाविरोधः । शृङ्गारस्याद्भुतेन, भयानकस्य बीभत्सेन । क्वचिदालम्बनभेदाद् यथा—वीरशृङ्गारयोः । तृतीयस्तु—'भूरेणु'–'इत्यादावुक्त एवेति केचित्' इत्युद्द्योतद्योतितदिशाऽवसेयः ।

विवृणोति वृत्तिकारः—

यथोक्तलक्षणानुसारेण विरोधाविरोधौ सर्वेषु रसेषु, प्रबन्धेऽन्यत्र च निरूपयेत् सहृदयः । विशेषतस्तु शृङ्गारे, स हि रतिपरिपोषात्मकत्वाद्, रतेश्च स्वल्पेनापि निमित्तेन भङ्गसम्भवात्, सुकुमारतरः सर्वेभ्यो रसेभ्यो मनागपि विरोधिसमावेशं न सहते ।

अन्यत्र मुक्तकादौ ।

किञ्च—

'अवधानातिशयवान् रसे तत्रैव सत्कविः ।
भवेत् तस्मिन् प्रमादो हि झगित्येवावभासते ॥ ८५ ॥'

हि यतः, तस्मिन् शृङ्गारे रसे, कवेः प्रमादोऽनवधानता झगित्येव न तु विलम्बेनावभासते । तस्मात् तत्रैव शृङ्गारे सत्कविः अवधानातिशयवान् सप्रयत्नतरो भवेदित्यर्थः ।

कारिकां विवृणोति—

तत्रैव च रसे सर्वेभ्योऽपि रसेभ्यः सौकुमार्यातिशययोगिनि, कविरवधानवान् प्रयत्नवान् स्यात् । तत्र हि प्रमाद्यतस्तस्य सहृदयमध्ये क्षिप्रमेवावज्ञानविषयता भवति ।

तत्र हीत्यादिसमर्थनम् । अवज्ञानविषयता तिरस्कार्यत्वम् ।

न च सुकुमारतैव शृङ्गारप्राधान्ये निमित्तम्, यावदन्यदपीत्याह—

शृङ्गाररसो हि संसारिणां नियमेनानुभवविषयत्वात् सर्वरसेभ्यः कमनीयतया प्रधानभूतः ।

न हि शमादीनामनुभवः संसारिणां जीवानां प्रायेण, क्वाचित्कश्च नैव प्राधान्यावहः । शृङ्गारस्थायिरतेरनुभवस्त्वाकीटं यथास्वं भवत्येवेति शृङ्गारस्य प्राधान्यमक्षुण्णमिति सारम् ।

पर्यवसितं विशेषं वक्तुं कारिकामवतारयति—

एवं सति—

शृङ्गारस्य कमनीयत्वेन सर्वानुकूल्ये निश्चिते सतीत्यर्थः ।

'विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा ।
तद्विरुद्धरसस्पर्शस्तदङ्गानां न दुष्यति ॥ ८६ ॥'

तच्छब्दद्वयेन शृङ्गारः परामृश्यते । तथा च तदङ्गानां शृङ्गारादिविभावादीनां तद्विरुद्धस्य शृङ्गारादिप्रतिकूलस्य रसस्य स्पर्शः सम्बन्धः कथितपरिपोषपरिहार-लक्षणाविरोधोपायेनैव केवलं न दुष्यति न, विनेयान् शिक्षणीयान् सुकुमारमतीन् राजकुमारप्रभृतीन्, उन्मुखीकर्तुमुपदेशग्रहणाय गुडजिह्विकयाऽभिमुखीकर्तुम्, काव्यस्य शोभार्थं शृङ्गारव्यञ्जनेन विच्छित्तिविशेषं जनयितुं च क्रियमाणः स न दुष्यति, नैव दोषवान् भवतीत्यर्थः ।

तदाह—

शृङ्गारविरुद्धरसस्पर्शः शृङ्गाराङ्गाणां यः, स न केवलमविरोधलक्षण-योगे सति न दुष्यति, यावद् विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा क्रियमाणो न दुष्यति ।

वाशब्दोऽप्यर्थकः । यावदिति किन्त्वर्थकम् ।

उक्तं समर्थयति—

शृङ्गाररसाङ्गैरुन्मुखीकृताः सन्तो हि विनेयाः सुखं विनयोपदेशं गृह्णन्ति ।

'स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते ।

प्रथमालीढमधवः पिबन्ति कटुकौषधम् ॥' इत्युक्तनयेन मृदुमतयः क्षितिभृत्सुतप्रभृतयः शुष्कान् शान्तादिव्यञ्जकवृत्तान्तानवगन्तुमुन्मुखाः प्रायेण न भवेयुः, किन्तु सानन्दं तानुपदेश्यविषयान् गृह्णीयुरेवेति तेषामुन्मुखीकरणाय तत्रापि तन्मनोरमशृङ्गारविभावादयो निवेश्यन्ते । ते च प्रकृतोपयोगितया न विरोधमाचरन्तीति तात्पर्यम् ।

न हि काव्यं सहृदयमनोविनोदमात्रफलकम्, यावन्मनोरमैः शब्दैः कान्तेव भङ्गिविशेषेण सदर्थमप्युपदिशति । तदुक्तं मम्मटेन—'कान्तासम्मिततयोपदेशयुजे'

इति । इतरथा प्रौढमतिभिस्तदनुपादेयमेव स्यादित्यभिप्रेत्याह—

सदाचारोपदेशरूपा हि नाटकादिगोष्ठी विनेयजनहितार्थमेव मुनिभिरवतारिता ।

आदिशब्देन प्रकरणादीनां श्रव्यकाव्यानां च परिग्रहः । गोष्ठीसमितिरालापो वा । मुनिभिर्भरतादिभिः । अवतारितोद्भाविता प्रचारिता वा ।

नाटकादिभ्यो यतो नायकवदाचरणीयम्, न प्रतिनायकवदिति सदाचारोपदेश एव भवति, तस्मात्तानि महर्षिभिः शिक्षणीयजनहिताय प्रकाशितानि । न हि महर्षीणां तुच्छे कर्मणि प्रवृत्तिरित्यभिप्रायः ।

शृङ्गाराङ्गसमावेशस्य मुख्यं प्रयोजनमुक्त्वाऽन्यदाह—

किञ्च शृङ्गारस्य सकलजनमनोऽभिरामत्वात् तदङ्गसमावेशः काव्यशोभाऽतिशयं पुष्यतीत्यनेनापि प्रकारेण विरोधिरसे शृङ्गाराङ्गसमावेशो न विरोधी ।

शोभाऽतिशयं लोकोत्तरचमत्कारं पुष्यति पुष्टीकरोति ।

अन्ये तु—'शोभाऽतिशयमलङ्कारविशेषमुपमाप्रभृतिं पुष्यति सुन्दरीकरोति' इति व्याचक्षते तत्र यथोक्तम्—'काव्यशोभाकर्तारो गुणाः, तदतिशयहेतवस्त्वलङ्काराः' इति प्रमाणं चोपन्यस्यन्ति ।

इदमत्र परामर्शनीयम्—न ह्यलङ्काराः शोभाऽतिशयस्वरूपाः, अपि तु तद्धेतवः । अत एव तदतिशयहेतव इति वामनवचनमपि तैरेवोपात्तं सङ्गच्छते । न वा काव्ये समावेशितं शृङ्गाराङ्गमुपमाद्यलङ्कारं सुन्दरीकरोति । तथात्वे तस्यैवालङ्कारत्वप्रसङ्गः, किन्तु कटकादिना मनुष्याङ्गमिव स्वभावसुन्दरमपि तेनैव सुन्दरीक्रियते ।

उदाहरति—

ततश्च—

कश्चन विरक्तो वदति—

'सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः ।
किन्तु मत्ताङ्गनाऽपाङ्ग-भङ्गलोलं हि जीवितम् ॥'

इत्यादिषु नास्ति रसविरोधदोषः ।

रामा विलासिन्यो मनोरमा मनोहरा इति सत्यम्, विभूतयः सम्पदो रम्या इति च सत्यम्, किन्तु जीवितं जीवनं हि निश्चयेन मत्ताङ्गनायाः प्रमदाया अपाङ्गभङ्ग इव कटाक्ष इव लोलमस्थिरमस्तीत्यर्थः ।

स्वीकरोमि तावद् रमणीनां सम्पदां च रमणीयताम्, किन्तु मनुष्यजीवनं यदि स्थिरं स्यात्, तदैव तदुपभोगः सम्यक् सम्भवेदिति ततो मन आकृष्य परमात्मचिन्तायामासञ्जनीयमिति भावः।

अत्र जीविता नित्यत्वकथनं शान्तविभावं, रामा इति शृङ्गारालम्बनविभावो विभूतय इति तदुद्दीपनविभावश्च विरुद्धावपि पुष्णीतः, पर्यन्ते शान्तस्यैव विश्रान्तिधामत्वात्। मत्ताङ्गनेलाद्यपि यथाकथंचिच्छृङ्गारं प्रकाशयज्जीवनास्थैर्यातिशयबोधनेन शान्तमेवोपकरोति। किञ्च भवत्येतावता महीयान् विनेयोन्मुखीकरणकारी काव्ये शोभाप्रकर्ष इत्यविरोधः शान्तशृङ्गारयोरत्र, परत्र शृङ्गारभङ्गीकृतदेवतास्तवादौ च बोध्यः।

उपसंहरन् पर्यवसितमुपदिशति—

'विज्ञायेत्थं रसादीनामविरोधविरोधयोः।
विषयं सुकविः काव्यं कुर्वन् मुह्यति न क्वचित्॥ ८७॥'

स्फुटं व्याख्याति—

इत्थमनेनानन्तरोक्तेन प्रकारेण रसादीनां रसभावतदाभासानां परस्परं विरोधस्याविरोधस्य च विषयं विज्ञाय, सुकविः काव्यविषये प्रतिभाऽतिशययुक्तः काव्यं कुर्वन् न क्वचिन्मुह्यति।

आदिशब्देन भावशान्त्यादयो ग्राह्याः। मुह्यति मोहं प्रमादं भ्रमं वाऽधिगच्छति।

इत्थं रसादीनां मिथोविरोधाविरोधप्रकारा रसादिसमावेशप्रकाशकत्वेन काव्योपकारका निरूपिताः। तदनन्तरं रसादिव्यञ्जकानां वाच्यानां वाचकानां च निरूपणमपि काव्योपकारकमिति तदपि विधीयत इति कारिकाऽवतरणमाह—

एवं रसादिषु विरोधाविरोधनिरूपणस्योपयोगित्वं प्रतिपाद्य, व्यञ्जकवाच्यवाचकनिरूपणस्यापि तद्विषयस्य तत्प्रतिपाद्यते—

व्यञ्जकेति वाच्यवाचकयोर्विशेषणम्, तद्विषयस्येति च निरूपणस्य। पूर्वस्तच्छब्दो रसादीन्, परश्च तदुपयोगित्वं बोधयति।

'वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादिविषयेणैतत्कर्म मुख्यं महाकवेः॥ ८८॥'

वाच्यानां प्रबन्धसम्बन्धिवृत्तान्तानां, वाचकानां सुप्तिङन्तादिरूपाणां च काव्ये, औचित्येनोचितविवेचनया कथितपूर्वया रसादिविषयेण रसादिव्यञ्जनोपयोगित्वेन, यद् योजनं निवेशनम्, एतन् महाकवेर्मुख्यं तदन्तरेण महाकवित्वासम्पत्तेरसाधारणं कर्मास्तीत्यर्थः ।

तदाह—

वाच्यानामितिवृत्तविशेषाणां वाचकानां च तद्विषयाणां रसादिविषयेणौचित्येन यद् योजनम्, एतन्महाकवेर्मुख्यं कर्म ।

पर्यवसितमाचष्टे—

अयमेव हि महाकवेर्मुख्यो व्यापारो यद् रसादीनेव मुख्यतया काव्यार्थीकृत्य तद्व्यक्त्यनुगुणत्वेन शब्दानामर्थानां चोपनिबन्धनम् ।

काव्यार्थीकृत्य 'काव्यस्यात्मा स एवार्थः' इति प्रागुक्ते रसादीनेव प्राधान्येन काव्यव्यङ्ग्यान् विधाय । तद्व्यक्त्यनुगुणत्वेन रसादिव्यञ्जनोपकारित्वेन । तत्रेतिवृत्तरूपवाच्यस्य व्यक्त्यनुगुणत्वम्—'विभावभावानुभावसञ्चार्यौचित्यचारुणः । विधिः कथाशरीरस्य' इत्यादिना सुप्तिङन्तादि ।

लक्षणवाचकस्य—'सुप्तिङ्वचनसम्बन्धैः' इत्यादिना च प्राङ् निरूपितमेव स्मरणीयम् ।

मुख्यमित्यनेन—'आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः' इत्यादिना पूर्वं यद् वाच्यापेक्षया काव्ये व्यङ्ग्यस्योपादेयत्वमुपक्षिप्तम्, तत् साधितमुपसंहृतमिदानीम् ।

अथ सम्प्रत्युक्तव्यवस्थायां प्राचीनसम्मतिं दर्शयन् वृत्तीः प्रसङ्गाद् वाच्यव्यङ्ग्यप्रत्ययक्रमं व्यञ्जनां च निरूपयितुं कारिकामवतारयति—

एतच्च रसादितात्पर्येण काव्यनिबन्धनं भरतादावपि सुप्रसिद्धमेवेति-प्रतिपादयितुमिदमुच्यते—

एतदिदानीमस्मदुक्तम् । आदिशब्देनेतरालङ्कारनिबन्धपरिग्रहः । सुप्रसिद्धमेव, न त्वस्माभिरेव कल्पितम् ।

'रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः ।
औचित्यवान् यस्ता एता वृत्तयो द्विविधाः स्मृताः ॥८६॥'

अर्थशब्दयो रसाद्यनुगुणत्वेन रसादिव्यक्त्यनुकूलतया, औचित्यवानुचितो यः

काव्ये व्यवहारः समावेशः, ता एता भरतानुशासनेऽन्यत्रालङ्कारनिबन्धेषु च प्रसिद्धा द्विविधाः कैशिक्यादय आर्थिक्य उपनागरिकाद्याः शाब्दयश्च वृत्तयः स्थिता इत्यर्थः।

वृत्तिनिर्वचनं विदधन् कारिकां व्याख्याति—

व्यवहारो हि वृत्तिरित्युच्यते। तत्र रसानुगुण औचित्यवान् वाच्याश्रयो यो व्यवहारः, ता एताः कैशिक्यादयो वृत्तयः। वाचकाश्रयाश्चोपनागरिकाद्याः।

वृत्तिरित्यत्र वृतेर्भावे क्तिन्प्रत्ययः, तेनोचितैव व्यापारार्थकता। कैशिकीप्रभृतय उपनागरिकाद्याश्च प्रागेवास्माभिर्लक्षिताः।

वृत्तीनां सप्रयोजनत्वं दर्शयति—

वृत्तयो हि रसादितात्पर्येण सन्निवेशिताः कामपि नाट्यस्य काव्यस्य च च्छायामावहन्ति।

नाट्यपदेन दृश्यानां काव्यपदेन च श्रव्याणां ग्रहणम्। छायाऽतिशयाधानमेव वृत्तीनां प्रबन्धेषु प्रयोजनम्।

कुतो रसादितात्पर्येणैव, न पुनरिति वृत्ततात्पर्येण वृत्तीनां योजनम्? इत्याशङ्कामपास्यति—

रसादयो हि द्वयोरपि तयोर्जीवभूताः, इतिवृत्तादि तु शरीरभूतमेव।

हि यतः, द्वयोरर्थशब्दाश्रितत्वभेदेन द्विविधयोरपि तयोर्वृत्त्योः रसादयो जीवभूताः शरीर इव काव्ये जीववत् प्रधानानि,—'वृत्तयः काव्यमातृकाः' इति कथयद्भिर्भरतचरणै रसाद्यनुकूलेतिवृत्तयोः जनोपदेशस्य विहितत्वेन रसादीनां तत्त्वप्रसिद्धेः। 'स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते' इत्युपन्यसता भट्टभामहेनापि रसादीनां प्राधान्यमुद्घोषितमेव। इतिवृत्तं तु वाच्यार्थरूपं शब्दार्थशरीरस्य काव्यस्य शरीरभूतमिति न दुर्बोधम्। अत एव—'इतिवृत्तं तु नाट्यस्य शरीरम्' इति भरतानुशासनं सङ्गच्छते। तत्र 'नाट्यं च रसः' इत्याचार्याः, तथा च शब्दार्थाश्रितत्वेन तदनतिरिक्ता द्विविधा वृत्तयो रसादीनां शरीरमिति योजना।

एकदेशिमतमुपन्यस्यति—

अत्र केचिदाहुः—'गुणगुणिव्यवहारो रसादीनामितिवृत्तादिभिः सह, न तु जीवशरीरव्यवहारः। रसादिमयं हि वाच्यं प्रतिभासते, न तु रसादिभिः पृथग्भूतम्' इति।

रसादीतिवृत्तयोर्जीवशरीरव्यवहारस्तदा स्याद्, यदि रसादिभिः पृथग्भूतमपि वाच्यार्थरूपमितिवृत्तं क्वचिदुपलभ्येत। न तु तथा, रसाद्यनतिरिक्तस्यैवेतिवृत्तस्य सर्वत्रोपगमात् । शरीरं तु मरणानन्तरं जीवात् पृथगप्युपलभ्यत इति कथं तयोस्तादृशो व्यवहारः, किन्तु गुणगुणिव्यवहार एव, तथा हि—यथा गुणेभ्यो रूपादिभ्यः पृथग्भूतस्य गुणिनो द्रव्यस्य नोपलम्भः, तथैव रसादिभ्योऽतिरिक्तस्येतिवृत्तस्य, तयो रत्यन्तसम्मिश्रणेन भेदस्य सतोऽपि ग्रहीतुमशक्यत्वाद् वाच्यव्यङ्ग्ययोः प्रतीतिक्रमस्य लाघवेनाज्ञानादिति सारम् ।

खण्डयति—

अत्रोच्यते—'यदि रसादिमयमेव वाच्यं यथा गौरत्वमयं शरीरम्, एवंसति यथा शरीरे प्रतिभासमाने नियमेनैव गौरत्वं प्रतिभासते सर्वस्य, तथा वाच्येन सहैव रसादयोऽपि सहृदया सहृदयस्य च प्रतिभासेरन् ।

रसादीतिवृत्तयोर्गुणगुणिभावो नाभ्युपगन्तुं शक्यते, यतस्तथासति यथा गौरत्वगुणस्य प्रत्यक्षं तद्वतः शरीरस्य प्रत्यक्षे नियमतः सर्वस्यानष्टचक्षुषो भवति, तथैव वाच्यार्थज्ञाने सति रसादिव्यङ्ग्यज्ञानं सर्वस्य सहृदयासहृदयसाधारणस्य वैयाकरणमात्रस्यापि भवेदिति महानुपप्लव आपतति, तस्मान्न गुणगुणिभावस्तयोरिति फलितम् ।

ननु भवेत् सर्वस्य तदनुभवः, तेन का हानिरित्यत आह—

न चैवम्, तथा चैतत् प्रतिपादितमेव प्रथमोद्द्योते ।

एवं सर्वस्य तदवगमश्च न भवतीति प्रथमोद्द्योत एव—'शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते' इत्यादिना निर्धारितम् । तस्मादियमापत्तिर्गुणगुणिभावं प्रतिबध्नात्येवेत्याशयः ।

पुनरशङ्कते—

स्यान्मतम्, रत्नानामिव जात्यत्वं प्रतिपत्तृविशेषसंवेद्यं वाच्यानां रसादिरूपत्वमिति ।

इतीत्यस्य मतमित्यनेन, तस्य च स्यादित्यनेनान्वयः । जात्यत्वमुत्कृष्टजातिविशिष्टत्वम् । प्राधान्ये मयट् । तथा च—रत्नानां जात्यत्वमिव वाच्यानां रसादिमयत्वं प्रतिपत्तृविशेषसंवेद्यं स्यादिति मतं चेदिति सम्बन्धः ।

नायं सार्वत्रिको नियमः—यद् धर्मिणो ज्ञाने धर्मस्यापि ज्ञानं सर्वेषां जनानां

भवत्येव, यतो रत्नानां धर्मो जात्यत्वं रत्नानि जानद्भिरपि सर्वैर्न ज्ञायते, वैकटिकेनैव प्रतिपत्तृविशेषेण तु परिचीयते, तद्वदिहापि वाच्यस्य भवेत् सर्वेषां ज्ञानम्, तद्धर्मस्य रसादिमयत्वस्य तु ज्ञानं सहृदयस्यैव प्रतिपत्तृविशेषस्य स्यादिति गुणगुणिभावाभ्युपगमेऽपि न क्षतिरिति शङ्कितुरभिप्रायः।

खण्डयति—

नैवम्, यतो यथा जात्यत्वेन प्रतिभासमाने रत्ने रत्नस्वरूपानतिरिक्तत्वमेव लक्ष्यते, तथा रसानां विभावानुभावादिरूपवाच्यानतिरिक्तत्वमेव लक्ष्यते, न चैवम्।

एवं जात्यत्वरसादीनां साम्यं न भवितुमर्हति, यतो रत्नानां जात्यत्वं तेषु लीनमिवास्तीति तेभ्यः पृथङ् न प्रतीयते, किन्तु तदेकरूपं प्रतिभातीति जात्यत्वग्रहः सर्वेषां रत्नदर्शिनां न भवतीत्युचितम्, वाच्यानां विभावादीनां पुनर्धर्मा रसादयो गौरत्वादिवदुन्मग्नस्वभावत्वादीषत्पृथक् प्रतीतिगोचरा भवन्त्येवेति न वाच्यैकरूपा इति सर्वेषां वाच्यावबोधिनां तदवबोधो दुर्वार एव स्यादिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम्। तस्मान्न गौरत्वादिरूपवद् रसादयः, न वा जात्यत्ववच्च स्वीकर्तुं शक्याः। आद्ये-सर्वेषां तत्प्रतीतिप्रसङ्गात्। अन्त्ये—वाच्यविभावाद्येकरूपताऽऽपातात्, किन्तु विभावादिप्रतीतिप्रयोज्यास्वादस्वरूपा विलक्षणा एव त इति जीवशरीरभाव एव तेषामितिवृत्तेः सहेति तात्पर्यम्।

रसादिविभावादीनां भेदं समर्थयति—

न हि विभावानुभावव्यभिचारिण एव रसा इति कस्यचिदवगमः। अत एव च विभावादिप्रतीत्यविनाभाविनी रसादीनां प्रतीतिरिति तत्प्रतीत्योः कार्यकारणभावेन व्यवस्थानात् क्रमोऽवश्यंभावी, स तु लाघवान्न प्रकाशत इत्यलक्ष्यक्रमा एव सन्तो व्यङ्ग्या रसादय इत्युक्तम्।

अत एव—रसादिभ्यो विभावादीनां भेदादेव। अविनाभाविनी-तज्जन्या। तत्प्रतीत्यो-रसादिभावादिज्ञानयोः। स तु-क्रमस्तु। लाघवाच्छैघ्र्यात्। उक्तं प्रागसंलक्ष्यक्रमव्यङ्ग्यनिरूपणप्रकरणे सङ्क्षेपेण।

यदि हि रसादीनां विभावादीनां चैक्यं स्यात्, तर्हि तदुभयप्रतीत्योः कार्यकारणभावो न घटेत। भवति च रसादिप्रतीतौ विभावादिप्रतीतिः कारणम्। उभयोरेकरूपत्वे तदुभयप्रतीत्योरप्यैक्यं यौगपद्यं च मन्तव्यमेव। तन्मननं तु दुष्करम्,

तत्प्रतीत्योः क्रमस्यौपपत्तिकत्वात् । इतरथा कार्यकारणभावस्यैवासङ्गतिः । क्रमावगमश्च क्वचित् संलक्ष्यक्रमादौ भवत्येव । असंलक्ष्यक्रमेषु रसादिषु तु शीघ्रतैव क्रमप्रतिभासं रुणद्धि, तत्को दोषस्तस्येत्याकूतम् ।

नन्वेवं वाच्यव्यङ्ग्ययोर्भेदे सिद्धेऽपि, तत्प्रतीत्योः क्रमः कल्पयितुं न शक्यते, तयोर्यौगपद्येनैव क्वचिदुद्भवात् । इत्थं च किमिति व्यञ्जनाव्यापारोऽप्यतिरिक्तः स्वीक्रियेत, अभिधाव्यापारेणैव प्रकरणादिसाहाय्येन युगपदुभयोर्बोधस्य सम्भवादित्यभिप्रेत्य पुनः शङ्कते—

ननु शब्द एव प्रकरणाद्यवच्छिन्नो वाच्यव्यङ्ग्ययोः सममेव प्रतीतिमुपजनयतीति किं तत्र क्रमकल्पनया ?

प्रकरणाद्यवच्छिन्नः—प्रकरणवक्तृबोद्धव्यादिविशिष्टः । सममेव--सहैव । शब्द एवेत्येवकारेणार्थादीनां व्यवच्छेदः । शब्दस्त्वेकदैवाभिधयैवोभयं बोधयेदिति व्यञ्जनाया अप्यसिद्धिः ।

ननु वाच्यव्यङ्ग्यप्रतीत्योः कार्यकारणभाव एव क्रमं कल्पयेदित्यत आह—

न हि शब्दस्य वाच्यप्रतीतिपरामर्श एव व्यञ्जकत्वे निबन्धनम् । तथा हि–गीतादिशब्देभ्योऽपि रसाद्यभिव्यक्तिरस्ति, न च तेषामन्तरा वाच्यपरामर्शः ।

निबन्धनं निमित्तम् । प्रतीतिपरामर्शशब्दयोः पर्यायतया सह प्रयोगः कथंचिदुपपादनीयः । अन्तरा मध्ये पूर्वमिति यावत् । दृष्टान्तोपन्यासस्तु व्यभिचारदर्शनाय । तेषां गीतादिशब्दानाम् । आदिशब्देन वाद्यप्रभृतीनां परिग्रहः ।

वाच्यव्यङ्ग्यप्रतीत्योः कार्यकारणभावस्तदैव कल्प्येत, यद्युभयोर्व्यभिचारो न स्यात् । दृश्यते च गीतादिशब्दमात्रजन्यरसादिप्रतीतिस्थले व्यभिचारः, तथा हि–कियन्तो गीतशब्दा वाच्यार्थबोधनं विनाऽपि स्वरादिविशेषबलेनैव रसान् बोधयन्तीति कारणाभावप्रयोज्यकार्याभावाभावरूपव्यतिरेकव्यभिचारोऽत्र न तिरोहितः । व्यभिचारे तु जागरूके कथं कार्यकारणभावः । तदभावे च दूरे क्रमकल्पना, भेदानधिगमे व्यञ्जनात्मकपृथग्व्यापारकल्पना चेत्यभिसन्धिः ।

आक्षेपमंशतोऽभ्युपगत्य खण्डयति—

अत्रापि ब्रूमः—प्रकरणाद्यवच्छेदेन व्यञ्जकत्वं शब्दानामित्यनुमतमेवैतदस्माकम् । किन्तु तद् व्यञ्जकत्वं तेषां कदाचित् स्वरूपविशेषनिब-

न्धनम्, कदाचिद् वाचकशक्तिनिबन्धनम्। तत्र येषां वाचकशक्तिनिब-न्धनम्, तेषां यदि वाच्यप्रतीतिमन्तरेणैव स्वरूपप्रतीत्या निष्पन्नं तद् भवेत्, न तर्हि वाचकशक्तिनिबन्धनम्। अथ तन्निबन्धनम्, तन्नियमेनैव वाच्यवाचकप्रतीत्युत्तरकालत्वं व्यङ्ग्यप्रतीतेः प्राप्तमेव।

यत एवेदमस्माकमनुमतम्, अत एव—'यत्रार्थः शब्दो वा' इत्यादिना पूर्व-शब्दस्यापि व्यञ्जकमुदीरितम्। इयदभ्युपगमनम्। किन्त्वित्यादिना च खण्डनम्। स्वरूपविशेषनिबन्धनं प्रत्यक्षद्वारा शब्दस्वरूपमात्रप्रयोज्यम्। वाचकशक्ति-रभिधा, तन्निबन्धनं स्वप्रयोज्यवाच्यार्थबोधद्वारा तत्प्रयोज्यम्। तत्र तद्द्वयमध्ये। येषां काव्यशब्दानाम्। स्वरूपप्रतीत्या स्वरूपविषयकश्रावणप्रत्यक्षेण। निष्पन्न-मुत्पन्नम्। तद् व्यञ्जकत्वम्। तर्हि वाचकशक्तिनिबन्धनं न तदिति सम्बन्धः। तन्निबन्धनं वाचकशक्तिप्रयोज्यम्। तत् तर्हि। वाच्यवाचकभावोऽभिधा, तत्प्र-तीतिस्तत्प्रयोज्यवाच्यार्थबोधः, तदुत्तरकालत्वं तदुत्तरकाले जायमानत्वम्।

अयं भावः—यत्र गीतादिषु शब्दश्रवणानन्तरमेव, व्यङ्ग्यरसादिप्रतीतिः, तत्र तच्छ्रावणप्रत्यक्षस्यैव श्रावणप्रत्यक्षविषयशब्दस्यैव वा कारणता। यत्र तु काव्येषु शब्दतो वृत्तिज्ञानजन्योपस्थित्यादिभिर्विभावादिवाच्यार्थबोधः, तज्जन्या च रसादि-प्रतीतिः, तत्र शब्दजन्यवाच्यार्थबोधस्यैवान्वयव्यतिरेकाववधार्यातिरिक्तैव कार-णता कल्प्यते। इत्थं च काव्येषु वाच्यार्थप्रतीतिं विना नैव क्वापि व्यङ्ग्यार्थप्रतीति-रिति नास्मिन् कार्यकारणभावे कश्चन व्यभिचारः। कारणतायां स्वीकृतायां क्रमोऽ-प्यनायत्या स्वीकर्तव्य एव भवेत्।

एवं तर्हि स क्रमोऽत्र कुतो न लक्ष्यत इत्यत्राह—

स तु क्रमो यदि लाघवान्न लक्ष्यते, तत् किं क्रियताम्।

वाच्यप्रतीत्यविलम्बेनैव व्यङ्ग्यप्रतीतेरुद्भवात् कमलदलशतभेदवत् क्रमो न लक्ष्यत इत्येतावता स कल्पनीय एव नेति न वक्तव्यमित्याशयः।

काव्योद्भूतव्यङ्ग्यप्रतीतौ वाच्यप्रतीतेः कारणतां व्यवस्थापयति—

यदि च वाच्यप्रतीतिमन्तरेणैव प्रकरणाद्यवच्छिन्नशब्दमात्रसाध्या रसादिप्रतीतिः स्यात्, तदनवधारितप्रकरणानां वाच्यवाचकभावे च स्वय-मव्युत्पन्नानां प्रतिपत्तॄणां काव्यमात्रश्रवणादेवासौ भवेत्।

तत् तदा। अनवधारितप्रकरणानां प्रकरणादिज्ञानाभाववताम्। वाच्यवाचकभावे स्वयमव्युत्पन्नानामजाताभिधाज्ञानानाम्। असौ रसादिप्रतीतिः।

यदि सर्वस्यां रसादिव्यङ्ग्यप्रतीतौ शब्दश्रावणप्रत्यक्षस्यैव कारणत्वं स्यात्, तर्हि यैः काव्यशब्दाः श्रुताः, किन्तु तेषां प्रकरणादिग्रहो वाच्यार्थनिरूपित—वाचकशब्दनिष्ठाभिधाग्रहश्च न जातः, तेषां वाच्यार्थप्रतीत्यभावेन व्यङ्ग्यार्थप्रतीतिर्या न भवति, सा कुतो न स्यात्, भवन्मते वाच्यार्थप्रतीतेस्तत्कारणत्वानङ्गीकारात् तद्विरहस्याकिञ्चित्करत्वात्, भवदभिमतशब्दप्रत्यक्षमात्रकारणस्य तत्रापि जागरूकत्वाच्च। न च प्रकरणादिज्ञानाभावान्न भवेदिति वाच्यम्, प्रकरणादिज्ञानस्य भवन्मते कारणत्वाकथनात्, स्वरूपसतः प्रकरणादेस्तत्रापि सत्त्वाच्च। तस्मात् काव्यजव्यङ्ग्यप्रतीतौ वाच्यप्रतीतेः कारणत्वमवश्यमूरीकरणीयमिति भावः।

पुनः क्रमस्वीकृतिं द्रढयति—

सहभावे च वाच्यप्रतीतेरनुपयोगः। उपयोगे वा न सहभावः।

वाच्यव्यङ्ग्यप्रतीत्योर्यदि सव्येतरविषाणयोरिव युगपदुत्पन्नत्वेन सहभावः, तदा वाच्यप्रतीतेर्व्यङ्ग्यप्रतीतावजनकत्वेनानुपयोगः स्यात्। यदि चोभयोः कार्यकारणभावः, तदा नैव यौगपद्यम्। तत्रोक्तनीत्या तयोः कार्यकारणभावे निर्णीते यौगपद्यस्याभ्युपगन्तुमशक्यत्वात् क्रमोऽवश्यं स्वीकर्तव्य इत्यभिसन्धिः।

न परमत्रैव, किन्तु गीतादिशब्दजरसादिव्यङ्ग्यप्रतीतावपि क्रमोऽस्त्येवेत्याह—

येषामपि स्वरूपविशेषप्रतीतिनिमित्तं व्यञ्जकत्वं, यथा गीतादिशब्दानाम्, तेषामपि स्वरूपप्रतीतेर्व्यङ्ग्यप्रतीतेश्च नियमभावी क्रमः।

इदमुक्तं भवति—गीतादिशब्दानामपि रसादिप्रतीतौ स्वरूपसतां न कारणता, तथा सति श्रवणमन्तरेणापि तेभ्यस्तत्प्रतीतिप्रसङ्गः, किन्तु तच्छ्रावणप्रत्यक्षस्यैव, तस्मात् तेभ्यः प्रथमं श्रावणप्रत्यक्षम्, तदनन्तरं ततो रसादिप्रतीतिरिति तयोः पौर्वापर्येण क्रमोऽवश्यमस्ति।

स क्रमः कुतो न प्रतीयत इति पुनर्धाष्ट्र्येनाशङ्कमानं प्रत्यभिदधाति—

तत्र तु शब्दस्य क्रियापौर्वापर्यमनन्यसाध्यतत्फलघटनास्वाशुभाविनीषु वाच्येनाविरोधिन्यभिधेयान्तरविलक्षणे रसादौ न प्रतीयते।

तत्र वाच्येनाविरोधिनि वाच्याविरुद्धे, अभिधेयान्तरेभ्यो वाच्यविशेषेभ्यो विलक्षणे—'प्रतीयमानं पुनरन्यदेव' इत्याद्युक्तेरतिरिक्ते, व्यञ्जनीये रसादौ शब्दस्य

क्रिययो र्वाच्यव्यङ्ग्यप्रत्यायनयो रभिधाव्यञ्जनयो र्वा पौर्वापर्यं क्रमः, न हि अन्यद् रसादिप्रतीतिव्यतिरिक्तं साध्यं निष्पाद्यं यासां, तादृश्योऽत एव तदेव रसादिप्रत्यायनमेव फलं प्रयोजनं यासां, ताश्च या घटनाः पूर्वोक्ताः संघटनाः, तासु आशुभाविनीषु द्रुततरभवनशीलासु न प्रतीयते, न लक्ष्यत इत्यर्थः ।

अयमाशयः—वाच्यव्यङ्ग्यप्रतीत्योः कार्यकारणभावेन क्रमोऽस्त्येव, किन्तु यत्र वाच्याविरुद्धस्तद्विलक्षणो रसादिर्व्यङ्ग्यः, तत्र रसादिव्यञ्जनैकप्रयोजनतया संघटनानां सङ्कीर्णत्वेन—'झटित्येवावभासते' इति कारिकायाम्,-'सहैव वाच्येनावभासते' इति वृत्तौ च प्रतिपादनात् क्षिप्रतरं वाच्यव्यङ्ग्ययोः प्रत्यायकतेति क्रमो न लक्ष्यते । यथा वह्निधूमयोर्व्याप्तिग्रहस्य पौनःपुन्येन प्रवृत्त्या प्रणिधानं विनाऽपि धूमज्ञानेन सहैव वह्निज्ञानमुत्पद्यते, न च न क्रमः, किन्तु सन्नपि स शीघ्रताऽऽधिक्येन न प्रतीयते, तथैव विभावादिरसादिप्रतीत्यभ्यासेन प्रणिधानं विनाऽपि तदनुभवजसंस्कारबलादाशुतरं विभावादिप्रतीत्युत्तरं रसादिप्रतीतिस्तथा जायते, यथा तयोः सदपि पौर्वापर्यं न लक्ष्यते ।

स च क्रमो न सर्वत्रालक्ष्य एवेत्याह—

क्वचित्तु लक्ष्यत एव । यथाऽनुरणनरूपव्यङ्ग्यप्रतीतिषु ।

तत्र तादृशशीघ्रताया अभावात् ।

ननूभयोर्व्यङ्ग्ययोस्तुल्यत्वे, तत्क्रमयोर्लक्ष्यालक्ष्यत्वेन कुतो वैषम्यमित्याक्षिप्य निरस्यति—

तत्रापि कथमिति चेत्, उच्यते—अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यध्वनौ तावदभिधेयस्य तत्सामर्थ्याक्षिप्तस्य चार्थस्याभिधेयान्तरविलक्षणस्यात्यन्तविलक्षणे ये प्रतीती, तयोरशक्यनिह्नवो निमित्तनिमित्तिभाव इतिस्फुटमेव तत्र पौर्वापर्यम् । यथा-प्रथमोद्योते प्रतीयमानार्थसिद्ध्यर्थमुदाहृतासु गाथासु । तथाविधे च विषये वाच्यव्यङ्ग्यो रत्यन्तविलक्षणत्वाद् यैव एकस्य प्रतीतिः, सैवेतरस्येति न शक्यते वक्तुम् ।

तत्रापि संलक्ष्यक्रमध्वनावपि । कथमित्यतः परं लक्ष्यत इति योज्यम् । तत्सामर्थ्याक्षिप्तस्य व्यङ्ग्यस्य । अभिधेयान्तरविलक्षणस्यान्यवाच्यभिन्नस्य । अत्यन्तविलक्षणे नितरां भिन्ने । न शक्यो निह्नवोऽपलापो यस्य तादृशो निमित्तनिमित्तिभावः कार्यकारणभावः । उदाहृतासु प्रतीयमानार्थो वाच्यार्थादतिरिक्तोऽस्तीति साधनप्र

सङ्गेन कथितासु, गाथासु 'मम धम्मिअ' इत्यादिकासु। तथाविधे कार्यकारणीभूते। एकस्य वाच्यस्य। इतरस्य व्यङ्ग्यस्य। अनुरणनध्वन्यपरपर्यायस्य संलक्ष्यक्रमध्वने रेतन्मते शब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति द्वावेव भेदौ, तन्निरूपणं च द्वितीयोद्योते—'आक्षिप्त एवालङ्कारः' इत्यादिना 'अर्थशक्त्युद्भवस्त्वन्यः' इत्यादिना च क्रमेण विहितम्। तत्रार्थशक्त्युद्भवध्वनौ पूर्वं कारणीभूता वाच्यार्थप्रतीतिः, पश्चात्तत्कार्यभूता वाच्यार्थनिष्ठव्यञ्जनाजन्यव्यङ्ग्यविषयिणी प्रतीतिर्जायत इत्यनयोः प्रतीत्योः कार्यकारणभावस्य सुव्यक्तत्वात् क्रमो दुरपह्नवः, यतस्तस्य ध्वनेः—

'अविवक्षितवाच्यस्य पदवाक्यप्रकाशता।
तदन्यस्यानुरणन–रूपव्यङ्ग्यस्य च ध्वनेः॥' इत्यनेन पदवाक्ये एव

व्यञ्जकत्वेनोक्ते, न तु संघटनाऽपि, तत्कथं तत्र शैघ्र्यातिशयात् क्रमो न लक्ष्येत। तथा च स्फुटं पृथक् प्रतीयमानयोर्वाच्यव्यङ्ग्यप्रतीत्योरेकीभावो दुर्वचः, व्यङ्ग्यप्रतीतेश्च कार्यत्वेन कारणान्तरानुपलम्भेऽगत्योपपत्त्या च वाच्यप्रतीतिरेव कारणं निर्णीयते। तस्मान्न तयोः पौर्वापर्ये मनागपि सन्देग्धव्यमिति सारम्।

संलक्ष्यक्रमध्वनेरपरस्मिन् प्रभेदेऽपि क्रमं व्यवस्थापयति—

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्ये तु ध्वनौ—'गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु' इत्यादावर्थद्वयप्रतीतौ शाब्द्यामर्थद्वयस्योपमानोपमेयभावप्रतीतिरुपमावाचकपदविरहे सत्यर्थसामर्थ्यादाक्षिप्तेति तत्रापि सुलक्ष्यमभिधेयव्यङ्ग्यालङ्कारप्रतीत्योः पौर्वापर्यम्।

'गावो वः' इत्यादिद्वितीयोद्योते विवृतस्य 'दत्तानन्दाः' इत्यादिमयूरकविश्लोकस्य चरमश्चरणः। अर्थद्वयस्य सूर्यकिरणरूपवाच्यस्य, तद्धेनुरूपशब्दशक्त्युद्भवव्यङ्ग्यस्य च। शाब्द्यां साक्षात् परम्परया च शब्दनिष्ठाभिधामूलिकायाम्। अपीति योज्यम्। उपमावाचकपदविरहे यथेवादिशब्दाप्रयोगे। अर्थसामर्थ्याक्षिप्ता-वाक्यार्थनिष्ठव्यञ्जना जन्या, एतच्चोपमानोपमेयभावप्रतीते र्विशेषणम्।

यद्यपि शब्दशक्त्युद्भवध्वनौ 'दत्तानन्दाः' इत्यादौ प्रथमार्थस्याभिधया, द्वितीयार्थस्याभिधामूलव्यञ्जनया प्रतीतिरित्युभयमपि शब्दसाध्यमेवेति न पौर्वापर्यकल्पनाप्रसरः, किन्तु तदनन्तरमर्थद्वयस्य मिथोऽसम्बद्धत्वापत्तिवारणार्थं यो गाव इव गाव इत्युपमानोपमेयभावः कल्प्यते, तत्प्रतीतिस्त्वार्थी व्यञ्जनालभ्यैवेति पूर्वार्थद्वयप्रतीत्युपमाप्रतीत्योः प्राक् पश्चाद्भावेन क्रमः स्फुटं तत्रापि प्रतीयत एवेति सारम्।

अत्र प्रथमद्वितीयार्थप्रतीत्योर्ज्येष्ठकनिष्ठोत्पत्त्योरिव न मिथः कार्यकारणभाव इति तत्र सन्नपि क्रमो नोपात्तः । तृतीयार्थप्रतीतिरूपकार्यस्य तु तदर्थद्वयप्रतीतिः कारणम्, उपमानोपमेयोपस्थापकत्वादिति विभावनीयस्तत्र क्रम इति बोध्यम् ।

एवं तत्र वाक्यप्रकाशे क्रमं व्यवस्थाप्य, तत्रैव पदप्रकाशेऽपि व्यवस्थापयति—

पदप्रकाश–शब्दशक्तिमूलानुरणनरूपव्यङ्ग्येऽपि ध्वनौ, विशेषणपदस्योभयार्थसम्बन्धयोग्यस्य योजकं पदमन्तरेण योजनमशाब्दमप्यर्थादवस्थितमित्यत्रापि पूर्ववदभिधेयतत्सामर्थ्याक्षिप्तालङ्कारप्रतीत्योः सुस्थितमेव पौर्वापर्यम् ।

विशेषणपदस्य इहैवोद्द्योते—'प्रातुं धनैः' इत्यादिश्लोकावयवस्य दारिद्र्यनिर्विण्णवदान्यजन–कूपोभयविशेषकस्य 'जडः' इति शब्दस्य । योजकं यथेवादिपदम् । योजनन्तु कूपसामानाधिकरण्येन स्वसामानाधिकरण्येन च ज्ञेयम् । अशाब्दत्वं तु योजकपदाभावात् । अर्थादवस्थितं व्यञ्जनात्मकार्थशक्त्युपस्थापितम् । अलङ्कारो व्यतिरेकः । मात्रशब्दस्त्वत्रापि शान्तरसप्रतीतिरलक्ष्यक्रमैव भवतीति सूचयति ।

तत्र हि दारिद्र्यनिर्विण्णजनोच्चारितत्वेन जडपदात् प्रथममभिधया वक्तृविशेषणार्थप्रतीतिः, पश्चादिवाद्यभावेऽप्यभिधामूलव्यञ्जनया तडागकूपविशेषणार्थप्रतीतिः तदुत्तरमार्थव्यञ्जनया तादृशतडागकूपावधिकस्वापकर्षसूचनाद् व्यतिरेकालङ्कारद्वयस्य प्रतीतिः, तत्र चाभिधामूलकप्रतीतियुगुलं मूलमिति पूर्ववत् क्रमः सुदर्श एवेति तत्त्वम् ।

नन्वेकस्या एव वैयञ्जनिकप्रतीतेः शब्दशक्त्युद्भवत्वरूपशाब्दत्वम्, अर्थशक्त्युद्भवत्वरूपमार्थत्वं च विरुद्धमित्यत आह—

आर्थ्यपि च प्रतिपत्तिस्तथाविधे विषये–उभयार्थसम्बन्धयोगाशब्दसामर्थ्यप्रतिप्रसवभूतेति शब्दशक्तिमूला कल्प्यते ।

प्रतिपत्तिः प्रतीतिः । उभयार्थसम्बन्धयोगा वाच्यव्यङ्ग्यात्मकार्थद्वयसम्बन्धिनी । इह सम्बन्धयोगशब्दयोः पर्यायत्वेऽपि सह प्रयोगः कथञ्चिदुपपाद्यः । शब्दसामर्थ्यमभिधा, तस्याः प्रतिप्रसवभूता एकत्र नियन्त्रिताया अप्यर्थान्तरे स्वावलम्बदानेनोत्थापिका, यद्वा तस्याः प्रतिप्रसवान्नियन्त्रणनिषेधादभिधामूलव्यञ्जनाया भूता–उत्पन्नेति शब्दशक्तिमूला सा प्रतीतिः कल्प्यत इत्यर्थः ।

इदमिहावसेयम्—वाच्यप्रतीत्यलङ्कारप्रतीत्योरेवात्र क्रमो विवक्षितः, तत्रालङ्कारप्रतीतौ साक्षात् परम्परया वाऽभिधायाः कारणत्वविरहाच्छब्दशक्तिमूलत्वमवास्तवमपि शाब्दप्रतीत्यविनाभावित्वेन तत्राभिधामूलत्वं कल्पयित्वा, शब्दशक्तिमूलत्वं कल्प्यते । तथा च तृतीयप्रतीतावार्थत्वं वास्तविकं शाब्दत्वं च कल्पितमित्युभयोरेकत्र कथंचित् समावेशान्न विरोधः ।

इत्थं विवक्षितान्यपरवाच्यध्वनिप्रकारद्वये क्रमं व्यवस्थाप्याविवक्षितवाच्यध्वनावपि तं व्यवस्थापयति—

अविवक्षितवाच्यस्य तु ध्वनेः प्रसिद्धस्वविषयवैमुख्यप्रतीतिपूर्वकमेवार्थान्तरप्रकाशनमिति नियमभावी क्रमः ।

प्रसिद्धे स्वविषये स्वशक्यार्थे यद् वैमुख्यं बाधितत्वम्, तस्य प्रतीतिर्बाधग्रहरूपा, सा पूर्वं यस्या इति विग्रहः । अर्थान्तरप्रकाशनं व्यङ्ग्यबोधनम् ।

तदुदाहरणे—'निश्श्वासान्ध इवादर्शः' इत्यादावन्धशब्दादभिधया पूर्वमुपहतदृष्टिकस्योपस्थितिः, ततो दर्पणेऽसम्भवाद् बाधग्रहः, तदनन्तरं लक्षणया म्लानत्वप्रत्यायनम्, तदुत्तरं व्यञ्जनया तदतिशयसूचनं भवतीति तत्रापि क्रमोऽस्त्येवेति तात्पर्यम् ।

ननु तर्हि तत्र संलक्ष्यत्वेनासंलक्ष्यत्वेन वा क्रमः कथं न विचारित इत्यत आह—

तत्र त्वविवक्षितवाच्यत्वादेव वाच्येन सह व्यङ्ग्यस्य क्रमप्रतीतिविचारो न कृतः ।

वाच्यं यदि विवक्षितं स्यात्, तदा तत्प्रतीति-व्यङ्ग्यप्रतीत्योः पौर्वापर्यं विचार्येत । यदि तदेवात्र नास्ति, तर्हि क्रमः कस्य विचारणीय इति तद्विचारो न कृतो ग्रन्थकृतेति शेषः । नैतावता क्रमस्तत्र नास्त्येवेति बोध्यम्, उक्तरीत्या क्रमस्यात्रापि दुरपह्नवत्वादित्याशयः ।

अथोभयविधवृत्तिजीवितभूतत्वं तन्नियन्त्रणहेतुत्वं च रसादीनां यत् पूर्वमुपक्रान्तम्, तदुपष्टम्भेनैव तेषां वाच्यभिन्नत्वं व्यवस्थापयितुं क्रमविचारः कृत इति सूचयन्नुपसंहरति—

तस्मादभिधानाभिधेयप्रतीत्योरिव वाच्यव्यङ्ग्यप्रतीत्योर्निमित्तनिमित्तिभावान्नियमभावी क्रमः ।

अभिधानं शब्दः । तत्प्रतीतिः प्रत्यक्षम् ।

'विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते ।'

इत्यभियुक्तोक्तेः पदप्रत्यक्षस्योपस्थितिद्वारा वाच्यबोधं प्रति कारणत्वेन तत्प्रतीत्योर्यथा तथैव कार्यकारणभावेन वाच्यव्यङ्ग्यप्रतीत्योरपीति सारम्।

क्रमलक्ष्यालक्ष्यत्वप्रसङ्गमप्युपसङ्क्षिपति—

स तूक्तयुक्त्या क्वचिल्लक्ष्यते, क्वचिन्न लक्ष्यते।

उक्तयुक्त्या वाच्यव्यङ्ग्यप्रतीत्योर्विलम्बभावित्वेनाविलम्बभावित्वेन च।

इदानीमुद्द्योतारम्भे यत् प्रतिज्ञायोपक्षिप्तं व्यञ्जकमुखेन ध्वनिनिरूपणम्, तदुपसंहरन्, प्रथमोद्द्योते व्यवस्थापितमपि व्यञ्जकत्वं विनेयबुद्धिवैशद्याय, मुहुरनुयोजकविपक्षमुखमुद्रणाय च पुनर्विचारयन् मीमांसकादिप्रतिपक्षिप्रश्नमुत्थापयति—

तदेवं व्यञ्जकमुखेन ध्वनिप्रकारेषु निरूपितेषु, कश्चिद् ब्रूयात्—किमिदं व्यञ्जकत्वं नाम? व्यङ्ग्यार्थप्रकाशनम्, न हि व्यञ्जकत्वं व्यङ्ग्यत्वं चार्थस्यापि, व्यञ्जकसिद्ध्यधीनं व्यङ्ग्यत्वम्, व्यङ्ग्यापेक्षया च व्यञ्जकत्वसिद्धिरित्यन्योऽन्यसंश्रयादव्यवस्थानम्।

सिद्धिपदं ज्ञानपरम्, ज्ञानद्वारैवान्योऽन्याश्रयदोषसम्भवात्। सन्दिग्धः सन्दर्भः। यदि च व्यञ्जकत्वं व्यङ्ग्यार्थबोधजनकत्वम्, व्यङ्ग्यत्वं च व्यञ्जकजन्यबोधविषयत्वम्, तर्हि व्यङ्ग्यव्यञ्जकत्वग्रहयोः परस्परं सापेक्षत्वेनान्योऽन्याश्रयदोषे समापतिते 'अन्योऽन्याश्रयाणि कार्याणि न प्रकल्प्यन्ते' इत्यभियुक्तोक्तेस्तयोरेकस्यापि ज्ञानं न स्यादिति व्यङ्ग्यार्थप्रकाशकत्वरूपं व्यञ्जकत्वं न सम्भवतीति प्रष्टुराकूतम्।

तमेव दोषं परिहरति—

ननु वाच्यव्यतिरिक्तस्य व्यङ्ग्यस्य सिद्धिः प्रागेव प्रतिपादिता, तत्सिद्ध्यधीना च व्यञ्जकसिद्धिरिति कः पर्यनुयोगावसरः?

पर्यनुयोगः परिप्रश्नः। तथा च—'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः।

प्रथमोद्द्योत एव ध्वन्यभाववादिनयनिराकरणप्रसङ्गेन 'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्' इत्यादिसन्दर्भेण वाच्याद्यर्थविलक्षणो व्यङ्ग्योऽर्थो निर्णीत एवेति तत्त्वग्रहे न व्यञ्जकत्वग्रहापेक्षेति केवलं व्यञ्जकत्वज्ञानमात्रे व्यङ्ग्यत्वज्ञानमपेक्षणीयमित्येकतरमात्रापेक्षणान्नान्योऽन्याश्रयदोषः सम्भवतीति परिहर्तुरभिप्रायः।

प्रष्टा तत्परिहारमंशतोऽभ्युपेत्य व्यञ्जकत्वस्य वाचकत्वव्यतिरिक्तत्वमसङ्गतं मन्वानः पुनर्वक्ति—

सत्यमेवैतत्, प्रागुक्तयुक्तिभिर्वाच्यव्यतिरिक्तस्य वस्तुनः सिद्धिः कृता।

स त्वर्थो व्यङ्ग्यतयैव कस्माद् व्यपदिश्यते ? । यत्र च प्राधान्येनावस्थानम्, तत्र वाच्यतयैवासौ व्यपदेष्टुं युक्तः, तत्परत्वाद् वाचकत्वस्य । अतश्च तत्प्रकाशिनो वाक्यस्य वाचकत्वमेव व्यापारः, किन्तस्य व्यापारान्तरकल्पनया । तस्मात् तात्पर्यविषयो योऽर्थः, स तावन्मुख्यतया वाच्यः । या त्वन्तरा तथाविधे विषये वाच्यान्तरप्रतीतिः, सा तत्प्रतीतेरुपायमात्रम्, पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः ।

एतदिति सिद्धिकरणक्रियाविशेषणम् । स वाच्यभिन्नतया साधितः । प्राधान्येन तात्पर्यविषयीभूतत्वेन । तत्परेत्यादिस्तस्य वाच्यत्वव्यपदेशहेतुः । तत्प्रकाशिनो वाच्यातिरिक्तार्थबोधकस्य । व्यापारान्तरं व्यञ्जनारूपं व्यञ्जकत्वम् । तस्मादित्यादिनिगमनम् । वाच्यान्तरस्य भवदभिमताभिधेयस्य । तत्प्रतीतेर्द्वितीयवाच्यार्थबोधस्य । उपायमात्रं साधकमात्रं, न तु स्वयं प्रवृत्तिनिवृत्ती प्रयोजयति ।

इदमुच्यते—प्रथमोद्द्योते यत् प्रतीयमानार्थस्य वाच्यातिरिक्तत्वं साधितम्, तद्वयमप्यनुमन्यामहे, किन्तु तावता न भवदभीष्टसिद्धिः, वाच्यव्यतिरिक्तत्वसिद्धावपि व्यञ्जनावृत्तिसाधनाभावात् तस्य व्यङ्ग्यत्वासिद्धेः । अपि तु वाच्यत्वमेव तस्य वक्तृतात्पर्यायमुख्यविषयताऽऽश्रयत्वेन—'यत्परः शब्दः स शब्दार्थः' इति मीमांसासिद्धान्तानुसारमभिधावृत्त्यैव बोधितत्वाद्, व्यापारान्तरकल्पने विविधकार्यकारणभावकल्पनायां गौरवाच्च । आवान्तरिकवाच्यार्थप्रतीतेस्तु प्रधानवाच्यार्थप्रतीतौ पदार्थप्रतीतेर्वाक्यार्थप्रतीताविव कारणत्वम् ।

अयं भावः—यथाऽभिधात एव प्रागुत्पन्ना पदार्थोपस्थितिः पश्चात् ततो भाविनं वाक्यार्थबोधमुपकरोति, तथैवाभिधाबलात् पूर्वोत्पन्नः प्रथमवाच्यार्थबोधस्तदुद्भूतमेव पश्चात्तनं द्वितीयवाच्यार्थबोधमुपकुर्यादित्येवं तत्प्रतीत्योः कार्यकारणभावनिर्वाहे सुकरे किमिति व्यञ्जनावृत्तिरभिनवा कल्प्येत । मीमांसाऽऽदिसिद्धान्तोऽप्यत्र सर्वथाऽनुकूलतां दर्शयत्येव । तथा च—

> 'वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
> पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥' इति भाट्टाः ।

यथा वह्निसंयुक्तकाष्ठानां मुख्यं फलं पचनम्, आवान्तरिकं च नान्तरीयकं ज्वलनम्, तथा शब्दानामर्थबोधार्थमुच्चारितानां प्रधानं फलं वाक्यार्थबोधनम् आवान्तरिकं च तदुपयोगिवाच्यार्थबोधनमिति तदर्थः ।

शब्दैरभिधाबलेन पदार्थोपस्थापनम्, तैश्च पदार्थैर्वाक्यार्थबोधनं क्रियते। वाक्यार्थश्च वाच्य एवेत्थमिति तत्सारम्।

दीर्घदीर्घतराभिधाव्यापारवशोन्मिषितयोः पदार्थवाक्यार्थप्रतीत्योः पारमार्थिकं कार्यकारणभावं प्राभाकरा अपि मन्यन्ते।

शाब्दिकास्तु तमपारमार्थिकमेवाङ्गीकुर्वन्तीति दिक्।

आक्षेपं परिहर्तुं विकल्पयति—

अत्रोच्यते—यत्र शब्दः स्वार्थमभिदधानोऽर्थान्तरमवगमयति, तत्र यत् तस्य स्वार्थाभिधायित्वम्, यच्च तदर्थान्तरावगमहेतुत्वम्, तयोरविशेषो विशेषो वा ?।

अत्र शङ्कायामुत्तरमुच्यत इति योजना। यत्र 'गतोऽस्तमर्कः' इत्यादौ। स्वार्थाभिधायित्वमभिधा। अर्थान्तरावगमहेतुत्वं व्यञ्जना। अविशेषोऽभेदः। विशेषो भेदः।

तत्र प्रथमं विकल्पं खण्डयति—

न तावदविशेषः, यस्मात्तौ द्वौ व्यापारौ भिन्नविषयौ भिन्नरूपौ च प्रतीयेते एव।

तौ वाचकत्वव्यञ्जकत्वरूपौ। भिन्नार्थनिरूपितत्वरूपभिन्नविषयत्वेन भिन्नरूपत्वेन च प्रतीतिस्तद्भेदव्यवस्थापिका।

तत्र भिन्नविषयत्वमुपपादयति—

तथा हि—वाचकत्वलक्षणो व्यापारः शब्दस्य स्वार्थविषयः, गमकत्वलक्षणस्त्वर्थान्तरविषयः।

स्वार्थो वाच्यार्थः। गमकत्वं व्यञ्जना चानर्थान्तरम्।

अर्थभेदनिबन्धनो हि वृत्त्योर्भेदव्यवहार इति साधयति—

यतः स्वपरव्यवहारो वाच्यगम्ययोरपह्नोतुमशक्यः।

स्वपरव्यवहारो भेदव्यवहारः।

अर्थयोर्भेदे हेतुमाह—

एकस्य सम्बन्धित्वेन प्रतीतेरपरस्य सम्बन्धिसम्बन्धित्वेन।

एकस्य वाच्यस्य। अपरस्य व्यङ्ग्यस्य।

तदाह—

वाच्यो ह्यर्थः साक्षाच्छब्दस्य सम्बन्धी, तदितरस्त्वभिधेयसामर्थ्याक्षिप्तः सम्बन्धिसम्बन्धी।

वाच्येन सह शब्दस्य सङ्केतलक्षणः साक्षात्सम्बन्धः, व्यङ्ग्येन सह तु स्वाभिधेयार्थनिष्ठव्यञ्जनेति पारम्परिकः सम्बन्धः । तथा हि—शब्दस्य वाच्येन, तस्य च व्यङ्ग्येन सह सम्बन्ध इति साक्षात्सम्बन्धि–सम्बन्धिसम्बन्धिनोर्भेदः ।

व्यङ्ग्यस्य साक्षात्सम्बन्धितास्वीकारे दोषं दर्शयति—

यदि च स्वसम्बन्धित्वं साक्षात् तस्य स्यात्, तदाऽर्थान्तरव्यवहार एव न स्यात् ।

यदर्थान्तरत्वं तस्य भवताऽप्युच्यते, तदेव न सिध्येदिति भावः ।

निगमयति—

तस्माद् विषयभेदस्तावत् तयोर्व्यापारयोः सुप्रसिद्धः ।

तस्मादुक्तहेतोः ।

तयोर्भेदस्य साधकं स्वरूपभेदमप्याह—

रूपभेदोऽपि प्रसिद्ध एव । न हि यैवाभिधानशक्तिः, सैवावगमनशक्तिः ।

अवगमनशक्तिर्व्यञ्जना ।

तत्र हेतुमाह—

अवाचकस्यापि गीतशब्दादे रसादिलक्षणार्थावगमदर्शनात् । अशब्दस्यापि चेष्टाऽऽदेरर्थविशेषप्रकाशनप्रसिद्धेः ।

यदि वाचकत्वव्यञ्जकत्वयोस्तादात्म्यं भवेत्, तदाऽवाचकः कदाचिदपि व्यञ्जको न भवेत्, वाचकत्ववद् व्यञ्जकत्वमपि शब्दमात्रवृत्ति च स्यात् । दृश्यते त्ववाचकोऽपि गीतादिशब्दो रसादिव्यञ्जकः, शब्दभिन्नोऽपि वदननमन–नयनाकुञ्चनादिचेष्टाप्रभृतिः शृङ्गारादिव्यञ्जकः । ततस्तयोरैक्यं कथं सम्भवेदित्यभिसन्धिः ।

उक्तार्थसमर्थकचेष्टाव्यञ्जकत्वमुदाहरति—

तथा हि—'व्रीडायोगान्नतवदनया' इत्यादिश्लोके चेष्टाविशेषः सुकविनाऽर्थप्रकाशनहेतुः प्रदर्शित एव ।

श्लोकोऽयमिहैवोद्द्योते प्राग् विवृतः । तदुपात्तास्चेष्टाविशेषास्तु—वदननमन–कुचकलशोत्कम्पन–नेत्रविभागासञ्जनानि शृङ्गारं स्फुटं प्रकाशयन्ति । न हि तच्चेष्टानां वाचकत्वं शब्दत्वाभावात् । वाचकत्वविरहेऽपि च व्यञ्जकत्वं त्वनुभवसिद्धमित्यभिधाव्यञ्जनयोः पार्थक्यं प्रथितमित्याशयः ।

उपसंहरन्नेतदेवाचष्टे—

तस्माद् भिन्नविषयत्वाद् भिन्नरूपत्वाच्च स्वार्थाभिधायित्वमर्थान्तरावगमहेतुत्वं च शब्दस्य यत्, तयोः स्पष्ट एव भेदः।

अथ द्वितीयविकल्पाश्रयणेऽपि न व्यङ्ग्यस्य वाच्यत्वव्यपदेशः सम्भवतीत्याह—

विशेषश्चेद्, न तर्हीदानीमवगमनीयस्याभिधेयसामर्थ्याक्षिप्तस्यार्थान्तरस्य वाच्यत्वव्यपदेश्यता।

अवगमनीयस्यावगमनशक्तिबोधनीयस्य। नञर्थस्य व्यपदेश्यतया सहान्वयः। अभिधा-व्यञ्जनाव्यापारयोः पार्थक्ये तु न व्यङ्ग्यस्य वाच्यत्वेन व्यवहारः सम्भवति, तस्याभिधाबोध्यत्वाभावादिति भावः।

नन्वभिधाबोध्यत्वं परम्परया तत्राप्यस्त्येवेति कुतस्तत्त्वेन व्यपदेश इत्यत्राह—

शब्दव्यापारगोचरत्वं तु तस्यास्माभिरिष्यत एव। तत्तु व्यङ्ग्यत्वेनैव, न वाच्यत्वेन, प्रसिद्धाभिधानान्तरसम्बन्धयोग्यत्वेन च तस्यार्थान्तरस्य च प्रतीतेः।

शब्दव्यापारोऽभिधा, तद्गोचरत्वं तत्प्रयोज्यबोधविषयत्वम्। प्रसिद्धस्य वाचकत्वेन ख्यातस्य स्ववाचकशब्दस्य, अभिधानान्तरस्य स्ववाचकेतरशब्दस्य च सम्बन्धः क्रमेण वाच्यवाचकभावो व्यङ्ग्यव्यञ्जकभावश्च, तद्योग्यत्वेन तस्य वाच्यस्य, अर्थान्तरस्य व्यङ्ग्यस्य च प्रतीतेरित्यन्वयः।

आचार्यास्तु—'प्रसिद्धेन वाचकतयाऽभिधानान्तरेण यः सम्बन्धो वाच्यत्वं, तदेव यत्र, तद्योग्यत्वं तेनोपलक्षितस्य' इति व्याचक्षते। तत्र चकारद्वयोपादानप्रयोजनमन्वेषणीयम्।

अभिधाप्रयोज्यबोधविषयत्वादभिधाबोध्यत्वं यद्यपि व्यङ्ग्येऽप्यस्त्येव, किन्त्वभिधामात्रबोध्यत्वं वाच्यत्वं वयं ब्रूमः, तत्र चाभिधेतरव्यञ्जनाप्रयोज्यबोधविषयत्वमप्यस्तीति कुतो वाच्यत्वव्यपदेशः स्यादिति वृत्त्याशयः।

समर्थयति—

शब्दान्तरेण स्वार्थाभिधायिना यद्विषयीकरणं, तत्र प्रकाशनोक्तिरेव युक्ता।

स्वार्थाभिधायिना स्वशक्यार्थवाचकेन, शब्दान्तरेण तद्व्यङ्ग्यार्थानभिधायक-

शब्देन, यदर्थान्तरस्य व्यङ्ग्यस्य विषयीकरणं बोधनम्, तत्र प्रकाशनस्य व्यञ्जनस्योक्तिरेव युक्ता, न त्वभिधानस्येत्यर्थः ।

'साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः ।'
'तत्र सङ्केतितार्थस्य बोधनादग्रिमाऽभिधा ॥'

इत्यादिदर्शनादवगमनीयस्यार्थान्तरस्य तत्र शब्दे साक्षात्सङ्केतराहित्येन न तच्छब्दवाच्यत्वम्, न च तच्छब्दस्य वाचकत्वम्, न वा तयोरभिधाव्यापारः, अपि तु व्यङ्ग्यत्वमर्थस्य, व्यञ्जकत्वं शब्दस्य, व्यञ्जना च व्यापार इति बोध्यम् ।

इदानीं व्यञ्जनायास्तात्पर्यशक्त्याऽगतार्थत्वं दृष्टान्तदार्ष्टान्तिकवैषम्यप्रतिपादनेन निरूपयति—

न च पदार्थवाक्यार्थन्यायो वाच्यव्यङ्ग्ययोः ।

यत् पूर्वं 'पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः' इति तात्पर्यविषयस्य वाच्यत्वं स्थापयता निदर्शनमुपन्यस्तम्, तन्न सङ्गतम्, पदार्थप्रतीतेः सर्वैरस्वीकारात्, स्वीकृतावपि पारमार्थिकत्वेनामननात्, तथा मननेऽप्यौपपत्तिकवैषम्यस्योपलम्भादिति सकलं हेतुमुखेनाह—

यतः पदार्थप्रतीतिरसत्येवेति कैश्चिद्विद्वद्भिरास्थितम् ।

कैश्चिद् वैयाकरणैर्न तु सर्वैः । तैरपि पारमार्थिकी न मन्यते, किन्त्वावान्तरिकी लाघवेन वाक्यार्थबोधार्थमेव । आस्थितं प्रतिज्ञातमभ्युपगतमित्यनर्थान्तरम् । सर्वानुमतो ह्यर्थः प्रभवति दृष्टान्तीभवितुम्, न चायं तथेति भावः ।

तदेव वैषम्यं दर्शयति—

यैरप्यसत्यत्वमस्या नाभ्युपेयते, तैर्वाक्यार्थपदार्थयोर्घट-तदुपादानकारणन्यायोऽभ्युपगन्तव्यः ।

यैर्मीमांसकैः । अपिशब्दस्तदनुयायिविरलतां सूचयति । उपादानकारणं समवायिकारणं घटस्य कपालम् ।

तन्न्यायमुपपादयति—

यथा हि घटे निष्पन्ने तदुपादानकारणानां न पृथगुपलम्भः, तथैव वाक्ये तदर्थे वा प्रतीते पद-तदर्थानाम् ।

न पृथगुपलम्भ इति शेषः ।

पृथगुपलम्भे का हानिरित्यत आह—

तेषां तदा विभक्ततयोपलम्भे वाक्यार्थबुद्धिरेव दूरीभवेत् ।

तेषां पदतदर्थानाम् । तदा वाक्यार्थबोधनिष्पत्तिकाले । दूरीभवेत् विनश्येत् । अवयवेषु हि पृथक्कृतेषु नावयविन उपलब्धिः ।

ननूपादानकारणानामुत्पन्ने कार्ये पृथगनुपलम्भोऽपि न सर्वमतसिद्धः, बौद्धनये तेषां क्षणिकत्वेनासत्त्वात्, साङ्ख्यमतेऽन्तर्हितत्वाच्चेति किमिह दृष्टान्तोपन्यसनमिति चेत्, उच्यते—तेषां पृथगनुपलब्धिरेवास्माभिरुपन्यस्ता, सा चैकत्र तेषामसत्त्वेन, परत्र तिरोहितत्वेनाक्षतैवेति नासङ्गतिरिति बोध्यम् ।

प्रकृते तन्न्यायासङ्गतिमाह—

न त्वेष वाच्यव्यङ्ग्ययोर्न्यायः । न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति । वाच्यावभासाविनाभावेन तस्य प्रकाशनात् ।

वाच्यार्थबोधमन्तरेण व्यङ्ग्यार्थबोधस्यानुदयाद् वाच्यार्थबोधस्य तत्र निमित्तकारणता कल्प्यते । न हि निमित्तकारणानामुत्पन्नेऽपि कार्ये पृथगनुपलम्भो, घट इव दण्डादीनाम् । समवायिकारणस्य तु स भवति । न च तत्ता वाच्यार्थबोधस्येति तयोर्वैधर्म्यं व्यक्तमेव ।

वाच्यार्थबोधानन्तरजायमानव्यङ्ग्यार्थबोधं प्रत्येव वाच्यार्थबोधस्य निमित्तकारणताऽपि, न तु बोधान्तरं प्रत्यपि । तथासत्यवाचकगीतशब्दश्रवणव्यङ्ग्यरसादिबोधे व्यभिचारो दुर्निवारः स्यादिति न विस्मरणीयम् ।

एवं तात्पर्यवृत्तिनिर्वाहानुकूलं पदार्थवाक्यार्थन्यायं निरस्य, स्वाभिमतप्रकाशात्मकव्यञ्जनावृत्तिस्थापनानुलोमघटप्रदीपन्यायमुपन्यस्यति—

तस्माद् घटप्रदीपन्यायस्तयोः ।

तमेवोपपादयति—

यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते, तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः ।

न निवर्तेत इति शेषः । तेन च व्यङ्ग्यव्यञ्जकभाव एव वाच्यव्यङ्ग्ययोः सम्बन्धः पर्यवस्यति ।

ननु स्वयमेव प्राक्—'यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते ।
वाच्यार्थपूर्विका तद्वत् प्रतिपत् तस्य वस्तुनः ॥' इत्यनेन

पदार्थवाक्यार्थन्यायं तयोरङ्गीकृत्य साम्प्रतमिह निरस्यतीत्यसमञ्जसमित्यत आह—

यत्तु प्रथमोद्द्योते—'यथा पदार्थद्वारेण' इत्याद्युक्तम्, तदुपायत्वसाम्यमात्रस्य विवक्षया ।

उपायत्वं कारणता ।

तत्र कारणत्वमात्रेण सामान्येन साम्यमुक्तम्, न तु समवाय्यसमवायिनिमित्तत्वरूपैर्विशेषैः । कारणत्वमात्रेण साम्यन्त्वधुनाऽप्युच्यत इति किं दूषणमित्याकूतम् ।

ननु यदि घटप्रदीपन्यायस्तयोरङ्गीक्रियते, तर्हि यथा युगपदेव घटप्रदीपयोर्भानम्भवति, तथैव कार्यकारणभावादनुचितो वाच्यव्यङ्ग्ययोः सममेवावभासो वाक्यतः स्यादिति वाक्यस्य युगपदर्थद्वयबोधकत्वमापतेदित्याशङ्कते—

नन्वेवं युगपदर्थद्वययोगित्वं वाक्यस्य स्यात् ।

न चेयमापत्तिरिष्टैव शक्यते कर्तुमित्याह—

तद्भावे च तस्य वाक्यतैव विघटते ।

तद्भावे युगपदर्थद्वयवाचकत्वे । तस्य वाक्यस्य ।

तद्विघटनहेतुमाख्याति—

तस्या ऐकार्थ्यलक्षणत्वात् ।

तस्या वाक्यतायाः । ऐकार्थ्यं पदार्थानां मिथः समन्वयेन दण्डायमानैकार्थबोधकत्वम् । एतत्सम्पादनार्थमेव—'दुर्गालङ्घितविग्रहः' इत्यादिशब्दशक्त्युद्भवध्वनिस्थलेषूपमाध्वनिरङ्गीक्रियते ।

युगपत्प्रतिभासमानयोरर्थयोरन्वयाभावेन नैकरूपतेति कुतस्तदुपस्थापकस्य वाक्यत्वमिति तात्पर्यम् ।

तामापत्तिं परिहरति—

नैष दोषः—गुणप्रधानभावेन तयोरवस्थानात् ।

तथा च तयोर्मिथो नानन्वय इति नोक्तदोष इति भावः ।

उपपादयति—

व्यङ्ग्यस्य हि क्वचित् प्राधान्यं वाच्यस्योपसर्जनीभावः । क्वचिद्वाच्यस्य प्राधान्यमपरस्य च गुणीभावः । तत्र व्यङ्ग्यप्राधान्ये ध्वनिरित्युक्तमेव । वाच्यप्राधान्ये तु प्रकारान्तरं निर्देक्ष्यते ।

अपरस्य व्यङ्ग्यस्य। प्रकारान्तरं काव्यप्रभेदान्तरं गुणीभूतव्यङ्ग्याख्यम्। निर्देक्ष्यतेऽस्मिन्नेवोद्द्योते वक्ष्यते मयेति शेषः।

उपसंहरति—

तस्मात् स्थितमेतत्—व्यङ्ग्यपरत्वेऽपि काव्यस्य, न व्यङ्ग्यस्याभिधेयत्वम्, अपि तु व्यङ्ग्यत्वमेव।

पुनरन्यथाऽपि तात्पर्यशक्तिबोध्यत्वेन वाच्यत्वं व्यङ्ग्यस्य निराकरोति—

किञ्च व्यङ्ग्यस्य प्राधान्येनाविवक्षायां वाच्यत्वं तावद् भवद्भिर्नाभ्युपगन्तव्यम्, अतत्परत्वाच्छब्दस्य।

भवद्भिस्तात्पर्यपक्षपातिभिः। अतत्परत्वात्तदर्थबोधनेच्छयाऽनुच्चारितत्वात्। प्राधान्येन विवक्षित एवार्थः शब्दस्य तात्पर्यविषयो यस्तमेव तात्पर्यवृत्तिर्भवदभिमता बोधयितुमलम्। अत्र तु व्यङ्ग्यस्य तथात्वाभावात् कथं वाच्यत्वं स्यादिति भावः। अभिधैव तात्पर्यसाहाय्येन बोधं जनयतीति तन्मतम्, अतो वाच्यत्वमेव तैराशङ्कितम्, खण्डितं च तदेव सिद्धान्तिभिरिति विभावनीयम्।

व्यङ्ग्यस्य प्राधान्येन विवक्षितत्वेऽपि वाच्यत्वाभावं निगमनमुखेनास्थापयति—

तदस्ति तावद् व्यङ्ग्यः शब्दानां कश्चिद् विषय इति यत्रापि तस्य प्राधान्यम्, तत्रापि किमिति तस्य स्वरूपमपह्नूयते।

विषयो बोध्यः। इतिर्हेतौ। अपह्नूयतेऽपलप्यते।

प्राधान्येनाविवक्षायां व्यङ्ग्यसद्भावः स्वीकृत इति तदर्थं व्यञ्जनाभारो यदि भवता वोढव्य एव, तर्हि प्राधान्येन विवक्षायां स कथं नोह्यत इत्याशयः।

उपसंहरति--

एवं तावद् वाचकत्वादन्यदेव व्यञ्जकत्वम्।

एवं विषयभेदात् स्वरूपभेदाच्च। तावच्छब्दस्तद्धेत्वन्तरकथनावशेषं सूचयति।

तमेव हेत्वन्तरं दर्शयति--

इतश्च वाचकत्वाद् व्यञ्जकत्वस्यान्यत्वं, यद् वाचकत्वं शब्दैकाश्रयमितरत्तु शब्दाश्रयमर्थाश्रयं च, शब्दार्थयोर्द्वयोरपि व्यञ्जकत्वस्य प्रतिपादनात्।

इत उच्यमानाद्धेतोः। चकारोऽप्यर्थकः, प्रागुक्तहेतुसङ्ग्राहकः। अन्यत्वं भेदः। शब्दैकाश्रयं शब्दमात्रवृत्ति। इतरद्व्यञ्जकत्वम्। तुशब्दोऽभिधां व्यवच्छिनत्ति। अत्रान्येऽपि भेदहेतवो ग्राह्याः।

अभिधा हि शब्दमात्रे तिष्ठति, व्यञ्जना तु वर्ण-पद-तदेकदेश-वाक्य-सङ्घटना-प्रबन्ध-वाच्य-लक्ष्य-व्यङ्ग्यार्थ-चेष्टाप्रभृतिष्वपीति प्राङ्नैकधा प्रतिपादितमेव । अत आश्रयभेदादपि तयोर्भेदः सुस्थितः ।

इत्थं विषयस्वरूपाश्रयभेदतोऽभिधारूपप्रधानवृत्तेर्व्यञ्जनाया भेदं व्यवस्थाप्य परनये लक्षणाशब्देनैव व्यवह्रियमाणाया गुणवृत्तेरपि भेदं दर्शयति—

गुणवृत्तिस्तूपचारेण लक्षणया चोभयाश्रयाऽपि भवति । किन्तु ततोऽपि व्यञ्जकत्वं स्वरूपतो विषयतश्च भिद्यते ।

लक्षणा हि शुद्धा गौणी चेति द्विविधा । तत्र शुद्धाया इह लक्षणाशब्देन व्यवहारः, गौण्यास्तूपचारशब्देन, तदुभयोस्त्वप्रधानवृत्तित्वाद् गुणवृत्तिशब्देन । सा चार्थे साक्षात्, शब्दे तु परम्परयाऽऽरोपिता तिष्ठति । तदुक्तम्, लक्षणानिरूपणे प्रदीपकृच्चरणैः—'शक्यव्यवहितलक्ष्यार्थविषयत्वाच्छब्द आरोपित एव स व्यापारः । वस्तुतोऽर्थनिष्ठ एव' इति ।

एवं शब्दार्थोभयवृत्तित्वेन साम्याद् गुणवृत्तिव्यञ्जनयोरैक्यं नाशङ्कनीयम्, पूर्ववत्तयोरपि स्वरूपविषययोर्भेदादिति बोध्यम् ।

तत्र स्वरूपभेदं प्राग् दर्शयति—

रूपभेदस्तावदयम्—यदमुख्यतया व्यापारो गुणवृत्तिः प्रसिद्धा, व्यञ्जकत्वं तु मुख्यतयैव शब्दव्यापारः । न ह्यर्थाद् व्यङ्ग्यत्रयप्रतीतिर्या, तस्या अमुख्यत्वं मनागपि लक्ष्यते ।

मुख्यताऽस्खलद्गतिकता । अमुख्यता च तदभावः । व्यङ्ग्यत्रयं वस्त्वलङ्काररसादिरूपम् । लक्षणा हि बाधसध्रीचीना वाच्यार्थे बाधिते तत्सम्बन्धिनोऽर्थान्तरस्य बोधिकेत्यमुख्यस्तद्बोध्योऽर्थः, व्यञ्जना न तादृगिति प्रत्येयोऽर्थस्तु मुख्य एवेति तयोः स्वरूपभेदः स्फुट इति भावः ।

पुनरन्यथा स्वरूपभेदमाह—

अयं चान्यः स्वरूपभेदः—यद् गुणवृत्तिरमुख्यत्वेन व्यवस्थितं वाचकत्वमेवोच्यते । व्यञ्जकत्वं तु वाचकत्वादत्यन्तं विभिन्नमेव । एतच्च प्रतिपादितम् ।

प्रतिपादितं वाच्यव्यङ्ग्ययोर्वैलक्षण्यप्रदर्शनप्रसङ्गेन प्रथमोद्द्योते ।

अयमभिसन्धिः—'सर्वे सर्वार्थवाचकाः' इति सिद्धान्तमनुसरन्तोऽप्रसिद्धश-

किनाम्नाऽभिधैव व्यवहितार्थबोधकत्वे लक्षणाभूमिकामभ्युपैतीति ये मन्यन्ते, तन्मते लक्षणाया अभिधाविशेषरूपत्वाद् व्यञ्जनायाश्च ततोऽतितरां भिन्नत्वाच्च तादात्म्यम्। न चाभिधाव्यञ्जनयोर्भेद एव सन्देग्धव्यम्, पूर्वमेव बोध्यार्थभेदेन तद्भेदस्यापि व्यवस्थापितत्वात्।

पुनरपरथा स्वरूपभेदमाह—

अयं चापरो रूपभेदः—यद् गुणवृत्तौ पदार्थोऽर्थान्तरमुपलक्षयति, तदोपलक्षणीयार्थात्मना परिणत एवासौ सम्पद्यते। यथा—'गङ्गायां घोषः' इत्यादौ। व्यञ्जकत्वमार्गे तु—यदाऽर्थोऽर्थान्तरं द्योतयति, तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्। यथा—'लीलाकमलपत्त्राणि गणयामास पार्वती।' इत्यादौ।

'गङ्गायां घोषः' इत्यादौ प्रयोजनहेतुकलक्षणलक्षणायां वाच्यं नीरं लक्ष्यतीरान्वयसिद्धये 'परार्थे स्वसमर्पणम्' इत्युक्तेः स्वरूपं लक्ष्यात्मकमेव दर्शयतीति तद्रूपतया तस्य परिणतिः। 'लीलाकमलपत्राणि' इत्यादावार्थव्यञ्जनायान्तु मुखनमनादिवाच्यं प्रथमं प्रतीतिपथमवतीर्णमेव दीप इव घटादिं व्रीडाऽऽदिं व्यनक्तीति वाच्याप्रकाशप्रकाशावपि तद्भेदकौ स्त इति सारम्।

अस्खलद्गतिकत्वेऽपि लक्षणाऽङ्गीकारे दोषं दर्शयति—

यदि च यत्रातिरस्कृतस्वप्रतीतिरर्थोऽर्थान्तरं लक्षयति, तत्र लक्षणाव्यवहारः क्रियते, तदेवंसति लक्षणैव मुख्यः शब्दव्यापार इति प्राप्तम्। यस्मात् प्रायेणैव वाक्यानां वाच्यव्यतिरिक्ततात्पर्यविषयार्थावभासित्वम्।

अतिरस्कृताऽबाधिता स्वरूपस्य प्रतीतिर्यस्य तादृशोऽर्थो मुखनमनादिरूपो यत्र 'एवं वादिनि' इत्यादौ, अर्थान्तरं व्रीडाऽऽदिव्यङ्ग्यं लक्षयति प्रतिपादयति, तत्रापि यदि लक्षणाव्यवहारः क्रियते लक्षणैव मन्यते, न तु व्यञ्जना, तदेवमेवं तर्हि, शब्दानां लक्षणैव मुख्यो व्यापारो वृत्तिरिति प्राप्तमापन्नं भवति। यस्मात् प्रायेण बाहुल्येन वाक्यानां वाच्यव्यतिरिक्तस्य तात्पर्यविषयस्यार्थस्यावभासित्वं बोधकत्वं भवतीत्यर्थः।

मुख्यार्थबाधस्तत्सम्बन्धो रूढिप्रयोजनान्यतरच्च लक्षणाबीजम्। तत्र बाधाद्यभावेऽपि लक्षणाऽङ्गीकारे, तस्या एव मुख्यवृत्तित्वमापद्येत, सर्वाभिमतं गुणवृत्तित्वं च भज्येत, तादृशलक्षणयैव सर्वत्र व्यवहर्तुं शक्यत्वात्। तस्माल्लक्षणाया

अमुख्यवृत्तित्वं वदता भवताऽकामेनापि वाच्यबाधाभावेऽस्वीकारो विधेय एवेति तात्पर्यम् ।

पूर्वपक्षी शङ्कितः पृच्छति—

ननु त्वत्पक्षेऽपि यदाऽर्थो व्यङ्ग्यत्रयं प्रकाशयति, तदा शब्दस्य कीदृशो व्यापारः ? ।

व्यञ्जनावादिमतेऽप्यर्थस्य व्यञ्जकतायां शब्दस्य मुख्योऽमुख्यो वा व्यापारः स्वीक्रियते ? मुख्यश्चेदभिधैव सः, अमुख्यश्चेद् गुणवृत्तिरेव, अप्रधानवृत्तित्वादिति प्रष्टुरभिप्रायः ।

उत्तरमाचष्टे—

उच्यते—प्रकरणाद्यवच्छिन्नशब्दवशेनैवार्थस्य तथाविधं व्यञ्जकत्वमिति शब्दस्य तत्रोपयोगः कथमपह्नूयते ।

'शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे त-दन्यस्य सहकारिता ॥' इत्युक्तेरर्थव्यञ्जकत्वेऽपि शब्दस्य सहकारित्वेन व्यङ्ग्यार्थबोधनानुकूलो मुख्य एव व्यापारोऽस्ति । न च मुख्यत्वेऽभिधात्वं तस्य शङ्कनीयम्, अभिधायाः सङ्केतग्रहादिसापेक्षत्वात् । तस्यास्तु प्रकरणादिवैशिष्ट्यापेक्षणात् सामग्रीवैधर्म्यादित्युत्तरयितुराशयः ।

इत्थं व्यञ्जनाया बाधापुरस्कृतत्वात् सङ्केतानपेक्षणात् पृथग्भूतार्थप्रत्यायकत्वाच्च, तद्विरुद्धधर्मवल्लक्षणातः क्रमेण स्वरूपभेदं प्रतिपाद्य विषयभेदं भेदनियामकं प्रतिपादयति—

विषयभेदोऽपि गुणवृत्तिव्यञ्जकत्वयोः स्पष्ट एव । यतो व्यञ्जकत्वस्य रसादयोऽलङ्कारविशेषा व्यङ्ग्यस्वरूपावच्छिन्नं वस्तु चेति त्रयं विषयः । अस्खलद्गतित्वं समयानुपयोगित्वं पृथगवभासित्वं चेति त्रयम् ।

व्यङ्ग्यस्वरूपावच्छिन्नं व्यङ्ग्यत्वेन विच्छित्तिविशेषविधायि । वस्तुनो विशेषणमिदं लक्षणाबोध्यं साधारणं वस्तु व्यवच्छिनत्ति । इति त्रयं विषयो न तु केवलं वस्तु, तावन्मात्रस्य लक्षणयाऽपि बोध्यत्वात् । समयः सङ्केतः । पृथगवभासित्वं वाच्यभेदेन प्रतीयमानता ।

अस्खलद्गतिकत्वादिधर्मत्रयं व्यञ्जनाजन्यबोधविषय एव, लक्ष्ये तु विषये तत्त्रि-

तयविरुद्धधर्मवत्त्वम् । 'गङ्गायां घोषः' इत्यादौ तीरबोधे नीरान्वयबाधापेक्षणादभिधाग्रहसापेक्षत्वान्नीरस्य तीररूपेणैव प्रतीयमानत्वाच्च । किञ्च लक्ष्यो न रसादित्रयान्यतमरूप इति लक्षणाव्यञ्जनयोर्विषयभेदः स्फुट एवेति सङ्गतिः ।

तत्र प्रथमं लक्ष्यस्य रसादिरूपत्वाभावं दर्शयति—

तत्र रसादिप्रतीतिर्गुणवृत्तिरिति न केनचिदुच्यते, न च शक्यते वक्तुम्।

गुणवृत्तिपदं गुणवृत्तिप्रयोज्यप्रतीतिपरम्, तद्वृत्तिमात्रपरत्वे तादात्म्यशङ्काया एवानुत्थानात् । सामग्रीभेदश्च घटपटयोरिव तत्प्रतीत्योर्भेदको बोध्यः । न हि लक्ष्यप्रतीतिस्थले व्यङ्ग्यप्रतीतिसामग्रीसंवलनम् ।

लक्ष्यस्य व्यङ्ग्यालङ्काररूपत्वाभावं च प्रथयति—

व्यङ्ग्यालङ्कारप्रतीतिरपि ।

कारणभेदादेव लक्षणाजन्यप्रतीतिरिति न शक्यते वक्तुमिति शेषः ।

तस्यैव व्यङ्ग्यवस्तुरूपत्वाभावमपि प्रतिपादयति—

तथैव वस्तुचारुत्वप्रतीतये स्वशब्दानभिधेयत्वेन यत् प्रतिपादयितुमिष्यते, तद् व्यङ्ग्यम् । तच्च सर्वं न गुणवृत्तेर्विषयः ।

यदा वस्तु चारुत्वातिशयेन बोधयितुमिष्यते, तदाऽभिधामतिक्रम्य व्यञ्जनापथारूढं तद् विधीयते । यच्चारुतमं वस्तु, तत् सर्वं लक्षणया बोधयितुं न शक्यते, तस्माद् व्यङ्ग्यवस्तुनोऽपि लक्ष्यवस्तुनो भेदः । न सर्वमित्यनेन यत्किञ्चिद्वस्तुनो लक्षणाबोध्यत्वमनुमन्यते । तथा चात्यन्ततिरस्कृतवाच्यध्वनौ 'निश्श्वासान्ध इवादर्शः' इत्यादौ मालिन्याद्यर्थो लक्षणयैव प्रत्याय्यते । अत एवोक्तम्—

'कस्यचिद्ध्वनिभेदस्य सा तु स्यादुपलक्षणम्' इति ।

तदेव साधयति—

प्रसिद्ध्यनुरोधाभ्यामपि गौणानां शब्दानां प्रयोगदर्शनात् । तथोक्तं प्राक् ।

प्रसिद्धी रूढिः । अनुरोधः प्रयोजनापेक्षा । हेतौ तृतीया । प्राक् प्रथमोद्द्योते—'रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।' इत्यादिनोक्तम् ।

'लावण्यम्' 'वदति विसिनीपत्रशयनम्' इत्यादिरूढिहेतुकलक्षणास्थले व्यङ्ग्यावभासाभावादेव न व्यञ्जनाप्रवेशः । प्रयोजनवल्लक्षणास्थलेऽपि व्यङ्ग्यस्य नैव लक्षणाबोध्यत्वमिति कुतो लक्षणाव्यञ्जनयोरैक्यमित्याशयः ।

यद्यपि 'निश्श्वासान्ध इवादर्शः' इत्यादौ प्रयोजनवल्लक्षणास्थले यन्मालिन्यं

प्रतीयते, तच्च न व्यङ्ग्यं न वा तादृक् चारु, यच्च तदतिशयरूपं व्यङ्ग्यं चारुतरं च, तन्न लक्षणया बोधयितुं क्षमम्, तथाऽपि—'यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।' इत्याद्युक्तेस्तदतिशयं व्यञ्जनाद्वारा बोधयितुमेव प्रयोजनवल्लक्षणायाः प्रवृत्तेर्लक्षणाविषयत्वं तादृशवस्तुनोऽपि कल्प्यते, तेनैतावताऽपि लक्षणाव्यञ्जनयोर्वास्तविको विषयभेदः सुस्थिर एवेति सर्वमभिप्रेत्याह—

यदपि च विषयः तदपि च व्यञ्जकत्वानुप्रवेशेन।

यत्तदिति सामान्ये नपुंसकम्। व्यञ्जकत्वानुप्रवेशेन व्यञ्जनाऽनुसरणेन।

फलितमाचष्टे—

तस्माद् गुणवृत्तेरपि व्यञ्जकत्वस्यात्यन्तविलक्षणत्वम्।

तस्मादुक्तरूपभेदादिहेतोः। गुणवृत्तेरिति पञ्चमी बुद्धिकृतापादानत्वविवक्षायाम्।

अथाभिधालक्षणाभ्यां भिन्नत्वं व्यञ्जनायास्तदुभयमूलकत्वेन दर्शयति—

वाचकत्व-गुणवृत्तिविलक्षणस्यापि च तस्य, तदुभयाश्रयत्वेन व्यवस्थानम्।

तस्य व्यञ्जकत्वस्य। प्रागुक्तभेदहेतुसमुच्चयार्थकश्चकारोऽपिशब्दश्च व्यवस्थानमित्यनन्तरं योज्यौ। तदुभयमभिधालक्षणे।

तेनाभिधालक्षणाभिन्नस्य तदुभयमूलत्वेन व्यवस्थानमपि च भेदं सूचयतीत्यन्वयः। व्यञ्जनाया अभिधा-लक्षणामूलत्वं विभज्य दर्शयति—

व्यञ्जकत्वं हि क्वचिद् वाचकत्वाश्रयेण व्यवतिष्ठते, यथा-विवक्षितान्यपरवाच्ये ध्वनौ। क्वचित्तु गुणवृत्त्याश्रयेण, यथा-अविवक्षितवाच्ये ध्वनौ।

आश्रयणमाश्रयः। विवक्षितान्यपरवाच्ये 'एवं वादिनि' इत्यादौ। अविवक्षितवाच्ये 'निश्श्वासान्धः' इत्यादौ।

पूर्वग्रन्थसङ्गतिं दर्शयन् समर्थयति—

तदुभयाश्रयत्वप्रतिपादनायैव च ध्वनेः प्रथमतरं द्वौ प्रभेदावुपन्यस्तौ।

प्रथमतरं प्रथमोद्द्योते—'स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति' इत्यनेन।

पुनर्व्यञ्जनाया अभिधालक्षणातो वैलक्षण्यमनेकाभिर्भङ्गिभिर्व्यवस्थापयति—

तदुभयाश्रयत्वाच्च तदेकरूपत्वं तस्य न शक्यते वक्तुम्। यस्मान्न

तद्वाचकत्वरूपमेव, क्वचिल्लक्षणाऽऽश्रयेण वृत्तेः। न च लक्षणैकरूपमेव, अन्यत्र वाचकत्वाश्रयेण व्यवस्थानात्। न चोभयधर्मत्वेनैव तदेकैकरूपं न भवति, यावद् वाचकत्वलक्षणादिरूपरहितशब्दधर्मत्वेनापि। तथा हि—गीतध्वनीनामपि व्यञ्जकत्वमस्ति रसादिविषयम्। न च तेषां वाचकत्वं लक्षणा वा कथंचिल्लक्ष्यते। शब्दादन्यत्रापि च विषये व्यञ्जकत्वस्यापि दर्शनाद् वाचकत्वादिशब्दधर्मप्रकारत्वमयुक्तं वक्तुम्।

तस्य वाचकत्वस्य। वृत्तेर्वर्तमानत्वात्। यावत् किन्तु। वाचकत्वलक्षणादिभी रहितो योऽवाचकः शब्दो गीतादिध्वनिस्तद्धर्मत्वेन तद्वृत्तित्वेन। शब्दादन्यत्रापि विषये चेष्टाऽऽदावपि। वाचकत्वादयो ये शब्दस्य धर्मा व्यापारास्तत्प्रकारत्वं तद्विशेषत्वम्। व्यञ्जना यतोऽभिधालक्षणोभयमाश्रयति, तस्मात्तदेकरूपा न भवति। तदुभयरूपत्वं च तादृशातिप्रसक्तवृत्तेरप्रसिद्धत्वादेव न सम्भवति। अपि च व्यञ्जना नाभिधारूपैव, लक्षणामूलत्वे तस्यास्ततो व्यभिचरणात्। न वा लक्षणाऽऽत्मिकैव, अभिधामूलत्वे ततोऽपि व्यभिचरितत्वात्। न च तदुभयाश्रयिण्येव, उभे अपि विहायावाचकगीतशब्दादौ वर्तमानत्वात्। नापि च शब्दनिष्ठैव, तद्व्यतिरिक्तेऽपि चेष्टाऽऽदौ सत्त्वात्। इत्थमभिधागुणवृत्तिवैधर्म्यस्य बहुश उपलम्भादभिधागुणवृत्त्यादिशब्दधर्मविशेषत्वमपि व्यञ्जनाया दुर्वचमेवेति सर्वथा भिन्नैव स्वैरिणीयमिति सारम्।

ननु नेयं व्यञ्जनाऽतिरिक्ता, किन्त्वभिधालक्षणयोः प्रसिद्धशब्दधर्मयोरेव नूतनः कश्चन प्रकारः कल्प्यत इति पुनः प्रौढ्या व्याहरन्तं परिहसन् भाषते—

यदि वाचकत्वलक्षणाऽऽदीनां शब्दप्रकाराणां प्रसिद्धप्रकारविलक्षणत्वेऽपिव्यञ्जकत्वंप्रकारत्वेन परिकल्प्यते, तच्छब्दस्यैव प्रकारत्वेन कस्मान्न परिकल्प्यते।

शब्दस्य प्रकाराणां विशेषणानां, धर्माणामिति यावत्। प्रकारत्वेन विशेषत्वेन। तत् तदा। लक्षणायाः शब्दधर्मत्वकथनन्तूक्तप्रदीपादिस्वरसप्रतिकूलमेव।

इयतस्त्वभिधाऽऽदितो व्यञ्जनाया भेदकेषु जाग्रत्स्वपि यद्यनुचिततरमभिधाऽऽदिशब्दधर्मविशेषत्वं कल्प्यत एव, तर्हि शब्दविशेषत्वमेव कुतो न कल्प्यते, अनौचित्यस्योभयत्र तुल्यत्वात्। तस्मान्न व्यञ्जनाया अभिधाऽऽदिरूपता, न वा तद्विशेषता चेत्याकूतम्। इत्थं व्यञ्जनामतिरिक्तत्वेन बलवद् व्यवस्थाप्य तत्सङ्कलनपुर-

स्सरमादावुपक्षिप्तं ध्वनिभेदद्वयमुपसंहरति—

तदेवं शाब्दे व्यवहारे त्रयः प्रकाराः—वाचकत्वं गुणवृत्तिर्व्यञ्जकत्वं च। तत्र व्यञ्जकत्वे यदा व्यङ्ग्यप्राधान्यम्, तदा ध्वनिः, तस्य चाविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्वौ प्रभेदावनुक्रान्तौ प्रथमतरं, तौ सविस्तरं निर्णीतौ।

एवमुक्तप्रकारैः। शाब्दे व्यवहारे शाब्दबोधजनके व्यापारे वृत्ताविति यावत्। अन्यत् स्फुटम्।

यद्यपि व्यञ्जनाया लक्षणामूलत्वस्यापि व्यवस्थापितत्वात् ततोऽपि वैलक्षण्यं निर्णीतमेवेति नाधुना विवेचनीयं किञ्चित्, तथाऽप्यविवक्षितवाच्यध्वनिस्थले तयोरेकीभावमवधारयतामविवेकिनां मतेन शङ्कामुत्थापयति—

अन्यो ब्रूयात्—ननु विवक्षितान्यपरवाच्ये ध्वनौ गुणवृत्तिता नास्तीति यदुच्यते, तद् युक्तम्, यस्माद् वाच्यवाचकप्रतीतिपूर्विका यत्रार्थान्तरप्रतिपत्तिः, तत्र कथं गुणवृत्तिव्यवहारः।

गुणवृत्तिता ध्वनिशब्दस्य काव्यपरत्वे गुणवृत्तिमत्ता, व्यङ्ग्यपरत्वे तु तत्प्रयोज्यबोधविषयत्वरूपा बोध्या। युक्तत्वे हेतुर्यस्मादित्यादिनोपन्यस्तः।

सर्वत्र लक्षणालक्ष्येषु वाच्यार्थस्य बाधितत्वाच्छाब्दबोधविषयत्वं न भवति, विवक्षितान्यपरवाच्यध्वनौ तु पूर्वं वाच्यस्य पश्चाद् व्यङ्ग्यस्य प्रतीतिरिति वाच्यबाधविरहान्न लक्षणया निर्वाह इति सारम्।

एवं विवक्षितान्यपरवाच्ये ध्वनौ व्यञ्जनामभ्युपगत्याविवक्षितवाच्ये गुणवृत्तेर्वृत्तान्तं प्रतिपादयति—

न हि गुणवृत्तौ यदा निमित्तेन केनचिद् विषयान्तरे शब्द आरोप्यतेऽत्यन्ततिरस्कृतस्वार्थः; यथा—'अग्निर्माणवकः' इत्यादौ, यदा वा स्वार्थमंशेनापरित्यजंस्तत्सम्बन्धद्वारेण विषयान्तरमाक्रामति, यथा—'गङ्गायां घोषः' इत्यादौ, तदा विवक्षितवाच्यत्वमुपपद्यते।

नहीत्युपपद्यत इत्यनेनान्वेति। गुणवृत्तौ लक्षणायां यदा जहत्स्वार्थत्वे गौणत्वे च। निमित्तेन सादृश्यातिशयादिना कारणेन। विषयान्तरे वाच्यातिरिक्ते लक्ष्यार्थे। आरोप्यते लक्ष्यबुबोधयिषयोच्चार्यते। अग्निमाणवकयोर्भेदेऽपि सामानाधिकरण्यनिर्देशादग्निशब्दः शक्यान्वयानुपपत्तेरत्यन्ततिरस्कृतवाच्यः सादृश्यसम्बन्धेन तेज-

स्विनं लक्षयति, तत्ताऽतिशयरूपं च प्रयोजनं लक्षणामूलव्यञ्जनागम्यम् । यदाऽजहत्स्वार्थत्वे शुद्धत्वे च । स्वार्थमंशेनैकदेशेनापरित्यजन् शब्दः, तत्सम्बन्धद्वारेण वाच्यसम्बन्धमुखेनार्थान्तरं वाच्यसम्बन्धिनं लक्ष्यमाक्रामत्यर्थान्तरसङ्क्रमितवाच्यो भवति । 'गङ्गायां घोषः' इत्यादौ गङ्गाशब्दो बाधितवाच्यो नीरं वाच्यं मुख्यत्वेन विजहत् तीरविशेषणत्वेनोपाददच्च नीरसन्निहिततीरं लक्षयति । घोषे गङ्गागतशैत्याद्यतिशयश्च व्यङ्ग्यः । तदा विवक्षितवाच्यत्वं न ह्युपपद्यते, एकत्र वाच्यस्य सर्वथाऽविवक्षणात्, अपरत्र प्राधान्येनापरामर्शनात् ।

वस्तुतस्त्वर्थान्तरसङ्क्रमितवाच्यत्वे 'गङ्गायां घोषः' इति नोदाहरणीयम्, तीरस्य नीरसम्बन्धेन बोधस्यासर्वसम्मतत्वात् । किन्तु 'कुन्ताः प्रविशन्ति' इत्याद्येवोदाहरणीयम् । तेन नैव पूर्वापरग्रन्थसङ्गतिभङ्ग इति विभावनीयम् ।

उक्तमेव समर्थयति—

अत एव च विवक्षितान्यपरवाच्ये ध्वनौ वाच्यवाचकयोर्द्वयोरपि स्वरूपप्रतीतिरर्थावगमनं च दृश्यत इति व्यञ्जकत्वव्यवहारो युक्त्यनुरोधी ।

अत एव—विवक्षितान्यपरवाच्यध्वनेर्गुणवृत्त्यनुपकृतत्वे सति व्यञ्जनागम्यत्वादेव । अविवक्षितवाच्यध्वनिभेदद्वयस्य गुणवृत्तिबोध्यत्वमेवेति विवक्षितान्यपरवाच्यध्वनेर्व्यञ्जनागम्यत्वाभ्युपगमेन समर्थितम् । स्वरूपप्रतीतिः पद-तद्वाच्यज्ञानम् । अर्थावगमो व्यङ्ग्यार्थप्रतीतिः ।

तत्र लोकप्रसिद्धां युक्तिं दर्शयति—

स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते ।

यथा—दीपादिः ।

आंशिकं व्यञ्जनाऽभ्युपगमं स्फुटमाह—

तथाविधे विषये वाचकत्वस्यैव व्यञ्जकत्वमिति गुणवृत्तिव्यवहारे नियमेनैव न शक्यते वक्तुम् ।

अपि तु तत्र व्यञ्जकताऽतिरिक्तैव कल्पनीया भवतीति भावः ।

एवमभिधामूलध्वनौ व्यञ्जनां स्वीकृत्य लक्षणामूलाविवक्षितवाच्यध्वनेरुक्तभेदद्वये तामस्वीकुर्वन्नाक्षिपति—

अविवक्षितवाच्यस्तु ध्वनिर्गुणवृत्तेः कथं भिद्यते, तस्य प्रभेदद्वये गुणवृत्तिप्रभेदद्वयरूपता लक्ष्यत एव ।

तुना विवक्षितान्यपरवाच्यादस्य व्यतिरेकः सूच्यते । गुणवृत्तिपदं तद्बोध्यपरम् । यद्वा कथं भिद्यत इत्येव कथमसम्बन्ध इत्येतदर्थकम् । भिद्यत इति कर्मकर्तरि प्रयोगः । विवक्षितान्यपरवाच्यध्वनौ वाच्यव्यङ्ग्ययोर्व्यक्तं पृथगवभासो भवतीति तत्र गुणवृत्तिर्लेशतोऽपि प्रवेशमनश्नुवाना व्यञ्जनां मा निरौत्सीत्, किन्त्वविवक्षितवाच्यध्वनेरत्यन्ततिरस्कृतवाच्यार्थान्तरसङ्क्रमितवाच्यात्मके प्रकारयुगुले, गुणवृत्तेरुदाहृतभेदद्वयान्न किमपि वैलक्षण्यम्, वाच्यव्यङ्ग्ययोः पृथगनवभासादिति कुतस्तत्र गुणवृत्तेरतिरिक्ता व्यञ्जना कल्प्येतेत्याक्षेप्तुरभिसन्धिः ।

खण्डयति—

यतोऽयमपि न दोषः ।

अनन्तरवक्ष्यमाणहेतोरिति शेषः । यत इति नातिप्रयोजनकं प्रतिभाति ।

तमेव हेतुमभिदधाति—

यस्मादविवक्षितवाच्यो ध्वनिर्गुणवृत्तिमार्गाश्रयोऽपि भवति, न तु गुणवृत्तिरूप एव ।

ध्वनिपदमिह व्यापारपरम् । गुणवृत्तेर्मार्ग उक्तप्रकारद्वयमाश्रयो मूलं यस्येति बहुव्रीहिरप्यत एव सङ्गच्छते ।

तस्माद् गुणवृत्तिव्यञ्जकत्वयोस्तत्र नैक्यम्, यस्मादविवक्षितवाच्यध्वनौ यो व्यञ्जनाव्यापारः, स लक्षणामूलोऽपि लक्षणारूपो न वक्तुं शक्यत इति सारम् ।

तत्र हेतुमाचष्टे—

गुणवृत्तिर्हि व्यञ्जकत्वशून्याऽपि दृश्यते ।

'कलिङ्गः साहसिकः' इत्यादौ रूढिहेतुकलक्षणाया व्यञ्जनासाहचर्यस्याप्यनियतत्वात् कथमैक्यसम्भावनेति भावः ।

कुतो न तत्र व्यञ्जनेति शङ्कायामाह—

व्यञ्जकत्वं च यथोक्तचारुत्वहेतुं व्यङ्ग्यं विना न व्यवतिष्ठते ।

यतो व्यङ्ग्यबोधनार्थमेव व्यञ्जनाऽवस्थितिः, ततोऽव्यङ्ग्यलक्षणायां तस्याः कथं व्यवस्थेति सारम् ।

पुनरपि गुणवृत्तेर्व्यञ्जनायाश्चैक्यं निराकर्तुं वैलक्षण्यं प्रतिपादयन् प्रथममभेदोपचारशब्दव्यवहार्यगौणलक्षणायाः सप्रयोजनाया उदाहरणे दर्शयति—

गुणवृत्तिस्तु वाच्यधर्माश्रयेणैव व्यङ्ग्यमात्राश्रयेण चाभेदोपचाररूपा

संभवति। यथा—तीक्ष्णत्वाद् 'अग्निर्माणवकः' आह्लादकत्वात् 'चन्द्र एवास्या मुखम्' इत्यादौ।

अभेदोपचारः सादृश्यातिशयव्यञ्जकतादात्म्यारोप एव रूपं यस्याः सा गौणलक्षणा, वाच्यविषयकबोधजनको यो धर्मः शब्दव्यापारोऽभिधालक्षणः, तदाश्रयेण रूढिहेतुका, व्यङ्ग्यमात्रस्य केवलप्रयोजनस्याश्रयेण प्रयोजनवती चेति द्विविधा सम्भवतीत्यर्थः। तत्र प्रयोजनवद्गौणलक्षणोदाहरणयोः पूर्वत्र सादृश्यं तेजस्वित्वरूपेण तीक्ष्णत्वेन, परत्र चानन्दजनकत्वेन। तदतिशयश्चोभयत्र व्यञ्जनामात्रगम्यः प्रयोजनम्। इयमेव सारोपा लक्षणा रूपकालङ्कारस्य बीजम्।

तामेव रूढिमूलिकामुदाहरति—

यथा च—'प्रिये जने नास्ति पुनरुक्तम्' इत्यादौ।

द्वितीयोद्द्योतोदाहृतप्राकृतपद्यच्छायाऽन्तिमांशोऽयम्। आदिशब्देन 'वदति बिसिनीपत्रशयनम्' 'लावण्यम्' इत्यादीनां सङ्ग्रहः। एषु प्रयोजनाभावाद् रूढिरेव हेतुतामासादयतीति प्रागुक्तमेव।

वस्तुतस्त्वत्र सादृश्यप्रत्ययाभावान्न गौणत्वमिति रूढिहेतुकगौणलक्षणायाः 'तैलानि हेमन्ते सुखानि' इत्याद्युदाहरणमेवान्यत्र दर्शितमवसेयम्।

अथात्र लक्षणाशब्दव्यवहार्यां शुद्धलक्षणां रूढिमूलामुदाहर्तुमाख्याति—

याऽपि लक्षणारूपा गुणवृत्तिः, साऽप्युपलक्षणीयार्थसम्बन्धमात्राश्रयेण चारुरूपव्यङ्ग्यप्रतीतिं विनाऽपि सम्भवत्येव।

न तु न सम्भवतीति शेषः। उपलक्षणीयो लक्ष्यरूपोऽर्थः। चारुरूपस्य चमत्कारभूमेर्व्यङ्ग्यस्य प्रतीतिं विनाऽपि तद्रूपप्रयोजनाभावेऽपि, केवलरूढ्याऽपीति यावत्। अयमपिशब्दः क्वचित् प्रयोजनवतीमपि तां समुच्चिनोति।

उदाहरति—

यथा 'मञ्चाः क्रोशन्ति' इत्यादौ विषये।

अत्र क्रोशनकर्तृत्वस्याचेतनेषु मञ्चेषु बाधान्मञ्चपदस्य स्वार्थसंसक्तेषु पुरुषेषु लक्षणा। सा च प्रयोजनविरहाद् रूढिमूलैव। न हि तत्र किञ्चिदपि चमत्कारि प्रतीयते अतो न तत्र व्यञ्जनाप्रवेशः। आदिशब्दः 'ग्रामः पलायितः' 'कलिङ्गः साहसिकः' इत्यादीन् सङ्गृह्णाति।

ननु यत्र तु तस्यां प्रयोजननिबन्धनायां चमत्कारिव्यङ्ग्यप्रतीतिरस्त्येव, तत्र

का गतिरित्याशङ्कायामाह—

यत्र तु सा चारुरूपव्यङ्ग्यप्रतीतिहेतुः, तत्रापि व्यञ्जकत्वानुप्रवेशेनैव, वाचकत्ववत् । असम्भविना चार्थेन यत्र व्यवहारो यथा—'सुवर्णपुष्पां पृथिवीम्' इत्यादौ, तत्र चारुरूपव्यङ्ग्यप्रतीतिरेव प्रयोजिकेति तथाविधेऽपि विषये गुणवृत्तौ सत्यामपि ध्वनिव्यवहार एव युक्त्यनुरोधी ।

यत्र सप्रयोजनकशुद्धलक्षणास्थले । सा लक्षणा । हेतुः प्रयोजिका । व्यञ्जकत्वानुप्रवेशेनैव व्यञ्जनाबलेनैव, न तु स्वतः । वाचकत्ववदभिधावत्, तथा हि—यथा—'गतोऽस्तमर्कः' इत्यादावभिधास्थलेऽभिसरणकालादिव्यङ्ग्यार्थप्रतीतिर्व्यञ्जनाधीनैव, न त्वभिधाजन्येति सर्वसम्मतम्, तद्वल्लक्षणास्थलेऽपि व्यञ्जनाजन्यैवेति बोध्यम् । असम्भविना बाधितेन । व्यवहारश्शब्दप्रयोगरूपः । पृथिव्यवधिकसुवर्णपुष्पकर्मकचयनस्याप्रसिद्धत्वाल्लक्षणायामनायासेन प्रचुरधनोपार्जनरूपचमत्कारिव्यङ्ग्यप्रतीतिर्व्यञ्जनयैवेति सैव तच्चमत्कारित्वस्य बीजम् । गुणवृत्तौ लक्षणायां मध्ये सत्यामपि । ध्वनिव्यवहारो व्यञ्जनाव्यवहार एव, न तु लक्षणाव्यवहारः । युक्त्यनुरोधी युक्तः ।

इदमुक्तं भवति—न हि लक्षणाव्यञ्जनयोरैक्यं सम्भवति, यतो रूढौ व्यञ्जनामन्तरेणापि सा दृश्यते । प्रयोजने सह दृश्यमानाऽपि तत्र तत्र लक्षणाहेतुभूतचमत्कारकव्यङ्ग्यप्रतीतेर्व्यञ्जनैव जनिका, न तु सा, अभिधेव वाच्यस्य व्यञ्जकत्वे । तस्मान्न तयोरैक्यम् ।

हेतुं प्रदर्शयन्नुपसंहरति—

तस्मादविवक्षितवाच्ये ध्वनौ द्वयोरपि प्रभेदयोर्व्यञ्जकत्वविशेषाविशिष्टगुणवृत्तिः, न तु तदेकरूपा, सहृदयहृदयाह्लादिप्रतीयमानाप्रतीतिहेतुत्वाद्, विषयान्तरे तद्रूपशून्यायाश्च दर्शनात् ।

द्वयोरर्थान्तरसङ्क्रमितवाच्यात्यन्ततिरस्कृतवाच्ययोः । व्यञ्जकत्वमेव विशेषस्तेनाविशिष्टा—अविद्यमानं विशिष्टं विशेषः प्रभेदो यस्यास्तादृशी, व्यञ्जनाऽऽत्मकप्रकाररहिता । वस्तुतस्तु व्यञ्जकत्वेन विशेषणेनाविष्टा समुपस्कृतेत्यर्थकः, 'व्यञ्जकत्वविशेषणाविष्टा' इति पाठ एव समीचीनः, सुगमार्थत्वात् । तदेकरूपा व्यञ्जनैकात्मिका । सहृदयहृदयाह्लादी यः प्रतीयमानो व्यङ्ग्योऽर्थः, तस्याप्रतीतिहेतुत्वादप्रत्यायकत्वात् । विषयान्तरे रूढिहेतुकजहत्स्वार्थलक्षणास्थले 'राजा कण्टकं शोधयति' इत्यादौ । 'अग्निर्वटुरित्यादौ' इतीह लोचनन्तु तदीयतेजस्वितातिशयव्यङ्ग्यप्रयोजनोपेता-

परमेव । तद्रूपशून्याया व्यञ्जकत्वविधुरायाः । 'सहृदयहृदयाह्लादिनी, प्रतीयमाना । प्रतीतिहेतुत्वात्' इति विच्छिन्नपाठस्तु गुणवृत्तेस्तद्विशेषणद्वययोगासम्भवात्, 'प्रतीतिहेतुत्वात्' इतीयदर्थस्य व्यञ्जनैकरूपत्वाभावहेतुत्वासम्भवाच्चान्यथितः ।

यतो गुणवृत्तिश्चमत्कारिप्रतीतिं न जनयति, यतश्च रूढौ व्यङ्ग्यार्थविरहाद् व्यञ्जनाऽभावाद् व्यञ्जनासाहचर्यमपि गुणवृत्तेर्व्यभिचरितमेव, तस्मात् कुतस्तस्या व्यञ्जनातादात्म्यमिति सारम् ।

तथा चानुमितिः—'अविवक्षितवाच्यध्वनौ गुणवृत्तिर्व्यञ्जनातो भिन्ना,चमत्कारिव्यङ्ग्यप्रतीतिजनकत्वाभावाद्, विवक्षितान्यपरवाच्यध्वनावभिधावत्' इति ।

पौनरुक्त्यं परिहरन्नुपसंहरति—

तदेतत् सर्वं प्राक् सूचितमपि स्फुटतरप्रतीतये पुनरुक्तम् ।

प्राक् प्रथमोद्द्योते सूचितम्, इह पुनः स्फुटतरप्रतीत्यर्थमुक्तमिति स्वरूपनिमित्तभेदान्न पुनरुक्ततेति ज्ञेयम् ।

इत्थं व्यक्तेरविवक्षितवाच्यध्वनावपि गुणवृत्तितो वैलक्षण्यं व्यवस्थाप्य भूयो हेत्वन्तरोपन्यासेनाभिधातोऽपि तद् व्यवस्थापयन् व्यक्तेरौपाधिकत्वं प्रतिपादयति—

अपि च व्यञ्जकत्वलक्षणो यः शब्दार्थयोर्धर्मः, स प्रसिद्धसम्बन्धानुरोधीति न कस्यचिद् विमतिविषयतामर्हति ।

अपि तु सर्वसम्मत एवेदानीमिति सारम् ।

प्रसिद्धसम्बन्धशब्दं विवृण्वन् व्यञ्जनाया औपाधिकतां दर्शयति—

शब्दार्थयोर्हि प्रसिद्धो यः सम्बन्धो वाच्यवाचकभावाख्यः तमनुरुन्धान एव व्यञ्जकत्वलक्षणो व्यापारः सामग्र्यन्तरसम्बन्धादौपाधिकः प्रवर्तते ।

अनुरुन्धान उपजीव्यत्वेनाश्रयन् । सामग्र्यन्तरसम्बन्धात् प्रकरणादिवैशिष्ट्यात् । औपाधिक उपाधिकृतोऽनियत इति यावत् ।

अभिधायास्तु नियतत्वमिति ततो भेदमाह—

अत एव वाचकत्वात् तस्य विशेषः ।

अत एवौपाधिकत्वादेव । वाचकत्वादित्यवधौ पञ्चमी । तस्य व्यञ्जकत्वस्य विशेषो भेदः ।

तदेव समर्थयति—

वाचकत्वं हि शब्दविशेषस्य नियत आत्मा ।

शब्दविशेषस्य वाचकशब्दस्य । नियत आत्मा-आत्मवन्नियतो नैसर्गिक इति यावत् ।

नियतत्वे हेतुमाख्याति—

सम्बन्धव्युत्पत्तिकालादारभ्य तदविनाभावेन तस्य प्रसिद्धत्वात् ।

सम्बन्धस्य शब्दार्थयोर्वाच्यवाचकभावरूपस्य यो व्युत्पत्तिकाल आद्यविशेषज्ञानसमयः, तस्मादारभ्य ततः प्रभृति, तदविनाभावेन वाचकत्वनान्तरीयकतया तस्य शब्दविशेषस्य । 'सम्बन्धी' इति पृथक् पाठो नोचितः, अर्थानन्वयात् ।

वाचकत्वं व्यतिरेचयति—

स त्वनियतः, औपाधिकत्वात् ।

स व्यञ्जकत्वव्यापारः ।

औपाधिकत्वमुपपादयति—

प्रकरणाद्यवच्छेदेन तस्य प्रतीतेः, इतरथा त्वप्रतीतेः ।

तस्य व्यञ्जकत्वस्य । इतरथा प्रकरणादिवैशिष्ट्यविरहेण । कादाचित्कत्वेनौपाधिकत्वमित्याशयः ।

व्यञ्जकत्वस्यानियतत्वेन तुच्छत्वादविवेचनीयतामाशङ्क्य समाधत्ते—

ननु यद्यनियतः, तत् किं तस्य स्वरूपपरीक्षया ? नैष दोषः-यतः शब्दात्मनि तस्यानियतत्वम्, न तु स्वे विषये व्यङ्ग्यलक्षणे ।

शब्दात्मनि शब्दस्वरूपे ।

शब्द एवानियतत्वं व्यञ्जनायाः, स्वप्रतिपाद्यव्यङ्ग्यविषयं प्रति तु नियतत्वमेव, तामन्तरेण व्यङ्ग्यस्य कदाचिदप्यबोधात् ।

अभिधा वाचकशब्देषु नियता, व्यञ्जना तु प्रकरणादिवैशिष्ट्येन शब्देषु, ततोऽन्यत्र च, लक्ष्यमाणा तदभावे चालक्ष्यमाणेत्यनियता, तस्मात्तयोर्भेद उचित एवेति प्रघट्टकाभिप्रायः ।

पुनरन्यथाऽभिधाव्यञ्जनयोर्भेदमुपपादयति—

लिङ्गत्वन्यायश्चास्य व्यञ्जकभावस्य लक्ष्यते । तथा हि लिङ्गत्वमाश्रयेषु (अ) नियतावभासम्, इच्छाऽधीनत्वात्, स्वविषयाव्यभिचारि च,

तथैवेदम्, यथा दर्शितं व्यञ्जकत्वम्। शब्दात्मनि (अ) नियतत्वादेव च तस्य वाचकत्वप्रकारता न शक्या कल्पयितुम्।

लिङ्गत्वन्यायोऽनुमितिहेतुत्वतुल्यता। लिङ्गत्वं हेतुता। आश्रयेषु धूमादिषु। इच्छाऽधीनत्वादनुमित्सा—व्याप्तिसुस्मूर्षासाध्यत्वात्। अनियतावभासमनियतज्ञानं नियमतोऽज्ञायमानमिति यावत्। स्वविषये केवलान्वयित्वादौ। अव्यभिचारि नियतम्। शब्दात्मनि वाचकशब्दे। अनियत्वान्नियमेनावर्त्तनात्। तस्य व्यञ्जकत्वस्य। वाचकत्वप्रकारताऽभिधाविशेषत्वम्।

सन्दर्भसङ्गतये प्रकोष्ठघटकाकारद्वयघटितः पाठः कल्पितः।

यथा केवलान्वयित्वादिधर्मत्रये नियताऽपि धूमादिनिष्ठा साधनताऽनुमित्साऽऽदिसत्त्वे प्रतीयमाना तदभावे त्वप्रतीयमानाऽनियतप्रतीतिः, तथैव व्यञ्जकताऽपि व्यङ्ग्ये नियताऽपि प्रकरणादिवैशिष्ट्यसद्भावे प्रतीयमाना तद्विरहे त्वप्रतीयमानेत्यनियतप्रतीतिरेव व्यञ्जकशब्देषु, अभिधा पुनर्वाचकशब्देषु नियतैव। तस्मादभिधाविशेषो नैव व्यञ्जनेति सारम्।

उक्तानङ्गीकारे दोषमाह—

यदि हि वाचकत्वप्रकारता तस्य भवेत्, तच्छब्दात्मनि नियतताऽपि स्याद्, वाचकत्ववत्।

सर्वेषामेव वाचकशब्दानां वाचकत्वमिव व्यञ्जकत्वमप्यापद्येत, तच्च नेष्टम्, अनुभवविरोधादिति भावः।

अभिधाव्यञ्जनयोर्भेदः सर्वमतसिद्ध इति प्रागभिहितं समर्थयितुमादौ मीमांसकाऽनुमतत्वं स्थापयति—

स च तथाविध औपाधिको धर्मः शब्दानामौत्पत्तिकशब्दार्थसम्बन्धवादिना वाक्यतत्त्वविदा पौरुषेयापौरुषेययोर्वाक्ययोर्विशेषमभिदधता नियमेनाभ्युपगन्तव्यः।

स च व्यञ्जनारूपश्च। औत्पत्तिकं नित्यं शब्दार्थयोः सम्बन्धं शक्तिरूपं वदतीति तच्छीलेन। औत्पत्तिकशब्दस्य नित्ये रूढिमूलिका विपरीता वा लक्षणा। तथा च—'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' इत्यादिजैमिनिसूत्रविवरणे—'औत्पत्तिक'इति नित्यं ब्रूमः। उत्पत्तिर्हि भाव उच्यते लक्षणया। अवियुक्तः शब्दार्थयोर्भावः सम्बन्धो, नोत्पन्नयोः पश्चात् सम्बन्धः' इति शबरस्वामिनः।

—वाक्यतत्त्वविदा वाक्ये शक्तिं मन्वानेन । पुरुषेण कृतं सन्दब्धं पौरुषेयं लौकिकं वाक्यम् । तद्भिन्नमपौरुषेयं वाक्यं वेदलक्षणम् । तयोर्वाक्ययोर्विशेषं वैलक्षण्यमभिदधता कथयता मीमांसकेन ।

तन्मते शब्दानां नित्यत्वेऽपि तत्सङ्घट्टनाविशेषात्मकस्य वाक्यस्यानित्यत्वात् तन्निर्मातृता पुरुषस्य, यथा हि मालाकारस्य पुष्पानुत्पादकत्वेऽपि तत्सन्दर्भरूपस्रङ्निर्मातृतेति विभावनीयम् ।

कथमिति चेत् ?—

तदनभ्युपगमे हि तस्य शब्दार्थसम्बन्धनित्यत्वे सत्यप्यपौरुषेयपौरुषेययोर्वाक्ययोरर्थप्रतिपादने निर्विशेषत्वं स्यात् । तदभ्युपगमे तु पौरुषेयाणां वाक्यानां पुरुषेच्छाऽनुविधानसमारोपितौपाधिकव्यापारान्तराणां सत्यपि स्वाभिधेयसम्बन्धापरित्यागे मिथ्याऽर्थताऽपि भवेत् ।

तदनभ्युपगमे व्यञ्जनाऽनङ्गीकारे । तस्य मीमांसकस्य । शब्दार्थयोः सम्बन्धस्य नित्यत्वे सत्यपि । निर्विशेषत्वमविलक्षणत्वम् । तदभ्युपगमे व्यञ्जनास्वीकारे । पुरुषस्य निर्मातुरिच्छायास्तात्पर्यस्यानुविधानेनानुसरणेन समारोपितमौपाधिकं व्यापारान्तरं तात्पर्यविषयीभूतार्थप्रकाशकं व्यञ्जनालक्षणं शक्त्यन्तरं येषु तानि तथाभूतानि, तेषाम् । स्वाभिधेयसम्बन्धापरित्यागे स्ववाच्यवाचकत्वत्यागाभावे सत्यपि । मिथ्याऽर्थताऽसत्यार्थप्रतिपादकता ।

अयं भावः—मीमांसकनये पौरुषेयापौरुषेयवाक्ययोर्वैलक्षण्यं यन्निर्णीतम्, तन्न तावद् वाच्यार्थबोधकत्वनिबन्धनम्, तद्बोधकताया उभयत्र तुल्यत्वात् । किन्तु तात्पर्यार्थबोधकत्वकृतम्, तथा हि—तात्पर्यं वाक्यनिर्मातृपुरुषस्येच्छा, तद्विषयीभूतार्थप्रतिपादकता पौरुषेये वाक्य एव सम्भवति, न त्वपौरुषेये, पुरुषाणामसर्वज्ञत्वेन च भ्रान्तिमत्त्वेन तदिच्छाविषयीभूतार्थस्य कदाचिन्मिथ्यात्वमिति लौकिकवाक्यानां मिथ्याऽर्थप्रतिपादकताऽपि, वेदवाक्यानां तु निर्मातृपुरुषाभावेन तात्पर्यविषयीभूतार्थाभावादेव न तत्ता, तदेव वाक्यद्वयस्य मिथो वैलक्षण्यम् । सा च निर्मातृपुरुषतात्पर्यविषयार्थप्रकाशकता नाभिधा, तदर्थे सङ्केतविरहात् । न च लक्षणा, मुख्यार्थबाधाद्यभावात् । अपि तु व्यञ्जनैवेत्यकामेनापि तेन व्यक्तिः स्वीकरणीयैव, तदस्वीकरणे तद्वैलक्षण्यानुपपत्तेः ।

ननु न हि वह्नेरुष्णत्वहानं विना शैत्यं कदाचिदपि सम्भवतीति पौरुषेयवा-

क्यानां यथाऽर्थबोधकत्वत्यागमन्तरेण तद्विरुद्धायथाऽर्थतात्पर्यार्थप्रकाशकत्वधर्मयोगः कथं स्यादित्याशङ्कायामभिदधाति—

दृश्यते हि भावानामपरित्यक्तस्वस्वभावानामपि सामग्र्यन्तरसम्पातसम्पादितौपाधिकव्यापारान्तराणां विरुद्धक्रियत्वम्। तथा हि—हिममयूखप्रभृतीनां निर्वापितसकलजीवलोकं शीतलत्वमुद्वहतामेव, प्रियाविरहदहनदह्यमानमानसैर्जनैरालोक्यमानानां सतां, सन्तापकारित्वं प्रसिद्धमेव।

भावानां पदार्थानाम् अपरित्यक्तः स्वस्य स्वभावो नियतधर्मो यैरिति, सामग्र्यन्तरस्यान्यकारणकूटस्य सम्पातेन प्रत्यासत्त्या सम्पादितं निर्वर्तितमौपाधिकमागन्तुकं व्यापारान्तरं धर्मान्तरं यत्रेति च विग्रहद्वयम्। हिममयूखः शीतकिरणश्चन्द्रः। प्रभृतिपदेन नलिनीदलादीनां परिग्रहः। निर्वापितो निर्वृतीकृतः सकलो जीवलोको येन तादृशम्।

न ह्ययं नियमः—यत् स्वधर्मं विहायैव वस्तु तद्विरुद्धं धर्मं लभते, यतः शिशिरत्वमपरित्यज्यैव चन्द्रो विरहिसन्तापकत्वं भजति, उष्णत्वमनुत्सृज्यैव च वह्निः सतीपरीक्षणक्षणे शीतलत्वमाश्रयति। तस्मात् कथं न पौरुषेयवाक्यानां यथाऽर्थस्वार्थबोधकत्वेऽप्ययथाऽर्थ-तात्पर्यार्थप्रकाशकत्वं स्यादित्याशयः।

निगमयति—

तस्मात् पौरुषेयाणां वाक्यानां सत्यपि नैसर्गिकेऽर्थसम्बन्धे, मिथ्याऽर्थत्वं समर्थयितुमिच्छता, वाचकत्वव्यतिरिक्तं किञ्चिद्रूपमौपाधिकं व्यक्तमेवाभिधानीयम्।

मीमांसकेनेति शेषः। अर्थसम्बन्धेऽभिधारूपे। किञ्चिद्रूपमौपाधिकं कश्चनास्वाभाविको धर्मः। अभिधानीयं वक्तव्यम्। तत्कथनं विना न निर्वाह इति भावः।

ननु तद्धर्मान्तरमभिधाऽऽख्येवोच्येतेत्याक्षेपं निरस्यति—

तच्च व्यञ्जकत्वादृते नान्यत्। व्यङ्ग्यप्रकाशनं हि व्यञ्जकत्वम्। पौरुषेयाणि च वाक्यानि प्राधान्येन पुरुषाभिप्रायमेव प्रकाशयन्ति। स च व्यङ्ग्य एव, न त्वभिधेयः, तेन सहाभिधानस्य वाच्यवाचकतालक्षणसम्बन्धाभावात्।

नान्यत्, अपि तु व्यञ्जकत्वमेव। व्यङ्ग्यस्य प्रकाशनं प्रकाश्यतेऽनेनेति व्यु-

त्पर्य्या प्रकाशकरणम्। प्रकरणादिग्राहिततात्पर्येणैव लौकिकवाक्यार्थनिर्धारणात् प्राधान्यम्, तद्ग्रहविरहेऽर्थस्य शाब्दानुभवप्रवेशासम्भवात्। पुरुषस्याभिप्रायन्तात्पर्यं तद्विषयीभूतमर्थं च प्रकाशयन्ति व्यञ्जन्ति। स पुरुषाभिप्रायस्तद्विषयीभूतार्थश्च। तेनाभिप्रायेण तदर्थेन च। अभिधानस्य शब्दस्य, अभिधीयतेऽनेनेति व्युत्पत्तेः।

अयं भावः—वक्तृतात्पर्यं तद्विषयं च मुख्यमर्थं नाभिधा बोधयितुं प्रभवति, तस्य सङ्केतितत्वाभावात्, न च लक्षणा, मुख्यार्थबाधादिविरहात्, किन्तु व्यञ्जनैवेतिलौकिकवाक्यनिर्मातृतात्पर्य-तद्विषयार्थप्रकाशकत्वेन मीमांसकेनापि व्यञ्जना स्वीकार्य्यैव।

व्यक्तिविपक्ष आक्षिपति—

नन्वनेन न्यायेन सर्वेषामेव लौकिकानां वाक्यानां ध्वनिव्यवहारः प्रसक्तः, सर्वेषामेवानेन न्यायेन व्यञ्जकत्वात्।

अनेन न्यायेन 'लौकिकवाक्यानां वाच्यातिरिक्तवक्त्रभिप्रायविषयार्थव्यञ्जकत्वम्' इति सिद्धान्तेन। व्यञ्जकत्वमेव खलु ध्वनित्वसम्पादकम्।

उत्तरमाचष्टे—

सत्यमेतत्—किन्तु वक्त्रभिप्रायप्रकाशनेन यदिदं व्यञ्जकत्वम्, तत् सर्वेषामेव लौकिकवाक्यानामविशिष्टम्। तत्तु वाचकत्वान्न भिद्यते। व्यङ्ग्यं हि तत्र नान्तरीयकतया व्यवस्थितम्, न तु विवक्षितत्वेन। यस्य तु विवक्षितत्वेन व्यङ्ग्यस्य व्यवस्थितिः, तद्व्यञ्जकत्वं ध्वनिव्यवहारस्य प्रयोजकम्।

अविशिष्टं तुल्यम्। वाचकत्वान्न भिद्यतेऽभिधावदेव तत्र सर्वत्र तिष्ठति। नान्तरीयकतया धान्यपलालन्यायेन, न तु प्राधान्येन। यस्य व्यङ्ग्यस्येति सम्बन्धः। तद्व्यञ्जकत्वं तन्निरूपिता व्यञ्जना। सन्दर्भानुरोधेन पाठः परिवर्तितः।

न हि व्यञ्जकत्वमात्रेण ध्वनित्वम्, अपि तु प्रधानीभूतव्यङ्ग्यव्यञ्जकत्वेन। तात्पर्यस्य तद्विषयार्थस्य च व्यङ्ग्यत्वेऽपि न प्राधान्यम्, नान्तरीयकत्वेन विच्छित्तिविशेषानाधायकत्वात्। तेन न सर्वत्र लौकिकवाक्येषु तात्पर्यतदर्थव्यञ्जकेष्वपि ध्वनित्वापत्तिरित्याकूतम्।

कीदृशं तर्हि व्यङ्ग्यं प्रधानतां भजतीतिप्रश्नं समाधत्ते—

यत्त्वभिप्रायविशेषरूपं व्यङ्ग्यं शब्दार्थाभ्यामेव प्रकाशते, तद्भवति विवक्षितं तात्पर्येण प्रकाश्यमानं सत् ।

अभिप्रायशब्दः प्राग्वद् विषयपरोऽपि । तद्विशेषरूपतया तु व्यङ्ग्यस्य चमत्कारातिरेकित्वेन । एवकारेण चेष्टाऽऽदि व्यवच्छिद्यते, तद्व्यङ्ग्यस्य ध्वनित्वाप्रयोजकत्वात् । तात्पर्येण व्यञ्जनया । सदन्तं व्यङ्ग्यविशेषणम् । इहापि पाठः किञ्चित् परिवर्तितः । शब्दार्थाभ्यां स्वमुपसर्जनीकृत्य व्यञ्जनया बोध्यमानं विच्छित्तिविधायि व्यङ्ग्यमेव तयोर्ध्वनित्वप्रयोजकम्, न तु यत्किञ्चिदपि व्यङ्ग्यम्, विच्छित्तिविशेषाधायिप्रत्ययस्यैव काव्यमुख्योद्देश्यत्वात्, प्रकृते तु व्यङ्ग्यं न तादृशमिति नैव दूषणमित्याशयः ।

नन्वभिप्रायविशेषव्यङ्ग्यमेव यदि ध्वनित्वप्रयोजकम्, तर्हि कथितचररसादिप्रकारत्रयव्यङ्ग्यत्वे तत्त्वं कथं स्यात्, तेषां तद्रूपत्वाभावादित्याशङ्कायां विशेषमाख्याति—

किन्तु तदेव केवलमपरिमितविषयस्य ध्वनिव्यवहारस्य न प्रयोजकम्, व्यापकत्वात्, तत्तु दर्शितभेदत्रयरूपतात्पर्येण द्योत्यमानमभिप्रायरूपमनभिप्रायरूपं च सर्वमेव ध्वनिव्यवहारस्य प्रयोजकमिति यथोक्तव्यञ्जकत्वविशेषध्वनिलक्षणे नातिव्याप्तिर्न चाव्याप्तिः ।

तदेवाभिप्रायविशेषरूपमेव । अपरिमितस्य विपुलस्य । व्यापकत्वाद् ध्वनेरिति शेषः । एतच्च प्रागेवालङ्कारान्तर्भावनिराकरणप्रसङ्गेन प्रतिपादितम् । भेदत्रयं वस्त्वलङ्काररसादिलक्षणम् । तात्पर्येण व्यक्त्या । अनभिप्रायरूपं वस्त्वादिलक्षणम् । व्यञ्जकत्वविशेषवान् यो ध्वनिस्तस्य लक्षणे ।

इदमुच्यते—यद्यभिप्रायव्यञ्जकत्वसामान्यं ध्वनिलक्षणं स्यात्, तर्हि निर्मातृपुरुषाभिप्रायव्यञ्जकेषु लौकिकवाक्येष्वतिव्याप्तिः, अभिप्रायातिरिक्तवस्त्वादिव्यञ्जकेष्वव्याप्तिश्चापतेदिति 'शब्दार्थाभ्यामेव' इत्यत्र प्रतिपादितं 'यत्रार्थः शब्दो वा' इत्यादिना प्रथमोद्द्योते समुपक्षिप्तमेव ध्वनिलक्षणमवसेयम् । तथा च क्वचिदभिप्रायविशेष एव, क्वचिच्च वस्त्वादिरूप एव चमत्कारिणि व्यङ्ग्ये प्राधान्येन विवक्षितेऽप्रधानयोः शब्दार्थयोर्ध्वनित्वमतो न दोषः ।

निगमयति—

तस्माद् वाक्यतत्त्वविदां मते न तावद् व्यञ्जकत्वलक्षणः शाब्दो व्यापारो विरोधी, प्रत्युतानुगुण एव लक्ष्यते ।

शाब्ध्यपि यदा मीमांसकेन स्वीकृता, तदा स्थालीपुलाकन्यायेन सकलव्यञ्जना-सिद्धिर्जातैव तन्नयेऽपीति भावः ।

सन्दर्भानुरोधेन द्वितीयनकारघटितः पाठो निराकृतः ।

इत्थं मीमांसकमतानुगुणत्वं प्रतिपाद्य वैयाकरणनयानुगुणतरत्वं व्यञ्जनायाः समासेन प्रतिपादयति—

परिनिश्चितनिरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं ध्वनिव्यवहार इति तैः सह किं विरोधाविरोधौ चिन्त्येते ।

परितः प्रमाणेन निश्चितं निर्णीतं स्थापितमिति यावद्, निरपभ्रंशमपभ्रंशशब्द-विविक्तं गलिताविद्यं, शब्द एव नित्यत्वाद् व्यापकत्वाच्च ब्रह्म यैस्ते तादृशाः, तेषां विपश्चितां विदुषां वैयाकरणानाम् । तथा हि–'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्' इत्युक्तमेव ध्वनिलक्षणे प्राक् ।

वैयाकरणमतमनुसृत्यैवालङ्कारिकैरप्यङ्गीकृते ध्वनौ, तेषां का विप्रतिपत्तेः सम्भावना ? । अतस्तन्मतेऽपि स्फोटप्रकाशिका व्यञ्जनाऽस्त्येवेति तात्पर्यम् । एवं वाक्यतत्त्वविदां मीमांसकानां, पदतत्त्वविदां वैयाकरणानां च मते व्यञ्जनां व्यवस्थाप्य प्रमाणतत्त्वविदां नैयायिकादीनां नयेऽपि व्यवस्थापयितुमुपक्रमते—

कृत्रिमशब्दार्थसम्बन्धवादिनां तु युक्तिविदामनुभवसिद्ध एवायं व्यञ्जकभावः शब्दानामर्थान्तराणामिव निर्विरोधश्चेति न प्रतिक्षेप्यपदवीमवतरति ।

क्रियया निर्वृत्तं कृत्रिमं सङ्केतरूपतया कल्पितत्वादनित्यं शब्दार्थयोः सम्बन्धं वदन्तीति तादृशास्तेषां नैयायिकबौद्धादीनां युक्तिविदामुपपत्त्याऽर्थान् निर्धारयताम् । अर्थान्तराणां दीपादीनामिव । निर्विरोधो विरोधान्निष्क्रान्तो बाधरहित इति यावत् । प्रतिक्षेप्यः खण्डनीयः । बाधितो ह्यर्थस्तैः खण्ड्यत एव ।

नैयायिकनये शब्दार्थयोरनित्यत्वादेव, सौगतादिमते वस्तुमात्रस्य क्षणिकत्वादेव च तत्सम्बन्धस्यानित्यत्वम् । युक्तिविदामित्यनेन युक्तिसिद्धं व्यञ्जकत्वं ते नापलपेयुरिति सूचितम् । यथा प्रदीपस्य घटाद्यर्थान्तरप्रकाशकत्वमनुभवसिद्धम्, तथा

शब्दार्थयोरपि स्ववाच्य-स्वेतरार्थप्रकाशकत्वमिति व्यञ्जकत्वे तार्किकाणामपि न विमतिरित्याशयः ।

तदाह—

वाचकत्वे हि तार्किकाणां विप्रतिपत्तयः प्रवर्तन्ताम्, किमिदं स्वाभाविकं शब्दानामाहोस्वित् सामयिकमित्याद्याः । व्यञ्जकत्वे तु तत्पृष्ठभाविनि भावान्तरसाधारणे लोकप्रसिद्ध एवानुगम्यमाने को विमतीनामवसरः ? ।

विप्रतिपत्तयो विरुद्धयुक्तियुक्तोक्तयः । शब्दानां वाचकत्वमिदं स्वाभाविकं नित्यम्, आहोस्विदथवा, सामयिकं सङ्केतजन्यत्वादनित्यमित्यादिरूपास्ताः । तत्पृष्ठभाविनि वाचकत्वात् पश्चाज्जायमाने । भावश्च प्रहद्वारको बोध्यः । भावान्तरसाधारणे दीपादि—प्रकाशकपदार्थान्तरेष्वपि तुल्ये । प्रसिद्धे दीपादिसादृश्येन प्रख्याते। अनुगम्यमान आलम्ब्यमाने ।

लोकप्रसिद्धे वाचकत्वे तार्किकाणां नित्यानित्यत्वविवादो विविधः सम्भवति, न तु लोकप्रसिद्धे पदार्थान्तरेषु बहुश उपलभ्यमाने व्यञ्जकत्वे । व्यञ्जकत्वं हि यादृशमेकत्र दीपादौ तादृशमेवापरत्रापि शब्दादाविति को विवादावसरस्तत्र तेषाम् । तत्र विवादेऽनुभवसिद्धापलापकता शिरस्यापतेदित्याकूतम् ।

तदेव समर्थयति—

अलौकिके ह्यर्थे तार्किकाणामभिनिवेशाः प्रवर्तन्ते, न तु लौकिके । न हि नीलमधुरादिष्वशेषलोकेन्द्रियगोचरे बाधारहिते तत्त्वे परस्परं विप्रतिपन्ना दृश्यन्ते । न हि बाधारहितं नीलं नीलमिति ब्रुवन्नपरेण प्रतिषिध्यते 'नैतन्नीलं, पीतमेतत्' इति ।

अलौकिके लोकानुभवागोचरे । अभिनिवेशाः स्वमतस्थापनाग्रहाः । नीलमधुरादिष्विति निर्धारणे सप्तमी, इतरथा वचनभेदात् तत्त्व इत्यनेन सामानाधिकरण्यं न घटते । तत्त्वे पदार्थे ।

प्रत्यक्षविषये नीलादौ न कस्यापि विवादः, किन्तु तन्नीलं प्रकृतिनिष्पादितं परमाणुनिष्पादितं वेति तत्कारण एव विवाद इति सारम् ।

प्रकृते सङ्गमयति—

तथैव व्यञ्जकत्वं वाचकानां शब्दानामवाचकानां च गीतध्वनीनामशब्दरूपाणां च चेष्टाऽऽदीनां यत् सर्वेषामनुभवसिद्धं, तत्केनापह्नूयते ।

तार्किकैरपि नापलपितुं शक्यं तद् व्यञ्जकत्वमिति भावः ।

व्यञ्जकत्वस्य प्रसिद्धिं दर्शयन्नुपसंहरति—

अशब्दमर्थं रमणीयं हि सूचयन्तो व्याहारास्तथा व्यापारनिबन्धाश्च विदग्धपरिषत्सु विविधा विभाव्यन्ते । तानुपहास्यतामात्मनः परिहरन् कथमभिसन्दधीत सचेताः ।

हि यतो विदग्धपरिषत्सु रसिकगोष्ठीषु, अशब्दं शब्देनाभिधाऽभिधप्रधानवृत्त्याऽप्रतिपादितमनभिधेयमिति यावत्, रमणीयं रहस्यतानयनेन चमत्कारकारणम्, अर्थं सूचयन्तो व्यञ्जनया प्रत्याययन्तः, विविधा नानाकाराः, व्याहाराः साङ्केतिकोक्तयो व्यापारनिबन्धा इङ्गितप्रभृतयः क्रियाविशेषाश्च विभाव्यन्ते दृश्यन्ते ज्ञायन्ते वा । तस्मात् सचेताः सहृदयस्तार्किकादिषु कश्चित्, आत्मनः, उपहास्यतामनुचितखण्डनाचरणादुपहासास्पदत्वं परिहरन्नपाकुर्वन्, तान् व्यञ्जकान् व्याहारान् व्यापारांश्च, कथं केन प्रकारेण, अभिसन्दधीत तिरस्कुर्वीतेत्यर्थः ।

तैरपि विदग्धसाङ्केतिकव्याहाराद्यर्थं व्यञ्जना चेदङ्गीकार्य्यैव, तर्ह्यन्यत्रापि किमिति नाङ्गीक्रियेत । तत्रापि व्यञ्जनाऽङ्गीकारे त्वनुभवसिद्धमप्यपलपन्नुपहसनीय एव स्यात् सचेतसां सदसीत्याशयः ।

इह 'पराभिसन्धानमधीयते यैः' इति कालिदासस्य, 'जनो विद्वानेकः सकलमभिसन्धाय तु जनम्' इति भवभूतेश्च प्रयोगादभिसन्दधातेरवधारितोऽप्यन्यत्र प्रतारणरूपोऽर्थो लोचनानुसारं प्रकरणानुरोधेन परित्यक्तः, तिरस्काररूपश्चोपात्तः । यद्वा तानपलप्य प्रतिवादिनः कथमभिसन्दधीत प्रतारयेदित्यवान्तरक्रियाऽध्याहारो विधेयः ।

अथ व्यक्तिमतिरिक्तामस्वीकृत्य, व्यङ्ग्यप्रतीतिमनुमितिमेव मन्वानस्य तार्किकस्य मतमुपन्यस्यति—

(ब्रूयात्) अस्त्यभिसन्धानावसरे व्यञ्जकत्वं शब्दानां गमकत्वम् । तच्च लिङ्गत्वम्, अतश्च व्यङ्ग्यप्रतीतिर्लिङ्गिप्रतीतिरेवेति लिङ्गलिङ्गिभाव एव तेषाम्, व्यङ्ग्यव्यञ्जकभावो नापरः कश्चित् । अतश्चैतदवश्यमेव बोद्धव्यम्, यस्माद् वक्त्रभिप्रायापेक्षया व्यञ्जकत्वमिदानीमेव त्वया प्रतिपादितम् । वक्त्रभिप्रायश्चानुमेयरूप एव ।

ब्रूयादित्यत्र 'अन्यः' इति योज्यम् । 'अभिसन्धानावसरे' इत्यस्यापि तत्रैव

सम्बन्धः प्रतिभाति । शब्दानां गमकत्वं व्यञ्जकत्वमस्ति, न तु कश्चिदपलपति । चकारस्त्वर्थकः । तद्व्यञ्जकत्वं तु लिङ्गत्वमनुमितिसाधनत्वमेव, न त्वतिरिक्तं व्यक्तिरूपम् । अतोऽस्माद्धेतोः । व्यङ्ग्यप्रतीतिर्लिङ्गिप्रतीतिः साध्यानुमितिरेवेति तेषां व्यञ्जकत्वविशिष्टशब्द-तद्व्यङ्ग्यार्थानाम्, व्यङ्ग्यव्यञ्जकभावोऽपरोऽतिरिक्तो न कश्चित्, अपि तु लिङ्गलिङ्गिभावः साध्यसाधनभाव एव । अतोऽस्मादनुपदमुदीर्यमाणाद्धेतोरपि, एतद् व्यङ्ग्यव्यञ्जकत्वम्, एवं साध्यसाधनभावरूपं बोद्धव्यम् । यस्मात्, इदानीं मीमांसकमतव्याख्यानसमय एव, त्वया व्यक्तिवादिना, वक्त्रभिप्रायापेक्षया व्यञ्जकत्वं वक्तुरभिप्रायव्यञ्जकत्वं शब्दानां प्रतिपादितम् । चकारस्त्वर्थे । वक्तुरभिप्रायस्तु परकीयेच्छारूपत्वादनुमेयोऽनुमितिविषय एव, न तु व्यङ्ग्य इत्यर्थः ।

अयं भावः—व्यङ्ग्यस्य वस्तुप्रभृतेर्व्यञ्जकेन शब्द-तदर्थादिना सह नियतः कश्चन सम्बन्धो व्यक्तिवादिनाऽपि मन्तव्यः । अन्यथा सर्वत्रासम्बद्धार्थव्यञ्जनमापद्येत । स च सम्बन्धो ज्ञाप्यज्ञापकभाव एवौचित्यादिति व्याप्येन ज्ञापकेन शब्दादिना साधनेन, व्यापकस्य ज्ञाप्यस्य वस्त्वादेः साध्यस्य, बोधनमनुमानमेवेति न वस्त्वादिव्यङ्ग्यबोधनार्थं व्यञ्जनायाः प्रयोजनम् । तदुक्तं व्यक्तिविवेके महिमभट्टेन—'वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति ।

सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता ॥' इति ।

परकीयेच्छाया अनुमेयमात्रत्वादिदं पुनर्वक्तुरभिप्रायस्य व्यङ्ग्यत्वं वदता व्यक्तिवादिनाऽप्यनायत्याऽङ्गीकरणीयमेव । विशेषस्तु व्यक्तिविवेकादितोऽवसेयः ।

प्रौढिवादेनाभ्युपेत्य खण्डयति—

अत्रोच्यते—नन्वेवमपि यदि नाम स्यात्, तत् किं नश्छिन्नम् । वाचकत्वगुणवृत्तिव्यतिरिक्तो व्यञ्जकत्वलक्षणः शब्दव्यापारोऽस्तीत्यस्माभिरभ्युपगतम् । तस्य चैवमपि न काचित् क्षतिः । तद्धि व्यञ्जकत्वं लिङ्गत्वमस्तु, अन्यद्वा, सर्वथा प्रसिद्धशाब्दप्रकारविलक्षणत्वं शब्दव्यापारविषयत्वं च तस्यास्तीति नास्त्येवावयोर्विवादः ।

नामेति सम्भावनायाम् । एवं व्यञ्जकत्वस्य लिङ्गत्वतादात्म्यमपि यदि सम्भावितं स्यात्, तत्तदा, किं नश्छिन्नं काऽस्माकं हानिः ? न काचिदित्यर्थः । यतोऽस्माभिर्वाचकत्वादिभ्यो भिन्नं व्यञ्जकत्वं शक्तिरूपमङ्गीकृतम् । तस्य व्यञ्जकत्व-

निष्ठवाचकत्वाद्यतिरिक्तत्वस्य, एवं लिङ्गत्वाङ्गीकारेऽपि न क्षतिः । हि यतस्तद्वाचकत्वाद्यतिरिक्तत्वेनाङ्गीक्रियमाणं वस्तु लिङ्गत्वं ततोऽन्यद् वा किञ्चिद् भवतु, तथाऽपि तस्य धर्मस्य प्रसिद्धा ये शाब्दप्रकारा अभिधाऽऽदयस्तद्विलक्षणत्वं तेभ्यो भिन्नत्वं मदभिमतं सर्वथाऽस्त्येव, इति हेतोरावयोर्व्यक्त्यनुमितिवादिनोर्न विवादः ।

व्यञ्जकत्वस्य वाचकत्वाद्यतिरिक्तत्वस्थापन एवास्माकमाग्रहः, तच्च तस्य लिङ्गत्वरूपतां वदता त्वयाऽप्यङ्गीकृतमेव, तत्कुतो नस्त्वया सह विवाद इत्यभिसन्धिः ।

प्रौढ्याऽभ्युपगतमसिद्धान्तमतमपास्यति—

न पुनरयं परमार्थो यद् व्यञ्जकत्वं लिङ्गत्वमेव सर्वत्र, व्यङ्ग्यप्रतीतिश्च लिङ्गिप्रतीतिरेवेति ।

उभयोर्वैयधिकरण्येऽपि कुतस्तादात्म्यमित्याशयः ।

सिंहावलोकनन्यायेनाभ्युपगमसाधनमुक्तमपि दवयति—

यदपि स्वपक्षसिद्धयेऽस्मदुक्तमनूदितं त्वया 'वक्त्रभिप्रायस्य व्यङ्ग्यत्वेनाभ्युपगमात् तत्प्रकाशने शब्दानां लिङ्गत्वमेव' इति, तदेतद् यथाऽस्माभिरभिहितम् , तद्विभज्य प्रतिपाद्यते, श्रूयताम्—

द्विविधो हि विषयः शब्दानाम्—अनुमेयः प्रतिपाद्यश्च । तत्रानुमेयो विवक्षालक्षणः । विवक्षा च शब्दस्वरूपप्रकाशनेच्छा, शब्देनार्थप्रकाशनेच्छा चेति द्विप्रकारा । तत्राद्या न शाब्दव्यवहाराङ्गम् , सा हि प्राणित्वमात्रप्रतिपत्तिफला । द्वितीया तु शब्दविशेषावधारणावसितव्यवहिताऽपि शब्दकारणव्यवहारनिबन्धनम् । ते तु द्वे अप्यनुमेयो विषयः शब्दानाम् । प्रतिपाद्यस्तु प्रयोक्तुरर्थप्रतिपादनसमीहाविषयीकृतोऽर्थः । स च द्विविधो वाच्यो व्यङ्ग्यश्च । प्रयोक्ता हि कदाचित् स्वशब्देनार्थं प्रकाशयितुं समीहते, कदाचित् स्वशब्दानभिधेयत्वेन, प्रयोजनापेक्षया कयाचित् । स तु द्विविधोऽपि प्रतिपाद्यो विषयः शब्दानां न लिङ्गितया स्वरूपेण प्रकाशते, अपि तु कृत्रिमेणाकृत्रिमेण वा सम्बन्धान्तरेण ।

विभज्य विषयविभागं विधाय । विषयः शब्दोच्चारणोत्तरं प्रतीतिगोचरोऽर्थः। विवक्षा वक्तुमिच्छा । सा च शब्दानां स्वरूपस्यानुपूर्व्याः प्रकाशनस्येच्छा, शब्दान् प्रयुञ्जीय इत्याकारिका, शब्दोच्चारणानुकूलयत्नानुकूला, शब्दानां प्रयुयुक्षालक्षणैका, ततोऽर्थप्रकाशनस्येच्छा 'अर्थं प्रतिपादयेयम्' इत्याकारिकाऽर्थप्रतिपादनानुकूलयत्नानुकूलाऽर्थ-

प्रतिपिपादयिषारूपा द्वितीयेति द्विप्रकारा विवक्षा । तत्र तयोः । आद्या प्रयुयुक्षा । शाब्दव्यवहारस्य शाब्दबोधस्याङ्गमुपकारिणी न । हि यतः सा प्राणित्वमात्रस्य प्रतिपत्तिरनुमितिः फलं यस्यास्तादृशी । शब्दप्रयुयुक्षया केवलं प्राणित्वमनुमातुं शक्यते, अप्राणिनां तदभावात्, न तु शाब्दज्ञानं जनयितुम् । द्वितीयाऽर्थप्रतिपिपादयिषा तु, शब्दविशेषस्य वाचकशब्दस्यावधारणावसितेन निर्णयाध्यवसानेन, व्यवहिता सान्तरालाऽपि, शब्दस्य कारणं यो व्यवहारो व्यापारः कण्ठताल्वाद्यभिघातलक्षणः, तन्निबन्धनं तत्कारणीभूता । ते तु द्वे अपि तदिच्छाद्वयमपि, अनुमेये एव, परकीयेच्छाया अनुमितिमात्रगोचरत्वात् । अर्थप्रतिपादनस्य समीहयेच्छया विषयीकृतोऽर्थो वाच्यो व्यङ्ग्यश्च । हि यतः प्रयोक्ता पुरुषः । स्वशब्देन वाचकशब्देन । अर्थं वाच्यम् । कयाचिद् विलक्षणया प्रयोजनस्य गोपनकृतार्थसौन्दर्यातिरेचनादिरूपस्यापेक्षया, स्वशब्दानभिधेयत्वेन वाचकशब्दावाच्यत्वेन, अर्थं व्यङ्ग्यं प्रकाशयितुं समीहते । द्विविधो वाच्यव्यङ्ग्यलक्षणः । लिङ्गितया स्वरूपेण साध्यत्वरूपेणानुमेयत्वेनेति यावत्, न प्रकाशते, किन्तु तार्किकमते कृत्रिमेण, मीमांसकादिनयेऽकृत्रिमेण, सम्बन्धान्तरेणाभिधाव्यञ्जनालक्षणेन ।

प्रयोक्तुः शब्दप्रयुयुक्षा, ततोऽर्थप्रतिपिपादयिषा चोच्चार्यमाणशब्दतोऽनुमीयत इत्यनुमेयमेव तदिच्छाद्वयम् । वाच्यो व्यङ्ग्यश्चार्थो नानुमेयः, अभिधाव्यञ्जनाभ्यामेव बोधितत्वादनुमित्यगोचरत्वात् । तस्मान्न व्यक्तिरनुमित्या गतार्थेति भावः ।

वाच्यव्यङ्ग्ययोरनुमेयत्वाभावमुपपादयति—

विवक्षाविषयत्वं हि तस्यार्थस्य शब्दैर्लिङ्गतया प्रतीयते, न तु स्वरूपम् ।

तस्य द्विविधस्यापि प्रतिपाद्यस्यार्थस्य, विवक्षाविषयत्वं तद्विषयकविवक्षैव वा शब्दैरुच्चार्यमाणैर्लिङ्गतया साधनत्वेन साधनीभूतैरिति यावत्, प्रतीयतेऽनुमीयते, न तु स्वरूपमर्थद्वयस्याकारोऽनुमीयत इति शेषः ।

'अयमर्थोऽस्य विवक्षाविषयः, एतदुच्चारितशब्दबोध्यत्वात्' इत्यनुमित्याऽर्थनिष्ठा विवक्षाविषयतैव साध्यते, न त्वर्थः, तस्य पक्षत्वादित्यभिप्रायः ।

उक्तान्यथामनेनेऽनुपपत्तिमाचष्टे—

यदि हि लिङ्गतया तत्र शब्दानां व्यवहारः स्यात्, तच्छब्दार्थे सम्यङ्मिथ्यात्वादिविवादा एव न प्रवर्तेरन्, धूमादिलिङ्गानुमितानुमेयान्तरवत् ।

अयं भावः—यदि वाच्यव्यङ्ग्ययोरनुमितिरेव भवेत्, तर्हि तदर्थविशेष्यको य-

थाऽर्थत्वायथाऽर्थत्वप्रकारकः संशय एव नोदियात्, अनुमितेर्निश्चयात्मकत्वात् । न हि धूमहेतुकानुमितिगोचरवह्निविषयकस्तादृक् सन्देह उदेति । उत्तिष्ठन्ते च विप्रतिपन्नानां संशया इति न तस्यानुमितिविषयत्वम् ।

ननु व्यङ्ग्यार्थस्य शब्दसम्बन्धित्वविरहात्, तत्त्वे वा परम्परया सम्बन्धित्वाच्छब्दतस्तस्य प्रतीतिर्न सम्भवतीतिशङ्कामपनयति—

व्यङ्ग्यश्चार्थो वाच्यसामर्थ्याक्षिप्ततया वाच्यवच्छब्दस्य सम्बन्धीभवत्येव । साक्षादसाक्षाद्भावो हि सम्बन्धस्याप्रयोजकः । वाच्यवाचकभावाश्रयत्वं च व्यङ्ग्यव्यञ्जकत्वस्य प्रागेव दर्शितम् ।

शब्दस्य वाच्यार्थो यथाऽभिधासम्बन्धेन सम्बन्धी, तथैव व्यङ्ग्योऽपि व्यञ्जनासम्बन्धेन । भेदस्त्वियानेव, यदभिधा साक्षात्सम्बन्धो व्यञ्जना चार्थद्वारकत्वात् परम्परासम्बन्धः । नैतावता काऽपि हानिः, सम्बन्धे साक्षाद्भावानिवेशात् । न च व्यञ्जनायाः परम्परासम्बन्धत्वे शङ्कनीयम्, अस्या अभिधोपजीवकत्वस्य प्रागिहैवोद्द्योते भेदप्रदर्शनप्रसङ्गेनोक्तत्वादिति तात्पर्यम् ।

उपसंहरति—

तस्माद् वक्त्रभिप्रायरूपव्यङ्ग्ये लिङ्गतया शब्दानां व्यापारः । तद्विषयीकृते तु प्रतिपाद्यतया ।

तस्माद् वक्तुरभिप्रायस्य परेच्छारूपत्वेनानुमितिमात्रविषयत्वात् । व्यङ्ग्य इत्युक्तिस्तु परमतानुसारेण । शब्दानां लिङ्गतया हेतुत्वेन व्यापारः । तद्विषयीकृते विवक्षिते तु वाच्यव्यङ्ग्यत्वाभ्यां द्विविधेऽर्थे प्रतिपाद्यतया व्यवहारः । विवक्षाऽनुमेयैव, तदनुमितौ चोच्चार्यमाणः शब्द एव लिङ्गम् । व्यङ्ग्यत्वं च तस्या नास्ति । यश्च वक्तृविवक्षाविषयो द्विविधो वाच्यो व्यङ्ग्यश्चार्थः, स शब्दानां प्रतिपाद्यो विषयो नानुमेयः, तदीयसम्बन्धस्य नियतत्वाभावेन तं प्रति शब्दानां लिङ्गत्वासम्भवादिति भावः ।

प्रतिपाद्यार्थद्वयेऽपि व्यङ्ग्यस्य व्यञ्जनामात्रगम्यत्वं दर्शयति—

प्रतीयमाने तस्मिन्नभिप्रायरूपे च वाचकत्वेनैव व्यापारः, सम्बन्धान्तरेण वा ? न तावद् वाचकत्वेन, यथोक्तं प्राक् । सम्बन्धान्तरेण व्यञ्जकत्वमेव ।

प्रतीयमाने व्यङ्ग्ये। तस्मिन्ननभिप्रायरूपे वस्त्वादौ। अभिप्रायरूपे यथा—

'उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।' इत्यादौ चुम्बनेच्छादिलक्षणे। यथोक्तं प्राक् तदर्थस्य सङ्केतितत्वाभावादभिधया बोधयितुमशक्यत्वम्। शब्दानामिति शेषः। सम्बन्धान्तरेणेति चेदङ्गीक्रियते, तदा तदेव सम्बन्धान्तरं व्यञ्जना।

यः खल्विच्छारूपस्तदतिरिक्तश्च शब्दानां व्यङ्ग्योऽर्थः, तस्य सङ्केतितत्वाभावान्नाभिधाबोध्यत्वम्, प्रतीतिगोचरत्वाच्च नापलपनार्हत्वमित्यगत्या यत् तद्बोधनोपयोगि व्यापारान्तरं कल्प्यते, तदेव व्यञ्जनेत्याशयः।

अभिप्रायस्येदानीमेवानुमेयमात्रत्वमुक्त्वा व्यङ्ग्यत्वमुच्यत इत्यसङ्गतमिति चेत्, न, यतो विवक्षारूपस्य वक्तुरभिप्रायस्यानुमितिमात्रगम्यत्वमुक्तम्। वाच्यशिवाद्यभिप्रायस्य तु व्यङ्ग्यत्वमुच्यत इति विषयभेदः। सर्वविधेच्छानामनुमितिमात्रविषयत्वमेवेति नियमः, तथासति 'देवदत्तो जिगमिषति' इत्यादौ देवदत्तसमवेतगमनेच्छायाश्शाब्दान्वयप्रवेशो न स्यादिति द्रष्टव्यम्।

ननु तत् सम्बन्धान्तरं लिङ्गलिङ्गिभावएव कुतो न कल्प्यत इत्याक्षेपं समाधत्ते—

न च व्यञ्जकत्वं लिङ्गत्वरूपमेव, आलोकादिष्वन्यथा दृष्टत्वात्।

आलोके घटादिनिरूपिता व्यञ्जकता विद्यते, न तु लिङ्गता, घटाद्यनुमितिसाधनत्वाभावादालोकादेः। तथा च व्यभिचारस्य स्फुटत्वान्न तयोस्तादात्म्यमिति भावः।

निगमयति—

तस्मात् प्रतिपाद्यो विषयः शब्दानां न लिङ्गत्वेन सम्बन्धी, वाच्यवत्। यो हि लिङ्गत्वेन तेषां सम्बन्धी यथा दर्शितो विषयः, स न वाच्यत्वेन प्रतीयते, अपि त्वौपाधिकत्वेन।

प्रतिपाद्यो वाच्यव्यङ्ग्योभयरूपः लिङ्गत्वेन सम्बन्धी न—अनुमेयो न। वाच्यवदिति दृष्टान्तः—यथा प्रतिपाद्यो वाच्यो नानुमेयः, तथैव व्यङ्ग्योऽपि। वाच्यस्याभिधामात्रबोध्यत्वस्य निर्णीतत्वाद् दृष्टान्तता। यो विवक्षालक्षणः। तेषां शब्दानाम्। औपाधिकत्वेन वाच्याद्यर्थविशेषणत्वेन।

शब्दानां वाच्य इव व्यङ्ग्योऽपि प्रतिपाद्यो नानुमेयः, अनुमेयश्चार्थो वक्त्रिच्छारूपो न वाच्यः, किन्तु वाच्यादिविशेषणीभूत इत्युभयोर्वैलक्षण्यमिति सारम्।

प्रतिपाद्यस्याप्यनुमेयत्वाङ्गीकारे कथितामेवापत्तिं पुनः स्मारयति—

प्रतिपाद्यस्य च विषयस्य लिङ्गित्वे तद्विषयाणां विप्रतिपत्तीनां लौकिकीनां लौकिकैरेव क्रियमाणानामभावः प्रसज्येतेति । एतच्चोक्तमेव ।

लिङ्गित्वेऽनुमेयत्वे । स एव विषयो यासां तास्तद्विषयाः, तासाम् । लौकिकीनां लोके भवानाम् । 'लौकिकानाम्' इत्यपपाठः, भवार्थेऽणि तदन्तात् 'टिड्ढाणञ' इत्यादिसूत्रेण विहितस्य ङीपो दुर्वारत्वात् । श्रद्धाजाड्ये तु—लौकिकशब्दस्याजादिगणे पाठः कल्पनीयः । उक्तमेव प्राक्-'यदि हि' इत्यादिना ।

अयं भावः—यदि वाच्यो व्यङ्ग्यश्चार्थोऽनुमेयः स्यात्, तदोक्तयुक्त्या तद्विषयकस्सत्यत्वतदभावप्रकारकः सन्देहो न भवेत्, अनुमितेर्निश्चयात्मकत्वेन समानविषयतायां निश्चयस्य सन्देहं प्रति प्रतिबन्धकत्वात् । भवति च तत्र सन्देहः, तस्मादसौ नानुमितिविषयः । विवक्षाया अनुमेयत्वाङ्गीकारे तु तस्या इच्छारूपत्वेन सन्देहो नोचित इति तदुत्थानासम्भवो न दोषाय । न हीच्छायां कोऽपि विप्रतिपद्यते, अर्थे तु विप्रतिपन्नो भवत्येव ।

ननु व्यङ्ग्यस्यापि प्रतीत्यनन्तरं सत्यत्वासत्यत्वावधारणायानुमितिरेव शरणीकरणीयेत्यनुमेयत्वमेव, तत्कथं पुनरिदानीं तदभाव उच्यत इत्याशङ्कां दृष्टान्तोपन्यासेन निराकरोति—

यथा च वाच्यविषये प्रमाणान्तरानुगमेन सम्यक्त्वप्रतीतौ क्वचित् क्रियमाणायां तस्य प्रमाणान्तरविषयत्वे सत्यपि, न शब्दव्यापारविषयताहानिः, तद्वद् व्यङ्ग्यस्यापि ।

न वयं व्यङ्ग्यस्यानुमेयतां निषेधामः, अपि तु व्यङ्ग्यत्वं व्यवस्थापयामः । तथा हि—यथा वाच्यस्य शाब्दविषयताऽनन्तरम्-'आप्तवादाविसंवादसामान्यादनुमेयता ।' इत्यभियुक्तोक्तेः सत्यत्वावधारणार्थमनुमितिगोचरताऽपि भवति, न च तेनानुमेयत्वेन वाच्यत्वमपनीयते, तथैव व्यङ्ग्यस्य व्यञ्जनया प्रत्यायनादुत्तरं सत्यत्वनिर्णयार्थमनुमितिविषयत्वेऽपि व्यङ्ग्यत्वं नोपरमतीत्याकूतम् ।

सर्वेषां वाच्यादीनामनुमेयत्वोक्तिः पुनरभ्युपगमवाद एव, न त्विह काव्येषु प्रयोजिकेति दर्शयति—

काव्यविषये च वाच्यव्यङ्ग्यप्रतीतीनां सत्यत्वासत्यत्वनिरूपणस्याप्रयोजकत्वमेवेति तत्र प्रमाणान्तरव्यापारपरीक्षा, उपहासायैव सम्पद्यते ।

'ज्योतिष्टोमेन यजेत' इत्यादिश्रौतवाक्यानां विधायकतया तदर्थस्य प्रामाणिकत्वग्रहायानुमानादिप्रमाणगोचरता भवति। काव्यवाक्यानां त्वद्भुतविच्छित्तिशालिप्रतीतिमात्रप्रयोजनकत्वेन तत्प्रतिपाद्यधर्मिकसत्यत्वनिर्णयस्य फलानाधायकत्वेनानपेक्ष्यतया प्रमाणान्तरानुसरणं नावश्यकम्। तत्र सत्यत्वपरीक्षणमुपक्रम्यमाणं प्रत्युत 'अयं केवलशुष्कतर्ककर्कशीकृतमतिर्न रसास्वादरसिकः सहृदयः' इति विदग्धपरिषद्विहितं कर्तुरुपहासमेव जनयतीति सारम्।

निगमयति—

तस्माल्लिङ्गिप्रतीतिरेव सर्वत्र व्यङ्ग्यप्रतीतिरिति न शक्यते वक्तुम्।

सर्वत्रेत्यनेन क्वचिन्नियतसम्बन्धस्थले तथात्वमप्यनुमन्यत इत्यवगन्तव्यम्।

नन्वेवं व्यञ्जकत्वव्यापिकाऽनुमितिसाधनता माभूत्, व्यञ्जकतैव तद्व्यापिका कुतो न स्वीक्रियत इत्याशङ्कायामाह—

यत्त्वनुमेयरूपव्यङ्ग्यविषयं शब्दानां व्यञ्जकत्वम्, तद् ध्वनिव्यवहारस्याप्रयोजकम्।

अनुमेयरूपं यदभिप्रायलक्षणं व्यङ्ग्यम्, तद्विषयकं शब्दानां व्यञ्जकत्वं यत्, तद् ध्वनिव्यवहारस्य ध्वनित्वस्य प्रयोजकं नेत्यर्थः।

अभिप्रायव्यञ्जकत्वमात्रेण ध्वनित्वाङ्गीकारे सर्वेषामेव पौरुषेयवाक्यानां तत्त्वापत्तिरित्युक्तमेव। तस्मादभिप्रायेतरनिरूपितव्यञ्जकतैव ध्वनित्वप्रयोजिका, न तु व्यञ्जकतासामान्यम्। इत्थं च ध्वनित्वप्रयोजकव्यञ्जकता नैवानुमितिसाधनतां व्याप्नोतीति हृदयम्।

नन्वभिप्रायव्यञ्जकता यदीत्थं ध्वनित्वाप्रयोजिका, तदा तदुपादानमिह निष्फलमेव प्राक् कुतो विहितमित्याक्षेपं समादधाति—

अपि तु व्यञ्जकत्वलक्षणः शब्दानां व्यापार औत्पत्तिकशब्दार्थसम्बन्धवादिनाऽप्यभ्युपगन्तव्य इति प्रदर्शनार्थमुपन्यस्तम्।

विप्रतिपद्यमानेन मीमांसकेन व्यञ्जनां स्वीकारयितुमेव तदुपादानं प्राग् विहितमिति नैव निष्फलमिति भावः।

तदेव सङ्क्षेपेणाह—

तद्धि व्यञ्जकत्वं कदाचिल्लिङ्गत्वेन, कदाचिद् रूपान्तरेण, शब्दानां वाचकानामवाचकानां च सर्ववादिभिरप्रतिक्षेप्यमित्यस्माभिर्यत्न आरब्धः।

येन केनापि रूपेण व्यञ्जकत्वं सर्वैः स्वीकरणीयमेवेति प्रदर्शनार्थमेवास्माकं तत्तन्मतव्याख्यानरूपोऽयं प्रयासः । तथा हि–शब्दानामभिप्रायलक्षणे व्यङ्ग्येऽनुमानेन व्यञ्जकता, घटादौ दीपादेः प्रत्यक्षेण व्यञ्जकता, अवाचकगीतादिध्वनीनां रसादौ स्वरूपप्रत्यक्षेण व्यञ्जकता, विवक्षितान्यपरवाच्यध्वनावभिधासाहाय्येन व्यञ्जकता, अविवक्षितवाच्यध्वनौ च गुणवृत्तिसहकारेण व्यञ्जकतेति न केनचिदपि नाङ्गीकरणीयमिति भावः ।

उपसंहरति—

तदेवं गुणवृत्ति–वाचकत्वादिभ्यः शब्दप्रकारेभ्यो नियमेनैव तावद् विलक्षणं व्यञ्जकत्वम् ।

एवमुक्तैः प्रकारैः । अन्यत् स्फुटम् ।

पुनरपरया भङ्ग्या व्यञ्जनां स्थापयति—

तदन्तःपातित्वेऽपि तस्य न ग्रहादभिधीयमानं तद्विशेषस्य ध्वनेर्यत् प्रकाशनं विप्रतिपत्तिनिरासाय सहृदयव्युत्पत्तये वा तत् क्रियमाणमनभिसन्धेयमेव ।

तस्य व्यञ्जकत्वस्य, तदन्तःपातित्वेऽप्यभिधाऽऽदिव्यापारविशेषरूपत्वेऽपि, न ग्रहान्नाभिनिवेशात्, किन्त्वौचितीपर्यालोचनयैव, विप्रतिपत्तीनां व्यञ्जनारूपोऽभिधाऽऽदिविशेषो नास्तीत्याद्याकाराणां, निरासाय निवर्तनाय, सहृदयानां व्युत्पत्तये विशेषज्ञानेन संशयनिवारणाय वा, क्रियमाणं यत्, तद्विशेषस्याभिधागुणवृत्तिप्रकारविशेषस्य, ध्वनेर्ध्वननं ध्वनिरिति व्युत्पत्त्या व्यञ्जनाव्यापारस्य प्रकाशनम्, तद् अनभिसन्धेयमतिरस्कार्यमेवेत्यर्थः ।

सामग्र्यन्तरसहकारेणाभिधाऽऽदिरेव व्यङ्ग्यमपि बोधयतीति व्यञ्जनाया अभिधाऽऽदिप्रकारविशेषत्वेऽभ्युपगतेऽपि विपक्षमुखमुद्रणाय सपक्षसन्तोषणाय च, पृथक् तन्निरूपणमावश्यकमेवेति सारम् ।

तदेव समर्थयति—

न हि सामान्यमात्रलक्षणेनोपयोगिविशेषलक्षणानां प्रतिक्षेपः शक्यः कर्तुम् । एवं हि सति सत्तामात्रलक्षणे कृते सकलसद्वस्तुलक्षणानां पौनरुक्त्यप्रसङ्गः ।

सामान्यलक्षणेन विशेषलक्षणानां गतार्थता न भवति । तथासति वैशेषिकनये

द्रव्यगुणकर्ममात्रवृत्ति–जातिविशेषरूपसत्ताया लक्षणे कृते, द्रव्यत्वादिलक्षणानि पुनरुक्तानि स्युः। यद्वा सञ्ज्ञैव सद्वस्तूनां घटपटादीनां सकलशास्त्रप्रतिपाद्यानां सामान्यलक्षणम्, इति तन्निरूपणे कृते, तत्तत्पदार्थलक्षणानि तत्र तत्रोक्तानि निरर्थकानि स्युः। तस्मात् पृथग् व्यञ्जनानिरूपणमावश्यकमेव। वस्तुतस्त्वभिधाऽऽदिप्रकारता तस्या नास्त्येवेति प्रागुपपादितमेवेति भावः।

इहोपयोगित्वविशेषणेनानुपयोगिनो विशेषस्य काकदन्तादेर्लक्षणस्य प्रतिक्षेप्यतैवानुमन्यते।

उपसंहरति—

तदेवम्—

'विमतिविषयो य आसीन्मनीषिणां सततमविदितसतत्त्वः।
ध्वनिसञ्ज्ञितः प्रकारः काव्यस्य व्यञ्जितः सोऽयम् ॥९०॥'

यो ध्वनिसञ्ज्ञितो ध्वनिनामा काव्यस्य प्रकारः, अविदितोऽप्रसिद्धः सतत्त्वः सदृशो यस्य तादृशोऽद्वितीय इति हेतोर्मनीषिणां तार्किकादिविदुषां विमतीनां नानाविधविप्रतिपत्तीनां विषयो लक्ष्य आसीत्। सोऽयम्, एवमुक्तप्रकारैः, व्यञ्जितः प्रकाशितो व्यवस्थापित इत्यर्थः।

इत्थं ध्वनिनामानं काव्यस्य प्रधानं प्रकारं सपरिकरं निरूप्य, तत्कल्पं गुणीभूतव्यङ्ग्याभिधानं द्वितीयं प्रकारमपि निरूपयति—

'प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते।
यत्र व्यङ्ग्यान्वये वाच्य–चारुत्वं स्यात् प्रकर्षवत् ॥ ९१ ॥'

गुणीभूतं वाच्याधिकचमत्कारानाधायकत्वेनाप्रधानीभूतं व्यङ्ग्यं यत्र सः, तन्नामकः काव्यस्य, अन्यो ध्वनेर्भिन्नो द्वितीयः प्रकारो दृश्यते। यत्र काव्ये, व्यङ्ग्येनान्वये सम्बन्ध उपकारे वा सति, वाच्यस्य चारुत्वं प्रकर्षवद् ध्वनिवाच्यापेक्षयाऽप्युत्कृष्टं स्यादित्यर्थः।

तदाचष्टे—

व्यङ्ग्योऽर्थो ललनालावण्यप्रख्यो यः प्रतिपादितः, तस्य प्राधान्ये ध्वनिरित्युक्तम्। तस्यैव तु गुणीभावेन वाच्यचारुत्वप्रकर्षे गुणीभूतव्यङ्ग्यो नाम काव्यप्रभेदः प्रकल्प्यते।

प्रतिपादितः प्रथमोद्द्योते—'प्रतीयमानं पुनरन्यदेव' इत्यादिना । उक्तं तत्रैव 'यत्रार्थः शब्दो वा' इत्यादिना । तस्यैव व्यङ्ग्यस्य । वाच्यस्य चारुत्वप्रकर्ष इति चारुत्वसाम्यस्याप्युपलक्षणम्, तुल्यप्राधान्यकव्यङ्ग्यस्यापि गुणीभूतव्यङ्ग्यप्रभेदत्वेन वक्ष्यमाणत्वात् ।

गुणीभूतस्य व्यङ्ग्यस्याष्टविधत्वादस्य काव्यस्याप्यष्टौ भेदाः । ते चास्माभिः—

'इतराङ्गं व्यङ्ग्यं स्यादगूढमस्फुटं वाच्यसिद्ध्यङ्गम् ।
सन्दिग्धप्राधान्यं तुल्यप्राधान्यमसुन्दरं यत्र ॥
काक्वाक्षिप्तं च गुणी-भूतव्यङ्ग्यस्य ते भेदाः ॥' इति साहित्यसारिण्यां

गणिताः । परेऽपि भूयांसोऽस्य भेदा व्यङ्ग्योपस्कृतवाच्यालङ्काराणां बाहुविध्याद्भवन्तीति ज्ञेयमन्यतः ।

वस्त्वलङ्काररसादिरूपतया त्रिविधेषु व्यङ्ग्येषु, अत्यन्ततिरस्कृतवाच्यकशब्दप्रतीयमानवस्तुरूपव्यङ्ग्यस्य वाच्याङ्गतायामितराङ्गव्यङ्ग्यरूपं गुणीभूतव्यङ्ग्यमुदाहर्तुमाह—

तत्र वस्तुमात्रस्य व्यङ्ग्यस्य तिरस्कृतवाच्येभ्यः शब्देभ्यः प्रतीयमानस्य, कदाचिद् वाच्यरूपवाक्यार्थापेक्षया गुणीभावे सति गुणीभूतव्यङ्ग्यता, यथा—

जलकेलिचिकीर्षयाऽधिनदीपुलिनमवतरन्तीं लावण्यप्रसाधिताशेषावयवामपनीतावगुण्ठनां कामपि कामविलासवासभुवं ललनामकस्मादवलोकयन् कश्चन चकितस्तर्कयति—

'लावण्यसिन्धुरपरैव हि केयमत्र,
यत्रोत्पलानि शशिना सह सम्प्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र,
यत्रापरे कदलिकाण्डमृणालदण्डाः ॥'

अत्र नदीरोधसि, का इयमदृष्टपूर्वा, अपरैव प्रसिद्धतटिनीभिन्नैव, लावण्यस्य द्रवरूपसुषमाऽतिरेकस्य, सिन्धुः सरित्, विद्यत इति दृश्यत इति वा शेषः । यत्र यस्यां सरिति, शशिना सह, उत्पलानि कुवलयानि, सम्प्लवन्ते सन्तरन्ति । यत्र च द्विरदस्य हस्तिनः कुम्भयोस्तटी पुरस्थली, उन्मज्जत्युदेति । तथा यत्र अपरे प्रसिद्धेभ्य उक्तेभ्यो वाऽन्ये, कदल्या रम्भायाः काण्डौ स्तम्भौ मृणालस्य दण्डौ च ते वर्तन्त इत्यर्थः ।

तथा च–'सिन्धुर्वमथुदेशाब्धिनदे ना सरिति स्त्रियाम्' इति मेदिनी। 'स्यादुत्पलं कुवलयम्' इति, 'काण्डोऽस्त्री दण्डबाणार्व-वर्गावसरवारिषु' इति चामरः।

अत्र सिन्धूत्पल-शशि-द्विरदकुम्भतटी-कदलिकाण्ड-मृणालदण्डशब्दा बाधितं स्वार्थं तिरस्कृत्य ललना-कटाक्षच्छटा-वदन-स्तनयुग-जङ्घायुगल-बाहुयुग्मानि वस्तूनि प्रकाशयन्ति। तानि च 'अपरैव केयम्' इत्युक्तिबोधितमद्भुतरूपं वाच्यं समर्थनच्छायाऽतिशयविधानेनोपकुर्वन्तीति तिरस्कृतवाच्यकशब्दव्यङ्ग्यानां वाच्यरूपस्येतरस्याङ्गत्वमिति केचित्।

परे तु–'कमलमनम्भसि, कमले च कुवलये तानि च कनकलतिकायाम्।'

'कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम्॥'

'कलशे परममहत्त्वं तिमिरस्तोमस्य सोमसहवासः॥' इत्याद्यति-शयोक्त्यलङ्कारप्रथमप्रकारोदाहरणनिर्विशेषतयाऽत्रापि ललनाऽऽद्युपमेयनिगरणपूर्वक-सिन्ध्वाद्युपमानाध्यवसानेन सिन्ध्वादिपदानां ललनाऽऽदौ साध्यवसानगौणलक्षणा, उपमानोपमेययोस्तादात्म्यातिशयप्रतिपादनमेव प्रयोजनं व्यज्यमानं वाच्यमुपकुर्वद् गुणीभवतीति वदन्ति।

अन्ये तु–रूपकानुप्राणितां व्यङ्ग्योपस्कृतामभिधेयभूतामिहाऽतिशयोक्तिं मन्यन्ते। अत एवालङ्कारान्तरसङ्कीर्णवाच्यातिशयोक्तेरिदमेवोदाहरणं दास्यत आचार्यचरणैः। चन्द्रालोककृतस्तु—इमामेव 'रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।' इति लक्षयित्वा 'अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।

अभाललोचनः शम्भुर्भगवान् बादरायणः॥' इत्युदाजह्रुः।

रसस्य प्राधान्यात्तु ध्वनित्वमपीहास्त्येवेति न क्षतिः, वस्तुरूपव्यङ्ग्यस्य गुणीभावप्रदर्शनस्यैवोपक्रान्तत्वात्।

अथातिरस्कृतवाच्यशब्दसमर्पितवस्तुरूपव्यङ्ग्यस्येतराङ्गतायां गुणीभूतव्यङ्ग्यमुदाहर्तुमाख्याति—

अतिरस्कृतवाच्येभ्योऽपि शब्देभ्यः प्रतीयमानस्य व्यङ्ग्यस्य कदाचिद् वाच्यप्राधान्येन चारुत्वापेक्षया गुणीभावे सति, गुणीभूतव्यङ्ग्यता।

वाच्यव्यङ्ग्ययोः प्राधान्ये हि चारुत्वप्रकर्ष एव हेतुरित्युक्तमेव प्राक्।

उदाहरति—

यथोदाहृतम्—'अनुरागवती सन्ध्या' इत्येवमादि।

समासोक्त्यलङ्कारोदाहरणपटलम् । इहाबाधितवाच्यकसन्ध्यादिवसशब्दाभ्यां व्यङ्ग्यदम्पतिव्यवहारारोपपरिष्कृतयोः सन्ध्यादिवसयोः प्रतीतिरिति व्यङ्ग्यस्य वाच्यप्रसाधकत्वेनाङ्गत्वम् ।

अथ व्यङ्ग्यपदवीमारूढस्यापि वस्तुनः केनचित् पदेनाभिधीयमानत्वे गुणीभावाद् वाच्यसिद्ध्यङ्गव्यङ्ग्यनामकं गुणीभूतव्यङ्ग्यस्य द्वितीयं प्रकारमुदाहर्तुमभिदधाति—

तस्यैव स्वशब्दमुक्त्या प्रकाशीकृतत्वेन गुणभावः यथोदाहृतम्—'संकेतकालमनसम्' इत्यादि ।

तस्यैव व्यङ्ग्यवस्तुन एव । अत्र कमलनिमीलनव्यङ्ग्यस्य गोपनचारिमभृतः सन्ध्यासमयरूपवस्तुव्यङ्ग्यस्याकूतशब्देनोद्घाटितत्वात् तदर्थोपपादकत्वाच्च गुणीभावः । न हि प्रतीयमानसायंसमयमन्तरेणाकूतशब्दार्थ उपपत्तिं भजति । आदिशब्देन 'गच्छाम्यच्युत' इत्यादि ज्ञेयम् ।

अथ रसादिरूपव्यङ्ग्यस्य गुणीभावे रसवदाद्यलङ्काररूपं गुणीभूतव्यङ्ग्यमुदाहर्तुमभिदधाति—

रसादिरूपव्यङ्ग्यस्य गुणीभावे रसवदलङ्कारविषयः प्राक् प्रदर्शितः ।

प्राग् द्वितीयोद्द्योते—'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।' इत्यादिना प्रदर्शितः । तत्र रसस्य गुणीभावे रसवत्, भावस्य प्रेयः, रसाभास-भावाभासयोरूर्जस्वि, भावशान्तेः समाहितम्, भावोदयस्य भावोदयम्, भावसन्धेर्भावसन्धि, भावशबलताया भावशबलत्वं चालङ्कारो भवति ।

नन्वपरिच्छिन्नास्वादात्मतया नितरां प्रधानस्य रसादेः कथमन्याङ्गता ? कथञ्चाप्राधान्येऽपि न चमत्कारविच्छेदः ? इत्याशङ्क्य निराकरोति—

तत्र च तेषामाधिकारिकवाक्यापेक्षया गुणीभावो विवाहप्रवृत्तभृत्यानुयायिराजवत् ।

तत्र च रसवदाद्यलङ्कारेषु । तेषां रसादीनाम् । स्वतः प्राधान्येऽपि यथा विवाहे प्रवृत्तं भृत्यमनुगच्छतो राज्ञोऽप्राधान्यम्, तथैव प्रधानतमानामपि रसादीनाम्, आधिकारिको व्यापको यो वाक्यप्रतिपाद्यो वृत्तान्तभागो वस्तुभागो वा, तं प्रति गुणीभावः, स्वकीयं च प्राधान्यं भवतीति सारम् ।

वाक्यपदं तत्प्रतिपाद्यपरम्, वाक्यमात्रनिरूपिताप्राधान्यस्य रसादीनामसम्भवात् ।

अथालङ्काररूपव्यङ्ग्यस्य गुणीभावे गुणीभूतव्यङ्ग्यमुदाहर्तुं व्याहरति—

व्यङ्ग्यालङ्कारस्य गुणीभावे दीपकादिर्विषयः ।

'चन्द्रमऊएहिं णिसा' इत्यादौ दीपकालङ्कारे चन्द्रमयूख-सज्जनयोः, निशाकाव्यकथयोश्चोपमाऽलङ्कारो व्यज्यमानोऽप्युपमानोपमेययोर्वाच्ययोः सम्बन्धोपपादकतया साधक इति वाच्यसिद्ध्यङ्गव्यङ्ग्यरूपगुणीभूतव्यङ्ग्यभेदोऽयम् । आदिपदेन रूपक-परिणामप्रभृतयो ग्राह्याः । तच्च प्रागुपपादितमेव ।

गुणीभूतव्यङ्ग्यकाव्यस्य विपुलविषयतां दर्शयन्नुपदिशति—

तथा—

'प्रसन्नगम्भीरपदाः काव्यबन्धाः सुखावहाः ।
ये च तेषु प्रकारोऽयमेवं योज्यः सुमेधसा ॥ ९२ ॥'

प्रसन्नानि प्रसादवन्ति, गम्भीराणि व्यङ्ग्यबाहुल्येन गुर्वर्थानि विपुलार्थव्यञ्जकानीति यावत्, पदानि येषु तादृशाः, सुखावहाः सहृदयाह्लादकाः, ये काव्यानां बन्धाःप्रबन्धाः सन्ति स्युर्वा, तेषु काव्यप्रबन्धेषु, सुमेधसा, अयं गुणीभूतव्यङ्ग्यरूपः प्रकारः, एवमुक्तरूपत्रयेण योज्य इत्यर्थः ।

ध्वन्यसम्भवे गुणीभूतव्यङ्ग्ययोजनयाऽपि कविसहृदयानामात्मलाभः । इतरथा तूपहास्यतैवेति भावः ।

तदाचष्टे—

ये चैते परिमितस्वरूपा अपि प्रकाशमानास्तथा रमणीयाः सन्तो विवेकिनां सुखावहाः काव्यबन्धाः, तेषु सर्वेष्वेवायं प्रकारो गुणीभूतव्यङ्ग्यो नाम योजनीयः ।

स्वरूपस्य शब्दस्य पारिमित्येन सङ्क्षेपेण, अर्थस्य च विशदत्वेन काव्यबन्धानां रमणीयता ज्ञेया ।

योजनाशिक्षाऽर्थमुदाहरति--

यथा—

समुद्रं कश्चन सपरिवारं वर्णयति--

'लच्छी दुहिदा जामाउओ हरी तंस घरिणिआ गङ्गा ।
अमिअ-मिअङ्का अ सुआ अहो कुडुम्बं महोअहिणो ॥

'लक्ष्मीर्दुहिता जामाता हरिस्तथा गृहिणी गङ्गा ।
अमृतमृगाङ्कौ च सुतावहो कुटुम्बं महोदधेः ॥' इतिच्छाया ।

लक्ष्मीः श्रीरेव दुहिता, हरिर्विष्णुरेव जामाता, तथा गङ्गा भागीरथ्येव गृहिणी पत्नी, च तथा अमृतं पीयूषं मृगाङ्कश्चन्द्रश्चैव सुतौ, इति, अहो निस्सीमविस्मयनिदानं, महोदधेः समुद्रस्य, कुटुम्बं पोष्यपटलं परिवार इति यावत्, वर्तत इत्यर्थः ।

तथा च–'कुटुम्बं पोष्यवर्गे च' इत्यमरमाला । 'अमृतं वारुणी' इति विवरणं तु महामाहेश्वरमतानुकूलं प्रतिभाति ।

इह लक्ष्मीपदेन सकलस्पृहणीयता, विष्णुपदेन परमैश्वर्यं चतुर्वर्गप्रदत्वं च, गङ्गापदेन सर्वदा सर्वजनसमीहितसमर्पणव्यसनिता, अमृतपदेन दुस्सहनिधनक्लेशोपशमकत्वम्, मृगाङ्कपदेन सुधामयदीधितिसमानन्दितभुवनत्वं च व्यज्यमानं यद् वस्तु, तद् 'अहो कुटुम्बम्' इत्युक्त्यभिहितविस्मयस्याधिक्यं पुष्यदङ्गतामेति, महोदधिकुटुम्बस्य दर्शितप्रतीयमानविशेषणसम्पर्केणैवाद्भुततमत्वसम्पत्तेरिह परिकरालङ्कारो गुणीभूतव्यङ्ग्यता च काव्यस्य सुधीभिरवधार्यताम् ।

न चात्रैव, किन्तु सर्वत्र वाच्यालङ्कारेषु गुणीभूतव्यङ्ग्यवैशिष्ट्येन चारुता सम्पद्यत इत्याह--

'वाच्यालङ्कारवर्गोऽयं व्यङ्ग्यांशानुगमे सति ।
प्रायेणैव परां छायां बिभ्रल्लक्ष्ये निरीक्ष्यते ॥ ६३ ॥'

अयं वाच्यालङ्काराणामुपमादीनां वर्गः समुदायः, व्यङ्ग्यांशस्य गुणीभूतव्यङ्ग्यस्य वस्तुनोऽलङ्कारस्य वा, अनुगमे सम्पर्के सति, प्रायेण बाहुल्येन, परामतिशयितां, छायां चमत्कारितां, बिभ्रद्दधानः, लक्ष्य उदाहरणे, निरीक्ष्यते दृश्यत इत्यर्थः ।

तदाख्याति--

वाच्यालङ्कारवर्गोऽयं व्यङ्ग्यांशस्यालङ्कारस्य वस्तुमात्रस्य वा यथायोगमनुगमे सति छायाऽतिशयं बिभ्रल्लक्षणकारैरेकदेशेन दर्शितः । स तु तथारूपः प्रायेण सर्व एव परीक्ष्यमाणो लक्ष्ये निरीक्ष्यते ।

यथायोगमौचित्यानुसारं क्वचिदलङ्कारस्य क्वचिद् वस्तुमात्रस्य च सम्बन्धः। एकदेशेन स्थालीपुलाकन्यायेन दर्शितः। सर्वेषां पृथक् प्रदर्शनं गुरुतरत्वादशक्य-मेव। स वाच्यालङ्कारवर्गस्तु तथारूपो व्यङ्ग्यानुप्राणितः। परीक्ष्यमाणो विवेचना-गोचरीक्रियमाणः।

लक्ष्यविवेचनायां वाच्यालङ्काराणां सर्वेषां गुणीभूतव्यङ्ग्यमहिम्नैव प्रायश्चारु-त्वातिशयो विभाव्यत इति भावः।

उपपादयति—

तथा हि–दीपकसमासोक्त्यादिवदन्येऽप्यलङ्काराः प्रायेण व्यङ्ग्यालङ्कारान्तरवस्त्वन्तरसंस्पर्शिनो दृश्यन्ते।

व्यङ्ग्यं वस्त्वन्तरमलङ्कारान्तरं चात्मप्रसाधनाय स्पृशन्तीति तथोक्ता वाच्या-लङ्काराः। दीपके व्यङ्ग्योपमाऽलङ्कारस्य, समासोक्तौ व्यङ्ग्याप्रस्तुतवस्तुनश्च सम्ब-न्धेन यथा वाच्यालङ्कारोपस्कारः, तथाऽन्यत्रापीत्यभिसन्धिः।

समर्थयति--

यतः प्रथमं तावदतिशयोक्तिगर्भता सर्वालङ्कारेषु शक्यक्रिया। कृतैव च सा महाकविभिः कामपि काव्यच्छविं पुष्यतीति कथं ह्यतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती, काव्ये नोत्कर्षमावहेत्।

अतिशयोक्तिर्गर्भे मध्ये वस्तुतो मूले येषां तेऽतिशयोक्तिगर्भास्तेषां भावस्त-त्ता। शक्यक्रिया कर्तुं शक्या। स्वे विषयेऽर्थे यदौचित्यं, तेन तदनुसन्धानेन, क्रियमाणा विधीयमाना, अतिशययोगिता चमत्कारप्रकर्षसम्पादकार्थविशेषसम्बन्धिता काव्ये कथमुत्कर्षं नावहेदिति सम्बन्धः।

सर्वेषामेव वाच्यालङ्काराणां गुणीभूतव्यङ्ग्यसङ्गेनैव चारिमप्रकर्षः। तच्च व्यङ्ग्यं क्वचिदलङ्कारलक्षणं क्वचिद्वस्तुरूपं च। तत्र समासोक्त्यादौ वस्तु, दीपकादौ तूपमा-ऽलङ्कारो व्यङ्ग्यतामाश्रयति। अथवा सर्वत्रैवार्थालङ्कारेष्वर्थानां विच्छित्तिविशेषाधाय-कत्वरूपातिशायितत्वसम्पादिकाऽतिशयोक्तिरेव व्यञ्जनागम्याऽनुप्राणिका, तां विना तेषां कविप्रतिभोत्थापितत्वविरहाच्च स्वरूपसम्पत्तिः। अत एव–कालिदासादिमहाक-विप्रबन्धेषु तत्समावेशः प्रायेणेति सारम्।

भामहलक्षणानुसारमतिशयोक्तिमन्यादृशीं मन्यमान उक्तार्थासंगतिं शङ्कते--

भामहेनाप्यतिशयोक्तिलक्षणे यदुक्तम्—

'सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।

यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥' इति ।

याऽतिशयोक्तिः पूर्वं लक्षिता, सा एषा वक्रोक्तिः सर्वत्र सर्वालङ्कारेष्वस्ति वाच्येषु । अनयाऽतिशयोक्त्याऽर्थः प्राचीनकविपरम्परावर्णिततत्वेन पुरातनोक्तोऽपि विशेषेण भाव्यते विलक्षणतयाऽभिनवीक्रियते । अतोऽस्यामतिशयोक्तौ कविना यत्नः कार्यः । यद् अनया विना—एतद्विहीनः, कोऽलङ्कारः, न कोऽपि, चमत्कारविरहादित्यर्थः ।

तदुक्तम्—'वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः ।' इति । वक्रौ यावभिधेयो वाच्यः शब्दश्च, तयोरुक्तिर्वाचां शब्दानां तद्वाच्यानां चालङ्कृतिरिष्टाऽलङ्कारो मत इति तदर्थः ।

वक्रशब्दमयी वक्रार्थप्रतिपादिका चोक्तिर्वक्रोक्तिः । तत्र शब्दार्थयोर्वक्रत्वमलौकिकभङ्गीनिवेशितत्वम् । तच्च काव्याऽलङ्कारेषु सर्वत्राविशिष्टमेव, तद् विनाऽलङ्कारत्वाभावात्, कथंचित्तत्त्वाङ्गीकारेऽपि वैचित्र्यविशेषानाधानात् । यदुक्तमित्यस्य 'तत्राप्ययमेवार्थोऽवगन्तव्यः' इत्यग्रिमेण सम्बन्धः ।

सर्वेषामेव वाच्यालङ्काराणां मूलभूता वाच्यकक्षामतिक्रम्य व्यङ्ग्यसरणिमारूढेति निगूढा चमत्कारप्रसूरतिशयोक्तिरस्तीति भवदुक्तिर्न सङ्गच्छते, भामहोक्तलक्षणानुसारं तस्याः सर्वालङ्कारसामान्यरूपतयाऽपृथग्भूतत्वेन व्यङ्ग्यत्वमूलत्वयोरसम्भवादिति पूर्वपक्षिणोऽभिप्रायः ।

उत्तरमाह—

तत्रातिशयोक्तिर्यमलङ्कारमधितिष्ठति, कविप्रतिभावशात् तस्य चारुत्वातिशययोगः । अन्यस्य त्वलङ्कारमात्रतैवेति—सर्वालङ्कारशरीरस्वीकरणयोग्यत्वेनाभेदोपचारात् सैव सर्वालङ्काररूपेत्ययमेवार्थोऽवगन्तव्यः ।

अधितिष्ठति पोषकत्वेनाश्रयति । अन्यस्यातिशयोक्त्यपोषितस्य । अलङ्कारमात्रता तज्जातीयत्वमेव, न तु तदीयविच्छित्तिविशेषात्मककार्यकारित्वम् । कविप्रतिभोत्थापितत्वाभावे 'गौर्जल्पति' इत्यादौ तु तस्या अपि नालङ्कारता,न वाऽन्यालङ्कारसम्पादकता । सर्वेषामलङ्काराणां शरीरस्य स्वरूपस्य स्वीकरणे निष्पादकत्वेनाङ्गीकरणे निर्माण इति यावत्, योग्या समर्था । अभेदोपचारान्निष्पाद्यनिष्पादकयोस्तादात्म्याध्यवसायात् । सैवातिशयोक्तिरेव ।

अतिशयोऽतिशयिता प्रसिद्धिमतिक्रान्ता उक्तिरतिशयोक्तिरितिलक्षणादलौकिकचमत्काराधायकोक्तिरूपा कविप्रतिभोत्थापिताऽतिशयोक्तिरेव सर्वालङ्काराणामलङ्करणक्रिया निदानम् , तदभावे सन्नप्यलङ्कारोऽसत्कल्प एव, अशाणोल्लीढमणिवत्, तथा च सैव यतः सर्वालङ्काराणां स्वरूपनिष्पादिका, तस्मादतिशयोक्तेरलङ्कारान्तरस्य चायुर्घृतवत् तादात्म्यमुपचर्यत इत्येतदभिप्रायेणैव भामहेन सर्वालङ्काररूपाऽतिशयोक्तिरुक्ता, न तु वास्तविकाभेदाभिप्रायेण। तथा च वस्तुतो भिन्नत्वे सत्युपकारकत्वादतिशयोक्तेरन्यालङ्कारमूलभूतत्वम् , वाचकादिशब्दानुपलम्भेऽपि प्रतीतिगोचरत्वेन व्यङ्ग्यत्वं चास्मदुक्तं नासङ्गतमिति समाधातुस्तात्पर्यम् ।

अलङ्कारान्तरोपकारित्वादतिशयोक्तिं त्रिधा विभजते—

तस्याश्चालङ्कारान्तरसङ्कीर्णत्वं कदाचिद् वाच्यत्वेन, कदाचिद् व्यङ्ग्यत्वेन व्यङ्ग्यत्वमपि कदाचित् प्राधान्येन, कदाचिद् गुणभावेन। तत्राद्ये प्रकारे वाच्यालङ्कारमार्गः। द्वितीये ध्वनावन्तर्भावः। तृतीये तु गुणीभूतव्यङ्ग्यरूपता।

तत्र प्रकारत्रये। आद्ये वाच्यत्वे। द्वितीये प्राधान्येन व्यङ्ग्यत्वे। तृतीये गुणीभावेन व्यङ्ग्यत्वे।

अतिशयोक्त्यलङ्कारो हि—'लावण्यसिन्धुरपरैव हि केयमत्र' इत्यादौ रूपकेण सङ्कीर्णो वाच्यः।

'केलीकन्दलितस्य विभ्रममधोर्धुर्यं वपुस्ते दृशौ,
भङ्गीभङ्गुरकामकार्मुकमिदं भ्रूनर्मकर्मक्रमः।
आपातेऽपि विकारकारणमहो! वक्त्राम्बुजन्मासवः,
सत्यं सुन्दरि! वेधसस्त्रिजगतीसारस्त्वमेकाकृतिः॥' इत्याचार्य-

प्रणीतपद्ये विभ्रममधोरिति रूपकानुप्राणितो वसन्तकामासवानामलौकिकक्रमेण नायिकायां स्थितेर्वर्णनादध्यवसायस्य सिद्धत्वात् प्राधान्येन सूचनीयत्वाच्च ध्वनिरूपः।

'उपोढरागेण' इत्यादौ च प्राग्दर्शितदिशा श्लेषपोषितः समासोक्तिपोषको गुणीभूतव्यङ्ग्यरूप इति त्रयः प्रकारा अतिशयोक्तेरवसेयाः। तत्रादिमप्रकारद्वयस्य प्रकृतानुपयोगित्वेऽपि प्रासङ्गिकमाख्यानम्, अन्यत्रोपकारकत्वात्।

अथास्या गुणीभूतालङ्कारान्तरेभ्यो व्यतिरेकमाह—

अयं च प्रकारोऽन्येषामप्यलङ्काराणामस्ति, तेषां न सर्वविषयः। अतिशयोक्तेस्तु सर्वालङ्कारविषयोऽपि सम्भवतीत्ययं विशेषः।

अयं प्रकारोऽलङ्कारान्तरानुप्रवेशलक्षणस्तत्पोषणरूपः। अन्येषामुपमाऽऽदीनाम्। सर्वेऽलङ्कारा विषया यस्य तादृश इत्यलङ्कारान्तरानुप्रवेशविशेषणम्। सम्भवतीति पूर्वोक्तरीत्याऽभेदोपचारात्।

उपमाऽऽदिभिर्हि मुष्टिमेयानां रूपकादीनामेवानुप्राणनं विधीयते। अनया पुनः 'कोऽलङ्कारोऽनया विना' इत्युक्तेः सर्वेषामेवालङ्काराणामिति वैलक्षण्यमस्या इति सारम्।

कुत्र कीदृशं व्यङ्ग्यं वाच्यालङ्कारमुपकरोतीति प्रश्नं समादधद्, गुणीभूतव्यङ्ग्यविषयवैपुल्यं दर्शयति—

येषु चालङ्कारेषु सादृश्यमुखेन तत्त्वप्रतिलम्भो यथा—रूपकोपमातुल्ययोगितानिदर्शनाऽऽदिषु, तेषु गम्यमानधर्ममुखेनैव यत् सादृश्यं, तदेव शोभाऽतिशयशालि भवतीति ते सर्वेऽपि चारुत्वातिशययोगिनः सन्तो गुणीभूतव्यङ्ग्यस्यैव विषयः। समासोक्त्याक्षेपपर्यायोक्तादिषु तु गम्यमानांशाविनाभावेनैव तत्त्वव्यवस्थानाद् गुणीभूतव्यङ्ग्यता निर्विवादैव।

तत्त्वप्रतिलम्भोऽलङ्कारत्वस्य वैचित्र्यविशेषात्मकस्य प्राप्तिः। उपमायां सादृश्यस्य गम्यमानत्वाभावादुपमापदमत्र तन्मूलकालङ्कारेषु लाक्षणिकम्। यद्वा, रूपकोपमेति रूपकतात्पर्यकमेव। वस्तुतस्तूपमायामपि क्वचित् 'चन्द्र इव मुखम्' इत्यादौ सादृश्यप्रयोजकाह्लादविशेषजनकत्वरूपसाधर्म्यस्य व्यङ्ग्यत्वमेवेति तदर्थमुपायान्तराश्रयणं नोचितम्। तत्र रूपकादिषु साम्यस्य गम्यमानता दर्शितैव।

......................'निदर्शना।

अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः॥' इति

लक्षयित्वा—'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥' इति मम्मटभट्टेनोदाहृतायां निदर्शनायामप्यौपम्यमेव पर्यन्तविश्रान्तिभूमिः आदिपदेनापह्नुतिप्रभृतीनां ग्रहणम्। गम्यमानांशस्य व्यङ्ग्यविशेषस्य, अविनाभावेनैव नियतसम्बन्धेनैव। तत्त्वव्यवस्थानादलङ्कारत्वव्यवस्थितेः। अत्रादिशब्दोऽप्रस्तुतप्रशंसा–परिकरप्रभृतिपरः।

अयं भावः—रूपकादिषूपमाऽलङ्कारो व्यङ्गयो मुखादौ चन्द्रत्वाद्यारोपस्य निमित्तत्वेनोपकरोति। समासोक्त्यादिषु पुनर्द्वितीयार्थरूपं वस्तुव्यङ्गयं तत्तदलङ्कारस्वरूपमेव निष्पादयति, तस्मादेते गुणीभूतव्यङ्गयस्यैव प्रभेदा ज्ञेयाः।

तुशब्दो रूपकादिषु व्यङ्गयस्य किञ्चिदुपकारकत्वमात्रं न त्वलङ्कारस्वरूपान्तःप्रवेशः, समासोक्त्यादौ तु व्यङ्गयविशिष्टवाच्यस्यालङ्काररूपत्वाद् भेद इति सूचयति।

अथ गुणीभूतालङ्कारात्मकव्यङ्गयविषये विशेषं व्याहरति—

तत्र च गुणीभूतव्यङ्गयतायामलङ्काराणां केषांचिदलङ्कारविशेषगर्भतायां नियमः। यथा—व्याजस्तुतेः प्रेयोऽलङ्कारगर्भत्वे।

......................'उक्ता व्याजस्तुतिः पुनः।

निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः॥' इतिदर्पणोक्तलक्षणा व्याजोक्तिः प्रेयोऽलङ्कारस्य गुणीभाव एव सम्भवति, तत्र वाच्यनिन्दया व्यज्यमानायाः स्तुतेरौपयिकत्वेन स्तावकनिष्ठ–स्तवनीयविषयकरतेरप्राधान्येन प्रतीतेः। यथा ममान्योक्तिसाहस्र्याम्—'को वा दैवततटिनि! त्वत्परिचर्यामनोरथं कुर्यात्।

भवसेविताऽप्यनुपलं तनोषि यत्त्वं भवच्छेदम्॥'

इत्यादौ व्यङ्गयभावे लब्धगुणोभावे प्रेयोऽलङ्कारो भवतीत्युक्तमेव।

अपरं विशेषमाचष्टे—

केषांचिदलङ्कारमात्रगर्भतायां नियमः। यथा-सन्देहादिनामुपमागर्भत्वे।

मात्रशब्दोऽत्रालङ्कारसामान्यपरः। ननूपमाया विशिष्य ग्रहणात् का तत्सङ्गतिरिति चेत्? न, उपमापदस्य तन्मूलकालङ्कारपरत्वस्य विवृतत्वात्। वस्तुतस्तु सन्देहादिषु सादृश्यमूलकालङ्कारेषूपमाया एव मूलत्वं, न तु रूपकादीनाम्। तथा हि—'मुखं चन्द्रो वा' इति संशयो मुखधर्मिकचन्द्रत्वारोपरूपरूपकप्रतीतौ दुर्घटः। एवमन्यत्रापि विवेचनीयम्। ग्रन्थयोजना तु नानाऽलङ्कारभूमिकाग्रहणसामर्थ्यादुपमाऽप्यलङ्कारसामान्यमेवेत्यभ्युपेत्यैव विधेया।

तृतीयं विशेषमाह—

केषांचिदलङ्काराणां परस्परगर्भताऽपि सम्भवति। यथा—दीपकोपमयोः। तत्र दीपकमुपमागर्भत्वेन प्रसिद्धम्। उपमाऽपि कदाचिद् दीपकच्छायाऽनुयायिनी। यथा—मालोपमा। तथा हि—'प्रभामहत्या शिखयेव दीपः' इत्यादौ स्फुटैव दीपकच्छाया लक्ष्यते।

प्रसिद्धं प्रागेव प्रतिपादितम् । कुमारसम्भवप्रथमसर्गे—

…………………'त्रिमार्गयेव त्रिदिवस्य मार्गः ।

संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥'

इतिश्लोकस्यावशेषः । अत्र हि हिमवत उपमेयस्य दीपाद्यनेकोपमानदर्शनात्—'मालोपमा यदेकस्योपमानं बहु दृश्यते' इति लक्षिता मालोपमा पूर्णा । तस्याश्च पूतत्वविभूषितत्वरूपैकसाधारणधर्मेण प्रस्तुतस्य हिमवतोऽप्रस्तुतानां दीपादीनां चाभिसम्बन्धादुत्थितं दीपकमुपस्करोतीति तद्गर्भताऽपि, व्यक्तैव । न चान्योऽन्याश्रयः, उपमायाः सर्वत्र दीपकानपेक्षणात्, 'चन्द्र इव मुखम्' इत्यादिधर्मलुप्तोपमाप्रकारेषु दीपकानुपलम्भात् ।

उपसंहरति—

तदेवं व्यङ्ग्यांशसंस्पर्शे सति चारुत्वातिशययोगिनो रूपकादयोऽलङ्काराः सर्व एव गुणीभूतव्यङ्ग्यस्य मार्गः। गुणीभूतव्यङ्ग्यत्वं च तेषां तथाजातीयानां सर्वेषामेवोक्तानुक्तानां सामान्यम् । तल्लक्षणे सर्व एवैते सुलक्षिता भवन्ति ।

तेषां रूपकादीनामुपमाऽऽदिव्यङ्ग्यसम्बन्धितया प्रसिद्धानाम् । तथाजातीयानां व्यङ्ग्यसम्बन्धित्वेन तत्सदृशानाम् । उक्तानां दीपकतुल्ययोगिताप्रभृतीनाम्, अनुक्तानां सन्देहादीनाम् । गुणीभूतव्यङ्ग्यत्वं सर्वेषामेव सामान्यं साधारणम् । रूपकाद्यलङ्काराणां हि चारुत्वातिशयसम्बन्धे व्यङ्ग्यसम्बन्ध एव हेतुः, तेन सर्वेऽमी गुणीभूतव्यङ्ग्यस्य प्रभेदाः ।

इदमुक्तं भवति—'गौरिव गवयः' इत्यादावुपमा, 'आदित्यो यूपः' इत्यादौ रूपकम्, 'स्थाणुर्वा पुरुषो वा' इत्यादौ सन्देहः, शुक्तिकायाम् 'इदं रजतम्' इत्यादौ भ्रान्तिमान्, तत्रैव-'नेयं शुक्तिः किन्तु रजतम्' इत्यादावपह्नुतिः, तत्रैव च-'नेदं रजतम्, अपि तु शुक्तिः' इत्यादौ निश्चयः, 'आयन्तौ टकितौ' इत्यादौ यथासङ्ख्यम्, 'अक्षा भज्यन्तां भुज्यन्तां दीव्यन्ताम्' इत्यादौ श्लेषः, 'पीनोऽयं देवदत्तो दिवा न भुङ्क्ते' इत्यादावर्थापत्तिः, 'स्थाघ्वोरिच्च' इत्यादौ तुल्ययोगिता, 'गामश्वं पुरुषं पशुम्' इत्यादौ पुरुषस्य प्रस्तुतत्वे दीपकम्, 'द्वा सुपर्णा सयुजौ सखायौ' इत्यादावतिशयोक्तिश्च नालङ्कारः, वैचित्र्यविशेषाधायकव्यङ्ग्यसम्बन्धवैधुर्यादिति व्यतिरेकग्रहात्, 'चन्द्र इव मुखम्' 'मुखं चन्द्रः'. 'किमिन्दुः किं

पद्मं किमु मुकुरबिम्बं किमु मुखम्' इत्यादिषु चोपमाऽऽदयोऽलङ्काराः, तत्सद्भावाद्, इत्यन्वयग्रहाच्च, व्यङ्ग्यस्यैवालङ्कारत्वसम्पादकता निर्णीयते। तच्च व्यङ्ग्यं प्रधानं सद् ध्वनिरूपतां दधन्नालङ्कारानुपचिकीर्षति, स्वयमलङ्कार्यत्वात्, किन्तु तन्महिम्ना तथाऽपि तेषामुपकारातिशयो भवत्येव, राजाश्रितानामिव तत्प्रभावेण। अप्रधानञ्च कामिनीकुचकञ्जमिवेषन्निगूढं हारादीनिवोपमाप्रभृतीन् नितरां प्रसाधयतीति गुणीभूतव्यङ्ग्यत्वं सर्वेषामेवालङ्काराणां साधारणो धर्मः। तेन गुणीभूतव्यङ्ग्यस्य निरूपणेनैव सर्वालङ्काराणां निरूपणमिह विहितमवसेयम्।

नन्वमी गुणीभूतव्यङ्ग्यप्रकारा अलङ्काराः, तर्हि पृथक् कथं न लक्षिता इत्याशङ्कायामाह—

एकैकस्य रूपविशेषकथनेन तु सामान्यलक्षणरहितेन प्रतिपदपाठेनेव शब्दा न शक्यन्ते तत्त्वतो निर्ज्ञातुम्, आनन्त्यात्। अनन्ता हि वाग्विकल्पाः, तत्प्रकारा एव चालङ्काराः।

यथा शब्दानामनन्तत्वाद् 'घटः पटः' इत्यादिक्रमेण प्रतिपदपाठेन निर्धारणं कर्तुं न शक्यमिति पतञ्जलिचरणैरपि निर्णीतम्, तथैवालङ्काराणामपीति सामान्येनैव गुणीभूतव्यङ्ग्यत्वधर्मेण ते निरूपिता एवेति तन्निरूपणं नावशिष्यत इति भावः।

न च नायं नियमो यत् सर्वेषामलङ्काराणां व्यङ्ग्यालङ्कारान्तरसम्बन्धोऽस्त्येवेति कुतो गुणीभूतव्यङ्ग्यसामान्यनिरूपणेन तेषामपि निरूपणमवसितमित्याक्षेपं निरस्यति—

गुणीभूतव्यङ्ग्यस्य च प्रकारान्तरेणापि व्यङ्ग्यार्थानुगमलक्षणेन विषयत्वमस्त्येव।

गुणीभूतव्यङ्ग्यशब्देन यत्र वस्तुरूपमलङ्काररूपं रसादिरूपं वा, न त्वलङ्काररूपमेव, किमपि व्यङ्ग्यं वाच्यमुपकरोति, तदुच्यते। तथाचालङ्काररूपव्यङ्ग्यविरहेऽपि, क्वचिद् वस्तुरूपं, क्वचन रसादिरूपं वा व्यङ्ग्यमादाय सर्वेषामलङ्काराणां गुणीभूतव्यङ्ग्यत्वं तन्मात्रलक्षणेन लक्षितत्वं च सङ्गतमेवेत्याकूतम्।

गुणीभूतव्यङ्ग्यं प्रशस्य। व्यवस्थापयन्नुपसंहरति—

तदयं ध्वनिनिःष्यन्दरूपो द्वितीयोऽपि महाकविविषयोऽतिरमणीयो लक्षणीयः सहृदयैः। सर्वथा नास्त्येव सहृदयहृदयहारिणः काव्यस्य स प्रकारो, यत्र न प्रतीयमानार्थसंस्पर्शेन सौभाग्यम्।

ध्वनेर्निःष्यन्दरूपस्ततो निस्सृतो दुग्धादामिक्षावत् किञ्चिन्न्यूनः, न तु नवनी-

तवत् तत्साररूपः, तथासत्यस्यैव प्राधान्यबोधापत्तेः । द्वितीयो गुणीभूतव्यङ्ग्यना-माऽपि काव्यप्रकार इत्यनुषज्यते । महाकवीनां विषयो विधेयः । अतिरमणीय-श्चित्राद्यपेक्षया । लक्षणीया द्रष्टव्यो विवेक्तव्य इति यावत् । काव्यस्य स प्रकारो ना-स्त्येवेति योगः । सौभाग्यं रमणीयता ।

अयमपि काव्यप्रकारश्चमत्कारितायां ध्वनेरीषदेव न्यूनः, अत्रापि चमत्कारि-व्यङ्ग्यसम्बन्धात् । इत्थं च काव्यस्य सर्वेष्वेव प्रकारेषु व्यङ्ग्यप्रयुक्तमेव सौन्दर्य-मिति तदावश्यकमिति भावः ।

'सकलसत्कविकाव्योपनिषद्भूतम्' इति प्रथमोद्द्योते–कथितं व्यङ्ग्यप्राशस्त्यम-वितथं प्रथयितुमाख्याति—

तदिदं काव्यरहस्यं परमिति सूरिभि र्भावनीयम् ।

तदिदं व्यङ्ग्यं तदाहितसौभाग्यं च ।

तदेव निदर्शनदर्शनेन समर्थयति—

'मुख्या महाकविगिरामलङ्कृतिभृतामपि ।
प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम् ॥९४॥'

अलङ्कृतिभृतां वाच्यालङ्कारयुक्तानामपि, महाकवीनां गिरां वाचां काव्याना-मिति यावत् । योषितां स्त्रीणां लज्जेव, एषा साम्प्रतमेवोक्ता प्रतीयमानच्छाया व्यङ्ग्य-संस्पर्शप्रयुक्तसुषमा, मुख्या भूषा प्रधानंभूषणमित्यर्थः ।

अयमाशयः—यथा विपुलालङ्करणाऽपि तरुणी लज्जयैव नितरां विभूष्यते, तस्या अन्तरुन्मिषन्मान्मथविकारनिजुहुषिषाविशेषत्वेन मन्मथविजृम्भारूपत्वात् । अत एव तद्विकारविधुराणां यतीनां दिगम्बरत्वेऽपि न त्रपोन्मेषः । लज्जाऽभावे ह्याशिखं विभूषणाचिताऽपि वारवधूर्न मनागपि कुलाङ्गनाभङ्गीमङ्गीकर्तुं प्रभवति । कवयोऽपि हि—'लज्जापर्याप्तसाधनानि' इति कुलकलत्राणि विशिंषन्ति वर्णयन्ति च—

'कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्,
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति, तदहो वेद्म्यभिनवां,
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥' इत्यादि ।

तथैव कविवाक् सालङ्कारापि व्यङ्ग्यविशेषसङ्गेनैव प्रसाध्यते, अलङ्कारविरहेऽपि तद्योगे चमत्कारानुभवात्, तत्सत्त्वेऽप्येतदभावे तदभावाच्च ।

तदाह—

अनया सुप्रसिद्धोऽप्यर्थः किमपि कामनीयकमानीयते ।

व्यङ्ग्यसम्बन्धेन हि वर्णितचरत्वेन पुरातनोऽप्यर्थोऽभिनवीक्रियते । तदेतद्वक्ष्यति चतुर्थोद्द्योते—'अतो ह्यन्यतमेनापि प्रकारेण विभूषिता । वाणीनवत्वमायाति' इत्यादि ।

उदाहरति—

तद्यथा—

'विस्रम्भोत्था मन्मथाज्ञाविधाने ये मुग्धाक्ष्याः केऽपि लीलाविलासाः ।
अक्षुण्णास्ते चेतसा केवलेन स्थित्वैकान्ते सन्ततं भावनीयाः ॥' इत्यत्र ।

मन्मथस्य त्रिभुवनैकच्छत्रराज्यशासनानुल्लङ्घनीयाज्ञस्य कामस्य, आज्ञाया 'भीह्रीपरिहारपुरस्सरं विह्रियताम्' इत्येवंरूपादेशस्य, विधानेऽनुष्ठाने, मुग्धाक्ष्या वामलोचनायाः ये विस्रम्भात् परिचयमदनोद्रेकजन्यत्रपासाध्वसध्वंसलक्षणविश्वासाद्, उत्था उत्पन्नाः, अक्षुण्णाः प्रतिपलं नवनवीभावेनापरिचितचराः, केऽप्यपूर्वतयाऽपरिच्छिन्नतया वाऽनिर्वचनीयाः, लीलाविलासाः केलिविभ्रमविशेषाः समुल्लसन्तीति शेषः । ते सहृदयैरेकान्ते रहसि, (न तु जनसमाजे, तत्र चित्तविक्षेपसम्भवात्) स्थित्वा, केवलेन निरुद्धवृत्त्यन्तरेण, चेतसा, सन्ततमनवरतं, भावनीयाः पुनःपुनरनुसन्धानलक्षणभावनागोचरीकरणीयाः, न त्वन्यथाऽवगन्तुं योग्या इत्यर्थः ।

अत्र केऽपीतिशब्देनाभिधीयमानोऽनिर्वचनीयरूपोऽर्थः प्रथममस्फुटतयाऽचमत्कारकोऽपि, पश्चादगणेयगुणगौरवप्रयुक्तभणनाशक्यत्वादिलक्षणरमणीयापरिमितव्यङ्ग्यसङ्गेनाद्भुतशोभाशाली विधीयत इत्याह—

केऽपीत्यनेन पदेन वाच्यमस्पष्टमभिदधता प्रतीयमानमक्लिष्टमनन्तमर्पयता का छाया नोपपादिता ? ।

केऽपीत्यस्य पदत्वं वाचकत्वादारोपितम् ।

अथ काकाक्षिप्तव्यङ्ग्यरूपं गुणीभूतव्यङ्ग्यप्रकारं निरूपयति—

'अर्थान्तरगतिः काका या चैषा परिदृश्यते ।
सा व्यङ्ग्यस्य गुणीभावे प्रकारमिममाश्रिता ॥३९॥'

काकुः शोकक्रोधभयादिजनितध्वनिविकारः, तया तत्कृतहठाक्षेपेण, अर्थान्तरस्य व्यङ्ग्यस्य, गतिः प्रतीतिश्च, या-एषा परिदृश्यतेऽनुव्यवसीयते । सा व्यङ्ग्यस्य गुणीभावेऽप्राधान्ये सति, इमं गुणीभूतव्यङ्ग्यरूपं काव्यस्य प्रकारमाश्रिता तदर्थविषयिणीत्यर्थः ।

तथा च—'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः' इत्यमरः ।

तद्वृत्ति—

या चैषा काक्वा क्वचिदर्थान्तरप्रतीतिर्दृश्यते, सा व्यङ्ग्यस्यार्थस्य गुणीभावे सति, गुणीभूतव्यङ्ग्यलक्षणमिमं काव्यप्रभेदमाश्रयते ।

केचित्तु—'अर्थान्तरगतिः' इत्यत्र बहुव्रीहिं मत्वा, काव्यप्रभेदपरमेव पदमिदं व्याचक्षते ।

उदाहरति—

यथा—'स्वस्था भवन्ति ? मयि जीवति धार्तराष्ट्राः ।'

वेणीसंहारप्रथमाङ्के—'स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ।' इतिसूत्रधारोक्तिमाकर्ण्य क्रुद्धेन भीमेनोक्तस्य पद्यस्य चरमांशोऽयम् । पूर्वांशस्तु—

लाक्षागृहानलविषान्नसभाप्रवेशैः,
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्य पाण्डववधू-परिधानकेशान्' इति ।

मयि कौरवकुलधूमकेतौ प्रतिज्ञाततन्निधने भीमसेने जीवति सति, न तु मृते, धार्तराष्ट्रा धृतराष्ट्रस्य सुता दुर्योधनादयः, स्वस्था निर्वृता भवन्ति, न कथमपि स्वस्था भवन्तीत्यर्थः ।

अत्र विकृतप्रश्नकाकुस्वरविशिष्टः 'स्वस्थाः' इति, 'भवन्ति' इति, 'मयि जीवति' इति, 'धार्तराष्ट्राः' इति च शब्दो वाच्यार्थस्य सर्वथाऽसम्भावनीयतामनौचित्यं च सूचयति । तत्र वाच्योपकारकत्वेन व्यङ्ग्यं गुणीभूतम्, तद्विना तात्पर्यानुपपत्त्या वाच्यार्थबोधापर्यवसानादिति गुणीभूतव्यङ्ग्यतैवास्य काव्यस्य ।

काकुरनुपपत्त्या व्यञ्जनासाहाय्येन वाच्योपपादकमर्थान्तरं समाक्षिपतीति सारम्।

तत्रत्यमेव—'मथ्नामि कौरवशतं समरे न कोपाद्,'
दुश्शासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू,

सन्धिं करोतु भवतां नृपतिः पणेन ॥' इति पद्यमप्युदाहरणम् ।

इदमिहावगन्तव्यम्—काकुध्वनि—काक्वाक्षिप्तव्यङ्ग्यरूपगुणीभूतव्यङ्ग्ययोरवैलक्षण्यं न सम्भावनीयम् । यतो यत्र काकुव्यञ्जितार्थमन्तरेणापि वाच्यार्थबोधे पर्यवसन्ने, प्रकरणादिपर्यालोचनया व्यङ्ग्यार्थबोधः, स काकुध्वनिः । यथा तत्रैव—

'तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां,
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं,
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥'

इति पद्ये, 'कुरुषु गुरोः खेद उचितः । मयि तु नोचितः' इत्याकारेण नञ्काकुव्यङ्ग्येन विनाऽपि बाधाभावाद् वाच्यार्थप्रतीतिः सम्पद्यते । यत्र पुनः काकुबोधितव्यङ्ग्यादृते बाधितो वाच्यार्थ एव न बुध्यत इत्यनुपपत्त्योपपादकमर्थान्तरं काक्वा हठादाक्षिप्यते, तद्गुणीभूतव्यङ्ग्यं काक्वाक्षिप्तव्यङ्ग्यं नाम । यथा-'स्वस्था भवन्ति' इत्यादौ । इत्थञ्च तयोर्वैलक्षण्यं व्यक्तमेव । अत एव हठाकृष्टार्थकाक्षिप्तपदसन्निवेशोऽपि सफलः।

तस्यैवोदाहरणान्तरमाचष्टे—

यथा वा—

दृष्टदुश्चरितया जनसमाज एव प्रतिवेशिन्योपहस्यमाना पुंश्चली तां प्रत्युपहसन्ती व्याहरति—

'आम असइओ ओरम पइव्वए ! ण तुए मलिणिअँ सीलम् ।
किं उण जणस्स जाअ व्व चन्दिलं तं ण कामेमो ॥'

'भवामोऽसत्य उपरम पतिव्रते ! न त्वया मलिनितं शीलम् ।
किं पुनर्जनस्य जायेव नापितं तं न कामयामहे ॥' इति च्छाया ।

अयि पतिव्रते ! अपांशुले ! वयम्, असत्यो व्यभिचारिण्यो भवामः स्मः, उपरम त्वं गर्हणान्निवर्तस्व तूष्णीं भवेति यावत् । त्वया शीलं सुचरितं न मलिनितं नैव कलङ्कितम् । किं पुनः किन्त्वसतीभावेऽपि, जनस्यान्यपुरुषस्य (त्वत्पतेः) जायेव पत्नीव (त्वमिव) तं पामरत्वेन प्रसिद्धं नापितं क्षुरोपजीवितयाऽधमं, न कामयामहे न स्पृहयाम इत्यर्थः ।

स्वयं नीचतरनापितेऽनुरक्ताऽपि मां किमाक्षिपसि ? अहन्तु कुलटाऽपि कमपि पुरुषरत्नमेव स्पृहयामीति भावः ।

इह—'भवामोऽसत्यः' इत्यभ्युपगमकाकुः 'तेन का हानिः ?' 'किं च त्वयाऽत्र प्रतिविधेयम् ?' का वा नोऽत्र भीतिः ?' इत्याद्यनन्तमर्थं स्वार्थोपपादकतया गुणीभूतं व्यनक्तीति गुणीभूतव्यङ्ग्यता । एवम् 'उपरम' इति सूचनगर्भा, 'पतिव्रते ?' इति दीप्ता, 'न त्वया मलिनितं शीलम्' इति सगद्गदाकाङ्क्षा, 'किं पुनः' इत्यादिनिराकाङ्क्षगद्गदोपहासगर्भा च काकुरविनयातिशयप्रभृतीनर्थान् सूचयति ।

नन्वेवं काकोरेव व्यापारेषु प्राधान्यं नाभिधाया इत्यत आह—

शब्दशक्तिरेव हि स्वाभिधेयसामर्थ्याक्षिप्तकाकुसहाया सत्यर्थविशेषप्रतिपत्तिहेतुर्न काकुमात्रम् ।

शब्दशक्तिरभिधैव स्वाभिधेयसामर्थ्येन स्ववाच्यान्यथाऽनुपपत्त्याऽऽक्षिप्ता कल्पिता काकुरेव, सहाया सहकारिणी यस्यास्तादृशी, सती, अर्थविशेषस्य तादृशव्यङ्ग्यस्य प्रतिपत्तेरवगमस्य हेतुः, न तु काकुमात्रम् , केवलं काकुर्नेत्यर्थः ।

काकुस्वरसाहाय्येनाभिधैवार्थव्यञ्जनाबोध्यार्थबोधे निमित्तं काकुस्तु सहकारिणीति नैव मुख्यत्वं तस्या इत्यभिसन्धिः ।

कुत इति शङ्कायां वदति—

विषयान्तरे स्वेच्छाकृतात् काकुमात्रात् तथाविधार्थप्रतिपत्त्यसम्भवात् ।

विषयान्तरेऽभिधाशून्यशब्दे । स्वेच्छाकृताद् यादृच्छिकात् ।

इदमाकूतम्—यतो वाचकशब्दवृत्तिरेव काकुव्यङ्ग्यमर्थं बोधयितुं समर्था, ततस्तदर्थप्रत्यायनेऽभिधैव प्रधानं कारणं काकुस्तु सहकारिण्येव । यदि काकोरेव प्राधान्यं स्यात् , तदाऽवाचकशब्दनिष्ठाऽपि काकुस्तमर्थं बोधयेदेव । न च केवला सा बोधयितुं प्रभवति, तस्मात्तस्यास्तत्र सहकारितामात्रं, न तु प्रधानकारणता ।

नन्वेवं सोऽर्थो वाच्य एव स्याद् , अभिधयैव बोधितत्वादित्याक्षेपं समाधत्ते-

स चार्थः काकुविशेषसहायशब्दव्यापारोपारूढोऽप्यर्थसामर्थ्यलभ्य इति व्यङ्ग्यरूप एव ।

स काकुप्रतीयमानोऽर्थस्तु काकुविशेषः साकाङ्क्षादिकाकुरूपशब्दवृत्तिधर्मविशेषः सहायो बोधने सहकारी यस्य तादृशो यश्शब्दस्य व्यापारोऽभिधालक्षणः, तेनोपारूढोऽपि प्रतीतिगोचरीकृतोऽपि, अर्थसामर्थ्यलभ्य आर्थव्यञ्जनाबोध्य इति हेतोर्व्यङ्ग्यरूप एव, न तु वाच्य इत्यर्थः ।

काक्वाक्षिप्तव्यङ्ग्यस्य बोधनाय यद्यप्यभिधाऽपि किञ्चित् प्रसरत्येवं, किन्तु प्रसर-

न्त्यपि सा प्रतीयमानं न स्प्रष्टुमर्हति, तदभिमर्शार्थं मार्थव्यञ्जनामेवानुसरतीति तदर्थस्य न वाच्यत्वमित्यभि ायः ।

तादृशप्रतीयमानस्य गुणीभावमुपपादयति—

वाचकत्वानुगमेनैव तु यदा तद्विशिष्टा वाच्यप्रतीतिः, तदा गुणीभूतव्यङ्ग्यतया, तथाविधार्थद्योतिनः काव्यस्य व्यपदेशः। व्यङ्ग्यविशिष्टवाच्याभिधायिनो हि गुणीभूतव्यङ्ग्यत्वम् ।

वाचकत्वेऽनुगमोऽभिधां प्रति गुणीभावोऽभिधाऽनुसरणं वा व्यञ्जनायाः, तेनैव यदा तद्विशिष्टा व्यङ्ग्येनोपस्कृता वाच्यार्थस्य प्रतीतिर्भवति, तदा तथाविधार्थद्योतिनो वाच्यविशेषणतया गुणीभूतं व्यङ्ग्यं प्रकाशयतः काव्यस्य, गुणीभूतव्यङ्ग्यतया व्यपदेशो भवति । यतस्तत्काव्यं व्यङ्ग्यविशिष्टमेव वाच्यमभिधत्ते, तस्मात्तस्य गुणीभूतव्यङ्ग्यत्वमुचितमेवेत्यर्थः ।

वाच्यार्थविशेषणीभावाद् व्यङ्ग्यस्य गुणीभावः, तादृशव्यङ्ग्यप्रकाशकत्वाच्च काव्यस्य गुणीभूतव्यङ्ग्यत्वमिति सारम् ।

'व्यङ्ग्यस्य' इत्यसमस्तपाठोऽनुचितः, अर्थासङ्गतेः ।

इदं पुनरत्रावगन्तव्यम्—गुणीभूतव्यङ्ग्यकाव्यस्याष्टसु प्रधानप्रकारेषु त्रय एवात्र निरूपिताः। तथा हि अपराङ्गव्यङ्ग्यं यथा रसवदलङ्कारे—'अयं स रशनोत्कर्षी' इत्यादौ । वाच्यसिद्ध्यङ्गव्यङ्ग्यं यथा—'सङ्केतकालमनसम्' इत्यादौ । काक्वाक्षिप्तव्यङ्ग्यं यथा—'स्वस्था भवन्ति' इत्यादौ । पञ्चानां पुनर्निरूपणमवशिष्टमेवेति क्रमेणेह विधीयते । तत्र—

अगूढमविदग्धैरपि वेद्यं व्यङ्ग्यं यत्र, तदगूढव्यङ्ग्यं यथा—

'श्रोपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥' इत्यदः ।

इहोपदिशतेर्व्यङ्ग्यस्य प्रकाशनरूपस्य वाच्यायमानतयाऽगूढत्वम् ।

अस्फुटं सहृदयैरप्यज्ञेयं व्यङ्ग्यं यत्र, तदस्फुटव्यङ्ग्यम्, यथा—

'अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥' इति ।

अत्रादर्शनं वियोगभयं च भवता परिहरणीयमिति व्यङ्ग्यमतिगूढम् ।

सन्दिग्धं वाच्यव्यङ्ग्ययोश्चमत्कारित्वे सन्देहविषयीभूतं प्राधान्यं यस्य, ता-

दृशं व्यङ्ग्यं यत्र तत् सन्दिग्धप्राधान्यम्, यथा—

'हरस्तु किञ्चित् परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।

उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥' इति।

इह विलोचनत्रययुगपद्व्यापारणरूपवाच्यस्य, चुचुम्बिषालक्षणव्यङ्ग्यस्य वा प्राधान्यमिति सन्दिग्धम्। (वाच्येन) तुल्यं प्राधान्यं यस्य तथाभूतं व्यङ्ग्यं यत्र तत् तुल्यप्राधान्यव्यङ्ग्यम्, यथा—

'ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।

जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते॥'

अत्र विमनायितः परशुरामः क्षत्रियक्षयमिव रक्षःकुलक्षयमपि करिष्यतीति दण्डलक्षणस्य व्यङ्ग्यस्य, भूत्युपदेशमित्रत्वोपादानरूपसामलक्षणस्य वाच्यस्य च तुल्यमेव प्राधान्यम्। असुन्दरं वाच्यापेक्षयाऽचमत्कारकं व्यङ्ग्यं यत्र तदसुन्दरव्यङ्ग्यम्, यथा—

'वाणीरकुडङ्ग-' इत्यादि।

अत्र व्यङ्ग्यमसुन्दरमिति प्रागेव प्रतिपादितम्।

ध्वनिगुणीभूतव्यङ्ग्ययोः सङ्कीर्णं विषयं विभजते—

'प्रभेदस्यास्य विषयो यश्च युक्त्या प्रतीयते।

विधातव्या सहृदयैर्न तत्र ध्वनियोजना॥ ४६॥'

युक्त्या-औचित्येन चमत्कृतप्रतीतितारतम्येन, यश्च, अस्य प्रभेदस्य गुणीभूतव्यङ्ग्यप्रकारस्य विषयो लक्ष्यं प्रतीयते। तत्र विषये, सहृदयैर्ध्वनिमात्राभिनिवेशेन, ध्वनेर्योजना न विधातव्येत्यर्थः।

ध्वनिपक्षपातातिशयेन सङ्गतिमतिक्रम्य गुणीभूतव्यङ्ग्यमपि सहृदयैर्ध्वनित्वेन न व्यपदेश्यम्, अपि तु सङ्गतिरालोचनीया। सा तु व्यङ्ग्यस्य वाच्यातिशयित्वे ध्वनित्वम्, तदनतिशायित्वे तु गुणीभूतव्यङ्ग्यत्वमित्येवंरूपाऽसकृत् कथितैव। तामनुसरद्भिरेव व्यवस्था विधेया, न तु ध्वनिपक्षपातेनेत्याशयः।

तदभिदधाति—

सङ्कीर्णो हि कश्चिद् ध्वनेर्गुणीभूतव्यङ्ग्यस्य च लक्ष्ये दृश्यते मार्गः। तत्र—यत्र यस्य युक्तिसहायता, तत्र तेन व्यपदेशः कार्यः। न सर्वत्र ध्वनिरागिणा भवितव्यम्।

मार्गो विषयः। अन्यत् स्फुटम्।

तमेव सङ्कीर्णं विषयमुदाहरति—

यथा—

विवाहाय प्रसाध्यमानां पार्वतीं वर्णयति—

'पत्युश्शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान॥'

कुमारसम्भवे सप्तमसर्गे पद्यमिदम्। सख्या कर्त्र्या, चरणौ रञ्जयित्वा सालक्तकौ कृत्वा, अनेन मद्रञ्जितचरणेन, पत्युश्चन्द्रशेखरस्य चन्द्रकलां मस्तकेन्दुलेखां मानापनयनावसरे सुरतविशेषविधानसमये वा त्वं स्पृश—आमृश ताडय वा, इति परिहासपूर्वं सपरिहासं कृताशीर्दत्ताशीर्वादा, सा पार्वती, माल्येन स्वकण्ठान्निष्कासितया स्रजा, तां तथाऽभिधायिनीं सखीं, निर्वचनं तूष्णीं यथा स्यात्तथा त्रपया किञ्चिदनुक्त्वैव, परिहासाज्जातेर्ष्या वा, जघान ताडयामासेत्यर्थः।

इह चन्द्रकलायाः स्त्रीत्वेन पतिशिरस्समारूढायाः सपत्नीभावेन चरणेन स्पर्शनं ताडनं वोचितमेव। रञ्जने चरणद्वयस्य योगेऽपि, ताडन एकचरणस्यैवौचित्याद् योग इत्येकवचनं प्रतिकूलमिति बोध्यम्। व्यङ्ग्यनिर्देशस्त्वनुपदं करिष्यते।

द्वितीयमुदाहरणमाह—

यथा—

अर्जुनतपोभङ्गायोपगतास्वप्सरस्सु कामपि वर्णयति—

'प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता।
न किञ्चिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम्॥' इति।

किरातार्जुनीयाष्टमसर्गषटकोऽयं श्लोकः। उच्चैरूर्ध्वं स्थितानि (यानि स्वयं तया ग्रहीतुमशक्यान्यत एव याचितानि) कुसुमानि, प्रयच्छता वितरता, दयितेन वल्लभेन, विपक्षगोत्रं सपत्नीनामधेयं लम्भिता प्रापिता तन्नाम्नाऽऽहूतेति यावत्, मानिनीर्ष्यावती सती न किञ्चिदूचे किमपि नावोचत्, तूष्णीं तस्थाविति यावत्, किन्तु तदीर्ष्यया बाष्पाकुललोचनाऽश्रुपूर्णनयना, केवलं पदा चरणेन भुवं लिलेख बिभेदेत्यर्थः।

तथा च—'गोत्रं नाम्न्यचले कुले' इति विश्वः।

श्लोकयुगलोपादानं सहैव सङ्गमयति—

अत्र 'निर्वचनं जघान' 'न किञ्चिदूचे' इति प्रतिषेधमुखेन व्यङ्ग्यस्यार्थस्योक्त्या किञ्चिद्विषयीकृतत्वाद् गुणीभाव एव शोभते ।

प्रथमश्लोके 'निर्वचनं जघान' इत्यनेन लज्जाऽवहित्थाजन्येर्ष्यासौभाग्याभिमानादिव्यज्यमानमपि 'निर्वचनम्' इत्युक्त्या वचननिषेधबोधनद्वाराऽभिहितायाः कुमारीजनोचिताप्रतिपत्तेरुपकारकतयाऽङ्गं भवतीति गुणभूतमेव । लज्जाऽऽदिभिरप्रतिपत्तिः, तया च तूष्णीम्भावो जन्यते कुमारीजनेष्वित्युपकार्योपकारकभावो नापह्नुतः ।

द्वितीयश्लोकेऽपि—'न किञ्चिदूचे' इत्यनेन प्रणयसत्करणप्रसरेऽयं तामेव स्मरतीति मानप्रकाशनमेवात्रोचितमिति प्रणयकोपप्रकर्षो व्यज्यमानोऽपि कथनाभावरूपं वाच्यमेवोपपादयन्नङ्गीभवतीति गुणीभावमभ्युपैति । मन्युरेव हि वाचय्यँमताया मूलमितीहापि पूर्ववदङ्गत्वं नासङ्गतम् ।

इहोक्त्या व्यङ्ग्यस्य किञ्चिदेव विषयीकरणमिति व्यङ्ग्यत्वं सर्वथा ततो नापसरति । अन्यथा वाच्यत्वमेवापतेदित्याकलनीयम् ।

ध्वनिविषयं पृथक्कुर्वन् निगमयति—

तस्माद् यत्रोक्तिं विना व्यङ्ग्योऽर्थस्तात्पर्येण प्रकाशते, तत्र तस्य प्राधान्यम् । यथा—'एवंवादिनि देवर्षौ' इत्यादौ । इह पुनरुक्तिभङ्ग्याऽस्ति वाच्यस्यापि प्राधान्यम् । तस्मान्नात्रानुरणनरूपव्यङ्ग्यध्वनिव्यपदेशो विधेयः ।

उक्तिं स्ववाचकशब्दनिर्देशं विना । तात्पर्येण व्यञ्जनया ।

'एवंवादिनि' इत्यादौ लज्जाऽऽदिपदाभावे मुखनमनाद्यनुभावाभिव्यज्यमाना लज्जा प्राधान्यं श्रयन्ती ध्वनित्वव्यपदेशहेतुः । 'पत्युः' इत्यादौ 'प्रयच्छता' इत्यादौ च 'निर्वचनम्' 'न किञ्चिदूचे' इत्युक्तिभङ्ग्या दर्शितदिशा स्पृश्यमानत्वाद् व्यङ्ग्यस्य न प्राधान्यम्, किन्तु गुणीभावाद् गुणीभूतव्यङ्ग्यत्वमेव ।

'अपिशब्दो भिन्नक्रमः प्राधान्यमित्यनेनान्वेति । तेन वाच्यस्य प्राधान्यमपीत्यर्थः । अपिना रसापेक्षयाऽप्राधान्यं सूच्यते । इत्थञ्च संलक्ष्यक्रमविचार एवात्र ध्वनित्वाभावः । असंलक्ष्यक्रमविचारे तु तत्त्वमक्षतमेव । अत एव ध्वनेरनुरणनेत्यादिविशेषणं सङ्गच्छते' इत्येके ।

परे तु—'अपिशब्दस्य यथाश्रुतस्थानस्थत्वेऽपि, वाच्यस्यापि प्राधान्यमि-

त्युक्त्याऽसंलक्ष्यक्रमव्यङ्ग्यस्यापि प्राधान्यमायातमेवेति विफला भिन्नक्रमत्वाङ्गीकृतिः' इति वदन्ति ।

असंलक्ष्यक्रमव्यङ्ग्याभिप्रायेण गुणीभूतव्यङ्ग्येऽप्यत्र ध्वनित्वमस्त्येवेत्याह—

'प्रकारोऽयं गुणीभूत-व्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्य-पर्यालोचनया पुनः ॥ ६७ ॥'

अयं गुणीभूतव्यङ्ग्योऽपि काव्यस्य प्रकारो रसादीनामसंलक्ष्यक्रमव्यङ्ग्यानां तात्पर्यपर्यालोचनया व्यञ्जनापेक्षया पुनर्ध्वनिरूपता धत्ते, ध्वनिर्भवतीत्यर्थः ।

संलक्ष्यक्रमव्यङ्ग्यापेक्षया गुणीभूतव्यङ्ग्योऽपि रसादिव्यङ्ग्यापेक्षया ध्वनिरेव भवति, रसादीनां सर्वतः प्राधान्यस्य नैसर्गिकचमत्कारोत्कर्षवत्त्वेन प्ररूढत्वादिति तात्पर्यम् ।

तन्निगदति—

गुणीभूतव्यङ्ग्योऽपि काव्यप्रकारो रसादितात्पर्यपर्यालोचनेन पुनर्ध्वनिरेव सम्पद्यते ।

उदाहरति—

यथा—अत्रैवोदाहृतेऽनन्तरश्लोकद्वये ।

'पत्युः' इत्यादौ 'प्रयच्छता' इत्यादौ च । उभयत्र रसप्राधान्यापेक्षया ध्वनित्वमस्त्येवेति विभावनीयम् ।

पुनरुदाहरति—

यथा—

मानिनीं राधामनुनयन्तं श्रीकृष्णं प्रति तदुक्तिं पल्लवयन् कविः कमप्याशिषा संवर्धयति—

'दुराराधा राधा सुभग ! यदनेनापि मृजत-
स्तवैतत्-प्राणेशाजघनवसनेनाश्रु पतितम् ।
कठोरं स्त्रीचेतस्तदलमुपचारैर्विरम हे !
क्रियात् कल्याणं वो हरिरनुनयेष्वेव मुदितः ॥

'हे सुभग ! सुन्दर ! कृष्ण ! यद्-अनेन प्रत्यक्षीभूतेन प्राणेशाया मदन्यप्रियतमायाः, जघनवसनेन परिधानीयपटेन भ्रमादानीतेन, एतत् पतितं ममाश्रु मृजतः

प्रोञ्छतस्तव, राधासौन्दर्यसौभाग्याद्यभिमानवती वृषभानुसुताऽहं दुराराधा दुःखेनाराद्धुं योग्या प्रसादयितुमनर्हेति यावत्। यतः स्त्रीचेतो योषितां हृदयं कठोरं कर्कशं परिभवेनोद्दीपितं सदनुनयासहिष्णु भवति। तत् ततः उपचारैर्दाक्षिण्यप्रयुक्तकृतकानुकूलाचरणैस्ते, अलं न किमपि फलं भविष्यतीति शेषः। अतो विरम उपचारकरणान्निवृत्तो भव' एवमित्थम्, अनुनयेषु प्रसादनेषु विधीयमानेषु, उदितो राधयोक्तो, हरिः कृष्णो वो युष्माकं कल्याणं क्रियादित्यर्थः।

'मृजू' धातोः शत्रन्तात् 'क्ङित्यजादौ वेष्यते' इति वार्तिकेन वृद्धिविकल्पविधानेन 'मृजतः' इति सिध्यति।

अत्र हि सुभगत्वेन कान्ताभिः क्षणमपि विहातुमशक्यत्वं बहुवल्लभत्वयोग्यत्वं च, प्रत्यक्षतया वसनस्यानपह्नवनीयत्वं प्रियतमासम्बन्धित्वेन सप्रेमधारणीयत्वं, विपक्षनायिकायाः कोपौचित्यं च, तदगोपनेन तत्रादराधिक्यं त्रपात्यजनं च, राधेतिस्वनामोच्चारणेन परिभवासहिष्णुत्वप्रभृति, दुराराधत्वेन मानदार्ढ्यम्, अपराधोग्रत्वं च, अश्रुणः पतितत्वेनानपरोधनीयत्वम्, मार्जनेन तस्य प्रत्युत धारासहस्रवाहित्वम्, स्त्रीपदेन प्रणयाद्यनभिज्ञत्वम्, चेतसः कठोरत्वेन नैसर्गिकसौकुमार्यत्यागात् प्रसादनानर्हत्वम्, ईदृशदुर्दशाऽनुभवेऽप्यस्फुटनौचित्यञ्च, उपचाराणां बाहुल्येन नायकस्य चाटुकपटपाटवम्, बहुवचनेनानुनयस्य बाहुल्येन नेतुरेतादृशावस्थाभूयस्त्वं नायिकायाः सौभाग्यं च विपुलं सूच्यमानं वाच्यमेवोपस्करोतीति तदादाय काव्यस्य गुणीभूतव्यङ्ग्यता। ईर्ष्याविप्रलम्भशृङ्गारं प्राधान्येन व्यज्यमानमपेक्ष्य तु ध्वनित्वमिति पूर्ववदुभययोगोऽत्रापि बोध्यः।

एवमेवान्यत्रापि गुणीभूतव्यङ्ग्यत्वे प्रसिद्धेऽपि रसाद्यपेक्षया ध्वनित्वं भवतीति दर्शयति—

एवंस्थिते च—'न्यक्कारो ह्ययमेव' इत्यादिश्लोके निर्दिष्टानां पदानां व्यङ्ग्यविशिष्टवाच्यप्रतिपादनेऽप्येतद्वाक्यार्थीभूतरसापेक्षया व्यञ्जकत्वमुक्तम्।

एवमुक्तप्रकारेण ध्वनिगुणीभूतव्यङ्ग्ययोर्विषयविभागे स्थिते सति। निर्दिष्टानां प्रागुक्तानां पदानां 'न्यक्कारः' इत्यादीनाम्। व्यङ्ग्यविशिष्टवाच्यस्य व्यङ्ग्योपस्कृतवाच्यस्य, प्रतिपादनेऽपि। एतद्वाक्यार्थीभूतस्य समस्तश्लोकप्रधानव्यङ्ग्यस्य, रसस्य वीरस्य, अपेक्षया, व्यञ्जकत्वं ध्वनित्वमुक्तं भवतीति शेषः।

न्यक्कारइत्यादिश्लोकघटकपदानामप्रधानव्यङ्ग्यव्यञ्जकत्वेन गुणीभूतव्यङ्ग्यत्वम्, सम्पूर्णश्लोकस्य तु प्रधानतमवीररसव्यञ्जकत्वेन ध्वनित्वमस्तीति विषयविभागेनोभयोः समावेश इति सारम्।

तत्पद्यघटकपदानामज्ञानादर्थान्तरसंक्रमितवाच्यध्वनित्वं मन्यमानान् शिक्षयति—

न त्वेषां पदानामर्थान्तरसङ्क्रमितवाच्यध्वनिभ्रमो विधातव्यः, विवक्षितवाच्यत्वात् तेषाम्। तेषु हि व्यङ्ग्यविशिष्टत्वं वाच्यस्य प्रतीयते, न तु व्यङ्ग्यरूपपरिणतत्वम्। तस्माद् वाक्यं तत्र ध्वनिः, पदानि तु गुणीभूतव्यङ्ग्यानि।

एषामुक्तश्लोकावयवपदानाम्। व्यङ्ग्यविशिष्टं व्यङ्ग्योपस्कृतम्।

यथैव 'कदली कदली' इत्यादौ द्वितीयकदल्यादिपदानां व्यङ्ग्यविशिष्टवाच्योपस्थापकत्वम्, तथैव 'न्यक्कारः' इत्यादावपि, तेनात्राप्यर्थान्तरसङ्क्रमितवाच्यध्वनिरेव कुतो नेति शङ्कितुराशयः।

यतोऽर्थान्तरसङ्क्रमितवाच्यध्वनिर्लक्षणामूलत्वादविवक्षितवाच्यध्वनेः प्रकारः, ततस्तत्र वाच्योऽर्थो व्यङ्ग्यरूपपरिणतोऽविवक्षितो भवति, न तु विवक्षितः। प्रकृतश्लोके तु पदानां मुख्यार्थबाधाद्यभावाल्लक्षणाविरहेण वाच्यस्याविवक्षितत्वं ब्रुर्य्यान्न स ध्वनिः, किन्तु गुणीभूतव्यङ्ग्यान्येव पदानि, ध्वनिस्त्वसंलक्ष्यक्रम उक्तरीत्या। केवलं 'रावणः' इत्यत्रार्थान्तरसंक्रमितवाच्यध्वनिः। तदेतदुक्तमनुपदमपि स्फुटीभवत्येवेति समाधातुरभिप्रायः।

कारिकायां 'गुणीभूतव्यङ्ग्योऽपि' इत्यपिशब्दार्थं विवरीतुमाह—

न च केवलं गुणीभूतव्यङ्ग्यान्येव पदान्यलक्ष्यक्रमव्यङ्ग्यध्वनेर्व्यञ्जकानि, यावदर्थान्तरसङ्क्रमितवाच्यानि ध्वनिप्रभेदरूपाण्यपि। यथा—अत्रैव श्लोके 'रावणः' इत्यस्य ध्वनिप्रभेदान्तररूपस्य व्यञ्जकत्वम्।

गुणीभूतव्यङ्ग्यान्येव पदानि न रसादिध्वनिव्यञ्जकानि, किन्त्वर्थान्तरसङ्क्रमितवाच्यान्यपि पदानि क्वचित् तद्व्यञ्जकानि। उक्तश्लोके 'रावणः' इति पदमुक्तरीत्याऽर्थान्तरसङ्क्रमितवाच्यमपि रसव्यञ्जकमिति दर्शनात्।

न च सर्वत्र गुणीभूतव्यङ्ग्यस्य ध्वनिरूपतेति वदति—

यत्र तु वाक्ये रसादितात्पर्यं नास्ति, गुणीभूतव्यङ्ग्यैः पदैरुद्भासितेऽपि तत्र गुणीभूतव्यङ्ग्यतैव समुदायधर्मः।

रसाद्यव्यञ्जकत्वे व्यङ्ग्याप्राधान्यात् कथं ध्वनित्वम्, अतो गुणीभूतव्यङ्ग्यत्वमेव व्यङ्ग्याप्राधान्यात् तत्र वाक्ये समुदायस्य पदकदम्बात्मकवाक्यस्य धर्म इत्याशयः।

तमेवोदाहरति—

यथा—

'राजानमपि सेवन्ते विषमप्युपभुञ्जते।
रमन्ते च सह स्त्रीभिः कुशलाः खलु मानवाः॥' इत्यादौ।

कुशला लोकवृत्तनिपुणा मानवाः खलु राजानं परमदुष्करसेवनं नृपमपि सेवन्ते शुश्रूषन्ते। तथा विषं सद्यःप्राणहरं गरलमपि, उपभुञ्जते भक्षयन्ति। तथा च स्त्रीभिर्बहिर्दर्शितप्रणयाभिरन्तःक्षुरधारानिभाभिर्योषाभिरपि रमन्ते विहरन्तीत्यर्थः।

राजसेवनं विषभक्षणं स्त्रीभिःसहविहरणं च क्लेशातिशयसाध्यत्वादिष्टविपरीतपरिणतिभीषणत्वाच्च चतुरैरेव मानवैः साधनीयानि, साधारणैस्तु दुष्कराण्येवेति तात्पर्यम्।

अत्र क्लेशातिशयसाध्यत्वायुक्तव्यङ्ग्यविशिष्टतया वाच्यस्यैव चारुत्वमिति समुदायस्य गुणीभूतव्यङ्ग्यत्वमेव। शान्तरसाङ्गनिर्वेदस्य व्यङ्ग्यत्वेऽपि न प्राधान्यम्, अविवक्षितत्वात्। अतस्तन्निमित्तकोऽपि न ध्वनित्वव्यपदेशः। अविवक्षानिर्णयन्तु वाच्यचमत्कारप्रकर्षः करोति। न चान्यदपि किञ्चिद् व्यङ्ग्यं प्रधानम्।

विवेकश्चायं सर्वथा सार्थक इत्याह—

वाच्यव्यङ्ग्ययोश्च प्राधान्याप्राधान्यविवेके परः प्रयत्नो विधातव्यः, येन ध्वनिगुणीभूतव्यङ्ग्ययोरलङ्काराणां चासङ्कीर्णो विषयः सुज्ञातो भवति। अन्यथा प्रसिद्धालङ्कारविषय एव व्यामोहः प्रवर्तते।

वाच्यस्य प्राधान्ये व्यङ्ग्यस्य विवक्षितत्वे गुणीभूतव्यङ्ग्यम्, वाच्याप्राधान्ये व्यङ्ग्यस्याविवक्षितत्वेऽलङ्कारयोगे च चित्रम्, वाच्याप्राधान्ये व्यङ्ग्यप्राधान्ये च ध्वनिरिति—गुणीभूतव्यङ्ग्यालङ्कारध्वनीनां विविक्तो विषयो वाच्यव्यङ्ग्यप्राधान्याप्राधान्यविवेचनायामेव सुखेन ज्ञातो भवितुमर्हतीति तत्र यतनीयम्। तद्विरहे प्रसिद्धानामुपमाऽऽदीनामलङ्काराणामेव विषये व्यामोहो विमुग्धता भ्रमो वा सम्भवति, अलङ्काराणां बहुलत्वात् सङ्कीर्णविषयत्वाच्चेति भावः।

अलङ्काराणां सङ्कीर्णं विषयमुदाहरति—

तथा हि—

गुणोचितसत्कारमलब्ध्वा निर्विण्णः कश्चिदसमीक्ष्यकारिणं विधिं निन्दति—

'लावण्यद्रविणव्ययो न गणितः क्लेशो महान् स्वीकृतः,
स्वच्छन्दस्य सखीजनस्य वसतश्चिन्ताज्वरो निर्मितः ।
एषाऽपि स्वयमेव तुल्यरमणाभावाद् वराकी हता,
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥' इति ।

धर्मकीर्तेः श्लोकोऽयमित्यग्रे निर्णेष्यते । तन्व्याः कृशाङ्ग्यास्तनुं वपुः, तन्वता सृजता वेधसा ब्रह्मणा, कोऽर्थः किं प्रयोजनं चेतसि विनिहितः स्थापितो विचारितो वेति न जानीम इति शेषः, यद्वा न कोऽपीति शेषः । यतस्तेन लावण्यमेवानर्घ्यतया द्रविणं धनं तस्य व्ययो नाशो न गणितो नावेक्षितः, लावण्यमयतन्वीतनुनिर्माणे तद्व्ययाधिक्ये तत्कोशरिक्ततासम्भवात् । स्वयं महानतिशयितः क्लेशोऽद्भुततमशिल्परचनायां परिश्रमः स्वीकृतः । तथा स्वच्छन्दस्य वियोगजनायिकाविपत्पातागम्भवात् तत्प्रतीकारव्यग्रताविरहाद्, वस्तुतः स्वसौन्दर्यस्पर्धाकररूपवज्जनाभावाद्, विश्रृङ्खलस्य, वसतस्तिष्ठतः, सखीजनस्य, हृदये चिन्ता प्रागुक्तप्रतीकारोपायानुसन्धानम्, यद्वा स्पर्धाप्रयुक्ता समता प्राप्त्युपायानुसन्धानमेव सन्तापकत्वाज्ज्वरो निर्मितो विहितः । तथा—एषा वराकी दयनीया निर्मितललनाऽपि, स्वयं तुल्यस्याद्भुतगुणगणैः स्वसदृशस्य रमणस्य वल्लभस्याभावादनुपलम्भादेव हता विनष्टाऽभूदित्यर्थः ।

धातुरेतत्तन्वीनिर्मितिर्नाल्पव्ययसाध्या, न चेपत्करा, न वोदासीनप्रहर्षिणी, नापि स्वविषयसुखायतिरिति निष्प्रयोजनैव सर्वथेति भावः ।

प्रकृतसङ्गतिं वक्ति—

अत्र व्याजस्तुतिरलङ्कार इति व्याख्यायि केनचित् ।

उक्तरीत्या निष्फलकार्यकारिणो वेधसो निन्दाया वाच्यत्वेन, ततो वस्तुतोऽनन्यसामान्यसौन्दर्यशालिरमणीनिर्माणकौशलसम्पदा तस्य स्तुतौ व्यङ्ग्यमर्यादया पर्यवसन्नायां व्याजस्तुतिरिहालङ्कार इति कस्यचिद् व्याख्यानमित्यर्थः ।

तस्य व्यामोहं प्रकाशयितुं खण्डनं करोति—

तन्न चतुरस्रम्, यतोऽस्याभिधेयस्यैतदलङ्कारस्वरूपमात्रपर्यवसायित्वे सु नश्लिष्टता ।

तत् केनचित् कृतं व्याजोक्त्यलङ्कारव्याख्यानमिह न चतुरस्रं न युक्तम् । यतो यस्माद्धेतोः, अस्याभिधेयस्य एतत्पद्यवाच्यस्य, एतदलङ्कारपर्यवसायित्वे व्याजस्तुतिपरत्वे, सुश्लिष्टता सङ्गतत्वं न भवतीति शेषः ।

चतुरस्रशब्दश्चतुष्कोणवाचकोऽप्यत्र प्रकरणाद्युक्तार्थको व्याख्यातः ।

विकल्पकरणेन तदेवासङ्गतत्वं वाच्यस्योपपादयति—

यतो न तावदयं रागिणः कस्यचिद् विकल्पः, तस्य 'एषाऽपि स्वयमेव तुल्यरमणाभावाद् वराकी हता' इत्येवंविधोक्त्यनुपपत्तेः ।

अयमुक्तश्लोकार्थविषयको विकल्पो वितर्कः, तस्य रागिणो मलिनवासनाभृतोऽनुरागिणो वा कस्यचिन्न सम्भवति, यतस्तस्य 'एषा वराकी हता' इति करुणाऽमङ्गले उपस्थापयतः, 'तुल्यरमणाभावात्' इत्यात्मनो रमणस्य गर्हणां च सूचयतो वचनस्याख्यानमनुचितं भवतीति नैव सुश्लिष्टतेति सारम् ।

द्वितीयं विकल्पमभिदधाति—

नापि नीरागस्य, तस्यैवंविधविकल्पपरिहारैकव्यापारत्वात् ।

रागान्निर्गतो नीरागो वीतरागः, तस्यापि विकल्पो नायमिति योगः । तस्य वीतरागपुरुषस्य, एवंविधानां रागजन्यानां चित्तविक्षेपाणां, परिहारस्त्याग एवैको व्यापारो यस्य स तादृशः, तस्य भावस्तत्त्वं, तस्मात् ।

वीतरागो हि नितरां निर्विण्णो जगदेव तुच्छं मन्यमानः कथमीदृशान् वैषयिकवितर्कान् कुर्यादित्यभिसन्धिः ।

ननु प्रबन्धानुरोधादपि क्वचिदीदृशार्थस्य कल्पनं सम्भवतीत्यत आह—

न चायं श्लोकः क्वचित् प्रबन्ध इति श्रूयते, येन तत्प्रकरणानुगतार्थताऽस्य परिकल्प्यते ।

अयं श्लोकः क्वचित् प्रबन्धे वर्तत इति च न श्रूयते, तस्मात्तदनुरोधादपि तादृशविकल्पार्थकत्वं कल्पयितुमशक्यमेवेति सर्वथा विवेचनायां व्याजस्तुतेरिह न सम्भवः, तेन तदलङ्कारोक्तिरत्र कस्यचिद् व्याख्यातुर्व्यामोहजन्यैवेति तात्पर्यम् ।

स्वमतमुपन्यस्यति—

तस्मादप्रस्तुतप्रशंसेयम्, यस्मादनेन वाच्येन गुणीभूतात्मना, निस्सामान्यगुणावलेपाध्मातस्य, निजमहिमोत्कर्षजनितसमत्सरजनज्वरस्य, विशेषज्ञमात्मनो न कञ्चिदेवापरं पश्यतः परिदेवितमेतदिति प्रकाश्यते ।

तस्मादुक्तहेतोः । अप्रस्तुतप्रशंसा वाच्येनाप्रस्तुतेन तुल्येन रमणीतनुनिर्माणवैफल्येन, व्यङ्ग्यस्य प्रस्तुतस्य तुल्यस्यात्मनिर्मितिनिष्प्रयोजनत्वस्य प्रतीतेस्तदाख्योऽयमलङ्कारः । अनेनैतत्पद्यप्रतिपाद्येन वाच्येन गुणीभूत आत्मा स्वरूपं यस्य तादृशेन, निस्सामान्योऽसदृशो यो गुणस्तस्यावलेपेन गर्वेणाध्मातस्योद्धतस्य, निजमहिम्न आत्ममहत्त्वस्योत्कर्षेणाधिक्येन जनित उत्पादितः समत्सरजनानामन्यगुणद्वेषिलोकानां ज्वरः सन्तापो येन तादृशस्य, आत्मनोऽपेक्षयाऽपरं कञ्चिदपि जनं विशेषज्ञमधिवेत्तारं न पश्यतः, सर्वाधिकम्मन्यस्य, कस्यचित् परिदेवितं निर्वेदवचनमिदमिति प्रकाश्यते सूच्यत इत्यर्थः ।

अयं भावः—अत्र लावण्यद्रविणव्ययगणनाभावेन क्लेशातिशयस्वीकारेण च प्रथमचरणवाच्येन, परिदेवकस्याद्भुतगुणगणमण्डितत्वम्, द्वितीयपदवाच्येन स्वच्छन्दवासिसखीजनचिन्तानिर्माणेन स्वाद्भुतगुणोत्कर्षकृतस्पर्धकजनमत्सरोद्भावनम्, तुल्यवल्लभालाभप्रयोज्यवराकीहतत्वरूपेण तृतीयपादवाच्येन सर्वाधिकज्ञम्मन्यत्वम्, धातृकृततन्वीनिर्मितिनिष्प्रयोजनत्वलक्षणेन चरमचरणवाच्येन स्वनिर्माणनिष्फलत्वप्रयोज्यनिर्वेदपरिदेवितमप्रस्तुतेन तुल्येन प्रस्तुतं तुल्यं यद् व्यज्यते, तस्मादप्रस्तुतप्रशंसैवालङ्कारः ।

तादृशव्यङ्ग्यस्वीकारे बीजमाह—

तथा चायं धर्मकीर्तेः श्लोक इति प्रसिद्धिः । सम्भाव्यते च तस्यैव ।

तथा हि—'लावण्यद्रविणव्ययो न गणितः' इत्यादि—धर्मकीर्तेः' इत्यौचित्यविचारचर्चायां क्षेमेन्द्रः । धर्मकीर्तिश्च न्यायबिन्दुप्रणेता बौद्धभिक्षुः सुबन्धोरपि प्राचीनः । तथा हि वासवदत्तावर्णनप्रसङ्गे—'बौद्धसङ्गतिमिवालङ्कारभूषिताम्' इत्यस्य विवृतौ 'बौद्धसङ्गतिमिव, अलङ्कारो धर्मकीर्तिकृतो ग्रन्थविशेषस्तेनभूषिताम्' इति शिवरामः । सुभाषितावलावपि बहवः श्लोका धर्मकीर्तिनाम्नोद्धृताः ।

तत्सम्भावनायां तादृशोक्तेः प्रायेण दर्शनमेव बीजमित्येतादृशीमन्यां तदुक्तिमुदाहरति—

यस्मात्—

'अनध्यवसितावगाहनमनल्पधीशक्तिनाऽ-
प्यदृष्टपरमार्थतत्त्वमधिकाभियोगैरपि ।
मतं मम जगत्यलब्धसदृशप्रतिग्राहकं,
प्रयास्यति पयोनिधेः पय इव स्वदेहे जराम् ॥' इति ।

न—अध्यवसितमुद्युक्तमवगाहनं निश्शेषतो ज्ञानं पक्षे विलोडनं यस्य तत्, तथा—अनल्पा भूयसी धियश्शक्तिरर्थानां झटितिग्राहकतागुणो यस्य तेनापि जनेन, का कथाऽल्पबुद्धेः ?, अधिकाभियोगैर्बहायासैरपि न दृष्टं नावलोकितं परमुत्कृष्टमर्थ-तत्त्वं पदार्थसार्थः पक्षे कौस्तुभरत्नादिधनं यस्य तादृशम्, तथा जगति भूलोके न लब्धो न प्राप्तः सदृशः पूर्वाश्रयतुल्यः प्रतिग्राहकः स्वीकर्ता, यद्वा पक्षान्तरे न-लब्धः सदृशः प्रतिभटो ग्राहो मकर एव ग्राहको येन तथाभूतं, मम मतं दर्शनं, पयोनिधेः पयो जलमिव स्वदेहे स्वान्तः, जरां जीर्णतां, प्रयास्यति गमिष्यतीत्यर्थः।

अत्रोपमाऽलङ्कारः, स्वमतमाहात्म्यवर्णनादद्भुतश्च रसः । यत्त्वप्रस्तुतप्रशंसाऽ-लङ्कारोऽपीति केचित्, तन्न, विशेषणानां साधारणधर्ममात्रबोधकत्वात्, प्रस्तुताप्रस्तु-तयोरपि वाच्यत्वाच्च ।

उदाहरणप्रदर्शनप्रयोजनं वक्ति—

अनेनापि श्लोकेनैवंविधोऽभिप्रायः प्रकाशित एव ।

यथा समुद्रपयसोऽवगाहनं दूरेऽस्तु, तदध्यवसायोऽपि लोकैर्दुष्कर एव, बुद्धि-मताऽप्युद्यमशतेनापि तद्धनावलोकनमप्यसम्भवि, तादृग्गर्त्तासत्त्वादितरत्र तत्स्वी-कर्ताऽपि दुर्लभः, तद्ग्राहप्रतिद्वन्द्विग्राहोऽपि वा दुर्लभः, तथैव मन्मतस्यापि, तस्मा-द्यथा पयोनिधिपयस्तत्रैव जीर्णं भविष्यति, तथैव मन्मतमपि मय्येव, अन्यत्र ग-मनाभावादितिबोधयतोऽस्य श्लोकस्यापि स्वकीयानन्यसामान्यपाण्डित्यप्रकर्षस्मय-परिदेवन एव तात्पर्य्यमितीदृशस्वपाण्डित्यातिशयप्रकाशिका परिदेवनोक्तिस्त-स्यैव भवतीति—'लावण्यद्रविणव्ययः' इत्याद्युक्तिरपि तत्तात्पर्यिका तस्यैवेति कल्प्यत इति हृदयम् ।

वाच्यार्थस्य सङ्गतत्वेऽप्यप्रस्तुतप्रशंसा भवतीति बोधयितुं प्रसङ्गादप्रस्तुतप्रशं-साया वाच्यवैलक्षण्यप्रयोज्यं प्रकारत्रयं निरूपयति—

अप्रस्तुतप्रशंसायां च यद्वाच्यं, तस्य कदाचिद् विवक्षितत्वम्, कदाचि-दविवक्षितत्वम्, कदाचिद् विवक्षिताविवक्षितत्वमिति त्रयी बन्धच्छाया ।

उपपद्यमानत्वाद् विवक्षितवाच्य एकः, अनुपपद्यमानत्वादविवक्षितवाच्यो द्वितीयः, अंशतस्तदुभयसद्भावाद् विवक्षिताविवक्षितवाच्यस्तृतीयश्चाप्रस्तुतप्रशं-सायाः प्रकारः । प्रकारपञ्चकं यत्प्रागुक्तं, तत्पञ्चमप्रकारस्य प्रकारत्रयमिदं बोध्यं, न तु प्रकारान्तराणामपि ।

तत्र प्रथममुदाहरति—

तत्र विवक्षितत्वं यथा—

'परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो,
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ॥
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः,
किमिक्षोर्दोषोऽयं न पुनरगुणाया मरु भुवः ॥'

व्याख्यातोऽयं श्लोकः प्रथमोद्द्योत एव । अप्रस्तुतेनाविवक्षितेन वाच्येनेक्षुणा प्रस्तुतः पुरुषश्रेष्ठः सूच्यत इति तस्याः प्रथमः प्रकारोऽयम् ।

स्वकीयमुदाहरणमाह—

यथा वा ममैव—

'अमी ये दृश्यन्ते ननु सुभगरूपाः सफलता,
भवत्येषां यस्य क्षणमुपगतानां विषयताम् ।
निरालोके लोके कथमिदमहो चक्षुरधुना,
समं जातं सर्वैर्न सममथवाऽन्यै रवयवैः

अमी सुभगरूपाः सुन्दराकृतयो लोकानां करचरणाद्यवयवा ये दृश्यन्ते प्रत्यक्षविषयीक्रियन्ते, एषां तेषां, क्षणं किञ्चित्कालं यस्य चक्षुषो विषयतां गोचरतामुपगतानां प्राप्तानां, ननु निश्चितं सफलता सार्थक्यं भवति । अहो आश्चर्यम्, इदं तच्चक्षुर्निरालोके निर्विवेके लोकेऽधुना सर्वैरवयवैः समं तुल्यं जातम्, अथवाऽन्यैरवयवैस्तत्–न समम्, अपि तु तेभ्यो विलक्षणमेवेत्यर्थः ।

यदा चक्षुषः क्षणिकेनापि सम्पर्केणैवावयवान्तरसौन्दर्यसाफल्यम्, तदा चक्षुषोऽवयवान्तरतुल्यत्वं कथमिवोचितमिति सारम् ।

अत्राप्यप्रस्तुतेन विवक्षितेन चक्षुषा प्रगुणपुरुषविशेषः प्रस्तुतः प्रतीयत इत्यप्रस्तुतप्रशंसैव ।

तदाह—

अनयोर्हि द्वयोः श्लोकयोरिक्षुचक्षुषी विवक्षितस्वरूपे एव, न तु प्रस्तुते, महागुणस्याविषयपतितत्वादप्राप्तपरभागस्य कस्यचित् स्वरूपमुपवर्णयितुं द्वयोरपि श्लोकयोस्तात्पर्येण प्रस्तुतत्वात् ।

अनयोर्द्वयोः श्लोकयोः 'परार्थे' इत्यादौ 'अमी ये' इत्यादौ च । असङ्गतिविरहाद्

विवक्षितं स्वरूपं ययोस्ते विवक्षितस्वरूपे । न तु प्रस्तुते किन्त्वप्रस्तुते, वर्णनीयत्वाभावात् । महान्तो गुणा यस्य स महागुणस्तस्य । अविषये कुस्थाने पतितत्वात् प्राप्तत्वाच्च प्राप्तः परभाग उत्कर्षः प्रशंसा वा येन तादृशस्य कस्यचित् पुरुषविशेषस्य स्वरूपमुपवर्णयितुं कथितयोर्द्वयोरपि श्लोकयोस्तात्पर्येण विषयीक्रियमाणस्य प्रस्तुतत्वादित्यर्थः ।

श्लोकयोः प्रथमस्य वाच्य इक्षुः, द्वितीयस्य चक्षुश्च नासम्भवितां स्पृशत इति विवक्षिते एव, किन्त्वप्रस्तुते, तयोः प्रस्तुतपुरुषविशेषपरत्वात्, तस्यैव प्रस्तुतत्वात्।

यस्य पण्डितपुण्डरीकस्य क्षणमपि प्रत्यासत्त्यैवान्येषां पाण्डित्यप्रकर्षसाफल्यम्, स किमन्यपण्डिततुल्य एव, नान्यतुल्य इति द्वितीयश्लोकेन प्रकाश्यते ।

द्वितीयं प्रकारमुदाहरति—

अविवक्षितत्वं यथा—

वाच्यस्येति शेषः । पथिकशाखोटविटपिनोः संवादः—

> 'कस्त्वं भोः !, कथयामि, दैवहतकं मां विद्धि शाखोटकं,
> वैराग्यादिव वक्षि, साधु विदितं, कस्मादिदं कथ्यते ? ।
> वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते,
> न च्छायाऽपि परोपकारकरणे मार्गस्थितस्यापि मे ॥'

शाखोटकः 'साहर' 'सिहोर' इति नाम्ना भाषायां प्रसिद्धो दन्तकाष्ठोपयोगी लघुपत्रो द्रुमः । स च भूतावास इति नागेशप्रभृतयो वदन्ति । तं प्रति 'भोस्त्वं कः' इति पान्थस्य प्रश्नः । 'दैवेन भागधेयेन हतकं विनष्टं मां शाखोटकं विद्धि जानीहि' तस्योत्तरम् । 'पुनः इदं वैराग्यान्निर्वेदादिव वक्षि (दैवहतकमिति) कथयसि' इति प्रश्नः । 'साधु सम्यग् विदितं त्वया ज्ञातम् (निर्वेदादेव ब्रवीमि) इत्युत्तरम् । पुनः 'इदं वैराग्यं कस्मात् कुतो हेतोः ?' इति प्रश्नः । 'कथ्यते (वैराग्यकारणम्) इत्युत्तरम् । 'अत्र प्रदेशे वामेन मार्गाद् वामभागेनोपलक्षितः किञ्चिद्विप्रकृष्टः पक्षे वाममार्गस्थः, वटो न्यग्रोधवृक्षो यः, तं वटमध्वगजनः पान्थलोकः सर्वात्मना सर्वथा छायोपवेशनादिप्रकारैः सेवत आदरेणाश्रयति, मार्गे सरणिसमीपे पक्षे सदाचारे स्थितस्यापि मे मम छायाऽपि परोपकारस्य करणे न प्रभवति' इत्युत्तरमिति प्रश्नोत्तररूपः श्लोकार्थः ।

भूतावासत्वेनैव शाखोटकस्य छाया नाश्रयणीयेति केचित्। तस्य क्षुद्रपत्रत्वाच्छायाया निविडत्वाभावादिति परे।

अत्र वाच्याविवक्षितत्वस्य हेतुमभिदधाति—

न हि वृक्षविशेषेण सहोक्तिप्रत्युक्ती सम्भवत इत्यविवक्षिताभिधेयेनैवानेन श्लोकेन समृद्धासत्पुरुषसमीपवर्तिनो निर्धनस्य कस्यचिन्मनस्विनः परिदेवितं तात्पर्येण वाक्यार्थीकृतमिति प्रतीयते।

शाखोटकवृक्षेण सह प्रश्नोत्तरविधानासम्भवाद् वाच्यार्थोऽत्र न विवक्षितः, किन्तु समृद्धो धनाढ्यो योऽसन् दुराचाररतः पुरुषः, तस्य समीपे वर्तिनस्तिष्ठतः, निर्धनस्य दरिद्रस्य, मनस्विनोऽभिमानिनः, कस्यचित् पुरुषस्य परिदेवितमिदमिति व्यञ्जनया बोध्यते।

इहाप्रस्तुताभ्यां वाच्याभ्यामविवक्षिताभ्यां च शाखोटकवटाभ्यां प्रस्तुतयोर्दितमुदरिद्रसत्पुरुषसमृद्धासत्पुरुषयोर्व्यञ्जनया प्रतीतिरित्यप्रस्तुतप्रशंसा।

तृतीयं प्रकारमुदाहरति—

विवक्षिताविवक्षितत्वं यथा—

अकुलीन-कुरूप-निरपत्य-कलत्राच्छादनाय चेष्टमानं पामरं कश्चिदाचष्टे—

'उप्पहजाआएँ असोहिणीएँ फलकुसुमपत्तरहिआए।
वेरीए वइं देन्तो पामर! हो ओहसिज्जिहसि॥'

'उत्पथजाताया अशोभनायाः फलकुसुमपत्ररहितायाः।
बदर्या वृतिं ददत् पामर भो! अवहसिष्यसे॥' इतिच्छाया।

भो पामर! अज्ञ! उत्पथे कुमार्गे पक्षेऽनवदातकुले जाताया उत्पन्नायाः, अशोभनायाः कण्टकमात्राचितत्वेन पुष्पसम्पद्राहित्येन चासुन्दर्याः, पक्षे लावण्यादिशून्यकुरूपाया अमङ्गलप्रायाया वा, फलैः कुसुमैः पत्रैश्च रहितायाः, पक्षेऽपत्यहीनायाः, बदर्याः कोलीलतायाः, पक्षे योषितः वृतिमावरणं, पक्षे वस्त्राद्याच्छादनं ददद् रचयंस्त्वम्, अवहसिष्यसेऽनुचिताचरणाद् दर्शकैरुपहसिष्यस इत्यर्थः।

अत्र ददाते रचनार्थकत्वेन दानार्थकत्वाभावात्तद्योगे न चतुर्थी।

इह वाच्यस्य विवक्षिताविवक्षितत्वयोर्हेतुं वदति—

अत्र हि वाच्यार्थो नात्यन्तं सम्भवी।

अत्र बदर्या अप्रस्तुताया वृतेरचनाया अनुचितत्वादसम्भवितया वाच्यस्या-

विवक्षितत्वम् । कथञ्चन प्रस्तुतत्वे तु सम्भवितया विवक्षितत्वमपीति योजनीयम् । वस्तुतस्तु—'सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं,

दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा ।
सर्वं विस्मृतवानसि भ्रमर हे ! यद् वारणोऽद्याप्यसा—
वन्तश्शून्यकरो निषेव्यत इति भ्रातः ! क एष ग्रहः ॥'

इत्येव तदुदाहरणम् । यतो भ्रमरकर्तृकवारणसेवनाभावे कारणं वाच्यं कर्णचापलं सम्भवित्वाद् विवक्षितम्, रसनाविपर्यासस्त्वसम्भवित्वादविवक्षित एवेत्युभयरूपतांऽशभेदेन स्फुटैव वाच्यस्येति विवेचनीयम् ।

इत्थमप्रस्तुतप्रशंसायाः प्रासङ्गिकं प्रकारनिरूपणं समाप्य, प्रक्रान्तमुप संहरति—

तस्माद् वाच्यव्यङ्ग्ययोः प्राधान्याप्राधान्ये यत्नतो निरूपणीये ।

यतो लावण्येत्यादिश्लोकेऽपि वाच्यस्य प्राधान्यमुत व्यङ्ग्यस्येति केषांचिद् व्यामोहो भवत्येव, तस्माद् वाच्यव्यङ्ग्ययोः प्राधान्याप्राधान्ये यत्नतो निरूपणीये, येन व्यामोहो न स्यादित्यर्थः ।

इत्थं व्यङ्ग्यस्य प्राधान्ये ध्वनिम्, अप्राधान्ये गुणीभूतव्यङ्ग्यं च काव्यप्रकारं निरूप्य व्यङ्ग्यशून्यं वस्तुतोऽविवक्षितव्यङ्ग्यं तृतीयं निकृष्टं चित्राख्यं तत्प्रकारं निरूपयति—

'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
काव्ये उभे ततोऽन्यद् यत् तच्चित्रमभिधीयते ॥ ९८ ॥
चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम् ।
तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम् ॥ ९९ ॥'

एवं कथितप्रकारेण, व्यङ्ग्यस्य प्रधानगुणभावाभ्यां प्राधान्याप्राधान्याभ्याम्, उभे ध्वनिगुणीभूतव्यङ्ग्यनामनी काव्ये व्यवस्थिते, तथा हि व्यङ्ग्यस्य ध्वनिः, अप्राधान्ये तु गुणीभूतव्यङ्ग्यं काव्यं भवति । ततस्ताभ्याम्, अन्यद् भि ' ' यत् काव्यं विवक्षितव्यङ्ग्यशून्यमलङ्कारादियुक्तम्, तत्-चित्रवत्तात्त्विकरूपहीनमपि प्रतिकृतिरूपं चित्रमभिधीयत उच्यते ।

तच्चित्रं काव्यं च शब्दार्थचित्रभेदेन शब्दचित्रमर्थचित्रमिति द्विविधं व्यवस्थितम्। तत्र तयोर्मध्ये किञ्चिच्छब्दालङ्कारभूषितं शब्दचित्रं भवति। अतः परं तद्भिन्नमर्थालङ्कारमण्डितमर्थचित्रं भवतीत्यर्थः।

तदाह—

व्यङ्गयस्यार्थस्य प्राधान्ये ध्वनिसञ्ज्ञितः काव्यप्रकारः, गुणभावे तु गुणीभूतव्यङ्गयता। ततोऽन्यद् रसभावादितात्पर्यरहितं व्यङ्गयार्थविशेषप्रकाशनशक्तिशून्यं च काव्यं केवलवाच्यवाचकवैचित्र्यमात्राश्रयेणोपनिबद्धमालेख्यप्रख्यं यदाभासते, तच्चित्रम्, न तन्मुख्यं काव्यम्, काव्यानुकारो ह्यसौ। तत्र किञ्चिच्छब्दचित्रं यथा–दुष्करयमकादि। वाच्यचित्रं ततः शब्दचित्रादन्यद् व्यङ्गयार्थसंस्पर्शरहितं प्राधान्येन वाक्यार्थतया स्थितं रसादितात्पर्यरहितमुत्प्रेक्षाऽऽदि।

रसादितात्पर्यराहित्यं रसादीनां बुबोधिषयाऽनिबद्धत्वात्। सर्वथा तद्राहित्यं तु दुर्वचमेव, सर्वेषामेव पदार्थानां विभावतायाः परिहर्तुमशक्यतया, तद्व्यङ्ग्ययत्किञ्चिद्रसादिसाहित्यात्। व्यङ्ग्यार्थविशेषप्रकाशनशक्तिशून्यताऽपि प्राग्वद् व्यङ्ग्यवस्त्वादिप्रतिपादनेच्छयाऽनिबद्धत्वमेव। चित्रकाव्ये हि व्यङ्ग्यस्य सद्भावेऽप्यविवक्षितत्वादसत्कल्पता, न तु सर्वथा तदभाव एव। वाच्यवाचकयोरर्थशब्दयोर्वैचित्र्यमलङ्कारस्तन्मात्रेण। आलेख्यप्रख्यं चित्रतुल्यं विवक्षितव्यङ्ग्यरसादिरूपजीवहीनमिति यावत्। न मुख्यं काव्यं, किन्तु गौणम्, अलङ्कारादिभिः काव्यसादृश्येन तत्त्वारोपात्। असौ बन्धः काव्यस्यानुकारोऽनुकरणं प्रतिकृतिरित्येतदप्राशस्त्यसूचकम्। शब्दचित्रमर्थचित्रं चेति विभागः। दुष्करत्वं क्लेशेन निर्मेयत्वाद् यमकादेर्विशेषणम्। आदिशब्देन पद्मादिबन्ध-शब्दश्लेषप्रभृतीनां ग्रहणम्। व्यङ्ग्यार्थसंस्पर्शरहितमिति समासोक्त्यादीनां, रसादितात्पर्यरहितमिति रसवदादीनां च गुणीभूतव्यङ्ग्यालङ्काराणां व्यवच्छेदाय विशेषणम्। उत्प्रेक्षाऽऽदीत्यादिपदेनोपमाप्रभृतीनां परिग्रहः।

इदं पुनरत्र चिन्त्यम्—दीपकतुल्ययोगिताऽऽदिवदुत्प्रेक्षायामपि विवक्षितव्यङ्ग्यौपम्यसम्बन्धस्य जागरूकत्वात् कथमर्थचित्रत्वमिति।

अथ चित्रपदार्थं निर्वक्तुं परीक्षमाणः पृच्छति—

अथ किमिदं चित्रं नाम ?।

न किमपि वस्तुतत्त्वं प्रतिभातीत्यभिप्रायः ।

स्वयमेवोत्तरयति—

यत्र न प्रतीयमानार्थसंस्पर्शः ।

व्यङ्ग्यराहित्यमिति फलितम् ।

तच्च न शोभनमिति दर्शयति—

प्रतीयमानो ह्यर्थस्त्रिभेदः प्राक् प्रदर्शितः । तत्र–यत्र वस्त्वलङ्कारान्तरं वा व्यङ्ग्यं नास्ति, स नाम चित्रस्य कल्प्यतां विषयः । यत्र तु रसादीनामविषयत्वम्, स काव्यप्रकारो न सम्भवत्येव ।

वस्तुव्यङ्ग्यशून्यत्वमलङ्कारव्यङ्ग्यशून्यत्वं च चित्रस्याभ्युपगन्तुं शक्यते, सम्भवित्वात् । रसादिव्यङ्ग्यशून्यत्वं पुनः कथङ्कारमूरीक्रियताम्, तच्छून्यत्वे काव्यत्वस्यैवापगमादसम्भवित्वात् ।

असम्भवितामेवोपपादयति—

यस्मादवस्तुसंस्पर्शिता काव्यस्य नोपपद्यते । वस्तु च सर्वमेव जगद्गतमवश्यं कस्यचिद् रसस्य चाङ्गत्वं प्रतिपद्यते । अन्ततो विभावत्वेन ।

अवस्तुसंस्पर्शिता पदार्थबोधकत्वाभावः । अन्ततश्चरमविचारेण, सर्वं वस्तु विभावत्वेन रसाङ्गं भवत्येव ।

काव्यवाक्यानामनर्थकत्वमसङ्गतार्थकत्वं वा स्वीकर्तुं न शक्यते, तथासति, प्रमत्तवाक्यतुल्यत्वेनानुपादेयत्वमापद्येत । तस्माद् यत्किञ्चित्सङ्गतार्थबोधकत्वमङ्गीकृतम् । तावतैव रसव्यञ्जकत्वमप्यङ्गीकृतमेव, यतो नास्तीदृशो जगति कोऽप्यर्थो, यः कस्यचिदपि रसस्योद्दीपनमालम्बनं वा न सम्भवति । ततश्च तद्द्वारको रससद्भावः प्राप्त एव तस्मात् सर्वात्मना रसादिव्यङ्ग्यशून्यत्वं काव्यस्य नैव सम्भवतीति भावः।

किञ्च—

चित्तवृत्तिविशेषा हि रसादयः न च तदस्ति वस्तु किञ्चिद्, यन्न चित्तवृत्तिविशेषमुपजनयति । तदनुत्पादने वा कविविषयतैव तस्य न स्यात् । कविविषयश्च चित्रतया कश्चिन्निरूप्यते ।

पण्डितराजोक्तरीत्या सर्वेषामेव स्थायिभावानां चित्तवृत्तिरूपतया तद्विशेषा एव रसादय इति यत्किञ्चिच्चित्तवृत्तिजनकत्वमवश्यमेवार्थानामतोऽपि रसादिव्यञ्जकत्वमर्थबोधककाव्यवाक्यानां दुष्परिहरमेव । अन्यथा कविविषयता कविप्रयत्नगोचरता

कविप्रतिपाद्यतेति यावद्, एव चित्रकाव्यस्य न स्यात्। तस्मात्तत्रापि रसादिव्यङ्ग्य-सत्त्वं स्वीकार्यमेव। स्वीकृते तस्मिन् 'व्यङ्ग्यार्थसंस्पर्शरहितम्' इति विशेषणं न सङ्गच्छते। अप्रसिद्धिरपि चित्रस्य नैव वक्तुं शक्या, प्राचुर्येण तस्यैवोपलम्भात्। तस्मात् किमत्र शरणम्? इति प्रष्टुरभिप्रायः।

समादधाति—

अत्रोच्यते, सत्यम्, न तादृक् काव्यप्रकारोऽस्ति, यत्र रसादीनामप्रतिपत्तिः।

अप्रतिपत्तिर्बोधविरहः।

एतावदभ्युपगत्योत्तरमाह—

किन्तु, यदा रसभावादिविवक्षाशून्यः कविः शब्दालङ्कारमर्थालङ्कारं वोपनिबध्नाति, तदा तद्विवक्षाऽपेक्षया रसादिशून्यताऽर्थस्य परिकल्प्यते। विवक्षोपारूढ एव हि काव्ये शब्दानामर्थः। वाच्यसामर्थ्यवशेन च कविविवक्षाविरहेऽपि तथाविधे विषये रसादिप्रतीतिर्भवन्ती परिदुर्बला भवतीत्यनेनापि प्रकारेण नीरसत्वं परिकल्प्य चित्रविषयो व्यवस्थाप्यते।

विवक्षाऽपेक्षया रसादिशून्यता विवक्षितरसाद्यव्यञ्जकत्वम्। विवक्षोपारूढो विवक्षाविषयीभूतः। वाच्यसामर्थ्यवशेनार्थव्यञ्जनाबलेन। तथाविधे विषये क्वचिच्चित्रकाव्ये। परिदुर्बलाऽविवक्षितविषयकत्वादप्रधानीभूता। अनेनापीत्यपिशब्दः प्रथमकल्पे रसादिप्रतीतेरसत्वं, द्वितीयकल्पे तु दुर्बलत्वं विवक्षाऽनुरोधात् कल्पनीयमिति समाधानप्रकारस्य कथञ्चिन्निर्वाहकतां सूचयति।

यदा कविरलङ्कारव्यसनितया कदाचित् 'विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन' इति कथितनियममवहेल्यालङ्कारमेव प्राधान्येन विवक्षति, तदा रसादीनां नान्तरीयकव्यङ्ग्यानां सत्त्वेऽपि काव्यवाक्यस्य तच्छून्यत्वं वक्तुं शक्यते, यतो विवक्षैवार्थानां सत्त्वासत्त्वव्यवस्थापिका काव्येषु, तदादायैव चित्रस्य लक्षणं तथाविहितमुपपद्यते। यत्र च क्वचिदविवक्षितानामपि रसादीनां वाच्यसौन्दर्यमहिम्नाऽऽर्थव्यञ्जनासाहाय्येन जायते चित्रेष्वपि 'मध्ये व्योम स्फुरति सुमनोधन्वनः शाणचक्रम्' इत्यादिषु प्रतीतिः, तावता न चित्रत्वव्याघातस्तत्र भवितुमर्हति, तत्र रसादीनामविवक्षितत्वात् तत्प्रतीतेरास्वाद्यतमत्ववैधुर्यादिति समाधातुराशयः।

उक्तमेवार्थमुपसङ्क्षिप्य वदति—

तदिदमुक्तम् ।

मयैवेति शेषः ।

'रसभावादिविषय-विवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ॥
रसादिषु विवक्षा तु स्यात्तात्पर्यवती यदा ।
तदा नास्त्येव तत्काव्यं ध्वनेर्यत्तु न गोचरः ॥'

रसभावादयो विषया यस्याः सा रसभावादिविषया, तादृशी चासौ विवक्षा कवितात्पर्यम्, तस्या विरहेऽभावे सति, योऽलङ्काराणामनुप्रासोपमाऽऽदीनां निबन्धो योजनम्, स चित्रस्य तल्लक्षणस्य तद्व्यवहारस्य वा विषयो मतः स्वीकृतः ।

यदा तु रसादिषु रसादिविषयिका विवक्षा तात्पर्यवती प्राधान्यावलम्बिनी स्यात् ।

तदा तत् काव्यं नास्त्येव, यत्तु यत्पुनः, ध्वनेस्तल्लक्षणस्य तद्व्यवहारस्य वा गोचरो विषयो न स्यादित्यर्थः ।

एतावता विवक्षितव्यङ्ग्यरहितत्वे सति, शब्दार्थान्यतरालङ्कारवत्त्वं चित्रत्वमिति लक्षणं पर्यवसितम् ।

नन्वीदृशनिकृष्टकाव्यस्य निरूपणं किमर्थमित्यत आह—

एतच्च चित्रं कवीनां विशृङ्खलगिरां रसादितात्पर्यमनवेक्ष्यैव काव्यप्रवृत्तिदर्शनादस्माभिः परिकल्पितम् ।

काव्यप्रवृत्तिक्रियया समानकर्तृकत्वमनपेक्षणक्रियाया इति क्त्वाप्रत्ययः, किन्तु तस्याः पदार्थैकदेशतया तत्रान्वयाभावात् स्थितानामित्यध्याहार्यम् ।

माभूच्चित्रं प्रशस्तकाव्यम्, किन्तु लक्ष्यानुरोधाल्लक्षणं व्यवस्थाप्यते । लक्ष्याणि तु भूयांसि तथाविधान्युपलभ्यन्त एव, कवीनां नानारुचितया केषां च न तत्रापि प्रवृत्तिरवलोक्यते । तस्मात्तदपि निरूपितमेवास्माभिरिति भावः ।

तर्हि किमाधुनिकैरपि तत्र प्रवृत्ति र्विधेयेति प्रश्ने कथयति—

इदानीन्तनानान्तु न्याय्ये काव्यनयव्यवस्थापने क्रियमाणे, नास्त्येव ध्वनिव्यतिरिक्तः काव्यप्रकारः ।

समुचितध्वनिव्यवस्थायां जातायामाधुनिकैस्तत्रैव प्रवर्तनीयमिति भावः ।

तत्र हेतुं वक्ति—

यतः परिपाकवतां कवीनां रसादितात्पर्यविरहे व्यापार एव न शोभते, रसादितात्पर्ये च सति, नास्त्येव तद्वस्तु, यदभिमतरसाङ्गतां नीयमानं न प्रगुणीभवति । अचेतना अपि हि भावा यथायथमुचितरसभावतया चेतनवृत्तान्तयोजनया वा न सन्त्येव ते ये यान्ति न रसाङ्गताम् ।

व्यापारः काव्यरचनाऽऽत्मकः । शब्दार्थयो रसौचित्यानुसारी विवेकः परिपाकः । प्रगुणीभवति प्रशस्तगुणवत्तां प्राप्नोति । भावाः पदार्थाः । उचितौ स्वतः सम्भाविनौ रसभावौ यत्र ते तादृशाः, तेषां भावस्तत्ता तया, ते न सन्त्येव, ये रसाङ्गतां न यान्तीत्यन्वयः ।

रसादिविवक्षाव्यतिरेके पदार्थानामचमत्कारितयाऽशोभनत्वात्, तदन्वये च चेतनानां पदार्थानां स्वतः अचेतनानामपि पदार्थानां चेतनधर्मारोपेण तत्त्वाद् विवक्षितरसादिव्यञ्जकत्वमेव काव्यस्य यतश्चमत्कारितायां निमित्तम्, अतस्तत्रैव प्रवर्तनीयमिति सारम् ।

पदार्थानां रसाङ्गतानयनं कविविवक्षाऽधीनमेवेति दर्शयति—

तथा चेदमुच्यते—'अपारे काव्यसंसारे कविरेव प्रजापतिः ।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत् ।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥
भावानचेतनानपि चेतनवच्चेतनानचेतनवत् ।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ॥'

अपारेऽनाद्यन्ते, काव्यमेव नानाविधत्वाद् विपुलत्वाच्च संसारः प्रपञ्चस्तस्मिन् तद्विषयनिर्माणे प्रजापतिर्विधाता कविरेवास्ति यतः, अतोऽस्मै कवये यथा रोचते तदिच्छाऽनुसारम्, इदं विश्वं जगत् तथा तेन भिन्नभिन्नरूपेण परिवर्तते परिणतं भवति ।

तथा च-कविः शृङ्गारी शृङ्गारादिरसास्वादनप्रवणश्चेद् यदि भवेत्, तदा जगदेव काव्ये वर्ण्यमानं रसमयं रसाङ्गं जातं भवति । स कविरेव चेद् यदि वीतराग उदासीनो वर्णनरसिकताशून्यो भवति, तदा तद्वर्ण्यमानं सर्वमेव जगद्वस्तु नीरसं भवति । सुकविः काव्ये अचेतनाञ्जडानपि भावान् नगनदीप्रभृतिपदार्थान्

चेतनवत् स्त्रीपुंसवत्, च तथा चेतनानानन्दसम्मोहदशायामचेतनवद् यथेष्टमिच्छाऽनुरूपं स्वतन्त्रतया व्यवहारयति प्रवर्तयतीत्यर्थः ।

काव्ये कवेरिच्छयैव भावानां सरसता नीरसता वा, चेतनताऽचेतनता वा भवतीति तदनौचित्ये स एव निगृहीतः स्यात्, तेन तत्राप्रमादिना प्रवर्तनीयमित्यभिसन्धिः ।

उपसंहरति—

तस्मान्नास्त्येव तद्वस्तु यत् सर्वात्मना रसतात्पर्यवतः कवेस्तदिच्छया तदभिमतरसाङ्गतां न धत्ते । तथोपनिबध्यमानं वा चारुत्वातिशयं न पुष्णाति ।

तस्मादुक्तहेतोर्यत् सर्वात्मना सर्वथा रसतात्पर्यवतो रसप्रवणस्य कवेः तदिच्छया सरसपदार्थप्रतिपिपादयिषया, तस्य कवेरभिमतरसस्याङ्गतां व्यञ्जकत्वेनोपकारकतां न धत्ते । वा तथा, तथा रसाङ्गत्वेनोपनिबध्यमानं काव्ये निवेश्यमानं सत्, चारुत्वातिशयं न पुष्णाति, तद्वस्तु नास्त्येव, कवीच्छाऽनुसारमेव तेषां परिवर्तनादित्यर्थः ।

न चैतदप्रसिद्धमिति ब्रूते—

सर्वमेतच्च महाकवीनां काव्येषु दृश्यते । अस्माभिरपि स्वेषु काव्यप्रबन्धेषु यथायथं दर्शितमेव ।

स्वेषु काव्यप्रबन्धेषु देवीशतकार्जुनचरितविषमबाणलीलाप्रभृतिषु ।

ध्वनेः प्राधान्यं दर्शयन्नुपसंहरति—

स्थिते चैवं सर्व एव काव्यप्रकारो न ध्वनिधर्मतामतिपतति ।

एवं सर्वभावानां रसादिव्यञ्जकत्वे स्थिते निर्धारिते सति, काव्यस्य सर्व एव प्रकारः, ध्वननं ध्वनिर्धर्मो यस्य स ध्वनिधर्मा तस्य भावो ध्वनिधर्मता तां, ध्वनित्वरूपां न अतिपतति नातिक्रामति, सर्वोऽपि ध्वनिरेव भवति तत्प्रकार इत्यर्थः ।

गुणीभूतव्यङ्ग्यस्य का गतिरित्याकाङ्क्षायां वक्ति—

रसाद्यपेक्षया कवेर्गुणीभूतव्यङ्ग्यलक्षणोऽपि प्रकारस्तदङ्गतामवलम्बते प्राक् ।

गुणीभूतव्यङ्ग्यलक्षणोऽपि काव्यस्य प्रकारः, कवे रसाद्यपेक्षया रसादिव्यञ्जनाभिप्रायेण प्राक् तस्य ध्वनेरङ्गतां तद्रूपतां धत्त इत्यर्थः ।

गुणीभूतव्यङ्ग्यमपि प्राधान्येन रसादिव्यञ्जकत्वे ध्वनिरेव भवति । तच्च

'प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि' इत्यादिकारिकया, 'तदयं ध्वनिनिष्यन्दरूपः' इत्यादिवृत्त्या च प्रतिपादितमेव प्रागित्याशयः ।

ननु तर्हि कदा तस्य पार्थक्यमिति पृच्छां निवर्तयति—

यदा तु चाटुषु देवतास्तुतिषु वा रसादीनामङ्गतया व्यवस्थानम्, हृदयवतीषु च षट्प्रज्ञाऽऽदिगाथासु कासुचिद् व्यङ्ग्यविशिष्टवाच्यात् प्राधान्यम्, तदपि गुणीभूतव्यङ्ग्यस्य ध्वनिनिष्यन्दभूतत्वमेवेत्युक्तं प्राक् ।

यदा तु पुनः, चाटुषु नितम्बिनी—नृपतिप्रभृतिप्रसादकमिथ्याप्रशंसावाक्येषु, देवतास्तुतिषु वा वाच्यवृत्त्यापेक्षया रसादीनामङ्गतया व्यवस्थानं स्थितिर्भवति, च तथा कासुचिदनतिप्रतीतासु हृदयवतीषु 'अअलिआ' इति नाम्ना प्राकृतकविसमाजे प्रथितासु षट्प्रज्ञाऽऽदीनां कुशलानां प्रातिवेश्मिकानां गाथासु, व्यङ्ग्येन विशिष्टाद् गुणीभूतव्यङ्ग्याद् वाच्यात् प्राधान्यं तद्धेतुकश्चमत्कारः, तदा गुणीभूतव्यङ्ग्यं नाम काव्यं भवतीति शेषः । तदपि गुणीभूतव्यङ्ग्यत्वमपि तस्येति शेषः, ध्वनिनिष्यन्दभूतत्वमेवेति प्राक् 'तदयं ध्वनिनिष्यन्दरूपः' इत्यादिनोक्तमेवेत्यर्थः ।

तथा च—'धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि ।
षट्सु प्रज्ञाऽस्ति यस्योच्चैः षट्प्रज्ञा इति संस्मृतः ॥'

इति त्रिकाण्डशेषः ।

चित्रमिदानीं तर्हि खपुष्पायत इत्याशङ्कां समादधदुपसंहरति—

तदेव मिदानीन्तनकविकाव्यनयोपदेशे क्रियमाणे, प्राथमिकानामभ्यासार्थिनां यदि परं चित्रेण व्यवहारः, प्राप्तपरिणतीनां तु ध्वनिरेव प्राधान्येन काव्यमिति स्थितमेतत् ।

तत् तस्माद्धेतोः, एवं ध्वनेरेव मुख्यत्वेन, इदानीन्तनानामाधुनिकानां कवीनां काव्यनयोपदेशे काव्यनीतिशिक्षणे क्रियमाणे, ये प्राथमिकाः प्रथममेव काव्यं कर्तुं प्रवृत्ताः, अत एवाभ्यासार्थिनः पौनःपुन्येन काव्यघटनमभिलषन्तः सन्ति, तेषां प्रथमभूमिकास्थितानामनधिगतप्रौढीनां परं केवलं चित्रेण व्यवहारो यदि स्यात्, तदा भवितुमर्हतीत्यनुमन्यते । प्राप्ता परिणतिः काव्यरचना-प्रौढिर्यैस्ते तादृशाः, तेषां तु पुनर्ध्वनिरेव प्राधान्येन, क्वचित्तु गुणीभूतव्यङ्ग्यमपीति शेषः, काव्यं भवतीति नियन्त्रणं स्थितं निर्णीतमित्यर्थः ।

प्रथमावस्थायां कवीनां चित्रमपि काव्यं भवत्येव, चरमावस्थायान्तु ध्वनिरेव ।

तेन चित्रस्य नाप्रसिद्धिर्न वा ध्वनेरप्राधान्यमिति सारम्। एतेन चित्रं काव्यं नास्त्येवेति व्याहरन्तो दर्पणकृतः प्रत्युक्ताः।

पर्यन्ते सङ्गृह्णाति—

तदयमत्र संग्रहः—'यस्मिन् रसो वा भावो वा तात्पर्येण प्रकाशते।
संवृत्याभिहितं वस्तु यत्रालङ्कार एव वा॥
काव्याध्वनि ध्वनिर्व्यङ्ग्यं प्राधान्यैकनिबन्धनः।
सर्वत्र तत्र विषयी ज्ञेयः सहृदयैर्जनैः॥'

यस्मिन् काव्याध्वनि काव्यमार्गे, रसः शृङ्गारादिः, अथ भावो रत्यादिस्तदाभासादिश्च, अथवा संवृत्य सौन्दर्योत्कर्षसम्पादनाय गोपयित्वाऽभिहितमुक्तं वस्तु, अथवा यत्र अलङ्कार एव, व्यङ्ग्यं व्यज्यमानतां दधत्, तात्पर्येण कविविवक्षाविषयत्वप्रयुक्तप्राधान्येन प्रकाशते प्रतीतिविषयो भवति। तत्र सर्वत्र रसादिवस्त्वलङ्कारप्रधानकव्यञ्जनस्थलेषु, प्राधान्यमेकं प्रधानं निबन्धनं निमित्तं यस्य स ध्वनिर्व्यङ्ग्यः सहृदयैः, विषयी त्रिविधध्वनिकाव्यरूपविषयभाग् ज्ञेय इत्यर्थः।

'काव्यादूध्वनिर्ध्वनेर्व्यङ्ग्यम्' इति पाठस्तु, विशृङ्खलत्वात्, 'काव्यमार्गे' इति लोचनविवरणप्रतिकूलत्वाच्च नोपादेयः।

वस्त्वादीनां प्राधान्येन व्यङ्ग्यत्वे ध्वनिः, स एव च प्रधानमिति फलितम्।

प्रकारान्तराण्यपि ध्वनेर्दर्शयति—

'सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः।
सङ्करसंसृष्टिभ्यां पुनरप्युद्द्योतते बहुधा॥ १०० ॥'

स ध्वनिः, गुणीभूतव्यङ्ग्यैस्तत्प्रकारैः सहितैः सगुणीभूतव्यङ्ग्यैः, तथाऽलङ्कारैर्वाच्यालङ्कारैः सहितैः सालङ्कारैः, स्वैरात्मीयैरविवक्षितवाच्यत्वादिभिः प्रभेदैः प्रकारैः सह, सङ्करः सापेक्षाणामङ्गाङ्गिभावेन सन्देहेनैकवाचकानुप्रवेशेन च त्रिविधः सम्बन्धः, संसृष्टिर्निरपेक्षाणां च योग एकविधैव, ताभ्यां सम्बन्धविशेषाभ्यामुपलक्षितः पुनरपि बहुधा नानाप्रकारवान्, उद्द्योतते भातीत्यर्थः।

तदाह—

तस्य च ध्वनेः स्वप्रभेदैर्गुणीभूतव्यङ्ग्येन वाच्यालङ्कारैश्च सङ्करसंसृष्टिव्यवस्थायां क्रियमाणायां बहुप्रभेदता लक्ष्ये दृश्यते। तथा हि—स्वप्रभेदस-

ङ्कीर्णः, स्वप्रभेदसंसृष्टः, गुणीभूतव्यङ्ग्यसङ्कीर्णः, गुणीभूतव्यङ्ग्यसंसृष्टः, वाच्यालङ्कारान्तरसङ्कीर्णः, वाच्यालङ्कारसंसृष्टः, संसृष्टालङ्कारसङ्कीर्णः, संसृष्टालङ्कारसंसृष्टश्चेति बहुधा ध्वनिः प्रकाशते ।

अविवक्षितवाच्यः—अर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति प्रथमं द्विविधः प्रत्येकं पदवाक्यप्रकाश्यत्वेन चतुर्विधः। विवक्षितान्यपरवाच्यस्तु—असंलक्ष्यक्रमरूपोऽनन्तोऽपि वाक्य-पद-तदंश-घटना-वर्ण-प्रबन्धव्यङ्ग्यत्वेन षड्विधः। संलक्ष्यक्रमरूपस्तु-शब्दशक्त्युद्भवो वस्त्वलङ्कारयोर्व्यङ्ग्यत्वेन द्विविधोऽपि प्रत्येकं पदप्रकाश्यत्वेन चतुर्विधः, अर्थशक्त्युद्भवो वस्त्वलङ्कारयोर्व्यञ्जकयोः प्रत्येकं स्वतः-सम्भवितया कविप्रौढोक्तिसिद्धतया कविनिबद्धवक्तृप्रौढोक्तिसिद्धतया च षड्विधो वस्त्वलङ्काररूपत्वेन द्वादशविधः, स एव पुनः पद-वाक्य-प्रबन्धप्रकाश्यत्वेन षट्त्रिंशद्विधः, शब्दार्थशक्त्युद्भवस्तु वाक्यप्रकाश्यत्वेनैकविध एवेति सङ्कलनयैकपञ्चाशत्प्रकारकः शुद्धो ध्वनिः।

ततश्चैकपञ्चाशतो भेदानां तावद्भिः प्रकारैः स्वकीयैर्गुणने (२०६०१) द्वे सहस्रे षट्शतानि-एकश्च ध्वनेः प्रभेदाः। तेषां पुनस्त्रिरूपः सङ्कर एकरूपा संसृष्टिरिति चतुर्भिर्गुणने (१०४०४) दशसहस्राणि—चत्वारिंशतानि—चत्वारश्च तत्प्रकाराः। तेषामपि शुद्धभेदैरेकपञ्चाशता योजने (१०४५५) दशसहस्राणि—चत्वारिंशतानि—पञ्चपञ्चाशद् ध्वनेः प्रभेदाः सम्भवन्तीति प्रकाशकारादयः तद्विवेकविशेषस्तु प्रदीपादौ द्रष्टव्यः।

तत्र दिङ्मात्रदर्शनाय कियतो भेदानुदाहर्तुकामः प्रथमं ध्वनेः स्वप्रभेदेनाङ्गाङ्गिभावसङ्करमुदाहरति—

तत्र स्वप्रभेदसङ्कीर्णत्वं कदाचिदनुग्राह्यानुग्राहकभावेन, यथा—'एवंवादिनि देवर्षौ' इत्यादौ। अत्र ह्यर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यध्वनिप्रभेदेनालक्ष्यक्रमव्यङ्ग्यध्वनिप्रभेदोऽनुगृह्यमाणः प्रतीयते ।

अनुग्राह्यानुग्राहकभावोऽङ्गाङ्गिभावः। अत्र श्लोकेऽर्थशक्त्युद्भवध्वनिना लज्जालक्षणेनासंलक्ष्यक्रमोऽभिलाषहेतुकविप्रलम्भशृङ्गारोऽनुगृह्यमाणः पोष्यमाणः प्रतीयते, लज्जाया व्यभिचारिभावत्वेन रसपोषकत्वात्। तस्याः संलक्ष्यक्रमव्यङ्ग्यता व्यभिचारिभावरूपाया अप्राधान्येन भावत्वानधिगमादवगमनीया।

स्वप्रभेदेनैव ध्वनेः सन्देहसङ्करमुदाहरति—

एवं कदाचित् प्रभेदद्वयसम्पातसन्देहेन यथा—

देवरेऽनुरक्तामुपनायिकामुत्सवागतां तत्पत्न्या कटूक्तिभिः कदर्थितामनुनेतुं तच्चौरकामुकी भ्रातृजाया तं भणति—

'खणपाहुणिआ देअर ! एसा जाआए किंपि दे भणिआ ।
रुअइ पडोहरवलही घरम्मि अणुणिज्जउ वराई ॥'

'क्षणप्राघुणिका देवर ! एषा जायया किमपि ते भणिता ।
रोदिति शून्यवलभीगृहेऽनुनीयतां वराकी ॥' इतिच्छाया ॥

अयि देवर ! पत्यनुज ! क्षण उत्सवे, क्षणमात्रं वा प्राघुणिकाऽभ्यागता, एषा तव दयिता, ते तव जायया पत्न्या, न तु प्रियया, किमपि वक्तुमनुचितम्, भणिता कथिता भर्त्सितेति यावत्, सती, शून्ये गृहपश्चाद्भागे वा वलभीगृहे सौधोर्ध्ववेश्मनि, प्रतीकाराक्षमत्वात् त्वय्यत्यनुरक्तत्वाच्च रोदिति । तेन वराको दीनतया दयनीया, त्वया अनुनीयतां प्रसाद्यतामाश्वास्यतामुपभुज्यतां वेत्यर्थः ।

तथा च—'स्वामिनो देवृदेवरौ' इत्यमरः । 'शुद्धान्ते वलभोचन्द्रशाले सौधोर्ध्ववेश्मनि' इति रभसश्च ।

इह देवरेत्यामन्त्रणेन सहजस्नेहास्पदत्वम्, क्षणप्राघुणिकत्वेनादराधिक्यौचित्येऽप्यनादराद् दुःखातिशयोत्पत्तिसमुचितत्वम्, जायात्वेन प्रणयहीनता, तया तथाऽऽचरणौचिती, त्वदीयत्वेन त्वयैवानुनेयत्वम्, किमपीत्यनेन कटूक्तीनामगणेयताऽनुच्चार्यता च, वलभ्याः शून्यत्वे पश्चाद्भागस्थत्वेन वा रहस्तया रहस्ययोग्यता, रोदितीत्यनेन सद्यःप्रतिकार्यता, रोदनेन तस्याः स्वयं प्रतीकाराक्षमत्वं त्वय्यनुरागोत्कर्षेणान्यत्र पलायितुमसमर्थत्वं च वराकीत्वेनानुनयावश्यकता च सूच्यते ।

अत्र 'अनुनीयताम्' इत्यनुनयतेरुपभोगप्रकर्षं प्रत्याययितुं तात्पर्यानुपपत्त्या मुख्यार्थबाधादिसत्त्वादुपभोगे लक्षणेत्यर्थान्तरसङ्क्रमितवाच्यत्वेनाविवक्षितवाच्यध्वनिः, अथवाऽनुनयते रोदननिवर्तकव्यापारोऽनुनयोऽभिधया बोध्यमान एवोपभोगं व्यनक्तीत्यर्थशक्त्युद्भवत्वेन विवक्षितान्यपरवाच्यध्वनिरिति सन्देहः । उभयथोपभोगस्यैव व्यङ्ग्यत्वेनैकतरपक्षसाधकबाधकप्रमाणाभाव इति सङ्करः ।

तदाह—

अत्र ह्यनुनीयतामित्येतत् पदमर्थान्तरसङ्क्रमितवाच्यत्वेन, विवक्षितान्यपरवाच्यत्वेन च सम्भाव्यते। न चान्यतरपक्षनिश्चये प्रमाणमस्ति।

वाच्यस्यार्थान्तरसङ्क्रमणं व्यङ्ग्यताद्रूप्यप्राप्तिः, अन्यपरत्वं च स्वरूपावगमपुरस्सरव्यङ्ग्यबोधकत्वमिति भिन्नतयोभयकोट्योर्विरुद्धत्वमवधारणीयम्।

स्वप्रभेदेनैकव्यञ्जकानुप्रवेशसङ्करमुदाहरति—

एकव्यञ्जकानुप्रवेशेन तु व्यङ्ग्यत्वमलक्ष्यक्रमव्यङ्ग्यस्य स्वप्रभेदान्तरापेक्षया बाहुल्येन सम्भवति। यथा—'स्निग्धश्यामल-' इत्यादौ।

रसादिध्वनेः स्वकीयभेदान्तरेण सहैकवाचकानुप्रवेशलक्षणः सङ्करो बाहुल्येन सम्भवति, यतो बहुत्र काव्येषु, रसानां भावादीनां चैकव्यङ्ग्यत्वमुपलभ्यते। श्लोकोऽयं सम्पूर्णः प्रागेव व्याख्यातः। अत्र रामपदरूप एकस्मिन्नेव वाचकेऽर्थान्तरसङ्क्रमितवाच्यलक्षणाविवक्षितवाच्यध्वनेर्विप्रलम्भशृङ्गारात्मकासंलक्ष्यक्रमलक्षणविवक्षितान्यपरवाच्यध्वनेश्चानुप्रवेशात् सङ्करः। तदुभयमपीह रामरूपैकपदव्यङ्ग्यम्।

तत्रैव ध्वनिद्वयस्य संसृष्टिमुदाहरति—

स्वप्रभेदसंसृष्टत्वं च यथा—पूर्वोदाहरण एव। अत्र ह्यर्थान्तरसङ्क्रमितवाच्यस्यात्यन्ततिरस्कृतवाच्यस्य च संसर्गः।

पूर्वोदाहरणे 'स्निग्धश्यामल'-इत्यादौ। अर्थान्तरसंङ्क्रमितवाच्यस्य रामपदव्यङ्ग्यस्य, अत्यन्ततिरस्कृतवाच्यस्य लिप्त-सुहृत्-पदाभ्यां व्यङ्ग्यस्य च ध्वनेर्निरपेक्षतया स्थितेः संसृष्टिः। अत्यन्ततिरस्कृतवाच्यस्येति जात्यपेक्षायामेकवचनम्, पदद्वयव्यङ्ग्यध्वनिद्वयस्य सद्भावात्।

नव्यास्तु—अत्रात्यन्ततिरस्कृतवाच्यध्वन्योरेव मिथो नैरपेक्ष्येण संसृष्टिः। ताभ्यां सहार्थान्तरसङ्क्रमितवाच्यध्वनेस्त्वङ्गाङ्गिभावेन सङ्कर इत्यातिष्ठन्ते।

इत्थं ध्वनेः स्वप्रभेदैः सह सङ्कीर्णत्वसंसृष्टत्वे उदाहृत्य, गुणीभूतव्यङ्ग्येन सह सङ्कीर्णत्वमुदाहरति—

गुणीभूतव्यङ्ग्यसङ्कीर्णत्वं यथा—'न्यक्कारो ह्ययमेव मे यदरयः' इत्यादौ।

अस्य श्लोकस्य व्याख्यानं व्यङ्ग्यप्रदर्शनं च प्राग् विहितमेव। अत्र वाक्यव्यङ्ग्यासंलक्ष्यक्रम-वीररसध्वनेः पदकदम्बप्रकाशितगुणीभूतव्यङ्ग्यैरुपकारकैः सहाङ्गाङ्गिभावेन सङ्करः।

इह "अरयः इत्यादिभिः सर्वैरेवपदार्थैं रौद्र एवानुगृह्यते" इत्याचार्याः। 'निर्वेदाख्यो व्यभिचारिभाव एव प्राधान्येन व्यज्यते' इति दर्पणव्याख्यातारः। निर्वेदक्रोधादिभिः पोषितो रावणस्य युद्धोत्साह आस्वादपदवीमवतरन् वीररसत्वमेतीति नवीना व्याहरन्ति।

पुनस्तमेवोदाहरति—

यथा—

अर्जुनेन सह रिपुबलं संहृत्य दुर्योधनं पित्रोरन्तिकेऽन्विष्यंस्तदनुजीविनो भीमः पृच्छति—

> **'कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी,**
> **कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः।**
> **राजा दुश्शासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं**
> **क्वास्ते दुर्योधनोऽसौ? कथयत न रुषा द्रष्टुमभ्यागतौ स्वः॥'**

वेणीसंहारे पञ्चमाङ्के पद्यमिदम्। द्यूतस्य दुरोदरस्य छलानां छद्मनां शाठ्यानामिति यावत्, कर्ता सदसि प्राग् विधाता प्रवर्तको वा जतुमयस्य वारणावतनगरे लाक्षारचितस्य शरणस्य गृहस्य पाण्डवदाहार्थमुद्दीपनो दाहकः, स प्रसिद्धोऽभिमानी-अहङ्कारी, कृष्णाया द्रौपद्याः सदस्येव केशानामुत्तरीयस्य च व्यपनयनेऽपासने पटुर्निपुणः, तथा यस्य पाण्डवा वयं दासाः किङ्कराः इत्युक्तिरिति शेषः, तथा यो राजाऽखण्डितशासनो भूपतिः, दुश्शासनादेः, अनुजानां कनिष्ठसोदराणां शतस्य, गुरुर्ज्यायान् भ्राता शास्त्रशिक्षको वा, तथा योऽङ्गराजस्य कर्णस्य मित्रं सुहृदस्तीति शेषः, असौ दुर्योधनः क्वास्ते कुत्र तिष्ठति? कथयत? यूयमिति शेषः, आवां भीमार्जुनौ रुषा क्रोधेन तं द्रष्टुं नाभ्यागतौ स्वो नायातौ स्व इत्यर्थः।

तथा च-'द्यूते दुरोदरम्' 'शरणं गृहरक्षित्रोः' 'लाक्षा राक्षा जतुक्लीबे' इति चामरः। 'छलं छद्मस्खलितयोः' इति हैमः। 'छलं स्खलितशाठ्ययोः' इति मेदिनी च।

इह वाच्यस्तुत्या निन्दाया व्यज्यमानतया व्याजस्तुतिरलङ्कार इति केचित्। परेतु—विशेषणानां व्यङ्ग्याभिप्रायकत्वेन-'अलङ्कारः परिकरः साभिप्राये विशेषणे।' इति लक्षितं परिकरालङ्कारमाचक्षते। इहापि वाक्यप्रधानव्यङ्ग्यस्य रौद्ररसध्वनेस्तत्तद्विशेषणोपस्थापितैर्गुणीभूतव्यङ्ग्यैः सह सङ्करः।

तदाह—

अत्र चालक्ष्यक्रमव्यङ्ग्यस्य वाक्यार्थीभूतस्य व्यङ्ग्यविशिष्टवाच्याभिधायिभिः पदैः सम्मिश्रता ।

अत्र 'न्यक्कार' इत्यादौ 'कर्ता' इत्यादौ च श्लोके, वाक्यार्थीभूतस्य प्रधानतया वाक्येन व्यज्यमानस्य, असंलक्ष्यक्रमस्य क्रमेण वीरस्य रौद्रस्य च ध्वनेः, व्यङ्ग्येन विशिष्टमुपस्कृतं वाच्यं यान्यभिदधत्यभिधया बोधयन्ति, तादृशैः पदैरुपलक्षितेन गुणीभूतव्यङ्ग्यरूपेणार्थेन सह सम्मिश्रता सङ्कीर्णता सङ्कर इति यावत् ।

पदैरित्युपलक्षणे तृतीया, ध्वनेः पदसाहित्यासम्भवात् ।

इदमिहावधेयम्—स्वप्रभेदसङ्करवद्गुणीभूतव्यङ्ग्यसङ्करोऽपि त्रिविध एतदुदाहरणयुगले प्रदर्शितः। तथा हि–श्लोकद्वये प्रधानव्यङ्ग्यस्य रसस्य प्रत्येकपदव्यङ्ग्यैर्विभावादिरूपैरुपस्करणादङ्गाङ्गिभावसङ्करः । द्वितीयश्लोके 'पाण्डवा यस्य दासाः' इति दुर्योधनोक्तेर्यदाऽनुकरणम्, तदा वाच्यार्थस्य व्यङ्ग्यविशिष्टस्य क्रोधोद्दीपकतया गुणीभूतव्यङ्ग्यता । अथवा वाच्येन 'कृतकृत्यैर्दासैः स्वाम्यवश्यं द्रष्टव्यः' इत्यादिरूपप्रधानव्यङ्ग्यस्यार्थशक्त्या ध्वननमित्यर्थशक्त्युद्भवध्वनिरित्युभयोश्चमत्कारितया साधकबाधकप्रमाणविरहेण सन्देहसङ्करः । तत्तत्पदरूपवाचकेषु रसध्वनिना सह गुणीभूतव्यङ्ग्यानामनुप्रवेशादेकवाचकानुप्रवेशसङ्करश्च योजनीयः ।

ननु व्यङ्ग्यस्यैव गुणीभूतत्वं प्रधानत्वं च विरुद्धमिति पराक्षेपे सत्यविरोधं समर्थयति—

अत एव च पदार्थाश्रयत्वे गुणीभूतव्यङ्ग्यस्य, वाक्यार्थाश्रयत्वे च ध्वनेः सङ्कीर्णतायामविरोधः स्वप्रभेदान्तरवत् ।

अत एव—एतादृशोदाहरणेषु तदुपलम्भादेव, अविरोध इति सम्बन्धः ।

निदर्शनमुपपादयति—

तथा हि—ध्वनिप्रभेदान्तराणि परस्परं सङ्कीर्यन्ते, पदार्थवाक्यार्थाश्रयत्वेन च न विरुद्धानि ।

आश्रयो व्यञ्जकः । 'एवंवादिनि' इत्यादौ ध्वनेः स्वप्रभेदान्तरसङ्करोदाहरणे यथाऽधोमुखीपदव्यङ्ग्यलज्जारूपव्यभिचारिभावस्यान्यतः प्राधान्येऽपि, समस्तवाक्यार्थव्यङ्ग्यप्रधानीभूताभिलाषविप्रलम्भं प्रत्युपकारकत्वेनाप्राधान्यं व्यञ्जकभेदान्न विरुद्धम्, तथा प्रकृतेऽपीत्यर्थः ।

पितृत्वपुत्रत्वे इव प्राधान्याप्राधान्ये निरूपकभेदेन समानाधिकरणे भवितुमर्हत इति तात्पर्यम्।

ननु समाधानमिदमङ्गाङ्गिभाव–सन्देहसङ्करयोरेव भणितुं शक्यम्, न त्वेकवाचकानुप्रवेशसङ्करेऽपि, तत्र व्यञ्जकैक्यादित्याक्षेपं परिहरति—

किञ्चैकव्यङ्ग्याश्रयत्वे तु प्रधानगुणभावो विरुध्यते, न तु व्यङ्ग्यभेदापेक्षया, ततोऽप्यस्य न विरोधः।

यथा व्यञ्जकभेदेन विरोधपरिहारस्तथा व्यङ्ग्यभेदेनापि। तथा ह्येकमेव व्यङ्ग्यं व्यञ्जकाभेदे गुणीभूतं प्रधानीभूतं च न भवितुं शक्नोति। तद्विरोधस्यैकवाचकानुप्रवेशव्यङ्ग्यसङ्करे न सम्भवः, अन्यस्य व्यङ्ग्यस्य गुणीभावादन्यस्य च प्रधानत्वादिति व्यक्तिभेदेन गुणप्रधानभावो न विरुद्ध इति भावः।

अपिना पूर्वपरिहारापेक्षयाऽस्य सर्वतोमुखत्वं सूच्यते।

ननु सङ्कराणां संसृष्टेश्च प्रसिद्धिर्वाच्यालङ्कारेष्वेव विद्यते, न तु व्यङ्ग्यार्थेष्वपीति शङ्कां समाधत्ते—

अयं च सङ्करसंसृष्टिव्यवहारो बहूनामेकत्र वाच्यवाचकभाव इव व्यङ्ग्यव्यञ्जकभावेऽपि निर्विरोध एव मन्तव्यः।

बहूनामेकत्रोपनिपाते सङ्करसंसृष्टी भवतः, ते च यथा वाच्यानां तथैव व्यङ्ग्यानामपि, किमत्रैकतरनिर्णये निदानम्? प्रतीतिबलादेव यदि तत्र कल्पना, तर्हि साऽत्रापि केन वार्यते, द्वयोस्तुल्यत्वादित्युत्तरम्।

एवं ध्वनिगुणीभूतव्यङ्ग्ययोः सङ्करमुदाहृत्य संसृष्टिमुदाहरति—

यत्र तु पदानि कानिचिदविवक्षितवाच्यान्यनुरणनरूपव्यङ्ग्यवाच्यानि वा, तत्र ध्वनिगुणीभूतव्यङ्ग्ययोः संसृष्टत्वम्। यथा—'तेषां गोपवधूविलाससुहृदाम्' इत्यादौ। अत्र हि 'विलाससुहृदाम्' 'राधारहस्साक्षिणाम्' इत्येते पदे ध्वनिप्रभेदरूपे, 'ते' 'जाने' इत्येते च पदे गुणीभूतव्यङ्ग्यरूपे।

अनुरणनरूपं संलक्ष्यक्रमं व्यङ्ग्यं येषां तादृशानि वाच्यानि च येष तानीति बहुव्रीहिगर्भो बहुव्रीहिः। कानिचिदित्यनेन निरपेक्षार्थतां सूचयता सङ्करसम्भावना निराक्रियते। केषांचित् पदानां यत्राविवक्षितवाच्यध्वनिव्यञ्जकत्वम्, अपरेषां केषांचनार्थशक्त्युद्भवलक्षणसंलक्ष्यक्रमगुणीभूतव्यङ्ग्यव्यञ्जकत्वम्, तत्र ध्वनि-

गुणीभूतव्यङ्ग्ययोः संसृष्टिः । 'तेषाम्' इत्यादिपद्यं पूर्वं विवृतमेव । लतावेश्मविशेषणतयोपात्ते 'विलाससुहृदाम्' इत्यत्र 'राधारहस्साक्षिणाम्' इत्यत्र च, सुहृत्–साक्षिपदे चेतनधर्मयोः सौहृद्य—साक्ष्ययोरचेतनेषु कुञ्जेषु बाधादत्यन्ततिरस्कृतवाच्यध्वन्योः, 'ते' इति 'जाने' इति च पदेऽनुभवैकगोचरत्वमुत्प्रेक्षाविषयीभूतानन्तधर्मवत्त्वं च वाच्योपकारकं गुणीभूतं व्यङ्ग्यं सूचयत इति तद्गुणीभूतव्यङ्ग्याभ्यां संसृष्टिरित्याशयः ।

इत्थं गुणीभूतव्यङ्ग्येन सह त्रिविधसङ्करैकप्रकारकसंसृष्टियोगादपि भेदचतुष्टयमुदाहृत्य, वाच्यालङ्कारेष्वपि तान् भेदानुदाहरति—

वाच्यालङ्कारसङ्कीर्णत्वमलक्ष्यक्रमव्यङ्ग्यापेक्षया रसवति रसालङ्कारे च काव्ये सर्वत्रैव सुव्यवस्थितम् ।

रसवति रसध्वनिभृति, रसालङ्कारे रस एवाप्रधानत्वादलङ्कारो यत्र तादृशे रसवदलङ्कारभाजि च, सर्वत्रैव काव्येऽसंलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेरपेक्षया वाच्येनालङ्कारेण सङ्कीर्णत्वं सुव्यवस्थितं निश्चितमेवास्तीत्यर्थः ।

अलङ्काराणां व्यङ्ग्यत्वे तु प्राधान्ये सति ध्वनेरेव सङ्करसंसृष्टी, अप्राधान्ये तु गुणीभूतव्यङ्ग्यस्यैवेति तद्व्यावर्तनाय वाच्यत्वं विशेषणम् । 'चलापाङ्गां दृष्टिम्' इत्यादिः, 'उप्पहजाआए' इत्यादिश्च श्लोकः सङ्करोदाहरणम् ।

पूर्वत्र वाच्येन व्यतिरेकालङ्कारेण शृङ्गारो ध्वन्यमान उपक्रियत इत्यङ्गाङ्गिभावसङ्करः । उत्तरत्र ध्वनिर्वा स्वभावोक्त्यलङ्कारो वेत्यन्यतरकोटिनिर्धारकप्रमाणाभावात् सन्देहसङ्करः । एकवाचकानुप्रवेशसङ्करोऽपि पूर्वत्रैव, व्यतिरेकवाचकपदसमुदयादेव रसस्यापि व्यञ्जनात् ।

ननु किं रसध्वनेरेव वाच्यालङ्कारेण सह सङ्करो, नान्यध्वनीनाम् ? इति प्रश्नं समाधातुमुदाहरति—

प्रभेदान्तराणामपि कदाचित् सङ्कीर्णत्वं भवत्येव । यथा ममैव—

पद्यमिति शेषः । प्रभेदान्तराणां रसादिभिन्नवस्त्वलङ्कारध्वनिप्रकाराणाम् ।

पूर्वं भगवद्भक्तिमाश्रितो, मध्ये कौतुकमात्रेण कविपण्डितवृत्तिमवलम्ब्य परिश्रान्तः पुनर्भगवद्भक्तिमेव श्रेयसीं मन्यमानो भगवन्तं वदति—

'या व्यापारवती रसान् रसयितुं काचित् कवीनां नवा,
दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती ।

ते द्वे अप्यवलम्ब्य विश्वमनिशं निर्वर्णयन्तो वयं,
श्रान्ता नैव च लब्धमब्धिशयन ! त्वद्भक्तितुल्यं सुखम् ॥' इति ।

हे अब्धिशयन ! समुद्रशायिन् ! विष्णो ! या रसान् शृङ्गारादीन् रसयितुमास्वादयितुम्, स्थायिभावान् वा रस्यमानतां नेतुम्, व्यापाराः शब्दार्थयोजनादयस्तद्वती, काचित् सकलजगदलौकिकत्वोन्मीलनेनाद्भुता, नवा प्रतिक्षणविश्ववैचित्र्यसम्पादिका, कवीनामलौकिकवस्तुवर्णनानिपुणानां, दृष्टिः प्रतिभालक्षणाऽस्ति, या च परिनिष्ठितः प्रमाणपरिग्रहेण दृढोऽर्थविषये ज्ञातव्यपदार्थविषये, उन्मेषो विभासो यस्याः सा, यद्वा–परिनिष्ठिते लोके प्रसिद्धया निर्णीतेऽर्थे, न तु कविदृष्टिवदपूर्व एवार्थे विषये, उन्मेषो यस्यास्तादृशी, विपश्चितां विदुषामि 'वैपश्चिती, दृष्टिः परिणतबुद्धिरस्ति । ते द्वे कविविपश्चिद्दृष्टी अपि न त्वेकतरामेव दृष्टिम्, तावन्मात्रेण सकलालोचनासम्भवाद् अवलम्ब्य करणत्वेनाश्रित्य, विश्वमखिलं पदार्थसार्थम्, अनिशमनवरतं मुहुर्मुहुः, निर्वर्णयन्तो निश्शेषेण निश्चयाय वा वर्णयन्तः वयं वृथा प्रयासव्यसनिनः, श्रान्ताः खिन्नाः, न तु सारं किञ्चिदपि गृहीतवन्तः, अभूमेति शेषः । तव परमात्मनो जगदीशस्य भक्तिर्भजनजन्यावेशः, यद्वा त्वयि भक्तिस्त्वद्विषयाऽनुरक्तिस्त्वद्भक्तिः, तया तुल्यं (का कथा ? तज्जातीयस्य) सुखं च पुनरस्माभिर्नैव लब्धमनुभूतमित्यर्थः ।

रसास्वादसुखाद् दृष्टादृष्टविषयसुखाच्चापि भगवद्भक्तिसुखं गरीय इत्यभिसन्धिः ।

अत्र प्रतिभापरिणतबुद्धिरूपतादृशदृष्टिद्वयालम्बनेन निर्वर्णनं चाक्षुषज्ञानलक्षणमसम्भवीति विरोधस्य, निर्वर्णनपदस्य बुद्धिपरत्वे पर्यवसानात् परिहार इति विरोधाभासेनालङ्कारेण सङ्कीर्णः, दृष्टिपदवाच्यार्थस्य निर्वर्णनपदार्थ एव चाक्षुषज्ञानस्य ज्ञानविशेषलक्षणेऽर्थान्तरे सङ्क्रमणादर्थान्तरसङ्क्रमितवाच्यध्वनिः । वस्तुतस्तु वाच्यस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यध्वनिरिति रसादिध्वनिभिन्नस्यापि ध्वनिप्रकारस्य वाच्यालङ्कारसङ्कीर्णता भवत्येवेत्युत्तरम् ।

तदाह—

अत्र विरोधालङ्कारेणार्थान्तरसङ्क्रमितवाच्यस्य ध्वनिप्रभेदस्य सङ्कीर्णत्वम् ।

प्राग्वदत्रापि सङ्करप्रकारत्रयं केचिद् व्याहरन्ति ।

इत्थं वाच्यालङ्कारध्वनिसङ्करमुदाहृत्य तत्संसृष्टिमुदाहर्तुमुपक्रमते—

वाच्यालङ्कारसंसृष्टत्वं च पदापेक्षयैव ।

वाक्याश्रयास्तु समासोक्त्यादयो वाच्यालङ्काराः प्रधानव्यङ्ग्यमुपकुर्य्युरेवेति तथात्वेऽङ्गाङ्गिभावसङ्करः, वाक्यात्मकैकवाचकप्रकाश्यत्वादेकवाचकानुप्रवेशसङ्करश्च नियमेन स्यादेवेति पदवाच्यालङ्कारेणैव ध्वनेः संसृष्टिः सम्भवतीति भावः।

ननु यत्किञ्चित्पदवाच्यस्याप्यलङ्कारस्य रसाद्यनुपकारकत्वेऽलङ्कारत्वमेव न स्यात्, तदुपकारकत्वे पुनरङ्गाङ्गिभावात् सङ्कर एवेति कथं संसृष्टिरिति चेत्, सत्यम्, ध्वनिपदेनात्र रसादिमात्रं न विवक्षितम्, अपि तु वस्त्वलङ्कारावपि, तदुपकारकत्वं तु नालङ्कारत्वे प्रयोजकमिति वस्त्वलङ्कारध्वनिभ्यां तस्य संसृष्टिः सुवचैव। अत एवात्यन्ततिरस्कृतवाच्यवस्तुध्वनिसंसृष्टिरेवानुपदमुदाहरिष्यते। उदहारि च प्राक्-'कोपात् कोमललोलबाहुलतिकापाशेन' इत्यादि तथैव। तत्र यद्यपि रसध्वनिरप्यस्ति, किन्तु रूपकेण तस्य नोपकारः कश्चित्, तत एव रूपकमुपक्रान्तमपि तत्र न निर्व्यूढम्। तद्रूपकस्यालङ्कारत्वं तु प्रधानेतररसोपकारकत्वेनैव कल्पनीयमिति प्रेक्षावद्भिः परीक्षणीयम्।

पदापेक्षयेत्युक्तं विवृणोति—

यत्र हि कानिचित् पदानि वाच्यालङ्कारभाञ्जि, कानिचिच्च ध्वनिप्रभेदयुक्तानि।

पदानीति बहुवचनमविवक्षितम्, वक्ष्यमाणोदाहरणे बहूनां तादृशपदानामभावात्। हि यतो यत्र कानिचित् पदानि वाच्यालङ्कारभाञ्जि वाच्योपमाऽऽदिबोधकानि, कानिचित् पदानि च ध्वनेः प्रभेदैर्युक्तानि ध्वनिप्रकारव्यञ्जकानि सन्ति, ततस्तत्र पदापेक्षयैव संसृष्टत्वम्, इति पूर्वग्रन्थावृत्त्यैव सङ्गतिः।

उदाहरणमाचष्टे—

यथा—

विरही यक्षो जलदं प्रति विशालावर्णनं कथयति—

'दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां,
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः,
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥'

अयि जलद! यत्र विशालायाम्, सारसानां हंसानां, पटु रमणीयं, मदकलं मदेनाव्यक्तमधुरं कूजितं वाशितं प्रत्यूषेषु प्रभातेषु दीर्घीकुर्वन् कमलसौरभोल्लासने-

नोच्चतरं सम्पादयन् विस्तारयन्निति यावत्, तदानीमेव स्फुटितानां विकसितानां कमलानामामोदस्य सौरभस्य मैत्र्या सख्येन सम्बन्धेनेति यावत्, कषायः सुरभिः, अङ्गानां सुरतश्रमक्लान्तललनाजनावयवानामनुकूलो निर्वृतिकरः, प्रार्थनायां नवनिधुवनयाचनायां चाटुकारः प्रणयेन प्रियानृतशंसी, प्रियतमो वल्लभ इव, शिप्रायास्तदाख्यसरितो वातः पवनः, स्त्रीणां सुरतग्लानिं निरन्तरसम्भोगपरम्पराजनितक्लान्तिं हरत्यपाकरोतीत्यर्थः ।

तथा च—'चक्राङ्गः सारसो हंसः' इति शब्दार्णवः । 'कषायःसुरभौ रसे' इति त्रिकाण्डशेषश्च ।

इहाचेतने वायौ चेतनधर्मस्य मित्रकर्मात्मकमैत्र्या बाधितत्वान्मैत्रीपदस्य सम्बन्धे लाक्षणिकतया सम्बन्धविशेषजसौरभोत्कर्षव्यञ्जकतया चात्यन्ततिरस्कृतवाच्यरूपाविवक्षितवाच्यव्यङ्ग्यध्वननाद्ध्वनित्वम् । तन्नैरपेक्ष्येण 'प्रियतम इव' इत्यादिपदानां पुनरुपमाऽऽद्यलङ्कारवाचकत्वमिति ध्वनिवाच्योपमयोर्निरपेक्षयोः संसृष्टिः ।

मल्लिनाथस्तु—'प्रार्थनाचाटुकारः' इत्यत्र खण्डिता नायिकाऽनुनीता ।' इति व्याख्याय, इव शब्दार्थं हरणक्रिययैव योजयन् 'सुरतग्लानिहरणं न सम्भवति, तस्याः पूर्वं सुरताभावात् । पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनकोपशमनार्थचाटुवचनसाध्यमित्युत्प्रेक्षैवोचिता विवेकिनाम्' इत्यभिधत्ते ।

तदेवाख्याति—

अत्र हि मैत्रीपदमविवक्षितवाच्यो ध्वनिः, पदान्तरेष्वलङ्कारान्तराणि ।

इह हिशब्दो भिन्नक्रमो मैत्रीपदमित्यतः परं पठनीयः । तेन—हि यतो मैत्रीपदमविवक्षितवाच्यो ध्वनिः, पदान्तरेषु चालङ्कारान्तराणि, तस्मात् संसृष्टिरत्रेति योजना । ध्वनिशब्दोऽत्र ध्वननकर्तृपरत्वेन मैत्रीपदशब्दसामानाधिकरण्येन निर्दिष्टः ।

अथ 'सगुणीभूतव्यङ्ग्यैः' इत्यादिकारिकायाश्चरणत्रयमुदाहरणप्रदर्शनपुरस्सरं व्याख्याय 'पुनरपि' इत्यनेन बोधितस्य ध्वनेः संसृष्टालङ्कारसङ्कीर्णत्वं संसृष्टालङ्कारसंसृष्टत्वं सङ्कीर्णालङ्कारसंकीर्णत्वं संकीर्णालङ्कारसंसृष्टत्वं चेति प्रकारचतुष्टयस्योदाहरणप्रदर्शनमारभमाणः प्रथमं प्रभेदमुदाहरति—

संसृष्टालङ्कारसङ्कीर्णो ध्वनिर्यथा—

बुभुक्षातीक्ष्णत्वेन स्वापत्यमेव भक्षयितुं प्रवृत्तायै सिंहपत्न्यै दयया तदपत्यप-

रित्राणाय स्वशरीरमेव समर्पितवन्तं भगवन्तं जिनं कश्चित् सश्लाघं वदति—

'दन्तक्षतानि करजैश्च विपाटितानि,
प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे ।
दत्तानि रक्तमनसा मृगराजवध्वा,
जातस्पृहैर्मुनिभिरप्यवलोकितानि ॥'

हे जिन ! प्रोद्भिन्नाः प्रकर्षेण निर्गताः परपरित्राणप्रमोदात् सात्त्विकभावोल्लासात्, प्रकटीभूताः सान्द्रा घनाः पुलका रोमाञ्चा यत्र, तादृशे भवतः शरीरे, रक्ते शोणिते मनोऽभिलाषो यस्याः पक्षे रक्तमनुरक्तं मनश्चित्तं यस्याः, तादृश्या मृगराजवध्वा सिंहपत्न्या कर्त्र्या दत्तानि कृतानि यानि दन्तैर्दशनैः क्षतानि करजैर्नखैः, विपाटितानि विदारितानि च तानि, जातोत्पन्ना 'अस्माकमप्येवं भवेत्' इति स्पृहा वाञ्छा येषां तादृशैर्मुनिभिरपि, अवलोकितानि दृष्टान्यभूवन्नित्यर्थः ।

तथा च—'रक्तः स्यात् कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि ।
अनुरागिणि' इति विश्वः ।

अत्र सिंह्यामप्रस्तुतराजपत्नीव्यवहारसमारोपात् समासोक्तिः । तथा च—मृगराजवधूपदे श्लेषेण मृगाख्यनायकविशेषनृपपत्नीरूपार्थान्तरविवक्षणं कस्यचिदनुचितम्, एवंसति समासोक्तेरेवासम्भवः, तत्र विशेष्यवाचकपदस्य श्लिष्टत्वनियमात् । अत एव तथा भावे—'अनुरागवन्तमपि लोचनयोर्दधतं वपुःसुखमतापकरम् ॥
निरकासयद् रविमपेतवसुं वियदालयादपरदिग्गणिका ॥' इत्यादौ पुनरुक्तत्वदोषोऽन्यत्र दर्शितः । प्रकृते तदर्थस्य व्यञ्जनयैव प्रत्यायनं तस्मादुचितम्। सा च समासोक्तिः—मुनिभिर्मननशीलतया यमनियमादिपरायणैरपि जातस्पृहैस्तादृशनायिकाऽऽरब्धसम्भोगस्पृहायुक्तैरिति विरोधस्य वाच्यार्थमात्रविवक्षणेन परिहाराद् विरोधाभासालङ्कारेण निरपेक्षेण संसृष्टा । संसृष्टाभ्यां तदलङ्काराभ्यां जिनदयोत्साहस्थायिकस्य रोमाञ्चाद्यनुभावितस्य ध्वन्यमानस्य दयावीररसस्य सङ्कीर्णता । तदाचष्टे—

अत्र हि समासोक्तिसंसृष्टेन विरोधालङ्कारेण सङ्कीर्णस्यालक्ष्यक्रमव्यङ्ग्यस्य, ध्वनेः प्रकाशनम् , दयावीरस्य परमार्थतो वाक्यार्थीभूतत्वात् ।

केचित्तु—दयावीरशब्दमिहत्यं शान्तपरं मन्वानाः शान्तरसमेव प्रधानं व्यपदिशन्ति । समासोक्तिविरोधाभ्यां जिनदयोत्साहस्य स्पृहणीयताप्रकर्षादिबोधनमुखेन

दयावीररसः प्रकृष्टः क्रियत इत्यङ्गाङ्गिभावलक्षणः सङ्करः ।

द्वितीयं प्रकारमुदाहरति—

संसृष्टालङ्कारसंसृष्टत्वं ध्वनेर्यथा—

'अहिणअ-पओअरसिएसु पहिअसामाइएसु दिअहेसु ।
सोहइ पसारिअगीआणँ णच्चिअं मोरविन्दाणम् ॥'

'अभिनवपयोदरसितेषु पथिक-श्यामायितेषु (सामाजिकेषु) दिवसेषु ।
शोभते प्रसारित-ग्रीवाणां (गीतानां) नृत्तं मयूरवृन्दानाम् ॥' इति च्छाया ।

गाथासप्तशतीपद्यमिदम् । अभिनवं नूतनत्वाद्रमणीयं पयोदानां मेघानां रसितं गर्जितं यत्र, तथाभूतेषु पथिकानां विषये श्यामायितेषु वियोगमोहान्धकारवर्धकतया कृष्णरजनीवदाचरितवत्सु, पथिका एव नृत्तदर्शकत्वात् सामाजिका यत्र- तादृशेषु वा, दिवसेषु वर्षर्तुवासरेषु, प्रसारिताः स्तनितश्रुतिप्रमोदभराद् विलम्बिता ग्रीवाः कृकाटिका यैः, यद्वा–प्रसारितानि तत एव हेतोरुल्लासितानि गीतानि केकारुतानि यैः, तेषां मयूरवृन्दानां नृत्तं गात्रविक्षेपणनटनं शोभत इत्यर्थः ।

तथा च—'श्यामा रात्रिर्दृषच्छ्यामा श्यामा स्त्री मुग्धयौवना ।' इतिक्षपणकः । अत्र 'सामाइएसु' इत्यस्य 'श्यामायितेषु' इतिच्छायायां श्यामावदाचरणकारित्वबोधनादुपमा, 'सामाजिकेषु' इतिच्छायायां च पथिकेषु सामाजिकत्वारोपाद् रूपकम्, न चोभयोर्मिथः सापेक्षत्वमिति संसृष्टाभ्यां ताभ्यां 'सामाइएसु' इत्येतच्छब्दपरिवृत्त्यसहत्वेन व्यज्यमानस्य शब्दशक्तिमूलकोद्दीपकत्वातिशयवस्तुध्वनेः संसृष्टिः, रसध्वनेस्तु संकर एव ।

तदाह—

अत्र ह्युपमारूपकाभ्यां शब्दशक्त्युद्भवानुरणनरूपव्यङ्ग्यस्य ध्वनेः संसृष्टत्वम् ।

वस्तुतस्तूपमारूपकयोरिह दर्पणदर्शितदिशैकवाचकानुप्रवेशात् सङ्कर एव, तदलङ्कारयोः 'सामाइएसु' इत्येकस्मिन्नेव वाचकेऽनुप्रविष्टत्वात् । तस्मान्मदीयमत्र राधापरिणयपद्यमिदमिहोदाहरणीयम्—

'दीव्यत्सु दिव्यकाव्येषु मयाऽप्येतद् वितन्यते ।
पारावारेषु पूर्णेषु पल्वलं किं न खन्यते ॥' इति ।

इह तु मिथोनिरपेक्षत्वेन संसृष्टाभ्यां वृत्त्यन्तानुप्रासाभ्यां वस्तुध्वनेरप्युदासीनत्वेन संसृष्टत्वम् ।

यच्च 'पथिकसामाजिकेषु' इति कर्मधारयस्य स्पष्टत्वाद्रूपकम्' इतिव्याख्यानम्, तच्चिन्तनीयम्, यतः कर्मधारये विशेषणवाचकस्य सामाजिकपदस्य पूर्वनिपातावश्यम्भावे तद्धर्म्मारोपाप्रतीते रूपकासम्भवः। स्वीकृतश्चान्यैः सर्वैरूपकस्थले मयूरव्यंसकादिगणपाठात् समासः।

अथ सङ्कीर्णालङ्कारसंसृष्टत्वं, सङ्कीर्णालङ्कारसङ्कीर्णत्वं चेति भेदद्वयोदाहरणाप्रदर्शनान्न्यूनत्वं न शङ्कनीयम्, अस्यैव ग्रन्थकृदुपात्तश्लोकस्य तद्भेदयोरप्युदाहरणत्वात्। तथा हि—एकवाचकानुप्रविष्टतया सङ्कीर्णाभ्यामुपमारूपकाभ्यां वस्तुध्वनेः संसृष्टिः, रसादिध्वनेस्त्वङ्गाङ्गिभावात् सङ्करः सम्भवत्येव।

उपसंहरति—

'एवं ध्वनेः प्रभेदाः प्रभेदभेदाश्च केन शक्यन्ते।
सङ्ख्यातुं, दिङ्मात्रं तेषामिदमुक्तमस्माभिः॥ १०१॥'

एवममुना प्रकारेण सम्भविनोऽनन्ताः ध्वनेः प्रभेदाः प्रधानप्रकाराः, च तथा प्रभेदभेदास्तदवान्तरप्रकाराः सङ्ख्यातुमेकैकशो गणयितुं केन शक्यन्ते, न केनापीति भावः। अस्माभिः पुनस्तेषां ध्वनिभेदोपभेदानामिदं दिङ्मात्रमुक्तमित्यर्थः।

अनन्ता हि ध्वनिप्रकारा वक्तुमशक्याः प्रेक्षावद्भिः स्वयमुत्प्रेक्षणीया इति भावः।

तदाह—

अनन्ता हि ध्वनेः प्रकाराः सहृदयानां व्युत्पत्तये तेषां दिङ्मात्रं कथितम्।

तथा च—'दिङ्मात्रं तूच्यते' इत्यादिकारिकया पूर्वमुपक्षिप्तमिहोप हृतं निर्व्यूढं चेत्यवगन्तव्यम्।

किञ्चादौ 'तेन ब्रूमः सहृदय मनःप्रीतये तत्स्वरूपम्' इति यदास्थितम्, तदप्यधुना निर्व्यूढमेवेति सूचयन् ध्वनेरवश्यविवेचनीयतामुपादिशति—

'इत्युक्तलक्षणो यो ध्वनिर्विवेच्यः प्रयत्नतः सद्भिः।
सत्काव्यं कर्तुं वा ज्ञातुं वा सम्यगभियुक्तैः॥ १०२॥'

इत्यमुना दिङ्मात्रदर्शिना सङ्क्षिप्तेन प्रकारेण उक्तं लक्षणं यस्य, तादृशो यो ध्वनिः, स सत्काव्यमुत्कृष्टकाव्यं कर्तुं निर्मातुं ज्ञातुं समवगन्तुं वा अभियुक्तै-

रभियोगवद्भिरुद्यतैरिति यावत्, सद्भिः कवीभवितुं सहृदयीभवितुं वा वाञ्छद्भिर्विद्वद्भिः प्रयत्नतः सावधानतया सम्यगसङ्कीर्णतया विवेच्यो विचारणीय इत्यर्थः ।

ध्वनिविवेचनायाः फलमुपदिशति—

उक्तस्वरूपध्वनिनिरूपणनिपुणा हि सत्कवयः सहृदयाश्च नियतमेव काव्यविषये परां प्रकर्षपदवीमासादयन्ति ।

तथा च—तत्प्रकर्षलाभ एव फलं ध्वनिविवेचनाया बोध्यम् ।

अथ ध्वनेर्मुख्यत्वं रीतीनामानुषङ्गिकतां च दर्शयति—

'अस्फुटस्फुरितं काव्य-तत्त्वमेतद्यथोदितम् ।
अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः ॥ १०३ ॥'

उक्तलक्षणो यो ध्वनिः सद्भिः प्रयत्नतो विवेच्यः, एतत् तदेव यथोदितं निरूपितप्रपञ्चानुसारि काव्यस्य तत्त्वं सारं जीवनाधायकमितियावत्, तदेव यतः-अस्फुटं विपुलत्वात् सूक्ष्मबुद्धिवेद्यत्वाद्वाऽव्यक्तं स्फुरितं प्रतिभासः प्रपञ्चो वा यस्य तादृशम्, अत एव तद्व्याकर्तुं विवरीतुम्, अशक्नुवद्भिरसमर्थैर्वामनादिभिः, रीतयो वैदर्भीप्रभृतयः सम्प्रवर्तिताः प्रादुर्भाविताः प्रचारिता वेतिपूर्वकारिकैकवाक्यतयाऽन्वयबोधः ।

तदेव वक्ति—

एतद्ध्वनिवर्णनेन निर्णीतं काव्यतत्त्वमस्फुटस्फुरितं सदशक्नुवद्भिः प्रतिपादयितुं वैदर्भी गौडी पञ्चाली चेति रीतयः प्रवर्तिताः ।

फलितमाह—

रीतिलक्षणविधायिनां हि काव्यतत्त्वमेतदस्फुटतया मनाक् स्फुरितमासीदिति तदत्र स्फुटतया संप्रदर्शितमित्यन्येन रीतिलक्षणेन न किञ्चित् ।

अयं भावः-शब्दप्रधानासु रीतिषु 'विशिष्टा पदरचना रीतिः' 'विशेषो गुणात्मा' इति वामननयेन गुणा एव विच्छित्तिविशेषमूलतया सारमिति तासां गुणेष्वेव पर्यवसानाद् गुणानां च रसमात्रधर्मतया धर्मधर्मिणोस्तादात्म्यसिद्धान्तेन रसेषु पर्यवसानाद् रसादिध्वनावेव सर्वमापतितमिति रीतीनां काव्यात्मत्वेन रसेभ्यः पृथङ् निरूपणं नोचितम्। यैः पुनर्विहितम्, तेषां ध्वनितत्त्वमिदमीषदेव स्पष्टस्वरूपं मतिपदवीमारूढमिति पर्यालोचयितुमचतुरैरेव तैरपरिनिश्चितध्वनितत्त्वै रीतयः प्रवर्तिताः ।

यदि तेऽपि तत्तत्त्वं मनागपि नेक्षेरेन् सर्वतोभावेन वा परीक्षेरन्, तर्हीमा रीतीर्न प्रवर्त्तयेयुरिति तात्पर्यम् ।

इदानीं द्विविधवृत्तीनामपि तादवस्थ्यमेव व्यवस्थापयति—

'शब्दतत्त्वाश्रयाः काश्चिदर्थतत्त्वयुजोऽपराः ।
वृत्तयोऽपि प्रकाशन्ते ज्ञातेऽस्मिन् काव्यलक्षणे ॥१०४॥'

शब्दस्तत्त्वं सारं स्वरूपं वा यासां ताः शब्दतत्त्वाः शब्दाश्रिता वा, याः काश्चिन्निर्धारितस्वरूपा अमुख्या उक्तचरलक्षणा उपनागरिकाऽऽद्याः, याश्चापरास्तदितरा अर्थतत्त्वयुजोऽर्थसम्बन्धिन्योऽर्थाश्रिता वा ऽभिहितलक्षणाः प्रसिद्धाः कैशिकीप्रभृतयो वृत्तयः, ता अपि अस्मिन्नेतावता प्रबन्धेन निरूपिते व्यङ्ग्यव्यञ्जकभावविवेचनाविजृम्भिते काव्यलक्षणे काव्यस्य सारतया जीवनाधायके ध्वनौ, ज्ञाते व्यापकत्वेनात्मनि तत्तदन्तर्भावेन कर्तृतयाऽवगते सति प्रकाशन्ते रीतिवत् काव्यजीवनत्वप्रकारकानुभूतिविशेष्यतामासादयन्तीत्यर्थः ।

तदभिदधाति—

अस्मिन् व्यङ्ग्यव्यञ्जकभावविवेचनसमये काव्यलक्षणे ज्ञाते सति, याः काश्चित् प्रसिद्धा उपनागरिकाऽऽद्याः शब्दतत्त्वाश्रया वृत्तयो, याश्चार्थतत्त्वसम्बद्धाः कैशिक्यादयस्ताः सम्यग् रीतिपदवीमवतरन्ति ।

इदमुच्यते—यथा वैदर्भीप्रभृतिरीतयः पृथगाभासमाना अपि पर्यन्ते गुणमुखेन रस एवान्तःपतन्तीति ध्वनिनिरूपणेनैव गतार्थाः । तथा तदेकरूपा उपनागरिकाप्रमुखाश्शाब्द्यो वृत्तयः, तदनतिमात्रभिन्नाः कैशिक्यादय आर्थ्यो वृत्तयश्चापि । रीतिध्वन्योरिव वृत्तिध्वन्योरपि परमार्थतस्त्वैक्यमेव, अविवेकिनामेव पुनर्जीवब्रह्मणोरिव तयोः पार्थक्यं भासते । तथा हि—वैदर्भीवदुपनागरिकाकैशिक्योर्माधुर्यद्वारेण शृङ्गारे पर्यवसानम्, 'माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते' 'कैशिकीश्लक्ष्णनेपथ्या शृङ्गाररससम्भवा' 'शृङ्गार एव मधुरः' इत्यादिदर्शनात् । एवं गौडीवत् परुषाऽऽरभट्योरोजोमुखेन रौद्रादिषु, पाञ्चालीवत् कोमलासात्वत्योः प्रसादमार्गेण हास्यादिषु चान्तःपातो ज्ञेयः ।

'वृत्तयः काव्यमातृकाः' इतिमहर्षिभाषणमपि वृत्तिपदस्य रसोचितचेष्टापरतयाऽनुकूलमेवाकलनीयम् । तथा च काव्ये ध्वनिरेव परमं तत्त्वमिति फलितम् ।

यदादौ ध्वन्यभाववादिप्रथमविकल्पे रीतिवृत्तीनां प्रसिद्धत्वं ध्वनिभिन्नत्वं चांशतोऽभ्युपगतम्, तत्तादात्म्यव्यवस्थापनात् ।

तदनङ्गीकारे दोषं दर्शयति—

अन्यथा तु तासामदृष्टार्थानामिव वृत्तीनामश्रद्धेयत्वमेव स्यात्, नानुभवसिद्धत्वम् ।

अन्यथा ध्वनितादात्म्यप्रयोज्यसहृदयानुभवगोचरचमत्कारविशेषजनकत्वाभावे, अदृष्टार्थानामदृष्टफलमात्रजनकयागादिक्रियाणामिव तासां वृत्तीनामपि, दृष्टफलाजनिकानाम्, अश्रद्धेयत्वं दृष्टफलमात्रार्थिजनानादरणीयत्वमप्रत्येयत्वं वा स्यात्, न त्वनुभवविषयत्वं स्यादित्यर्थः ।

फलितमाचष्टे—

एवं स्फुटतयैव लक्षणीयं स्वरूपमस्य ध्वनेः ।

अथादौ ध्वनेरनाख्येयत्वं निरस्तमपि स्थूणाऽभिखनन्यायेन पुनर्निरस्यति—

यत्र शब्दानामर्थानां च केषांचित् प्रतिपत्तृविशेषसंवेद्यं जात्यत्वमिव रत्नविशेषाणां चारुत्वमनाख्येयमवभासते, काव्ये तत्र ध्वनिव्यवहार इति यल्लक्षणं ध्वनेरुच्यते केनचित्, तदयुक्तमिति नावधेयतामर्हति ।

प्रतिपत्त्रा ज्ञात्रा, विशेषेणानुपदं वक्ष्यमाणेन शब्दार्थवैलक्षण्येन सम्यग् वेद्यं ज्ञेयम् । अनवधेयतामयुक्तत्वादनादरणीयताम् । यत्र रत्नविशेषाणां जात्यत्वमिव केषांचित्, न तु सर्वेषाम्, शब्दानामर्थानां च प्रतिपत्त्रा विशेषेण संवेद्यं चारुत्वमवभासते, तत्र काव्ये ध्वनिव्यवहार इति सम्बन्धः । जात्यत्वमुत्कृष्टजातिकत्वम् ।

आक्षेपोऽयमत्रैवोद्द्योते—'स्यान्मतम्' इत्यादिना प्रक्रान्तः खण्डितश्चापि, खण्डनप्रकारविशेषप्रकाशनार्थं पुनरुपात्तोऽवसेयः ।

तत्खण्डनहेतुमाख्याति—

यतः शब्दानां स्वरूपाश्रयस्तावदक्लिष्टत्वे सत्यप्रयुक्तप्रयोगः, वाचकत्वाश्रयस्तु प्रसादो व्यञ्जकत्वं चेति विशेषः। अर्थानां च स्फुटत्वेनावभासनं, व्यङ्ग्यपरत्वं, व्यङ्ग्यविशिष्टत्वं चेति विशेषः। तौ च विशेषौ व्याख्यातुमशक्यौ व्याख्यातौ बहुप्रकारम् । तद्व्यतिरिक्तानाख्येयविशेषसम्भावना तु विवेकावसादगर्भरभसमूलैव । यस्मादनाख्येयत्वं शब्दार्थगोचरत्वेन न कस्यचित् सम्भवति; अन्ततोऽनाख्येयशब्देन तदभिधानात् ।

शब्दानां स्वरूपाश्रयः स्वरूपनिष्ठो विशेषो विलक्षणधर्मः—अक्लिष्टत्वे श्रुतिकटुत्वादिदोषरहितत्वे सति, अप्रयुक्तस्य प्रयोगोऽपुनरुक्तत्वम्। वाचकत्वमभिधेत्यनर्थान्तरम् । तदाश्रयस्तत्समानाधिकरणस्तु विशेषः—प्रसादो झटित्यर्थसमर्पकत्वं, व्यञ्जकत्वं व्यङ्ग्यबोधनतात्पर्येणोच्चारितत्वं तद्बोधनसमर्थत्वं वा । अर्थानामर्थनिष्ठश्च पुनः स्फुटत्वेनावभासनमसङ्कीर्णतया झटिति प्रतीतिविषयत्वं व्यङ्ग्यपरत्वं व्यङ्ग्यबोधनशक्तत्वं, व्यङ्ग्येन विशिष्टत्वं तत्सम्बद्धत्वं तद्योग्यत्वं वेति द्विरूपो विशेष इति शेषः । तौ द्वौ शब्दार्थनिष्ठौ विशेषौ चारुत्वानतिरिक्तौ, व्याख्यातुमशक्याविति कैश्चिन्मन्यमानावपि, बहुप्रकारं बहुधा व्यङ्ग्य-व्यञ्जकनिरूपणप्रसङ्गेनास्माभिरिह यतो व्याख्यातौ । तत्तस्माद् व्यतिरिक्ता विलक्षणा, ततो वा व्यतिरिक्तस्य भिन्नस्य, अनाख्येयस्य वक्तुमशक्यस्य, विशेषस्योक्तरूपस्य, सम्भावना तद्विषयकोटकैककोटिकशङ्का या केषांचित्, सा तु, विवेकस्य योऽवसादो ध्वंसोऽत्यन्ताभावो वा गर्भे मध्ये यस्य तादृशो रभसो वेगो मूलं निमित्तं यस्यास्तादृगेव, न तु विवेकमूलिका। यस्माद्धेतोः, कस्यचिदपि वस्तुनः सर्व-शब्दार्थगोचरत्वेनानाख्येयत्वं शब्दत्वावच्छिन्नाप्रतिपाद्यत्वमर्थत्वानवच्छिन्नत्वं वा न सम्भवति, अन्यस्य विशेषणवाचकस्य शब्दस्यासत्त्वेऽपि, अनाख्येयेतिशब्देनैव तदभिधानसम्भवादित्यर्थः ।

अयं भावः—ये खलु रत्नजात्यत्वमिव शब्दार्थचारुत्वमनाख्येयं बिभ्रतः काव्यस्य ध्वनित्वं मन्यन्ते, त उपेक्षणीया एव, असम्बद्धप्रलापित्वात् । एवं च तेषां विशेषरूपस्य शब्दार्थयोश्चारुत्वस्य बहुधाऽस्माभिरेव व्याख्याततत्वेन, अनाख्येयशब्दप्रतिपाद्यत्वेन चानाख्येयत्वाभावात् । अनाख्येय इत्याकारकः शब्दस्तु तमाख्यातुं शक्नोत्येव, तथाऽपि न तेषामभीष्टसिद्धिरिति ।

तन्मतं तदुक्तदृष्टान्तदार्ष्टान्तिकवैषम्यदर्शनेनापि खण्डयति—

सामान्यस्पर्शिविकल्पशब्दगोचरत्वे सति प्रकाशमानत्वं तु यदनाख्येय-(त्व)मुच्यते क्वचित्, तदपि काव्यविशेषाणां रत्नविशेषाणामिव न सम्भवति, तेषां लक्षणकारैर्व्याकृतरूपत्वात्, रत्नविशेषाणां च सामान्यसम्भावनयैव मूल्यस्थितिपरिकल्पनादर्शनाच्च ।

सामान्यमविशेषं सम्यक् स्पृशतीति सामान्यसंस्पर्शी यो विकल्पः प्रागुक्तस्वरूपश्चित्तवृत्तिविशेषः, तदीयस्तज्जनितोच्चारणकर्मभूतो यश्शब्दस्तद्गोचरत्वे तज्जन्य-

प्रतीतिविषयत्वे अनाख्येयादिसामान्यप्रत्यायकशब्दमात्रबोध्यत्वे सति, प्रकाशमानत्वं प्रसिद्धत्वम्, यदनाख्येयत्वं क्वचिदनिर्वचनीयतावादिभिरुच्यते, तदप्यनाख्येयत्वं यथा रत्नविशेषाणां, तथा काव्यविशेषाणां न सम्भवति, तेषां काव्यविशेषाणां लक्षणकारैर्व्याकृतरूपत्वाद् व्याख्यातस्वरूपत्वात्, च तथा—रत्नविशेषाणां च पुनः सामान्यसम्भावनयैव, न तु विशेषसम्भावनया, मूल्यस्य स्थितेर्व्यवस्थायाः परिकल्पनाया दर्शनादित्यर्थः ।

सामान्यशब्दमात्रवेद्यत्वरूपानाख्येयत्वेन ध्वनिकाव्य—रत्नविशेषाणां न साम्यम्, यतो ध्वनीनामुक्तप्रकारैर्व्याख्यातत्वेन विशेषशब्दजप्रतीतेरपि गोचरत्वम् । रत्नविशेषाणां तु सामान्यरूपेणैव मूल्यनिर्धारणस्योपलम्भ इति सारम् ।

ननु किं कथंचिदपि ध्वनिकाव्य—रत्नविशेषाणां साम्यं न सम्भवतीत्याक्षेपमभ्युपगमेन निरस्यति—

उभयेषामपि तेषां प्रतिपत्तृविशेषसंवेद्यत्वमस्त्येव । वैकटिका एव हि रत्नतत्त्वविदः, सहृदया एव च काव्यानां रसज्ञा इति कस्यात्र विप्रतिपत्तिः ।

प्रतिपत्तृविशेषसंवेद्यत्वं तूभयेषामपि तेषां ध्वनिकाव्यानां रत्नविशेषाणां च तुल्यमस्त्येव, हि यतो वैकटिका रत्नानां परीक्षका एव केवलं रत्नतत्त्वविदः, सहृदया एव केवलं रसादिध्वनिज्ञाः सन्तीति हेतोरिति व्यवस्थायां वा, कस्य विप्रतिपत्तिर्न कस्यापीत्यर्थः ।

वेत्तृविशेषमात्रवेद्यत्वेनोभयेषां साम्यस्योपपादनेऽपि न प्रकृताभीष्टसिद्धिः, ध्वनेरनाख्येयत्वसिद्ध्यभावस्य तादवस्थ्यादित्याशयः ।

ननु क्षणभङ्गवादे सर्वेषामेव वस्तूनां क्षणिकत्वेनानिर्वचनीयता ध्वनेरपि प्राप्नोत्येव, तस्मान्नासङ्गतिरित्याशङ्कां समादधाति—

यत्त्वनिर्देश्यत्वं सर्वलक्षणविषये बौद्धानां प्रसिद्धम्, तत् तन्मतपरीक्षायां ग्रन्थान्तरे निरूपयिष्यामः ।

तु पुनः सर्वेषां पदार्थानां लक्षणविषये बौद्धानां यदनिर्देश्यत्वमनिर्वचनीयत्वं क्षणिकत्वात् प्रसिद्धम्, तदनिर्देश्यत्वं तन्मतस्य परीक्षायां विवेके, ग्रन्थान्तरे स्वकृतायां विनिश्चयनामकबौद्धनिबन्धस्य विवृतौ धर्मोत्तमाख्यायां निरूपयिष्याम इत्यर्थः ।

तदनुमतमनिर्देश्यत्वमपि ध्वनेर्न सम्भवतीति हृदयम् ।

नन्विहैव न कथं तन्निरूप्यत इत्यत आह—

इह तु ग्रन्थान्तरश्रवणलवप्रकाशनं सहृदयवैमनस्यदायीति न प्रक्रियते।

अत्र पुनरानुषङ्गिकतयोपात्तस्य ग्रन्थान्तरस्य यच्छ्रवणं तस्य लवप्रकाशनं लेशतोऽपि व्याख्यानं, सहृदयानां वैमनस्याय मानसोद्वेगाय भवतीति हेतोस्तन्मतपरीक्षणं न प्रक्रियते, नैव प्रस्तूयत इत्यर्थः ।

सुकुमारतममनसो हि सहृदया अनत्यपेक्षितशास्त्रान्तरीयविषयविवरणपल्लवनेन नूनं खिद्येरन्निति तन्न विस्तरेण वर्ण्यत इति सारम् ।

नन्वत्र सौगतमतस्य निराकृतावकृतायामुपायान्तरं किञ्चिदस्ति न वा ? इति प्रश्नं पक्षान्तरालम्बनेन समादधाति—

बौद्धमतेन वा यथा प्रत्यक्षादिलक्षणम्, तथाऽस्माकं ध्वनिलक्षणं भविष्यति ।

बौद्धनये प्रत्यक्षादिज्ञानानां क्षणिकत्वेऽपि यथालक्षणम्, तथैवास्माकं मते ध्वनेरपि क्षणिकत्वाभ्युपगमेऽपि भविष्यतीत्येषोऽप्युपायोऽस्त्येवेत्यर्थः ।

पर्यवसाने निगमयति—

तस्माल्लक्षणान्तरस्याघटनादशब्दार्थत्वाच्च तस्योक्तमेव ध्वनिलक्षणं साधीयः ।

तस्मादुक्तहेतुसमुदायात्, तस्य ध्वनेर्लक्षणान्तरस्यान्यविधलक्षणस्याघटनादसमन्वयादयुक्तत्वाद्वा, अशब्दार्थत्वाच्छब्दवाच्यत्वाभावाच्च, उक्तं मयाऽत्र विहितं ध्वनिलक्षणमेव साधीयः, साधुतममित्यर्थः ।

तदर्थसङ्ग्राहकश्लोकमाह—

'अनाख्येयांशभासित्वं निर्वाच्यार्थतया ध्वनेः ।
न लक्षणं, लक्षणं तु साधीयोऽस्य यथोदितम् ॥'

इति राजानकानन्दवर्धनाचार्यविरचिते ध्वन्यालोके तृतीय उद्द्योतः ।

ध्वनेरनाख्येयांशभासित्वमनिर्वचनीयांशकाव्यभासनशीलमनिर्वचनीयत्वमिति यत्, लक्षणं निर्वाच्यार्थतया निर्वचनक्षमार्थत्वान्न सम्भवति, यद्वा—ध्वनेरुत्तमकाव्यस्य अनाख्येयांशस्यानिर्वचनीयरसादिरूपस्य भासित्वं भासकत्वं लक्षणं, निर्वाच्य उक्तरीत्या निर्वचनयोग्योऽर्थो यस्य स तादृशः, तस्य भावो निर्वाच्यार्थता,

तया निरुक्तियोग्यार्थबोधकतया हेतुभूतया न सम्भवति । तु पुनरस्य ध्वनेः, यथोदितमस्मदुक्तानुरूपमेव लक्षणं साधीयो भवतीति सिद्धम् ।

असंस्तुताध्वपान्थस्य स्खलितैर्मम भूरिभिः ।
विदध्यान्नूनमुचितं साहसं सहसान् बुधः ॥
यत्कटाक्षो दयासान्द्रो गहनाद् ध्वनिकाननात् ।
अनैषीदसहायं मां पारं ताभ्यां परं नमः ॥

इति मैथिलश्रोत्रियपण्डितश्रीबदरीनाथशर्मनिर्मितायां ध्वन्यालोकदीधितौ तृतीय उद्द्योतः ।

अथ ध्वन्यालोकदीधितौ चतुर्थ उद्द्योतः ।

'भक्ताभिलषितपूर्त्ति-व्रतविदिते क्लिन्नचेतसी कृपया ।
वृन्दावने स्फुरन्ती सितशितिमहसी नमाम्यनिशम् ॥'

अथ ध्वनिमनङ्गीकुर्वतां मतमपाकर्तुं कृतस्य तन्निरूपणस्य कविप्रतिभाऽऽनन्त्यलक्षणं विलक्षणं प्रयोजनं प्रतिपादयितुं चतुर्थमुद्द्योतमारभमाणः प्रथमकारिकामवतारयति वृत्तिकारः—

एवं ध्वनिं सप्रपञ्चं विप्रतिपत्तिनिरासार्थं व्युत्पाद्य, तद्व्युत्पादने प्रयोजनान्तरमुच्यते—

एवमुद्द्योतत्रयोक्तप्रकारैः सप्रपञ्चं भेदप्रभेदसहितं ध्वनिं विप्रतिपत्तीनां ध्वन्यभावादिवादिप्रतिवादिजनोक्तयुक्तीनां निरासार्थं खण्डनाय, व्युत्पाद्य विशेषतो निरूप्य, तद्व्युत्पादने ध्वनिविशेषनिरूपणे, प्रयोजनान्तरं सहृदयमनःप्रीतये इत्यनेन प्रथमे, 'सत्काव्यं कर्तुं वा ज्ञातुं वा' इत्यमुना तृतीये चोद्द्योते—सामान्यविशेषभावेनोक्ताभ्यां सहृदयहृदयानन्द—सत्काव्यकरणज्ञानान्यतररूपप्रयोजनाभ्यामन्यत् तृतीयं प्रयोजनमुच्यते । यद्वा—सत्काव्यकरण—तज्ज्ञानरूपप्रयोजनयोरन्तरं विशेषो वैलक्षण्यलक्षणः । तथा च केन विशेषेण प्रथममस्य प्रयोजनम् । केन च द्वितीयमिति कथ्यते । तत्रापि कृतस्यैव ज्ञानविषयत्वसम्भवात् प्रथमं सत्काव्यकरणविशेषप्रयोजनमेवोच्यते, कारिकयेत्यर्थः ।

'ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः ।
अनेनानन्त्यमायाति कवीनां प्रातिभागुणः ॥ १०५ ॥

गुणीभूतव्यङ्ग्येन सहितस्य ध्वनेः, योऽध्वा मार्गः प्रकार इति यावत्, प्रदर्शित उद्द्योतत्रयेणेति शेषः । अनेन सकलध्वनिप्रपञ्चनिरूपणेन, कवीनां प्रतिभागुण उत्कर्षाधायकधर्म्मं आनन्त्यमविच्छिन्नत्वमायाति प्राप्नोतीत्यर्थः ।

ध्वनियोगेन वर्ण्यवस्तूनां नवनवीभावाद् वर्णने कवीनां प्रतिभाऽप्रतिहता भवतीति भावः ।

तदाह—

य एष ध्वनेर्गुणीभूतव्यङ्ग्यस्य च मार्गः प्रकाशितः, तस्य फलान्तरं कविप्रतिभाऽऽनन्त्यम् ।

यत्तच्छब्दाभ्यां प्रदर्शनकर्मीभूतोऽध्वा परामृश्यते । कविप्रतिभाऽऽनन्त्यमित्यतः परमस्तीत्यध्याहार्यम् ।

ज्ञानद्वारकसामानाधिकरण्यमनवगच्छतः पृच्छामग्रिमकारिकामवतारयितुमनुवदति—

कथमिति चेत् ?—

प्रदर्शितो हि ध्वनिगुणीभूतव्यङ्ग्यप्रपञ्चः काव्यवृत्तिः, कविवृत्तितया व्यधिकरणं प्रतिभाऽऽनन्त्यं कथं जनयेत्, कार्यकारणयोः सामानाधिकरण्यस्य नियमादिति प्रष्टुराकूतम् । ध्वनिप्रकारज्ञानमनन्तप्रतिभा चैकत्रैव कविषु समवैतीति सामानाधिकरण्यमक्षुण्णमेवेति चोत्तरयितुराशयः ।

कथं पुनः कविप्रतिभाऽऽनन्त्यमित्याकाङ्क्षायामभिदधाति—

'अतो ह्यन्यतमेनापि प्रकारेण विभूषिता ।
वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि ॥ १०६ ॥'

हि यतः, अतोऽस्मादुक्तध्वनिगुणीभूतव्यङ्ग्यप्रभेदानां मध्यात्, अन्यतमेनैकेनापि प्रकारेण, का कथा बहूनाम्, विभूषिता व्यङ्ग्यव्यञ्जकभावेन विशिष्टा, कवीनां वाणी काव्यलक्षणा वाक्, पूर्वैः प्राचीनमहर्षिबाल्मीकिप्रभृतिकविपरम्परावर्णितैरर्थैः, अन्वयवत्यपि वाच्यवाचकभावेन सम्बद्धाऽपि, नवत्वमपूर्वत्वं चारुत्वविशेषमिति यावत्, आयाति प्राप्नोतीत्यर्थः ।

तदाह—

अतो हि ध्वनेरुक्तप्रभेदमध्यादन्यतमेनापि प्रकारेण विभूषिता सती वाणी पुरातनकविनिबद्धार्थसंस्पर्शवत्यपि नवत्वमायाति ।

वर्णनीयपदार्थविषयकनवनवोन्मेषशालिनी प्रज्ञा प्रतिभा, तस्या आनन्त्यं ध्वनिसम्बन्धं विना न सम्भवति । तथा हि—प्राच्यैर्वाल्मीकिप्रमुखैरेव वर्णितत्वादर्थानां परिशिष्टानां मुष्टिमेयत्वमसत्त्वं वा, तद्विषयकत्वेन च प्रतिभाया अपि सत्त्वं प्राप्तमेव । ध्वनियोगेन पुनरर्थानामानन्त्यम्, तेन च तस्याः, ततश्च काव्यस्य नवत्वम्, ततोऽपि कवीनां नव्यानामात्मलाभ इति परम्पराऽत्रानुसन्धेया ।

प्राचीनकविवर्णितान् ह्यर्थानेव विषयीकुर्वन्ती तज्जातीयैव स्यात्, न तु ततो विलक्षणा, विषयाणामेव ज्ञाननियामकत्वादिति तस्याः फलं काव्यमपि तज्जातीयमेवानायत्या सम्पद्येत, तथा च नवीनानां कवीनां नैवात्मलाभः । व्यङ्ग्यं हि प्राचीनमप्यर्थं प्रसाध्य नूतनमिव प्रदर्शयति, रञ्जनद्रव्यमिव पटमिति तात्पर्यम् ।

उदाहर्तुमुपक्रमते—

तथा हि—अविवक्षितवाच्यस्य ध्वनेः प्रकारद्वयसमाश्रयणेन नवत्वं पूर्वार्थानुगमेऽपि ।

पूर्वार्थस्य प्राचीनवर्णितस्यानुगम उपादानेऽपि, अविवक्षितवाच्यस्य ध्वनेरुक्तप्रकारद्वयस्याश्रयणेन योजनेन नवत्वमपूर्वत्वं भवति, ततश्च कविवाण्या अपीत्यर्थः ।

तत्रात्यन्ततिरस्कृतवाच्ययोगेनापूर्वत्वमादावुदाहरति—

यथा—

प्रक्रममाणतारुण्यां कोऽपि वर्णयति—

'स्मितं किञ्चिन्मुग्धं तरलमधुरो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतानामारम्भः किसलयितलीलापरिकरः,
स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः ॥' इत्यस्य-

स्मितं हसितं किञ्चिदीषद्, न तूच्चैः, तच्च मुग्धं मनोहरम्, दृष्टिविभवः कटाक्षलक्ष्मीः, तरलश्चञ्चलोऽत एव मधुरः प्रियः, वाचां परिस्पन्दः प्रसरणं विकास इति यावत्, अभिनवाभिरपूर्वाभिः, विलासोक्तिभिर्विभ्रमवचनैः सरसो नायकान्तस्सन्तापशमनैकशीलत्वाद् रससान्द्रः, गतानां सञ्चरणानामारम्भ उपक्रमः, किसलयितो नितम्बगौरवेण मन्दिमाधिक्याद् विकसितो लीलानां विभ्रमाणां व्यतिकरो मिथस्सम्बन्धस्सद्रूपो यत्र तादृशः, हि यतोऽस्ति, तस्मादिति शेषः, तारुण्यं यौवनं,

स्पृशन्त्या अङ्कुरयौवनायाः, मृगदृशो नायिकायाः सम्बन्धिषु व्यापारेषु, किमिवास्ति किं नामास्ति, यद् रम्यं हृदयङ्गमं नास्तीत्यर्थः ।

तथा च—'मुग्धस्तु सुन्दरे मूढे' 'भवेत् परिकरः सङ्घे पर्यङ्कपरिवारयोः' इति मेदिनी । 'लीलां विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु' इति विश्वः । 'स्वादुप्रियौ तु मधुरौ' इत्यमरश्च ।

अत्र किञ्चित्पदसमभिव्याहारात् स्मितपदं हसितमात्रपरम् । तरलमधुर इत्यत्र विशेषणवाचकपदयोः केवलयोः समासः क्लिष्टः । अस्य 'स्मितम्' इत्यादिश्लोकस्य 'अपूर्वत्वमेव प्रतिभासते' इत्यग्रिमेण सम्बन्धः । एवमग्रेऽपि योजनीयम् ।

तदर्थकं प्राचीनपद्यं निगदति—

'सविभ्रमस्मितोद्भेदा लोलाक्ष्यः प्रस्खलद्गिरः ।
नितम्बालसगामिन्यः कामिन्यः कस्य न प्रियाः ॥'

विभ्रमेण शृङ्गारचेष्टाविशेषेण सहितः सविभ्रमः स्मितस्योद्भेदो विकासो यासां तास्तथोक्ताः, लोलाक्ष्यश्चपलनयनाः, प्रस्खलन्त्यो मदातिरेकेण त्रुटयन्त्यो गिरो यासां तादृश्यः, तथा नितम्बाभ्याम् (गौरवाद्) अलसं मन्दं गन्तुंशीलमस्त्यासामिति तथाभूताः कामिन्यः कस्य न प्रियाः स्युः, अपि तु सर्वस्येत्यर्थः ।

सङ्गमयति—

इत्येवमादिषु श्लोकेषु सत्स्वपि तिरस्कृतवाच्यध्वनिसमाश्रयेणापूर्वत्वमेव प्रतिभासते ।

इत्येवमादिषु समानार्थकेष्विति शेषः । 'यस्य च भावेन भावलक्षणम्' इत्यनेन सप्तमी । तिरस्कृतपदमत्यन्ततिरस्कृतम् ।

अयं भावः—यद्यपि 'सविभ्रमस्मितोद्भेदाः' इत्यादिश्लोकेन पूर्वं प्राचीनकविः कश्चित् तमर्थं प्रत्यपादयदेव । तमेव पुनरर्वाचीनोऽपि कविः 'स्मितं किञ्चिन्मुग्धम्' इत्यादिना पद्येन प्रतिपादयाञ्चकार। तथाऽपि नवीनपद्ये गतार्थतयाऽनौचित्यं न प्रतीयते नूतनश्लोकेऽत्यन्ततिरस्कृतवाच्यध्वनिसमुदयसध्र्योगेन पुरातनस्याप्यर्थस्य नवीकरणात्। तथा हि-तत्र मुग्ध-मधुर-विभव-परिस्पन्द-सरस-किसलयित-परिकर-स्पर्शरूपास्तत्तत्पदवाच्यार्थाबाधितत्वादत्यन्तं तिरस्कृताः सन्तो लक्षणामूलव्यञ्जनया क्रमेण सौन्दर्य्यातिरेक--सकलहृदयहरणदक्षत्व-सन्तन्यमानत्वरूपाक्षीणप्रसरत्व-सवैलक्ष्योच्चारितत्वविशिष्टाक्लिष्टत्व--तृप्तिजनकत्वसमानाधिकरणतापोपशमकत्वस-

य॒प्रवृत्तिविशिष्टसुकुमारत्व-गलितावधिप्रतिरूपत्व-स्पृहणीयतमत्वानि ध्वनयन्तः प्राग्वर्णितत्वेन प्रसिद्धा अपि ध्वननमहिम्नाऽभिनवीक्रियमाणा भासन्ते। एवमग्रेऽप्याकलनीयम् ।

अथार्थान्तरसङ्क्रमितवाच्यध्वनियोगेनापूर्वत्वमुदाहरति—

तथा—'यः प्रथमः प्रथमः स तु, तथा हि हतहस्तिबहलपललाशी ।
श्वापदगणेषु सिंहः सिंहः केनाधरीक्रियते ॥' इत्यस्य—

यः प्रथमः प्रधानं स तु प्रथमः प्रधानमेव, न तु गौणो भवति। तथा हि—हतानां स्वयं घातितानां हस्तिनां बहलानि विपुलानि पललानि मांसान्यशितुं शीलमस्येति तथाभूतः सिंहो मृगेन्द्रः, श्वापदगणेषु, हिंस्रपशुसमूहेषु, सिंहः पराक्रमातिरेकवान्, केन श्वापदेन अधरीक्रियते न्यूनीक्रियते, न केनापीत्यर्थः। अर्थान्तरन्यासश्चालङ्कारः।

तथा च—'प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्' इति मेदिनी । 'पिशितं तरसं मांसं पललम्' इत्यमरः । 'बहुले बहलं बहु' इति द्विरूपकोशः । 'अथ हिंस्रपशुव्याडिः श्वापदः शिविरित्यपि' इति त्रिकाण्डशेषश्च ।

तदर्थकं प्राचीनश्लोकमाह—

'स्वतेज॒क्रीतमहिमा केनान्येनातिशय्यते ।
महद्भिरपि मातङ्गैः सिंहः केनाभिभूयते ॥'

स्वस्य तेजसा प्रतापेन क्रीतः स्वायत्तीकृतो महिमा महत्त्वं येन तादृशः कोऽपि केन पुनरन्येन, अतिशय्यतेऽतिक्रम्यते । तथा हि—महद्भिर्विशालकायैरपि मातङ्गैर्हस्तिभिः कर्तृभिः सिंहः केन हेतुना प्रकारेण वा अभिभूयते पराभूयते, न कैरपीत्यर्थः। कैरभिभूयत इति पाठस्त्वतोऽपि समीचीनः । इहापि स एवालङ्कारः ।

सङ्गमयति—

इत्येवमादिषु श्लोकेषु सत्स्वपि, अर्थान्तरसङ्क्रमितध्वनिसमाश्रयेण नवत्वम् ।

समानार्थकेषु 'स्वतेजः—'इत्यादिश्लोकेषु सत्सु विद्यमानेष्वपि, 'यः प्रथमः' इत्यादिश्लोकस्य प्रथम-सिंह-शब्दयोः पुनरुपात्तयोरर्थपौनरुक्त्यादनन्वितार्थकयोरजहत्स्वार्थलक्षणामूलव्यञ्जनया क्रमशोऽसाधारण्यसमानाधिकरणानपाकरणार्हत्वादिना परानपेक्षाद्भुतवीर्यवत्त्वादिना च व्यङ्ग्येन विशिष्टयोः स्ववाच्ययोर्बोधकत्वादर्थान्तरसङ्क्रमितवाच्यध्वनिद्वयसम्बन्धेनार्थयोः काव्यस्य च नवत्वमाभातीत्यर्थः ।

इत्थमविवक्षितवाच्यस्य ध्वनेर्भेदद्वयस्य योगेनापूर्वत्वमुदाहृत्य, विवक्षितान्यपरवाच्यस्याप्यसंलक्ष्यक्रमस्योदाहर्तुमभिधत्ते—

विवक्षितान्यपरवाच्यस्याप्युक्तप्रकारसमाश्रयेण नवत्वम् । तत्रासंलक्ष्यक्रमप्रकारसमाश्रयेणान्यथात्वम् ।

अन्यथात्वमपूर्वत्वम् ।

उदाहरति—

यथा—

नवोढाव्यवहारं वर्णयति—

'निद्राकैतविनः प्रियस्य वदने विन्यस्य वक्त्रं वधू-
र्बोधत्रासनिरुद्धचुम्बनरसाऽप्याभोगलोलं स्थिता ।
वैलक्ष्याद् विमुखीभवेदिति पुनस्तस्याप्यनारम्भिणः,
साकाङ्क्षप्रतिपत्ति नाम हृदयं यातं तु पारं रतेः ॥' इत्यस्य श्लोकस्य,

वधूर्नवपरिणीता, निद्रायां कैतविनः कपटिनः कृतकसुप्तस्य, प्रियस्य, वदने, वक्त्रं स्वमुखं, विन्यस्य, प्रियवदनस्पर्शचुम्बनादिजन्यसुखविशेषलाभलोभादासज्य, बोधस्य चुम्बनजन्यप्रियजागरणस्य, त्रासेन भयेन निरुद्धः प्रसरन्नपि बलान्निगृहीतश्चुम्बनस्य रसोऽभिलाषो यया, तादृगपि, आभोगेन मुहुर्मुहुस्तन्निद्रापरीक्षणयत्नेन लोलं तरलं यथा स्यात् तथा स्थिताऽभूत्, न तु चुम्बनप्रयासात् सर्वथा निवर्तितुमशकत् । वैलक्ष्यान्मत्प्रबोधावगमजलज्जायाः प्रिया कदाचिद् विमुखी भवेत् पराङ्मुखी स्याद्, इति हेतोः, तस्य प्रियस्यापि अनारम्भिणश्चुम्बनाद्यनारभमाणस्य, आकाङ्क्षयाऽभिलाषेण सहिता साकाङ्क्षा प्रतिपत्तिः स्थितिः प्रवृत्तिर्वा यस्य तादृक्, चुम्बनोत्कण्ठाकलुषितं न तु परिपूर्णाभिलाषं यद्यपि हृदयम्, तु तथाऽपि रतेराह्लादविशेषधारायाः, पारं परिणतत्वं, नाम निश्चितं, यातं प्राप्तमित्यर्थः ।

तथा च—'आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपि' 'प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि च' इति मेदिनी ।

तदर्थकं प्राचीनपद्यमुदाहरति—

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥'

अमरुशतके पद्यमिदम्। वासगृहं भोगावासं शयनगृहमिति यावत्, शून्यं जनरहितं विलोक्य प्रच्छन्नसखीसत्त्वशङ्कया विशेषेण दृष्ट्वा, शयनात्तल्पात्, किञ्चिदीषदपरकायमात्रेण, न तु सर्वतः, शनैः प्रतिबोधभिया मन्दम्, उत्थाय, निद्रायाः सुषुप्तेर्व्याजं कपटम्, प्रणयपरीक्षार्थमुपागतस्याश्रितस्य, पत्युः, मुखं सुचिरं बहुकालं निद्रानिर्णयाय प्रणयातिरेकेण वा, निर्वर्ण्यालोक्य, तथा विस्रब्धं ससुषुप्तिविश्वासं यथाभवति तथा परिचुम्ब्य परितः कपोलयोर्दशोष्ठ चुम्बित्वा, जातः प्रियावदनस्पर्शादुत्पन्नः पुलको रोमाञ्चो यत्र तादृशीं तस्य गण्डस्थलीं कपोलपालिम्, आलोक्य, स्थिता, लज्जया पतिजागरणनिर्णयेन स्वरहस्यप्रकाशेन च जातया ह्रिया नम्रमधोमुखं मुखं यस्याः, सा बाला नवोढा, स्वाभिलषितस्यायत्नसम्पत्त्या हसता प्रियेण तेन, चिरं व्रीडाऽपसरण–सम्भोगस्वीकरणंयावत्, चुम्बिताऽभूदित्यर्थः ।

तथा च—'भोगावासो वासगृहम्' इति हारावली । 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरश्च ।

इह 'गण्ड–' इत्यश्लीलमिति केचित्, तन्न लोकप्रसिद्धासभ्यार्थस्मारकत्वाभावात्। अन्यथा 'सुभगा' 'भगिनी' इत्यादावपि तत्त्वं दुर्वारमेव । विलोक्येत्यादिक्त्वाऽन्तप्रतिपाद्यक्रियासमानकर्तृकत्वलाभाय कृदन्तं लज्जेति पृथक् पदमित्यपि परैरुक्तं न मनोरमम्, 'कृत्प्रत्ययानामभिधाननियम्यतया' लज्जापदस्य तदाश्रयबोधने सामर्थ्याभावात्, स्थितेत्यस्याध्याहारेणैव कृतार्थत्वाच्च।

सङ्गतिमाचष्टे—

इत्यादिषु सत्स्वपि, नवत्वम् ।

'शून्यम्' इत्यादिश्लोके बालाद्यालम्बनेन, शून्यगृहाद्युद्दीपनेन, लज्जाऽऽदिव्यभिचारिणा, उभयारब्धचुम्बनाद्यनुभावेन च यद्यपि सम्भोगश्रृङ्गारश्चर्वणागोचरतां नीयत एव, किन्तु लज्जाऽऽत्मकव्यभिचारिभावस्य स्वशब्दवाच्यत्वाद् 'निर्वर्ण्य' इत्यादौ श्रुतिकटुत्वसद्भावाच्च रसस्यापकर्षो दुर्वार इति तदपेक्षया तत्प्रायवाचकेऽपि 'निद्राकैतविना' इत्यादिश्लोके द्वयोः परस्परचुम्बनाभिलाषधाराया निरोधपरम्परायाः पर्यवसानासम्भवेन सूच्यमाना रतिरुभयोरपि समानाकारिकां चित्तवृत्तिं प्रकाशयन्ती केनचिदद्भुतेन प्रकारेण तमेव परिपोषं नयति, न चासौ केनाप्यपकृष्यत इत्यक्षतसौभाग्यमहिम्नि तस्मिन्नपूर्वत्वमेव, असंलक्ष्यक्रमध्वनिसाम्राज्यादिति भावः।

दार्ढ्याय पुनरुदाहरति—

यथा वा—'तरङ्गभ्रूभङ्गा' इत्यादिश्लोकस्य, 'नानाभङ्गिभ्रमद्भ्रूः' इत्यादिश्लोकापेक्षयाऽन्यत्वम्।

'तरङ्गभ्रूभङ्गा' इत्यादिश्लोकः प्रागेव विवृतः। अपरस्त्वन्वेष्टव्य एव। अन्यत्वं नवत्वमित्यनर्थान्तरम्।

रसध्वनिना नातिपूर्णे प्राचीने नानेत्यादिश्लोके सत्यपि, तद्ध्वनिपरिष्कृतस्य तरङ्गेत्यादिश्लोकस्यापूर्वत्वमित्याशयः।

इत्थमविवक्षितवाच्य—विवक्षितान्यपरवाच्यत्वाभ्यां प्रत्येकं द्वैविध्याच्चतुर्विधमपि प्रधानं ध्वनिं समाश्रयतः काव्यस्यापूर्वत्वं समानार्थवाचकत्वेऽप्युदाहरणप्रदर्शनेन व्यवस्थाप्य, सामान्येनासंलक्ष्यक्रमध्वनिविषये तदतिदेशमुपदिशति—

'दिशाऽनयाऽनुसर्तव्यो रसादिर्बहुविस्तरः।
मितोऽप्यनन्ततां प्राप्तः काव्यमार्गो यदाश्रयात्॥१०७॥'

बहुविस्तरः प्रकारवैपुल्येन महाप्रपञ्चो रसादी रसभावाद्यष्टकम्, अनया पूर्वोक्तया सर्वेषां वस्तूनां विभावादिप्रकारविशेषकल्पनारूपया मिथस्तेषां सङ्करसंसृष्टिविवेचनाऽऽत्मिकया दिशा रीत्या युक्त्या वा, अनुसर्तव्य उदाहरणीयः कविभिरिति शेषः। यस्य रसादेराश्रयणमाश्रयो व्यञ्जनं तस्मात्, काव्यमार्गः काव्यं तद्वर्णितविषयो वा, अनन्तप्रत्नकविरत्ननिकरवर्णनाविषयीकृतत्वान्मितो मुष्टिमेयोऽपि, अनन्ततामपरिच्छिन्नतामवर्णितप्रायत्वमिति यावत्, याति प्राप्नोतीत्यर्थः।

रसादिव्यञ्जकत्वसम्बन्ध एव हि प्राग्वर्णितमपि पदार्थं संस्कार इव नवीकरोतीत्युक्त एव भावः।

तदभिदधाति—

बहुविस्तारोऽयं रसभाव-तदाभास-तत्प्रशमनलक्षणो मार्गो यथास्वं विभावानुभावप्रभेदकलनया, यथोक्तं प्राक्, स सर्व एवानया दिशाऽनुसर्तव्यः। यस्य रसादेराश्रयादयं काव्यमार्गः पुरातनैः कविभिः सहस्रसङ्ख्यैरसङ्ख्यैर्वा बहुप्रकारं क्षुण्णत्वान्मितोऽप्यनन्ततामेति।

तृतीयान्तविभावादिपदं विस्तारबहुत्वोपपादकम्। यथोक्तं प्रागिति पृथगन्वयि।

तदुक्तिश्च—'तस्याङ्गानां प्रभेदा ये प्रभेदाः स्वगताश्च ये ।

तेषामानन्त्यमन्योऽन्य-सम्बन्धपरिकल्पने ॥' इत्यनेनावगन्तव्या ।

बहुप्रकारमिति क्रियाविशेषणम् ।

उक्तमुपपादयति—

रसभावादीनां हि प्रत्येकं विभावानुभावव्यभिचारिसमाश्रयादपरिमितत्वम् । तेषां चैकैकप्रभेदापेक्षयाऽपि तावज्जगद्वृत्तमुपनिबध्यमानं सुकविभिस्तदिच्छावशादन्यथास्थितमप्यन्यथैव विवर्तते ।

एकैकप्रभेदापेक्षयाऽपि रसादीनां विभावत्वेनानुभावत्वेन व्यभिचारिभावत्वेन वा सुकविभिः, उपनिबध्यमानं प्रतिपाद्यमानं जगतश्चराचरस्य वृत्तं व्यापारः स्वरूपं च, अन्यथाऽन्येन प्रकारेण स्थितमपि, तेषां सुकवीनामिच्छावशात्, अन्यथैव विवर्तते तद्भिन्नप्रकारेणैव व्यापारं स्वरूपं चाविष्करोतीत्यर्थः ।

उक्तमेतत्सम्बन्धे स्मारयति—

प्रतिपादितं चैतच्चित्रविचारावसरे ।

अप्यर्थकश्चकार एतदन्वयि, तेनैतदपि प्रतिपादितमित्यर्थः । प्रतिपादनं च तृतीयोद्द्योते-'भावानचेतनानपि' इत्यादिना विहितम् ।

तदर्थे प्राचीनसम्मतिं दर्शयति—

गाथा चात्र कृतैव महाकविना—

अत्रास्मिन्नर्थे । गाथाऽऽर्याकल्पं मात्राच्छन्दः । महाकविना शालिवाहनेन परेण वा ।

कविवाणीं वर्णयति—

'अतहट्ठिए वि तहसंठिए व्व हिअअम्मि जा णिवेसेइ ।

अत्थविसेसे सा जअइ विकडकइगोअरा वाणी ॥'

'अतथास्थितानपि तथास्थितानिव हृदये या निवेशयति ।

अर्थविशेषान् सा जयति विकटकविगोचरा वाणी ॥' इतिच्छाया ।

या-अतथास्थितानन्येन केनापि प्रकारेण स्थितानपि कामिनीमुखादीनर्थविशेषान्, चमत्कारितया विलक्षणान् पदार्थान् तथास्थितानिव प्रतिभाविशेषोन्मेषवशात् पद्मत्वादिमत इव हृदये कवेः सकलभावकनकपरीक्षानिकषायमाणे मनसि, निवेशयत्याविर्भावयति-अर्थानां विशेषत्वप्राप्तये सहृदयस्फूर्तिविषयीकरोतीति यावत्,

सा विकटा लोकोत्तरवर्णनावैभवेन निरवधीभूतपदार्थसार्थप्रकाशकरचनाकारित्वेनो-त्कृष्टाः कवयो गोचरा विषया आश्रया यस्यास्तादृशी वाणी कविगीर्जयति तन्न्यूनगुणकसृष्टिकारि–प्रजापतेरप्युत्कर्षेण वर्तत इत्यर्थः ।

इदमेव 'नियतिकृतनियमरहिताम्' इत्यादिना मम्मटः, 'करबदरसदृशमखिलम्' इत्यादिना सुबन्धुश्च निबबन्धतुः ।

रसादिध्वनिसम्बन्धे कवेः प्रतिभाया गिरश्चानन्त्यप्राप्तिं प्रागुक्तामुपपत्त्या निरूपयितुं कारिकामवतारयति—

तदित्थं रसभावाद्याश्रयेण काव्यार्थानामानन्त्यं सुप्रतिपादितम् । एतदेवोपपादयितुमिदमुच्यते—

सुप्रतिपादनं च वृत्तिकृत्कृतमवसेयम् । कारिकाकारेण तु न प्रतिपादितमिति पुनरुच्यते । उच्यत इत्यत्र सङ्ग्रहश्लोकोऽयमिति शेषः । वृत्तिकारेणाव्याख्यातत्वादेवाग्रिमश्लोकस्य सङ्ग्रहश्लोकत्वमवधार्यत इति केचित् ।

'दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥ १०८ ॥'

हि निश्चयेन यतो वा दृष्टपूर्वाः पूर्वं दृष्टाः प्रत्यक्षादिप्रमाणैरवधारिताः प्राचीनकविवर्णिताः सर्वेऽपि, अर्थाः, रसस्य रसादेः परिग्रहात् स्वीकाराद् व्यञ्जनादिति यावत्, मधुमासे चैत्रे मासि द्रुमा वृक्षा इव, नवा नूतना इव, आभान्ति प्रतिभासन्त इत्यर्थः ।

यथा पूर्वं दृष्टा अपि वृक्षा वसन्तसमये कौसुमसम्पद्विशेषेण नवीना इव भान्ति, तथैव लौकिकप्रमितिगोचराः प्राचीनकविवर्णिता अपि पदार्था व्यज्यमानप्रधानरसादिसम्बन्धमहिम्ना नवा इवाभान्ति । तेन च परिमितानामप्यर्थानां नवनवीभावेनानन्त्यं न दुरुपपादमिति सिद्धम्, काव्यमधुमासयोश्च साम्यं प्रसिद्धमिति सारम् ।

अथ संलक्ष्यक्रमध्वनियोगेनापूर्वत्व उदाहरणीये, प्रथमं शब्दशक्त्युद्भवध्वनिसमाश्रयणेनापूर्वत्वमुदाहर्तुमाख्याति—

यथा विवक्षितान्यपरवाच्यस्यैव शब्दशक्त्युद्भवानुरणनरूपव्यङ्ग्यप्रकारसमाश्रयेण नवत्वम् ।

शब्दशक्त्युद्भवध्वनिप्रकारश्चात्र वाक्यप्रकाश इत्युक्तमेव ।

उदाहरति—

यथा—'धरणीधारणायाधुना त्वं शेषः' इत्यादौ ।

नवत्वमित्यनेनान्वयः प्राग्वत् । व्याख्यातमिदं द्वितीयोद्द्योत एव ।

तदर्थकं प्राचीनश्लोकमाह—

'शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिराः ।
यदलङ्घितमर्यादाश्चलन्तीं बिभृथ क्षितिम् ॥'इत्यादिषु सत्स्वपि ।

नवत्वमिति शेषः । चाटुकारो राजानं स्तौति—हे राजन् ! शेषः सहस्रफणः, हिमगिरिर्हिमालयः, त्वं च, महान्तो विपुलाकारा महत्त्ववन्तश्च, गुरवो भूभारसहत्वाद् गौरवभृतः प्रतिष्ठिताश्च, स्थिरा अचला दृढप्रतिज्ञाश्च, तुल्याः स्थ । यद्यस्मात् कारणात्, अलङ्घिताऽतिरस्कृता मर्यादा सीमा लोकस्थितिश्च यैस्तथाभूताः, चलन्तीं कम्पमानामव्यवस्थां च, क्षितिं धरणीं बिभृथ धारयथ पालयथ चेत्यर्थः ।

इह 'बिभ्रते भुवम्' इति पाठः क्वचिद् दृश्यते । क्वचिच्च 'बिभृयाः क्षितिम्' इति; तत्पाठद्वयमपि पर्यालोचनायां सङ्गतेः पराङ्मुखीभवति । तथा हि आद्ये—आख्यातार्थस्य युष्मदर्थसामानाधिकरण्येन मध्यमपुरुष एवोचितः, न तु प्रथमपुरुषः, तस्य मध्यमोत्तमपुरुषयोरविषय एव विधानाद् युष्मदर्थेतरसामानाधिकरण्य एवोद्भवनात् । प्रकृते युष्मदर्थेतरसामानाधिकरण्येऽपि तत्सामानाधिकरण्यस्याप्यपरिहार्यतया प्रथमपुरुषविधायकसूत्रानुपस्थानम् । सौत्रं परत्वं च परव्यावर्तने हेतुः । एतच्च 'अस्मद्युत्तमः' इतिसूत्रस्य विवरणे शब्देन्दुशेखरे सिद्धान्तचन्द्रिकायां च निरूपितम् । अत्रैव—'त्वमेवं सौन्दर्या स च रुचिरतायां परिचितः, कलानां सीमानं परमिह युवामेव भजथः ।' इत्यादिप्राचीनं पद्यं प्रयुञ्जानयोर्वामनमम्मटयोरपि स्वरसः । द्वितीये तु—मध्यमपुरुषैकवचनविधाने युष्मदर्थमात्रान्वयसम्भवे पुरुषविपरिणामेनान्यत्रान्वय इति कष्टकल्पना । तदङ्गीकारेऽपि लिङर्थविधेयतायाः सर्वत्रानन्वयः, शेषहिमगिरिकर्तृकभूभरणस्य विधेयत्वाभावात् । राज्ञोऽपि प्रशंसायामेव कवेस्तात्पर्यं न त्वाशीर्वितरणे, तस्माल्लिङ्गोऽनौचित्यम् । बहुवचनान्तपाठे तु—चकारसूचितेन क्रियासमुच्चयेन नानुपपत्तिः । 'बिभृध्वे भुवम्' 'बिभृथ भुवम्' इति पाठकल्पने तु छन्दोभङ्गप्रसङ्ग इति 'बिभृथ क्षितिम्' इति पाठः कल्पितः ।

अत्र यद्यपि द्वयोरपि वाक्ययोरर्थसाम्यम्, तथाऽपि प्रथमवाक्यस्य शेषशब्द-

शक्त्युद्भवोक्तध्वनियोगेन न द्वितीयवाक्याद् गतार्थता, अपि त्वपूर्वार्थकत्वमेव ।

अथ स्वतस्सम्भव्यर्थशक्त्युद्भवध्वनियोगेनापूर्वत्वमुदाहर्तुं वदति—

तस्यैवार्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यसमाश्रयेण नवत्वम् ।

तस्यैव संलक्ष्यक्रमव्यङ्ग्यध्वनेरेव ।

उदाहरति—

यथा—'एवंवादिनि देवर्षौ' इत्यादिश्लोकस्य ।

द्वितीयोद्द्योते व्याख्यातस्य लज्जारूपसंलक्ष्यक्रमव्यभिचारिव्यञ्जकस्य नवत्वमिति सम्बन्धः ।

प्राचीनं समानार्थकं पद्यं दर्शयति—

'कृते वरकथाऽऽलापे कुमार्यः पुलकोद्गमैः ।
सूचयन्ति स्पृहामन्तर्लज्जयाऽवनताननाः ॥' इत्यादिषु सत्स्वपि ।

नवत्वमिति पूर्वेणान्वयः । वरकथायाः परिणेतृवृत्तान्तस्यालापे सम्भाषणे प्रस्ताव इति यावत्, कृते गुरुजनैर्विहिते सति लज्जया स्वविवाहचर्चाश्रवणजन्यया ह्रिया, अवनतमधोमुखमाननं यासां तादृश्यः कुमार्यः कन्यकाः पुलकस्य रोमहर्षस्योद्गमैरुदयैः, अन्तर्मनसि वर्तमानां स्पृहां पाणिपीडनसमीहां सूचयन्ति प्रकाशयन्तीत्यर्थः।

अत्र श्लोके स्पृहालज्जयोः शब्दवाच्यत्वेन तथा न चमत्कारिता, यथा पूर्वश्लोके पितृपार्श्वस्थितिपूर्वक–लीलाकमलदलाकलनव्याजकवदननमनलक्षणानुभावमुखेन व्यज्यमानयोरिति ध्वनियोगेन तस्यापूर्वार्थकत्वमवसेयम् ।

अथ कविप्रौढोक्तिसिद्धार्थशक्त्युद्भवध्वनिसम्बन्धेनापूर्वत्वमुदाहरति—

अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यस्य कविप्रौढोक्तिनिर्मितशरीरत्वेन नवत्वम् । यथा—'सज्जेहि सुरहिमासो' इत्यादेः ।

अर्थशक्त्युद्भवध्वनेः कविप्रौढोक्तिनिर्मितशरीरत्वेनोपलक्षितस्य समाश्रयेण 'सज्जेहि' इत्यादेर्वाच्यस्य नवत्वं न तु ध्वनेरेव, तस्य नवत्वसम्पादकत्वात् । अत एव पूर्वोदाहरणेषु ध्वनियोगेन वाच्यापूर्वत्वमेव प्रदर्शितम् । ध्वनेरपूर्वत्वं तु सिद्धमेव नाधुनाऽपि साधनीयमेव । किञ्च प्राचीनकविस्पृष्टत्वेन वाच्यस्यैव गतार्थत्वस्य सम्भावनेति तस्यैव नूतनत्वार्थमयं प्रयासोऽपि सङ्गच्छत इति विवेचनीयम् । एतत्पद्यस्य छाया-प्रदर्शनपुरस्सरं विवरणन्तु प्रागेव विहितम् ।

तदर्थकं प्राचीनश्लोकमाह—

'सुरभिसमये प्रवृत्ते सहसा प्रादुर्भवन्ति रमणीयाः ।
रागवतामुत्कलिकाः सहैव सहकारकलिकाभिः ॥'

इत्यादिषु सत्स्वप्यपूर्वत्वमेव ।

सुरभिसमये वसन्तर्तौ प्रवृत्ते प्रारब्धे सति, सहकारचूतस्य कलिकाभिर्मञ्जरीभिः सहैव सहसा शीघ्रं रागवतां प्रणयिजनानामुत्कलिका उत्कण्ठाः,रमणीयाः स्पृहणीयाः प्रादुर्भवन्त्युत्पद्यन्त इत्यर्थः ।

चूतमञ्जरीप्रभृतिसमुद्गमेन नितरामुद्दीपको वसन्तसमय इति सारम् ।

तथा च–'वसन्ते पुष्पसमयः सुरभिः'इत्यमरः । 'चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कण्ठोत्कलिके तस्मिन्नभिध्या तूभयोरपि ॥'इति शब्दार्णवश्च ।

इह सहकारकलिकाप्रादुर्भावजन्यत्वेऽपि रागवदुत्कलिकानां प्रादुर्भावस्य समकालिकत्ववर्णनहेतुकातिशयोक्तिमूलकत्वात् सहोक्तिरलङ्कारः, किन्तु तदपेक्षया'सज्जेहि' इत्यादिप्रतिपाद्यस्य प्राधान्येन व्यङ्ग्यपदवीसमारोहक–कविप्रौढोक्तिसिद्ध–वसन्तधर्मिककामोद्दीपकत्वातिशयप्रकाशकत्वेन नवीनत्वम् , तादृशध्वनिसम्बन्धमाहात्म्यात् ।

अथ कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नार्थशक्त्युद्भवध्वनिसम्बन्धेनापूर्वत्वमुदाहर्तुमाख्याति—

अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यस्य कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नशरीरत्वे सति नवत्वम् ।

अत्राप्यनुपदोक्तरीत्यैव सन्दर्भसङ्गतयेऽन्वयबोधो बोधनीयः ।

उदाहरति—

यथा—'साअर विइण्णजोव्वणहत्थालम्बं समुण्णमन्तेहिं ।
अब्भुट्ठाणम्मिव मम्महस्स दिण्णं तुह थणेहिं ॥'

अस्य हि गाथाऽर्थस्य ।

छायाप्रदर्शनपुरस्सरं व्याख्यातेयं गाथा प्राक् ।

तत्समानार्थकं प्राचीनं पद्यं प्रकटयति—

'उद्दित्तरकआभोआ जह जह थणआ विणन्ति बालाणम् ।
तह तह लद्धावासो व्व मम्महो हिअअमाविसइ ॥'

एतद्गाथाऽर्थे न पौनरुक्त्यम् ।

'उदित्वरकचाभोगा यथा यथा स्तनका वर्धन्ते बालानाम् ।
तथा तथा लब्धावास इव मन्मथो हृदयमाविशति ॥' इतिच्छाया ।

गाथेयमस्फुटत्वेन परित्यक्ताऽप्यन्यैः कथंचिद् व्याख्यायते पाठकल्पनेन। उदित्वरः प्रसृमरः कचानां केशानामाभोगः पूर्णता विस्तारो येषु तादृशा व्यालम्बमानकचाच्छन्नाः, बालानामुद्यन्मात्रयौवनानाम्, अल्पा ईषदाविर्भूताः स्तनाः कुचा एव स्तनकाः, यथा यथा येन येन क्रमेण प्रकारेण वा वर्धन्ते समुन्नमन्ति, तथा तथा लब्धः प्राप्त आवास आश्रयो येन तादृश इव मन्मथस्तासां हृदयमाविशतीत्यर्थः ।

अत्र यौवनारम्भे बालानां मदनोद्रेको यद्यप्युत्प्रेक्षाभङ्गीपरिष्कृतवाच्यमुखेन द्वितीयश्लोकेनापि व्यज्यते, किन्तु प्रथमश्लोकेन कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थस्य व्यञ्जकतया चमत्कारातिरेको वितीर्यत इति नवत्वं तदर्थस्य तस्य च ज्ञेयम् ।

पर्यवसाने दार्ढ्याय पुनरुदाहरति—

यथा वा—'वाणिअअ ! हत्थिदन्ता' इत्यादिगाथाऽर्थस्य ।

प्राग्वदप्रसरेणानालीढतैवेत्यनेन सम्बन्धः ।

समानार्थकं प्राचीनं पद्यं निर्दिशति—

'करिणीवेहव्वअरो मह पुत्तो एक्ककाण्डविणिवाई ।
हअसोह्लाए तह कहो जह कण्डकरण्डअं वहइ ॥'

'करिणीवैधव्यकरो मम पुत्र एककाण्डविनिपाती ।
हतस्नुषया तथाकृतो यथा काण्डकरण्डकं वहति ॥' इतिच्छाया ।

तव गृहे हस्तिदन्तादि विक्रेयमस्ति ? इति पृष्टवन्तं वणिजं प्रति वर्षीयसो व्याधपितुर्वचनमिदम् । एककाण्डविनिपाती-एकमात्रबाणप्रेरणशीलः, तावतैव लक्ष्यवेधसम्भवात्, करिण्या हस्तिन्या वैधव्यस्य विधवात्वस्य करः सम्पादको हस्तिघाती (अपि) मम पुत्रः, हतया जीविकाप्रतिबन्धकारकत्वाद् दुष्टया, स्नुषया मत्पुत्रवध्वा, तथा-तेन प्रकारेण सन्ततसन्तन्यमानसुरतक्षामतया स्वविचित्रविभ्रमनिरन्तरविलोकनैकव्यसनितया वा स्वेतरसकलविषयोदासीनः, यथा काण्डानां बाणानां करण्डकं वंशादिनिर्मितपात्ररूपं तूणीरविशेषं वहति-अन्यमनस्कतया प्राग्वदेकबाणेनैव लक्ष्यवेधस्यासम्पत्तेर्बहूनां बाणानामपेक्षणात् तदाधारपात्रमेव धारयति, न तु बाणमात्रम्, न वा लक्ष्यं विध्यति, तेन कुतो मद्गृहे हस्तिदन्तादीनां सम्भव इत्यर्थः ।

तथा च—'काण्डः स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः' इति मेदिनी । 'करण्डो वंशादिकृतभाण्डविशेषः' इत्यमरविवरणे महेश्वरश्च ।

सङ्गमयति—

एवमादिषु सत्स्वप्यनालीढतैव ।

एवमादिषु समानार्थकपद्येषु सत्स्वपि, 'वाणिअअ' इत्यादिगाथाऽर्थस्य—अनालीढतैवागतार्थतैव ध्वनिविशेषसम्बन्धेन तदर्थस्य नवीकरणात् । तथा हि—तत्र लुलितालकमुखीति स्नुषाविशेषणमपूर्वं वस्तुप्राधान्येन व्यनक्तीति कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नार्थशक्त्युद्भवध्वनियोगेनापूर्वत्वं सम्पद्यते ।

अथ यथा नानाविधानां प्रधानव्यङ्ग्यानां सम्बन्धेन समानवाच्यकत्वेऽपि काव्यानामपूर्वत्वं भवति, तथैवोच्चावचानां व्यञ्जकानां सम्बन्धेनापि सम्भवतीति स्फुटं तदप्रतिपादनान्न्यूनतां परैरापाद्यमानां परिहरन्नुपसंहरति—

यथा व्यङ्ग्यभेदसमाश्रयेण ध्वनेः काव्यार्थानां नवत्वमुपपद्यते, तथा व्यञ्जकभेदसमाश्रयेणापि, तत्तु ग्रन्थविस्तरभयान्न लिख्यते, स्वयमेव सहृदयैरूह्यम् ।

ध्वनेः सम्बन्धिनां काव्यप्रतिपाद्यानामर्थानां नवत्वमिति, यद्वा—ध्वनेर्व्यङ्ग्यभेदसमाश्रयेण काव्यार्थानां नवत्वमिति योजना ।

तृतीयोद्द्योते प्रदर्शितानां व्यञ्जकप्रकाराणां समाश्रयेणापि काव्यार्थानां नवत्वं भवत्येव, किन्तु तेषामत्रोपादाने ग्रन्थविस्तरः स्यादिति—तत एव स्वयं सहृदयैस्तदूहः कर्तव्यः, न तु तदप्रतिपादनादिह न्यूनता शङ्कनीयेति सारम् ।

सन्दर्भेऽस्मिन् क्वचित् काव्यार्थानां नवत्वं, क्वचित् काव्यस्य चेति प्रतिपादनादसङ्गतिर्न शङ्कनीया, ध्वनियोगेन साक्षात् काव्यार्थानां, तद्द्वारा तु काव्यस्य नवत्वमित्यारम्भ एव प्रतिपादितत्वात् ।

प्रागुक्तमपि रसादीनां व्यङ्ग्यानां प्राधान्यं मुख्योद्देश्यत्वं च दार्ढ्याय पुनरुपदिशन् पौनरुक्त्यं च परिहरन् कारिकामवतारयति—

अत्र च पुनः पुनरुक्तमपि सारतयेदमुच्यते—

अत्रास्मिन् प्रबन्धे । पुनः पुनरादित एव । सारतैव पौनरुक्त्यपरिहारहेतुः ।

'व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि ।
रसादिमय एकस्मिन् कविः स्यादवधानवान् ॥१०९॥'

अस्मिन् काव्यार्थानामानन्त्यस्य हेतावुक्ते व्यङ्ग्यव्यञ्जकभावे विविधे दर्शितदिशा व्यङ्ग्यभेदेन व्यञ्जकभेदेन चानेकप्रकारके सम्भवत्यपि, एकस्मिन्नभीष्टसम्पादकतया प्रधानतमे रसादिमये रसादिरूपे तत्प्रचुरे व्यङ्ग्यव्यञ्जकभावे वा, कविः, अवधानवानवहितस्तद्विषयकप्रयत्नवानिति यावत्, स्यादित्यर्थः ।

काव्येन रसादिप्रकाशनमेव कवेर्मुख्योद्देश्यमिति सारम् ।

तदाह—

अस्मिन् अर्थानन्त्यहेतौ व्यङ्ग्यव्यञ्जकभावे विचित्रे सम्भवत्यपि, कविरपूर्वलाभार्थे रसादिमय एकस्मिन् व्यङ्ग्यव्यञ्जकभावे यत्नादवधीत ।

अपूर्वलाभः काव्यार्थानां चमत्कारप्रकर्षावाप्तिरर्थः प्रयोजनं यस्य तादृशे । तथा च—'एकोऽन्यार्थे प्रधाने च' इति विश्वः ।

उपपादयति—

रसभावतदाभासरूपे हि व्यङ्ग्ये, तद्व्यञ्जकेषु च यथामति निर्दिष्टेषु वर्णपदवाक्यरचनाप्रबन्धेष्ववहितमनसः कवेः सर्वमपूर्वं काव्यं सम्पद्यते ।

रसादिरूपव्यङ्ग्य—वर्णपदादिरूपतद्व्यञ्जकप्रविवेकपूर्वकसन्निवेशकुशलस्यैव कवेः काव्यमुत्कृष्टं भवति, नान्यस्य, तस्मात्तत्र यतनीयमिति निर्गलितम् ।

'यथामति' इति पृथक् पाठः । अन्यथा 'यथानिर्दिष्टम्' इत्येव स्याद्, अव्ययीभावे नपुंसकैकवचनान्तत्वयोर्दुर्वारत्वात् । सम्पद्यत इत्यनेन कारणान्तरानपेक्षस्य तदवधानस्यापूर्वकाव्यजनने स्वातन्त्र्यमव्यभिचारित्वं च सूच्यते ।

उदाहरणप्रदर्शनेनोक्तमर्थं द्रढयति—

तथा च—रामायणमहाभारतादिषु सङ्ग्रामादयः पुनः पुनरभिहिता अपि नवनवाः प्रकाशन्ते ।

नवनवा अत्यपूर्वाः । उक्तपूर्वाणामपि समरादिवृत्तान्तानामपूर्वतया भाने ध्वनिसम्बन्ध एव मूलमित्याकलनीयम् ।

ननु रामायणादिप्रबन्धेषु बहूनां रसानां सत्त्वमतिरोहितमेवेत्यनियतानेकसम्ब-न्धेन कथमर्थानामपूर्वत्वमित्याक्षेपे वदति—

प्रबन्धे चाङ्गीरस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायाऽतिशयं च पुष्णाति।

चस्त्वर्थे। अर्थविशेषपोषणं च छायाऽऽधिक्यपोषणद्वारकम्।

प्रबन्धेषु बहुरससद्भावेऽपि कस्यचिदेकस्यैव प्राधान्यम्, इतरेषान्त्वङ्गत्वमिति प्रधानस्यैवार्थविशेषच्छायाऽतिशयपोषकता नासङ्गतेत्याकूतम्।

प्रबन्धविशेषोल्लेखेनोक्तमर्थमुदाहरन् समर्थयति—

कस्मिन्निवेति चेत्, यथा रामायणे, यथा वा महाभारते।

कस्मिन् प्रबन्धे को रस इवेति योजना।

उक्तप्रबन्धद्वयमध्ये कुत्र को रसः प्रधानमिति जिज्ञासायां रामायणे करुणस्य प्राधान्यमुक्त्वोपपादयति—

रामायणे हि करुणो रसः स्वयमादिकविनाऽऽसूत्रितः—'शोकः श्लोकत्वमागतः' इत्येवंवादिना। निर्व्यूढश्च स एव सीताऽत्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता।

'क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः' इत्येवमादौ रामायणप्रारम्भे वादिना आदिकविना वाल्मीकिना, आसूत्रितः स्वक्सूत्रन्यायेन सङ्क्षेपेणोपक्षिप्तः, सीताया अत्यन्तो निरवसानो यो वियोगस्तत्पर्यन्तमेव स्वप्रबन्धं रामायणम्, उपरचयता निर्मिमाणेन, करुणो रसो निर्व्यूढः समाप्तिं यावन्नीतश्च यतः, ततस्तत्र करुणस्यैव प्राधान्यमित्यर्थः।

इदमुक्तं भवति—रामायणप्रबन्धप्रधानव्यङ्ग्यः करुणरसः, यत आदौ क्रौञ्चवधजन्यक्रौञ्च्याक्रन्दप्रभवकरुणस्थायिशोकप्रकाशकवृत्तान्तेन प्रबन्धस्यारम्भः, अन्ते तद्व्यञ्जकसीतापातालप्रवेशवृत्तान्तेन विरामश्च कविना कृतः। मुखनिर्वहणसन्ध्योर्जोगरूकतया करुणस्य प्राधान्ये वीरादीनां च प्रासङ्गिकत्वेनाङ्गत्वे न कस्यचिद् विप्रतिपत्तिः। तथा चाङ्गरसोपस्कृतः प्रधानं करुणोऽत्र प्रबन्धसुषमाप्रकर्षं जनयतीत्युत्तानमेव।

इदं पुनरिह चिन्त्यम्—'शोकः श्लोकत्वमागतः' इत्येवंवादिता ध्वनिकारस्यैव, न त्वादिकवेः। न वाऽस्य रामायणघटकत्वम्। तथा च कथमुपपद्यतामेतदुक्तिः?।

शोकव्यञ्जकतयैतत्सदृशम्—'मा निषाद !' इत्यादिश्लोकमादायेति चेत्, तर्हि लक्षणैव विलक्षणापत्तिः ।

अथ क्रमप्राप्तं महाभारतेऽपि प्रधानतया शान्तं रसं व्यवस्थापयति—

महाभारतेऽपि शास्त्रकाव्यरूपच्छायाऽन्वयिनि, वृष्णिपाण्डव-विरसावसानवैमनस्यदायिनीं समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः, शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः ।

शास्त्राणि पातञ्जलादीनि, काव्यानि रामायणादीनि, तेषां यद्रूपं स्वलक्षण आत्मा, तस्य या छाया प्रतिबिम्बं सुषमा वा, तामन्वेतुमनुसर्तुं शीलमस्य, तादृशे शास्त्रवत्तत्त्वनिर्णायके, काव्यवच्चमत्कारकारणे । वृष्णयो यादवाः, पाण्डवा युधिष्ठिरादयः, तेषां विरसेन तुच्छेनावसानेन यादवानां परस्परयुद्धेन, पाण्डवानां महापथप्रस्थानेन च विनाशेन, यद् वैमनस्यं 'तेषामेव यदीदृशः परिणामः, तर्हि का कथाऽन्येषाम् ?' इति सकलसांसारिकपदार्थभङ्गुरत्वग्रहेण वैराग्यं, तद्दातुमुत्पादयितुं शीलमस्यास्तादृशीं वैराग्यजननीं समाप्तिं ग्रन्थावसान पनिबध्नता रचयता, महामुनिना कृष्णद्वैपायनेन । स्वप्रबन्धस्य महाभारतस्य वैराग्यजनने तात्पर्यं दर्शयता, मोक्षो मुक्तिरेव लक्षणं स्वरूपं यस्य सः । पुरुषाणामर्थः परमप्रयोजनम् । मुख्यतया सर्वप्राधान्येन ।

अयं भावः—महाभारते महर्षिणा व्यासेन सहृदयानामामोदाय शान्तो रसः, मुमुक्षूणां सन्तोषणाय मोक्षः पुरुषार्थश्च प्राधान्येन प्रकाशितः । अत एव तेन भारतान्ते यदु-कुरुकुलावसानं वर्णितम् । तेन च शरीरिणां सर्वेषामेवैव परिणतिरिति संसारालम्प्रत्ययोत्पादनात्, तृष्णाक्षयजन्यसुखविशेषात्मकशमस्थायिकः शान्तरसः, तत्तादात्म्याध्यासेन तु पार्यन्तिकस्थितिशालितया भङ्गुरत्वाभावेन च प्रधानमार्शसाविषयत्वेन मोक्षरूपः पुरुषार्थश्च प्रकाशितः ।

यद्यपि—'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ! ।
यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित् ॥' इत्युक्त्या पुरुषार्थचतुष्टयप्रकाशकताऽप्यस्य निगदिता, किन्तु तत्रापि प्राधान्येन मोक्षप्रकाशनमेवाभिप्रेतमिति नैवासामञ्जस्यम् ।

उक्तार्थे प्राचीनसम्मतिमपि दर्शयति—

एतच्चांशेन विवृतमेवान्यैर्व्याख्याविधातृभिः ।

एतद् भारतस्य प्राधान्येन शान्तरस–मोक्षयोर्व्यञ्जकत्वम् । अंशेन, न तु साकल्येन । व्याख्या भारतस्य नीलकण्ठादिप्रणीता, ध्वन्यालोकस्यैव वा चन्द्रिकानाम्नी ।

स्वयं व्यासस्यापि सम्मतिमत्र प्रकटयति—

स्वयं चोद्गीर्णं तेनोदीर्णमहामोहमग्नमुज्जिहीर्षता लोकमतिविमलज्ञानालोकदायिना लोकनाथेन—

उदीर्णे कृतसत्त्वरजोऽभिभवे, महति दृढबन्धप्रयोजके, मोहेऽज्ञाने तमःपरिणामे मग्नं लोकम्, उज्जिहीर्षतोद्धर्तुमिच्छता । अतिविमलस्य तत्तमस्तिरोधायकस्य, ज्ञानालोकस्य तत्त्वज्ञानप्रकाशस्य, दायिना सम्पादकेन, लोकानां नाथेन सदुपदेशकत्वाद् भगवदंशत्वाद्वा स्वामिना । तेन व्यासेन च, स्वयम् उद्गीर्णमुक्तम् । अग्रिमं कथयतेत्यन्तमपि तद्विशेषणमेव ।

> 'यथा यथा विपर्येति लोकतन्त्रमसारवत् ।
> तथा तथा विरागोऽत्र जायते नात्र संशयः ॥'

इत्यादिबहुशः कथयता ।

लोकतन्त्रं मोक्षेतरपुरुषार्थ–तदुपायरूपं लौकिकपदार्थपटलम्, असारवत् स्वप्नावस्थाऽवलोकितवस्त्विव निस्सारं, यथा यथा पर्यवसानेऽसत्परिणामदर्शनेन, विपर्येति विपरीततामसत्तां वा प्रतिपद्यते, तथा तथा प्रेक्षावतां लोकानामत्र लौकिकवस्तुव्यूहे विरागोऽनासक्तिरवहेला वा जायते । अत्र विरागोत्पत्तौ संशयो नास्तीत्यर्थः ।

पर्यवसितमाह—

ततश्च शान्तो रसो रसान्तरैः, मोक्षलक्षणः पुरुषार्थः पुरुषार्थान्तरैस्तदुपसर्जनत्वेनानुगम्यमानोऽङ्गित्वेन विवक्षाविषय इति महाभारततात्पर्यं सुव्यक्तमेवावभासते ।

रसान्तरैर्वीरादिरसैः, तदुपसर्जनत्वेन शान्ताङ्गतया, अनुगम्यमानः पोष्यमाणः, शान्तो रसः, पुरुषार्थान्तरैर्धर्मादिभिः, तदुपसर्जनत्वेन मोक्षोपकारकतया, पोष्यमाणो मोक्षलक्षणः कैवल्यरूपः, पुरुषार्थश्चाङ्गित्वेन, विवक्षाया महाभारतकर्तुरिच्छाया विषयोऽस्तीति महाभारतस्य तात्पर्यं सुव्यक्तमतिस्फुटमेव, अवभासते, न त्वत्र संशयावकाश इत्यर्थः ।

इहानुगमनक्रियाकर्तृतया रसान्तरैरिति पुरुषार्थान्तरैरिति च तृतीया। ततश्चेत्यस्यावभासत इत्यनेन सम्बन्धः।

ननु रसानामङ्गाङ्गिभावो न सम्भवतीति कुतश्शान्तस्याङ्गिता भारत इत्यपि न शङ्कनीयमिति ब्रूते—

अङ्गाङ्गिभावश्च यथा रसानां, तथा प्रतिपादितमेव।

प्रतिपादितमेव तृतीयोद्द्योते—'विवक्षिते रसे' इत्यादिना।

ननु तर्हि भारते वीरादिरसानां धर्मादिपुरुषार्थानामपि प्राधान्येन चमत्कारिता कुतोऽवगम्यत इत्याशङ्कायामाचष्टे—

पारमार्थिकान्तस्तत्त्वानपेक्षया शरीरस्येवाङ्गभूतस्य रसस्य पुरुषार्थस्य च, स्वप्राधान्येन चारुत्वमप्यविरुद्धम्।

पारमार्थिकं यदन्तस्तत्त्वं वास्तविकोऽर्थस्तदपेक्षया तस्याज्ञानेन। अङ्गभूतत्वविशेषणमुपमाने शरीरे, उपमेये रसे पुरुषार्थे चान्वेति।

इदमुच्यते—यथाऽङ्गिनं सारमात्मानमजानतां मूढानामङ्गभूतस्य शरीरस्यैव प्राधान्यमात्मत्वं च प्रतीतं भवति, तथैव भारते प्रधानव्यङ्ग्यं सारं च शान्तं रसं मोक्षं पुरुषार्थं चावधारयितुमसमर्थानामावान्तरिकस्य वीरादिरसस्य धर्मादिपुरुषार्थस्य च प्राधान्यम्। तच्च प्राधान्यं नैव वास्तविकम्, परमार्थविवेके–शान्तरसमोक्षयोः प्राधान्यस्यैव निर्धारितत्वात्।

ननु तदैवेदं सङ्गच्छेत, यदि महाभारतप्रथमाध्याये तद्वर्णनीयवृत्तान्तानुक्रमणीरूपे शान्त–मोक्षप्राधान्यमपि वर्णनीयतयोपादीयेत, तदेव तु न दृश्यत इत्याशङ्कते—

ननु महाभारते यावान् विवक्षाविषयः, सोऽनुक्रमण्यां सर्व एवानुक्रान्तो, न चैतत् तत्र दृश्यते, प्रत्युत सर्वपुरुषार्थप्रबोधहेतुत्वं सर्वरसगर्भत्वं च, महाभारतस्य तस्मिन्नुद्देशे स्वशब्दनिवेदितत्वेन प्रतीयते।

एतत् शान्त–मोक्षप्राधान्यप्रकाशकत्वम्। प्रत्युतोक्तवैपरीत्येन। तस्मिन्नुद्देशेऽनुक्रमण्याम्। भारतस्य सर्वपुरुषार्थादिप्रकाशकत्वमनुक्रमणिकाऽध्याये, यथा—

'वेद–योगं सविज्ञानं धर्मोऽर्थः काम एव च।
धर्मार्थकामशास्त्राणि शास्त्राणि विविधानि च॥
लोकयात्राविधानं च सम्भूतं दृष्टवानृषिः।
इतिहासाः सवैयाख्या विविधाः श्रुतयोऽपि च॥

इह सर्वमनुक्रान्तमुक्तं ग्रन्थस्य लक्षणम् ।' इत्यादिना ।

हरिवंशभविष्यपर्वणि—

'भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेव्यते देवैर्भारतं परिकीर्तयेत् ॥
भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ ! ।
भारतात् प्राप्यते मोक्षस्तत्त्वमेतद् ब्रवीमि ते ॥' इत्यादिना ।

'धर्मे चार्थे च' इत्यादिना च विस्तरेण प्रकाशितम् ।

उत्तरयति—

अत्रोच्यते—'सत्यं शान्तस्यैव रसस्याङ्गित्वं महाभारते मोक्षस्य च सर्वपुरुषार्थेभ्यः प्राधान्यम्' इत्येतन्न स्वशब्दाभिधेयत्वेनानुक्रमण्यां दर्शितम्, दर्शितन्तु व्यङ्ग्यत्वेन ।

अनुक्रमण्यां यद्यपि रसेषु शान्तस्य, पुरुषार्थेषु च मोक्षस्य प्राधान्यं वाचकत्वशक्त्या शब्दैर्न प्रकाश्यते, किन्तु व्यञ्जकत्वशक्त्या प्रकाश्य एव, अनुक्रमणीघटकश्लोकानां कियतां तद्व्यञ्जकत्वात् । तस्मादनुक्रमण्यां तदसङ्ग्रहो न शङ्क्य इति भावः ।

ननु तत्रापि केन शब्देन कथं व्यज्यते ? इति जिज्ञासायामभिधत्ते—

'भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।' इत्येतस्मिन् वाक्ये,ह्ययमर्थो व्यङ्ग्यत्वेन विवक्षितो'यदत्र महाभारते पाण्डवादिचरितं यत् कीर्त्यते, तस्मात् तस्मिन्नेव परमेश्वरे भगवति भवत भावितचेतसो, माभूत विभूतिषु निस्सारासु रागिणो, गुणेषु वा नयविनयपराक्रमादिष्वमीषु केवलेषु केषुचित् सर्वात्मना प्रतिनिविष्टधियः, तथा चाग्रे पश्यत निस्सारतां संसारस्य' इत्यमुमेवार्थं द्योतयत् स्फुटमेवावभासते । व्यञ्जकशक्त्याऽनुगृहीतश्च शब्दः । एवंविधमेव चार्थं गर्भीकृतं सन्दर्शयन्तोऽनन्तरश्लोका लक्ष्यन्ते—'स हि सत्यम्' इत्यादयः ।

अत्र भारते, सनातनोऽनादिनिधनो भगवानचिन्त्याद्भुतशक्तिशाली, वासुदेवः परमात्मा श्रीकृष्णः कीर्त्यते प्रस्तूयते, अत्र भारते यद् यादृशं पाण्डवादिचरितं यद् यस्मात् कीर्त्यते, तस्मात् तस्मिन् प्रसिद्धे भगवति जगदुदयपालनलयलीलापरमैश्वर्यशालिनि, परमेश्वरेऽखण्डाद्वितीयब्रह्मात्मनि, एव, न तु विषयेषु, भावितं तद्विषयकभावनाऽऽश्रयीकृतं चेतो यैस्तादृशा यूयं भवत । निस्सारासु पर्यन्तविरसत्वात्

तुच्छासु, विभूतिषु सांसारिकसम्पत्सु, रागिणोऽनुरक्ता माभूत । अमीषु परोक्षतयाऽसनातनेषु, नयविनयपराक्रमादिषु गुणेषु धर्मेषु, केवलेषु सकलेषु,केषुचिद्वा,यद्वा—केवलेषु गुणेषु बन्धप्रयोजकविषयमात्रेषु, न तु मुक्तिप्रयोजकभगवत्सम्बन्धिविषयेष्वपि, प्रतिनिविष्टधियोऽत्यासक्तबुद्धयोऽपि यूयं माभूत । तथा—अग्रे पर्यवसाने संसारस्यासारतां पश्यत च ।' इत्यमुमुक्तवाक्यकदम्बप्रतिपाद्यमर्थमेव द्योतयद् व्यञ्जनावृत्त्या प्रकाशयत् तत् पाण्डवादिचरितं स्फुटमवभासते । व्यञ्जकस्य शक्तिर्व्यञ्जकशक्तिर्व्यक्तिः, तयाऽनुगृहीतस्तद्वान्, अत्र चशब्दः । एवंविधं संसारानित्यत्व–ब्रह्मनित्यत्व–मोक्षपरमपुरुषार्थत्वादिरूपमेवार्थं गर्भीकृतं व्यङ्ग्यत्वेन निगूढं सन्दर्शयन्तो व्यञ्जनया बोधयन्तः 'स हि सत्यम्' इत्यादयोऽनन्तरश्लोकाः 'भगवान् वासुदेवश्च' इत्यतः परं पठिताः श्लोकास्तत्रत्या लक्ष्यन्ते दृश्यन्त इत्यर्थः ।

तथा च ते श्लोकाः—

'भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
स हि सत्यमृतं चैव पवित्रं पुण्यमेव च ॥
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम् ।
यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥' इत्यादयोऽनुक्रमण्याम् ।

यद्यप्यत्र पाण्डवादिचरितं वर्णितम्, तस्यापि पार्यन्तिकवैरस्यवत्तया वैराग्यमात्रजनकत्वेन मोक्षप्राधान्य—शान्तरसविश्रान्त्योरेव व्यञ्जकत्वमिति भारतस्य तदुभयप्रकाशकता प्रागुक्ता निश्चितैवेति तात्पर्यम् ।

उक्तमेव द्रढयति—

अयं च निगूढरमणीयोऽर्थो महाभारतावसाने हरिवंशवर्णनेन समाप्तिं विदधता कविवेधसा कृष्णद्वैपायनेन सम्यक् स्फुटीकृतः ।

निगूढश्चासौ रमणीय इति विग्रहः । तत्र निगूढता व्यङ्ग्यत्वेन, रमणीयता च तेन तत्त्वोपदेशमयत्वेन च । कविषु वेधाः प्रजापतिरिव स्वैरं काव्यसर्गप्रवर्तकः,तेन । हरिवंशे हि यादवानामन्येषां वा समुत्पत्तिसम्पत्ती सम्यग् वर्णयित्वा, पर्यन्ते विलयं वर्णयता व्यासेन, जगदसारतामवधार्य जीवैः शान्तास्वादपरिष्कृतस्वान्तैर्मोक्ष एवाश्रयणीय इति सूचितम् । तावता महाभारतस्यापि तदेव द्वयं व्यङ्ग्यं प्रधानफलमिति निर्णीतम्, पर्यन्त एव प्रधानफलप्रतिपादनस्यान्यत्रापि दर्शनादित्याकूतम् ।

समर्थयति—

अनेन चार्थेन संसारातीते तत्त्वान्तरे भक्त्यतिशयं प्रवर्तयता सकल एव सांसारिको व्यवहारः पूर्वपक्षीकृतोऽध्यक्षेण प्रकाशते ।

अनेन सांसारिकपदार्थानामत्यन्ततुच्छत्वप्रतिपादनरूपेणार्थेन । संसारातीतेऽलौकिके, तत्त्वान्तरे परब्रह्मलक्षणे श्रीकृष्णे । व्यवहारो व्यापारस्तद्विषयीभूतः पदार्थश्च । पूर्वपक्षीकृतोऽसत्यत्वेन खण्डनार्हीकृतः । अध्यक्षेण प्रत्यक्षेण । तादृशबिलयान्तभारतवर्णनेन भगवतो माहात्म्यप्रकर्षसूचनात् तत्र भक्त्यतिरेकः, सांसारिकपदार्थानामनित्यत्वेन तुच्छत्वं च सूच्यत इति सारम् ।

ननु यदि भारतस्य परब्रह्मतादात्म्यप्राप्तिलक्षणे मोक्ष एव तात्पर्यम्, तर्हि तत्र सामान्येन विशेषेण च देवतानां तीर्थानां तपसां माहात्म्यं, पाण्डवादीनां चरितं च कथं विस्तरेण वर्णितम् ? इत्याशङ्कामपाकरोति—

देवतातीर्थतपःप्रभृतीनां च प्रभावातिशयवर्णनं तस्यैव परब्रह्मणः प्राप्त्युपायत्वेन, तत्तद्विभूतित्वेनैव वा देवताविशेषाणामन्येषां, पाण्डवादिचरितवर्णनस्यापि वैराग्यजननतात्पर्याद्, वैराग्यस्य च मोक्षमूलत्वाद्, मोक्षस्य च भगवत्प्राप्त्युपायत्वेन मुख्यतया गीताऽऽदिषु प्रदर्शितत्वात् परब्रह्मप्राप्त्युपायत्वमेव ।

इदमुक्तं भवति—देवानां तीर्थानां तपसां चान्यत्र भगवद्रूपताऽऽम्नानाद्, देवताविशेषाणामन्येषां महापुरुषाणां वा—

'यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा ।

तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥' इति गीतादशमाध्याये भगवदुक्तेस्तदात्मताऽऽख्यातेश्च तदनुभावोत्कर्षवर्णनमिहत्यं भगवद्भावापत्तिलक्षणमोक्षस्यैव प्रयोजकम्, न तु विक्षेपस्य । किञ्च पाण्डवादिचरितवर्णनमपि दर्शितदिशा जगद्विभूतितुच्छत्वप्रमितिजननमात्रपर्यवसायितया तत्प्रयोजकमेव । मोक्षश्च भगवत्प्राप्तिकारणीभूत इति तत्प्रपञ्चोऽत्रोपादीयमानो न त्रुटिमादधाति ।

वस्तुतस्तु भगवद्भावापत्तिरेव सायुज्यमुक्तिरिति तदुपायत्वमिह तत्तादात्म्यरूपमवसेयम् । न हि मोक्षानन्तरं भगवत्सायुज्यम्, अपि तु तदेवेति श्रुतिषु गीताप्रभृतिस्मृतिषु च स्पष्टम् ।

ननु श्रीकृष्णो यदि भवदभिमतः परब्रह्मात्मा भगवान् परमेश्वरः, तर्हि वसुदे-

वापत्यार्थकेनाधुनिकत्वं प्रथयता वासुदेवशब्देन कथमभिधीयते ? इति शङ्कां समादधाति—

परम्परया वासुदेवसञ्ज्ञाऽभिधेयत्वेन चापरिमितशक्त्यास्पदं परं ब्रह्म गीताऽऽदिप्रदेशान्तरेषु तदभिधानत्वेन लब्धप्रसिद्धिमाथुरप्रादुर्भावानुकृतसकलस्वरूपशंसि रूपं विवक्षितम्, न तु माथुरप्रादुर्भावांश एव, सनातनशब्दविशेषितत्वात्।

परम्परयाऽनादिप्रवाहेण। वासुदेवसंज्ञाऽभिधेयत्वेन लब्धप्रसिद्धिरूपमिति सम्बन्धः। अपरिमितायाः शक्तेः परमैश्वर्यस्यास्पदमाश्रयः। 'तदभिधानत्वेन वासुदेवसञ्ज्ञया।

तथा हि गीतायाम्—

'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥' इति सप्तमाध्याये।
'वासुदेवपरा वेदा वासुदेवपरा मखाः।
वासुदेवपरा योगा वासुदेवपराः क्रियाः॥
वासुदेवपरं ज्ञानं वासुदेवपरं तपः।
वासुदेवपरो धर्मो वासुदेवपरा गतिः॥
स एवेदं ससर्जाग्रे भगवानात्ममायया।
सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः॥'

इत्यादि प्रथमस्कन्धे श्रीमद्भागवते च प्रतिपादितम्।

मथुरायां भवो माथुरः स चासौ प्रादुर्भावोऽवतारः, तेनानुकृतं विडम्बितं सकलं स्वरूपं शंसितुं शीलमस्येति तादृशं, रूपं वस्तु रूप्यत्वात्। 'भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।'इति वासुदेवस्य सनातन इति विशेषणम्।

यद्यपि वासुदेवशब्दो वसुदेवापत्यं पुमानिति विग्रहे वसुदेवशब्दादपत्यार्थे, इञ्बाधकेन 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति पाणिनिसूत्रविहिताण्प्रत्ययेन निष्पन्नतया मथुरोत्पन्न–वसुदेवपुमपत्यबोधक इति तत्प्रतिपाद्यस्य तस्य न परमेश्वरत्वमुचितम्। तथाऽपि शब्दनित्यत्वनये वसुदेवापत्यप्रादुर्भावात् प्रागपि वासुदेवशब्दसद्भावस्य स्वीकार्यत्वे गत्यन्तरविरहेण तादृशनित्यापूर्ववासुदेवपदार्थः कश्चन स्वीकरणीय एव। यद्वा–सर्वत्रात्मरूपेण वसतीति वासुः, वसेर्बाहुलकादुण्, दीव्यतीति

देवः, वासुश्चासौ देव इति व्युत्पत्तिः । अत एवात्र वासुदेवस्य सनातनत्वं विशेषणम् । अन्यथाऽनित्यत्वाद्वसुदेवापत्यस्य तन्न सङ्गच्छेत । तस्माद्वासुदेवस्य परमेश्वरत्वमविरुद्धमित्याशयः ।

तत्रैव हेत्वन्तरमप्याह—

रामायणादिषु चानया सञ्ज्ञया भगवन्मूर्त्यन्तरे व्यवहारदर्शनात् ।

भगवन्मूर्त्यन्तरे कपिलादौ । अनया वासुदेवेत्याकारिकया सञ्ज्ञया । अन्यथा कपिलादेर्वसुदेवापत्यत्वविरहादसङ्गतिस्तत्र स्फुटैवेति तात्पर्यम् ।

तथा हि, वाल्मीकीयरामायणे बालकाण्डचत्वारिंशत्तमाध्याये—

'यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः ।
महिषी माधवस्यैषा स एव भगवान् प्रभुः ॥' इति ।

आदिपदग्राह्ये विष्णपुराणे—

'वासुस्सर्वनिवासश्च विश्वानि सर्वलोमसु ।
तस्य देवः परं ब्रह्म वासुदेव इतीरितः ॥' इति ।

भारते—वासनात् सर्वभूतानां वसुत्वाद्देवयोनितः ।
वासुदेवस्ततो वेद्यो बृहत्त्वाद्विष्णुरुच्यते ॥' इति ।

कालिकापुराणे—'बीजन्तु वासुदेवस्य पुरैव प्रतिपादितम् ॥' इति ।

कूर्मपुराणे—'एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥' इति ।

पद्मपुराणे—'वासुदेवः सनातनः' इत्यादि च ।

उक्तार्थे परसम्मतिमपि दर्शयति—

निर्णीतश्चायमंशः शब्दतत्त्वविद्भिरेव ।

चकारोऽप्यर्थको भिन्नक्रमः । अयं वासुदेवशब्दस्य नित्यापूर्वार्थकत्वरूपोंऽशः शब्दतत्त्वविद्भिर्वैयाकरणैरपि निर्णीत इत्यर्थः ।

तथा च, 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति सूत्रे—

'कथं पुनर्नित्यानां शब्दानामनित्यान्धकादिवंशाश्रयेणान्वाख्यानं युज्यते ?, अत्र समाधिः—त्रिपुरुषानूकं नाम कुर्यादिति न्यायेनान्धकादिवंशा अपि नित्या एवं । अथवाऽनित्योपाश्रयेणापि नित्यान्वाख्यानं दृश्यते—यथा शकाश्रयेण कालस्य' इति कैयटः ।

'शब्दा हि नित्या एव सन्तोऽनन्तरं काकतालीयवशात् तथासङ्केतिताः ।' इति काशिकाकारश्च ।

प्राक् प्रतिज्ञातं निगमयति—

तदेवमनुक्रमणीनिर्दिष्टेन वाक्येन भगवद्व्यतिरेकिणः सर्वस्यान्यस्यानित्यतां प्रकाशयतो मोक्षलक्षण एवैकः परः पुरुषार्थः शास्त्रनये, काव्यनये च तृष्णाक्षयसुखपरिपोषलक्षणः शान्तो रसो महाभारतस्याङ्गित्वेन विवक्षित इति सुप्रतिपादितम् ।

अयमाशयः—द्विविधा हि पुरुषाः, केचन विषयविरक्ता विद्वांसः शास्त्रप्रणयिनः, केचन विदग्धाः काव्यरसास्वादिनः । तत्र शास्त्रप्रणयिनां कृते भारते मोक्षरूपः परमपुरुषार्थः प्रकाशितः, काव्यरसास्वादिनां तु कृते तृष्णाक्षयजन्यात्मविश्रमानन्दपरिपोषलक्षणश्शान्तरस इत्युभयविधाधिकारिपरितोषोऽस्माद् भवति । सुप्रतिपादितमित्यनेन नेदानीं संशयलेशोऽपि कस्यचिदुदेतुं शक्नोतीति सूचितम् ।

मोक्षशान्तरसयोरनभिधेयत्वे निमित्तमभिधत्ते—

अत्यन्तसारभूतत्वाच्चायमर्थो व्यङ्ग्यत्वेनैव दर्शितो, न तु वाच्यत्वेन । सारभूतो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति ।

महाराष्ट्रवधूकुचकलश इवेषत्प्रच्छन्न एवार्थश्चमत्कारीति व्यञ्जनयैवैतौ प्रतिपादिताविति सारम् ।

न चेयं ममैव कल्पनेत्याह—

प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु, यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते, न साक्षाच्छब्दवाच्यत्वेनैव ।

चकारो हेत्वर्थकः । तेन यत इयं लोके प्रसिद्धिरस्त्येव,यद् विदग्धा विद्वांसः श्रेष्ठतमं तत्त्वं व्यञ्जनयैव सूचयन्ति, ततो महाभारतेऽपि भगवद्द्वैपायनस्य व्यञ्जनया तयोः प्रकाशनं नानुचितम् । अन्यथाऽन्येषामपि भारतघटकपद्यानां तत्तदाशयनिर्धारणमसङ्गतं स्यादिति तात्पर्यम् ।

प्रागुक्तमुपसंहरति—

तस्मात् स्थितमेतत्—अङ्गिभूतरसाद्याश्रयेण काव्ये क्रियमाणे नवनवार्थलाभो भवति, बन्धच्छाया च महती सम्पद्यत इति ।

तस्मादुक्तहेतोः । स्थितं पर्यवसितं निर्णीतमिति यावत् ।

तथा च—'रसादिमय एकस्मिन् कविः स्यादवधानवान् ।' इति,

'दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।

सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥' इति च प्रागुपक्षिप्तमिहोपसंहृतमिति बोध्यम् । अङ्गिभूतेत्युक्त्या रसानां प्राधान्येन व्यङ्ग्यतैव काव्येऽभिप्रेयते ।

उक्तमुपोद्बलयति—

अत एव च रसानुगुणार्थविशेषोपनिबन्धनमलङ्कारान्तरविरहेऽपि च्छायाऽतिशययोगि लक्ष्ये दृश्यते ।

अत एव रसानां सम्बन्धस्यैव प्राधान्येन काव्यत्व–तच्छोभाऽतिशयप्रयोजकत्वादेव । अलङ्कारान्तरस्यालङ्कारविशेषस्य । 'अन्तरशब्दो विशेषवाची' इत्याचार्याः । तथा च मेदिनी—

'अन्तरमवकाशावधि–परिधानान्तर्धिभेदतादर्थ्ये ।

छिद्रात्मीयविनाबहि–रवसरमध्यात्मसदृशेषु ॥' इति ।

यद्वा–वक्ष्यमाणे 'मुनिर्जयति' इत्याद्युदाहरणेऽद्भुतरसस्य मुनिविषयकरतिभावाङ्गतया रसवदलङ्कारसद्भावादलङ्कारान्तरस्य रसवद्भिन्नालङ्कारस्य । योगीत्यन्तं निबन्धनस्य विशेषणम् । इत्थञ्च 'मुनिर्जयति' इत्यादिलक्ष्येऽलङ्कारवैधुर्येऽपि न काव्यशोभाहानिः । इतरथा स्यादेव । यत्तु तत्र लक्ष्ये भाविकालङ्कारोऽस्तीति रुय्यकेनास्थितम्, तन्न सहृदयहृदयङ्गमम्, भूतभविष्यदर्थानां प्रत्यक्षायमाणत्वेनोपादान एव तस्यालङ्कारिकैरङ्गीकरणात् प्रकृते भूतयोर्मत्स्यकच्छपयोर्भूतकालिकप्रत्यक्षविषयतयैव वर्णनेन साम्प्रतिकप्रत्यक्षायमाणत्वाभावादिति मदीयमञ्जूषायां विस्तरः ।

तदुदाहरणमाचष्टे—

यथा—'मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ।

येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥' इत्यादौ ।

योगीन्द्रो योगिनां श्रेष्ठो महात्मा महनीयानुभावः, मुनिर्मननशीलः, कुम्भसम्भवो घटजन्माऽगस्त्यो जयति सर्वोत्कर्षेण वर्तते । येनागस्त्येन, एकचुलके एकस्यां प्रसृतौ, तौ—'अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः' इत्यादिभिः प्रसिद्धौ, दिव्यावलौकिकौ मत्स्यकच्छपौ, दृष्टौ समुद्रपानावसरेऽवलोकितावभूतामित्यर्थः ।

तथा च—'चुलकः प्रसृतौ' इति मेदिनी।

सङ्गतिमाह—

अत्र ह्यद्भुतरसानुगुणमेकचुलके मत्स्य-कच्छपदर्शनं छायाऽतिशयं पुष्णाति।

एकस्मिन्नेव चुलके तादृशात्यनिर्वचनीयमत्स्यकच्छपयोर्दर्शनं विस्मयाधिक्योत्पादकतया विस्मयस्थायिकाद्भुतरसास्वादप्रयोजकमितीहाद्भुतरसास्वादेनैव मुख्यतया काव्यस्य सुषमाप्रकर्ष इति भावः।

एतेनात्र मत्स्यकच्छपदर्शनसूच्यमानैकचुलकाधिकरणकजलधिसन्निधानेन मुनेर्माहात्म्यं व्यज्यते, न त्वद्भुतरस आस्वाद्यत इति वदन्तः परास्ताः, तादृशमत्स्यकच्छपरूपविभावादिसंसृष्टविस्मयोल्लासेनाद्भुतरसास्वादस्य निह्नोतुमशक्यत्वात्।

नन्वत्रैकचुलके दिव्यमत्स्यकच्छपदर्शनरूपेण वाच्येन व्यज्यमानं चुलके जलधिसम्मानमेवाद्भुतरसं पुष्णाति, न तु वाच्यमितिशङ्कायामभिदधाति—

तत्र ह्येकचुलके जलधिसन्निधानादपि दिव्यमत्स्यकच्छपदर्शनमक्षुण्णत्वादद्भुतरसानुगुणतरम्।

अक्षुण्णत्वादप्रतीतचरत्वेनानुद्भिन्नत्वात्। यद्यप्येकचुलके जलधिसन्निधानादपि व्यज्यमानादद्भुतरसः पोष्यत एव, किन्त्वदृष्टाश्रुतपूर्वतादृशमत्स्यकच्छपदर्शनं ततोऽप्यधिकाश्चर्यजनकमिति तदपेक्षयाऽप्यद्भुतरसपोषकमिति सारम्।

व्यतिरेकमुखेन समर्थयति—

क्षुण्णं हि वस्तु लोकप्रसिद्ध्याऽद्भुतमपि नाश्चर्यकारि भवति।

यतो लोकप्रसिद्ध्या क्षुण्णं पिष्टपेषणन्यायेन भूयो भूयो लोकप्रसिद्धिगोचरीभूतमद्भुतमपूर्वमपि वस्तु विस्मयजनकं न भवति, यथेदानीमद्भुतमपि व्योमयानं नाश्चर्याय कल्पते प्रसिद्धतरत्वात्, किञ्चिदाश्चर्यजनकत्वं तस्यापीष्टमेव, अतएव तरबुपात्तः। तस्मादिह जलधिसन्निधानस्य नाद्भुतरसव्यञ्जकतरत्वमित्याकूतम्।

न चेयं स्थितिरद्भुतरस एव यावदन्यस्मिन्नपि रस इति बहुलक्ष्यव्यापकत्वं प्रकटयति—

न चाक्षुण्णं वस्तूपनिबध्यमानमद्भुतरसस्यैवानुगुणं, यावद् रसान्तरस्यापि।

किन्त्वर्थकं यावदित्यव्ययम्।

उदाहरति—

तद्यथा—

नायिकाया दूती नायकं ब्रवीति—

'सिज्जइ रोमञ्चिज्जइ वेवइ रच्छातुलग्गपडिलग्गो।
सो पासो अज्ज वि सुहअ ! तीइ जेणासि वोलीणो ॥'

'स्विद्यति रोमाञ्चति वेपते रथ्या-तुलाग्रप्रतिलग्नः।
स पार्श्वोऽद्यापि सुभग! तस्या येनास्यतिगतः॥' इतिच्छाया।

अयि सुभग ! तस्या मत्सख्याः येन पार्श्वेन, रथ्यायां प्रत्नत्वात् सङ्कीर्णायां प्रतोल्यां, तुलाऽग्रेण काकतालीयेन अकस्मात् प्रतिलग्नः संस्पृष्टस्त्वमतिगतोऽसि पुरा निर्गतोऽसि। स तस्याः पार्श्वोऽद्यापि, न तु तत्कालएव, स्विद्यति सघर्म्मो भवति, रोमाञ्चति पुलकं प्राप्नोति, वेपते कम्पते चेत्यर्थः।

त्वत्स्पर्शरूपकारणाभावेऽप्यद्यापि स्वेदादिसात्त्विकभावात्मककार्योद्गमेन विभावनाऽलङ्कारः। चकारं विनाऽपि 'गामश्वं पुरुषं पशुम्' इत्यादिवत् समुच्चयप्रतीतिः। प्राकृते गमेर्वोलादेशः। 'तुलाग्रं काकतालीयम्' इत्याचार्याः। इहापि सन्दर्भशुद्ध्यनुरोधेन पाठः परिवर्तितः।

सङ्गमयति—

एतद्गाथाऽर्थाद् भाव्यमानाद् या रसप्रतीति र्भवति, सा 'त्वां दृ(स्पृ)ष्ट्वा स्विद्यति रोमाञ्चति वेपते' इत्येवंविधादर्थात् प्रतीयमानात्मना मनागपि नो जायते।

एतत्पद्यार्थभावनया नायकमिथुननिष्ठपारस्परिकरतिस्थायिकश्रृङ्गाररसास्वादो यो भवति, तत्र वाच्यस्य नोपयोगिता, अपित्वेतावत्कालातिक्रान्तकारणजन्यकार्योपनिबन्धस्यापूर्वतरस्य वस्तुन एवेति—श्रृङ्गारादिरसास्वादानुलोमत्वमप्यद्भुतवस्तुवर्णनस्य निर्णीतमेवेति तात्पर्यम्।

इदं पुनरिह विचारणीयम्—वाच्यार्थभावनयैव जन्यमानायां रसप्रतीतौ तस्य कथं नोपयोगितेति।

इदानीं—'ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः॥
अनेनानन्त्यमायाति कवीनां प्रतिभागुणः॥' इत्यनेनोपक्रान्तं ध्वनिप्रभेदानां कविप्रतिभाऽऽनन्त्यप्रयोजकत्वमुपसंहृत्य, गुणीभूतव्यङ्ग्यप्रकाराणामपि तत्त्वं

समासेनोपदिशति—

तदेवं ध्वनिप्रभेदसमाश्रयेण यथा काव्यार्थानां नवनवत्वं जायते, तथा प्रतिपादितम् । गुणीभूतव्यङ्ग्यस्यापि त्रिभेदव्यङ्ग्यापेक्षया ये प्रकाराः, तत्समाश्रयेणापि काव्यवस्तूनां नवत्वं भवत्येव ।

त्रिभेदता च वस्त्वलङ्काररसादिरूपत्वेनैव ।

यथा सत्स्वपि समानार्थकेषु प्राचीनकाव्येषु ध्वनियोगेन नवीनकाव्यानामपूर्वत्वं भवतीतिप्राग् विशिष्य दर्शितम्, तथा गुणीभूतव्यङ्ग्ययोगेनापि भवतीति सारम् ।

तर्हि कथं तदुदाहृतम् ? इत्याशङ्कायामाह—

तत्त्वतिविस्तारकारीति नोदाहृतम् ।

गुणीभूतव्यङ्ग्यस्यालङ्काराणां बाहुविध्येन विपुलध्वनिप्रभेदसम्भेदेन च भूयांसः प्रकाराः कात्स्न्र्येनोदाहर्तुमशक्या इति न तदर्थं चेष्टितमितिभावः ।

तर्हि तज्ज्ञानार्थं कउपायः ? इत्यतोऽभिदधाति—

सहृदयैः स्वयमुत्प्रेक्षणीयम् ।

उत्प्रेक्षणीयमूहनीयम् । ध्वनिदर्शितदिशा तदुदाहरणमितिशेषः ।

ऊहश्चेत्थम्—'तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
सचर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ॥'
इत्यस्मिन् प्राचीनपद्ये सत्यपि—

'करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांऽशुः ॥'

इत्यस्य समासोक्त्यलङ्कारसम्पादकवस्तुरूपगुणीभूतव्यङ्ग्ययोगेनापूर्वत्वम् ।

तथा—'क्षुत्तृष्णाकाममात्सर्य-मरणाच्च महद्भयम् ।
पञ्चैतानि विवर्धन्ते वार्धके विदुषामपि ॥' इत्येतस्मिन् पुराणपद्ये सत्यपि ।

'वसन्तमत्तालिपरम्परोपमाः कचास्तवासन् किल कामवृद्धये ।
श्मशानभूभागपरागभासुराः कथं तदेतेन मनोविरक्तये ॥' इत्यस्य वाच्योपस्कारकविभावनाऽलङ्काररूपगुणीभूतव्यङ्ग्ययोगेनापूर्वत्वम् ।

एवं—'जराजीर्णे शरीरेऽस्मिन् वैराग्यं यन्न जायते ।
तन्नूनं हृदये मृत्युर्दृढं नास्तीति निश्चयः ॥' इत्यस्मिन्पुरातने सत्यपि—

'जरा नेयं मूर्ध्नि ध्रुवमयमसौ कालभुजगः

क्रुधाऽन्धः फूत्कारैः स्फुटगरलफेनं प्रकिरति ।
तदेनं सम्पश्यत्यथ च सुखितम्मन्यहृदयः
शिवोपायं नेच्छन् बतबत सुधीरः खलुजनः ॥' इत्यस्य गुणीभूताद्भुतर-
सयोगेनापूर्वत्वं भवतीति विभावनीयम् ।

प्रतिभाप्राधान्यमुपदिशन्नुपसंहरति—

ध्वनेरित्थं गुणीभूत-व्यङ्ग्यस्य च समाश्रयात् ।
न काव्यार्थविरामोऽस्ति यदिस्यात् प्रतिभागुणः ॥११०॥

यदि कवीनां प्रतिभागुणः प्रागुक्तलक्षणः स्यात्, तर्हि—इत्थमुक्तप्रकारेण ध्वने गुणीभूतव्यङ्ग्यस्य च समाश्रयात्सम्बन्धात् काव्यार्थानां विरामोऽन्तो नास्ति, किन्तूक्तरीत्या तदानन्त्यमेव सम्पद्यत इत्यर्थः ।

अंशतः कारिकां व्याचष्टे—

सत्स्वपि पुरातनकविप्रबन्धेषु यदि स्यात् प्रतिभागुणः ।

तदाऽर्वाचीनकाव्यार्थानामप्यपूर्वत्वेनानन्त्यं भवत्येवेति शेषः ।

ननु तदभावे का क्षतिरित्यत आह—

तस्मिंस्त्वसति न किञ्चिदेव कवेर्वस्त्वस्ति ।

एवकारोऽप्यर्थकः । तस्मिन्नपूर्वत्वानन्तत्वसम्पादके प्रतिभागुणेऽसत्यविद्यमाने, कवेर्वर्णनीयं न किञ्चिदपि वस्त्वस्ति, प्रायः सर्वेषामर्थानां सामान्येन कविभिरेव वर्णितत्वादित्यर्थः ।

ननु माभूदर्थापूर्वत्वम्, किन्तूक्तिवैचित्र्यमात्रेणापि नवनवा बन्धच्छाया तु स्यादेव, तथाऽपि न हानिरित्याक्षेपं समादधाति—

बन्धच्छायाऽप्यर्थद्वयानुरूपशब्दसन्निवेशार्थप्रतिभानाभावे कथमुपपद्यते ।

अर्थद्वयस्य ध्वनिगुणीभूतव्यङ्ग्यरूपस्यानुरूपो व्यञ्जकतयाऽनुकूलो यः शब्दानां सन्निवेशः प्रबन्धे घटनम्, स एवार्थः प्रयोजनं यस्य, तादृशस्य प्रतिभानस्य प्रतिभाया अभावे बन्धच्छायाऽपि कथमुपपद्यत इत्यर्थः ।

ननु तद्व्यङ्ग्यद्वयाभावेऽपि शब्दचारिमसम्पदैव प्रबन्धस्य चारुत्वं स्यादिति शङ्कायामाह—

अनपेक्षिताऽर्थविशेषाक्षररचनैव बन्धच्छायेति नेदं नेदीयः सहृदयानाम् ।

नापेक्षितोऽर्थविशेषो ध्वनिगुणीभूतव्यङ्ग्यरूपो यत्र, तादृगक्षराणां केवलशब्दानां रचनैव, नत्वर्थगौरवम्, बन्धस्य छायालक्षणया तत्कृदितीदं कथनं मतं वा सहृदयानां नेदीयः सन्निकृष्टं बुद्धिगोचरीभूतं नेत्यर्थः।

तत्र किं कारणमित्याशङ्क्य निरस्यति—

एवं हि सत्यर्थानपेक्षचतुरमधुरवचनरचनायामपि काव्यव्यपदेशः प्रवर्तते।

हि यत एवं व्यङ्ग्यद्वयार्थनैरपेक्ष्येऽपि शब्दवैचित्र्यमात्रेण बन्धचारुत्वेन काव्यत्वाभ्युपगमे सति, व्यङ्ग्यार्थानपेक्षिण्यां चतुरायां समासादिसौष्ठवेन सङ्घटितायां, मधुरायां मृदुलाक्षरमालाकलितायां रचनायामपि काव्यमिदमितिव्यपदेशः प्रवर्तते प्राप्नोति, तस्मान्नेदं युक्तमित्यर्थः।

ननु शब्दमात्रचारुत्वभृति बन्धेऽर्थचारुत्वाभावेन सहृदयहृदयाह्लादजनकशब्दार्थयुगुलात्मककाव्यत्वं न सम्भवतीत्याक्षेपं निराकरोति—

शब्दार्थयोः साहित्येन काव्यत्वे कथं तथाविधे विषये काव्यव्यवस्थेति चेत् परोपनिबद्धार्थविरचने यथा तत्काव्यत्वस्य व्यवहारः तथा तथाविधानां काव्यसन्दर्भाणाम्।

यदि चमत्कारिशब्दार्थोभयं काव्यम्, तर्हि शब्दमात्रस्य चमत्कारित्वे काव्यत्वव्यवहारो नोचित इति शङ्कितुराशयः।

यथा काव्यान्तरोपनिबद्धार्थस्य रचनायामन्यकृतायां परकीयकाव्यत्वव्यवहारो गौणः काव्यत्वव्यवहारो वा भवति, तथैव शब्दचारिम्णाऽपूर्वच्छायाभृतां काव्यसन्दर्भाणामपि तत्त्वव्यवहारो भाक्तएव, न तु वास्तविकः स्यादित्युत्तरयितुरभिप्रायः।

इह कवेर्भावः काव्यम्, तस्य भावः काव्यत्वमिति भावप्रत्यान्ताद् भावप्रत्ययोद्भवो न शङ्कनीयः, कवेरनिर्वचनीयरचनात्मककर्मणएव काव्यपदार्थत्वात्। तथा चात्र सकृदेव भावप्रत्ययोत्पत्तिरिति बोध्यम्।

अथ व्यङ्ग्यप्रसङ्गेन वाच्यस्याप्यर्थानन्त्यप्रयोजकत्वं प्रख्यापयितुं कारिकामवतारयति—

नचार्थानन्त्यं व्यङ्ग्यार्थापेक्षयैव, यावद् वाच्यार्थापेक्षयाऽपीति प्रतिपादयितुमुच्यते—

अवस्थादेशकालादि-विशेषैरपि जायते।
आनन्त्यमेव वाच्यस्य शुद्धस्यापि स्वभावतः॥ १११॥

शुद्धस्य व्यञ्जनव्यापारानपेक्षस्यापि वाच्यस्याभिधेयस्य, अवस्थानां विशेषेण-भेदेन देशानां विशेषेण, कालानां विशेषेण, आदिशब्दात् स्वरूपाणां विशेषेण च स्वभावत आनन्त्यमेव जायते भवतीत्यर्थः ।

वाच्यं वस्त्वेकमपि, अवस्थाऽऽदिभेदेन वर्णनीयत्वे नानेव भवतीतिसारम् । इदं पुनरिह रहस्यम्—वाच्यं न तत्र सर्वथा व्यञ्जनाशून्यम् , अपि तु व्यञ्जनात् प्रागेवावस्थाऽऽदिभेदेनानन्त्यमासादयति, पश्चाद् व्यञ्जनाबलेन प्रतीयमानमर्थं प्रकाशयत्येव । तदस्वीकारे व्यङ्ग्यात्मकत्वाभावप्रयुक्तः काव्यत्वाभाव एवं तादृशलक्ष्ये-ष्वापतेत् । एवञ्चैतल्लक्ष्यसमुदये रसादिध्वनिसद्भावोऽस्त्येव ।

कारिकां विवृणोति—

शुद्धस्यानपेक्षितव्यङ्ग्यस्यापि वाच्यस्यानन्त्यमेव जायते स्वभावतः । स्वभावोह्ययं वाच्यानां चेतनाचेतनानां यदवस्थाभेदाद् देशभेदात् कालभेदात् स्वालक्षण्यलक्षणभेदाच्चानन्तता भवति । तैश्च तथा व्यवस्थितैः सद्भिः प्रसिद्धानेकस्वभावानुसरणरूपा स्वभावोक्त्याऽपि तावदुपनिबध्यमानैर्निरवधिः काव्यार्थः सम्पद्यते ।

स्वमेव लक्षणं यस्य, स स्वलक्षणस्तस्य भावः स्वालक्षण्यं स्वरूपं, तल्लक्षणभेदात् स्वरूपभेदात् । तथाव्यवस्थितैरवस्थाऽऽदिभेदभिन्नैः । प्रसिद्धा येऽनेके स्वभावा स्तेषामनुसरणमधिगमस्तद्रूपया स्वभावोक्त्या स्वरूपवर्णनयाऽपि, उपनिबध्यमानै स्तैर्वाच्यैः काव्यार्थो निरवधिरनन्तः सम्पद्यते भवतीत्यर्थः ।

अवस्थादिभेदभिन्नवस्तुनैकविधस्वभाववर्णनेनापि काव्यार्थानन्त्यं भवतीति सारम् ।

समासेनोक्तं तमेवार्थं व्यासेनैकैकशो व्यवस्थापयितुकाम उद्देशक्रमेण प्रथममवस्थाभेदप्रयुक्तमर्थानन्त्यं दर्शयति—

तथा ह्यवस्थाभेदान्नवत्वं यथा-भगवती पार्वती कुमारसम्भवे-'सर्वोपमाद्रव्यसमुच्चयेन' इत्यादिभिरुक्तिभिः प्रथममेव परिसमापितरूपवर्णनाऽपि, पुनर्भगवतः शम्भोर्लोचनगोचरमायान्ती—'वसन्तपुष्पाभरणं वहन्ती' इत्यादिमन्मथोपकरणभूतेन भङ्ग्यन्तरेणोपवर्णिता । सैव च पुनर्नवोद्वाहसमये प्रसाध्यमाना-'तां प्राङ्मुखीं तत्र निवेश्य तन्वीम्' इत्याद्युक्तिभिर्नवेनैव प्रकारेण निरूपितसौष्ठवा । न च ते तस्य कवेरेकत्रैवासकृत् कृता वर्णनप्रकाराः पुनरुक्तत्वेन वा ऽनवनवार्थनिर्भरत्वेन वा प्रतिभासन्ते ।

यद्यपि कुमारसम्भवे प्रथमसर्गे—'असम्भृतंमण्डनमङ्गयष्टेः' इत्यादित्रिंशश्लोकतः 'सर्वोपमाद्रव्यसमुच्चयेन' इत्याद्यूनचत्वारिंशश्लोकं यावत् प्रथमं वर्णिता। पुनस्तृतीयसर्गे—'निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन' इत्यादिद्विपञ्चाशच्छ्लोकतः कामकर्तृकशिववशीकरणोपयोगित्वेन रूपेण पञ्चषैः पद्यैर्वर्णिता। पुनरपि सप्तमसर्गे—'तांप्राङ्मुखीं तत्र निवेश्य तन्वीम्' इत्यादि त्रयोदशश्लोकतः परिणयप्रसाधनाङ्गत्वेन वर्णिता, तथाऽपि तद्वर्णनेऽर्थपौनरुक्त्यं मनागपि न प्रतीयते, अवस्थाभेदेन पार्वत्या वर्णनीयाया भेदाद् भिन्नाभिन्नवस्तुवर्णनादितिसारम्।

उक्तमर्थं द्रढयति—

दर्शितमेव चैतद् विषमबाणलीलायाम्—

मयेतिशेषः।

'ण अ ताण घड़इ ओही ण अ ते दीसन्ति कहवि पुणरुत्ता।
जे विब्भमा पिआणं अत्था वा सुकइवाणीणम् ॥१॥'

'नच तेषां घटतेऽवधि र्नच ते दृश्यन्ते पुनरुक्ताः।
ये विभ्रमाः प्रियाणामर्था वा सुकविवाणीनाम् ॥' इतिच्छाया।

ये प्रियाणां प्रेयसीनां विभ्रमाः शृङ्गारचेष्टाः, ये वा सुकविवाणीनामर्थाः सन्ति, तेषामवधिः सीमा न घटते न भवति, ते पुनरुक्ता विभ्रमपक्षे पुनर्विहिताश्च न दृश्यन्ते, किन्तु 'क्षणे क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः ॥' इत्युक्ते र्नवनवा एव प्रतीयन्त इत्यर्थः।

'उपदिशति कामिनीनां यौवनमद एव ललितानि' इत्यादिप्रसिद्धेर्यथा यौवनारम्भे कामिनीनामशिक्षितस्यापि विभ्रमभरस्याविर्भावः, तथैव प्रतिभाप्रकर्षोद्भवे सुकविवाणीनामर्थनिकरस्येति भावः।

पुनः प्रकारान्तरेणावस्थाभेदाद् वस्तुभेदं प्रकाशयति—

अयमपरश्चावस्थाभेदप्रकारो—यदचेतनानां सर्वेषां चेतनं द्वितीयं रूपमभिमानित्वप्रसिद्धं हिमवद्गङ्गाऽऽदीनाम्, तच्चोचितचेतनविषयस्वरूपयोजनयोपनिबध्यमानमन्यदेव सम्पद्यते।

अभिमानित्वेनाभिमानेन प्रसिद्धमाभिमानिकं सङ्कल्पकल्पितं, तदचेतनस्वरूपं चेतनविषयस्य चेतनवृत्तिस्वरूपस्य, उपयोजनयाऽऽरोपणेन, उपनिबध्यमानम्, अन्यदेवापूर्वमेव सम्पद्यत इति सम्बन्धः।

अचेतनेऽपि चेतनस्वरूपारोपादपूर्वत्वं भवतीत्येवमपि वाच्यस्यावस्थाभेदाद् भेद इति तात्पर्यम् ।

उदाहरति—

यथा कुमारसम्भव एव—पर्वतरूपस्य हिमवतो वर्णनम्, पुनः सप्तर्षिप्रियोक्तिषु-चेतनतत्स्वरूपापेक्षया प्रदर्शितं तदपूर्वमेव प्रतिभाति ।

कुमारसम्भवे प्रथमसर्गे प्रारम्भादेव स्थावररूपस्य हिमाचलस्य वर्णनम् । पुनः षष्ठसर्गे सप्तर्षिसमागमसमये—'तानर्घ्यानर्घमादाय दूरात् प्रत्युद्ययौ गिरिः' इत्यादिना तस्यैव चेतनरूपस्य वर्णनं न पुनरुक्तत्वेन प्रतीतमिति नैवासङ्गतम्, हिमाचलस्यैवाभिमानिकरूपान्तरधारणादन्यत्वादित्यभिसन्धिः ।

न चैतदप्रसिद्धमित्याह—

प्रसिद्धश्चायं सत्कवीनां मार्गः ।

चेतनाचेतनावस्थाभेदप्रयुक्तवस्तुभेदवर्णनलक्षणोऽयं मार्गो रीतिः ।

अचेतनानपि तरुलतानगनदीप्रभृतींश्चेतनरूपेण वर्णयन्ति कवय इति प्रसिद्धमेव, न त्वद्भुतमित्याशयः ।

प्रसिद्धिमेव द्रढयति—

इदञ्च प्रस्थानं कविव्युत्पत्तये विषमबाणलीलायां सप्रपञ्चं दर्शितम् ।

प्रस्थानं पद्धतिः । प्रपञ्चो विस्तरः । मयेति पूर्ववच्छेषः ।

पुनरन्यथा चेतनपदार्थानां भेदं दर्शयति—

चेतनानां च बाल्याद्यवस्थाभिरन्यत्वं सत्कवीनां प्रसिद्धमेव ।

प्रबन्ध इति शेषः । पौगण्डकैशोरयौवनप्रौढत्ववार्धक्यान्यादिपदप्रत्येयानि । तेषामावान्तरिकभेदप्रयुक्तभेदं वदन्नानन्त्यमाह—

चेतनानामवस्थाभेदेऽप्यवान्तरावस्थाभेदान्नानात्वम् । यथा—कुमारीणां कुसुमशरभिन्नहृदयानामन्यासां च । तत्रापि विनीतानामविनीतानां च चेतनानाम् । अचेतनानां च भावानामारम्भाद्यवस्थाभेदभिन्नानामेकैकशः स्वरूपमुपनिबध्यमानमानन्त्यमेवोपयाति ।

अन्यासामनुद्भिन्नमदनानाम् । तत्रापि कुमारीणां । मध्येऽपि । विनीतानां कुलशीलवैमल्यसूचकविनयजुषाम् । अविनीतानामुच्छृङ्खलानां पांशुलानाम् । विनीताविनीतत्वे चेतनमात्रवृत्ती आरम्भाद्यवस्थाश्चाचेतनमात्रनिष्ठा इत्यचेतनानामिति

पाठः पश्चान्नीतः। चेतनानां हि पदार्थानां बाल्यादयोऽवस्थाः, अचेतनानान्त्वारम्भादय एव, वयोविशेषाणां चेतनैकवृत्तित्वात्। एकोऽपि पदार्थो यद्यवस्थाऽऽदिभेदप्रयोज्यभेदाश्रयत्वान्नानारूपोऽनन्तरूपो भवितुमर्हति, तदा का कथा सर्वेषामिति ध्वनिगुणीभूतव्यङ्ग्ययोगवद् वाच्ययोगोऽप्यर्थानन्त्यं प्रयोजयतीति स्फुटम्।

उदाहरति—

यथा—

आरम्भावस्थं विसं कश्चिद् वर्णयति—

> 'हंसानां निनदेषु यैः कवलितैरासज्यते कूजता-
> मन्यः कोऽपि कषायकण्ठलुठनादाघर्घरो विभ्रमः।
> ते सम्प्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो,
> निर्याताः कमलाकरेषु विसिनीकन्दाग्रिमग्रन्थयः॥'

यैः कवलितैर्भक्षितैः सद्भिः कर्तृभिः, कूजतां शब्दायमानानां हंसानां, कषाये-मधुरस्वरभृति, कण्ठे, लुठनात् सम्पर्कयोगात्, निनदेषु कूजनेषु, अन्यः पूर्वतो विलक्षणः, कोऽप्यनिर्वचनीयः, आघर्घरः सर्वथा सान्द्रस्त्यानः, विभ्रमो विलासः, आसज्यते योज्यत आधीयत इति यावत्। सम्प्रति वसन्तप्रारम्भावसरे, ते, अकठोरस्य। नवत्वान्मृदुनो वारणवध्वा हस्तिन्या दशनाङ्कुरस्य सद्योनिस्सरद्दशनस्य स्पर्धिनः श्वेतत्वेनाकारादिभिश्च तुल्यकक्षताकारिणः, विसिन्याः कमलिन्याः, कन्दस्य, अग्रिमाः प्रथमाः, ग्रन्थयोऽङ्कुररूपा नूतनप्ररोहाः कमलाकरेषु, निर्याता निर्गता आविर्भूता भवन्तीत्यर्थः।

अत्र हि विसरूपाचेतनपदार्थस्य कविभिरनेकधा वर्णितस्याप्यङ्कुरणात्मकप्रारम्भावस्थाभेदप्रयुक्तभेदेनोपनिवेश्यमानस्यापूर्वत्वम्।

न हि सर्वं कार्त्स्न्येनोदाहर्तुं पार्यत इति दिङ्मात्रमेव दर्शितमित्याह—

एवमन्यत्रापि दिशाऽनयाऽनुसर्तव्यम्।

अनुसर्तव्यमवगन्तव्यं, वस्तूनां नानात्वमिति शेषः।

इत्थमवस्थाभेदप्रयोज्यान पदार्थानां भेदान् प्रदर्श्य, देशभेदप्रयोज्यानपि दर्शयति—

देशभेदान्नानात्वमचेतनानां तावत्—यथा वायूनां नानादिग्देशचारिणाम्, अन्येषामपि सलिलकुसुमादीनां प्रसिद्धमेव। चेतनानामपि मानुषपशुपक्षिप्रभृतीनां ग्रामारण्यसलिलादिसमेधितानां परस्परं महान् विशेषः समुपल-

द्यत एव । स च विविच्य यथायथमुपनिबध्यमानस्तथैवानन्त्यमायाति ।

इदमुच्यते–प्राच्यादयो मलयहिमालयादिभुवश्च वायवः, अङ्गजनपदे तप्तकुण्डस्था उत्तरापथेऽलकनन्दासम्बन्धिन्यश्चापः, सिन्धु–पञ्चनद–गान्धारादिदेश्या नेपालाद्युत्पन्नाश्च ग्राम्या नागरिका आरण्या आप्याश्च चेतनाः, फलपुष्पलताद्रुमप्रभृतयोऽचेतनाश्च पदार्था जात्यैकरूपा अपि व्यवहाराकारादिभिर्विभिन्नरूपा एवेति न परोक्षं प्रेक्षकाणाम् । तथा च देशवैलक्षण्यं तेषां युक्तमेव । इह भट्टबाणश्रीहर्षादिप्रबन्धप्रसिद्धो जलमानुषोऽपि ज्ञेयः । आद्यर्थकेन तावच्छब्देन पश्चाद् व्यङ्ग्ययोगेन वैचित्र्येऽप्यादौ तत्तद्वाच्यवैचित्र्यवशादेव वैचित्र्यमिति सूच्यते । समेधितानां वर्धितानाम् । विशेषो भेदः ।

उपपादयति–

तथा हि–मानुषाणामेव तावद् दिग्देशादिभिन्नानां ये व्यवहारव्यापारादिषु विचित्रा विशेषाः, तेषां केनान्तश्शक्यते गन्तुम् । विशेषतो योषिताम् । उपनिबध्यते च तत्सर्वं सुकविभिर्यथाप्रतिभम् ।

मानुषाणामेव तावदित्यनेन पशुपक्षिप्रभृतीनान्तु तदसन्दिग्धमेवेति सूच्यते । व्यवहाराः शरीरयात्रानिर्वाहिकाः क्रियाः । व्यापारास्तदितराश्चेष्टाप्रभृतयः । यद्वा–'व्याहारव्यापारादिषु' इत्येव पाठः, तथा च व्याहारा उक्तयः, व्यापारास्तद्भिन्नाः क्रियाः । देशभेदेनोक्तिभेदोऽपि प्रसिद्ध एव । अन्तः शक्यते गन्तुमित्यत्र वर्णन इति शेषः । साकल्येन तेषां वर्णनमशक्यमेवेति तत्सारम् । यथा स्त्रीणां यौवने सत्त्वजायलङ्काररूपा विभ्रमाः–'प्रतिक्षणविलक्षणं किमपि चेष्टितं सुभ्रुवः' इत्यादिप्रसिद्धैर्विचित्राः, न तथा पुंसामिति 'विशेषतो योषिताम्' इत्युक्तम् । चकारः पुनरर्थकः । सुकविभिः पुनस्तत्सर्वं स्वप्रतिभाऽनुसारमुपनिबध्यते । न चैवं पूर्वापरोक्तिविरोधः, अतउक्तं–यथाप्रतिभमिति ।

अथ कालभेदादपि वस्तुभेदं दर्शयति—

कालभेदाच्च नानात्वं–यथर्तुभेदाद् दिग्व्योमसलिलादीनामचेतनानाम् । चेतनानां चौत्सुक्यादयः कालविशेषाश्रयिणः प्रसिद्धा एव ।

दिशां व्योम्नश्च शरदि स्वच्छता, वर्षासु पयोदाच्छन्नत्वम् , शिशिरे तुषारावृतत्वम् । इत्थं सलिलसरणि–तरुलताप्रभृतिष्वचेतनेषु कालभेदाद्भेद ऊहनीयः। चेतनानामपि वसन्ते मदनौत्सुक्यम्, ग्रीष्मे सन्तप्तता, शिशिरे जाड्यमिति भेदःस्वयमूह्यः

अन्ते पदार्थानां स्वरूपभेदप्रयुक्तं भेदं दर्शयति—

स्वालक्षण्यभेदाच्च सकलजगद्गतानां वस्तूनां विनिबन्धनमविगीतमेव। तच्च यथाऽवस्थितमपि तावदुपनिबध्यमानमनन्ततामेव काव्यार्थस्यापादयति।

स्वालक्षण्यं स्वरूपं तद्व्यक्तित्वमिति यावत्। अविगीतमनिन्दितमुचितमित्यनर्थान्तरम्। यथाऽवस्थितं तत्तदवस्थाविशिष्टं स्वभावानुरूपं वा।

स्वभावभेदेन भिन्नानामपि पदार्थानां वर्णनेन काव्यार्थानन्त्यं भवत्येवेति सारम्।

इदानीं वाच्यार्थानामित्थं नानात्वेन काव्यार्थानन्त्यमस्वीकुर्वतां मतमपाकर्तुमुपन्यस्यति—

अत्र केचिदाचक्षीरन्–यथा सामान्यात्मना वस्तूनि वाच्यतां प्रतिपद्यन्ते, न विशेषात्मना। तानि हि स्वयमनुभूतानां सुखादीनां तन्निमित्तानां च स्वरूपमन्यत्रारोपयद्भिः स्वपरानुभूतसामान्यमात्राश्रयेणोपनिबध्यन्ते कविभिः। न हि तैरतीतमनागतं वर्तमानं च परचित्तादिस्वलक्षणं योगिभिरिव प्रत्यक्षीक्रियते। तच्चानुभाव्यानुभावकसामान्यं सर्वप्रतिपत्तृसाधारणं परिमितत्वात् पुरातनानामेव गोचरीभूतम्। तथाऽस्य विषयस्यानुपपत्तेः। अत एव स प्रकारविशेषो यैरद्यतनैरभिनवत्वेन प्रतीयते, तेषां भ्रममात्रमेव। भणितिकृतं वैचित्र्यमात्रमत्रास्तीति।

आचक्षीरन्निति लिङः प्राग्वत् तत्प्रतिपाद्यानां सम्भावनामात्रविषयत्वेनासत्त्वस्य, बहुवचनस्य च विप्रतिपन्नबहुलतायाश्च प्रकाशकत्वम्। यथेत्याख्यानस्याख्येयस्य वा प्रकारं परामृशत् तथेत्यनेनान्वेति। तानि वस्तूनि। तन्निमित्तानां सुखाद्युपभोगसाधनानां स्रक्चन्दनादीनाम्। चकारः समुच्चयार्थः। स्वेनपरैश्चानुभूतानां (वस्तूनां) यत् सामान्यं तन्मात्रस्य विशेषशून्यसामान्यस्याश्रयेण वर्णनीयतयाऽवलम्बनेन। नहीति प्रत्यक्षीक्रियत इत्यनेनान्वेति। तैः कविभिः। अतीतं भूतम्, अनागतं भविष्यत्। परचित्तादिस्वलक्षणं परकीयचित्तप्रभृतिस्वरूपम्। अनुभवितुं योग्यमनुभाव्यं सुखादि, अनुभावयतीत्यनुभावकं तत्साधनीभूतं वस्तु। सर्वप्रतिपत्तृसाधारणमखिलज्ञातृबुद्धिविषयीभूतम्। तत्र निमित्तं परिच्छिन्नत्वलक्षणं परिमितत्वम्। पुरातनानां वाल्मीकिप्रभृतीनाम्। गोचरीभूतं धिय इति शेषः। तथा तेन प्रकारेण सामान्यस्यावगतचरत्वेनास्य विषयस्य काव्यार्थनवनवीभावस्य।

अतएव—अर्थसामान्यस्य प्राचीनवर्णितपूर्वत्वादेव । स वाच्यानन्त्यरूपः । भणितिकृतमुक्तिजनितं वैचित्र्यमात्रं केवलं तदेव ।

यथा योगिनां योगजसन्निकर्षेण लोकप्रत्यक्षागोचरस्यापि परकीयचित्तादिवस्तुनः प्रत्यक्षीकरणसामर्थ्यं, न तथा कवीनाम्, येन ते भूतान् वर्तमानान् भविष्यतश्च पदार्थान् साकल्येन तत्तद्विशेषाकारेण प्रत्यक्षीकर्तुं शक्नुयुः । तस्मात् कवीनां सामन्याकारेणैव कथंचित् त्रैकालिकपदार्थावगम इति निश्चितम् । तथा सति मुष्टिमेयं तत् पदार्थसामान्यं बाल्मीकिप्रभृतिप्राचीनकविभिरध्यक्षीकृतमेवेति नाक्षुण्णम्* । तस्मादिदानीन्तनकविकाव्यार्थानन्त्याय तत् कथं कल्पेत । किन्तु यथा माल्यं पुष्पाणामनिर्मातुरपि मालाकारस्य गुम्फनपाटवं किञ्चित् प्रकटयत्येव, तथा तदपि नूतनकवेरुक्तिवैचित्र्यघटनकौशलं किञ्चित् प्रकाशयेत्, नतूक्तरूपं नवनवीभविम् । ततश्च स्वालक्षण्यभेदप्रयोज्यवस्तुभेदः काव्यार्थानन्त्यप्रयोजक इति रिक्तं वच इत्ययमभिसन्धिः शङ्काकृताम् ।

समादधाति—

तत्रोच्यते—यदि सामान्याश्रयेण काव्यप्रवृत्तिः, तत्प्रदर्शितप्रकारं काव्यवैचित्र्य मवस्थाऽऽदिविशेषात् किं पुनरुक्तमेवास्तु ? । न चेत् तथा, तत्कथं न काव्यानन्त्यम् ।

किंशब्दः पौनरुक्त्यस्य प्रमाणापरिगृहीतत्वेनास्वीकरणीयतां सूचयति । नहि सामान्याकारेणैव पदार्थग्रहः, अपि तु यत्किञ्चिद्विशेषाकारेणापि । अतएव वाल्मीक्यादिकाव्ये सत्यपि कालिदासादिकाव्यानामर्थवैचित्र्यं दुरपह्नवमनुभूयत एवेत्युत्तरयितुराशयः ।

तदेवानूद्य खण्डयति—

यत्तूक्तम्—'सामान्यमात्राश्रयेण काव्यप्रवृत्तिः, तस्य च परिमितत्वेन प्रागेव गोचरीकृतत्वान्नास्ति नवत्वं काव्यवस्तूनामिति । तदयुक्तम्—यतो यदि सामान्यमात्रमाश्रित्य काव्यं प्रवर्तते, किंकृतस्तर्हि महाकविनिबध्यमानानां काव्यानामतिशयः ?

अतिशय उत्कर्षो विशेष इति यावत् ।

स च सकलसहृदयहृदयगोचरतयाऽपलपितुमशक्योऽतिशयो विशेषाश्रयेणापि काव्यप्रवृत्तिं प्रमाणयतीति तात्पर्यम् ।

ननु तेन काक्षतिरित्यतआह—

एवं वा वाल्मीकिव्यतिरिक्तस्यान्यस्य कवि (जनस्य कृते व्यर्थत्वापातः)।

वाशब्दश्चकारार्थकः । 'एवं वा' इति सन्दर्भशुद्ध्यनुरोधेन पूर्ववाक्यएवोत्तरवाक्यादपकृष्टम्, उत्तरवाक्ये तस्यानपेक्षणादत्रापेक्षितत्वाच्च । एवं प्रकोष्ठान्तर्गतः पाठश्चोहितएव ।

अन्यकविकृते व्यर्थत्वापाते हेतुमाचष्टे—

सामान्यव्यतिक्तस्यान्यस्य काव्यार्थस्याभावात्, सामान्यस्य चातिकविनैव प्रदर्शितत्वात् ।

चकारस्त्वर्थकः । वाल्मीकिना सर्वमर्थसामान्यं हि वर्णितमेवेति पुनस्तद्वर्णनमर्वाचीनानां चर्वितचर्वणमेवेति—तत्काव्यानर्थक्याय कल्पेत, तस्मादर्थविशेषेणापिकाव्यप्रवृत्तिरवश्यं स्वीकरणीया, नत्वर्थसामान्यमात्रेणेत्याकूतम् ।

ननूक्तमाल्यतुल्यन्यायेनोक्तिवैचित्र्यमात्रेण नवीनकविकृतेश्चमत्कारिता स्यादेवेति शङ्कामुपपादनेन निराकरोति—

उक्तिवैचित्र्यान्नैष दोष इति चेत्, किमिदमुक्तिवैचित्र्यम् ? उक्तिर्हि वाच्यविशेषप्रतिपादनवचनम्, तद्वैचित्र्ये कथं न वाच्यवैचित्र्यम् ? वाच्यवाचकयोरविनाभावेन प्रवृत्तेः । वाच्यानां च काव्ये प्रतिभासमानानां यद्रूपं, तत्तु ग्राह्यविशेषाभेदेनैव प्रतीयते । तेनोक्तिवैचित्र्यवादिना वाच्यवैचित्र्यमनिच्छताऽप्यवश्यमभ्युपगन्तव्यम् ।

प्रतिपाद्यते बोध्यतेऽनेनेति प्रतिपादनं, तादृशं च तद्वचनमितिकर्मधारयः । तद्वैचित्र्येण वाचकात्मिकाया उक्ते वैचित्र्येण । अविनाभावेन प्रवृत्तेश्शब्दार्थयोस्तादात्म्येन शब्दं विनाऽर्थस्यासत्त्वात् । ग्राह्यः प्रत्यक्षादिप्रमाणै र्निर्णीततया बोध्यो यो विशेषः सामान्यातिरिक्तउक्तस्वरूप स्तस्य योऽभेदस्तादात्म्यं, तेनैव काव्ये वाच्यं वाच्यसामान्यं प्रतीयत इति सम्बन्धः । तेनेत्यादिना फलितकथनम् ।

इदमुच्यते—नह्युक्तिवैचित्र्यमात्रेणार्वाचीनकविकाव्यानामपूर्वत्वम्, वाच्यवाचकयोरभेदेन वाचकवैचित्र्यस्थले वाच्यवैचित्र्यस्याप्यवश्यम्भावेन प्रतिनियतवाच्यवैचित्र्यस्यैव तदपूर्वतामूलत्वेनाभ्युपगन्तुमौचित्यात्, केवलवाचकवैचित्र्यस्य त्वसम्भवात्, सम्भवेऽपि तदपेक्षयाऽकिञ्चित्करत्वाच्च । किञ्च काव्यघटकपदानां वाच्य-

सामान्ये शक्तावपि सामान्यविशेषयो रुक्तरीत्या तादात्म्याद् विशेषप्रत्यायकता ऽस्त्येवेति न प्रकृतेऽनुपपत्तिरिति विभावनीयम् ।

पर्यवसितं समासेनोपदिशति—

तदयमत्र सङ्क्षेपः—'वाल्मीकिव्यतिरिक्तस्य यद्येकस्यापि कस्यचित् ।
इष्यते प्रतिभाऽऽनन्त्यं तत्तदाऽऽनन्त्यमक्षतम् ॥'

यदि वाल्मीकेर्व्यतिरिक्तस्य भिन्नस्य, कस्यचिदेकस्यापि कवेः, प्रतिभायास्तत्प्रयोज्यवर्णनविषयार्थसम्पत्ते रानन्त्यमनवधित्वम्, इष्यतेऽभिलष्यते । तत्तदा तदानन्त्यं सर्वेषां नूतनकवीनामर्थनिष्ठमानन्त्यम्, अक्षतं नियतमित्यर्थः । तुल्यन्यायादन्येषामपि कवीनां तदानन्त्यं मन्तव्यमेव भवेदितिभावः ।

परपक्षमभ्युपगम्यापि स्वपक्षं स्थापयति—

किञ्च—उक्तिवैचित्र्यं यत् काव्यनवत्वेन निबन्धनमुच्यते, तदस्मत्पक्षानुगुणमेव, यतो यावानयं काव्यानन्त्यभेदहेतुः प्रकारः प्राग्दर्शितः, स सर्व एव पुनरुक्तिवैचित्र्याद् द्विगुणतामापद्यते ।

'काव्यनवत्वे निबन्धनम्' इति पाठनीयम्, यथाश्रुते तु तृतीयाऽर्थस्यानन्वयो दुष्परिहरः । एवं 'काव्यानन्तभेदहेतुः' इति 'काव्यभेदानन्त्यहेतुः' इति वा सुपठम्, आनन्त्य-भेदयोरभेदेनान्वयासम्भवात् । अभिनिवेशे तु-काव्यानां तत्प्रतिपाद्यार्थानां चानन्त्ये भेदे च हेतुरवस्थाभेदादिरिति द्वन्द्वगर्भतत्पुरुषेण कथंचिद्योजनीयम् ।

अवस्थाऽऽदिभेदै भिन्ना अपि काव्यार्थाउक्तिवैचित्र्यसहकारेण विपुलीभवन्तो नितरां शोभन्ते, शब्दार्थयो द्वयोरपि चमत्कारित्वात् । अत्रैव कुन्तलसिद्धान्तोऽन्तर्भवतीति बोध्यम् ।

उक्तिवैचित्र्यस्यार्थानन्त्यहेतुतां समर्थयति—

यश्चायमुपमाश्लेषादिरलङ्कारमार्गः प्रसिद्धः, स भणितिवैचित्र्यादुपनिबध्यमानः स्वयमेवानवधिर्धत्ते शतशाखताम् ।

भणितिरुक्तिः । अनवधिर्निस्सीमः, अलङ्काराणां संसृष्टिसङ्करयोगेनामितप्रकारत्वात् । शतशाखतामनन्तप्रकारताम् ।

उपमाप्रभृतयो येऽमी वाच्यलङ्कारा स्ते स्वतोविविधाकाराअपि, भणितिवैचित्र्येणोपादीयमाना अनन्तप्रकारान् भजन्ति । तथाहि—एकमेवोपमानं निभप्रतिमप्रतिबिम्बतुल्यसमानसदृशाभासनीकाशसब्रह्मचारिसोदरप्रतिच्छायादिभि रनेकाभि भणि-

तिभि र्विचित्राभि रुपादीयमानं विचित्रतां प्राप्नोतीति स्फुटमेवोक्तिवैचित्र्यस्यालङ्कारवैचित्र्यसम्पादनद्वारकार्थवैचित्र्यसम्पाकत्वम् ।

पुनरपरथा तदेव दर्शयति—

भणितिश्च भाषाभेदेन व्यवस्थिता सती, प्रतिनियतभाषागोचरार्थवैचित्र्यनिबन्धनं पुनरपरं काव्यार्थानामानन्त्यमापादयति ।

भाषाभेदेन व्यवस्थिता विभिन्ना सती भणितिश्च पुनः कर्त्री प्रतिनियताया स्तत्तया निश्चिताया भाषाया गोचरेण तज्जन्यबोधविषयीभूतेन वाच्येन कृतं सम्पादितं वैचित्र्यमेव निबन्धनं निमित्तं यस्य, तादृशं पुनरपरं काव्यार्थानामानन्त्यं कर्मीभूतमापादयति करोतीत्यर्थः ।

प्रतिभाषं खलु भिन्नभिन्नतया विचित्रैव भवति भणितिरिति प्रसिद्धमेव । तच्च भणितिवैचित्र्यमर्थवैचित्र्यस्यापि बोधद्वारा निमित्तीभवत् सत् काव्येऽलङ्काराणां तदितरार्थानां चानन्त्यं सम्पादयतीतिसारम् ।

सन्दर्भसङ्गतये 'कथाभेदेन' इति पाठं विहाय 'भाषाभेदेन' इति पाठोऽङ्गीकृतः ।

तदेवोदाहरति—

यथा ममैव—

'महमह इन्ति भणिन्तउ वच्चइ कालो जणस्स तेइ ॥
ण देओ जाणद्दणो गाअरो होदि मणसो महुमहणो ॥'

'मम ममेति भणतो व्रजति कालोजनस्य तथाऽपि ॥
न देवो जनार्दनो गोचरो भवति मनसो मधुमथनः ॥' इति च्छाया ।

यद्यपि मम जनार्दनोममजनार्दन इति भणतः कथयतो जनस्य कालो व्रजति निर्गच्छति, तथाऽपि देवो भगवान् मधुमथनो मधुसूदनो जनार्दनः तस्य मनसो गोचरो बुद्धिविषयो न भवतीत्याश्चर्यमित्यर्थः ।

इहानुपलं मम ममेति भणतोऽपि जनार्दनः कथं बुद्धिविषयो न भवतीतिप्रतीयमानां विरोधालङ्कारच्छायां 'महमह' इति सैन्धवभाषामयी भणितिर्विचित्रीकरोतीति भाषाभेदविभिन्नभणितिवैचित्र्यस्यालङ्कारार्थवैचित्र्यसम्पादकत्वं व्यक्तम् ।

अस्फुटेयं गाथा कथिता कैश्चित् । अस्माभिः पुनर्लोचनदर्शितच्छायाऽनुसारं कथंचित् स्फुटीकृता ।

उपसंहरति—

इत्थं यथा यथा निरूप्यते, तथा तथा न लभ्यतेऽन्तः काव्यार्थानाम् ।

इत्थमनया रीत्या, यथा यथा येन येनावस्थाभेदभिन्नत्वादिना प्रकारेण निरूप्यते, तथा तथा काव्यार्थानां काव्याभिधेयानामन्तो न लभ्यते, किन्तु काव्यार्था अनन्ता एव भवन्तीत्यर्थः ।

वीप्साद्वयेन प्रकाराणां बाहुल्यमर्थानां च नियमेनानन्त्यमिति सूच्यते ।

किं तर्हि वाच्यवैचित्र्यमेव मुख्यम् ? इत्यत आह—

इदन्तूच्यते—

'अवस्थाऽऽदिविभिन्नानां वाच्यार्थानां निबन्धनम् ।'

व्याख्यास्यतेऽनुपदमिदं पूर्णायां कारिकायाम् ।

किमिदमवस्थाऽऽदिविभिन्नत्वमित्याकाङ्क्षायामन्तरैवाभिधत्ते वृत्तिकारः—

यत् प्रदर्शितं प्राक् ।

'अवस्थादेशकालादिविशेषैः' इत्यादिकारिकयाऽत्रैवोद्द्योते ।

कारिकां पूरयति—

'भूम्नैव दृश्यते लक्ष्ये न तच्छक्यमपोहितुम् ॥११२॥'

अवस्थाऽऽदिभिः प्रागुक्तैर्विभिन्नानां वाच्यार्थानां निबन्धनं योजनं लक्ष्ये भूम्ना बाहुल्येनैव दृश्यते, तस्माद् बहुलप्रचारं तत् तादृशार्थनिबन्धनम्, अपोहितुं पृथक् कर्तुं न शक्यमित्यर्थः ।

एतेन, अवतरणवाक्यघटकतुशब्दद्योत्यारुचिनिदानमस्यानुपादेयत्वं व्यक्तीकृतम्, तत्तु समीचीनं नास्ति, किन्त्वशक्यापोहमिति कथञ्चिन्मृष्यत इति कारिकातात्पर्यावधारणात् ।

तत्सम्यक्त्वाय क उपायः ? इति जिज्ञासायामाचष्टे—

तत्तु भातिरसाश्रयात् ।

तुशब्दोऽप्यर्थकः । तदपि तादृशवाच्यनिबन्धनमपि रसाश्रयाद्रसव्यञ्जनाद् भाति छायामासादयतीत्यर्थः । एतच्च कारिकातुरीयचरणतात्पर्यगोचरीभूतम् ।

उपसंहरन्नुक्तार्थं द्रढयति—

तदिदमत्र सङ्क्षेपेणाभिधीयते सत्कवीनामुपदेशाय—

तेन न पौनरुक्त्याक्षेपः सम्भवति ।

'रसभावादिसम्बद्धा यथौचित्यानुसारिणी ।

अन्वीयतेवस्तुगति र्देशकालादिभेदिनी ॥ ११३ ॥'

अस्या अग्रिमकारिकया सहैकवाक्यतयैव वाक्यार्थबोध इति तत्रैव व्याख्यास्यामः ।

कारिकाद्वयानुषक्तमनुक्तमंशं वृत्तिकृदाह—

का गणना कवीनामन्येषां परिमितशक्तीनाम् ?—

'वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः ।

निबद्धाऽपि क्षयं नैति प्रकृतिर्जगतामिव ॥ ११४ ॥'

यदि रसभावादिसम्बद्धा रसादव्यञ्जिका, औचित्यानुसारिणी—औचित्येन निबद्धा, देशकालादिभेदेन भिन्ना, वस्तुगतिर्विपुलीभूता वाच्यततिः, अन्वीयते कविभिरुपनिवेश्यते, तदा परिमितशक्तीनामल्पप्रतिभाजुषामाधुनिककवीनां का गणना ?, वाचस्पतेः स्वयं बृहस्पतेः सहस्राणां सहस्रैरपि यत्नतः प्रयात्नान्निबद्धाऽपि सा, जगतां प्रकृतिरिव वैभवी विश्वविरचनशक्तिरिव, क्षयमवसानं नैति न प्राप्नोतीत्यर्थः ।

तादृशवस्तुनिबन्धनेऽर्थानन्त्यं भवत्येवेति तत्र रसादिसम्बन्ध औचित्यानुरोधश्च नितरामपेक्ष्य इत्यभिसन्धिः ।

इह सहस्रशब्दाद् बहुवचनस्य प्रयोगे—'विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः' इत्यनुशासनविरोधपरिहारोपायश्चिन्तनीयः ।

विवृणोति वृत्तिकारः—

यथा हि—जगत्प्रकृतिरतीतकल्पपरम्पराऽऽविर्भूतविचित्रवस्तुप्रपञ्चा सती, पुनरिदानीं परिक्षीणा पदार्थनिर्माणशक्तिरिति न शक्यतेऽभिधातुम्, तद्वदेवेयं काव्यस्थितिरनन्ताभिः कविमतिभिरुपभुक्ताऽपि, नेदानीं परिहीयते, प्रत्युत नवनवाभिर्व्युत्पत्तिभिः परिवर्धते ।

प्रकृतिः प्रधानाख्या सत्त्वरजस्तमसां साम्यावस्था, ऐशी शक्तिर्वा । अतीता विगताः याः कल्पानां संवर्तानां परम्पराः, ताभिस्तासु वाऽऽविर्भूतः प्रकटित उत्पन्नो वा, विचित्रो नैकविधो वस्तूनां पदार्थानां प्रपञ्चो विस्तरो यत्र तादृशी । काव्यानां स्थितिर्मर्यादाऽर्थपरम्परेति यावत् । उपभुक्ता निर्माणोपयोगित्वेन गोचरीकृता ।

ननु तर्हि क्वचित् कविद्वयरचनयोः संवादो दृश्यमानः कथमुपपद्यतामित्यत आह—

इत्थं स्थितेऽपि—

'संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम् ॥'

द्वितीयार्धेनैकवाक्यतया व्याख्यास्यते ।

वृत्तिकृत् कारिकाऽनुक्तमप्यपेक्षितमंशमाचष्टे—

स्थितं ह्येतत्—संवादिन्यो मेधाविनां बुद्धयः ।

मेधाविनां सुबुद्धीनां बुद्धयः संवादिन्यः समानविषयकपरामर्शभाजो भवन्तीत्येतद्धि स्थितं निर्णीतमित्यर्थः ।

विशेषमभिधातुं कारिकोत्तरार्धमवतारयति—

किन्तु—

'नैकरूपतया सर्वे ते मन्तव्या विपश्चिता ॥ ११५ ॥'

सुमेधसां कवीनां काव्ये संवादाइतरसादृश्यरूपास्तु बाहुल्येन भवन्त्येवेति न चित्रम् । यतो मेधाविनां बुद्धयः संवादिन्यो भवन्ति । किन्तु ते सर्वे संवादा एकरूपतया-एकाकारत्वेन विपश्चिता विदुषा न मन्तव्या इत्यर्थः ।

अज्ञातपरस्पररचनमपि विलक्षणप्रातिभं कविद्वयमेकविषयं विवर्णयिषु कदाचित् सदृशमेव काव्यं रचयेदिति नाश्चर्यम् । किन्तु तत्सादृश्यं वक्ष्यमाणक्रमेण नानाविधमिति तत्र सर्वे प्रकारा नैकरूपा न च मर्षणीया वा भवन्तीति तात्पर्यम् ।

कुतस्ते संवादा ऐकरूप्येण न मान्या इत्याशङ्क्य, तत्स्वरूपव्याक्रिययैव समाधातुं कारिकामवतारयति —

कथमिति चेत् ?—

संवादस्वरूप-प्रकारान्निरूपयति—

'संवादो ह्यन्यसादृश्यं, तत् पुनः प्रतिबिम्बवत् ।
आलेख्याकारवत् तुल्यदेहिवच्च शरीरिणाम् ॥ ११६ ॥

अन्येन काव्यार्थेन सादृश्यं समानाकारत्वं काव्यार्थस्य संवाद इत्युच्यते । तदन्यसादृश्यं काव्यार्थस्य पुनः शरीरिणां जीवानां प्रतिबिम्बवद् दर्पणपतितप्रतिच्छायतुल्यमेकम्, तेषामालेख्यं भित्त्यादौ लिखितं चित्रं, तत्प्रख्यं तत्सदृशं पुनर्द्वितीयम्, तेषामेव तुल्यः स्वसदृशोऽन्यो यो देही, तद्वच्च तृतीयमिति त्रिविधं भवतीत्यर्थः ।

प्रथमचरणेन लक्षणम्, तदितरचरणैस्तु विभागोऽत्र प्रतिपाद्यते। शरीरिणामित्यस्य प्रतिवाक्यं सम्बन्धः।

यथा हि—देहिनां दर्पणादिपतितप्रतिबिम्बे, भित्त्यादिलिखितचित्रे, समानाकारकव्यक्त्यन्तरे च सादृश्यं त्रिविधं भवति, तथैव काव्यार्थानामिति सारम्।

तदाह—

संवादो हि काव्यार्थस्योच्यते यदन्येन काव्यवस्तुना सादृश्यम्। तत् पुनः शरीरिणां प्रतिबिम्बवदालेख्याकारवत् तुल्यदेहिवच्च त्रिधा व्यवस्थितम्। किञ्चिद्धि काव्यवस्तु वस्त्वन्तरस्य शरीरिणः प्रतिबिम्बः प्रतिबिम्बकल्पम्, अन्यदालेख्यप्रख्यम्, अन्यत् तुल्येन शरीरिणा सदृशम्।

नन्वेतेनोक्तशङ्कायाः समाधिः कथमिति जिज्ञासायामाख्याति—

'तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम्।
तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः॥ ११७॥'

कविः—तत्र तेष्वन्यसादृश्येषु पूर्वं प्रथमं प्रतिबिम्बतुल्यम्, अविद्यमानोऽन्यः पूर्वनिबद्धातिरिक्त आत्मा स्वरूपं यस्य तादृशं यद् भवति, तत्परिहरेदिति शेषः। तदनन्तरं द्वितीयमालेख्यप्रख्यं यत् तुच्छः शून्य आत्मा यस्य तथाविधम् भवति, तदपि परिहरेदेव, असत्त्वात्। तृतीयं तु पुनस्तुल्यदेहिवत् प्रसिद्धिः काव्येषु प्रख्यात आत्मा यस्य तादृग् यद् भवति, तदन्यसाम्यं सादृश्यं कमनीयतया प्रसिद्धत्वान्न त्यजेन्न परिहरेदित्यर्थः।

तदाह—

तत्र पूर्वं प्रतिबिम्बकल्पं काव्यवस्तु परिहर्तव्यं सुमतिना, यत स्तदनन्यात्म तात्त्विकशरीरशून्यम्। तदनन्तर मालेख्यप्रख्यमन्यसाम्यं शरीरान्तरयुक्तमपि, तुच्छात्मत्वेन त्यक्तव्यम्। तृतीयं तु कमनीयं शरीरसद्भावे सति ससंवादमपि काव्यवस्तु न त्यक्तव्यं कविना। नहि शरीरी शरीरिणाऽन्येन सदृशोऽप्येक एवेति शक्यते वक्तुम्।

प्रतिबिम्बं हि च्छायामात्रं वास्तविकाकारशून्यत्वादसत्। आलेख्यमपि तुरगाद्यनुकार्यमात्रबुद्धिकृत्, न तु रञ्जनसाधनीभूतद्रव्यप्रत्यायक मित्यसदेव। अन्यदेहिसादृश्यं तु सदृशयोरपि द्वयोःसर्वथैक्यप्रतीतेरप्रसिद्धेःकमनीयतमत्वाच्च सत्स्वरूपं नैव त्यक्तव्यमित्यर्थः।

संवादविभागनिरूपणेनामुना कुतो न संवादाना मैकरूप्यमिति शङ्का निरस्ता ।

कारिकाऽन्तरमवतारयति—

एतदेवोपपादयितुमुच्यते—

एतत् तृतीयसंवादस्यात्याज्यत्वम् ।

'तत्त्वस्यान्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ॥

वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम् ॥ ११८ ॥'

अन्यस्य प्रसिद्धवाच्यादिविलक्षणस्य, तत्त्वस्य व्यङ्ग्यरसादिरूपस्य सारतयाऽऽत्मनः सद्भावे सति, पूर्वस्थितेः प्राचीनकविवर्णितार्थततेः, अनुयायि तुल्यमपि, वस्तु नवीनकविकाव्यप्रतिपाद्यं, सारभूतलावण्यसद्भावे, तन्व्या ललनायाः, शशिच्छायं चन्द्रकान्ति, आननमिव भातितराम्, न तु पौनरुक्त्येन दुष्टं प्रतीतं भवतीत्यर्थः ।

यथा हि ललनाया मुखं चन्द्रतुल्यमपि सारभूतलावण्यसद्भावेन नितरां शोभत एव, न तु तुच्छतया प्रतीतं भवति, तथैव प्राचीनकाव्यार्थसंवादभागपि नवीनकाव्यप्रतिपाद्यार्थो रसादिव्यङ्ग्यसद्भावेन शोभत एव, नतु पुनरुक्तत्वेन प्रतीतं भवतीति सारम् ।

तदाह—

तत्त्वस्य सारभूतस्यात्मनः सद्भावे ऽन्यस्य, पूर्वस्थित्यनुयाय्यपि वस्तु, भातितराम् । पुराणरमणीयच्छायाऽनुगृहीतं हि वस्तु शरीरवत् परां शोभां पुष्यति, न तु पुनरुक्तत्वेनावभासते । तन्व्याः शशिच्छायमिवाननम् ।

इत्थं वाक्यार्थसादृश्येषु ग्राह्याग्राह्यविवेकं विधाय पदार्थसादृश्ये ग्राह्यत्वं वक्तुं कारिकामवतारयति—

एवं तावत् ससंवादानां वाक्यवेदितानां काव्यार्थानां विभक्ताः सीमानः । पदार्थरूपाणां च वस्त्वन्तरसदृशानां काव्यवस्तूनां नास्त्येव दोष इति प्रतिपादयितुमुच्यते—

संवादेनेतरसादृश्येन सहिताः ससंवादा स्तेषाम् । वाक्येन वेदितानां बोधितानां वाक्यार्थानामिति यावत् । सीमानोऽवधयः । दोषः पूर्वसम्वादात् पौनरुक्त्यलक्षणः ।

'अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी ॥
नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति॥१६॥'

यत्र यस्मिन् प्रबन्धे, नूतने प्रत्यग्रतयाऽभिरामे, काव्यवस्तुनि काव्यार्थे, स्फुरति विराजति सति, अक्षराणां वर्णानाम्, आदिशब्दात् पदानां च या रचना, सेव, पुरातनी प्राचीनकविपरम्परानिबद्धा, वस्तुरचना पदार्थरचना, योज्यते निबध्यते, सा तादृशवस्तुरचना, न दुष्यति नैव दुष्टा भवतीत्यर्थः।

तदेव विशदीकरोति वृत्तिकारः—

नहि वाचस्पतिनाऽप्यक्षराणि पदानि वा कानिचिदपूर्वाणि घटयितुं शक्यन्ते। तानि तान्येवोपनिबद्धानि न काव्यादिषु नवतां विरुध्यन्ति, तथैव पदार्थरूपाणि श्लेषादिमयान्यर्थतत्त्वानि।

अपूर्वाणि प्रसिद्धेभ्योऽकारादिवर्णेभ्यो घटादिपदेभ्यो वाऽन्यानि स्वोपात्तरूपाणि। तानि तानि पूर्वप्रसिद्धानि। नवतां तेषामपूर्वत्वं न विरुध्यन्ति नैव प्रतिबध्नन्ति दैवादिकरुधधातोरूपमिदम्। पदार्थरूपाण्यपूर्वाणि न घटयितुं शक्यन्त इति पूर्ववत्सम्बन्धः। श्लेषादिमयानीति स्वरूपे प्राचुर्ये वा मयट्। अर्थतत्त्वान्यर्थाः।

यथा विदुषां प्रधानतमेनापि बृहस्पतिना ऽक्षराणि पदानि वा ऽपूर्वाणि वाक्ये योजयितुं न कथमपि प्रभूयते, किमु वक्तव्यमाधुनिकानां बुधानाम्?, तथैवेदानीन्तनैः कविभिरपि प्राचीनकविपरम्परयाऽस्पृष्टान् पदार्थान् स्वकाव्ये सन्निवेशयितुं न क्षम्यते। तथाहि—श्लेषघटनाय गुण–बाण–शिलीमुख–हरि–कौशिक–विष कमल–तेजो–द्विजादिशब्दाः प्राचीनैः प्रयुक्ताएव प्रयुज्यन्ते। मुखस्य चन्द्रकमलाभ्यां, स्तनयो र्गिरिकलशाभ्यां, केशानां कलापतिमिराभ्यां सहोपमानोपमेयभावश्च पूर्वप्रसिद्ध एवोपनिबध्यते। तावताऽपि तेषामपूर्वत्वंतु न व्याहन्यते, यतस्तत्र काव्यार्थवैचित्र्यनिदानं रसादिव्यङ्ग्यं स्फुरति। यत्र तु न भवति तत्स्फुरणम्, तत्रापूर्वत्वं तेषां व्याहन्यत एवेत्याशयः।

उपसंहरति—

तस्मात्—

उक्तहेतोः।

'यदपि तदपि रम्यं यत्र लोकस्य किञ्चित्,
स्फुरितमिदमितीयं बुद्धिरभ्युज्जिहीते ।
अनुगतमपि पूर्वच्छायया वस्तु तादृक्,
सुकविरुपनिबध्नन् निन्द्यतां नोपयाति ॥ १२० ॥

यत्र यस्मिन् काव्यवस्तुनि काव्यार्थे यद्विषयिकेति यावत्, लोकस्य सहृदयसमुदयस्य, स्फुरितं स्फुरणं 'नवीनार्थविजृम्भणमिदम्' इतीयमिदमाकारा, बुद्धि श्चमत्कृतिर्संवित्, अभ्युज्जिहीत उत्पद्यते । तादृक् यदपि तदपियत् किञ्चिदपि विशेषेणाविविक्तमपि, रम्यं रमणीयं विवक्षितव्यङ्ग्यप्रकाशकत्वेन सुन्दरम्, वस्त्वर्थतत्त्वं, पूर्वच्छायया दर्शितक्रमेण प्राचीनकविवर्णितार्थसदृशतया, अनुगतं युक्तमपि, उपनिबध्नन् स्वप्रबन्धे योजयन् सुकविः, निन्द्यतामुपहसनीयतां, नोपयाति न प्राप्नोतीत्यर्थः ।

चमत्कृतिमूलभूतविवक्षितव्यङ्ग्यप्रकाशनसामर्थ्यसद्भावे पूर्वानुसारि पदार्थतत्त्वमपि प्रबन्धे कविना सङ्घटितं सहृदयै श्चमत्कारकतया ज्ञायमानं तस्य यस्य यशस एव सम्पद्यत इति भावः ।

यदपि तदपि रम्यं काव्यशरीरं यल्लोकस्य किञ्चित् स्फुरित मिदमितीयं बुद्धिरभ्युज्जिहीते, स्फुरणेयं काचिदिति सहृदयानां चमत्कृतिरुत्पद्यते । तदनुगत मपि पूर्वच्छायय वस्तु तादृक्, सुकविर्विवक्षितव्यङ्ग्यवाच्यार्थसमर्पणसमर्थशब्दरचनारूपया बन्धच्छाययोपनिबध्नन् निन्द्यतां नैव याति ।

काव्यशरीरं वाक्यलक्षणम् । स्फुरणेयं काचिदिति बुद्धेराकारबोधकम् । लोकस्येत्यस्य सहृदयानामिति विवरणम्, अन्यथा तदुक्तिविफलताऽऽपत्तिः । एवं बुद्धिरित्यस्य चमत्कृतिरिति, अभ्युज्जिहीत इत्यस्योत्पद्य इति व्याख्यानम्, किन्तु बुद्धिश्चमत्कृतिजनिकेति विशेषः । विवक्षितो व्यङ्ग्यो यत्र तादृशो यो वाच्योऽर्थ स्तस्य समर्पणे बोधने समर्थस्य शक्तस्य शब्दस्य या रचना सैव रूपं यस्या स्तयेति व्युत्पत्तिः ।

प्रबन्धमुपसंहरन्नुपदिशति—

तदित्थं स्थितं—

विवक्षितव्यङ्ग्यसङ्गेन पूर्वार्थसाम्यस्याप्यदूषकत्वे निर्धारिते सतीत्यर्थः ।

'प्रतायन्तां वाचो निमितविविधार्थामृतरसा,
न वादः कर्तव्यः कविभिरनवद्ये स्वविषये ।

परस्वादानेच्छाविरतमनसो वस्तु सुकवेः,
सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥ १२१ ॥

कविभिः कर्तृभिः, निमितो नितरां मितः प्रकटितो निरूपितः परिच्छिन्नो वा विविधाना मनेकप्रकारकाणा मर्थानाममृतमिव समास्वाद्यो रसो यासु याभिर्वा, तादृश्यो वाचः काव्यवाक्यानि, प्रतायन्तां विस्तार्यन्तां निर्म्मीयन्तामिति यावत्। अत एव तैः, अनवद्ये निर्दूषणे, स्वविषये स्वीयतात्कालिकस्फूर्तिविषये वस्तुनि, वादो विवादो वितर्को वा न कर्तव्यः,अपि तु तद्वस्तूपादेयमेव । न तु पुनः सर्वैः परच्छायाऽनुसरणीयैवेति नियमः–यतः परेषां प्राचीनाना मन्येषां कवीनां, स्वस्य सारतया धनरूपस्य, तादृशवस्तुन आदानस्य छायारूपेण ग्रहणस्य, इच्छया विरतं निवृत्तं मनोयस्य तादृशः सुकवेः प्रतिपिपादयिषितं वस्त्वर्थतत्त्वम् , एषा सकलसत्कविमनोगोचरीभूता, भगवती विचित्रैश्वर्यशालिनी, सरस्वती वाग्देवतैव,न तु स्वयं सः, यथेष्टमिच्छाऽनुरूपं, घटयति योजयति सृजतीतिवाऽर्थः ।

प्राचीनार्थसंस्पर्श्यपि चमत्कृतिजनकार्थव्यञ्जनसमर्थमर्थतत्त्वं काव्ये निवेशयतोऽपि नवीनकवेरुपहास्यता न भवतीति निश्चिते सति, तादृशार्थनिवेशे नूतनकवीनां स्वाच्छन्द्यम् । किन्तु ये पुनस्तत्र मनस्विनो जन्मान्तराचरितप्रचुरपुण्यसम्भाराविर्भूतविलक्षणप्रतिभाः कवयितारः, परार्थच्छाया मप्यजिघृक्षवः, तेषां काव्यार्थयोजनासम्पत्ति र्वाग्देवता प्रसादादेवानिर्वचनीया सम्पद्यत इति तत्रैव यतनीयमितितात्पर्यम् ।

सारत्वात् कारिकोत्तरार्धमात्रं व्याचष्टे—

'सन्ति नवाः काव्यार्थाः, परोपनिबद्धार्थविरचने न कश्चित् कवेर्गुणः' इति भावयित्वा परस्वादानेच्छाविरतमनसः सुकवेः सरस्वत्येषा भगवती यथेष्टं घटयति वस्तु । येषां सुकवीनां कवीनां प्राक्तनपुण्याभ्यासपरिपाकवशेन प्रवृत्तिः, तेषां परोपरचितार्थपरिग्रहनिस्पृहाणां स्वव्यापारो न क्वचिदुपयुज्यते सैव भगवती सरस्वती स्वयमभिमत मर्थ माविर्भावयति, एतदेव हि महाकवित्वं महाकवीनामित्याम् ।

गुण इत्यन्तो भागो भावनाविषयार्थपरामर्शकः । तादृशभावनैव तदिच्छाविरतमनस्त्वे मूलम् । शोभना कृति र्येषा मिति विग्रहः । कारिकायां छन्दोऽनुरोधेन

कवेरिति जात्यभिप्रायकमेवैकवचनम् । अतएव वृत्तौ कवीनामिति विवरणम् । प्राक्तनानां पूर्वजन्मार्जितानां पुण्यानां सुकृतानामभ्यासस्य पौनःपुन्येन प्रवृत्तेः परम्पराया वा परिपाकस्य परिणामस्य वशेन बलेन । स्वव्यापार स्तत्कविव्यापारो नोपयुज्यते नापेक्ष्यते । आविर्भावयतीति घटयतीत्यस्य विवृतिः । एतदेव तादृशार्थान्यर्थनिवेशनमेव, हि यस्मान्महाकवित्वम्, तस्मात्तत्रैव यतनीयम् । इतिशब्दः कारिकाग्रन्थसमाप्तिसूचकः । ओङ्कारो ग्रन्थान्ते मङ्गलार्थकः ।

तदुक्तम्—

'ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥' इति ।

वृत्तिकारः प्रक्रान्तं प्रबन्धमुपसंहरन्नाशीर्वादात्मकं मङ्गलमन्ते निबध्नाति—

नित्याक्लिष्टरसाश्रयोचितगुणालङ्कारशोभाभृतो,
यस्माद्वस्तु समीहितं सुकृतिभिः सर्वं समासाद्यते ॥
काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः,
सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भव्यात्मनाम् ॥

नित्यमत्यन्तं सर्वदा वाऽक्लिष्टा-अनतिगूढा निर्दूषणा वा, रसानां शृङ्गारादीनामाश्रयेणाश्रयणेन पोषणेनेति यावद्, उचिता युक्ताश्च ये गुणालङ्कारा माधुर्यप्रमुखोपमाऽऽदयस्तैस्तत्कृतां शोभां विच्छित्तिं बिभर्तीति तादृक्, तस्मात्, पक्षान्तरे-नित्यं प्रत्यहम्, अक्लिष्टोऽपुरातनोऽनुपभुक्त इति यावद्,यो रसो मकरन्दस्तदाश्रयस्तन्निमित्तको यो गुणानां कोमलत्वसौरभप्रभृतीनामलङ्कारपरिपोषस्तेन या शोभा श्रीस्तां बिभ्रतः, यस्मात् काव्यादुद्यानाच्च, सुकृतिभिः प्राचीनपुण्यपरम्पराप्रकटितवासनायुगुलसनाथहृदयैः, पक्षान्तरे-सुविहितज्योतिष्टोमप्रमुखस्वर्गसाधनैः, सर्वमशेषं समीहितमभिलषितं कीर्तिचतुर्वर्गप्रभृति, पक्षान्तरे—कुसुमफलादिमधुसौरभं वसनाभरणादि वा, समासाद्यते सम्यक् प्राप्यते । तादृशेऽखिलानां समस्तानां सौख्यानामखण्डचिन्मयानन्दास्वादानां, पक्षान्तरे-दुःखासम्भिन्नस्वच्छन्दविहरणजन्याह्लादानां, धाम्नि प्रकाशकत्वादाश्रये, पक्षान्तरे-तज्जनकत्वादायतने, काव्याख्ये काव्यनाम्ना प्रसिद्धे, विबुधानां सहृदयानामुद्याने तद्वदानन्ददायकत्वादारामे, पक्षान्तरे-दिवौकसामुद्याने नन्दने, ध्वनिरुक्तस्वरूपो वस्तुविशेषः, पक्षान्तरे-

षट्पदादिस्वनविशेषः, मयाऽस्मिन् ग्रन्थे दर्शितस्तेषां भोगाय यः प्रकाशितः, सोऽयं ध्वनिः कल्पतरुणा देववृक्षेण सर्वाभीष्टसमर्पकत्वादुपमानं साम्यं यस्य, तादृशो महिमा महत्त्वं यस्य तादृशः, भव्यात्मनां भाग्यवतां सहृदयानां पुण्यात्मनां च भोग्य आस्वादयोऽस्त्वित्यर्थः ।

तथा च—'नित्यं स्यात् सन्तते ऽपि च । शाश्वते त्रिषु' इति 'रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः । देहधातुप्रभेदे च पारदस्वादयोः पुमान्' इति च मेदिनी ।

अतः परमुपक्षिप्तानुबन्धचतुष्टयघटकसम्बन्धाभिधेयप्रयोजनावश्यकप्रतिपादनमुपसंहरन् प्रतिपाद्यप्रतिपादकाप्रतिबद्धप्रवृत्त्यौपयिकीभूतं प्रबन्धावसाने स्वनाम सङ्कीर्तयति—

सत्काव्यतत्त्वविषयं स्फुरितप्रसुप्त-
कल्पं मनस्सु परिपक्वधियां यदासीत् ।
तद्व्याकरोत् सहृदयोदयलाभहेतोः,
'आनन्दवर्धन' इति प्रथिताभिधानः ॥

इति श्रीमद्राजानकानन्दवर्धनाचार्यविरचिते 'ध्वन्यालोके' चतुर्थ उद्द्योतः ।

सत्काव्यानां तत्त्वं प्रतिपाद्यसारमेव विषयो यस्य तादृशं, यद् ध्वनिरूपं वस्तु परिपक्वधियां भर्तृहरिप्रमुखप्रौढप्रज्ञाभृतां, मनस्सु, पूर्वं स्फुरितमुज्जृम्भितं पश्चात् प्रतिवादिनामसत्तर्कैः प्रसुप्तकल्पं क्षुद्रमतिपथातिक्रान्ततया तिरोहितमिवासीत् । 'आनन्दवर्धनः' इति प्रथितं विचित्रकृतिनिर्वर्तनद्वाराऽन्वर्थत्वेन प्रख्यातमभिधानं नाम यस्य सः, सहृदयानामुदयलाभहेतोरुन्नतिप्राप्तिनिमित्तं तदिदं ध्वनितत्त्वं, व्याकरोद् व्युदपादयदित्यर्थः ।

मिथिलामहेन्द्रहृद्याद् 'विद्यानाथाद्' द्विजेन्द्रकुलतिलकात् ॥
कुलशीलनिर्मलायां 'मायादेव्यां' समुद्भूतः ॥ १ ॥
गुरुवर-'मार्कण्डेय'-प्रचुरकृपोन्मीलितोज्ज्वलप्रतिभः ।
'बदरीनाथो' वाणी-परिचरणोज्जृम्भितप्रौढिः ॥ २ ॥
कालेन चन्द्रिकायामस्तमितायां च लोचने शीर्णे ।
आकलयितुमालोकं दीधितिमुददिद्युतद् वितताम् ॥ ३ ॥

अङ्गेषुद्विपभू-(१८५६)मित-शाकाब्देषकुहूसुधांऽशुवारे।
पूर्त्ति नीता दीधितिविवृतिर्भूयान्मुदे विदुषाम्॥ ४॥
यत्करुणाकणिकैव प्रबन्धमेतं व्यदीधपत् ताभ्याम्।
गोलोके विलसद्भ्यां समर्पयाम्यानतः शश्वत्॥ ५॥
यत् सार्वभौमविद्या-सद्मनि साहित्यपाठनाभ्यासात्।
अधिगतमिह तद्विवृतं विज्ञा! विज्ञाय मोदन्ताम्॥ ६॥
यदि लेशतोऽपि कांश्चिज्जात्विदमुपकर्तुमञ्जसेशीत।
इदमीयो न तदानीं फलेग्रहिः स्याद् ग्रहः किं मे?॥ ७॥
'अभिनवगुप्ताचार्य'-प्रथितपथेनैव मेऽटतः प्रायः॥
स्खलनं क्वचित् त्वराऽऽहितमिह क्षमेरन् ध्रुवं विबुधाः॥ ८॥
क्रीडत् कलिन्दकन्या-तटीकुटीरे सदा जगज्जनकम्।
वात्सल्यशालि किञ्चिन्मिथुनं भूयो नमस्यामि॥ ९॥

इति मैथिलश्रोत्रियपण्डितश्रीबदरीनाथशर्मनिर्मितायां
ध्वन्यालोकदीधितौ, चतुर्थ उद्द्योतः सम्पूर्णः।

शुभम्भूयात्।

सम्पूर्णोऽयं प्रबन्धः।

सर्वविधपुस्तकप्राप्तिस्थानम्-

चौखम्बा-संस्कृत-पुस्तकालय,

बनारस सिटी।

* श्रीः *

सदीधितिध्वन्यालोकस्य

श्लोकानुक्रमणिका ।

पृ०

अ

अकाण्ड एव विच्छित्ति- (का०) २५१
अक्षरादिरचनेव योज्यते (का०) ४५२
अक्ष्णोः स्फुटाश्रुकलु- (दी०) ७७
अङ्कुरितः पल्लवितः (दी०) १४८
अङ्गं बाध्योऽथ संसर्गी (दी०) २८३
अङ्गाङ्गित्वेऽलङ्कृतीनां (दी०) ४१
अङ्गाधिरोपितमृग- (दी०) ४२
अङ्गेषुद्विपभूमित- (दी०) ४५७
अचतुर्वदनो ब्रह्मा (दी०) ३४६
अज्जाएँ पहारो णवल- (दी०) ५४
अण्णत्त वच्च बालअ ! (वृ०) २३६
अतन्द्रचन्द्राभरणा (दी०) १०९
अतहट्ठिये वि तहसट्ठिये (वृ०) ४१३
अत्ता एत्थ णिमज्जइ ,, १५
अतिक्रान्तसुखाः कालाः ,, २३३
अतो ह्यन्यतमेनापि (का०) ४०६
अदृष्टे दर्शनोत्कण्ठा (दी०) ३६२
अधिकारः फले स्वाम्य- (दी०) २७५
अनध्यवसितावगाहन- (वृ०) ३७२
अनवरतनयनजल- ,, १८३
अन्तरैकार्थसम्बन्धः (दी०) २२०

पृ०

अनाख्येयांशभासित्वं (वृ०) ४०४
अनिष्टस्य श्रुतिर्यद्व- ,, १७२
अनुरागवती सन्ध्या ,, ३७
अनुस्वानामसंलक्ष्य- (दी०) १०९
अनुस्वानोपमात्माऽपि (का०) २२५
अनौचित्यादृते नान्यद् (वृ०) २१३
अपारे काव्यसंसारे ,, ३८२
अप्राधान्यं विधेर्यत्र (दी०) ५८
अभिनवगुप्ताचार्य- (दी०) ४५७
अभिलाषश्चिन्तास्मृति- (दी०) २५९
अभूताहरणं मार्गो (दी०) २२१
अमात्यं सार्थकं वाऽपि (दी०) २००
अमी ये दृश्यन्ते ननु (वृ०) ३७४
अमुं कनकवर्णाभं (दी०) २२८
अम्बा शेतेऽत्र वृद्धा (वृ०) १२९
अयमेकपदे तया वियोगः ,, २३७
अयं स रशनोत्कर्षी ,, २७१
अर्थप्रकृतयः पञ्च (दी०) २२०
अर्थशक्त्युद्भवस्त्वन्यो (का०) १२४
अर्थशक्तेरलङ्कारो (का०) १३४
अर्थान्तरगतिः काक्वा (का०) ३५८
अर्थान्तरे सङ्क्रमित- (का०) ६१

		पृ०
अलङ्कारान्तरव्यङ्ग्य-	(का०)	१५२
अलङ्कारान्तरस्यापि-	(का०)	१३६
अलङ्कृतीनां शक्ताव-	(का०)	२०९
अलं स्थित्वा श्मशाने	(दी०)	२२७
अलसवलितैः प्रेमार्द्रा-	(दी०)	२०२
अल्पमात्रं समुद्दिष्टं	(दी०)	२७५
अल्पीयसाऽपि यत्नेन	(दी०)	४७
अवतंसितमञ्जुमञ्जरे	(दी०)	१९
अवधानातिशयवान्	(का०)	२९१
अवसर रोउंचिअ	(वृ०)	२३४
अवस्थादेशकालादि-	(का०)	४३६
अवस्थाऽऽदिविभिन्नानां	(का०)	४४७
अवस्थाः पञ्च कार्यस्य	(दी०)	२२०
अवान्तरार्थविच्छेदे	(दी०)	२७६
अविरुद्धं तु यद्वृत्तं	(दी०)	२१०
अविरोधी विरोधी वा	(का०)	२७७
अविवक्षितवाच्यस्य	(का०)	१६०
अविवक्षितवाच्यस्य	(दी०)	३०३
अव्युत्पत्तिकृतो दोषः	(वृ०)	१९१
अव्युत्पत्तेरशक्तेर्वा	(का०)	१५८
असंस्तुताध्वपान्थस्य	(दी०)	४०५
असंलक्ष्यक्रमोद्द्योतः	(का०)	६७
असमासा समासेन	(का०)	१८०
अस्पृष्टा दोषमात्राभिः	(दी०)	१८०
अस्फुटस्फुरितं काव्य-	(का०)	३९९
अहिणअ-पओअरसिएसु	(वृ०)	३९७
आ		
आक्रन्दास्तनितैर्विलोचन-	(वृ०)	१०५
आक्षिप्त एवालङ्कारः	(का०)	११०
आख्यायिका कथावत्	(दी०)	२००
आख्यायिका कथाखण्ड-	(दी०)	२००
आगर्भादाविमर्शाच्च	(दी०)	२७६
आदित्योऽयं स्थितो मूढाः	(दी०)	२८८
आद्यन्तपद्यसंयुक्ता	(दी०)	२०१
आनम्यवल्गुवचनै-	(दी०)	४३
आपतन्तममुं दूरा-	(दी०)	१३१
आबद्धकृत्रिमसटा-	(दी०)	४४
आम असइओ ओरम	(वृ०)	३६०
आलोकार्थी यथादीप-	(का०)	२८
आश्चर्यवदभिख्यानं	(दी०)	२२२
आश्लिष्टश्लथभावां	(दी०)	१८०
आहूतोऽपि सहायैरेमी-	(वृ०)	३८
इ		
इतराङ्गं व्यङ्ग्यं स्या-	(दी०)	३४५
इति काव्यार्थविवेको-	(वृ०)	२०८
इतिवृत्तवशायातां	(का०)	२०९
इत्याद्यशेषमिह वस्तु	(दी०)	२१४
इत्युक्तलक्षणो यो	(का०)	३९८
इदं पुनर्वस्तुबुधै-	(दी०)	२७५
इष्टस्यार्थस्य रचना	(दी०)	२२२
ई		
ईसाकलुसस्स वि तुह	(वृ०)	१४५
उ		
उक्त्यन्तरेणाशक्यं यत्	(का०)	५५
उच्चिणसु पडिअ	(वृ०)	१५६
उत्कम्पिनी भयपरिस्ख-	,,	१७५

		पृ०
उत्सिक्तस्य तपःपराक्रम-	(दी०)	६९
उदित्तरकआभोआ	(वृ०)	४१७
उदितं मण्डलमिन्दो-	(दी०)	१३१
उद्दामोत्कलिकां विपाण्डु-	(वृ०)	९९
उद्दीपनप्रशमने	(का०)	२०९
उद्भेदभेदकरणा-	(दी०)	२२०
उन्नतः प्रोल्लसद्धारः	(वृ०)	११८
उन्मदोऽसितमणिप्रभलो-	(दी०)	६८
उपक्षेपः परिकरः	(दी०)	२२०
उपमैका शैलूषी	(दी०)	३८
उप्पहजाआए असोहिणीए	(वृ०)	३७६
उपोढरागेण विलोलतारकं	,,	३४
उल्लङ्घ्य गौरवमुपेक्ष्य	(दी०)	२०३

ऋ

ऋग्वेदाद् भारतीवृत्ति-	(दी०)	२५६
ऋतुमाल्यालङ्कारैः	(दी०)	२११

ए

एकन्तो रुअइ पिआ	(वृ०)	२७९
एकम्पादमथैकस्मिन्	(दी०)	२८०
एका भगवतो मूर्त्ति-	(दी०)	४२९
एकाश्रयत्वे निर्दोषो	(का०)	२८५
एतद्यथोक्तमौचित्य-	(का०)	२०५
एतद्धि न तपः सत्य-	(दी०)	३७
एमेअजणो तिस्सा	(वृ०)	१६२
एवं ध्वनेः प्रभेदाः	(का०)	३९८
एवंवादिनि देवर्षौ	(वृ०)	१२४

ऐ

		पृ०
ऐकार्थ्यमुपनीयन्ते	(दी०)	२२१

ओ

ओङ्कारश्चाथशब्दश्च	(दी०)	४५५

क

कण्ठाच्छित्त्वाऽक्षमाला	(वृ०)	२७९
कथायां सरसं वस्तु	(दी०)	२००
कथाशरीरमुत्पाद्य	(वृ०)	२१८
कथांशानां व्यवच्छेद-	(दी०)	२००
कपोले पत्त्राली	(वृ०)	९३
कमलमनम्भसि, कमले	(दी०)	३४६
कमलाअराण मलिआ	(वृ०)	१५४
करमुदयमहीधरस्तनाग्रे	(दी०)	४३४
करिणीवेहव्वारो महपुत्तो	(वृ०)	४१८
कर्णकलिपतरसाल-	(दी०)	१९
कर्ता द्यूतच्छलानां	(वृ०)	३८९
कर्तृवंशप्रशंसा स्यात्	(दी०)	२००
कर्पूर इव दग्धोऽपि	(दी०)	३८
कस्त्वं भोः कथयामि	(वृ०)	३७५
कस्सवण होइ रोसो	,,	१७
काकः कृष्णः पिकः कृष्णः	(दी०)	६५
काकतीयविभोःकीर्ति-	(दी०)	१३१
कार्यमेकं यथा व्यापि	(का०)	२७५
कालेन चन्द्रिकाया-	(दी०)	४५६
काव्याध्वनि ध्वनिर्व्यङ्ग्य-	(वृ०)	३८५
काव्यस्यात्मा स एवार्थः	(का०)	२१
काव्यस्यात्मा ध्वनि-	(का०)	३
किं [illegible]	(वृ०)	७२

		पृ०
किमपि किमपि मन्दं	(दी०)	६८
कुरङ्गीवाङ्गानि स्तिमित-	(दी०)	३५७
कुरवक ! कुचाघातक्रीडा	(दी०)	२७०
कुविआओ पसण्णाओ	(वृ०)	५४
कृतककुपितैर्बाष्पा-	(दी०)	१७८
कृते वरकथाऽऽलापे	(वृ०)	४१६
केलीकन्दलितस्य	(दी०)	१४९, ३५२
कोपात्कोमललोल-	(वृ०)	१०६
को वा दैवतदृष्टिनि	(दी०)	३५४
कोषः श्लोकसमूहस्तु	(दी०)	२०१
क्रमेण प्रतिभात्यात्मा	(का०)	१०९
क्रामन्त्यः क्षतकोमला-	(वृ०)	२७२
क्रीडत्कलिन्दकन्या	(दी०)	४५७
क्रोधेनावमृशेद्यत्र	(दी०)	२२१
क्व सूर्यप्रभवो वंशः	(दी०)	३५३
क्वाकार्यं शशलक्ष्मणः	(वृ०)	२६२
क्षिप्तो हस्तावलग्नः	,,	७३
ख		
खं येऽत्युज्ज्वलयन्ति	(वृ०)	१२३
खणपाहुणिआ देवर	,,	३८७
खण्डकाव्यं भवेत्काव्य-	(दी०)	१९९
ग		
गअणं च मत्तमेहं	(वृ०)	६६
गणिकासु विधेयो न	(दी०)	१४१
गाढालिङ्गणरहसु-	(दी०)	१३०
गुणः कृतात्मसंस्कारः	(दी०)	२७५
गुणानाश्रित्य तिष्ठन्ती	(का०)	१८१
गुरुवरमार्कण्डेयप्रचुर	(दी०)	४५६
गृहेष्वध्वसु वा नान्नं	(दी०)	४०
च		
चक्राभिघातप्रसभाज्ञयैव	(वृ०)	९८
चक्राभिघातप्रसभाज्ञयैव	(दी०)	३९
चञ्चद्भुजभ्रमितचण्ड-	(वृ०)	८५
चतुःषष्टिविधं ह्येत-	(दी०)	२१०
चन्दनासक्तभुजग-	(वृ०)	१४४
चन्दमऊएहिं णिसा	,,	१३६
चमहिअमाणसकञ्चण	,,	११५
चरणपतनप्रत्याख्याना-	(दी०)	६९
चलापाङ्गां दृष्टिं स्पृशसि	(वृ०)	९७
चित्रं शब्दार्थभेदेन	(का०)	३७७
चुम्बिज्जइ सअहुत्तं	(वृ०)	५३
चूअङ्कुरावअंसं	,,	१६८
ज		
जन्मान्तरीणरमण-	(दी०)	७७
जरानेयं मूर्ध्नि ध्रुव-	(दी०)	४३४
जाएज्ज वणुद्देशे	(वृ०)	१४३
झ		
झगिति कनकचित्रे	(वृ०)	१५६
ढ		
ढुण्ढुल्लन्तो मरिहिसि	(दी०)	१४९
ण		
ण अ ताण घडइ	(वृ०)	४३८
त		
तं ताणसिरिसहो-	(वृ०)	१४०
तत्परावेव शब्दार्थौ	(का०)	४५
तत्त्वस्यान्यस्य सद्भावे	(का०)	४५१

		पृ०
तत्सादृश्यमभावश्च	(दी०)	२५७
तथाभूतां दृष्ट्वा नृपसदसि	(दी०)	३६०
तथाभूते तस्मिन्मुनि-	(दी०)	२२४
तद्गेहं नतभित्ति,	(वृ०)	२४४
तद्वत्सचेतसां सोऽर्थो	(का०)	३०
तद्वक्त्रामृतपान-	(दी०)	७७
तदुदाहरणं नाम्ना	(दी०)	२०१
तदोडुराजः ककुभः	(दी०)	४३४
तन्वीमेघजलार्द्रपल्लव-	(वृ०)	८०
तन्वी श्यामा शिखरिदशना	(दी०)	२०३
तमर्थमवलम्बन्ते	(का०)	८२
तमर्थमवलम्बन्ते	(वृ०)	१८४
तरङ्गभ्रूभङ्गाक्षुभित-	,,	७९
तस्मात्तु मिथुनादेकं	(दी०)	२२
तस्याङ्गानां प्रभेदा ये	(का०)	८८
तस्याङ्गानां प्रभेदा ये	(दी०)	४१३
तस्या विनाऽपि हारेण	(वृ०)	११२
तत्र पूर्वमनन्यात्म	,,	४५०
तत्र वाच्यः प्रसिद्धो यः	(का०)	१२
तत्रापवादसम्फेटौ	(दी०)	२२१
ताराणां सङ्ख्यया पद्यै-	(दी०)	२०१
ताला जाअन्ति गुणा-	(वृ०)	६४
तालैः शिञ्जावलयसुभगैः	,,	२३४
तेषां गोपवधूविलास-	,,	८०
त्रासाकुलः परिपतन्	,,	१४६
त्रिभुवनकमनं तमाल-	(दी०)	२०

		पृ०
दन्तक्षतानि करजैश्च	(वृ०)	३९६
दयितस्य गुणाननुस्मरन्ती	(दी०)	२६१
दिङ्मात्रं तूच्यते येन	(का०)	८९
दिशाऽनयाऽनुसर्तव्यो	(का०)	४१२
दीर्घीकुर्वन् पटुमदकलं	(वृ०)	३९४
दीव्यत्सु दिव्यकाव्येषु	(दी०)	३९७
दुराराधा राधा सुभग !	(वृ०)	३६६
दृष्टपूर्वा अपि ह्यर्थाः	(का०)	४१४
दृष्टपूर्वा अपि ह्यर्थाः	(दी०)	४३१
दृष्ट्या केशवगोपराग-	(वृ०)	११६
देआ पसिअ णिवत्तसु	,,	१७
देव्वाएत्तम्मि फले	,,	१४१
देवीस्वीकृतमानसस्य	(दी०)	२२४
दैन्येऽथ लाटानुप्रासे	(दी०)	२४२
द्वीपादन्यस्मादपि	(दी०)	२४३
ध		
धृतिः क्षमा दया शौचं	(दी०)	१६०
ध्वनिवृत्तिकर्तृवाणीं	(दी०)	१
ध्वनेरित्थं गुणीभूत-	(का०)	४३५
ध्वनेर्यः सगुणीभूत-	(का०)	४०५
ध्वनेर्यः सगुणीभूत-	(दी०)	४३३
ध्वन्यात्मभूते शृङ्गारे	(वृ०)	९१ । ९६
न		
न चेह जीवितः कश्चिद्	(दी०)	२२७
न यत्र दुःखं न सुखं	(दी०)	२२८
नयनानन्ददायीन्दो-	(दी०)	४१

		पृ०
न सोऽस्ति प्रत्ययो लोके	(दी०)	६४
नाटकमथ प्रकरणं	(दी०)	१९९
नाटिका त्रोटकं गोष्ठी	(दी०)	२००
नान्ध्रीपयोधर इवाति-	(दी०)	५२
नितरां परुषां सरोज-	(दी०)	४२
नित्याक्लिष्टरसाश्रयो-	(वृ०)	४५५
निद्राकैतविनः प्रियस्य	,,	४१०
निन्दन्त्वत्र कुलस्त्रियः	(दी०)	६९
निर्वाणभूयिष्ठमथास्य	(वृ०)	१२५
निर्व्यूढावपि चाङ्गत्वे	(का०)	९७
निषेधो वक्तुमिष्टस्य	(दी०)	३५
नीरक्षीरनयाद्यत्र	(दी०)	४०
नीरसस्तु प्रबन्धो यः	(वृ०)	२५७
नीवाराः शुकगर्भकोटर-	,,	२३९
नोकल्पापायवायो-	,,	१०३
न्यक्कारो ह्ययमेव मे	,,	२३९
प		
पत्युश्शिरश्चन्द्रकलामनेन	(वृ०)	३६४
पदानां स्मारकत्वेऽपि	,,	१७२
पन्थिअ ण एत्थ	(दी०)	११०
परार्थे यःपीडामनुभवति	(वृ०)	५९,३७४
परिपन्थिरसाङ्गस्य	(दी०)	२१०
परिम्लानं पीनस्तन-	(वृ०)	५३
पश्येत्कश्चिच्चलचपल	(दी०)	७८
पाण्डुक्षामं वदनं हृदयं	(दी०)	२५९,२६
पादाहतं यदुत्थाय	(दी०)	४२
पुरः सूरीणां भणकेवमानवी	(दी०)	२४९

		पृ०
पूर्वे विशृङ्खलगिरः	(वृ०)	२५७
प्रकारोऽन्यो गुणीभूत-	(का०)	३४४
प्रकारोऽयं गुणीभूत-	(का०)	३६६
प्रकृतस्य निषेधेन	(दी०)	३७
प्रकृतार्थेन वाक्येन	(दी०)	३४
प्रकृष्यमाणो यो भावो-	(दी०)	२४
प्रत्ययैरनुपाख्येयै-	(दी०)	४७
प्रतायन्तां वाचो-	(वृ०)	४५३
प्रतिस्कन्धं भिन्नवाक्य-	(दी०)	२०१
प्रतीयमानं पुनरन्यदेव	(का०)	८१३
प्रथमश्रवणाच्छन्दः	(दी०)	२६
प्रधानगुणभावाभ्यां	(का०)	३७७
प्रधानगुणभावाभ्यां	(दी०)	३२
प्रधानत्वं विधेर्यत्र	(दी०)	५८
प्रधानेऽन्यत्र वाक्यार्थे	(का०)	७१
प्रबन्धे मुक्तके वाऽपि	(का०)	२५०
प्रभेदस्यास्य विषयो-	(का०)	३६३
प्रभ्रश्यत्युत्तरीयत्विषि	(वृ०)	२४०
प्रयच्छतोच्चैः कुसुमानि	,,	३६४
प्ररोचना विचलन-	(दी०)	२२१
प्रवातनीलोत्पल-	(दी०)	४०
प्रसन्नगम्भीरपदाः	(का०)	३४८
प्रसादानन्दसमयाः	(दी०)	२२१
प्रसादे वर्तस्व प्रकटय	(दी०)	२५२
प्रसिद्धेऽपि प्रबन्धानां	(का०)	२७३
प्रातुं धनैरर्थिजनस्य	(वृ०)	१६६
प्राप्तश्रीरेष कस्मात्	,,	१३७

		पृ०
प्रारम्भेऽस्मिन्स्वामिनो-	(दी०)	२२१
प्रासङ्गिकं प्रदेशस्थं	(दी०)	२७६
प्रेङ्खत्प्रेमप्रबन्ध-	(दी०)	१५८
प्रौढोक्तिमात्र निष्पन्न-	(का०)	१२९
ब		
बहूनां जन्मनामन्ते	(दी०)	४२८
बहूनां समवेतानां	(दी०)	२८३
बिन्दुप्रयत्नानुगमा-	(दी०)	२२०
बीजं बिन्दुः पताका च	(दी०)	२७५
बीज-बिन्दु-पताकाऽऽख्य-	(दी०)	२२०
बोद्धृस्वरूपसङ्ख्या-	(दी०)	१८
ब्राह्मणातिक्रमत्यागो	(दी०)	३६२
भ		
भक्ताभिलषितपूर्त्ति-	(दी०)	४०५
भगवान् वासुदेवश्च	(दी०)	४२६
भम धम्मिय वीसत्थो	(वृ०)	१४
भयानको मुखपरो	(दी०)	२०१
भवन्ति यत्र दीप्ताश्च	(दी०)	२००
भारतं परमं पुण्यं	(दी०)	४२५
भारतं सर्वशास्त्राणा-	(दी०)	४२५
भावानचेतनानपि	(वृ०)	३८२
भूरेणुदिग्धान्नवपारिजात-	,,	२८९
भ्रमिमरतिमलसहृदयतां	,,	११४, २६३
म		
मथ्नामि कौरवशतं	(दी०)	३५९
मदमुखरकपोतमुन्नयूरं	(वृ०)	२३९
		पृ०
मध्ये व्योम स्फुरति	(दी०)	२२५
मनुष्यवृत्त्या समुपाचरन्तं	(वृ०)	२४०
मरकतमणिमेदिनी-	(दी०)	१३५
मल्लिकामुकुले चण्डि	(दी०)	१३१
महमह इन्ति भणिन्तउ	(वृ०)	४४६
महासत्त्वोऽतिगम्भीरः	(दी०)	२१४
महिलासहस्सभरिए	(दी०)	१३१
माधुर्य्यव्यञ्जकैर्वर्णै-	(दी०)	१८१
मा निषाद प्रतिष्ठां त्व-	(वृ०)	२३
मा पन्थं रुन्धीयो	,,	२३५
मायापरः प्रचण्डश्च-	(दी०)	१९५
मिथिलामहेन्द्रहृद्यात्	(दी०)	४५६
मीनवतीनयनाभ्यां	(दी०)	१९
मुक्तकं श्लोक एवैक-	(दी०)	१९९
मुखं बीजसमुत्पत्ति-	(दी०)	२२०
मुख्यस्यार्थावताराय	(दी०)	२००
मुख्यां वृत्तिं परित्यज्य	(का०)	५६
मुख्या महाकविगिरा-	(का०)	३५७
मुख्यार्थबाधे तद्योगे	(दी०)	५७
मुख्या व्यापारविषया-	(वृ०)	२५७
मुनिर्जयति योगीन्द्रो-	,,	४३१
मुहुरङ्गुलिसंवृताधरोष्ठं	,,	२३८
य		
यः कालागुरुपत्र-	(दी०)	१४९
यः प्रथमः प्रथमः स तु	(वृ०)	४०९
यः संयोगवियोगाभ्यां	(दी०)	४७

		पृ०
यत्कटाक्षो दयासान्द्रो-	(दी०)	४०५
यत्करुणाकणिकैव	(दी०)	४५७
यत्र प्रतीयमानोऽर्थः	(का०)	१५३
यत्रार्थः शब्दो वा	(का०)	३१
यत्सामग्र्येऽपि हेतूनां	(दी०)	३८
यत्सार्वभौमविद्या-	(दी०)	४५७
यत्स्यादनुचितं वस्तु	(दी०)	२१०
यथा पदार्थद्वारेण वाक्यार्थः	(का०)	२८
यथा पदार्थद्वारेण	(दी०)	३१२
यथा यथा विपर्य्येति-	(वृ०)	४२३
यदपि तदपि रम्यं	(का०)	४५३
यदि लेशतोऽपि कांश्चि-	(दी०)	४५७
यद्यद्विभूतिमत्सत्त्वं	(दी०)	४२७
यद्वञ्चनाहितमतिर्बहु-	(वृ०)	२४२
यद्वाम्याभिनिवेशित्वं	(दी०)	२२२
यन्नादतस्त्वमलिना	(दी०)	४४
यस्त्वलक्ष्यक्रमव्यङ्ग्यो-	(का०)	१७३
यस्माल्लोकत्रयं चैतद्	(दी०)	२३०
यस्मिन्नस्ति न वस्तु	(वृ०)	८
यस्मिन् रसो वा भावो वा	,,	३८५
यस्य प्रतीतिमाधातुं	(दी०)	५९
यस्येयं वसुधा कृत्स्ना	(दी०)	४२९
या चित्रयुद्धभ्रमशीघ्रपात-	(दी०)	२५६
या निशा सर्वभूतानां	(वृ०)	१६३
या भवन्तमनलः पवनो-	(दी०)	११९
या वाक्प्रधाना पुरुषप्रयोज्या	(दी०)	२५६
या व्यापारवती रसान्	(वृ०)	३९२
या श्लक्ष्णनेपथ्यविधान-	(दी०)	२५६
या सत्त्वजेनेह गुणेन युक्ता	(दी०)	२५६
युक्तवियुक्तदशाया	(दी०)	२८७
यूनोरेकतरस्मिन्	(दी०)	८९
ये जीवन्ति न मान्ति ये	(वृ०)	२४१
येन केनापि तालेन	(दी०)	२०१
येन ध्वस्तमनोभवेन	(वृ०)	१११
ये रसस्याङ्गिनो धर्मा-	(दी०)	८७
यो यः शस्त्रं बिभर्त्ति	(वृ०)	८६
योऽर्थः सहृदयश्लाघ्यः	(का०)	१२
र		
रक्तस्त्वं नवपल्लवै-	(वृ०)	१००
रतिर्देवादिविषया	(दी०)	२०९
रत्नानां सङ्ख्यया पद्यै-	(दी०)	२०१
रम्या इति प्राप्तवतीः	(वृ०)	१४७
रविसंक्रान्तलक्ष्मीक-	,,	६५
रसबन्धोक्तमौचित्यं	(का०)	२०६
रसभावादिविषय-	(वृ०)	३८१
रसभावादिसम्बद्धा	(का०)	४४७
रसभावादितात्पर्य-	(का०)	७५
रसभासतदाभास-	(का०)	६७
रसवन्ति हि वस्तूनि	(वृ०)	९५
रसविच्छेदहेतुत्वान्-	(दी०)	२६०
रसव्यक्तिमपेक्ष्यैषा	(दी०)	२१०
रसाक्षिप्ततया यस्य	(का०)	९२
रसादिषु विवक्षा तु	(वृ०)	३८१
रसाद्यनुगुणत्वेन	(का०)	२९५

		पृ०
रसानुगुणतां वीक्ष्य	(दी०)	२१०
रसान्तरान्तरितयो-	(का०)	२८८
रसान्तरसमावेशः	(का०)	२७४
रसाभावाङ्गभावस्तु	(वृ०)	९६
राजानमपि सेवन्ते	,,	३६९
रूढा ये विषयेऽन्यत्र	,,	५६
रूपकादिरलङ्कार-	(का०)	१३४
रोलम्बाः परिपूरयन्तु	(दी०)	२६१
रौद्रादयो रसा दीप्त्या	(का०)	८४
ल		
लाक्षागृहानलविषान्न-	(दी०)	३५९
लच्छी दुहिदा जामाउओ	(वृ०)	३४८
लावण्यकान्तिपरि-	,,	१३८
लावण्यद्रविणव्ययो-	,,	३७०
लावण्यसिन्धुपरैव हि	,,	३४५
लिखन्नास्ते भूमिं बहि-	(दी०)	२०२
लीलादाढा शुध्यूढ्ढा	(दी०)	२२६
लीलाविलासो विच्छित्ति-	(दी०)	११४
लोकयात्राविधानं च	(दी०)	४२४
व		
वक्त्रं वाऽपरवक्त्रं वा	(दी०)	२००
वच्च मह्व्विअ	(वृ०)	१६
वत्से मा गा विषादं	,,	१२८
वर्ण्यमानाङ्कविरुद-	(दी०)	२०१
वसन्तमत्तालिपरम्परो-	(दी०)	४३४
वाक्यार्थमितये तेषां	(दी०)	३०७
वाग्धेनुर्दुग्ध एकं	(दी०)	२४

		पृ०
वाचकत्वाश्रयेणैव	(का०)	५७
वाचस्पतिसहस्राणां	(का०)	४४८
वाच्यवाचकचारुत्व-	(का०)	७०
वाच्यस्तदनुमितो वा	(दी०)	३१,३३६
वाच्यानां वाचकानां च	(का०)	२९४
वाच्यालङ्कारवर्गोऽयं	(का०)	३४९
वाणिअअ हत्तिदन्ता	(वृ०)	१६९
वाणीरकुडङ्गोड्डीण-	,,	१५५
वाल्मीकिव्यतिरिक्तस्य	,,	४४५
वाल्मीकिव्यासमुख्याश्च	,,	२५८
वासनात्सर्वभूतानां	(दी०)	४२९
वासुदेवपरं ज्ञानं	(दी०)	४२८
वासुदेव परा वेदा-	(दी०)	४२८
वासुस्सर्वनिवासश्च	(दी०)	४२९
विच्छित्तिशोभिनैकेन	(वृ०)	१७२
विज्ञायेत्थं रसादीना-	(का०)	२९४
विनेयानुन्मुखीकर्तुं-	(वृ०)	२९२
विभावभावानुभाव-	(का०)	२०८
विभाव्यते हि रत्यादि-	(दी०)	२०९
विमतिविषयो य आसी-	(का०)	३४०
विमानपर्यङ्कतले निषण्णाः	(वृ०)	२८९
विरुद्धैकाश्रयो यस्तु	(का०)	२८४
विरोधमविरोधञ्च	(का०)	२९०
विरोधिरससम्बन्धि-	(का०)	२५१
विवक्षा तत्परत्वेन	(का०)	९६
विवक्षिते रसे लब्ध-	(का०)	२५८
विशेषादाभिमुख्येन	(दी०)	२०९

		पृ०
विषमकाण्डकुटुम्बक-	(दी०)	१५८
विषयाश्रयमप्यन्य-	(का०)	१९८
विसमअओ च्चिअ	(वृ०)	१६४
विस्रम्भोत्था मन्मथाज्ञा-	,,	३५८
वीराणं रमइ घुसिण-	,,	१३९
वेदयोगं सविज्ञानं	(दी०)	४२४
व्यङ्ग्यव्यञ्जकभावेऽस्मिन्	(वृ०)	४२०
व्यङ्ग्यव्यञ्जकसम्बन्ध-	(वृ०)	३३
व्यङ्ग्यस्य यत्राप्राधान्यं	(का०)	४५
व्यज्यन्ते वस्तुमात्रेण	(का०)	१५१
व्रीडायोगान्नतवदनया	(वृ०)	१७७
श		
शब्दतत्त्वाश्रयाः काश्चि-	(का०)	४००
शब्दप्राधान्यमाश्रित्य	(दी०)	२३
शब्दबोध्यो व्यन-	(दी०)	३१,२४६,३१७
शब्दस्योर्ध्वमभिव्यक्ते-	(दी०)	४७
शब्दार्थशक्त्या वाऽऽक्षिप्तो	(का०)	१२७
शब्दार्थशासनज्ञान-	(का०)	२५
शरीरीकरणं येषां	(का०)	१५०
शषाभ्यां रेफसंयोगै-	(दी०)	२५७
शषौ सरेफसंयोगौ-	(का०)	१७४
शाश्वतं ब्रह्म परमं	(दी०)	४२६
शिखिरिणि क नु नाम	(वृ०)	५०
शीतांशोरमृतच्छटा-	(दी०)	१०८
शून्यं वासगृहं विलोक्य		४१०
शृङ्गार एव मधुरः	(का०)	८३
शृङ्गार एव मधुरः	(दी०)	१८९
शृङ्गारस्याङ्गिनो यत्ना-	(का०)	९०
शृङ्गारी चेत्कविः काव्ये	(वृ०)	३८२
शृङ्गारे विप्रलम्भाख्ये	(का०)	८४
शेषैर्वर्णैर्यथायोगं	(दी०)	२०४
श्यामास्वङ्गं चकितहरिणी-	(वृ०)	१०६
श्रीपरिचयाज्जडा अपि	(दी०)	३६२
श्रुतिदुष्टादयो दोषा	(का०)	८७
श्रुत्यनन्तरभावी यः	(दी०)	२६
श्लाघ्याशेषतनुं सुदर्शन-	(वृ०)	११३
स		
संलापकं श्रीगदितं	(दी०)	२००
संवादास्तु भवन्त्येव	(का०)	४४९
संवादो ह्यन्यसादृश्यं	(का०)	४४९
संस्कृतं नाम दैवी वा-	(दी०)	१९९
स एकस्त्रीणि जयति	(दी०)	३८
स एवेदं ससर्जाग्रे	(दी०)	४२८
सकृद्वृत्तिस्तु धर्मस्य	(दी०)	७३
सङ्केतकालमनसं	(वृ०)	१२६
सगुणीभूतव्यङ्ग्यैः	(का०)	३८५
सज्जेहि सुरहिमासो	(वृ०)	१३१
सञ्जहार शरत्कालः	(दी०)	३७
सत्काव्यतत्त्वविषयं	(वृ०)	४५६
सत्यं मनोरमा रामाः	,,	२९३
सत्यं मनोरमा रामाः	(दी०)	१६९
सन्ति सिद्धरसप्रख्या-	(वृ०)	२३८
सन्धिसन्ध्यङ्गघटनं	(का०)	२०९
सत्यर्थे पृथगर्थाया-	(दी०)	९१

		पृ०
स पातु वो यस्य हता-	(दी०)	७७
समर्पकत्वं काव्यस्य	(का०)	८६
समर्पकत्वं काव्यस्य	(दी०)	११६
समविसमणिव्विसेसा	(वृ०)	२४३
समस्तगुणसंपदः	(दी०)	७७
समस्तात्युद्भटपदाम्भोजः	(दी०)	१८१
समाप्यते तयोर्नाद्या	(दी०)	२००
समुत्थिते धनुर्ध्वनौ	(दी०)	२८४
सम्भोगो विप्रयोगश्च	(दी०)	११०
सरसो विपरीतश्चेत्	(दी०)	२०
सरस्वती स्वादु तदर्थवस्तु	(का०)	२४
सरूपसयोगयुतां	(दी०)	२५६
सर्वत्र ज्वलितेषु	(दी०)	२२४
सर्वेऽपि विस्मृतिपथं	(दी०)	६९
सर्वेष्वेव प्रभेदेषु	(का०)	१५८
सर्वैकशरणमक्षय-	(वृ०)	१२२
स वक्तुमखिलाञ्छक्तो-	,,	१४०
सविभ्रमस्मितोद्भेदा	,,	४०८
सशोणितैः क्रव्यभुजां	,,	१८८
साअरविइण्णजोव्वण-	,,	१३२,४१७
साकं कुरङ्गकदृशा	(दी०)	७७
सा कथा नाम तद्गर्भे	(दी०)	२००
सिज्जइ रोमञ्चिज्जइ	(वृ०)	४३३
सिहिपिच्छकण्णऊरा	,,	१३३
सिहिपिञ्छकण्णऊरा	,,	१७०

		पृ०
सुतनु जहिहि कोपं	(दी०)	६९
सुप्-तिङ्-वचन-सम्बन्धै-	(का०)	२२८
सुरभिसमये प्रवृत्ते	(वृ०)	४१७
सुराः समभ्यर्थयितार एते	(दी०)	२४१
सुवर्णपुष्पां पृथिवीं	(वृ०)	४९
सैषा सर्वत्र वक्रोक्ति-	(दी०)	१२५
सैषा सर्वत्र वक्रोक्ति-	(वृ०)	३५१
सोऽपूर्वो रसनाविपर्यय-	(दी०)	३७७
सोऽर्थस्तद्व्यक्तिसामर्थ्य-	(का०)	२७
स्त्रियो नरपतिर्वह्नि-	(दी०)	२०७
स्निग्धश्यामलकान्ति-	(वृ०)	६२
स्मरनवनदीपूरेणोढाः	(दी०)	१७९
स्मरशरविधुराया	(दी०)	३६
स्मितं किञ्चिन्मुग्धं	(वृ०)	४०७
स्वं स्वं निमित्तमासाद्य	(दी०)	२८८
स्वतेजःक्रीतमहिमा	(वृ०)	४०९
स्वसामर्थ्यवशेनैव	(का०)	२९
स्वादुकाव्यरसोन्मिश्रं	(दी०)	२९२
स्वेच्छाकेसरिणः	(वृ०)	१

ह

हंसानां निनदेषु यैः	(वृ०)	४४०
हरस्तु किञ्चित्परिलुप्त-	(दी०)	३६३
हिअअट्ठाविअमण्णुं	(वृ०)	१४२
होइ ण गुणाणुराओ	(दी०)	४९

इति सदीधितिध्वन्यालोकस्य श्लोकानुक्रमणिका ।

DONATED TO
TTD CENTRAL LIBRARY

१ मेघदूतम् । संजीविनी—चारित्रवर्द्धिनी-भावप्रबोधिनी-
व्याख्यात्रयोपेतं । सटिप्पणम् । ०-८

२ कुमारसम्भवम् । सञ्जीविनी-चारित्रवर्द्धिनी-शिशुहितै-
षिणीव्याख्यात्रयोपेतम् । १-४

३ वृत्तरत्नाकरः । नारायणभट्टीयव्याख्या-श्रुतबोधच्छन्दो-
मञ्जरीसुवृत्ततिलक-विषमस्थलटिप्पणोपेतः । १-८

४ छन्दोमञ्जरी । सटीका । ०-१२

५ साहित्यदर्पणः । परीक्षोपयोगिटीकासहितः । ४-०

६ शिशुपालवधम् । वल्लभदेवकृतया सन्देहविषौषधिव्याख्यया-
मल्लिनाथकृतया सर्वङ्कषाव्याख्यया चोपेतम् । उत्तम संस्करण ३-८
विद्यार्थी संस्करण

७ कादम्बरी-पूर्वार्द्धम् । परीक्षोपयोगिटीकासहितम् । ५

८ ,, सम्पूर्ण । सटीक । ६-०

९ नैषधीयचरितम् । मल्लिनाथकृतटीकासहितम् १-१२ सर्गः ३-८

१० ,, नारायणीटीकासहितम् । ६-०

११ मुद्राराक्षसनाटकम् । भावबोधिन्याख्यया संस्कृतव्या-
ख्यया आशुबोधिन्याख्यया हिन्दीव्याख्यया चोपेतम् । २-०

१२ अभिज्ञानशकुन्तलम् । किशोरकेली नाम्नी संस्कृतव्याख्या-
रुचिरानाम्नीहिन्दीटीकासहितम् । राज संस्करण २-०
विद्यार्थी संस्करण १-१२

१३ प्राकृतप्रकाशः । परीक्षोपयोगिबृहट्टिप्पणीसहितः । १-४

१४ रामायणचम्पुः । सटीकः । २-०

१५ वेणीसंहारः । सटीकः । १-४

१६ काव्यप्रकाशः । परीक्षोपयोगिनागेश्वरीटीकासहितः । ४-०

१७ ,, सुधासागरीव्याख्यासहितः । ५-०

१८ रसमञ्जरी । व्यङ्ग्यार्थकौमुदी तथा प्रकाशव्याख्याद्वयोपेता ३-०

१९ ,, परीक्षोपयोगिसुरभिटीकोपेता १-४

प्राप्तिस्थानम्—चौखम्बा-संस्कृत-पुस्तकालय, बनारस सिटी ।